No. LXXVII.

THE
ÎSÂNASIVAGURUDEVAPADDHATI

BY

ÎSÂNASIVAGURUDEVAMISRA

EDITED BY

MAHÂMAHOPÂDHYÂYA
T. GAṆAPATI SÂSTRÎ,
HONORARY MEMBER OF THE ROYAL ASIATIC SOCIETY OF
GREAT BRITAIN AND IRELAND.
Curator of the Department for the publication
of Sanskrit Manuscripts, Trivandrum.

Part—III. Kriyâpâda 1—30 Patalas.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF
HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS
1922.

(All Rights Reserved.)

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ७७.

ईशानशिवगुरुदेवपद्धतिः

श्रीमदीशानशिवगुरुदेवमिश्रविरचिता

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण
लण्डनपुरस्थराजकीयैष्याखण्डीयविद्यासेवकसमाजपूज्यसभ्यपदभाजा
महामहोपाध्यायेन
त. गणपतिशास्त्रिणा
संशोधिता ।

तृतीयो भागः—क्रियापादे १—३० पटलाः ।

सा च
अनन्तशयने
महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशिता ।

कोलम्बाब्दाः १०९७, क्रैस्ताब्दाः १९२२.

MOTI LAL BANARSI DAS
LAHORE.
BOOK-SELLERS

विषयानुक्रमणी ।

विषयाः.	पृष्ठम्.
शिवसद्भावाधिकारः	१
आगमप्रामाण्यस्थापनाधिकारः	४
तत्त्वमातृकाधिकारः	१०
वस्तुनिर्देशाधिकारः	१८
पशुविचाराधिकारः	२०
पाशविचाराधिकारः	२३
पतिविचाराधिकारः	२४
शक्तिविचाराधिकारः	२५
विचारपदार्थाधिकारः	२७
क्रियाचर्यापदार्थाधिकारः	२८
स्नानाचमनाधिकारः	,,
सकलीकरणाधिकारः	३३
कालभेदेन सावित्रीध्यानभेदः	३४
दशदिक्तर्पणम्	३५
दिक्पतितर्पणम्	३६
आग्नेयस्नानाधिकारः	३७
ऐन्द्रवायव्यादिस्नानविधिः	३९
भूतशुद्ध्यधिकारः	४०
आत्मशुद्ध्यधिकारः	४२
आसनाधिकारः	४४
आवाहनाधिकारः	४६
अर्घ्यविधिः	४८
पाद्याचमनाधिकारः	४९
स्नानाधिकारः	५०
वस्त्रभूषणाधिकारः	५२
गन्धाधिकारः	,,
पुष्पाधिकारः	,,
धूपदीपाधिकारः	५४
नित्यनैवेद्यविधिः	५५
नैमित्तिककाम्यविधिः	,,
उपचारभेदेन पूजाभेदाः	५७
मातृकान्यासः	५९
पञ्चब्रह्मस्वरूपन्यासादि	६१
मन्त्रोद्धाराधिकारः	६५
दशमुद्राधिकारः	७२
पञ्च मुद्राः	७३
चतुरश्रसाधनम्	७४
कुण्डाधिकारः	,,
भद्रकाधिकारः	७७
सर्वतोभद्राधिकारः	८०
पार्वतीकान्तप्रासादाधिकारः	८१
लतालिङ्गोद्भवाधिकारः	८२
स्वस्तिकाब्जद्वयाधिकारः	,,
स्वस्तिकसर्वतोभद्राणि	८३
चक्राब्जाधिकारः	,,
दलभेदलक्षणम्	८५
स्रुक्स्रुवाधिकारः	८६
अरणिविधिः	८७
इध्माबर्हिषां विधिः	,,
आहुतिप्रमाणम्	८८
पात्रमानम्	८९
पात्रादिद्रव्यशुद्धिः	,,
अङ्कुरार्पणविधि	९१
साधकाचार्यलक्षणम्	९५
सूर्यपूजामूर्तयः	१०१
आवरणमूर्त्यधिकारः	१०२
सूर्यपूजाधिकारः	११०
एकावरणार्चनाधिकारः	११२
पञ्चावरणपूजाविधिः	१२५
अग्निकार्यविधिः	१२९
सामान्यक्रियाधिकारः	१३७
समयदीक्षाधिकारः	१४४
षडध्वनिर्णयाधिकारः	१४९
निर्वाणदीक्षाधिकारः	१७१
साधकदीक्षाधिकारः	१८७
आचार्यमहाभिषेकाधिकारः	१९१

विषयाः.	पृष्ठम्.
आचार्यककामस्यानुकल्पः	१९६
प्रायश्चित्ताधिकारः	१९८
पवित्रारोपणाधिकारः	२०२
वसन्तपूजाधिकारः	२१८
दमनकपर्वाधिकारः	२२३
भूलक्षणाधिकारः	२२६
शङ्कुच्छायाधिकारः	२२९
अङ्गुलादिविधिः	२३३
पदविन्यासग्रामपुरादिलक्षणम्	२३४
देशकालाधिकारः	२४१
कर्षणाधिकारः	२४५
शल्योद्धाराधिकारः	२४९
वास्तूत्पत्त्यधिकारः	२५१
वास्तुपूजाधिकारः	२५४
प्रथमेष्टकाधिकारः	२५७
गर्भन्यासाधिकारः	२६२
नानाविमानलक्षणाधिकारः	२६५
तत्रादौ विमानविभागः	,,
नलिनकम्	२६७
प्रलीनकम्	२६९
स्वस्तिकम्	२७०
चतुर्मुखम्	,,
सर्वतोभद्रम्	,,
हस्तिपृष्ठम्	२७१
समुज्ज्वलकम्	,,
श्रीछन्दम्	२७२
वृत्तभद्रम्	,,
श्रीकान्तम्	,,
श्रीप्रतिष्ठितम्	२७३
शिवभद्रम्	,,
शिवच्छन्दम्	२७४
अष्टाङ्गम्	,,
पद्माकृति	२७५
विष्णुच्छन्दम्	,,

विषयाः.	पृष्ठम्.
सौभद्रम्	२७६
कैलासच्छन्दम्	,,
रुद्रच्छन्दम्	२७७
ललितभद्रम्	,,
जातीतरविमानालङ्काराधिकारः	२७८
तत्र मेरुविमानम्	,,
मन्दरम्	२७९
कैलासम्	,,
कुम्भविमानम्	,,
जयाङ्गम्	,,
विशालाङ्गम्	,,
विमलाकृति	,,
हंसच्छन्दम्	२८०
वृषच्छन्दम्	,,
गरुडच्छन्दम्	,,
पद्माङ्गम्	,,
पद्मभद्रम्	,,
कैलासकान्तम्	,,
रुद्रकान्तम्	२८१
योगभद्रम्	,,
भोगिच्छन्दम्	,,
सुदर्शनम्	,,
स्कन्दकान्तम्	,,
विन्ध्यच्छन्दम्	,,
मेरुकूटम्	,,
चित्रकूटम्	२८२
श्रीमण्डनम्	,,
सौमुख्यम्	,,
जयमङ्गलम्	,,
नीलपर्वतम्	,,
निषधः	,,
मङ्गलम्	,,
विजयम्	२८३
ललितकान्तम्	,,

विषयाः.	पृष्ठम्.
श्रीकरम्	२८३
श्रीविशालम्	,,
ब्राह्मणविमानाधिकारः	,,
तत्र सोमच्छन्दम्	,,
नागच्छन्दम्	२८४
कुड्यावर्तम्	,,
द्विकूटकम्	,,
श्रीवर्धनम्	२८५
पद्मगृहम्	,,
प्रेक्षागृहम्	,,
क्रतुवर्धनम्	२८६
वृत्तगृहम्	,,
भानुकान्तम्	,,
अत्यन्तकान्तम्	२८७
चन्द्रकान्तम्	,,
क्षत्रियविमानाधिकारः	,,
तत्र चतुःस्फुटम्	,,
मन्त्रपूतम्	२८८
आवन्त्यम्	,,
माहिषम्	,,
तन्त्रीकान्तम्	२८९
विजयाङ्गम्	,,
विशालभद्रम्	२९०
गणिकाविशालम्	,,
कर्णभद्रकम्	२९१
कर्णशालम्	,,
पद्मवसन्तकम्	२९२
इन्द्रकान्तम्	,,
योगकान्तम्	,,

विषयाः.	पृष्ठम्.
सर्वललितम्	२९३
प्रत्यन्तकान्तम्	,,
विशालम्	,,
उत्पलपत्रम्	२९४
महाराजच्छन्दम्	,,
मालीगृहम्	२९५
नन्दीविशालम्	,,
पृथिवीजयम्	,,
सर्वाङ्गसुन्दरम्	२९६
छायागृहम्	,,
रतिवर्धनम्	,,
विट्शूद्रविमानाधिकारः	२९७
विशालालयः	,,
चतुष्पादिकम्	,,
तुरङ्गवदनम्	२९८
गणिकापिण्डकम्	,,
श्येनच्चन्दम्	,,
कुक्कुटपुच्छकम्	,,
उत्पलम्	२९९
मुण्डप्रासादम्	,,
तलविभागाधिकारः	,,
तत्र जातिविमानाधिलारः	,,
छन्दविमानाधिकारः	३०१
विकल्पविमानानि	,,
आभासविमानानि	,,
क्षुद्रविमानाधिकारः	,,
तलविभागे प्रकारान्तरम्	,,
उपपीठविधिः	३०२

॥ श्रीः ॥

ईशानशिवगुरुदेवपद्धतिः

श्रीमदीशानशिवगुरुदेवमिश्रविरचिता ।

(तृतीयः क्रियापादः ।)

अथ प्रथमः पटलः ।

प्रणम्यादौ शिवं शक्तिं सादेशं च गणेश्वरम् ।
शुद्धविद्यां तथा वाणीं मुख्यं धर्मं प्रचक्ष्महे ॥ १ ॥

सामान्यमन्त्रपादाभ्यां पूर्वार्धे खलु दर्शिताः ।
धर्मार्थकाम्याः सामान्याः शिष्टं व्यावर्ण्यतेऽधुना ॥ २ ॥

मुख्यधर्मचिदाप्नोति दृष्टादृष्टफलोदयात् ।
भोगान् मोक्षं च तद्धर्मविषयः परमेश्वरः ॥ ३ ॥

अथातो धर्ममित्यादिसूत्राद् वैशेषिकादतः ।
धर्मप्रयोजनं मोक्षः प्रोक्तश्चाभ्युदयो महान् ॥ ४ ॥

धर्मा बहुविधाः ख्यातास्तत्तदागमचोदिताः ।
नहि ते मुख्यधर्माः स्युर्मुख्यधर्माः शिवोदिताः ॥ ५ ॥

मायाविकारहीनेन विशुद्धेनामलात्मना ।
सर्वकर्त्रा शिवेनोक्तं शास्त्रं मुख्यं हि सर्वथा ॥ ६ ॥

स हि मायादिभूम्यन्तविश्वकार्यस्य कारणम् ।
शिवः कर्ता विकर्ता च प्रमाणत्रयगोचरः ॥ ७ ॥

जगत् सावयवं ह्येतद् बुद्धिमत्कर्तृकं स्मृतम् ।
कार्यत्वाद् यद्यदेवं स्याद् यथा घटपटादिकम् ॥ ८ ॥

तथाचोक्तमिदं तस्मादुक्तसाध्यं न संशयः ।
अस्त्येकः स शिवः कर्ता ह्यपरेभ्यो विलक्षणः ॥ ९ ॥

योगिप्रत्यक्षतः सिद्धश्चानुमानागमैरपि ।
सर्वेभ्यो ह्यपरेभ्योऽस्य वैलक्षण्यं कथं भवेत् ॥ १० ॥

G. P. T. 770. 500. 28-10-21. B

विलक्षणः शिवोऽन्येभ्यस्त्वनादिरमलो यतः ।
सर्वेषां समलत्वाच्च यद् यत् स्यान्निर्मलं स्वतः ॥ ११ ॥

तत्तद्विलक्षणं तेभ्यः स्वर्णं ताम्रादिकाद्यथा ।
तथाचोक्तं प्रसिद्धं स्यादत्रोक्तं किरणेऽपि च ॥ १२ ॥
अनादिमलसम्बन्धान्मलिनत्वमणौ स्थितम् ।
अनादिमलमुक्तत्वान्निर्मलत्वं स्थितं शिवे ॥ १३ ॥

इति । रामकण्ठोऽप्याह —

"यश्चासौ सर्वज्ञः सर्वकर्ता च शुद्धः शिवः, तथा किञ्चिज्ञोऽह्यशुद्ध आत्मा । तयोः शिवात्मनोः सम्ब(न्धी ये? न्धिनी) तु शुद्धाशुद्धे निर्मलमलयुक्ते स्वरूपे"

इति । श्रीमल्लम्बितेऽपि —

"एकः शिवः पुमानासीदपरेभ्यो विलक्षणः ।"

इति ।

"तस्मादनादिमलिनास्त्वात्मानो ह्यणवः स्मृताः ।"

इति ।

अनादिनिर्मलः शुद्ध एक एव महेश्वरः ।
निर्मलः शिव एकश्चेत् सर्वेभ्योऽपि विलक्षणः ॥ १४ ॥
निर्मलाः शिवधामानः सन्ति विद्येश्वराः कथम् ।
कथ्यते मलमोक्षोऽपि त्वयैव शिवदीक्षया ॥ १५ ॥
दीक्षितानां शिवत्वं च सिद्धं शैवागमे यदा ।
एतेऽप्यपर एवास्माच्छिवात्मानः शिवाद् यतः ॥ १६ ॥
तस्मादयुक्तं सर्वेभ्यो वैलक्षण्यं शिवस्य हि ।
अत्र निर्वाणदीक्षायाः पूर्वं ते मलिना यतः ॥ १७ ॥
दीक्षोत्तरं ह्यमलता शिवत्वव्यक्तिरेव च ।
शिवानुग्रहतस्त्वेषां शिवत्वं ह्यादिमत् स्मृतम् ॥ १८ ॥
शिवस्त्वनादिसिद्धेन शिवत्वेनापरानणून् ।
अनुगृह्णन् स्वतन्त्रश्च स्यात् तेभ्योऽपि विलक्षणः ॥ १९ ॥
अत्र त्रय्यन्तिदन्तीन्द्रा वदन्त्यद्वैतमात्मनाम् ।
ब्रह्मैकमेवाद्वितीयं यथात्मानोऽपरे कथम् ॥ २० ॥

वैलक्षण्यं कुतोऽस्य स्याद् भे(दो) यत्र न सिध्यति ।
न चेद्ग्रामः कुतः सीमा कस्यानुग्राहकः शिवः ॥ २१ ॥

इत्यादि ब्रुवतामेषां स्यात् प्रमाणं यदा तदा ।
द्वैतापत्तिः स्मृता नो चेदप्रमाणं हि तद् भवेत् ॥ २२ ॥

अत्र तद्वचनैस्तेषामुत्तरोत्तरमुत्तरम् ।
दत्तं द्वैतप्रसिद्धं स्यादद्वैतेन समासतः ॥ २३ ॥

ब्राह्मणाद्येषु सत्स्वेव भवन्त्यब्राह्मणादयः ।
तन्मतप्रतिकूलं स्यात् बन्धमोक्षपरिग्रहः ॥ २४ ॥

एकमेव यदा सर्वं ब्रह्म बद्धा न सन्ति हि ।
सर्वेऽपि मुक्ता एवातः किं फलं श्रवणादिभिः ॥ २५ ॥

गुरूपसदनं व्यर्थं नमस्कार्यः पृथक् कुतः ।
ज्ञातृज्ञेयविभागोऽपि ज्ञानं च स्यान्निरर्थकम् ॥ २६ ॥

इत्यादिभेदस्वीकारो वेदान्तेष्वपि दृश्यते ।
यस्माद् द्वैतं प्रसिद्धं हि गुणित्वमपि चात्मनः ॥ २७ ॥

किमत्र बहुनोक्तेन तस्याविद्याथवा तमः ।
माया वा त्याज्यमस्त्येव मुमुक्षोर्मोचकेतरत् ॥ २८ ॥

ब्रह्मविदाप्नोति परमित्यत्र श्रुतिदर्शनात् ।
नाप्नोत्यब्रह्मविद् यस्माद् भेदः सिद्धः प्रमाणवान् ॥ २९ ॥

हेतोरभावादैकात्म्ये तद्वच्छून्यात्मवादिनः ।
बौद्धा बुद्धिभ्रमादत्र भ्रमन्तोऽपि निराकृताः ॥ ३० ॥

कर्म बुद्धिमता यस्मात् कृतं कार्यफलप्रदम् ।
ज्ञान चाहैतुकं तस्मात् क्रियातः फलवादिनाम् ॥ ३१ ॥

कर्म तत् क्षणिकं वा स्यात् परतन्त्रमचेतनम् ।
न तादृक् फलसिद्ध्यै स्याद् बुद्धिमत्कारणं विना ॥ ३२ ॥

तेषामचेतनैर्मन्त्रैः कर्मणा तादृशेन च ।
नूनं क्रियाफलावाप्तेः कर्ता ज्ञेयः सुधीः शिवः ॥ ३३ ॥

गुणप्रकृतिरव्यक्तं विश्वोपादानमित्यपि ।
मृत्पिण्डवद् घटोत्पत्तेः स्वतो नालं हि कारणम् ॥ ३४ ॥

अजो ह्येको जुषमाणोऽनुशेतेत्यादिनापि च ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥ ३५ ॥

इत्यादिवाक्यतः साङ्ख्यैरप्यन्वेष्यो महेश्वरः ।
अचेतनत्वाद् भूतानां देहेन्द्रियगणस्य च ॥ ३६ ॥

त्यक्तगर्वैस्तु चार्वाकैरभ्युपेया ह्यनात्मता ।
भूतेन्द्रियाणि सन्त्येव मृतदेहेऽप्यतोऽपरः ॥ ३७ ॥

अन्वेषणीय आत्मा स्यादस्वातन्त्र्यं तथात्मनः ।
अदृष्टस्य च सद्भावो ग्रहादित्यादिदर्शनात् ॥ ३८ ॥

तत्कारणं सधीरस्तीत्येषणीयो महेश्वरः ।
देहप्रमाणमात्मानं नित्यानित्यविशेषणात् ॥ ३९ ॥

ब्रुवतां जैनसाधूनां महर्षिस्तादृगेव हि ।
अहिंसादितपोयोगादर्हन्त्वं तस्य तन्मते ॥ ४० ॥

सिद्धमित्यादिमान् सोऽपि तपसा परवान् यतः ।
तत्तपःफलदातान्यस्तैरुत्सृज्येह मत्सरम् ॥ ४१ ॥

स्वतन्त्रोऽनादिमान् कर्ताध्येषणीयो महेश्वरः ।
इत्यादिवादपिशुनैरीश्वरेतरवादिभिः ॥ ४२ ॥
क्षिप्तस्वपक्षविक्षेपैरेष्टव्यःश्रेयसे शिवः ।

शिवसद्भावाधिकारः ।

स शिवः स्वमुखोद्भूतैरागमैस्तु परापरैः ॥ ४३ ॥
अनुगृह्णाति हि जगद् भोगमोक्षप्रसिद्धये ॥

अत्र स्वायम्भुवे —

“अथात्ममलसन्तानपशुत्वविनिवृत्तये ।
व्यक्तये च शिवत्वस्य शिवाज्ज्ञानं प्रवर्तते ॥
तदेकमप्यनेकत्वाच्छिववक्त्राम्बुजोद्भवम् ।
परापरविभेदेन गच्छत्यर्थप्रतिश्रयात् ॥”

इति ।

परैः शैवादिभिर्दिव्यैरागमैः पाशमोचकैः ॥ ४४ ॥

विशिष्टभोगविभवशिवत्वफलदायिभिः ।
अपरैरपि वेदाद्यैरागमैः स्वमुखोद्गतैः ॥ ४५ ॥
स्वर्गादिफलसिद्ध्यर्थं पशुज्ञानप्रकाशकैः ।

"अत्र परेण कामिकादिना शिवज्ञानभेदेनापरेण वेदादिना पशुज्ञानभेदेने"ति सद्योज्योतिः ।

तत्र पूर्वं तु शैवाख्यं तन्त्रं शिवमुखोद्गतम् ॥ ४६ ॥
शुद्धशैवमिति ख्यातं शुद्धतत्त्वसमाश्रयात् ।
निष्कलो हि शिवो वक्ति कथं वाक्यादिलक्षणान् ॥ ४७ ॥
आगमानिति चोद्येऽस्मिन् दृष्टं खं शब्दलक्षणम् ।
निष्कलो ह्येष मन्त्रात्मा विद्यादेहं समास्थितः ॥ ४८ ॥
विसृजत्यागमान् सृष्टौ स्ववक्त्रेणात्मगोचरान् ।

अत्र किरणे —

"पुंसामनुग्रहार्थं तु परोऽप्यपरतां गतः ।
कृत्वा मन्त्रात्मकं देहं वक्ति तन्त्राण्यनेकधा ॥"

इति ।

शैवागमस्य भेदाः स्युः प्रथमं कामिकादयः ॥ ४९ ॥
ततश्चाष्टादशविधा भेदाः स्युर्विजयादयः ।

अत्र स्वायम्भुवे —

"एकमेव शिवज्ञानं विभिन्नं दशधा पुनः ।
तथाष्टादशधा भूयो भेदान्तरविसर्पितम् ॥"

इति । तद्यथा —

"कामिकं योगजाचिन्त्यकारणान्यजितं तथा ॥
दीप्तं सूक्ष्मं सहस्रं चाप्यंशुमान् सुप्रभेदकम् ।
शिवभेदसमाख्यानि तन्त्राण्येवं दश क्रमात् ॥
विजयं चैव निःश्वासं प्रोद्गीतं पारमेश्वरम् ।
आग्नेयं मुखबिम्बं च स्वायम्भुवमतः परम् ॥

---

१. 'बे' ख. पाठः

रौरवं माकुटं चैव किरणं लम्बितं तथा ।
चन्द्रज्ञानं वीरभद्रं सिद्धं सान्तानिकं ततः ॥

शर्वोद्गीतं च विमलं वातूलं चेत्यनुक्रमात् ।
रुद्रभेदोद्भवान्येव तन्त्राण्यष्टादशैव हि ॥

एषां भेदोपभेदाश्च तत्तत्प्रकरणान्यपि ।
सुबहूनीत्यतोऽस्माभिर्निर्दिश्यन्ते न नामभिः ॥
उपभेदेन भेदानामस्य संख्या न विद्यते ।
भेदान्तराणि सर्वाणि महान्ति न महान्त्यपि" ॥

इति । स्वायम्भुवे —

"पुनः स्वेच्छावतारेषु तन्त्रं पाशुपतं तथा ।
[१]वाकुलं सोमतन्त्रं च जगाद परमेश्वरः ॥

तत्र शैवं हि मुख्यं स्याद् यदादौ शिवभाषितम् ।
एभिः शैवादिभिस्तन्त्रैश्चतुर्भेदविलक्षितैः ॥

दीक्षादिसत्क्रियाचर्याज्ञानयोगैर्महेश्वरः ।
दुःखपङ्काद् भवाम्भोधेस्तारयत्यमलानणून् ॥

अपरागमभेदोऽपि प्रथमो दशधा स्मृतः ।
ऋग्वेदोऽथ यजुर्वेदः साम चाथर्व एव च ॥

शिक्षा कल्पो निरुक्तं च च्छन्दो ज्यौतिषमेव च ।
ततो व्याकरणं चैव वेदानामित्यतो दश ॥

मीमांसा न्यायशास्त्रं च पुराणं स्मृतिरेव च ।
चतुर्भेदा हि विद्यास्ताः सर्वास्त्वेवं चतुर्दश ॥

एतासामपि विद्यानां वेदादीनां पृथक् पृथक् ।
शाखाश्च संहिताभेदाः शास्त्रभेदाश्च नैकधा ॥

संख्यातुं प्रायशोऽशक्याः शिवेच्छातः प्रवर्तिताः ।
तदेकप्रत्ययात् साध्यैरग्निष्टोमादिकर्मभिः ॥

नित्यैर्नैमित्तिकैः काम्यैरिष्टापूर्तैश्च नैकधा ।
स्वर्गादिपाशवान् भोगानिह चामुत्र चाप्नुयात् ॥

---

[१] 'ला' क. पाठः

अत्र केचित्तु वेदानामुद्भवं शिववक्त्रतः ।
अज्ञानान्न सहन्ते यत् तन्न वेदहितावहम् ॥

पदवाक्यार्थसन्दर्भगर्भा शब्दमयी श्रुतिः ।
बुद्धिमत्पुरुषोदीर्णा नान्यथैवं प्रदृश्यते ॥

तत्र ह्याप्तप्रणीतत्वं शिष्टस्वीकरनिश्चितम् ।
अनाप्तकर्तृकत्वं च न श्रुतेः श्रूयते क्वचित् ॥
तस्मादत्यन्तमाप्तेन शिवेन श्रुतयोऽखिलाः ।
प्रणीताः सर्वकर्त्रेति प्रमाणं जायते सताम् ॥"

अपिच,

इह वेदषडङ्गानां शिक्षादीनां जगत्रये ।
सिद्धं हि पौरुषेयत्वं सूत्राणां तन्मतेऽपि च ॥ ५० ॥

अङ्गाङ्गिभावसम्बन्धो ह्येकजातिशरीरवान् ।
अबलाबालगोपालैरपि लोके सुसम्मतः ॥ ५१ ॥

न गजाङ्गैरजः सिध्येन्नाजाङ्गैर्वा गजो भवेत् ।
तत्तदङ्गाङ्गिभावाः स्युरेवं सर्वत्र नान्यथा ॥ ५२ ॥

वेदाः प्रमाणमीशेन स्वाप्तेन सुधियोदिताः ।
स्वाप्तप्रणीताङ्गवत्त्वात् तादृक् सूत्रादिमत्तया ॥ ५३ ॥

यो यो बुद्धिमदाप्तोक्तैः स्वाङ्गैर्युक्तोऽत्र दृश्यते ।
आयुर्वेदादयो यद्वदुक्तसाध्यं तथा ततः ॥ ५४ ॥

अपि चात्र स्मृतेः —

"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥ "

इति ।

न्यायविस्तरमीमांसापुराणस्मृतयः समम् ।
पठिता वेदसाधर्म्यात् सपक्षत्वेन वैदिकैः ॥

मन्वादिभिस्तु निपुणैर्यदाप्तैर्वेदवित्तमैः ।
सिद्धास्माच्चाप्तयोगीन्द्रबुद्धिमत्कर्तृता श्रुतेः ॥
अत्र वेदः स्वयं प्राह सिसृक्षोरादिपूरुषात् ।
जन्मैवाखिलवेदानां विस्पष्टं तद्यथोच्यते ॥

"तस्माद्यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत" ॥

इति ।

अस्मिन्नर्थे पुराणेषु ब्राह्मकूर्मादिकेष्वपि ।
वैष्णवादिषु वाक्यानि सन्ति सृष्टौ प्रजापतेः ॥ ५५ ॥

तद्यथा—

"गायत्रं च ऋचं चैव त्रिवृत् स्तोमं रथन्तरम् ।
अग्निष्टोमं च यज्ञानां निर्ममे प्रथमान्मुखात् ॥

यजूंषि त्रैष्टुभं छन्दस्तोमं पञ्चदशं तथा ।
बृहत्साम तथोक्थ्यं च दक्षिणादसृजन्मुखात् ॥
सामानि जागतं छन्दस्तोमं सप्तदशं तथा ।
वैरूपमतिरात्रं च पश्चिमादसृजन्मुखात् ॥
एकविंशमथर्वाणमप्तोर्यामाणमेव च ।
आनुष्टुभं सवैराजमुत्तरादसृजन्मुखात्" ॥

इति ।

यच्चतुर्दशविद्यासु वेदाद्यास्वेकपाठतः ।
अङ्गीकृतं हि प्रामाण्यं पुराणानां तु वैदिकैः ॥ ५६ ॥
एभिः पुराणवाक्यैस्तदनुमेयार्थबृंहिता ।
याजुषी श्रुतिरप्यस्ति ऋचां प्राचीति पूर्विका ॥ ५७ ॥
पूर्वादिवक्त्रजातत्वात् तत्तद्दिङ्नियमश्रुतिः ।
दृश्यते खलु वेदानां नो चेद्दिङ्नियमः कुतः ॥ ५८ ॥
तत्त्वैः कलादिपृथ्व्यन्तैः शरीरं ब्रह्मणोऽप्यभूत् ।
तत्त्वानां कारणं माया मायायाश्च महेश्वरः ॥ ५९ ॥
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
इत्यादिवचनात् कर्ता ब्रह्मणोऽपि महेश्वरः ॥ ६० ॥
सिद्धः स्कन्दपुराणेऽपि दृश्यते देवलस्तवे ।

तद्यथा—

"ब्रह्मा भूत्वा जगत् सर्वं सदेवासुरमानुषम् ।
यत् सृजत्यम्बुमध्यस्थं तस्य ब्रह्मात्मने नमः ॥"

इति ।

---

१. 'व' ख. पाठः.

एतस्मादपि वेदानां वक्ता ज्ञेयो महेश्वरः ॥ ६१ ॥

तथाच न्याये—

"वेदस्य पुरुषः कर्ता नहि यादृशतादृशः।
किन्तु त्रैलोक्यनिर्माणनिपुणः परमेश्वरः ॥"

इति।

यद्येवमागमानां हि जन्म सिद्धं महेश्वरात्।
आदिमत्त्वादनित्यत्वं श्रुतेः स्यादिति केचन ॥ ६२ ॥

वदन्ति चेन्न तत् साधु यतोऽनादिर्महेश्वरः।
नित्यशुद्धोऽमलो धीमान् मन्त्रविद्यातनुः स्वयम् ॥ ६३ ॥
यास्य विद्यातनुः सापि ह्यनादिरनपायिनी।

तथाच श्रुतिः—

"या ते रुद्रशिवातनूरघोरापापकाशिनी
तया नस्तनुवा शन्तमया गिरिशंता ॥"

इति।

तस्मादभिन्ना तत्संस्था लवः[1] काष्ठा कलादिवत् ॥ ६४ ॥
तस्यैवेच्छाक्रियाज्ञानशक्त्युत्कर्षापकर्षतः।
बिम्बादिपरिणामेन सूक्ष्मान्तर्वर्णसङ्ग्रहात् ॥ ६५ ॥
वैखर्यादिपदैर्व्यक्तिं प्राप्यैषा शिववक्त्रतः।
तद्गता वाग् विनिर्याति शश्वद् वेदागमात्मिका ॥ ६६ ॥
सा वागुत्पत्तिरत्रापि परतः किञ्चिदुच्यते।
तां वाचमुपजीवन्ति विश्वे विश्वेश्वरोदिताम् ॥ ६७ ॥
सिसृक्षुर्विसृजत्येनां पुनर्ग्रसति संहृतौ।
सृष्टिं करोति कारुण्यात् पुंसां भुक्त्यै च मुक्तये ॥ ६८ ॥
खिन्नानामिह संसारे विश्रमार्थं च संहृतिम्।
अनादिः स शिवो मुख्यो यथान्येभ्यो विलक्षणः ॥ ६९ ॥
तथा तद्वद[2]नोदीर्णा वाचोऽन्याभ्यो विलक्षणाः।
शिवागमाश्च वेदाश्च नित्या एव प्रमाणतः ॥ ७० ॥

---

[1] 'कालेष्ठा' ख. पाठः. [2] 'च' क. पाठः.

नित्याः शिवागमा वेदैः शिवेनादावभेदतः ।
नित्यस्थितास्त्वभिव्यक्तास्तस्मिस्तेऽनादयो यतः ॥ ७१ ॥

यद् यन्नित्ये स्थितं शश्वदभिव्यक्तं च तन्मुखात् ।
नित्यमेव यथा कालकलाकाष्ठादिनादयः ॥ ७२ ॥

तथाच प्रकृतं तस्मादुक्तसाध्यं न संशयः ।

द्विविधागमानामीश्वरप्रणीततया प्रामाण्यस्थापनाधिकारः ।

स सिसृक्षुर्विभुर्विश्वमागमांश्च महेश्वरः ॥ ७३ ॥
स्वशक्तिव्यक्तिमादध्रे पूर्णचन्द्रः स्वभामिव ।

अत्र

"चिदचिदनुग्रहहेतोरस्य सिसृक्षोर्य आद्य उन्मेषः ।
तच्छक्तितत्त्वमभिहितमविभागापन्नमस्यैव ॥"

इति । तत्त्वप्रकाशे —

"शिवादभिन्ना सा शक्तिर्नित्या बलवती ध्रुवा ।
एकाप्यनेककार्याणां व्यक्तये बहुधोदिता ॥"

इति ।

रत्नत्रयेऽपि —

"इच्छाकार्यमनिच्छापि कुर्वाणेच्छा निगद्यते ।
ज्ञानमज्ञेयरूपापि क्रियामप्यक्रिया सती ॥"

इति ।

तस्मादिच्छाह्वया शक्तिः क्रियाशक्तिश्च सा भवेत् ॥ ७४ ॥
ज्ञानशक्तिश्च विज्ञेया तत्तत्कार्यप्रवर्तनात् ।
इच्छया प्रेरितो हीशः क्रियया कुरुतेऽखिलम् ॥ ७५ ॥
ज्ञानशक्त्या विजानाति सा च कुण्डलिनी मता ।
साम्याज्ज्ञानक्रियाशक्त्योः प्रसरो यः शिवात्मकः ॥ ७६ ॥
सदाशिवाख्यं तत् तत्त्वं विद्यादेहं शिवात्मकम् ।
तत्स्वरूपं तु परतः पूजाविषय उच्यते ॥ ७७ ॥

ज्ञानशक्तिर्यदा स्वल्पा क्रियाशक्तिस्तथाधिका ।
तत्रेश्वराख्यं तत्त्वं स्यात् सर्वकर्तृत्ववैभवम् ॥ ७८ ॥

निमित्तकारणं सृष्टेरीश्वराख्यं क्रियाधिकम् ।
यथा घटीघटादीनां कुलालः संप्रवर्तकः ॥ ७९ ॥

क्रियाशक्तिर्यदा स्वल्पा ज्ञानशक्तिस्तथाधिका ।
शुद्धविद्याख्यतत्त्वं तज्ज्ञानरूपप्रकाशकम् ॥ ८० ॥

यथा तत्त्वप्रकाशे —

"न्यग्भवति कर्तृशक्तिर्ज्ञानाख्योद्रेकमश्नुते यत्र ।
तत्तत्त्वं विद्याख्यं प्रकाशकं ज्ञानरूपत्वात् ॥"

इति ।

बिन्दुनादौ यदा स्निग्धौ सदाशिवसमाश्रयौ ।
तत्र विद्येश्वरा जाताः श्रीकण्ठानन्तपूर्वकाः ॥ ८१ ॥

यत्र विद्याह्वयं तत्त्वं बिन्दुनादशिवाश्रयम् ।
तत्र विद्याश्च मन्त्राश्च स्फुरन्त्यब्धौ तरङ्गवत् ॥ ८२ ॥

अत्र तत्त्वप्रकाशे —

"आद्याननुगृह्य शिवो विद्येशत्वे नियोजयत्यष्टौ ।
मन्त्रांश्च करोत्यपरांस्ते चोक्ताः कोटयः सप्त ॥"

इति । रत्नत्रयेऽपि —

"तत्र विद्याभुजः पूर्वे मन्त्रा विद्याश्च नामतः ।
विद्येश्वरनियोज्यास्ते संख्याताः सप्तकोटयः ॥"

इति ।

इत्थं शिवादिविद्यान्तं शुद्धतत्त्वानि पञ्च हि ।
येषां व्यतिकराद् विद्येश्वरविद्यादिसम्भवः ॥ ८३ ॥

विद्याविद्येशमन्त्राणां सामर्थ्यादीश्वरेच्छया ।
अशुद्धतत्त्वं मायाख्यमिन्द्रजालवदुद्बभौ ॥ ८४ ॥

तत्र मायातत्त्वमिन्द्रजालबीजम् । तदभिज्ञो भगवान् मायाकन्दलीकन्दः शिवो मलविदारणेन स्वयमभिव्यनक्ति । सा हि स्वयं न सती । यदि सती भवेद् मायैव न स्यादिति षट्त्रिंशत्तत्त्वसिद्धौ । तथाहि—

"मायाविना न मायास्ति विना मायी शरीरवान् ।
दृष्टोऽस्मिन्निन्द्रजालादौ यथा लोके प्रयोजकम् ॥ ८५ ॥

तथा कलादितत्त्वानां मायोपादानमिष्यते ।
अचेतनं चेतनवत् प्रतिभाति विचित्रकम् ॥ ८६ ॥

असत् स्वतः सदाभासमिन्द्रजालं यथा तथा ।
तां मायां शक्तिभिः स्वाभिर्विक्षोभ्य परमेश्वरः ॥ ८७ ॥

स्वकर्मानुगुणं सृष्टिं करोति करुणानिधिः ।
तस्यां कालकलादीनि पञ्च तत्त्वान्यनुक्रमात् ॥ ८८ ॥

प्रभवन्त्यविशुद्धानि यथा तत्त्वप्रकाशके ।
"पुंसोऽज्ञकर्तृकार्थं मायातस्तत्त्वपञ्चकं भवति ।
कालो नियतिश्च कला ह्यशुद्धविद्या च रागश्च ॥"

इति ।

तत्र कालाह्वयं तत्त्वं त्रिविधं भूतपूर्वकम् ॥ ८९ ॥
वर्तमानं भविष्यच्च जाग्रत् कलयति स्फुटम् ।
तथा नियतितत्त्वं च जातं नियमनात्मकम् ॥ ९० ॥
जातं तथा कलातत्त्वमणूनां मलमेकतः ।
कलयित्वा व्यञ्जयाति कर्तृशक्तिं यतः कला ॥ ९१ ॥

"मलं नृणामेकतस्तु कलयित्वा व्यञ्जयति कर्तृशक्तिमि"ति तत्त्वप्रकाशे ।

कलोद्बलितसामर्थ्यकर्तृशक्तेः प्रवर्तिका ।
अशुद्धविद्या सा पुंसां विषयाणां प्रदर्शिनी ॥ ९२ ॥

"पुंसो विषयप्रदर्शनार्थमथो विद्यातत्त्वं सूते प्रकाशकमि"ति तत्त्वप्रकाशे ।

विद्यातो रागतत्त्वाख्यं जातमर्थेषु पूरुषः ।
प्रवर्तयत्यभिष्वङ्गाद् विषयेष्वभिरञ्जकम् ॥ ९३ ॥

तत्त्वैरेभिर्निबद्धोऽसावणुभोक्तृत्वमागतः।
तत्त्वं पुरुषसंज्ञं स्यात् कर्तृशक्त्युपबृंहितम् ॥ ९४ ॥

तथाहि —

“तत्त्वैरेभिः कलितो भोक्तृत्वदशां यदा पशुर्नीतः।
पुरुषाख्यतां तदायं लभते तत्त्वेषु गणनां च ॥”

इति।

पुरुषादस्य भोगार्थं तत्त्वं प्रकृतिसंज्ञितम्।
जातं त्रिगुणसाम्येन तदेवाव्यक्तमिष्यते ॥ ९५ ॥

बुद्ध्यादितत्त्वविकृतेः प्रकृतित्वात् तथा स्मृतम्।
गुणसाम्यात् तदव्यक्तगुणमव्यक्तसंज्ञितम् ॥ ९६ ॥

बोद्धव्यलक्षणा सै प्रकृतिः शक्तिबृंहिता।
बुद्धितत्त्वं भवेद् व्यक्तं सात्त्विकं गुणमाश्रिता ॥ ९७ ॥

सैव बुद्धिर्महान् नाम तत्त्वं सांख्यैर्निगद्यते।
अव्यक्तमेव तु व्यक्तसत्त्वराजसतामसैः ॥ ९८ ॥

स्यादहङ्कारतत्त्वं तन्मोहाहम्मानलक्षणम्।
सोऽहङ्कारस्त्रिभेदः स्यात् पृथक् सत्त्वादिभेदवान् ॥ ९९ ॥

सात्त्विकस्तैजसो नाम वैकारी राजसः स्मृतः।
भूतादिस्तामसस्तेऽपि पृथक् तत्त्वान्यवासृजन् ॥ १०० ॥

“तैजसतस्तत्र मनो वैकारिकतो भवन्ति चाक्षाणि।
भूतादेस्तन्मात्राण्येषां सर्गोऽयमेतस्मात् ॥”

इति तत्त्वप्रकाशे।

इच्छारूपं मनस्तत्त्वं ससङ्कल्पविकल्पकम्।
तैजसादेव सञ्जातं जडं तच्च निरन्वयम् ॥ १०१ ॥

वैकारिकात् तु जातानि श्रोत्रं त्वक्चक्षुषी तथा।
जिह्वा घ्राणं च पञ्चैव तानि बुद्धीन्द्रियाणि हि ॥ १०२ ॥

तथा वाक् पादपाणी च पायूपस्थेन्द्रिये अपि।
वैकारिकाख्यादेव स्युः पञ्च कर्मेन्द्रियाण्यपि ॥ १०३ ॥

शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः ।
तन्मात्राण्येव विषया भूतादेरभवन् क्रमात् ॥ १०४ ॥

तन्मात्रेभ्यस्तु जातानि खानिलाग्न्यब्धराः क्रमात् ।
गुणोत्तराणि तान्याहुः पञ्च भूतानि सूरयः ॥ १०५ ॥

श्रोत्रादिपञ्चेन्द्रियाणि शब्दादीनामनुक्रमात् ।
आधारत्वेन तन्मात्रव्यञ्जकानि भवन्ति हि ॥ १०६ ॥

उक्तिर्गतिरुपादानं सर्गश्चानन्द एव च ।
कर्मेन्द्रियाणां कर्माणि नियतानि पृथक् पृथक् ॥ १०७ ॥

परस्परानुप्रविष्टैर्महाभूतैश्चतुर्विधैः ।
व्याप्ताकाशैर्जगत् कार्यं दृश्यं निष्पाद्यतेऽखिलम् ॥ १०८ ॥

अत्र सांख्यादयो ब्रूयुः पञ्चविंशतिसङ्ख्यया ।
तत्त्वानि वा चतुर्विंशन्नास्ति तत्त्वमतः परम् ॥ १०९ ॥

एतावता जगत्सिद्धेः कस्मात् तत्त्वान्तराश्रयः ।
इत्यादिकः प्रलापोऽयं तेषामर्थं न साधयेत् ॥ ११० ॥

कथमित्यत्र तद् ब्रूमस्तत्त्वैरन्यैः प्रयोजनम् ।

तद्यथा —

"न भूतेन्द्रियतन्मात्रैर्नैवान्तःकरणैः पुमान् ।
रज्यते विषयार्थेषु रागतत्त्वं हि रञ्जकम् ॥"

रागकामावित्यनर्थान्तरम् ।

"रागाद्धि कामयत्यर्थां (?) प्रवृत्तिः कामतो भवेत् ।
तस्माद् रागाह्वयं तत्त्वमस्तीत्येवावगम्यताम् ॥

तद्वद् रागादिभूम्यन्ततत्त्वानां विषयादिषु ।
परोपलम्भशक्तेर्यन्नाभिव्यञ्जकता भवेत् (?) ॥
परोपलम्भशक्तेर्यद् व्यञ्जकं तत् प्रचक्षते ।
विद्यातत्त्वं हि रूपादिबोधे नेत्रादिकं यथा ॥"

इति तत्त्वसिद्धौ ।

तस्माद् विद्याह्वयं तत्त्वमस्तीत्येवावधार्यताम् ॥ १११ ॥

तथा विद्यादिभूम्यन्ततत्त्वप्रच्छादकं मलम् ।
अनादिविश्वगं भेत्तुं कलातत्त्वमृतेऽन्यथा (?) ॥ ११२ ॥

"अनादिसिद्धमलतिरोहिते पुंसि भगवतः प्रजापतेरस्य मोहपङ्कादुत्तितीर्षोः कारुण्यान्मायाप्रकृत्युपादानं मलभेदनक्षमं कलातत्त्वमुत्पद्यते" इति तत्त्वसिद्धौ ।

"तथैव हि कलाद्यैर्यत् तत्त्वैः क्षित्यन्तकैः क्वचित् ।
दिग्देशद्रव्यजात्यादौ नियमो नैव सिध्यति ॥

नियमोऽप्यन्य एवैषां नियन्त्री नियतिर्यतः ।
तस्मान्नियतिसंज्ञं स्यात् तत्त्वमित्यधिगम्यते ॥

यन्नियत्यादिपृथ्व्यन्ततत्त्वैः कालो न सिध्यति ।
तेभ्योऽन्य एव कालोऽस्तीत्यभ्युपेयः परीक्षकैः ॥

तथा कालादिभूम्यन्तैः स्वस्वोपादानगोचरैः ।
अनाश्रयैरशक्यं हि जगत्कार्यप्रवर्तनम् ॥

तस्मात् तदाश्रयीभूता मायास्त्येव दुरन्वया ।
विचित्रचित्रस्फूर्तीनां भित्तिराश्रयणी यथा ॥

इत्थं मायादिपृथ्व्यन्तैर्मिथो नातिविलक्षणैः ।
अशुद्धाध्वनि निष्पन्नमिन्द्रजालोपमं जगत् ॥

मायाकार्येन्द्रजालस्य जडत्वात् स्यान्न कर्तृता ।
भित्त्यादेश्चित्रजालस्य क्रियाकर्तान्य एव हि ॥

तथा मायादिसम्भूतेर्विद्यातत्त्वादिमाञ्छिवः ।
कर्तान्य एव मन्त्रात्मा शब्दवर्णादिकारणम् ॥

तस्मिञ्छिवादौ विद्यान्ते शुद्धाध्वनि सुनिर्मले ।
शब्दविद्याः सविद्येशा दृश्यन्ते व्योमगोचराः ॥

शिवशक्त्योः सन्निकर्षाद् बिन्दुर्नादात्मकोऽभवत् ।
चन्द्रचन्द्रिकयोर्यद्वदाह्लादगुणसम्भवः ॥

जायतेऽध्वा यतः शुद्धो वर्तते यत्र लीयते ।
स बिन्दुः परनादाख्यो नादबिन्द्वणुकारकम् ॥

इति रत्नत्रये ।

"नादाख्यं यत् परं बीजं सर्वभूतेष्ववस्थितम् ।
मुक्तिदं परमं दिव्यं सर्वसिद्धिप्रदायकम् ॥
सान्तं सर्वगतं शून्यं मात्राद्वादशकस्थितम् ।
ह्रस्वा ब्रह्म समाख्याता दीर्घा ह्यङ्गानि षण्मुखे! ॥"

इति कालोत्तरे ।

"अथादावभवच्छब्दः कारणादक्षरं ततः ।
अक्षरान्मोक्षदं ब्रह्मन्! ब्रह्म ब्रह्मविदो विदुः ॥"

इति स्वायम्भुवे । रत्नत्रयेऽपि —

"स तु शब्दश्चतुर्धा वाग्वैखर्यादिविभेदतः ।
जायते बिन्दुसंक्षोभादनन्तस्यार्थसिद्धये ॥"

"चत्वारि वाक्परिमितापदानि" इति श्रुतिश्च ।

शक्तिर्नादो महामाया व्योमेति च चतुर्विधः ।
बिन्दुरेवास्य तु पुनश्चतस्रो वृत्तयः स्मृताः ॥ ११३ ॥
वैखरी मध्यमा चैव पश्यन्ती चापि सूक्ष्मया ।
व्युत्क्रमेण भवन्त्येताः कुण्डलिन्यादितः क्रमात् ॥ ११४ ॥
सूक्ष्मा कुण्डलिनी मध्ये ज्योतिर्मात्रात्यणीयसी ।
अश्रोत्रविषया तस्मादुद्गच्छन्त्यूर्ध्वगामिनी ॥ ११५ ॥
स्वयम्प्रकाशा पश्यन्ती सुषुम्नामाश्रिता भवेत् ।
सैव हृत्पङ्कजं प्राप्य मध्यमा नादरूपिणी ॥ ११६ ॥
अन्तःसञ्जल्पमात्रास्यादविभक्तोर्ध्वगामिनी ।
सैवोरःकण्ठतालुस्था शिरोघ्राणद्विजोपगा ॥ ११७ ॥
जिह्वामूलोष्ठनिष्ठचूता कृतवर्णपरिग्रहा ।
शब्दप्रपञ्चजननी श्रोत्रग्राह्या तु वैखरी ॥ ११८ ॥
हकारः सविकारोऽथ रेफेण समयुज्यत ॥ ११९ ॥
ईकारमसृजत् तस्माद् बिन्दुनादविभूषितम् ॥ १२० ॥
शक्तिबीजं तु तद्योगादखिलोत्पत्तिकारणम् ॥ १२१ ॥

हरत्वाच्च हरित्वाच्च शिवशक्त्योस्तु युक्तयोः ॥ १२२ ॥
श्लिष्टोच्चारितयोः शाब्दं रूपं तद् बीजमीरितम् ।
हकारस्तु भवेद् ब्रह्मा ईकारो विष्णुरिष्यते ॥ १२३ ॥
रेफो रुद्रोऽग्निरेव स्याद् बिन्दुरीश्वर उच्यते ।
नादः सदाशिवो ज्ञेयो नादान्तस्तु शिवः स्वयम् ॥ १२४ ॥
हकारो व्यक्तिमापन्नो हार्दघोषविवार्जितः ।
अकारतां गतस्तस्य भेदो ह्यक्षरसन्ततिः ॥ १२५ ॥
ऊकारान्तान्यकारादीन्यक्षराणि षडस्य तु ।
विकृतिः स्याद् विशेषेण रेफस्य तु ऋ ॠ ऌ ॡ ॥ १२६ ॥
ईकारभेदतस्त्वासन्नेकाराद्यक्षराणि षट् ।
इत्थं षोडशधोत्पन्नाः स्वराख्याः शक्तिबीजतः ॥ १२७ ॥
ऋॠऌॡवियुक्तास्ते द्वादशेत्यपरे जगुः ।
ह्रस्वस्वरा बिन्दुयुताः पुमांसो ह्यर्करूपिणः ॥ १२८ ॥
दीर्घस्वरा विसर्गान्ताः स्त्रीलिङ्गाः सोमरूपिणः ।
ऋॠऌॡचतुष्कं तु सौम्याग्नेयं नपुंसकम् ॥ १२९ ॥
हकारः शब्दगुणवानाकाशमसृजत् पुरः ।
व्योम्नः स्पर्शगुणो वायुः स्पर्शाख्याः कादयोऽभवन् ॥ १३० ॥
पञ्चपञ्चाक्षरास्ते तु पञ्चवर्गास्त्विनात्मकाः ।
याद्यक्षरचतुष्कं तु वाय्वग्निक्ष्माम्भसां तनुः ॥ १३१ ॥
स्पर्शो रूपं तथा गन्धो रसाख्यस्तद्गुणाः क्रमात् ।
शेषास्तु व्यापकाः शाद्याः साग्नीषोमाः स्वरस्पृशः ॥ १३२ ॥
इत्थं पञ्चाशदुत्पन्ना वर्णाः शक्तिप्रभेदतः ।
कादयः पञ्चविंशार्णा यादयः शादयस्तथा ॥ १३३ ॥
स्थानप्रयत्नभेदेन जायन्ते खल्वकारतः ।
अकारादिस्वरैर्युक्तहलां योगान्मिथोऽपि च ॥ १३४ ॥
शब्दप्रपञ्चः सर्वोऽपि विचित्रं जायते स्फुटम् ।
इयं हि मातृका ख्याता पञ्चाशद्वर्णसंहतिः ॥ १३५ ॥

अस्यास्तु विकृतिर्विश्वं शब्दजातमिति स्फुटम् ।
सेयं वाग्देवता स्वार्णमूर्तिर्विद्या शिवात्मिका ॥ १३६ ॥
सामान्यपादे प्रागेव सविशेषं प्रदर्शिता ।

तत्त्वमातृकाधिकारः ।

बिन्दोर्नादात्मकात् तस्माच्छिवेच्छातः प्रवर्तिताः ॥ १३७ ॥
कलाः पञ्च निवृत्त्याद्या यासु विश्वं प्रतिष्ठितम् ।
क्षकारः क्षितितत्त्वं च निवृत्तौ व्याप्य संस्थितम् ॥ १३८ ॥
तथाहाद्याष्टकारान्तास्त्रयोविंशतिरक्षराः ।
प्रकृत्यन्तं प्रतिष्ठायां स्यात् कलायां प्रतिष्ठितम् ॥ १३९ ॥
ञादिघान्ताः सप्त वर्णाः पुंसो मायान्तमेव च ।
सप्ततत्त्वानि विद्याख्यकलायां संस्थितानि वै ॥ १४० ॥
गखकास्तु त्रयो वर्णाः शुद्धविद्येश्वरा अपि ।
स्यात् सदाशिवतत्त्वं च शान्त्याख्यायां प्रतिष्ठितम् ॥ १४१ ॥
अकाराद्यास्त्वकारान्ता विलोमं षोडश स्वराः ।
शक्तितत्त्वं शिवश्चापि शान्त्यतीतकलोपगाः ॥ १४२ ॥
इत्युक्ता वर्णतत्त्वानां कलाव्याप्तिः समासतः ।
तत्त्वानां च मिथो व्याप्तिर्देवतानां च कथ्यते ॥ १४३ ॥
शक्तिः शिवादिभूम्यन्तं व्याप्य विश्वमवस्थिता ।
सदाशिवेश्वरौ चापि बिन्द्वादिक्षान्तगोचरौ ॥ १४४ ॥
सदाशिवादिभूम्यन्तं विद्यातत्त्वं व्यवस्थितम् ।
मायाकालादिपृथ्व्यन्तं कलातत्त्वं तु सर्वगम् ॥ १४५ ॥
अतः परं स्यात् तत्त्वानां यथाक्रममवस्थितिः ।
मायादिक्ष्मान्तकं रुद्रो विष्णुर्मायाधरावधिः ॥ १४६ ॥
ब्रह्मा पुमादिभूम्यन्तं व्याप्य तत्त्वेष्ववस्थितः ।
विद्येश्वरास्त्वनन्ताद्या विद्यातत्त्वं व्यवस्थिताः ॥ १४७ ॥

विघ्नेश्वरसरस्वत्यौ स्यातां तत्त्वे सदाशिवे ।
नन्द्यादयोऽपि विद्यायां प्रकृतौ चण्डिका स्थिताः ॥ १४८ ॥
लक्ष्मीरीश्वरतत्त्वस्था बुद्धौ चान्यास्तु शक्तयः ।
शब्दतत्त्वे च सोमार्कौ यजमानोऽपि पूरुषे ॥ १४९ ॥
स्वस्य कारणसंस्थानि भूताक्षाणि भवन्ति हि ।
देवयोन्यष्टकं चापि पुर्यष्टकगतं स्मृतम् ॥ १५० ॥
जरायुजाण्डजस्वेदजोद्भिज्जान्यखिलान्यपि ।
पृथ्वीतत्त्वगतान्येव शिवशक्तिकलाबलात् ॥ १५१ ॥
इत्थं संक्षेपतस्तत्त्वव्याप्तिरत्र प्रदर्शिता ।
एषैव परतो ज्ञेया विस्तरेणाध्वनिर्णये ॥ १५२ ॥
षट्त्रिंशदेव तत्त्वानीत्येवं केन नियम्यते ।
तस्य भावः स्मृतस्तत्त्वं तद् घटादौ च दृश्यते ॥ १५३ ॥
कश्चिदेवं यदि ब्रूयात् तत्र तत्त्वं निरुच्यते ।
तच्छब्दः प्रकृतार्थे स्यात् त्वम्पदं तस्य भावगम् ॥ १५४ ॥
सन्ततं यत् ततं तत्त्वं स्थितमाप्रलयादपि ।

यथा तत्त्वसिद्धौ —

"ततत्वात् सन्ततत्वाच्च[1] तत्त्वानीति ततो विदुः ।
ततत्वं देशतो व्याप्तिः सन्ततत्वं च कालतः ॥"

इति । अपि च,

"लक्षादि व्योम च व्यापि तत्त्वमाप्रलयात् स्थितम् ।
अन्यथा स्तम्भकुम्भाद्यमपि तत्त्वं प्रसज्यते ॥"

इति । तत्त्वप्रकाशे च —

"आप्रलयं यत् तिष्ठति सर्वेषां भोगदायि भुवनानाम् ।
तत् तत्त्वनामधेयं न शरीरघटादिकं तत्त्वम् ॥"

इति ।

षट्त्रिंशदित्थं तत्त्वानि ज्ञेयानि प्रविभागतः ॥ १५५ ॥
तत्त्वज्ञानं हि तज्ज्ञानमतत्त्वज्ञानमन्यथा ।
षट्त्रिंशदेव तत्त्वानि विश्वसिद्धेर्यथार्थतः ॥ १५६ ॥

---

[1] 'पि' क. पाठः.

तत्त्वान्तरस्य चाभावात् परतत्त्वानपेक्षया ।
यावता प्रकृतं कार्यं कारणेन प्रसिध्यति ॥ १५७ ॥
नास्त्यत्र कारणं चान्यत् तत्रालं तावतैव हि ।
कुलालचक्रदण्डाम्भोमृत्पिण्डाद्यं घटोदये ॥ १५८ ॥
कारणं चाप्यपेक्ष्यं[1] च नान्यदस्ति यथा तथा ।
तस्मादिदमिह प्रोक्तं साध्यमेव विपश्चिताम् ॥ १५९ ॥
तात्त्विकोऽध्वायमेवं स्याद् विज्ञेयः परतोऽपि यः ।
इत्ययं वस्तुनिर्देशस्तन्त्रेऽस्मिन् प्रतिपादितः ॥ १६० ॥
क्रियादीक्षाप्रतिष्ठादेः साफल्यार्थप्रसिद्धये ।
मुख्ये श्रेयसि भोगमोक्षफलदो विश्वस्य कर्ता सुधीः
स्वास्योदीर्णपरापरागमपरज्ञानाणुसन्तारणः ।
योऽनादिर्विमलो विलक्षणतयान्येभ्यः स्वतन्त्रो विभु-
स्तत्त्वैर्वर्णकलादिभिः स विदुषां वेद्यश्च सिद्धः शिवः ॥ १६१ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे
उपरिभागे क्रियापादे वस्तुनिर्देशाख्यः
प्रथमः पटलः ।

अथ द्वितीयः पटलः ।

प्रणम्य भक्त्या प्रथमं गणेश्वरं प्रपञ्चसूतिं च गिरं शिवां शिवम् ।
सपाशविश्लेषशिवत्वबोधिनीं पशोस्तु दीक्षां प्रवदाम्यथोत्तरम् ॥ १ ॥

अत्र मतङ्गे—

"पशुः पाशयिता पाशस्त्रयमेतद् व्यवस्थितम् ।
साध्यसाधकभावोक्त्या यथा तत् प्रकटं भवेत् ॥"

इति ।

य एष देहे नियतस्तु देहभृच्छरीरभिन्नो ह्यशरीरलक्षणः ।
स जीव आत्मा पशुरित्युदीर्यते स्मृतश्च संसारितया पुमानणुः ॥ २ ॥
पशुः पाशः पतिः शक्तिर्विचारश्चेति पञ्चधा ।
पदार्थाः स्युः क्रिया चर्या षष्ठी शैवागमोदिता ॥

---

१. 'क्षं' ख. पाठः.

पशुः प्रागीश्वरो विद्यायोनिर्मुक्तिरिहान्तिमा ।

इति श्रीपराख्ये ।

"इतीह षट्पदार्थानां पृथग् याथार्थ्यनिर्णयः ।
विदित्वा समयी सम्यग् भोगं मोक्षं च विन्दति ॥

न पशुर्नाममात्रेण शरीरी परिभाव्यते ।
शरीरेऽस्मिन् कुतो ह्यात्मा शरीराद् व्यतिरिच्यते ॥"

इति मतङ्गे । तथाहि —

बौद्धाः क्षणध्वंसिनमाहुरेनं विज्ञानसन्तानमयं च युक्त्या ।
तं प्रत्यगात्मानमुशन्ति नित्यं त्रय्यन्तिदन्तिप्रवरास्तथैकम् ॥ ३ ॥
आशाम्बरा देहमितं स्वतन्त्रं तं गर्विचार्वाकपिशाचसङ्घाः ।
प्राहुस्तथा भूतनिकायमात्रदेहेन्द्रियात्मानमिहैकमानात् ॥ ४ ॥

सांख्याः सङ्ख्यापरं त्वेनं प्राहुः प्रकृतिवादिनः ।
बद्धावस्थमकर्तारं मुक्तावस्थागतं विदम् ॥ ५ ॥

जैमिनीयमतैर्ज्ञानी कर्तानेकात्मतां गतः ।
मुक्तौ पाषाणकल्पो वा धर्मज्ञानैकसाधनात् ॥ ६ ॥

नैयायिकादिभिर्भिन्नो बुद्धिदुःखसुखान्वितः ।
इच्छाद्वेषप्रयत्नैश्च धर्माधर्मयुतोऽपि च ॥ ७ ॥

संस्कारवान् नवगुणो ह्यात्मा प्रतितनु स्मृतः ।
शब्दार्थयोरभेदेन ब्रूयुः शब्दात्मनित्यताम् ॥ ८ ॥

बद्धं मुक्तं च तज्ज्ञानाद् येऽमी व्याकरणास्पदाः ।
एवं मिथो विरोधेन ह्यात्मा तीर्थैः पृथक् स्मृतः ॥ ९ ॥

स पशुः पाशितः पाशैः पतिः पाशयिता शिवः ॥ ९½ ॥

पशुस्त्वमूर्तः खलु नित्यनिर्गुणः स निष्क्रियो ज्ञप्रभुदेहगोचरः ।
मलादशुद्धोऽपि च भोक्तृतां गतः स्वकर्मणामीश्वरमायया वृतः ॥ १० ॥

स्वयं तु किञ्चिज्ज्ञतयाथ रागतः स रञ्जितः सत्त्वरजस्तमोगुणैः ।
तथापि बुद्ध्यादिभिरेव बुध्यते विचिन्तको भोगविधानतृष्णया ॥ ११ ॥

तथाच किरणे —

“पशुर्नित्योऽप्यमूर्तोऽज्ञो निष्क्रियो निर्गुणः प्रभुः ।
व्यापी मायोदरान्तःस्थो भोगोपायविचिन्तकः ॥”

इति । वरुणोऽप्याह —

“किञ्चिज्ज्ञो मलिनो भिन्नः कर्ता भोक्ता स्वकर्मणाम् ।
शरीरान्यो विभुर्नित्यः संस्कार्यः सेश्वरः पशुः ॥”

इति । स्वायम्भुवे च —

“अचेतनो विभुर्नित्यो गुणहीनोऽक्रियोऽप्रभुः ।
व्याघाती भोगशक्तश्च शोध्यो बोध्योऽकलः प्रभुः ॥”

इति । पराख्ये च —

“देहाढ्यो नश्वरो व्यापी विभिन्नः समलो जडः ।
स्वकर्मफल(भुक्ता ? भोक्ता) च किञ्चिज्ज्ञः सेश्वरः प्रभुः ॥”

इति । किं बहुना —

यदा नियत्या विनियम्यतेऽवशः पशुः समे कर्मणि कालयोगतः ।
शिवेच्छया शक्तिनिपातशोधितस्ततो विमुच्येत यथार्हदीक्षया ॥ १२ ॥

अत्र —

“समे कर्मणि सञ्जाते कालान्तरवशात् ततः ।
तीव्रशक्तिनिपातेन”

इत्यादिना किरणेऽभिहितत्वाद् दीक्षितस्य पाशमुक्तिः सिद्धेत्यतस्त्वदीक्षितो बद्ध एव ।

‘अथात्मा मलिनो बद्धः पुनर्मुक्तश्च दीक्षया” ।

इति । स्वायम्भुवे । अत्र —

बद्धः पाशैः पशुर्देही सोऽसम्यग्ज्ञानहेतुतः ॥ १३ ॥
गवादिवद् भोक्तृतया यद् यदित्थं तथैव तत् ।

पशुविचाराधिकारः ।

"तथैव पाशास्त्रिविधास्तु देहिनां मलं च मायाप्यथ कर्मसञ्चितम् ।
तदाणवं नाम मलं सहोद्भवं यदेव मायेयककार्मणाह्वयम् ॥

पाशा अपि त्रयो ज्ञेया मलं माया च कर्म च । "

इति वरुणः ।

"पाशस्तु मलकर्ममाययास्तेषां पशूनां त्रिविधा ।"

इति रामकण्ठे । स्वायम्भुवे च —

"अथानादिमलं पुंसां पशुत्वं परिकीर्तितम् ।
तुषकम्बुकवज्ज्ञेयं मायापापाङ्कुरस्य तत् ॥
मायातत्त्वं जगद्बीजमविनाश्यं शिवात्मकम् ।
कर्म तद् द्विविधं भोग्यम्"

इति च ।

"अनात्मभूतेऽत्र कलेबरे पशोर्यदात्मबुद्धिर्ममता च वस्तुषु ।
असत्सु सद्बुद्धिरितीह तत् त्रयं मलाख्यमज्ञानमिदं परिस्फुटम् ॥
सहजो हि मलो माया कार्यमागामिको मलः"

इति किरणे । तथाच मतङ्गे —

"मोहो नाम मलः पुंसां सहजोऽनादिमान् मतः ।
यो हि षण्णां मुदादीनां प्रधानत्वाद् द्विजोत्तम! ॥"

इति । "मलं चाशुद्धिरज्ञानमि"ति वरुणः ।

"मोहो मदश्च मात्सर्यं रागद्वेषौ च तृष्णया ।
लोभश्च सप्तधाज्ञानमलं यत् सहजं पशोः ॥"

इति बृहत्कालोत्तरे ।

"मायेत्युक्ता कलाद्यात्र क्षित्यन्ता तत्त्वसंहतिः ।
यस्यां विश्वप्रपञ्चोऽयं सहाभिः ख्यातिगोचरः ॥
कलादिकं तु तत्कार्यं सूक्ष्मं स्थूलं धरान्तकम् ।
स्वकर्मतः शरीरेऽस्मिन् सम्बद्धमनुमीयते ॥
सर्वकार्यं यतो माति मायातत्त्वमतः स्मृतम् ॥"

इति पराख्ये ।

"कला च पूर्वं नियतिश्च विद्या रागः पुमांश्च प्रकृतिश्च बुद्धिः ।
अहङ्कृतिर्मानसमिन्द्रियाणि दशैव तन्मात्रकपञ्चकं च ॥

व्योमानिलाग्न्यम्बुधरान्तमेभिस्तत्त्वैः प्रसिध्येत् तनुरत्र भोक्तुः ।
संसारिणः कर्मवशाद्धि सैषा मायेन्द्रजालप्रतिमा विभाति ॥

अचेतनं चेतनवद् विचित्रं सर्वत्रगं नित्यमतीव सूक्ष्मम् ।
यतस्ततः स्थूलमपीह मायातत्त्वं न शक्यं गदितुं यथावत् ॥

कर्मापि च स्याद् द्विविधं कृतं प्राक् पुण्यात्मकं चाप्यथ पापकं च ।
ते च त्रिभेदे खलु मानसं प्राग् वाग्जं च शारीरमिति क्रमेण ॥

त्रैधानि कर्माणि पुनस्त्रिधा स्युः प्रागार्जितानीह च संभृतानि ।
आगामिकानीति च तानि येषां द्वन्द्वात्मकानीह फलानि भोक्तुः ॥

अणोरशुद्धस्य शरीरिणोऽस्य मलं हि शुल्बस्य तु कालिमेव ।
सहैव जातं शिवशक्तिपाताद् रसेन्द्रवेधादिव यात्यभावम् ॥

शिवानुग्रहयोगात् तु शक्तिपातादनन्तरम् ।
प्रवर्तितायां दीक्षायां पशुत्वादेष मुच्यते ॥

शिवेच्छया परानन्ता शैवी शैवार्थदायिका ।
सा शक्तिरापतत्याद्या पुंसो जन्मन्यपश्चिमे ॥

तन्निपातात् क्षरत्यस्य मलं संसारकारणम् ।"

इति स्वायम्भुवे ।

तस्य चिह्नानि भक्तिश्च विरागो भवसागरे ।
सम्यग् ज्ञानं शिवत्वस्य व्यक्तिश्चेति भवन्ति हि ॥ १४ ॥

तस्माज्ज्ञानं च भक्तिश्च वैराग्यमिति चात्मनः ।
दीक्षितस्य तु चिह्नानि पशोस्त्वेतानि नाञ्जसा ॥ १५ ॥ इति ।

वरुणपाशविचाराधिकारः ।

पतिस्तु शुद्धः शिव एव नित्यस्तृप्तश्च सर्वज्ञगुणः स्वतन्त्रः ।
अनादिबोधोऽयमलुप्तशक्तिः सोऽनन्तशक्तिर्निखिलाध्वपालः ॥ १६ ॥

अत्र रामकण्ठः—“पतिस्तु भगवाञ्छिवसदाशिवादितत्त्वभेदेन भुवनपञ्चकभेदेन च वक्ष्यमाणः परमेश्वरः” इति ।

अतीत्य तत्त्वानि विराजमानो व्योमाखिलं व्याप्य यतो ह्यरूपः ।
व्योमप्रकाशो भगवानमेयो ह्यनादिमध्यान्तमहेश्वरोऽसौ ॥ १७ ॥
क्रीडन् स बिन्दोरवतीर्य शक्त्या स्वयोपगूढः परमप्रभावः ।
सर्वाध्वकार्यं निखिलं सिसृक्षुः स्वशक्तिजालावरणो बभूव ॥ १८ ॥
स मन्त्रनाथोऽप्युपचारयोगात् स्वमन्त्रपञ्चात्मतनुं व्यधत्त ।
अनन्तसूक्ष्मादिभिरष्टसंख्यैः समं तु विश्वेश्वरशक्तिभेदैः ॥ १९ ॥
ईशानमूर्धां पुरुषाख्यवक्त्रामघोरहृद् गुह्यकवामदेवाम् ।
सद्याख्यमूर्तिं त्वथ हारिणीं च तथा जनित्रीं च निरोधयित्रीम् ॥

अत्र मतङ्गे—

“तनुर्यस्योपचारेण पञ्चमन्त्रमयी शिवा ।
ईशानमूर्धा पुंवक्त्रो ह्यघोरहृदयः प्रभुः ॥
उच्यते वामगुह्योक्त्या सद्योमूर्तिस्तथासने ।
हारिणी जननी चैव रोधयित्री च शक्तयः ॥”

इति ।

अनन्तोऽनन्तवीर्यात्मा सूक्ष्मश्चेत्यादिनापि च ।

विद्येश्वराः प्रसिद्धाः । समासादेवंविधः पतिः सदाशिवरूपी वा निर्दिष्टः ।

पतिविचाराधिकारः ।

शिवास्य शक्तिः परमार्थसूक्ष्मा चितिः स्वतन्त्राखिलसिद्धिहेतुः ।
प्रभेव दीपात् तु शिवादभिन्ना जगद्भवोन्मीलनबोधदक्षा ॥ २१ ॥

तथा च मतङ्गे —

“पत्युः शक्तिः परा सूक्ष्मा जगदुन्मीलनक्षमा ।
तया प्रभुः प्रबुद्धात्मा स्वतन्त्रश्च सदाशिवः ॥
प्रबोध्यते महातेजा ज्ञानशक्तिकृतास्पदः ॥”

इति ।

तत्त्वेन सा चेश्वरसंज्ञितेन युक्ता चतुर्भिर्भुवनैः समग्रा ।
इच्छाक्रियाज्ञानमयी त्रिभेदा भिन्ना पुनः षोडशधा च शक्तिः ॥

---

1. ‘क्रियासर’ ख. पाठः.

तथाच मतङ्गे —

“तत्सामर्थ्यादनन्तस्य तत्तेजः पारमेश्वरम् ।
भेदैः षोडशधा भिन्नमिच्छाज्ञानक्रियात्मकम् ॥”

इति ।

संक्षोभणी स्याज्जननी ततश्च स्यात् क्रोधयित्री च तथैव गोप्त्री ।
नेत्री च योक्त्रीत्युदिता परस्तात् त्राणाह्वया वामनियामिका च ॥
रौद्रीत्यतः प्लाविकया ततोऽपि श्रद्धा परस्तादथ भासनी स्यात् ।
ज्वालिन्यथाह्लादनिकेति गीता स्तम्भिन्यपि स्याद् विकिरा च शक्तिः ॥
क्रमादमी षोडश शक्तिभेदाः प्रोक्ताः शिवो याभिरुदीर्णशक्तिः ।
स निष्कलः सन् सकलोपचारात् क्रीडत्यजः कर्तृतया स्म लोकैः ॥

“प्रबोध्यते महातेजा ज्ञानशक्तिकृतास्पदः ।
स्थानभेदेन कर्तृत्वं यस्मात् तस्योदितं सदा ॥”

इति पारमेश्वरे ।

पत्युः शरीरं भुवनक्रियायां भोगाश्च सिध्यन्ति यथेश्वरेऽपि ।
स्थितास्तु तत्त्वाध्वनि शक्तयस्तास्तथा स्वनामानुगुणक्रियाढ्याः ॥

तथाच रामकण्ठः — “शक्तिपदार्थोऽत्रेश्वरतत्त्वेन वक्ष्यमाणभुवनचतुष्टययुक्तश्चतुर्थोऽभिधीयते । तदधिष्ठानं विना पुंसां ज्ञानानुत्पादनात् ” इति ।

मतङ्गे च —

“स्वभावस्याप्युत क्रीडा स च क्षोभ इति स्मृतः ।
क्षोभेणातिजवात् कर्तुः शरीरमभवत् पुरा ॥
येनावतीर्य सम्भोगांस्तत्त्वादीश्वरसंज्ञितात् ।
व्यापारस्थितयेऽनन्तः कृतवान् भुवनं महत् ॥
एवं क्षोभयिता देवः क्षोभ्याश्च पशवः स्मृताः ॥”

इत्येतस्मात्, —

“क्षोभण्या क्षोभयल्लोकाञ् जनन्या भोगसृष्टिकृत् ।
रोधयित्र्या निरुध्याणून् स्वे स्वे कर्मफले न्यसेत् ॥
गोप्त्र्या जगद् गोपयति नेत्र्या विश्वं नयत्यसौ ।
रुक् पाशनिचयो भोक्तुर्येयं द्रावयितुं क्षमा ॥”

इति मतङ्गे ।

---

१. ‘नांमात’ क. पाठः.

पशूनां दुःखसन्तानं विमृज्य प्लाविकाह्वया ॥ २७ ॥
भोगामृतैः प्लावयति श्रद्धयार्थैश्च योजयेत् ।
स्वभावाभावभावैश्च भाविन्या भावयत्यणून् ॥ २८ ॥
संहृत्य विश्वं ज्वालिन्या ज्वालयत्यपि संहृतौ ।
ह्लादिन्या ह्लादयेद् भोगैर्मोक्षेण च शिवाश्रयात् ॥ २९ ॥
स्तम्भिन्या स्थापयेद् विश्वं स्वाज्ञायां स महेश्वरः ।
नानायोनिसहस्रेषु जनिमद् विकिरत्यणून् ॥ ३० ॥
विकिरण्या चरस्थास्नुत्रसत्सु बहुधा शिवः ।

मतङ्गे च—

"विकिरिण्या यथोपात्तस्वाङ्गावयवगोचरे ।
व्यक्तीकरोति जगतः शरीराणि सहस्रधा ॥"

इति ।

इत्थं शिवः षोडशशक्तिभेदैस्तद्भेदजाभिर्यदनन्तशक्तिः ।
विद्यासमग्रस्वविभूतिजालैर्विश्वं विदित्वा च सृजत्यजस्रं[1] ॥ ३१ ॥
तिस्रः कोट्योऽर्धकोटिश्च नियोगेनाधिरोपिताः ।
विद्यातत्त्वविधौ शक्तयस्तासामेव विभूतयः ॥ ३२ ॥

अपिच,

अभ्युद्गताः[2] कर्तुरमोघवीर्याः प्रविस्तृतास्ताश्च जगत्प्रपञ्चे ।
प्रकाशितं याभिरुदारवृत्तं स्वकं स्वकं कारणकार्यभावात् ॥ ३३ ॥
उन्मीलिताः पाशविभागयुक्त्या कृताश्च सर्वे पशवः समृद्धाः ।
भोगेषु युक्त्यावसरागतानां विभाजितं कर्मफलं यथावत् ॥ ३४ ॥
प्रभोः स्थितास्त्वात्मवशे महत्यस्ताः शक्तयोऽशेषजगत्प्रदीपाः ॥ ३५ ॥

इति ।

शक्तिविचाराधिकारः ।

विचारशब्देन[3] तु पूरुषस्य कर्मानुसाराद् भुवनाध्वनश्च ।
साधारणेनापि च सृष्टिपूर्वं जगत्त्वसाधारणतोऽपि गीतः ॥ ३६ ॥

---

१. 'स्रम्। मतङ्गे—तिस्रः' ख. पाठः. २. 'त्यु' क. पाठः. ३. 'ब्दो' ख. पाठः

षड्विंशतिर्यो भुवनाध्वभेदो विद्यासविद्येश्वरतत्त्वयुक्तः ।
तस्यापि पश्चादिपुरोदितानां मीमांसनं चात्र विचारमाहुः ॥ ३७ ॥

विचारपदार्थाधिकारः ।

क्रियेति च स्यादिह कृत्यचक्रं दीक्षादिसंस्कारविशेषयुक्त्या ।
सनित्यनैमित्तिककाम्यकर्म चर्याह्वयं तद्युगलं पदार्थः ॥ ३८ ॥

षष्ठः प्रसिद्धः किरणादिकेषु शैवेष्वथैषां तु पदार्थकानाम् ।
व्युत्पादकं यद् भवतीह तन्त्रं तत्रीति धातोरिह धारणार्थात् ॥ ३९ ॥

क्रियाचर्यापदार्थाधिकारः ।

दीक्षया शिवत्वव्याप्तिव्यावर्णनप्रसङ्गाच्च पटलस्य प्रथमश्लोके प्रवदाम्यथोत्तरमित्युक्तत्वाच्च प्रतिष्ठादिकं क्रियाचक्रमपि क्रियाचर्यापदार्थेऽन्तर्भूतमेवोपरिष्टात् प्रदर्श्यते ॥

निगदितमिति शैवतन्त्रबीजं त्विह पशुपाशपतीश्वरीविचारैः ।
फलति यदिह चापि सत्क्रियोत्तं सुरतरुषण्डमिवेष्टकामदोहम् ॥ ४० ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापादे षट्पदार्थविचारो नाम
द्वितीयः पटलः ।

अथ तृतीयः पटलः ।

अथोच्यते नैत्यकमत्र कर्म सामान्यतः सिद्धिकरं यथावत् ।
समस्तवर्णाश्रमलिङ्गभाजामावश्यकं यत् करणीयमेकम् ॥ १ ॥
प्रभावतीष्वेव हि तारकासु कालं तु सूर्योदयदर्शनात् प्राक् ।
वदन्ति सन्ध्यां मुनयः प्रभातां तस्यां विनिद्रः शयनं च जह्यात् ॥ २ ॥
स्मरन् हृदम्भोरुहकोटरस्थं शैवं परं ज्योतिरथात्मसंस्थम् ।
व्रजेत् समुत्थाय दिशं विशुद्धमम्भः प्रभूतं सुलभं च यस्याम् ॥ ३ ॥
विदूरतो मार्गजलाशयादेश्छन्ने तृणैर्भूमितले निवीती ।
उदङ्मुखो याम्यमुखोऽह्नि रात्रौ त्यक्त्वा मलं चाथ गृहीतशिश्नः ॥ ४ ॥

---

१. 'क्ष्मा क. पा०:.

कर्णावसक्तयज्ञोपवीतोऽवगुण्ठितशिरस्क इति यावत् ।

जलाशयं प्राप्य मृदं विशुद्धामादाय चाष्टाङ्गुलखातलब्धाम् ।
निधाय तां दक्षिणतो धृताभिरद्भिस्तु शौचं विधिवत् प्रकुर्यात् ॥ ५ ॥
एकैव लिङ्गे करयोस्तु तिस्रस्तथा गुदे पञ्च मृदः प्रदेयाः ।
वामे करे द्वादश तत्प्रसङ्ख्याः पाण्योरयं शौचविधिर्हि मुख्यः ॥ ६ ॥
उत्थाय वासः परिधाय सम्यगाजानुसन्धेश्चरणौ करौ च ।
प्रक्षाल्य मृत्स्नासलिलैर्विशुद्धैर्वक्त्रं च गण्डूषजलैर्विशोध्य ॥ ७ ॥
प्लक्षाम्रजम्बूककुभाश्वकर्णमालूरकाशोकलवङ्गजाद्यम् ।
वैकङ्कतोदुम्बरचम्पकं वा शस्तं बुभुक्षोः खलु दन्तकाष्ठम् ॥ ८ ॥
स्वैरङ्गुलैर्द्वादशभिर्मितं तत् कनिष्ठिकानाहसमं सवल्कम् ।
पूर्वामुखोऽथादुपविश्य मौनी प्रदक्षिणं वामरदादधः प्राक् ॥ ९ ॥
मोक्षार्थिनां कण्टकिनस्तु वृक्षास्तद्वाच्छिरीषार्जुननक्तमालाः ।
शस्तं ह्यपामार्ग इतीह तेषामष्टाङ्गुलं दन्तविशोधनाय ॥१० ॥
सनिम्बधात्रीधवसेलुशिग्रुवानीरकैरण्डतृणैः कुशैर्वा ।
स्थितः प्रजल्पन् शयितोऽथवाद्यात् तैलावसिक्तोऽपि न दन्तकाष्ठम् ॥
नोपोषितः पारणपूर्वकालं न जन्मभे पर्वणि नासिताहे ।
नाप्यष्टमीश्राद्धदिनेषु दन्तान् प्रधावयेदङ्गुलिभिर्नखैर्वा ॥ १२ ॥

अत्र कालोत्तरे —

> “प्रतिपत्पर्वषष्ठीषु नवम्यामपि वा गुह ! ।
> दन्तानां काष्ठसंयोगे महान् दोषोऽभिधीयते ॥”

तद्वत्तु जिह्वामपि मार्जयित्वा तद्दन्तकाष्ठादि विसृज्य दूरे ।
गण्डूषकद्वादशकेन पश्चादाचम्य तु स्नानमुपक्रमेत ॥ १३ ॥
सरित्सु गङ्गादिषु मुख्यमुख्यं तीर्थेषु चान्यासु नदीषु मुख्यम् ।
सरस्तटाकादिषु मध्यमं स्यात् स्नानं तु कूपेषु गृहे च नीचम् ॥ १४ ॥
स्नायात् तु कूपादिषु शुद्धपात्रैः स्नातैर्द्विजैरेव समाहृताद्भिः ।
स्नायात् तु नोष्णाम्भसि कर्मयोग्यं नैतद् यतो रोगिषु सम्मतं तत् ॥
भुवमष्टाङ्गुलां खात्वा त्यक्त्वाधो मृदमस्नतः ।
खातां मृदं समादाय तत् खातं परिपूर्य च ॥ १६ ॥
शिरसा पयसस्तीरे धौते संस्थाप्य तां पुनः ।
शिखया शोधयित्वा तु वर्मणा विभजेत् त्रिधा ॥ १७ ॥

लिप्त्वैकभागमानाभेः प्रक्षाल्याचम्य वाग्यतः ।
द्वितीयेनास्त्रयुक्तेन दीप्तेनाङ्गानि लेपयेत् ॥ १८ ॥
प्राणानायम्य सलिले निमज्ज्यास्त्रमनुस्मरन् ।
कालानलप्रतीकाशं तथोपतटमम्भसि ॥ १९ ॥
उपविश्य समाचान्तः कृत्वास्त्राद् दिग्विबन्धनम् ।
शिष्टं तु पूर्वमृद्भागमादायानाभि वारिणि ॥ २० ॥
स्थित्वा वामकरस्थं तत्-त्रिधा तु विभजेत् पुनः ।
दक्षिणं भागमस्त्रेण प्राक् स्वमूलेन तूत्तरम् ॥ २१ ॥
अङ्गमन्त्रैः समालभ्य गृहीत्वास्त्रेण दक्षिणम् ।
हुम्फडन्तेन रक्षायै दशदिक्षु क्षिपेत् सुधीः ॥ २२ ॥
मूलालब्धेन पूर्वेण जले दक्षिणपाणिना ।
निक्षिप्य भ्रामयेद् वारि शिवतीर्थमनुस्मरन् ॥ २३ ॥
अङ्गालब्धार्कदीप्तेन शिष्टभागेन विग्रहम् ।
सर्वमालिप्य तत्तीर्थं स्वनाम्नावाह्य पूजयेत् ॥ २४ ॥
गन्धपुष्पैर्यथालाभं मनसा वा समाहितः ।
मुख्यनद्यब्धितीर्थेषु नान्यतीर्थानि कीर्तयेत् ॥ २५ ॥
कीर्तनान्निष्फलं तत् स्यात् क्रुध्येच्चातो न कीर्तयेत् ।
केवलाम्भस्सु गङ्गादितीर्थानां कीर्तनं स्मृतम् ॥ २६ ॥
तत्तत्फलप्रदं तस्मात् तत्तत्तीर्थानि कीर्तयेत् ।
ततः प्राणान् समायम्य त्रिर्निमज्ज्य समाहितः ॥ २७ ॥
निमग्न एव साङ्गं स्वमूलं शक्त्या जपेद्धृदा ।
एकाशीतिपदं मन्त्रं जपेच्छक्तोऽघमर्षणे ॥ २८ ॥
द्विजश्चेद् वैदिकं सूक्तमाघमर्षणिकं जपेत् ।
हिरण्यशृङ्गमित्यादि यथोक्तं पूर्वपद्धतौ ॥ २९ ॥

यथा जलौघे लवणस्य सञ्चयः प्रयाति सद्यो विलयं महानपि ।
तथा महानप्यघमर्षणेंऽहसां चयो विनाशं व्रजतीति निश्चितम् ॥ ३० ॥
ततः स्थितो वारिणि वामदक्षिणौ करौ शशाङ्कार्कशिवद्वयात्मकौ ।
विभाव्य मूलेन च कुम्भमुद्रया शिरस्यथाङ्गैरपि चाभिषेचयेत् ॥ ३१ ॥

ततोऽम्भस्तटमागत्य कौपीनं मेखलामपि ।
परिवर्त्याथवा शुक्ले वाससी परिधापयेत् ॥ ३२ ॥

यथा ब्रह्मशम्भुः —

"द्वितीयं हस्तविस्तीर्णं कौपीनं ब्रह्मचारिणाम् ।
त्रयोदशाक्षसङ्कोचं सत्सूत्रगुणमेखलम् ॥"

ब्रह्मचारिग्रहणमुपलक्षणं यतीनां लिङ्गिनामपीत्यर्थः ।

स्नातो नाङ्गानि निर्मृज्यात् पाणिना वार्द्रवाससा ।
तथा नेक्षेत पाषण्डिपातकिध्वान्त्यजाशुचीन् ॥ ३३ ॥

प्रमादाद् यदि वीक्षेत पुनः स्नात्वा विशुध्यति ।
चिताचण्डालयूपश्वचितिकाष्ठादिरासभान् ॥ ३४ ॥

वराहकुक्कुटोदक्यासृगालोलूकवायसान् ।
सूतकीशावकाशौचिमहापातकिनोऽशुचीन् ॥ ३५ ॥

स्पृष्ट्वा देवलकं चापि सचेलो जलमाविशेत् ।
नैमित्तिकेषु कृत्येषु ग्रहणेन्दुक्षयादिषु ॥ ३६ ॥

अयनद्वयतीर्थादौ सचेलः स्नातुमर्हति ।
सन्ध्यासु वपने शुक्लविण्मूत्रोच्छिष्टकुष्ठिनाम् ॥ ३७ ॥

सम्पर्के वमने चाब्धेः स्पर्शने चाप्यपर्वणि ।
वृषलप्रतिलोमानां मार्जारस्पर्शनेऽपि च ॥ ३८ ॥

श्मश्रुकर्माणि चोत्तीर्य नदीं वारुणमाचरेत् ।
दानादौ स्नानजप्यादौ तर्पणे हवनेऽपि वा ॥ ३९ ॥

सर्वत्र सपवित्रः स्यादन्यथा स्यात् तदासुरम् ।
यद्वा मुक्तशिखो नग्नः प्रलपन् वावगुण्ठितः ॥ ४० ॥

करोति कृत्यं दैवादि सर्वं विद्यात् तदासुरम् ।
अथानुदित आदित्ये सन्ध्यावन्दनमाचरेत् ॥ ४१ ॥

तत्र पूर्वं तु मृत्तोयैः क्षालिताङ्घ्रिकरद्वयः ।
द्विराचामेद् यथाकल्पं स्वागमस्मृतिचोदनात् ॥ ४२ ॥

तद्यथा —

अङ्गुल्यग्रे दैवमङ्गुष्ठमूले ब्राह्मं तीर्थं पर्वसन्धिष्वथार्षम् ।
प्राजापत्यं स्यात् कनिष्ठामधोऽथ पित्र्यं तर्जामूलदेशे द्विजानाम् ॥४३ ॥
हस्ते तूक्तं दक्षिणे तत्तले स्यादाग्नेयाख्यं तीर्थमन्यत्र सौम्यम् ।
दैवं चान्यत् कर्म कुर्यात् स्वतीर्थादाचामेत्तु ब्रह्मतीर्थेन तोयैः ॥ ४४ ॥

ज्येष्ठाग्रेऽग्निस्तर्जनीमूर्ध्नि वायुर्मध्याग्रेऽर्कोऽनामिकाग्रे सुरेन्द्रः ।
प्राजापत्यः स्यात् कनिष्ठेति देवैरङ्गुल्यः स्युर्दक्षिणे विप्रपाणौ ॥ ४५ ॥

अत्र विप्रशब्दग्रहणमुपलक्षणं दीक्षितानां द्विजातीनामित्यर्थः ।

प्राग्वक्त्रो वोदङ्मुखः सोपवीतो बद्ध्वा चूडां जानुमध्यस्थबाहुः ।
तोयापेक्षी सूपविष्टोऽथ मौनी स्यादाप्रह्वस्त्वेकधीराचमिष्यन् ॥ ४६ ॥

अदुष्टरसगन्धाद्यैरकीटाफेनबुद्बुदैः ।
अनुष्णैरम्बुभिः शुद्धैराचामेदभिवीक्षितैः ॥ ४७ ॥

आत्मविद्याशिवैस्तत्त्वैरीश्वरायनमोन्तकैः ।
प्रणवाद्यैः पृथग्युक्तं त्रिः पिबेदम्बु वीक्षितम् ॥ ४८ ॥

हस्तं गोकर्णवत् कृत्वा यवमग्नमितं जलम् ।
पिबेदशब्दवद् ब्रह्मतीर्थेन त्रिर्यथोदितम् ॥ ४९ ॥

ओष्ठावस्त्रेण सम्मृज्य खानि सर्वात्मना स्पृशेत् ।

कालोत्तरटीकायां —

"हृत्कण्ठास्यगताः पुनन्ति विधिनैवापो द्विजातीन् क्रमात्
त्रिः पीता वृषलस्त्रियावपि तथा कुण्डानुलोमादिकान् ।
आचम्य त्रिरपस्त्रिर्वदपुरुषाः प्रीणन्ति निर्मार्ष्टि यद्
द्विः सार्थर्वषडङ्गयज्ञपुरुषाः प्रीताः स्युरप्यग्नयः ॥
प्रीणात्यर्कमनामिका नयनयोः स्पर्शात् तथाङ्गुष्ठयुक्
साङ्गुष्ठा त्वथ तर्जनी सममिता घ्राणद्वये मारुतान् ।
अङ्गुष्ठेन कनिष्ठिका श्रवणयोराशां च नाभेर्वसू-
नात्मानं तु हृदोंसयोर्दिवमृषीन् मूर्ध्नः समस्ताङ्गुलैः ॥"

इत्थं सम्यग् द्विः समाचम्य शुध्येदुच्छिष्टे वा क्षालने पादयोश्च ।
कक्ष्यामोक्षे वा शिखाबन्धमोक्षे निष्ठीवे वा जृम्भिकायां क्षुते च ॥ ५० ॥

स्नानाचमनाधिकारः ।

इत्थमाचम्य तु ततः सन्ध्यावन्दनमाचरेत् ॥ ५१ ॥

तत्र प्राग्वैदिकात् तन्त्रसन्ध्या मन्त्राह्वया ततः ।
क्षत्रवैश्यावपि तथा ह्यन्ये केवलतान्त्रिकीम् ॥ ५२ ॥

ईशानपुरुषाघोरवामदेवा यथोदिताः ।
सद्यश्च सचतुर्थामी(?) नमोन्ताः पञ्च ते पृथक् ॥ ९३ ॥

हृच्छिरश्च शिखा वर्म नेत्रमस्त्रं च षट्क्रमात् ।
षडङ्गानि सजातीनि मूलं प्रासादसंज्ञितम् ॥ ५४ ॥

अस्त्रं पाशुपताख्यं चेत्येषा स्यान्मन्त्रसंहिता ।

अत्र कालोत्तरे —

"ब्रह्माणि च शिवं साङ्गं नेत्रं पाशुपतं च यत् ।
समासात् कथितः सर्वो मन्त्रोद्धारस्त्वयं शुभः ॥"

इति ।

शिवाङ्गान्यत्र लिख्यन्ते वक्ष्यमाणक्रियाप्तये ॥ ५५ ॥

ओं हां शिवाय हृदयाय नमः । ओं ह्रीं शिवाय शिरसे स्वाहा । ओं हूं शिवाय शिखायै वषट् । ओं हैं शिवाय कवचाय हुम् । ओं हौं शिवाय नमः नेत्रत्रयाय वौषट् । ओं हं शिवाय नमः अस्त्राय फट् ।

षष्ठवर्गाद्द्वितीयं तु चतुर्थाद्येन भूषितम् ।
द्वितीये प्रथमार्णं तु पञ्चमाद्येन संयुतम् ॥ ५६ ॥

एतत् पाशुपतास्त्रं स्यात् सोपदेशं यथाक्रमात् ।
एतदेव शिवास्त्रेण युक्तं विघ्नान्निहन्ति हि ॥ ५७ ॥

गन्धनुलिप्तकरयोस्तु मिथोऽपघर्षात्तालत्रयास्त्ररववारितविघ्नसङ्घः ।
ज्येष्ठादिकाङ्गुलिषु युग्मकनिष्ठिकान्तमीशानपूर्वकमनून् क्रमशो न्यसेच्च ॥ ५८॥

ह्रस्वैः स्वरैस्तु बिन्द्वन्तैर्युक्तं व्योमाक्षरं यथा ।
ओकाराद्यमकारान्तमीशानाद्यैर्न्यसेत् तथा ॥ ५९ ॥

अथाङ्गमन्त्रैस्तु पुनः कनिष्ठादिषु विन्यसेत् ।
ज्येष्ठान्तमस्त्रमन्त्रं तु तलयोरुभयोरपि ॥ ६० ॥

नष्टाङ्गुष्ठा बद्धमुष्टिरैशानी स्यादवाङ्मुखी ।
शेषाः स्युः पुरुषादीनामङ्गुल्यो ज्येष्ठिका ग्रहाः ॥ ६१ ॥

पञ्चब्रह्मोदिता मुद्रा न्यासेष्वेवं क्रमोदिताः ।
ताभिर्मूर्धास्यहृद्गुह्यपादाद्यामस्तकांस्तनोः ॥ ६२ ॥
ईशानादीन् स्वमन्त्रैस्तु मूर्ध्नि मस्तकपूर्वतः ।
दक्षिणे चोत्तरे पश्चाद् भागेषु शिरसो न्यसेत् ॥ ६३ ॥
स्वाङ्गानि हृदयादीनि स्वेषु स्थानेषु विन्यसेत् ।
पञ्चब्रह्ममुखं स्वैक्यं विद्यादेहं सदाशिवम् ॥ ६४ ॥
सन्ध्योपास्त्यार्चनादौ च शिवोऽहमिति भावयेत् ।

सकलीकरणाधिकारः ।

अत्र कालोत्तरे —

"कृतविद्यातनुः सन्ध्यां ध्यात्वा कालक्रमेण तु ।
उपस्थितारुणश्वेतश्यामलाभां विभागशः ॥
ब्रह्मादिकारणोपाधिभेदभिन्ना विभाविनी ।
साक्षिणी कर्मणां शम्भोः शक्तिः सन्ध्येति गीयते ॥
तत्प्रभामण्डलाभोगप्रविष्टामात्मनस्तनुम् ।

कुर्यात्" इति ।

तद्यथा —

हंसारूढां स्वतेजोगणमणिवसनालेपनामब्जनेत्रां
वेदास्यामक्षमालां स्रुवमथ कलशं दण्डमप्यादधानाम् ।
ध्यायेद् दोर्भिश्चतुर्भिस्त्रिभुवनजननीं पूर्वसन्ध्यां तु वन्द्यां
सावित्रीमृक्सवित्रीमभिनववयसं मण्डले चण्डरश्मेः ॥ ६५ ॥

तार्क्ष्यारूढाम्बुजाक्षी शतमखमणिभा शङ्खचक्रे दधाना
दोर्भिर्युक्ता चतुर्भिः स्थितिरिह जगतां या यजूंष्युद्गिरन्ती ।
व्यालोलानेकहारद्युतिरुचिरुचिरा वैष्णवी मध्यमेऽह्नः
सावित्री ध्येयरूपा विलसति सवितुर्मण्डले पीतवस्त्रा ॥ ६६ ॥

पञ्चास्यां पिङ्गविद्युत्ततिरुचिरजटामण्डलां चन्द्रमौलिं
रङ्गद्भूषाभुजङ्गोत्फणमणिकिरणोद्भासिभस्माङ्गरागाम् ।
ध्यायेत् खट्वाङ्गशूलाभयवरदकरां व्याघ्रचर्माम्बराढ्यां
सावित्रीं सत्रिनेत्रां परिणतवयसं सामसूतिं दिनान्ते ॥ ६७ ॥
प्रतिसन्ध्यं क्रमात् सन्ध्यां पृथग्रूपां विचिन्त्य तु ॥ ६८ ॥

स्वदक्षिणेतरौ हस्तावग्नीषोमात्मकौ पुनः ।
शिवशक्त्यात्मकौ ध्यात्वा तोयमादाय दक्षिणे ॥ ६९ ॥
शिवतीर्थमनुस्मृत्य गङ्गादिसरिदन्वितम् ।
जपित्वा संहितां कुम्भमुद्रया मूर्ध्नि योजयेत् ॥ ७० ॥
दक्षिणेन पुनस्तोयं हस्तेनादाय चास्त्रतः ।
तद्वामहस्ते विन्यस्य दिव्यं ध्यात्वा सुधामृतम् ॥ ७१ ॥
ततः स्रुताम्भसो बिन्दून् दक्षिणेन करेण तु ।
आदाय सपवित्रेण पठन् वै संहितामनून् ॥ ७२ ॥
अभ्युक्षन् योजयेन्मूर्ध्नि शेषं हस्तेऽथ दक्षिणे ।
ज्वलज्ज्योतिर्मयं ध्यात्वा दक्षिणघ्राणसङ्गमात् ॥ ७३ ॥
शरीरान्तर्गतं पापं निःशेषेण तमोमयम् ।
तज्ज्योतिष्प्रभया क्षिप्तं वामनासाविनिर्गतम् ॥ ७४ ॥
चिन्तयेत् पुनरस्त्रेण दह्यमानं भुवि क्षिपेत् ।
सर्वपापक्षयकरं ह्येतदप्यघमर्षणम् ॥ ७५ ॥

ओं ह्रौं शिवात्मने सूर्याय नमः ।

आदायाञ्जलिना तोयं मन्त्रेणानेन भानवे ।
त्रिरूर्ध्वमुत्क्षिप्य पुनराचम्याभिमुखो रवेः ॥ ७६ ॥
जपित्वा शिवगायत्रीं प्रासादाद्यन्तसंयुताम् ।
अष्टोत्तरशतं शक्त्या दशमात्रमथापि वा ॥ ७७ ॥
शिवात्मानं रविं ध्यात्वा त्रिधा कृत्वा प्रदक्षिणम् ।
अभिवाद्याप्यनुज्ञाप्य तर्पणं प्रारभेत च ॥ ७८ ॥

धृतोत्तरासङ्गपवित्रपाणिर्ब्रह्माणि चाङ्गानि च मूलमन्त्रम् ।
चतुर्मुखं चाप्यथ विष्णुरुद्रौ तथेश्वरं चापि सदाशिवं च ॥ ७९ ॥
स्वाहानमोन्तं निजनामधेयैः सन्तर्प्य शीतैः सलिलैर्विशुद्धैः ।
तारं पदद्वन्द्वमुदीर्य पश्चात् स्वाहान्तवाग्वादिनिशब्दयुक्तम् ॥ ८० ॥
इन्द्रादिदिक्पालदिशः स्वनाम्ना युक्तं चतुर्थ्याथ नमोन्तकं च ।
सन्तर्प्य चोर्ध्वामपि नाकपृष्ठां तथा धरां चापि च नागभोग्याम् ॥ ८१ ॥

इति दशदिक्तर्पणम् ॥

इन्द्राग्निवैवस्वतराक्षसेशतोयेशवाय्वर्थपतींश्च सोमम् ।
ईशाह्वयं वेधसमप्यनन्तं प्राग्वत् स्वनाम्ना दश तर्पयेत् तान् ॥ ८२ ॥

तत्र सोमं धनदादीशि इन्द्रेशानयोर्मध्ये ब्रह्माणमूर्ध्वदिक्पतिं निर्ऋतिवरुणयोर्मध्येऽनन्तं मधोदिक्पतिं विद्यादित्युपदेशः ।

इति दिक्पतितर्पणम् ।

अत्रिस्तद्वत् कौशिकाख्यः पुलस्त्यो भारद्वाजश्चाङ्गिराः स्याद् वसिष्ठः ।
दक्षोऽथान्यः स्याद् भृगुर्वै मरीचिश्चैतान् प्राग्वत् तर्पयित्वा क्रतुं च ॥

सनकं च सनातनं सनन्दं भृगुसंज्ञं च सनत्कुमारपैलौ ।
सह पञ्चशिखेन तर्पयामीत्यभिधानादिनमोन्तकं पृथक् स्यात् ॥

इति योगिमनुष्यान् ।

शिवं च रुद्रं श्रियमप्युमां च ब्रह्माणमग्निं च तथैव विष्णुम् ।
वायुं च सूर्यं त्वथ धर्मसोमावीशानमेतानथ तर्पयेच्च ॥ ८५ ॥

इति सिद्धान् ।

आदित्यं च तथा सोममङ्गारकबुधावपि ।
गुरुं शुक्रं शनिं राहुं केतुं चेति नव ग्रहान् ॥ ८६ ॥

चतुर्थ्यन्तं स्वनामभिर्नमोन्तं तर्पयेत् । ओं सर्वेभ्यो भूतेभ्यो वषट् नमः इति सर्वभूतानि सन्तर्प्य,

ततोऽपसव्यं तिलदर्भतोयैः पितॄन् स्वतीर्थेन तु तर्पयित्वा ।

सोमः पितृमान् यमोऽङ्गिरस्वानग्निः कव्यवाहनादयो ये पितरः तान् पितॄन् स्वधा नमस्तर्पयामि ।

पितृपत्नीः पितृगणान् पत्नीः पितृगणस्य च ।
ततः स्वनामगोत्राभ्यां स्वपितॄनपि तर्पयेत् ॥ ८७ ॥
स्वधा नमस्तर्पयामीत्यन्ते नाम्ना नियोजयेत् ।
पितॄन् पितामहांश्चापि तथैव प्रपितामहान् ॥८८ ॥
मातॄः पितामहीश्चैव तथैव प्रपितामहीः ।
मातामहांस्तथा मातुस्तर्पयेच्च पितामहान् ॥ ८९ ॥

प्रपितामहकान् मातुर्मातुर्मातामहीरपि (?) ।
मातुः पितामहीश्चैव मातुश्च प्रपितामहीः ॥ ९० ॥

ज्ञातींश्च ज्ञातिपत्नीश्चाप्याचार्यांश्च तथा पुनः ।
सखीनपि च तत्पत्नीरन्यानप्यात्मवंशजान् ॥ ९१ ॥

तर्पयित्वा यथापूर्वं प्रणम्याद्भ्यो नमोऽस्त्विति ।
पादक्षेपादिसंक्षोभदोषशान्त्यै विभावयेत् ॥ ९२ ॥

ह्रस्वप्रासादतस्तीर्थं संहृत्य हृदि योजयेत् ।
इत्थमुत्थानकावश्यशौचदन्ताविशोधनैः ॥ ९३ ॥

स्नानसन्ध्याविधेरूर्ध्वमाग्नेयं स्नानमिष्यते ।

"स्नानं प्राग् वारुणं कृत्वा पश्चादाग्नेयमाचरेत् ।"

इति वचनात् ।

तथाच मतङ्गे —

"एवं सकृत् तथाशक्त्या स्नातोऽम्भसि विचक्षणः ।
भस्मस्नानाधिकारी स्यान्नान्यथा मुनिपुङ्गव! ॥"

इति ।

रोगपीडावशात् स्नातुमशक्तो वारुणे यदा ॥ ९४ ॥
आग्नेयमेव तस्येष्टं रोगप्रशमनं च तत् ।
आग्नेयं भस्मना स्नानमखिलाघनिबर्हणम् ॥ ९५ ॥
स्वतेजस्सम्भवेनैव येन स्नातः स्वयं शिवः ।
सन्ध्यात्रये च जप्यादौ चर्यापूर्वावसानयोः ॥ ९६ ॥

भुक्त्वा सुप्त्वाम्बु पीत्वा वा कृत्वाप्यावश्यकादिकम् ।
स्त्रियं वाप्यनुलोमादीन् स्पृष्ट्वा वा मूषिकाशुचीन् ॥ ९७ ॥

आचरेत् स्नानमाग्नेयं यथैवाथर्वचोदितम् ।
देवाग्निगुरुविद्यानां समीपेऽन्त्यजदर्शने ॥ ९८ ॥

अशुद्धभूमौ मार्गे वा स्थितो नोद्धूलयेद् बुधः ।
कल्पानुकल्पोपकल्पभेदात् तद्वदकल्पकम् ॥ ९९ ॥

चतुर्धा भस्म शैवोक्तं पूर्वं पूर्वं गुणाधिकम् ।
अरोगायाः सवत्साया भूमावपतितं तु गोः ॥ १०० ॥

गोमयं पद्मपालाशपत्राद्यन्यतमेन तु ।
गृहीत्वा तु विशुद्धात्मा गायत्र्या शिवसंज्ञया ॥ १०१ ॥

शिवाग्नौ संहितामन्त्रैः साधितं कल्पसंज्ञितम् ।
आरण्यगोमयं दूरे ग्रामादेः पूतमाहरेत् ॥ १०२ ॥

प्राग्वच्छिवाग्निना दग्धं यत् तत् स्यादनुकल्पकम् ।
चतुर्विधं च तद् भस्म जातिसंकरवर्जितम् ॥ १०३ ॥

अग्निदग्धेष्वरण्येषु गृहीत्वा भस्म तत् पुनः ।
गोमूत्राबद्धपिण्डं तु विशोष्याथ शिवानले ॥ १०४ ॥

दग्धं भस्मोपकल्पं स्यादकल्पकमथोच्यते ।
विशिष्टविप्रगोवाटजातं वा देवतालयात् ॥ १०५ ॥

गृहीत्वा साधितं प्राग्वत् तद् भस्म स्यादकल्पकम् ।
चतुर्विधं च तद् भस्म जातिसङ्करवर्जितम् ॥ १०६ ॥

अपरिग्रहमन्येषां कर्मस्पर्शाद्यदूषितम् ।
श्लक्ष्णं पूतमरोगं च पात्रस्थं भसितं सितम् ॥ १०७ ॥

आग्नेयस्नानयोग्यं स्याद् यथोक्तं ब्रह्मशम्भुना ।
तद्भस्म संहितामन्त्रैः शक्त्या लब्धं सुरक्षितम् ॥ १०८ ॥

पात्रात् सङ्गृह्य हस्तेन दक्षिणेनाभिमन्त्र्य तु ।
विशोध्य धारिणीभिस्तु भूतशुद्धिविधानतः ॥ १०९ ॥

षडङ्गेनाभिमन्त्र्यादौ कृत्वा वामकरे पुनः ।
कृत्वास्त्रेण मलस्नानं मस्तकप्रभृति क्रमात् ॥ ११० ॥

ततस्त्वीशानपुरुषाघोरवामैः ससद्यकैः ।
क्रमान्मूर्धास्यहृद्गुह्यजङ्घान्ताशेषविग्रहम् ॥ १११ ॥

उद्धूलयेद् द्विजोऽन्ये तु ललाटांसहृदादिषु ।
धारयेयुस्त्रिपुण्ड्राणि तथैव ब्राह्मणादयः ॥ ११२ ॥
त्रियायुषं धारयेयुर्वेदप्रामाण्यदर्शनात् ।
"त्रियायुषं जमदग्नेः काश्यपस्य त्रियायुषम्" इत्यादिश्रुतेः ।

आग्नेयस्नानाधिकारः ।

ऐन्द्रादीन्यपि दृश्यन्ते स्नानान्यागमदर्शनात् ॥ ११३ ॥

येषु स्नानादघध्वंसं पुण्यं भद्रञ्च विन्दति ।
अनभ्रे प्रतपत्यर्के वृष्टिं दृष्ट्वोर्ध्वबाहुना ॥ ११४ ॥

माहेन्द्रस्नानमीशानात् कार्यं सप्तपदावधि ।
गवां खुरपुटोत्खातरेणुभिः पवनोपगैः ॥ ११५ ॥

गोमध्यगस्तत्पुरुषं गो(मूत्रं ? सूक्तं) वा जपन् द्विजः ।
अन्यस्तु गोस्तुतिं गोभ्यो नमो वेत्यभ्युदीरयन् ॥ ११६ ॥

वायव्यमाचरेत् स्नानमखिलाघनिबर्हणम् ।
स्नानानामिह सर्वेषां मूलं श्रेष्ठं च वारुणम् ॥ ११७ ॥

तस्मात् प्राग् वारुणं कृत्वा ततः स्नानान्तरं भजेत् ।
प्रक्षाल्य पाणिपादं तु समाचम्याथ वाग्यतः ॥ ११८ ॥

विद्यादे(हयुतो) भूत्वा मन्त्रस्नानं समाचरेत् ।
पञ्चभिर्ब्रह्मभिर्विप्रो गायत्र्या शिवसंज्ञया ॥ ११९ ॥

मूलेन च षडङ्गैश्च शिवतीर्थमनुस्मरन् ।
स्वशिरः प्रोक्षयेद् दर्भकूर्चाद् वा कुशमूलतः ॥ १२० ॥

अद्विजो दीक्षितो यस्यां मन्त्रैरीशानपूर्वकैः ।
मूलाङ्गैरपि चाभ्यस्तैः प्रोक्षयेत् तु स्वमस्तकम् ॥ १२१ ॥

आपोहिष्ठादिभिर्मन्त्रैर्मन्त्रस्नानं हि वैदिकम् ।
तेनापि मार्जयेद् विप्रो विशुद्धिं परमामियात् ॥ १२२ ॥

ततो यागगृहं गच्छंस्तीर्थं ह्रस्वेन संहरेत् ।

ह्रस्वप्रासादेनेत्यर्थः ।

स्नानवस्त्रादिकं दण्डे संयम्यामन्त्र्य तज्जलम् ॥ १२३ ॥

स्मृत्वा गुरुं गणेशं च हृदयेनाभिपूज्य तु ।
विशोध्यास्त्रेण पन्थानमस्त्रपञ्चकमध्यगः ॥ १२४ ॥

गच्छेत् तत्त्वान्यधस्तात् तु कल्पयन् यागमन्दिरम् ।
विद्यातत्त्वास्पदं ध्यायन् सर्वविद्यानिकेतनम् ॥ १२५ ॥

स्नानमात्राः समारोप्यं नागदन्तादिके क्वचित् ।
शुद्धे विविक्ते मौनी तु ततः पूजामुपक्रमेत् ॥ १२६ ॥

सन्ध्योपास्तिप्रसङ्गादिति विधिविहितं नैत्यकं कर्मचक्रं
संक्षेपाच्छैवतन्त्रे स्मृतमिह कथितं लिङ्गिनां वर्णिनां च ।
दृष्टादृष्टेष्टसिद्धिप्रदमिह मुनिभिः सेवितं चेति सन्तः
स्वीकुर्वन्तु स्ववित्तं स्वयमिव सुहृदः सत्पथावर्तयन्तः ॥ १२७ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे
क्रियापादे नित्यस्नानादिपटलस्तृतीयः ।

अथ चतुर्थः पटलः ।

प्रणम्य शम्भुं शशिखण्डशेखरं भवं भवच्छेदकरं समासतः ।
सभूतशुद्धिक्रममात्मशोधनं निगद्यते योगजपादिसिद्धये ॥ १ ॥

स्नातो यथावत् समुपास्य सन्ध्यां यागालयं प्राप्य कृताङ्घ्रिशौचः ।
आचम्य चान्तर्विधिवत् प्रविष्टः शस्तासने वाग्यमवान् निविष्टः ॥

आमस्तकाङ्घ्रिद्वयमात्मदेहे ध्यायन् सुसूक्ष्मं सुषिरं तदन्तः ।
बाह्ये तु विन्यस्य तु शक्तिमच्छां व्योमत्विषं तामथ देहमध्ये ॥ ३ ॥

हुङ्कारबीजं रुचिमद् विचिन्त्य प्राणान्नियम्यात्र निवेश्य चित्तम् ।
तद्रेचकान्तोक्तफडन्तमस्त्राद् ग्रन्थिप्रभेदं क्रमशो विदध्यात् ॥ ४ ॥

अस्त्रशब्देन पाशुपतास्त्रेणेति यावत् ।

ये ग्रन्थयः पञ्च तमोमलिष्ठा हृत्कण्ठतालुस्थितयः प्रसिद्धाः ।
भ्रूमध्यतो मूर्धनि चेति तेषां भेदात् तु नाडीसरणिः प्रसिद्ध्येत् ॥ ५ ॥

वायुं नियम्यात्मनि पूरकार्धाच्चैतन्यसान्तात्मकजीवरूपम् ।

सान्तात्मकशब्देन हंसमन्त्र उच्यते ।

तं बिन्दुभूतं च निरामयं स्वे हृत्पङ्कजे कुम्भकतो विभाव्य ॥ ६ ॥

तत्रोर्ध्ववायोः प्रसरेण जीवं सौषुम्नमार्गान्निहितं स्वमूर्ध्नि ।
उद्घातमात्रेण तु बीजवृत्त्या तं द्वादशान्तःस्थशिवं नयेच्च ॥ ७ ॥

उद्घातो नाम द्वादशमात्रः । अत्र योगानुशासने —

"जानु प्रदक्षिणीकृत्य न द्रुतं न विलम्बितम् ।
यत् करोत्यङ्गुलिस्फोटं तावन्मात्रां विदुर्बुधाः ॥

मात्राद्वादशकः काल उद्घात इति कथ्यते" ॥

इति ।

कादङ्गुलद्वादशकेऽत्र सौम्यं शुक्लं सहस्रच्छदपुण्डरीकम् ।
व्योमामृतव्याप्तमधोमुखं तन्मध्यं शिवाध्यासितमभ्युपेयम् ॥ ८ ॥

लीनः शिवेऽङ्गैरभिरक्षितात्मा साधोमुखं देहतरुं विभाव्य ।
तत्त्वानि षट्त्रिंशदथो विलोमं नीत्वा लयं स्वेष्विह कारणेषु ॥ ९ ॥

तद्यथा —

भूम्यम्बुतेजोमरुदम्बरैः स्याद् गन्धो रसश्चाप्यथ रूपमुक्तम् ।
स्पर्शाख्यशब्दौ कथितावुपस्थं वाक्पाणिपादं च तथैव पायू ॥ १० ॥

घ्राणं च जिह्वा नयनं तथा त्वक् श्रोत्रं मनोऽहङ्कृतिबुद्धयश्च ।
गुणप्रकृत्या पुरुषश्च रागोऽप्यशुद्धविद्या च कला नियत्या ॥ ११ ॥

तथैव कालः कथिता च माया विशुद्धविद्या च तथेश्वरश्च ।
सदाशिवः शक्तिरथो शिवश्चेत्युक्तानि तत्त्वानि शिवादिकानि ॥ १२॥

पञ्चाथ भूतानि परस्परान्तः शोध्यानि खादीनि विलोममार्गात् ।
विरिञ्चपूर्वैः समधिष्ठितत्वात् तत्तत्कलाबिम्बगुणाक्षदेवैः ॥ १३ ॥

भूमण्डलं यच्चतुरश्रवीतं वज्राङ्कितं गन्धगुणं ससद्यम् ।
घ्राणेन्द्रियं तत्कलया निवृत्त्या युक्तं च देवेन चतुर्मुखेन ॥ १४ ॥

ह्लांबीजतः पूरककुम्भकाभ्यां व्याप्तं तदाजानु तदङ्घ्रियुग्मात् ।
शोध्यं तदुद्घातकपञ्चकान्तं वायौ प्रविष्टं परिभावयेच्च ॥ १५ ॥

अब्बिम्बमर्धेन्दुसितं सिताब्जे चिह्नं रसाढ्यं रसनेन्द्रियं च ।
वामास्थितं विष्णुसमन्वितं तद्युक्तं प्रतिष्ठाकलया विशोध्यम् ॥ १६ ॥

ह्लींबीजमुद्घातचतुष्कशोध्यमग्नौ तदानाभितटं प्रविष्टम् ।
वह्नेस्त्रिकोणारुणमण्डलं स्याद् विद्याकलं स्वस्तिकलाञ्छनं च ॥ १७ ॥

दृगिन्द्रियं रूपगुणं सरुद्रं ह्रूंबीजतोऽघोरयुतं विशोध्यम् ।
त्र्युद्घाततस्तच्च जले प्रविष्टं व्याप्तं तु कण्ठावधि सन्निरूप्य ॥ १८ ॥

षड्बिन्दुचिह्नं त्वथ वायुबिम्बं कृष्णं षडश्रं पुरुषास्थितं च ।
त्वक्स्पर्शशान्त्यन्वितमीश्वरेण ह्रैंबीजमुद्घातयुगाद् विशोध्यम् ॥ १९ ॥

व्याप्तं च तद्भ्रूयुगलावसानं स्थूलांशमात्रेण धरां प्रविष्टम् ।
वृत्तं खबिम्बं स्फटिकावदातं सश्रोत्रशब्दं च सबिन्दुशक्तिम् ॥ २० ॥
ईशानसादेशयुतं त्वतीतं व्याप्तं समूलात्सकमाशिरोन्तात् ।
तद् द्वादशान्तः स्थितमूलमन्त्राच्चन्द्रामृतासारजलैः समस्तम् ॥ २१ ॥
आप्लाव्य निर्वर्तितभूतशुद्धिः सम्पाद्य तत्त्वानि यथाक्रमेण ।
शिवादिपृथ्व्यन्ततत्त्वैः स्वशक्त्यधिष्ठानशिवस्येच्छया विद्यादेहं सम्पादयेत् ।
शिवेच्छयोत्पादितशुद्धदेहो हृद्यासनं तु प्रणवेन दत्त्वा ॥ २२ ॥
तद्व्यापिनीं न्यस्य शिवां तु शक्तिं स्वबीजजीवं निहितं शिवाख्ये ।
तं द्वादशान्तादथ पूरकेण त्वानीय नाड्या हृदयाब्जमध्ये ॥ २३ ॥
संस्थाप्य मूलामृतवारिपूरैराप्लाव्य पूजादिकमारभेत ।

भूतशुद्ध्यधिकारः ।

अत्रोच्यतेऽन्या स्फुटमात्मशुद्धिर्या शोषणादिक्रमशोर्ध्वदेहे ॥ २४ ॥
निःशेषदोषक्षयशुद्धिदानाद् रोगान् जरां मृत्युमपि क्षिणोति ।
प्राग्वत् स्वदेहे सुषिरं विचिन्त्य तद्व्यापिनीं चान्तरबाह्यशक्तिम् ॥२५॥
हुङ्कारमध्यस्थितचित्तजीवः प्राणान्नियम्याहृतपूरकेण ।
ग्रन्थीन् विदार्याहृतरेचकान्तमस्त्रेण वायुं विनिवर्त्य पूरात् ॥ २६ ॥
चैतन्यमाहृत्य ससान्तजीवं हृत्सम्पुटे ज्योतिरनामयाख्यम् ।
तं कुम्भकोद्घातवशात् तदूर्ध्वं चाकृष्य सौषुम्नपथेन कान्तम् ॥ २७ ॥
तं द्वादशान्तःस्थशिवे नियुज्यात् तत्त्वानि नीत्वा विलयं विलोमात् ।
वर्णान् विलोमात् क्षहसक्रमात्तान् नीत्वा लयं शब्दततिं च शक्तौ ॥२८॥
शून्यं तु देहं मलपापमात्रं विचिन्त्य कृष्णं त्वथ नाभिचक्रे ।
बिम्बे तु वायोरतिधूम्रवर्णं यङ्कारमुद्भाव्य तु चण्डवायुम् ॥ २९ ॥
ध्यायेदधःशाखमथोर्ध्वमूलं संसारवृक्षात्मकमात्मदेहम् ।
"देहात्माधोमुखस्तत्र ध्यातव्यो भवपादपः" ।

इति ब्रह्मशम्भुः ।

तं शोषयेन्नाभिविनिर्गतान्तश्चण्डानिलेनाघमले च शोष्ये ॥ ३० ॥

उद्धातकैः पञ्चभिरस्य शोषं वायोर्निरोधेन विधाय पश्चात् ।
हृत्पङ्कजेऽन्त्याक्षरमग्नियुक्तं सानुग्रहार्धेन्दुयुतं सनादम् ॥ ३१ ॥
बीजं तु सञ्चिन्त्य हुताशकल्पं बिम्बे हुताशस्य तु रक्तवर्णम् ।
विन्यस्य षट्कोणलसत्रिशूलज्वालासहस्रप्रसरैरघौघम् ॥ ३२ ॥
सम्यग्दहन्तं तु कलेबराख्यं तद्भस्मसाद्भूतमपीह चिन्त्यम् ॥

'दहेत् पाशुपतास्त्रेण' इति पराख्यपौरुषयोरुक्तत्वात् पाशुपतास्त्रेण वा तद् दहेत् ।

प्रोत्सार्य चण्डानिलवायुबीजात् तद्भस्म सर्वं तु दिशो विकीर्य ॥ ३३ ॥
शून्यं खतुल्यं परिभाव्य देहं शुद्धं तु तत्केवलपुण्यशेषम् ।
व्योमाम्बुजान्तःस्थशिवस्य शक्तेरिच्छाक्रियाज्ञानवशात् सिसृक्षोः ॥
शक्तेर्यथावल्लिपिवर्णपूगैस्तत्त्वानि चोत्पाद्य तु तैः शरीरम् ।
सृष्ट्वा तदण्डात्मकविश्वलोकं सम्भाव्य शुद्धं गतपाशबन्धम् ॥ ३५ ॥
प्राग् द्वादशान्ताहितबीजजीवमाकृष्य तत्पूरकवायुमिश्रम् ।
तद् ब्रह्मरन्ध्रेण निवेश्य मार्गाद् धृतपद्ममध्यं शिवमात्मरूपम् ॥ ३६ ॥
व्योमाब्जमध्येन्दुकलास्वराढ्यं द्व्यष्टच्छदाधारसुधाकलाभिः ।
सुषुम्नयानीय पृथग् यथावच्चापूरयेद् व्युत्क्रमतः स्वराणाम् ॥ ३७ ॥
सामृतामानिनी तुष्टिपुष्टी तथा प्रीतिरुक्ता रतिः श्रीश्च शान्तिः सुधा ।
कान्त्यथ ज्योत्स्नया हैमवत्या प्रभा पूरणी वामया स्यादमा षोडशी ॥३८॥
दक्षिणाङ्गुष्ठतो गुल्फजानुक्रमात् स्यात् कटिश्चोदरं पाणिसन्धिर्भुजः।
मूर्ध्नि चार्धं क्रमाद् वामभागेऽपि च स्थानमुक्तं कलास्तद्विलोमा न्यसेत् ॥

अः अमायै नमः । अं वामायै नमः । औं पूरण्यै नमः । इत्याद्यङ्गुष्ठादिमूर्धान्तं षोडश कला विन्यस्य तदमृतैः क्रमादापूरयेदित्युपदेशः ।

तोयमर्धेन्दुमत्पूर्णचन्द्रप्रभं खाम्बुजे भावयेत् तत्कलात्तस्वरम् ।
शङ्खकुन्देन्दुगोक्षीरगौरामृतैर्ब्रह्मनाड्या पथापूर्य देहं स्वकम् ॥ ४० ॥
द्व्यष्टवर्षाकृतिं शुद्धविद्यातनुं तत्सुधापूरणप्लाव्यमानाकृतिम् ।
पुण्यपूगार्जितं शुद्धमित्थं धिया यः स्मरेदेकदाप्येष योगी भवेत् ॥४१॥

इत्थमभ्यासतः शुद्धसत्त्वः स्वयं शक्तिपातं लभेतेश्वरानुग्रहात् ।
जप्यपूजादिभिश्चेष्टासीद्धिं तथा सुप्रसन्ना मुखान्निःसरेद् भारती ॥ ४३ ॥

न हि सलिलविशेषैः केवलं क्षालनाद्यैः
प्रभवति परिशुद्धिर्यन्मलिष्ठं शरीरम् ।
द्विविधमितिह साद्भिः सान्तरङ्गात्मशुद्धिः
सविधि समुपदिष्टां तां भजेन्नित्यशोऽपि ॥ ४३ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे
क्रियापादे भूतशुद्ध्यादि
पटलश्चतुर्थः ।

अथ पञ्चमः पटलः ।

अथ विद्यातनोरस्य शिवस्य परमात्मनः ।
पूजा सिद्धिकरी ज्ञेया दृष्टादृष्टफलप्रदा ॥ १ ॥
सा हि पूजा त्रिधा भिन्ना श्रेष्ठमध्याधमक्रमात् ।
पूजोत्तमा भवति षोडशधोपचारैर्या मध्यमा प्रभवतीह दशोपचारात् ।
पञ्चोपचारविधिनात्वधमा सपर्येत्यासां यथाविभवमर्चनमाददीत ॥ २ ॥
आसनावाहनार्घ्याणि पाद्यमाचमनीयकम् ॥ ३ ॥
साङ्गोपाङ्गं तथा स्नानं वसनाभरणानि च ।
गन्धपुष्पे तथा धूपो दीपश्चरुनिवेदनम् ॥ ४ ॥
अग्निकार्यं नमस्कारो जपपूजासमर्पणम् ।
इति षोडश चोद्दिष्टा ह्युपचाराः समासतः ॥ ५ ॥
पाद्यमर्घ्यं तथाचामः स्नानं गन्धश्च पुष्पकम् ।
धूपदीपनिवेद्यानि नमस्कारश्च ते दश ॥ ६ ॥
मध्यमायां तु पूजायामुपचाराः प्रकीर्तिताः ।
गन्धः पुष्पं धूपदीपौ निवेद्यं पञ्चैते स्युस्तूपचाराः कनिष्ठे ॥
अप्येतेषां लक्षणानां प्रभेदाः संलिख्यन्ते साधकानां हिताय ॥ ७ ॥

अत्र ब्रह्मशम्भुः—

“आसनमूर्तिमावाह्य मेरु+ + + मध्वनि ।
व्याप्यव्यापकभावेन ज्ञात्वा यजनमारभेत् ॥
आसनं शुद्धविद्यान्तर्मूर्तिः शक्त्यन्तगोचरा ।
आवाह्यः स शिवा मुष्टिमूर्तिमानुपरि स्थितः ॥

अपि च,

अनन्तमासनं शक्तिमूर्तिस्तद्वाञ्छिवोऽपरे ।
शक्तिमेवासनं केचिद् वदन्ति कृतबुद्धयः ॥”

इति ।

आधारो वेत्यासनं देवतायाः स्वासीनास्मिन् पूज्यते देवतेष्टा ।
धातोरासेत्यस्य चैवोपवेशः सिद्धस्तस्मादासनं प्राक्प्रशस्तम् ॥ ८ ॥

आधारशक्तिं ज्योत्स्नाभां न्यसेत् कूर्मशिलां गताम् ॥ ९ ॥
अनन्तमासनीभूतं न्यसेद् ब्रह्मशिलोपरि ।

अनन्त इति सकलपालनहेतुशक्तिर्विष्णुरेव ।

अथाग्नेयरक्षोनिलेशानदिक्स्थान् यजेच्चारुसिंहाकृतीन् पीठपादान् ।
क्रमादिन्दुकाश्मीरतालालिवर्णान् सतारं हृदा नामभिः स्वैर्नमोन्तैः ॥ १० ॥

तथैवाधर्ममज्ञानमवैराग्यं यथाक्रमम् ।
इन्द्रादिदिक्षु पीठस्याप्यनैश्वर्यं चं विन्यसेत् ॥ ११ ॥

अत्र किरणे —

“चतुर्युगमहापादं पृथिवीतत्त्वकन्दकम् ।
कलातत्त्वान्तनालं तत् पञ्चाशद्भावकण्टकम् ॥

मायातत्त्वबृहद्ग्रन्थि शुद्धविद्याब्जशोभितम् ।
विद्येश्वरदलच्छन्नं शक्तिकेसरसंयुतम् ॥

शिवशक्तिद्वयारब्धकर्णिकाबीजराजितम् ।
पीठमेवंविधं कल्प्यं मातृकाबीजसम्भवम् ॥”

इति ।

कालोत्तरेऽपि —

"पद्ममष्टदलं श्वेतं कर्णिका कनकप्रभा ।
उद्यदर्कांशुसङ्काशं शक्तिचक्रं मनोन्मनीम् ॥
ज्योत्स्नाभां मण्डलानीकं स्वस्वरूपेण चिन्तयेत् ।
सूर्यबिम्बं दलव्यापि ब्रह्मा तस्याधिपो भवेत् ॥
तथैव सोमबिम्बं च केसरे विष्णुपालकम् ।
कर्णिकाव्यापि चाग्नेयं मण्डलं रुद्रदैवतम् ॥
पृथिव्याद्यष्टमूर्तीनां वामाद्याः शक्तयः क्रमात् ।
जगत्प्रवृद्धिसंसिद्धिर्याभिः सिध्येच्छिवाज्ञया ॥
नवमी तु शिवस्यैव शक्तिर्देवी मनोन्मनी ।"

इति ।

वामा ज्येष्ठा तथा रौद्री काला कलविकरणी ॥ १२ ॥
बलविकरणी चैव बलप्रमथिनी ततः ।
सर्वभूतदमन्याख्या नवमी स्यान्मनोन्मनी ॥ १३ ॥

श्वेता रक्ता त्वसिता पीतवर्णा श्यामा कृष्णाञ्जनाभा स्याज्जपाभा ।
ज्योत्स्नाभा वेत्युदिताश्चारुरूपा वामाद्याः स्युः परितो भूषिताङ्ग्यः ॥ १४ ॥

"एकवदना द्विभुजाः कृताञ्जलिपुटा देवाभिमुखा ध्यातव्याः" इति कालोत्तरटीकायाम् ।

तारहृद्बीजपूर्वं तु स्वनाम्नैव नमोन्तकम् ।
शिवासनं तु सङ्कल्प्य ध्यात्वा तत्त्वाध्वगं यजेत् ॥ १५ ॥

अशेषाध्वविनिर्मितमित्यन्ये ।

आसनाधिकारः ।

स्वत एवाभिपूर्णस्य तत्त्वस्येहार्चनादिषु ।
सादरं सम्मुखीभावं तदावाहनमिष्यते ॥ १६ ॥
पुष्पैरञ्जलिमापूर्य शिवमूर्तिं ततः स्मरन् ।
लिङ्गादौ विन्यसेत् तेन हृदाद्येन नमोन्तकम् ॥ १७ ॥

पृथ्व्यादिशक्तिपर्यन्तैस्तत्त्वैर्मूर्तिर्भवेद् यथा ।
बद्धपद्मासना शुद्धचन्द्रप्रभा षोढशाब्दोपमोद्देशदिव्याकृतिः ।
पञ्चभिर्ब्रह्मभिः पञ्चवक्त्रा क्रियेच्छान्वितज्ञानशक्तित्रयं त्रीक्षणा ॥ १८ ॥
पङ्क्तिसंख्यैर्भुजैः साभयेष्टप्रदे बिभ्रती शक्तिशूले च खट्वाङ्गकम् ।
दक्षिणेत्यन्यतो नागमक्षस्रजं डामरूकोत्पले बीजपूरं तथा ॥ १९ ॥
"पञ्चस्रोतःशिराः शान्तो दशदिग्बाहुरीश्वरः" ।

इति ब्रह्मशम्भुः ।

मूर्तिमेवं तु सञ्चिन्त्य लिङ्गे पुष्पाञ्जलिं क्षिपेत् ।
विद्यादेहं ततो ध्यायेत् पूर्णपुष्पाञ्जलिः शिवम् ॥ २० ॥

अपि च,

निष्पत्तये सदेशानशरीरस्यानघात्मनः ॥ २१ ॥

शान्त्यतीतकलामूर्धा शान्तिवक्त्रसरोरुहा ।
विद्याविशालवक्षोंसा प्रतिष्ठागुह्यमण्डला ॥ २२ ॥

निवृत्तिजानुजङ्घाङ्घ्रिर्भुवनाध्वतनूरुहा ।
वर्णाध्वमन्त्ररुधिरा पदमांससिरान्विता ॥ २३ ॥

तत्त्वाध्वमज्जशुक्लास्थिधातुरेषा तनूः शिवा ।

इति ।

ध्यात्वा विद्यातनुं त्वेवं तारहृन्मूलहृद्युतम् ॥ २४ ॥
विद्यादेहाय नत्यन्तमुक्त्वा मूर्तौ नियोजयेत् ।
अष्टत्रिंशत् कलास्त्वत्र विद्यादेहे तु विन्यसेत् ॥ २५ ॥
यथा पुरस्तात् तन्न्यासः पूजाविषय इष्यते ।
ततस्त्वावाहयेद् देवं विद्यादेहे शिवं विभुम् ॥ २६ ॥

अत्र ब्रह्मशम्भुः —

"सर्वोपाधिविनिर्मुक्तमस्मिन् परमकारणम् ।
सर्वज्ञादिगुणैर्युक्तमनादिं परमेश्वरम् ॥

सत्कुर्यात् संविधाभिस्तु निष्कलं सकलात्मनि ।
आवाहनादिभिर्भक्त्या प्रासादात्मानमुच्चरन् ॥

पुष्पैरञ्जलिमापूर्य हृदयाग्रेसरं शिवम् ।
तावदुच्चारयेद् यावत् प्राप्तं निष्कलगोचरम् ॥

तद्भावभावनाविष्टं प्रस्फुरद्रश्मिमण्डले ।
बिन्दावभ्युदितं ध्यायेदावाहनविधिं प्रति ॥

तस्मादादाय विस्रब्धः स्थिरधीः पुरतः स्थिते ।
देहे लक्षीकृते न्यस्य स्थापयेद्धृदयेन तम् ॥"

इति ।

आवाहनाङ्गभूतानि स्थापनं सन्निधापनम् ।
सन्निरोधामृतीकाराववकुण्ठनमेव च ॥ २७ ॥

शिवस्यावाहितस्यास्य विद्यादेहेऽत्र सन्ततम् ।
स्थिरीकरणमुद्दिष्टं स्थापनं भक्तितोऽर्चने ॥ २८ ॥

तेन स्वस्वामिसम्बन्धे स्वसामर्थ्यप्रदर्शनम् ।
यत् सान्निध्यं तदस्येह सर्वगस्यापि कीर्त्यते ॥ २९ ॥

आसमाप्तेस्तु पूजायाः सान्निध्यं तु शिवस्य यत् ।
स सन्निरोध उद्दिष्टो विभोरप्यस्य भक्तितः ॥ ३० ॥

आनन्दायतनं तत्त्वं सच्चिदानन्दविग्रहम् ।
तदत्र सकले व्याप्तं ध्येयं स्यादवकुण्ठनम् ॥ ३१ ॥

अपि भिन्नस्वभावानां यदभिन्नं प्रयोजनम् ।
अङ्गानामङ्गिना सार्धममृतीकरणं हि तत् ॥ ३२ ॥

अवकुण्ठनवत् तेजोरुचिराङ्गप्रवर्धनम् ।
तन्महामुद्रया कार्यं यतस्तद्धि प्ररोचनम् ॥ ३३ ॥

आवाहानाधिकारः ।

अर्घ्यं तत् त्रिविधं शैवं षडङ्गाष्टाङ्गभेदतः ।
शाक्तं चाष्टाङ्गमर्घ्यं स्यात् ++++दितं यथा ॥ ३४ ॥

गन्धपुष्पाक्षतकुशा दूर्वाग्रं च तथोदकम् ।
भोजेन्द्रब्रह्मशम्भूक्तं षडङ्गार्घ्यमुदाहृतम् ॥ ३५ ॥

कुशाक्षततिला दूर्वा गन्धः पुष्पं यवास्तथा ।
क्षीरं चाष्टाङ्गमर्घ्याम्भः शैवं स्याद् विजयोदितम् ॥ ३६ ॥

मतङ्गे —

"जलं बिल्वफलं दूर्वा तिलाः पुष्पाणि तण्डुलाः ।
गव्यं दधि च दर्भाग्रमर्घ्यमष्टाङ्गमीरितम् ॥"

गन्धपुष्पाक्षतयवाः कुशदूर्वाग्रसर्षपाः ।
आपश्चेत्यष्टभिर्द्रव्यैः शाक्तमर्घ्यं प्रचक्षते ॥ ३७ ॥

हैरण्यं राजतं ताम्रमलाभे वाथ दारवम् ।
पात्रं त्रिकुडुबैः पूर्णमर्घ्ये शङ्खोऽथवा भवेत् ॥ ३८ ॥

यन्त्रिकाधारसंस्थं तदस्त्रधौतमधोमुखम् ।
अ(वा ? वो)क्ष्योत्तानयित्वास्मिन् कूर्चं शक्तिं च विन्यसेत् ॥ ३९ ॥

आपूर(वि ? मि)न्दोश्च्योतद्भिरमृतैः संहितां जपन् ।
अष्टाङ्गैर्वा षडङ्गैर्वा विन्यस्याङ्गैः शिवं ततः ॥ ४० ॥

मन्त्रसंहितयालभ्य प्ररोच्यामृतमुद्रया ।
गन्धपुष्पाक्षतैर्धूपैरिष्टास्त्रेण सुरक्षितम् ॥ ४१ ॥

कवचेन सुगुप्तं तत् सर्वविघ्ननिवारणम् ।
तदद्भिः कुशकूर्चेन स्वशिरः प्रोक्षयेत् ततः ॥ ४२ ॥

प्रत्येकमर्चनाद्रव्यं भुवं च प्रोक्षयेत् क्रमात् ।
तत्सुगुप्तं विशेषार्घ्यं यत् पूजायां प्रदीयते ॥ ४३ ॥

केवलाम्भोभिरापूर्य गन्धपुष्पाक्षतैरपि ।
शिवास्त्रजपितं ज्ञेयं सामान्यार्घ्यं शिवार्चने ॥ ४४ ॥

अर्घ्यविधिः ।

पाद्यं सामान्यतो ज्ञेयं दूर्वाश्यामाकपङ्कजैः ।
प्राग्वत् पात्रे समापूर्य पाद्यं दद्यात् तु पादयोः ॥ ४५ ॥

सजातिफलतक्कोललवङ्गं शीतलं जलम् ।
कर्पूरचन्दनोन्मिश्रं ज्ञेयमाचमनीयकम् ॥ ४६ ॥

पुनराचमनीयेषु शस्तमम्भः सुगन्धि यत् ।
नमः स्वधा तथा स्वाहावषड्जातियुजा हृदा ॥ ४७ ॥

अर्घ्यादिकचतुष्कं तु दद्यादेवं यथाक्रमम् ।
अर्घ्यस्य त्रीणि पात्राणि पाद्यस्यापि त्रयं भवेत् ॥ ४८ ॥

षडाचमनपात्राणि स्यादप्येकमसम्भवे ।
अर्घ्यमादौ तथा स्नाने पूजान्ते च प्रदीयते ॥ ४९ ॥

आदौ स्नाने विभूषान्ते पाद्यं कालेषु वै त्रिषु ।
पाद्यान्ते मधुपर्कान्ते स्नानाद्यन्ताम्बरादिषु ॥ ५० ॥

निवेद्यान्ते च षट्स्वेषु दद्यादाचमनीयकम् ।
गन्धपुष्पादिकं द्रव्यं दत्त्वा दत्त्वा पृथक् पृथक् ॥ ५१ ॥

सामान्याचमनं दत्त्वा कर्तव्यं कर्म चोत्तरम् ।

पाद्याचमनाधिकारः ।

आत्माश्रयद्रव्यमन्त्रशुद्धिं कृत्वा यथाक्रमम् ॥ ५२ ॥

यथेह सम्यक् परतः पूजापटल उच्यते ।
सूर्यविघ्नेश्वरगुरून् संपूज्यात्मानमेव च ॥ ५३ ॥
गन्धपुष्पादिनाभ्यर्च्य सङ्कल्प्येष्ट्वा शिवासनम् ।
आवाह्योदितमार्गेण लिङ्गे तु सकलं शिवम् ॥ ५४ ॥
मूर्ध्नि दूर्वाक्षतं दत्त्वा विशेषार्घ्यं प्रदाय तु ।
गड्डुकांस्तोयवस्त्रं च प्रक्षाल्यास्त्रेण वै सकृत् ॥ ५५ ॥
पूरयेद् गालितैरद्भिर्गड्डुकांश्चास्त्रवर्धनीम् ।
हृदा वाप्यथ गायत्र्या गन्धं पुष्पं क्षिपेत् पृथक् ॥ ५६ ॥
अर्घ्यबिन्दुं क्षिपेदेषु मूलं विन्यस्य तेष्वथ ।
तैर्जलैः स्नापयेद् देवमर्चितं धूपितं पुनः ॥ ५७ ॥

अत्र ब्रह्मशम्भुः —

"वामहस्ततले कृत्वा गड्डुकान् लिङ्गमस्तकान् ।
कुसुमं पूर्वविन्यस्तं तदर्घ्येणापनीय तु ॥

धौतपाणिः स्वमन्त्रेण शङ्खमुद्रापरिप्लुतैः ।
जलैरनुचलद्भिस्तु स्नापयेदीशमस्तके ॥

नोपरि भ्रामयेद्धस्तं न मुद्रां बन्धयेदधः ।
अद्भिरुच्चलिताभिस्तु पूजाद्रव्यं न सेचयेत् ॥"

इति ।

सुगन्धतैलेनाभ्यज्य यवमाषादिचूर्णकैः ।
विरूक्षयित्वा कोष्णेन प्रक्षाल्य सलिलेन तु ॥ ५८ ॥

सम्पूज्य धूपयित्वा तु पिष्टदीपादिविस्तरैः ।
नीराज्य गीतवाद्यादिस्तुतिमङ्गलसंयुतम् ॥ ५९ ॥

दुग्धेन दध्ना चाज्येन मधुना चैक्षवेण च ।
प्रत्येकं जलपुष्पाभ्यां धूपेनान्तरितं क्रमात् ॥ ६० ॥

पञ्चगव्यैः समस्तैर्वा व्यस्तैस्तमभिषिच्य तु ।
पुनर्विरूक्ष्य प्रक्षाल्य गन्धपुष्पाधिवासितैः ॥ ६१ ॥

अशून्यमस्तकं लिङ्गमभिषिच्य विशेषतः ।
कलशैर्वा यथोद्दिष्टैः शङ्खैर्वा गड्डुकैरपि ॥ ६२ ॥

ब्रह्मभिः संहितामन्त्रैः सरुद्रपवमानकैः ।
द्विजाश्चेदभिषिञ्चेयुरितरः संहितां जपन् ॥ ६३ ॥

पर्याप्तौ गन्धतोयेन कृत्वा स्नानं सवैदिकम् ।
मार्जयेत् सितवस्त्रेण यथा निर्जलतां व्रजेत् ॥ ६४ ॥

स्थिरलिङ्गे विधिस्त्वेष चललिङ्गे च सम्मतः ।
स्नानवेद्यां तु तत्पीठे चलमाधाय यत्नतः ॥ ६५ ॥

स्नापयित्वा विधानेन पूजापीठे निधाय तु ।
यजेद् यथावद् व्यक्तानां शैलेयानां मणिष्वपि ॥ ६६ ॥

लौहीषु प्रतिमास्वन्ये न नित्यस्नपनं विदुः ।
चित्रेष्वन्यत्र लिङ्गे वा स्नपनं नेति चापरे ॥ ६७ ॥
क्षणिके स्थण्डिले चाग्नौ स्नपनं मानसं स्मृतम् ।

स्नानाधिकारः ।

ततो वासांसि शुद्धानि सूक्ष्माण्यभिनवानि तु ॥ ६८ ॥
दुकूलपट्टकार्पासदेवाङ्गादीनि यानि हि ।
अन्यत्रानुपयुक्तानि विकेशान्यहतानि च ॥ ६९ ॥
भक्त्या यथोपपन्नानि तैर्देवं परिधापयेत् ।
भूषणानि च हैमानि नानारत्नोज्ज्वलानि च ॥ ७० ॥
पादाद्याकेशयोग्यानि यानि तैस्तं विभूषयेत् ।
अलाभे मानसैर्वापि दर्पणं च प्रदर्शयेत् ॥ ७१ ॥

वस्त्रभूषणाधिकारः ।

गन्धस्तु द्विविधः शैवः पञ्चाङ्गोऽष्टाङ्ग एव च ।
चन्दनागरुकर्पूरकुङ्कुमानि हिमाम्भसा ॥ ७२ ॥
श्लक्ष्णपिष्टानि गन्धोऽयं पञ्चाङ्गः समुदाहृतः ।
चन्दनं कुङ्कुमं कुष्ठं दलं शीतमथागरु ॥ ७३ ॥
कर्पूरं हिरिवेरं च गन्धोऽष्टाङ्गः प्रकीर्तितः ।

"चन्दनागरुकर्पूरकाश्मीरोशीररोचनाः ।
कुष्ठं हिमजलं चेति गन्धोऽष्टाङ्गः शिवप्रियः ॥"

इति वातुले ।

"चन्दनागरुकर्पूरमांसीकुङ्कुमरोचनाः ।
स्पृग्वानराभ्यामष्टाङ्गः शाक्तो गन्ध उदाहृतः ॥"

इति (च) ।

पुष्पाणि सात्त्विकानीह शुक्लवर्णानि यानि वै ॥ ७४ ॥
राजसानि च रक्तानि तामसान्यसितान्यपि ।
श्यामं तमोरजोमिश्रं पीतं राजससात्त्विकम् ॥ ७५ ॥
सात्त्विकाद्यैस्तु कुसुमैः स्यात् फलं सात्त्विकादिकम् ।

श्वेतार्कं करवीरकं च कमलं धुर्धूरकारग्वधे
राजार्कं च सिताम्बुजं च तुलसी साशोकसच्चम्पकैः ।
कल्हारं बकपाटले वकुलकं द्वे मल्लिके मालती
पालाशस्थलपद्मदर्भदमनापामार्गदूर्वाङ्कुरैः ॥ ७६ ॥

तद्वद्ग्रन्थिशमीबृहन्मरुवकैः पुन्नागनागासनै-
र्नन्द्यावर्ततमालकुब्जविजयामन्दारकाश्मीरकैः ।
शस्तान्युत्पलकर्णिकारकुसुमैः कादम्बबैल्वान्यथो
नीलं चोत्पलमित्यमूनि कुसुमान्युक्तानि शैवान्यलम् ॥ ७७ ॥

अम्भोजोत्पलबन्धुजीवविजयापुन्नागनागान्यथो
जातीकुन्दकरण्डचम्पकजपायूथीरमापाटलैः ।
बिल्वाशोकहयारिकुब्जदमनैर्मन्दारदूर्वादलै-
र्नन्द्याह्वाप्यपराजितेति कुसुमान्युक्तानि शाक्तान्यलम् ॥ ७८ ॥

निर्गन्धानि तथोग्रगन्धकटुकान्यस्पृश्यदुष्टानि चा-
प्यन्यायोपहतानि वा कृमिनखच्छिन्नानि भिन्नानि वा ।
ऊर्णासूत्रशिरोरुहाद्युपहतैर्म्लायत्पुराणानि वा
कालातीतविलङ्घितानि च तथा पुष्पाण्यथो वर्जयेत् ॥ ७९ ॥

शस्ते द्वे तुलसी सिताम्बुजमथो रक्ताब्जपालाशके
जातीकुब्जकमाधवीदमनकैः पुन्नागनागासनैः ।
नन्द्यावर्तशमीस्थलाब्जविजयासन्मल्लिकाचम्पकै-
र्बिल्वं चोत्पलकेतकानि च नवं कुन्दं तथा पाटलम् ॥ ८० ॥

लक्ष्मीदेविसहाः सभृङ्गमुसलीभीतेन्द्रवल्ल्यः सदा-
भद्रा श्रीपतिलङ्घिता च दशमी दूर्वाथ जम्बूच्छदः ।
कल्हारं करवीरमेकदलकं पद्मं कुशाः कैरवं
रक्तं चेति विलोमतोऽधिकफलं पुष्पं भवेद् वैष्णवम् ॥ ८१ ॥

त्रेधा चोदितपुष्पजातिषु तथानुक्तानि वर्ज्यानि ता-
न्यन्योन्यप्रतिषेधदर्शनमपि स्याद् यत्र चोक्तं विना ।
अन्यस्मै परिकल्पितानि च तथा वर्ज्यानि तद्युक्तितो
यद् यस्यात्र विशेषतस्तु विहितं तद्दैवतं तोषयेत् ॥ ८२ ॥

सूर्याग्न्योस्त्रिविधानि चापि कुसुमानीष्टानि विघ्नेशितुः
शाक्तान्यप्यथ शाम्भवानि च तथा स्कन्दार्यचण्डादिषु ।

शाक्तान्येव मनोजवाग्गिरिसुतादुर्गाष्टमातृप्रिया-
ण्यम्भोजासनदेवराजकमलाः पूज्यास्तथा वैष्णवैः ॥ ८३ ॥
नन्द्यावर्तैः प्रातरेवापराह्णे प्राग्रात्रे वा मालतीमल्लिकाभिः ।
अह्न्येवाब्जैरुत्पलैः सर्वदा वा हैमैः प्रातः केसरैः पूर्वरात्रे ॥ ८४ ॥
आ वैवर्ण्यात् केसराणां सरोजं बैल्वं पत्रं दामनं च त्रिरात्रम् ।
पूजायोग्यं कर्णिकारं तु पक्षं न स्याज्जीर्णं मासषट्कं बकाख्यम् ॥ ८५ ॥

पुष्पाधिकारः ।

धूपद्रव्येषु सर्वेषु श्रेष्ठः कृष्णागरुर्भवेत् ॥ ८६ ॥
कर्पूरमधिकश्रेष्ठमगरूपहितं तथा ।
गुग्गुलुर्महिषाक्षाख्यः श्रेष्ठ एव शिवप्रियः ॥ ८७ ॥
चन्दनोशीरके चैव मध्यमे तु प्रकीर्तिते ।
श्रीवाससर्जावधमौ ततो लाक्षा घृतं मधु ॥ ८८ ॥
सर्वैरेतैः सितोपेतैर्धूप उक्तो दशाङ्गकः ।
निर्धूमस्फुरदङ्गारे निर्ज्वाले च निरिन्धने ॥ ८९ ॥
धूपं दद्यादधः किञ्चिद् घण्टां वामेन नादयन् ।
विशुद्धसितसूत्रेण वर्त्यः कार्पासजाः शुभाः ॥ ९० ॥
दीपार्थं गोघृतं मुख्यं मध्यान्त्ये तैलमाहिषे ।
सकर्पूरदशो दीपः फलं दद्याच्छताधिकम् ॥ ९१ ॥
दीपः केवलकर्पूरः सहस्रगुण उच्यते ।
प्रभूतस्नेहसम्पूर्णैर्दशभिर्वा नवाष्टकैः ॥ ९२ ॥
दीपैः प्रतिनवैराराद् भ्राम्यमारात्रिकं भवेत् ।
न दग्धशेषवर्त्या तु पुनर्दीपं प्रवर्तयेत् ॥ ९३ ॥
नोच्छिष्टाशुचितैलाद्यैर्नान्यतैलघृतादिना ।

धूपदीपारात्रिकाविधिः ।

व्रीहेः पञ्चशतं तलं द्विगुणितं ते द्वे प्रकुञ्जं स्मृतं
ते द्वेऽथ प्रसरस्तथैव कुडवं प्रस्थार्धकं तद्द्वयम् ।
प्रस्थं पात्रमथाढकं शिवमथो द्रोणं च खारिः क्रमात्
खारीणां त्रितयं हि भार उदितो मानं यथाशास्त्रतः ॥ ९४ ॥
नित्यं नैमित्तिकं चेति नैवेद्यं द्विविधं मतम् ॥ ९५ ॥
तच्चोत्तमोत्तमाद्यं तु नवभेदेन वक्ष्यते ।
तत्र नित्यविधेरष्टद्रोणशालिजतण्डुलैः ॥ ९६ ॥
सार्धरात्रचतुष्कालपूजायां विनिवेदयेत् ।
पायसं कृसरं गौलमन्नं तच्च चतुर्विधम् ॥ ९७ ॥
यथोचितोपदंशाज्यदध्यपूपरसोत्तरम् ।
सगीतनृत्तवादित्रं सभूतबलिमङ्गलम् ॥ ९८ ॥
तत्र पञ्चशतं दीपास्त्वेवं स्यादुत्तमोत्तमम् ।
षड्भिर्द्रोणैश्चतुष्कालमभ्यर्च्य विनिवेदयेत् ॥ ९९ ॥
शतद्वयं तथा दीपाः स्युर्गीतबलिनर्तनैः ।
कुर्यात् पूर्वानुसारेण तत् स्यादुत्तममध्यमम् ॥ १०० ॥
पञ्चद्रोणैश्चतुष्कालं निवेद्यं पूजनं तथा ।
अष्टोत्तरशतं दीपा गीतवाद्यबलिक्रियाः ॥ १०१ ॥
अग्निकार्यं च कुर्वीत स्यादेवं तूत्तमाधमम् ।
सचतुर्द्रोणनैवेद्यं चतुष्कालोचितार्चनम् ॥ १०२ ॥
गीताद्यं बलिहोमौ च प्रदीपाः स्युश्च सप्ततिः ।
मध्यमोत्तममेवं स्यान्मध्यमध्यमथोच्यते ॥ १०३ ॥
तण्डुलैरर्धभारैस्तु नैवेद्यं चार्चनान्वितम् ।
मध्याह्न एव होमः स्याद् द्विकालं नर्तनादिकम् ॥ १०४ ॥
चत्वारिंशत् प्रदीपाः स्युर्मध्यमध्ये बलिस्तथा ।
खारितण्डुलनैवेद्यं चतुष्कालार्चना बलिः ॥ १०५ ॥
होमो द्वादश दीपाः स्युर्गीताद्यं मध्यमाधमे ।

सायंप्रातस्त्वाढकाभ्यां शिवं तन्मध्याह्ने स्यादह्नि वेदप्रदीपाः ।
रात्रावष्टौ स्युस्त्रिकालार्चनं यत् पञ्चातोद्यैः स्यात् कनिष्ठोत्तमाख्यम् ॥ १०६ ॥
प्रातः पात्रं सायमप्यत्र पात्रं स्यान्मध्याह्ने त्वाढकं चाह्नि दीपौ ।
चत्वारो वै रात्रिदीपास्त्रिकालं पूजेत्युक्तं मध्यमं यत् कनिष्ठे ॥ १०७ ॥
सायम्प्रातः प्रतिप्रस्थद्वयनैवेद्यमर्चनम् ॥ १०८ ॥
दीपोऽह्नि निशि दीपावित्युक्तं स्यादधमाधमम् ।

नित्यनैवेद्यप्रकरणम् ।

अष्टद्रोणं समारभ्य यावद् द्वादशभारकम् ॥ १०९ ॥
नैमित्तिकं स्यान्नैवेद्यं नवधात्रापि पूर्ववत् ।
उत्तमोत्तमपूर्वं तु पूजां चैव समूहयेत् ॥ ११० ॥
स्यात् काम्यमपि नैवेद्यं यावद्वा प्रार्थितं भवेत् ।
न कालनियमस्तत्र साङ्गं पूजा प्रशस्यते ॥ १११ ॥

नैमित्तिककाम्यकविधिः ।

क्षीरं त्रिभागं भागस्तु तण्डुलाः पायसस्य तु ।
भिन्नमुद्गैः समं तण्डुलाः स्युः समास्तस्य चार्धं घृतं स्याद् घृतार्धं गुलम् ।
तण्डुलेभ्यस्तथा गोपयः षड्गुणं स्याद् गुलान्नं तु तद्युक्तरम्भाफलम् ॥ ११२ ॥
धौतदन्ता द्विजाः स्नातशुक्लाम्बरा वस्त्रपूताम्भसा मौनिनस्तण्डुलान् ।
क्षालयेयुस्तथा सप्तवारं हृदा ज्वालयेयुस्तथाग्निं धवित्रादिना ॥ ११३ ॥
ध्यात्वा चुल्लिं शक्तिमग्निं च रुद्रं वह्नेर्बीजात् तारकाद् वाभिपूज्य ।
तस्मिन्नग्नौ तद्धविः साधयेयुरोङ्काराद्येनाभिघार्याहरेयुः ॥ ११४ ॥
बृहत्यः कदल्यस्तथा कण्डहाल्यः (?)सकूश्माण्डमुर्वारुकं कर्कटी च ।
तथा कारवल्ल्याम्रके शृङ्गिवेरं बृहन्मुद्गमुद्गास्तथा नालिकेरम् ॥ ११५ ॥
तथा माषशिम्ब्याढकीमातुलुङ्गाः कुलस्थाश्च शस्तोपदंशाः सुराणाम् ।
कदल्यादिपक्वैः सिताव्योषलोणैर्युतः स्याद् यवानीदधिक्काथसूपः ॥ ११६ ॥
तथा मोदकांश्चोपदंशांश्च कुर्याद् घृतव्योषलोणैर्यवानीष्टपिष्टैः ।
ततः पात्रवर्गं बहिः शोधयित्वा सशङ्खध्वनिच्छत्रमुत्थापयेच्च ॥ ११७ ॥

हिरण्याद्य (मा ? म) त्रं हृदा धौतमाद्भिः कदल्यादिपत्राणि वात्राभिघार्य ।
हविस्तत्र दत्त्वोपदंशादियुक्तं कदल्यादिपक्वैः फलैर्मोदकैश्च ॥ ११८ ॥

सिताक्षौद्रदध्युत्तरे तत्र गव्यं घृतं नूतनं षोडशद्वन्द्वकांशम् ।
निवेद्यात् प्रदेयं तु पुष्पार्चितेऽस्मिंस्ततो धेनुमुद्रामृतैः प्लावयित्वा ॥ ११९ ॥
सम्प्रोक्ष्य मूलमन्त्रेण द(ग्ध्वा ? त्त्वा)म्भोऽग्निप्रियान्तकम् ॥१२०॥

सपुष्पदक्षिणकरो हविः स्पृष्ट्वा निवेदयेत् ।
ध्यायेत् तन्मनसा दिव्यमन्नाद्यं तृप्तिकारणम् ॥ १२१ ॥

पानीयं च निवेद्यास्मै हृद्यं शीतं सुगन्धि च ।
बहिर्निर्गत्य तच्छेषमन्नं हुत्वानलेऽपि च ॥ १२२ ॥

मूलाङ्गादिविधानेन तत्तन्मन्त्रेण साधकः ।
तत्रोदितबलिं दत्त्वा वह्निं भक्त्या विसर्जयेत् ॥ १२३ ॥

प्रदक्षिणनमस्कारस्तुतिभिस्तं प्र(दाप ? साद)येत् ।
प्रक्षाल्य चरणौ सम्यगाचान्तोऽन्तः प्रविश्य तु ॥ १२४ ॥

सुतृप्तं शङ्करं स्मृत्वा दद्यादाचमनीयकम् ।
ततो लवङ्गकपूरतक्कोलक्रमुकान्वितम् ॥ १२५ ॥

निवेदयेच्च ताम्बूलं गन्धपुष्पार्चितं ततः ।
पूजयित्वा नमस्कृत्य जपेन्मूलं तु शक्तितः ॥ १२६ ॥

अथवान्नं तु होमार्थं पात्रे संस्थाप्य रक्षितम् ।
सुतृप्ते त्वथ देवेशे वह्निकार्ये नियोजयेत् ॥ १२७ ॥

नैवेद्याधिकारः ।

अङ्गानि चैव परिवारगणांश्च + + पञ्चोपचारविधिना तु यथोपपत्त्या ।
सम्पूजयेदनुपपन्नमिहार्चने यत् तत् कल्पयेत् तु मनसैव समाहितात्मा ॥

अत्रोपचारभेदेन पूजाभेदांस्तथापरे ।
वदन्ति तांश्च वक्ष्यामः किञ्चिद्भेदात् पुरोदितात् ॥ १२९ ॥

दशोपचाराः कथिता निवेद्यान्ते तु पूजने ।
होमान्तको तु कथिता ह्युपचारास्तु षोडश ॥ १३० ॥

बल्यन्ते चापि ते ख्याताः पञ्चविंशतिसङ्ख्यया ।
नृत्तान्ते वापि षट्त्रिंशदुपचाराः प्रकीर्तिताः ॥ १३१ ॥

उत्तमोत्तमपूजायामुत्तमे वा भवन्त्युत ।
आसनावाहनार्घ्याणि पाद्यमाचमनीयकम् ॥ १३२ ॥

साङ्गं स्नानं तथा वस्त्रमुपवीतं च भूषणम् ।
गन्धपुष्पे च मालाश्च धूपो दीपश्च दर्पणम् ॥ १३३ ॥

नीराजनं च नैवेद्यमग्निकार्यं प्रदक्षिणम् ।
नमस्कारः स्तुतिवाद्यगीते नित्यबलिस्तथा ॥ १३४ ॥

पूजासमर्पणं चेति पञ्चविंशति चोदिताः ।
अथासनादयः पञ्च पञ्चगव्याभिषेचनम् ॥ १३५ ॥

पञ्चामृताभिषेकश्च स्नानं राजोपचारतः ।
वस्त्रोपवीताभरणं गन्धपुष्पस्रगक्षतम् ॥ १३६ ॥

धूपदीपौ च मुकुरं नीराजनविधिस्ततः ।
नैवेद्यं चाथ ताम्बूलं विद्यापीठार्चनं ततः ॥ १३७ ॥

अग्निकार्यं यथावच्च पादुके चामरेऽपि च ।
छत्रं च नित्ययात्रा च बलिदानं पवित्रकम् ॥ १३८ ॥

प्रदक्षिणनमस्कारस्तोत्राण्यातोद्यमेव च ।
गीतं नृत्तं च पूजादेः समर्पणमतः परम् ॥ १३९ ॥
षट्त्रिंशदुपचाराः स्युरेवं तन्त्रोदिताः क्रमात् ॥

इति निगदितमार्गास्तूपचाराः प्रदिष्टाः
पृथगिह परिपाट्या शैवतन्त्रेषु दृष्टाः ।
यजनविधिषु शम्भोर्वेदितव्या यथावत्
स्वभिमतफलसिद्धिः स्याद् यथा भक्तिभाजाम् ॥ १४०३ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापादे उपचारपटलः पञ्चमः ।

अथ षष्ठः पटलः ।

अङ्गैः षड्भिः स्यात् क्रियायाः प्रसिद्धिर्मन्त्रा मुद्राः कुण्डवन्मण्डलानि ।
द्रव्यावाप्तिः साधकाश्चेति सम्यग् वक्ष्यन्ते तान्यत्र तन्त्रोदितानि ॥ १ ॥

अत्र मतङ्गे—

"मुद्रामण्डलमन्त्राश्च क्षेत्रद्रव्याणि साधकाः ।
गुरुणा + + + + नि यथावत् तन्निबोधत ॥"

इति । तद् यथा—

मननत्राणधर्मित्वं वाचके दैवतस्य तु ।
यत्र तन्मन्त्रसंज्ञं स्याद्ध्रस्वदीर्घादिलक्षणैः ॥ २ ॥

मननात् सर्वभूतानां त्राणात् संसारसागरात् ।
मन्त्ररूपा हि तच्छक्तिर्मननत्राणधर्मिणी ॥ ३ ॥

रत्नत्रये—

"निर्विकल्पात्मकं ब्रह्म यन्नित्यानन्दविग्रहम् ।
शिवतत्त्वं हि तन्नित्यं निर्मलं व्यापि चिद्घनम् ॥

शिवादभिन्ना तच्छक्तिर्नित्या तद्वत् सुनिर्मला ।
चितिः स्वतन्त्रा विश्वस्य सिद्धिहेतुर्हि सा मता ॥

कृत्यं पञ्चविधं तस्य शिवस्य करुणानिधेः ।
सृष्टिः स्थितिश्च संहारस्तिरोभावोऽप्यनुग्रहः ॥

सिध्येच्छक्त्यान (ये ? या) स्वेच्छाक्रियाज्ञानाख्यभेदया ।
सा शक्तिर्बिन्दुतामेति परापरविभागतः ॥

तस्माच्च नादो ह्यभवन्मूलबीजं शिवात्मकम् ।

तथाहि—

नादाख्यं यत् परं बीजं सर्वभूतेष्ववस्थितम् ॥

मुक्तिदं परमं दिव्यं सर्वसिद्धिप्रदायकम् ।
सान्तं सर्वगतं शून्यं मात्राद्वादशकास्थितम् ॥

ह्रस्वा ब्रह्म समाख्याता दीर्घा ह्यङ्गानि षण्मुख! ।
अनुस्वारो भवेन्नेत्रं सर्वेषां चोपरि स्थितः ॥

षष्ठं त्रयोदशान्तं च पञ्चमे विनियोजयेत् ।
शिवं तं तु विजानीयान्मन्त्रमूर्तिं सदाशिवम् ॥"

इति। कालोत्तरे—

"मूलमन्त्रो विनिर्दिष्टो ब्रह्मभिः स्वाङ्गसंयुतः ।
अकारश्चाप्युकारोऽथ मकारो बिन्दुनादवान् ॥

ताराख्यः प्रणवो ह्येष शब्दब्रह्मात्मको मतः ।
अईमबिन्दुनादाढ्यं वाग्भवं बीजमीरितम् ॥

विश्ववाग्भूतिदं तत् तु वागीश्वर्यास्तनुर्भवेत् ।
शक्तिबीजं तथा तारो वाग्भवं च ततः परम् ॥

पञ्चाशद्वर्णरूपा या मातृका परमेश्वरी ।
अवर्गोऽस्या मुखं साङ्गं कचवर्गौ भुजद्वयम् ॥

टतवर्गौ तथा पादौ पार्श्वयुग्मं पफौ बभौ ।
पृष्ठं बकारो नाभिस्तु भकारो हृन्मकारकम् ॥

त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्लानि यादयः ।
धातवः सप्त वर्णाः स्युर्हकारः प्राण इष्यते ॥

स्फूर्तिः क्षकारः सक्रोधो विश्वलोकमयी तनुः ।
लिपेर्हृदादीन्यङ्गानि लिख्यन्तेऽत्र यथाक्रमम् ॥

हृदयं षष्ठवर्गान्त्यं बिन्दुमद्वीप्सितं भवेत् ।
प्रथमप्रथमं बिन्दुयुक्तं तद्वच्छिरः स्मृतम् ॥

प्रथमस्य द्वितीयं तु सानुस्वारं शिखा तथा ।
वीप्सितः कचशब्दस्तु तथैव कवचं स्मृतम् ॥

तृतीयं च चतुर्थं च प्रथमस्य त्रिनेत्रकम् ।
वर्गान्त्यं सविसर्गं तु वीप्सितं त्वस्त्रमुच्यते ॥

तारप्राणान्वितं शुक्लमौकारस्वरमण्डितम् ।
षण्णां च मातृकाङ्गानामादौ संयोजयेत् क्रमात् ॥

नमः स्वाहा वषट् चाथ हुं वौषट् फट् च जातयः ।
चतुर्थ्यन्ताङ्गमन्त्राणामन्ते योज्या यथाक्रमम् ॥

मुद्राक्ष(?)स्फटिकाक्षसूत्रकलशांश्चाबिभ्रती पुस्तकं
हस्तैर्दक्षिणपूर्वकैस्त्रिनयना शुक्लस्रगालेपना ।
कुन्दाभाक्षरविग्रहा शशिकलामौलिः प्रसन्नानना
ध्येया स्याल्लिपिदेवताम्बुजगता (सुप्ताभि? मुक्ताभ)रालङ्कृता ॥

पञ्चाशद्वर्णमूर्तिं तामेवं ध्यात्वा स्वविग्रहे ।
तद्वर्णान् क्रमशो न्यस्य जपन् मन्त्रान् स साधयेत् ॥

केशान्ते मुखवृत्तेऽक्ष्णोः श्रोत्रयोर्घ्राणयोरपि ।
गण्डयोरोष्ठयोर्दन्तपङ्क्त्योर्मूर्धास्ययोः स्वरान् ॥

कवर्गं दक्षिणे हस्ते चवर्गमितरे भुजे ।
टतवर्गौ तथा पद्भ्यां पफौ पार्श्वद्वये न्यसेत् ॥

पृष्ठे नाभौ च हृदये न्यसेद् बभमसंज्ञितान् ।
त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्लासुपङ्कजे ॥

हृत्स्थे तत्पत्रगान् यादीनष्टार्णानात्मनि न्यसेत् ।
क्षकारं कर्णिकायां तु सर्वगं संस्मरन् न्यसेत् ॥

मातृकान्यासः।

पञ्चानां ब्रह्मणां चापि स्वरूपन्यास इष्यते ।
सद्योजातादिकानि स्युर्ब्रह्माण्युद्धानुजप्ययोः (?) ॥ ४ ॥

तान्येवेशा(नादि ? न)पूर्वाणि न्यासपूजादिकेषु वै ।
गोक्षीरधवलं सद्यं वामदेवं जपारुणम् ॥ ५ ॥

नीलाञ्जनाभं चाघोरं पुरुषं कुङ्कुमप्रभम् ।
शुद्धस्फटिकसङ्काशमीशानाख्यं मुखं विभोः ॥ ६ ॥

वक्त्रं वर्णास्तु तन्मन्त्राः कलास्तन्मूर्तयोऽपि च ।
अपृथक् च पृथक् चैव ज्ञातव्यास्तत्र तत्र हि ॥ ७ ॥

सद्योजातं तु वारुण्यां वामदेवं तथोत्तरे ।
अघोरं दक्षिणमुखं प्राचि तत्पुरुषाह्वयम् ॥ ८ ॥

ईशानमूर्ध्ववक्त्रं स्याद् ब्रह्माणीमानि पञ्च हि ।
ह्रस्वस्वरान् बिन्दुयुतांस्ताराद्यान् ब्रह्मणां क्रमात् ॥ ९ ॥

संयोज्यादौ चतुर्थ्यन्तं नमोन्तं च पृथक् पृथक् ।
ब्रह्माणीमानि पञ्च स्युः सामान्यान्यर्चनादिषु ॥ १० ॥

दीक्षितानां तु सर्वेषां पाठ्यान्येवाविशेषतः ।
अथ वेदागमोक्तानि पञ्च ब्रह्माणि पञ्च हि ॥ ११ ॥

तानि द्विजातिपाठ्यानि न स्त्रीशूद्रादिभिः क्वचित् ।
तान्युद्ध्रियन्ते सावित्री गायत्री शैवसम्मता ॥ १२ ॥

तद्वत् पाशुपतास्त्रं च व्योमव्यापि च मन्त्रराट् ।
तारं च शुक्लद्योकारो जातं षष्ठाद्यमग्नियुक् ॥ १३ ॥

षष्ठाद्यं द्यामिचेत्यादौ नववर्णान् समुद्धरेत् ।
सद्योजातं चतुर्थ्यन्तं द्वादशस्वरकं जलम् ॥ १४ ॥

नतिं भवेति द्विगुणमनात्यन्ते भवे पदम् ।
भजस्वेति च मां चोक्त्वा चतुर्थ्यन्तं भवोद्भवम् ॥ १५ ॥

नमश्च सद्यस्त्वेकोनचत्वारिंशद्भिरक्षरैः ।
प्रणवो वामदेवश्च चतुर्थ्यन्तो नमोन्वितः ॥ १६ ॥

ज्येष्ठश्च रुद्रः कालोऽपि त्रयस्तावन्नमोन्तकाः ।
पृथक् कालबलान्ते स्यात् पदं विकलनाय तु ॥ १७ ॥

बलप्रमथनाय स्यात् सर्वभूतपदं ततः ।
दमनश्च चतुर्थ्यन्तः तद्विभक्त्या मनोन्मनः ॥ १८ ॥

नमोन्तो नवभिस्तारैः पञ्चसप्ततिवर्णकैः ।
वामदेवस्य मन्त्रोऽयं नवशक्त्युपबृंहितः ॥ १९ ॥

तारं वर्गादिकं चोक्त्वा घोरेभ्योऽथेति चोद्धरेत् ।
अथमुक्तं पुनश्चैतत् पदं घोरद्वयं ततः ॥ २० ॥
तारेभ्यस्त्र्यक्षरादूर्ध्वं चशब्दं सर्वतःपदम् ।
शर्वसर्वेभ्य इत्युक्त्वा नमस्तेति पदद्वयम् ॥ २१ ॥
अस्तु रुद्रपदान्ते तु रूपेभ्य इति चोद्धरेत् ।
अघोरमन्त्र एष स्यादुक्तः षट्त्रिंशदक्षरैः ॥ २२ ॥
तारं तदिति चोद्धृत्य पुरुषायपदं ततः ।
विद्महेत्यर्णद्वयं हे च महादेवाय चोद्धरेत् ॥ २३ ॥
पञ्चमस्य चतुर्थं स्याच्चतुर्थस्वरभूषितम् ।
महितन्नश्चतुर्वर्णान् रुद्रःप्रेत्यक्षरत्रयम् ॥ २४ ॥
चोदयादिति मन्त्रोऽयं पञ्चविंशतिवर्णकः ।
भवेत् तत्पुरुषस्यापि मन्त्रोऽथेशान उच्यते ॥ २५ ॥
तारं स्वरं चतुर्थं च सप्तमात् पञ्चमादपि ।
पञ्चमे दीर्घसर्गान्ते चोद्धृत्यार्णचतुष्टयम् ॥ २६ ॥
सर्वशब्दं च विद्यानामीश्वरश्चाक्षराणि षट् ।
सर्ववर्णौ च भूतानां ब्रह्माधिपतिरित्यपि ॥ २७ ॥
षष्ठ्यन्तं ब्रह्मशब्दं च प्रोक्तोऽथाधिपतिस्त्विति ।
ब्रह्मा शिवश्चतुर्वर्णान् मेअस्त्वित्यक्षरत्रयम् ॥ २८ ॥
सदाशिवं च तारान्तः स्याच्चत्वारिंशदक्षरैः ।
प्रोक्तो हीशानमन्त्रोऽयं ब्रह्माणीमानि पञ्च हि ॥ २९ ॥
अष्टौ त्रयोदशाष्टौ च चतस्रः पञ्च एव च ।
कलाः सद्यादिकानां स्युरष्टात्रिंशद् यथाक्रमम् ॥ ३० ॥
ब्रह्मभङ्ग्या न्यसेद् देहे पञ्च वक्त्रेषु च न्यसेत् ।
वक्त्रभङ्ग्या कलान्यासं कुर्यात् स्थानेष्वनुक्रमात् ॥ ३१ ॥
शशिनीं चाङ्गदामिष्टां मरीचीं ज्वालिनीं तथा ।
ईशानस्य कलाः पञ्च न्यसेत् तत्पदपञ्चकैः ॥ ३२ ॥
शान्तिं विद्यां प्रतिष्ठां च निवृत्तिं च स्वकैः पदैः ।
सह तत्पुरुषस्यैताश्चतस्रो विन्यसेत् क्रमात् ॥ ३३ ॥

तामसीं च तथा मोहां क्षपां निष्ठाह्वयामपि ।
मृत्युं मायां भयां चैव जरां चाघोरजाः कलाः ॥ ३४ ॥

राजसीं चैव रक्षां च रतिं चाप्यथ पालिनीम् ।
सज्जमन्या क्रियां तद्वद् बुद्धिं छायाह्वयामपि ॥ ३५ ॥

धात्रीं च भ्रामणीं चैव मोहिनीं चाभयां न्यसेत् ।
स्वैः पदैर्वामदेवस्य कला ह्येतास्त्रयोदश ॥ ३६ ॥

सिद्धिं चार्द्धिं द्युतिं लक्ष्मीं मेधां कान्तिं स्वधां स्थितिम् ।
सद्योजातकला ह्येतास्तत्पदैर्विन्यसेत् क्रमात् ॥ ३७ ॥

नवाष्टादिजगत्यर्णैः शरवेदाक्षरैरपि ।
क्रमादीशानमन्त्रस्य कलाः पञ्च न्यसेद् बुधः ॥ ३८ ॥

नवाष्टवेदवेदार्णैः कलास्तत्पुरुषस्य च ।
शरबाणाश्विगायत्रशराग्निशरसायकैः ॥ ३९ ॥

स्वाक्षरैर्विन्यसेद् विद्वानघोरस्य कलाष्टकम् ।
ऊर्ध्वप्राग्दक्षिणोदीच्यपाश्चिमाशास्थमूर्धसु ॥ ४० ॥

ईशानस्य कलाः पञ्च नमोन्तं विन्यसेत् पृथक् ।
ऊर्ध्वास्ये शान्त्यतीताख्यां प्रणवेन कलां न्यसेत् ॥ ४१ ॥

ततः प्रा + + + + + + + + + + षौरुषीः ।

कला विन्यसेदिति यावत् ।

अघोरस्याथ हृदये कण्ठे चैवांसयोः क्रमात् ॥ ४२ ॥

नाभौ च जठरे पृष्ठे तथोरसि कलां न्यसेत् ।
गुह्योपरिष्टाद् गुह्ये चाप्यूर्वोर्जान्वोश्च जङ्घयोः ॥ ४३ ॥

स्फिजोः कट्यां पार्श्वयोश्च वामदेवकलां न्यसेत् ।
पादयोश्च तथा पाण्योर्नासिकायां च मूर्धनि ॥ ४४ ॥

बाह्वोश्च विन्यसेदष्टौ सद्योजातकलाः क्रमात् ।
अंसोर्वादिषु युग्मेषु पूर्वं दक्षिणतो न्यसेत् ॥ ४५ ॥

वामे पश्चात् क्रमोऽयं स्यात् सर्वत्र स्वस्वमुद्रया ।
सामान्येन षडङ्गानि वक्ष्यन्ते ब्रह्मणां क्रमात् ॥ ४६ ॥

यथा —

प्रोक्तं प्रयोगमञ्जर्यां पौष्करे च निबन्धने ।
शरतारादिसर्वज्ञशब्दः स्यात् सचतुर्थिकः ॥ ४७ ॥

नमोन्तं हृदयं प्रोक्तमथ वर्गादिमुद्धरेत् ।
षष्ठान्तं सप्तमोपेतं पञ्चमाद्यं दशान्तयुक् ॥ ४८ ॥

तेजोमालिनिशब्दश्च तृप्तया ब्रह्मशब्दयुक् ।
शिरश्चतुर्थ्या स्वाहान्तः शिवो मन्त्र उदाहृतः ॥ ४९ ॥

तृतीयस्य तृतीयार्णं सजलं त्वथ सप्तमात् ।
तृतीयं तत्स्वरोपेतं तकारं शिखिशब्दयुक् ॥ ५० ॥

शिखे चानादिबोधोऽयं जातियुक्तं शिखां तथा ।
वज्रिणे च समुद्धृत्य वज्रशब्दं धराय च ॥ ५१ ॥

स्वतन्त्रं च चतुर्थ्यन्तं कवचाय च जातियुक् ।
अष्टमाद्यं तृतीयाद्यं चतुर्थं चाष्टमस्य च ॥ ५२ ॥

त्रयोदशान्तयुक्तानि बिन्दुमन्त्युद्धरेत् क्रमात् ।
अलुप्तशक्तयेशब्दं नेत्रत्रयपदं तथा ॥ ५३ ॥

चतुर्थ्यन्तं समुद्धृत्य नेत्रं स्याज्जातियोजितम् ।
अथ पाशुपतास्त्रं तु यत् पञ्चार्णं तदुद्धरेत् ॥ ५४ ॥

अनन्तशक्तये चोक्त्वा स्यादस्त्रं तत् स्वजातियुक् ।
शिव एव विसर्गान्तः शिवास्त्रं परिकीर्तितम् ॥ ५५ ॥

षष्ठवर्गाद्द्वितीयं तु चतुर्थाद्यार्धमात्रयुक् ।
प्रथमात् पञ्चमादाद्यौ संयोज्यैव द्विवर्णकम् ॥ ५६ ॥

अस्त्रं पाशुपतं त्वेतत् समस्तदुरितापहम् ।
अस्यादौ सशिवास्त्रं तु शिखाबीजे नियोजयेत् ॥ ५७ ॥

सर्वविघ्नहरं दिव्यं मुक्तिदं स्याज्जपादिभिः ।
अष्टमाद्यं भूमियुक्तं तृतीयस्वरबिन्दुमत् ॥ ५८ ॥

प्रथमं बीजमुद्दिष्टं षष्ठाद्यं स्याद् द्वितीयकम् ।
तृतीयमष्टमाद्यं तु पञ्चमस्वरसंयुतम् ॥ ५९ ॥

वर्मास्त्रे चेति पञ्चार्णमस्त्रं पाशुपतं स्मृतम् ।
एवं पाशुपतास्त्रं स्यादघोरास्त्रमथोच्यते ॥ ६० ॥

षष्ठाद्यं साग्निमुद्धृत्य स्फुरशब्दं च वीप्सितम् ।
द्वितीयस्य चतुर्थं च द्वादशान्तस्वरान्वितम् ॥ ६१ ॥

अग्निं पुनश्च तावुक्त्वा पञ्चमाद्यमथानलम् ।
तनुरूपपदं चोक्त्वा चटयुग्मं समुद्धरेत् ॥ ६२ ॥

प्रचटेति द्विरुच्चार्य कहद्वन्द्वं वमद्वयम् ।
वीप्सितं घातयपदं वर्मास्त्रेऽग्निप्रियां तथा ॥ ६३ ॥

तारादिकमघोरास्त्रं द्विचत्वारिंशदक्षरम् ।
रसर्तुवेददशकैर्वसुनागैश्च सम्मितैः ॥ ६४ ॥

साक्षरैर्जातिसंयुक्तैरस्त्रान्ताङ्गानि तानि षट् ।
तृतीयस्य तृतीयं तु पञ्चमस्वरदण्डयुक् ॥ ६५ ॥

शुक्लश्चैव विसर्गान्तमक्षरद्वयमुच्चरेत् ।
प्लुतान्तताराद्यमिदं मृत्युञ्जयमिति स्मृतम् ॥ ६६ ॥

शुक्लपद्मयु(ता ? गा)न्तःस्थचन्द्रमण्डलसम्पुटे ।
अमृतासारविष्यन्दि ध्यात्वा मृत्युरुजापहम् ॥ ६७ ॥

बिन्दुनादान्वितः प्राणः शुक्लं सर्गी च पाण्डरम् ।
ध्यायेद्धृदयपद्मस्थं चिन्मन्त्रोऽयं शिवात्मकः ॥ ६८ ॥

प्रणवश्चैव तच्छब्दो महेशायपदं ततः ।
विद्मशब्दस्य हे चान्ते वाग्विशुद्धाय धीमहि ॥ ६९ ॥

तन्नःपदान्ते रुद्रः स्यात् प्रकारान्ते तु चोदयात् ।
इत्युक्ता शिवगायत्री शैवी सावित्र्यथोच्यते ॥ ७० ॥

त्रयोदशस्वराढ्यं तु जलं वायुसमन्वितम् ।
षष्ठान्तं चोद्धरेदस्य पदस्यादौ च कारकम् ॥ ७१ ॥

व्योमशब्दं चतुर्थ्यन्तं विघ्नशब्दं च हेयुतम् ।
शुक्लं षष्ठस्वरयुतमन्त्यं षष्ठान्तसंयुतम् ॥ ७२ ॥

सूक्ष्मशब्दं चतुर्थ्यन्तं धीमहीत्यादिकं तथा ।
प्राग्वत् समुद्धृत्य भवेत् सावित्री शिवसंज्ञिता ॥ ७३ ॥

द्वितीयस्य तृतीयं तु बिन्दुनादसमन्वितम् ।
गणेशबीजं विज्ञेयं स्वदीर्घैर्वाङ्गकल्पना ॥ ७४ ॥

तारादिकं द्वितीयस्य तृतीयं कर्णबिन्दुयुक् ।
गुरुभ्योऽन्ते नमश्चोक्तो मन्त्रोऽयं गुरुपूजने ॥ ७५ ॥

तारान्ते स्याद् वचच्छब्दो(?) भुवोऽन्ते च नतिर्भवेत् ।
स्कन्दस्य सप्तवर्णोऽयं मन्त्रः सर्वार्थसाधकः ॥ ७६ ॥

पुरस्तारकं व्योमदीर्घाग्निबिन्दुप्लुतं शक्तिबीजं च शुक्लं ससर्गम् ।
समुद्धृत्य सूर्याय नत्यन्तमुक्त्वा भवेन्मूलमन्त्रस्तु सौरो नवार्णः ॥ ७७ ॥

ओं ब्रह्मतेजो ज्वल ज्वल हृदयाय नमः । ओं अम् विष्णुतेजः प्रज्वल प्रज्वल अर्काय शिरसे स्वाहा । ओं अं रुद्रतेजो ज्वल भूर्भुवः स्वरों ज्वालिनि शिखायै वषट् । ओं अं महेश्वरतेजः शूलिनि कवचाय हुम् । ओं अं सत्यसदाशिवतेजः कपर्दिनि कपर्दिनि अस्त्राय फट् । ओं अं हं शिवतेजः शक्ते नेत्रत्रयाय वौषट् ।

अङ्गानीमानि सूर्यस्य स्वास्त्रशुद्धे करद्वये ।
ज्येष्ठाद्यङ्गुलिषु न्यस्य क्रमादस्त्रं तलद्वये ॥ ७८ ॥

शीर्षास्यहृदुपस्थेषु पदयोर्दिक्षु च क्रमात् ।
तान्यङ्गान्येव विन्यस्य हृदयादिषु च क्रमात् ॥ ७९ ॥

पूजाजपादिकं कुर्यात् सिद्धिमिष्टां स विन्दति ।
तारं सान्तं बिन्दुयुतं कान्तं बिन्दुसमन्वितम् ॥ ८० ॥

द्वितीयस्य द्वितीयं च षोत्कायेति समुद्धरेत् ।
प्रयोजनातिलकसंज्ञो मन्त्रोऽयं भास्करस्य निर्दिष्टः ॥ ८१ ॥

पूज्योऽनेनापि रविः शैवैरिष्टार्थसिद्धये नित्यम् ।
मन्त्रं व्योमव्यापिसंज्ञं तु वक्ष्ये व्यक्तस्त्वेकाशीतिसंख्यैः पदैर्यः ।
वर्णानां चाप्यष्टषष्ट्युत्तराणि त्रीण्येवास्मिन् संख्यया वा शतानि ॥ ८२ ॥

प्रथमं तु पदं तारं सप्तमान्त्यं त्वगान्वितम् ॥ ८३ ॥
त्रयोदशस्वरोपेतमुद्धृत्यैवं तथा पुनः ।
षष्ठ्यान्त्यं व्यापिने चेति द्वितीयं पञ्चवर्णकम् ॥ ८४ ॥
व्योमशब्दश्च रूपाय सर्वव्यापिन इत्यपि ।
पञ्चाक्षरे पदे प्रोक्ते शिवायेति त्रियक्षरम् ॥ ८५ ॥
अनन्तानाथशब्दैस्तं चतुर्थ्या चतुरक्षरे ।
पदेऽथानाश्रितायेति पञ्चार्णैरष्टमं पदम् ॥ ८६ ॥
त्रिचतुर्वर्णकपदे चतुर्थ्या ध्रुवशाश्वतौ ।
योगपीठसंस्थिताय नित्ययोगिन इत्यपि ॥ ८७ ॥
वसुबाणाक्षरे ध्यानाहाराय शरवर्णकम् ।
पञ्चाक्षरस्तु तारादिर्मुख्यं षड्वर्णकं पदम् ॥ ८८ ॥
सर्वप्रभव इत्यर्णैः पञ्चभिः स्यात् पदं ततः ।
शिवायेति त्रिवर्णं स्यादथेशानादिपञ्चकम् ॥ ८९ ॥
उक्त्वा मूर्धाय वक्त्राय हृदयायेति चोपरि ।
गुह्याय मूर्तये चेति षट्सप्तमुनिसंख्यया ॥ ९० ॥
समुद्रोदधिसंख्यार्णैः क्रमात् स्यात् पदपञ्चकम् ।
तारं नमो वीप्सितं च पदं पञ्चाक्षरं भवेत् ॥ ९१ ॥
षड्भिर्गुह्यातिगुह्याय गोप्त्रे वर्णद्वयं पदम् ।
अनिधनाय पञ्चार्णैः सर्वविद्याधिपाय तु ॥ ९२ ॥
सप्तार्णैः सर्वयोगाधिगतायेत्यष्टवर्णकम् ।
ज्योतीरूपाय बाणार्णैः परमेश्वरपराय च ॥ ९३ ॥
अष्टाक्षरैः परमात्मन्पदं स्याद् वेदवर्णकम् ।
अचेतनाचेतनेति पदं सप्ताक्षरैः स्मृतम् ॥ ९४ ॥
व्योम्निद्वन्द्वं चतुर्वर्णं व्यापिन्युग्मं तथैव हि ।
अरूपिन् वीप्सितं षड्भिः प्रथमाद्वितयं तथा ॥ ९५ ॥
तेजोयुग्मं चतुर्वर्णं ज्योतिर्द्वन्द्वं तथैव हि ।
अरूप चाप्यनग्ने च अधूमेति त्रिभिस्त्रिभिः ॥ ९६ ॥

अभस्म चाप्यनादे च नात्रयं धूत्रयं तथा ।
त्रियक्षराणि चत्वारि पदानीमानि वै विभोः ॥ ९७ ॥

ताराद्यं भूर्भुवःस्वश्च द्वित्रिद्व्यर्णानि वै क्रमात् ।
पदान्यनिधनेत्यर्णैश्चतुर्भिर्निधनं त्रिभिः ॥ ९८ ॥

निधनोद्भवपञ्चार्णं शिव इत्यक्षरद्वयम् ।
द्वाभ्यां शर्वेति च पदं विज्ञेयमिह देशिकैः ॥ ९९ ॥

महेश्वरेति श्रुत्यर्णं महादेवपदं तथा ।
सद्भावेश्वरपञ्चार्णं महातेजश्चतुष्टयम् ॥ १०० ॥

पञ्चार्णं योगाधिपते मुञ्चद्वन्द्वचतुष्टयम् ।
प्रथमद्वितयं षड्भिः शर्वयुग्मचतुष्टयम् ॥ १०१ ॥

भवद्वन्द्वं चतुर्भिः स्याद् भवोद्भवचतुष्टयम् ।
अथाष्टवर्णं हि पदं सर्वभूतसुखप्रदम् ॥ १०२ ॥

सप्ताक्षरं सर्वपूर्वं सान्निध्यकर इत्यपि ।
ब्रह्मविष्णुरुद्रप(दं ? र)पदमष्टाक्षरं भवेत् ॥ १०३ ॥

अनर्चितानर्चितेति तथासंस्तुतवीप्सितम् ।
अष्टवर्णे पदे ज्ञेये पूर्वस्थितचतुष्टयम् ॥ १०४ ॥

साक्षिद्वन्द्वं चतुर्भिः स्याद् वेदार्णं तुरुयुग्मकम् ।
पतङ्गेति त्रिवर्णं स्यात् पिङ्गयुग्मं चतुष्टयम् ॥ १०५ ॥

ज्ञानद्वयं शब्दयुगं सूक्ष्मयुग्मं पदत्रयम् ।
पृथग् वेदाक्षराण्येव शिवशर्वद्वयं द्वयम् ॥ १०६ ॥

सर्वदेति त्रिभिर्वर्णैः पञ्चार्णैरोंनमो नमः ।
शिवाय त्र्यक्षरपदं विज्ञेयं देशिकोत्तमैः ॥ १०७ ॥

तारपूर्वं नतिद्वन्द्वं पदं पञ्चाक्षरं स्मृतम् ।
एकाशीतिपदान्येवं विज्ञेयानि क्रमेण हि ॥ १०८ ॥

तारौ सर्वात्मनेज्योतिःसहितं हृदयं स्मृतम् ।
द्वितीयं पदमुच्चार्य सशिवब्रह्मशब्दयुक् ॥ १०९ ॥

स्वजातियुक्तं तु शिरः शिखामन्त्रोऽपि कथ्यते ।
तृतीयं पदमुच्चार्य ज्वालिनीति द्विरभ्यसेत् ॥ ११० ॥

जातियुक्ता शिखोक्ताथ चतुर्थं पदमुद्धरेत् ।
उक्त्वा पिङ्गलशब्दं तु वर्म स्याज्जातियोजितम् ॥ १११ ॥

पञ्चमं पदमुच्चार्य शिवाघोरास्त्रके तथा ।
जातियुक्तं तदस्त्रं स्यादङ्गानीमानि पञ्च हि ॥ ११२ ॥

व्योमव्यापिमनोरस्य चन्द्रज्ञानोक्तमार्गतः ।
षडङ्गान्यपि दृष्टानि लिख्यन्ते तान्यनुक्रमात् ॥ ११३ ॥

ओं व्योमव्यापि शिव ओं नमः सर्वात्मने पराय परमेश्वरपराय योगाय योगसम्भवाय करकर कुरुकुरु सत्यसत्य भवोद्भव वामदेवाय सर्वकार्यप्रशमन सदाशिव प्रसन्न नमोऽस्तु ते स्वाहा हृदयाय नमः । ओं शिव ब्रह्मशिरसे स्वाहा । ओं शिवहृदयज्वालिनि स्वाहा ज्वालिन्यै शिखायै वषट् ।

शिवात्मकं महादेवं सर्वज्ञं प्रभुमव्ययम् ।
आवर्तये महाघोरं कवचं पिङ्गलं शुभम् ॥ ११४ ॥

आयाहि पिङ्गल! महाकवच! शिवाज्ञया हृदयं बन्धबन्ध ज्वलज्वल घूर्णघूर्ण शक्तिवज्रधर वज्रपाशमनुप्रविश्य सर्वदुष्टान् स्तम्भयस्तम्भय हुं फट्। पिङ्गलाय कवचाय हुम् । ओं जुं सं ज्योतीरूपाय नेत्रत्रयाय वौषट् । पूर्ववदघोरास्त्रमेवास्त्रम् ।

"सर्वकर्मकराः सर्वे सर्वे सर्वार्थसाधकाः ।
सर्वरूपधराः सर्वे सर्वे चामोघशक्तयः ॥
शिवकार्योद्भवाः सर्वे न मीमांस्याः कथञ्चन ।"

इति मतङ्गे ।

इत्यस्मादस्य मन्त्रस्य न पृथग्देवताः स्मृताः ।
शिवो हि देवता चास्य ऋषिः शक्तिर्गायत्रिसंज्ञितम् (?) ॥ ११५ ॥

छन्दः स्मृतमथोऽन्यत् तु न मीमांस्यं कथञ्चन ।
षष्ठाद्यं भूमिबीजस्थं पञ्चमस्वरबिन्दुयुक ॥ ११६ ॥

तोयं सर्गि जलं वायुर्द्वादशान्तयुतं तथा।
षष्ठान्त्यं व्यापिनेशब्दो हुतभुक्प्रिययान्वितः॥ ११७॥

तारादिर्दशवर्णोऽयं व्योमव्यापी शिवात्मकः।
तारं स्व(रौर्द्वि ? राद्वि)तीयश्च स्वरौ वेदर्तुसम्मितौ॥ ११८॥

व्योमव्यापी चतुर्थ्यन्तस्तारान्तोऽयं दशाक्षरः।
तारं प्रासादबीजं च शिवायेत्यक्षरत्रयम्॥ ११९॥

नमस्कारश्च सप्तार्णो + + मन्त्रः शिवस्य च।
प्रासादोक्ताङ्गबीजान्ते शिकाराद्यक्षराणि तु॥ १२०॥

संयोज्य जातियुक्तानि शिवाङ्गानि भवन्ति हि।
शिवशब्दश्चतुर्थ्यन्तो नत्यादिस्तु शराक्षरः॥ १२१॥

उद्धृतः शिवमन्त्रोऽयं धर्मकामार्थमोक्षदः।
तारादि स्याद् द्विजातीनां + + + + + + + + ॥ १२२॥

+ + + + + + + + + + + + षडक्षरः।
नानेन सदृशोऽन्योऽस्ति मन्त्रः सर्वार्थसाधकः॥ १२३॥

सतारः शक्तिबीजादिर्मन्त्रोऽयं हि षडक्षरः।
शैवाष्टाक्षरसंज्ञः स्याद् भोगमोक्षफलप्रदः॥ १२४॥

अस्यैवाष्टाक्षरस्यान्ते चिन्मात्रं योजयेद् यदा।
मन्त्रो दशाक्षरः प्रोक्तः कल्पवृक्ष इवेष्टदः॥ १२५॥

पञ्चानामपि मन्त्राणां पङ्क्तिर्गायत्रमेव च।
बृहती च पुनः पङ्क्तिश्छन्दांस्युक्तान्यनुक्रमात्॥ १२६॥

वामदेवो दधीचश्च शिलादश्च महामुनिः।
सनत्कुमारश्चेत्यु(क्त्वा ? क्ता) मुनयोऽमी यथाक्रमम्॥ १२७॥

शिव एव स्वयं साक्षाद् दैवतं पूर्वमन्त्रयोः।
शिष्टानां तु त्रयाणां स्यात् सशक्तिर्देवता शिवः॥ १२८॥

एतेषां तु पृथक्कल्पा लिखिताः पूर्वपद्धतौ।
मन्त्रपादे तु मन्त्राणां यस्मिन् पटल उद्धृताः॥ १२९॥
सर्वेऽप्यमितसामर्थ्याः सर्वे सर्वार्थसिद्धिदाः॥ १३०॥

इतीह मन्त्राः कथिता यथावद् (या ? य)थाप्रधानाः शिवतन्त्रसिद्धाः ।
क्रियाः प्रसिध्यन्ति च यैरशेषाः शिवत्वपूर्वाभ्युदयाश्च मोक्षः ॥ १३१ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापादे मन्त्रोद्धारपटलः षष्ठः ॥

अथ सप्तमः पटलः ।

वक्ष्ये मुद्राः शैवतन्त्रप्रसिद्धा याभिः पूजाकर्मसिद्धिः प्रदिष्टा ।
सूर्यस्यादौ षड् विशेषेण पश्चाच्छम्भोर्मुख्याः स्युर्दशान्याश्च वेद्याः ॥ १ ॥

पद्माकारावाभिमुख्येन पाणी मध्येऽङ्गुष्ठौ शायितौ कर्णिकावत् ।
पद्माख्येयं सैव संलग्नमध्या सृष्टाङ्गुष्ठा बिम्बसंज्ञा तु मुद्रा ॥ २ ॥

प्राग्वत् पाण्योर्लग्नयोरङ्गुलीनामग्रेऽङ्गुष्ठोच्चालनान्निष्ठुरा स्यात् ।
बद्ध्वा मुष्टिं दक्षिणामास्फुरन्त्यौ मुक्त्वा तर्जामध्यमे गोवृषाख्या ॥ ३ ॥

अन्योन्यग्रथितसमाङ्गुलीकपाण्योस्तर्जाग्रद्वयसमवेतमध्यमाग्रे ।
व्यत्यस्तेऽप्यथ तदनामिकाकनिष्ठायुक्ताग्रे भवति हि धेनुसंज्ञमुद्रा ॥ ४ ॥

बद्ध्वां दक्षिणहस्तेन मुष्टिमुत्सृष्टतर्जनीम् ।
तत्तर्जन्या वामतलताडनात् त्रासनी भवेत् ॥ ५ ॥

इति मुद्राषट्कं सूर्यस्य ।

प्रसारिताधोमुखाभ्यां हस्ताभ्यां संस्पृशेत् तनुम् ।
पादावारभ्य मूर्धान्तं महामुद्रेयमीरिता ॥ ६ ॥

उत्तानपाण्योर्विहिताञ्जलौ तज्ज्येष्ठाग्रयुग्मेन पृथङ्निकुञ्च्य ।
स्पृष्ट्वा तथानामिकयोस्तु मूलं मुद्रेयमावाहनसंज्ञिता स्यात् ॥ ७ ॥

इयमावहन्येवाधोमुखी स्थापनी ।

संलग्नमुष्ट्योः करयोः स्थितोर्ध्वज्येष्ठायुगं यत्र समुन्नताग्रम् ।
सा सान्निधापन्यथ सैव गर्भाङ्गुष्ठा भवेच्चेदिह निष्ठुराख्या ॥ ८ ॥

बद्ध्वाञ्जलिं पङ्कजकोशकल्पं यद्दक्षिणज्येष्ठिकया तु वामाम् ।
ज्येष्ठां समाक्रम्य तु वन्दनीयं मुद्रा नमस्कारविधौ प्रयोज्या ॥ ९ ॥

बद्धमुष्ट्योस्तु संलग्नसम्मुखाङ्गुष्ठहस्तयोः।
कालकर्णी भवेच्छैवी मु + + त्रापराः स्मृताः ॥ १० ॥
अधोमुखं दक्षिणहस्तमुष्टौ ज्येष्ठा तु वामा निहिताथ मुष्टेः।
वामस्य मध्यात् प्रसृतापसव्यज्येष्ठापरा वेष्टितलिङ्गमुद्रा ॥ ११ ॥

पूर्वोदितैव धेनुमुद्रा।

तिरश्चीने कनिष्ठाग्रे त्वङ्गु(ष्ठे ? ष्ठा)भ्यां समास्थिते।
देशिनी मध्यमे रुन्ध्यादनामे द्वे समुन्नते ॥ १२ ॥

संयुक्ताग्रे च ते कृत्वा मुद्रा पञ्चमुखी भवेत्।

दशमुद्राधिकारः।

आकुञ्च्याथ कनिष्ठाग्रमाक्रम्याङ्गुष्ठमध्यतः ॥ १३ ॥
ऋज्वायतास्तु शेषाः स्युरङ्गुल्यः शक्तिसंज्ञिता।
इयमेव हि शक्त्याख्या विरलोर्ध्वाङ्गुलित्रया ॥ १४ ॥
यदि स्यात् त्रिशिखाकारा शूलमुद्रेति कथ्यते।
बद्ध्वाञ्जलिं तु हस्ताभ्यां निगृह्यानामिकाद्वयम् ॥ १५ ॥
शेषाङ्गुलीः प्रसार्येयं द्रव्यमुद्रा प्रकीर्तिता।
प्रसार्य दक्षिणं हस्तं कनिष्ठाद्यखिलाङ्गुलीः ॥ १६ ॥
क्रमादाकुञ्चयेच्छीघ्रं मुद्रा संहारिणी मता।
मिथः पृष्ठार्पितौ हस्तावन्योन्यग्रथिताङ्गुली ॥ १७ ॥
कृत्वा बद्ध्वा परावर्त्य नत्वा सा स्यात् क्षमापनी।

इति पञ्चमुद्राः।

इत्थं मन्त्रा मुख्यशश्चापि (रु ? मु)द्राः प्रोक्ता येभ्यः कर्मसिद्धिः प्रदिष्टा।
ज्ञानाद् येषां धारणाच्चापि जापादिष्टान् कामान् साधनाच्चाप्नुवन्ति ॥१८॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे
उपरिभागे क्रियापादे मुद्रापटलः सप्तमः ॥

अथाष्टमः पटलः ।

प्रासादे मण्डपे वापि गृहे वा यत्र कर्म तत् ।
क्रियते तत्र संशुद्धे गोमयालेपिते स्थले ॥ १ ॥
मध्येऽत्र सूत्रं वरुणेन्द्रदीर्घं निवेश्य चास्फाल्य तु तस्य मध्ये ।
बिन्दुं विधायापरपूर्वयोर्वै तदङ्कयेत् सूत्रवशात् समानम् ॥ २ ॥
पुनस्ते सूत्रखण्डे तु समं भित्त्वाङ्कयेदपि ।
बिन्दोस्तु पूर्वापरमध्यमाङ्कैर्मितेन सूत्रेण तदाहितेन ।
बिन्दोः सयाम्योत्तरादिक्समाङ्कवशात् समालिख्य तु मत्स्ययुग्मम् ॥ ३ ॥
तयोर्निधाय सूत्रं स्याद् दक्षिणेनोदगायतम् ॥ ४ ॥
इत्थं ब्रह्माह्वयं सूत्रमुदक्सूत्रं च साधयेत् ।
क्षेत्रार्धमानेन तु बिन्दुसं(स्थ? स्थां)श्चतुर्दिशं सूत्रवशाद् यथेष्टम् ।
अङ्कान् विधायाथ तदङ्कयुग्मात् सूत्रद्वये स्युः खलु कोणमत्स्याः ॥ ५ ॥
तेषु मत्स्येषु परितो दिक्षु सूत्रैर्निपातितैः ॥ ६ ॥
चतुरश्रं भवेत् क्षेत्रं चतुष्कोष्ठं समं शुभम् ।
सर्वमण्डलकुण्डादिवास्तुनिर्माणकारणम् ॥ ७ ॥

चतुरश्रसाधनम् ।

कुण्डं प्रशस्तं चतुरश्रमादावश्वत्थपत्रं च तथार्धचन्द्रम् ।
तद्वत् त्रिकोणं त्वपि वर्तुलं स्यात् षट्कोणकं पद्ममथाष्टकोणम् ॥८॥
रत्निमात्रं शतार्धे स्याच्छतहोमे त्वरत्निकम् ।
सहस्रे हस्तमानं स्यादयुते च द्विहस्तकम् ॥ ९ ॥
लक्षे चतुष्करं कुण्डं दशलक्षे तु षट्करम् ।
कोटिहोमेऽष्टहस्तं स्याद् यथा भोजेन्द्रपद्धतौ ॥ १० ॥
सर्वाणि कुण्डानि यथोक्तमानादायामविस्तारसमानि तानि ।
खातं च विस्तारसमं विधेयं तिस्रः क्रमाच्चोपरि मेखलाः स्युः ॥ ११ ॥
समं स्यात् सर्वतः खातं खातोपरि चतुर्दिशम् ।
एकाङ्गुलं परित्यज्य कुर्यात् तिस्रोऽथ मेखलाः ॥ १२ ॥
रत्निप्रमाणे खलु मेखला स्यादाद्याङ्गुलाभ्यामपराङ्गुलेन ।
अर्धाङ्गुलान्या त्वथ चाप्यरत्नौ त्रिद्व्येकमात्राङ्गुलकैर्विधेया ॥ १३ ॥

अत्र भोजराजः —

“मुण्डहस्तप्रमाणे स्यादाद्या द्व्यङ्गुला । द्वितीया अङ्गुलेन । अर्धाङ्गुलेन च तृतीया । अरत्निप्रमाणस्य त्र्यङ्गुलद्व्यङ्गु(ल?लैकाङ्गुल)माना” इति ।

हस्तकुण्डे मेखलाः स्युश्चतुस्त्रिद्व्यङ्गुलाः क्रमात् ।
षट्चतुस्त्र्यङ्गुलैः कुर्याद् द्विहस्तेऽपि यथाक्रमम् ॥ १४ ॥

चतुष्करे त्वष्टकषट्चतुर्भिः षड्ढस्तके चापि दशाष्टषड्भिः ।
स्युरङ्गुलैरष्टकरेऽपि कुण्डे ताः षोडशद्वादशकाष्टसंख्यैः ॥ १५ ॥

सर्वाः सर्वेषु कुण्डेषु विस्तारोच्छ्रयतः समाः ।
परितः स्वसमायामा निम्नोन्नतविवर्जिताः ॥ १६ ॥

अत्र भोजराजः —

“क्रमेण सर्वकुण्डेषु तिस्रो मेखलाः कुण्डानुरूपेणैव विधातव्याः” इति ।

कुण्डस्य पश्चिमे योनिं कुर्याद् दक्षिणतोऽपि वा ।
मध्यतो मेखलानां तु सर्वासामुपरि स्थिताम् ॥ १७ ॥

सूर्याङ्गुलायाममिता तु योनिरामूलतोऽग्राद् वसुवेददस्रैः ।
तुल्याङ्गुलैस्तु क्रमशोऽङ्गुलोच्चा द्राङ्निर्गताग्रापि च रत्निकुण्डे ॥ १८ ॥

अरत्न्यादिषु कुण्डेषु द्व्यङ्गुलं द्व्यङ्गुलं पृथक् ।
क्रमादायामविस्तारवृद्ध्या योनिर्विधीयते ॥ १९ ॥

अत्र भोजराजेन्द्रपद्धतौ —

“एवं प्रथमकुण्डस्य । शेषाणां द्व्यङ्गुलवृद्ध्या योनिर्विधातव्या” इति ।

मञ्जर्यां च —

हस्तमात्रस्य कुण्डस्य

“तालायता जलपतेर्दिशि संस्थिता स्यादश्वत्थपत्रसदृशी क्रमशोऽथ निम्ना ।
नाभिर्दशाङ्गुलषडङ्गुलतः क्रमेण विस्तारतश्च चतुरङ्गुलगोलकाग्रा ॥”

इति ।

चतुरश्रं तु वा वृत्तं कुण्डं नित्ये च शान्तिके ।
सार्वकामिकमित्यन्ये चतुरश्रं तु वर्तुलम् ॥ २० ॥

श्रुत्येकांशं तु सीम्नोर्बहिरपि पुरतोऽथाङ्कयित्वाम्बुनाथे
तन्मानात् सूत्रमन्तर्निहितमुभयतः कोणयोर्वर्तयित्वा ।
मध्याद्यन्यस्य कर्णान्तकमपि परतः कोणयोः पूर्वचिह्ने
सूत्रे त्वास्फाल्य योनिप्रतिममपि भवेत् कुण्डमश्वत्थपत्रम् ॥ २१ ॥

चतुरश्रं युगांशांशं कृत्वान्त्यश्वोत्तरे यजेत् (?) ।
भागं त्वनेन प्राक्प्रत्यग् बहिरङ्कौ निधाय तु ॥ २२ ॥

तद्वद् दक्षिणतो मध्यस्थितसूत्रभ्रमाद् द्वयोः ।
अर्धचन्द्रसमाकारं कुण्डं भवति शोभनम् ॥ २३ ॥

वेदाश्रे चतुरंशके भुजमितं प्रागंशमाप्याद् बहिः
क्षिप्त्वा मध्यमवारुणाङ्कविहिते सूत्रे द्विधा वर्तिते ।
स्यातां द्वौ शफरौ तयोश्च पुरतश्चाङ्केऽथ सूत्रत्रयं
क्षिप्त्वा नैर्ऋतदिङ्मुखे भवति तत् कुण्डं त्रिकोणाह्वयम् ॥ २४ ॥

षष्ठांशं पूर्वनिहितं गृहीत्वा नैर्ऋतस्थितम् ।
वायव्यान्तेषु सूत्रे द्वे क्षिप्त्वा वा स्यात् त्रिकोणकम् ॥ २५ ॥

मध्यबिन्दुस्थितं सूत्रं प्राग्भुजाङ्कान्निधाय तु ।
परिवर्त्य भवेत् कुण्डं वर्तुलं तत् सुशोभनम् ॥ २६ ॥

भु(जा)शब्दस्याभिप्रायात् प्राग्भुजाया बहिः प्राक्च्छब्ददर्शनादङ्गुलाः ये(?) निधायेति यावत् ।

बाह्यस्थं षष्ठमंशं शतमखवरुणस्थापितं वेदकोणे
मध्ये संस्थाप्य सूत्रं सममिह तु तयोर्वर्तयित्वा तु बाह्ये ।
चत्वारस्तत्र मत्स्यास्तदनु धनददिग्दक्षिणस्थे च सूत्रे
तत्रस्थेष्वेव चिह्नेष्वथ समपातिते स्यात् षडश्रं हि कुण्डम् ॥ २७ ॥

वृत्तकुण्डेऽब्जपत्राणि बाह्ये तन्मेखलोपरि ।
कुण्डार्धमायतान्यष्टौ कृत्वा स्यात् पद्मसंज्ञितम् ॥ २८ ॥

आदित्याङ्कांशमन्तर्बहिरपि परितः सम्भ्रमाद् दिक्षु ताभ्यां
द्वाभ्यां मत्स्यौ भवेतां दिशि दिशि विततैस्तेषु सूत्रैर्यथावत् ।

कुण्डं स्यादष्टकोणं सुरुचिरमथवाप्यर्धदिक्सूत्रकोणैः
शिष्टार्घाप्यैन्द्रपञ्चाशकशफरयुगोत्पन्नमीनाष्टकैर्वा ॥ २९ ॥

तुर्यश्रं नवधा विभज्य तु बहिश्चान्तः क्षिपेद्दशकं
दिक्कोणेषु विधाय चांशमथ ततसंस्थैः क्रमात् सूत्रकैः ।
स्यातां द्वे चतुरश्रके सममिते व्यत्यासतोऽष्टाश्रकं
चैशान्यां सुसमं यथा सुरुचिरं कुण्डं तथा वा भवेत् ॥ ३० ॥

कुण्डाधिकारः ।

चतुरश्रं तु संसाध्य ह्यष्टधा विभजेत् पुनः ।
षट्पञ्चाशच्च कोष्ठानां द्विशतं चात्र वै भवेद् ॥ ३१ ॥

षण्णां षड्भिस्तु कोष्ठैर्लिखतु सरसिजं मध्यदेशेऽस्य बाह्ये
पङ्क्त्या पीठं च पीठाद् बहिरपि परितः पङ्क्तियुग्मेन वीथीम् ।
तद्बाह्ये पङ्क्तियुग्मे दिशि विदिशि तथा द्वारकण्ठोपकण्ठान्
गल्लांश्चैवोपगल्लाननलनिर्ऋतिवाय्वीशकोणेषु कोणान् ॥ ३२ ॥

(कण्ठोपकण्ठान्? गल्लोपगल्लान्) कपोलोपकपोलान् शोभोपशोभानिति केचिदाहुः ।

पद्मक्षेत्रस्थदिक्सूत्रे संस्थाप्यान्यद् विसृज्य तु ।
बहिर्द्वादशकं भागं त्यक्त्वान्यत् परिवर्तयेत् ॥ ३३ ॥

क्षेत्रं चतुर्धा विभजेत् तु वृत्तं सूत्रक्रमेणैव समं क्रमेण ।
तत्कर्णिकाकेसरपद्म(ग? स)न्धिपत्रावसानं च भवन्ति तानि ॥ ३४ ॥

पूर्वं द्वादशकांशं यत् त्यक्तं तद् भ्रामयेद् बहिः ।
पञ्चमं तु भवेत् क्षेत्रं व्योमाख्यं तद्दलाग्रकम् ॥ ३५ ॥

प्रसार्य कोणसूत्रे द्वे कोणदिङ्मध्यमेन तु ।
चत्वारि सूत्राण्यास्फाल्य सूत्रषोडशकं भवेत् ॥ ३६ ॥

दलान्तसिद्ध्यै दलसन्धिमध्ये निधाय सूत्रं तु दलान्तमानम् ।
दलान्तरालद्वयसंभ्रमोत्थैः शशाङ्कखण्डैस्तु दलं प्रसिध्येत् ॥ ३७ ॥

पञ्चषोडशसूत्राणां मध्यं सूत्रैर्विभज्य तु ।
द्वात्रिंशत्खण्डसूत्राणि स्युर्दलाग्रवृतौ समम् ॥ ३८ ॥

दलाग्रसूत्रोभयपार्श्वसूत्रयोरग्रे स्थितं सूत्रमथाग्रमूलतः ।
दलाग्रसूत्रान्तमुपानयेल्लिखन्नेवं दलाग्रं तु भवेन्मनोरमम् ॥ ३९ ॥

शालीयपिष्टं सितचूर्णमुक्तं हारिद्रमीषत्सितयुक् सुपीतम् ।
कुसुम्भसिन्दूरकजातिरक्तं दग्धैर्यवाद्यैरपि नीलचूर्णम् ॥ ४० ॥

शम्यञ्जाबिल्वादिदलैर्याज्ञिकैः श्यामलं स्मृतम् ।
तत्तद्वर्णैस्तु धान्याद्यैः पूरयेन्मण्डलानि वै ॥ ४१ ॥

मनःशिलारोचना(भ्यां) पीतचूर्णं प्रशस्यते ।
रजसां पञ्चवर्णानां ब्रह्माद्याः पञ्च मूर्तयः ॥ ४२ ॥

दैवतानि भवन्त्येषां निवृत्त्याद्याः कलास्तथा ।
कृतं त्रेता द्वापरं च कालः कलियुगं तथा ॥ ४३ ॥

सितलोहितकश्यामपीतकृष्णात्मकानि च ।
शुक्लं च रक्तं च तथैव कृष्णं त्रितत्त्ववेदत्रयवह्निलोकैः ।
त्रिशक्तिसन्ध्यात्रिगुणैः क्रमेण व्याप्तं तु बिम्बैश्च विचिन्त्य योज्यम् ॥ ४४ ॥

भुक्त्यर्थमपसव्यं तु पुष्ट्यर्थं तु प्रदक्षिणम् ॥ ४५ ॥

रजःपातं नियुञ्जीत मण्डलेषु विचक्षणः ।
मुष्टिना पातयेत् पुष्ट्यै यदि मुक्तिरभीप्सिता ॥ ४६ ॥

मध्यमाङ्गुष्ठतर्जाभिः सर्वाभिश्चैव शान्तिके ।
शक्तस्तु वाञ्छेद् यदि सिद्धिमग्र्यां तद्वर्णरत्नैरिह मण्डलानि ।
कुर्यात् तथा मौक्तिकपुष्यरागमाणिक्यनीलैर्हरितैश्च रत्नैः ॥ ४७ ॥

“एवंविधेषु चूर्णेषु सिद्धिकामो मुक्ताविद्रुमादिकैस्तदेवं कुर्यादि”ति भोजराजः ।

रेखास्तु सर्वाः सर्वत्र शुक्लाः स्युर्मध्यमामिताः ॥ ४८ ॥
द्विहस्तेऽङ्गुष्ठमात्रा वा हस्ते वानामिकासमाः ।

अत्र भोजराजः—“एताश्च रेखाः प्रथमाङ्गुलप्रमाणाः अन्या यवोना यवान्तराश्च । सर्वा मुक्तिकामस्य भुक्तिकामस्य समाः कार्याः” इति ।

कर्णिका पीतवर्णा स्याद् रेखाः सर्वाः सिताः समाः ॥ ४९ ॥
द्विहस्तेऽङ्गुष्ठमात्राः स्युर्हस्ते मध्यमया मिताः ।

इत्यन्ये ।

मध्ये सुपीता खलु कर्णिका स्यात् तस्यां तु बीजानि नवासितानि ।
द्वे द्वे पृथक्केसरके दलानां मध्येषु लेख्ये कुटिलाग्रमीषत् ॥ ५० ॥
मूले तनून्यापीतानि मध्ये स्थूलारुणान्यपि ॥ ५१ ॥
अन्ते द्राक् तनुपीतानि तदन्तेऽल्पसितानि वै ।

"मूलमध्याग्रेषु शुक्लरक्तपीतं केसरजालमि"ति भोजराजः ।

शुक्लानि तान्यष्टदलानि कुर्यात् समानि तुङ्गाग्रमनोरमाणि ।
भुक्त्यै तथा प्राञ्जलिकानि मुक्त्यै स्मरादियागेषु शिताग्रवन्ति ॥ ५२ ॥
"दलाग्राण्यपि चत्वारि रक्तवर्णानि कारयेत्"

इत्यजिते ।

गौरीसरस्वत्यादीनां दलान्यश्वत्थपत्रवत् ॥ ५३ ॥
विघ्नेशानां ग्रहाणां च गोकर्णा(ग्रा)णि कारयेत् ।
पीठं तु शुक्लारुणपीतकृष्णपादं तथा नीलककीलशोभम् ।
गात्रैश्चतुर्भिस्तु विचित्रवर्णैः कुर्याद् यथेष्टं त्वथवापि वर्णैः ॥ ५४ ॥

अत्र तत्त्वसागरे—"पीठे कोष्ठद्वयं दिक्षु लोप्यम् । तथा कोणे त्रीणि त्रीणि विलोपयेदि"ति ।

वीथीं लतावितानाद्यैः पत्रकैश्चोपशोभयेत् ।
तद्बाह्ये दिक्षु शुक्लेन चतुर्द्वाराणि पूरयेत् ॥ ५५ ॥
दिक्सूत्रकाणामुभयत्र कोष्ठे द्वारार्थमभ्यन्तरपङ्क्तिसंस्थे ।
स्याद् बाह्यपङ्क्तौ द्वितयं द्वयं च तत्कोष्ठषट्कं विमृजेद् दिशासु ॥ ५६ ॥
कोष्ठत्रयं त्रयं चान्तर्द्वाराणां पार्श्वयोर्द्वयोः ॥ ५७ ॥
कण्ठोपकण्ठसिद्ध्यर्थमेकैकं विमृजेद् बहिः ।
एवं पृथक्कोष्ठचतुष्कवन्तः कण्ठोपकण्ठाः प्रभवन्ति चाष्टौ ।
तत्पार्श्वतस्तद्विपरीतवक्रास्तद्वत् कपोलोपकपोलकाः स्युः ॥ ५८ ॥
ततः कोणेषु शिष्टानि षट्कोष्ठानि पृथक् पृथक् ॥ ५९ ॥

विमृजेत् कोणसिद्ध्यर्थं वृषभानेषु वा लिखेत् ।
कण्ठोपकण्ठान् रक्तेन कपोलोपकपोलकान् ॥ ६० ॥
पीतेनाच्छादयेदष्टौ यथा भूमिर्न दृश्यते ।
बहिर्गुणान् वै परितः क्रमोक्ताल्लिखेत् ततः सत्त्वरजस्तमांसि ।
रजोभिरङ्गुष्ठमितांस्तु शुक्लारुणासितान् मध्ययवान्तरांस्तान् ॥ ६१ ॥

भद्रकाधिकारः।

चतुरश्रेऽष्टधा भिन्ने चतुष्षष्टिकृते पदे ॥ ६२ ॥
मध्ये कोष्ठचतुष्केण पद्मपीठं च संलिखेत् ।
तद्बाह्यपङ्क्त्या खलु वीथिका स्यात् तद्बाह्यपङ्क्तिद्वयदिक्चतुष्के ।
द्वाराणि कोष्ठैः खलु वेदसंख्यैः सम्मृज्य शुक्लानि समानि कुर्यात् ॥ ६३ ॥
द्वाराणां पार्श्वयोर्बाह्यपङ्क्तावेकैककोष्ठकम् ॥ ६४ ॥
द्वारेणायोज्य विमृजेत् स्यातां कण्ठोपकण्ठकौ ।
संस्थाप्य कोणेष्वथ कोष्ठमेकं शिष्टैः पृथक्कोष्ठकपञ्चकैः स्युः ।
एकीकृतैर्वेदकपोलकास्ते तावन्त एवोपकपोलकाश्च ॥ ६५ ॥

"कपोलं तु भवेत् तेषु पदं पूर्वापरायतम् ।
दक्षिणोत्तरगं चापि भवेदुपकपोलकम् ॥"

इत्याजिते ।

प्रागुक्तमार्गेण तु कर्णिकाद्यं त्वापूर्य वीथीं च तथोक्तवर्णैः ।
द्वाराणि शुक्लेन कपोलकास्तु रक्तास्तथापीतरुचोऽथवा स्युः ॥ ६६ ॥

अत्राजिते —

"कपोलोपकपोलानि वह्निकोणादिषु क्रमात् ।
रक्तं पीतं तथा श्यामं श्वेतं च परिकल्पयेत् ॥"

इति ।

वह्न्यादिकोणकोष्ठानि पीतश्यामासितारुणैः ॥ ६७ ॥
पूरयेद् वाथ सर्वाणि कृष्णेनेत्यपरे जगुः ।
बाह्ये तु शुक्लारुणकृष्णवर्णैः प्राग्वत् समालिख्य गुणत्रयं तत् ।
स्यात् सर्वतोभद्रमिदं तु कोणे षट्कोष्ठकैकीकरणेन भद्रम् ॥ ६८ ॥

मण्डलेष्वपि सर्वेषु शुक्लान्यब्जदलानि तु।
द्वाराणि चाथ वीथी स्याल्लताद्यैरविशेषिते ॥ ७३ ॥

सर्वतोभद्राधिकारः।

द्वात्रिंशदंशे चतुरश्रकेऽस्मिन् सहस्रकं सङ्कृतिसंख्यकं च।
कोष्ठानि तन्मध्यगतत्त्वसंख्यैः कोष्ठैः सरोजं तु लिखेत् पुरोवत् ॥ ७४ ॥

तद्बाह्यपङ्क्त्या पीठं स्यात् तद्बाह्ये सप्तपङ्क्तिभिः।
लिङ्गाष्टकं तु विलिखेद् दिक्सूत्रोभयपार्श्वयोः ॥ ७५ ॥

ऋतुवेदाक्षिवेदर्तुकोष्ठैः स्यात् तिर्यगायतैः।
पीठं सकण्ठं ब्रह्मादिजलपट्टान्तकं शुभम् ॥ ७६ ॥

पीठोपरिष्टात् खलु मध्यपङ्क्त्योर्युग्मस्थतत्कोष्ठचतुष्टयेन।
लिङ्गं भवेत् तद्गतमध्यसूत्रं मध्यान्तसंवर्तितमस्तकं वा ॥ ७७ ॥

अन्तर्मुखानि लिङ्गानि बुभुक्षूणां समालिखेत्।
विपरीतं मुमुक्षूणामन्तःपीठानि कारयेत् ॥ ७८ ॥

तत्कण्ठपीठोभयपार्श्वसंस्थे भद्रे चतुष्कोष्ठवशाद् भवेताम्।
लिङ्गान्तरालेष्वपि पञ्चविंशैः कोष्ठैस्तु कोणेषु लता विधेयाः ॥ ७९ ॥

गोमूत्रिकावत् संसृष्टा रेखास्तत्कोष्ठगा यथा।
तथान्यरेखालोपेन लताः स्युर्विदिगायताः ॥ ८० ॥

अश्रयन्तरेषु वल्लीनां पत्राण्यप्यथवा लिखेत्।
वल्ल्यादौ सक्तमूलानि कुटिलाग्रादिकान्यपि ॥ ८१ ॥

तद्बाह्ये पङ्क्तियुग्मेन वीथीं प्राग्वत् तु मार्जयेत्।
वीथीं तथा कल्पलताविशेषैराभूष्य तद्बाह्यवृतित्रयेऽपि।
कोष्ठानि वेदर्तुवसुप्रसङ्ख्यं द्वारार्थमन्तःप्रभृतीह लुम्पेत् ॥ ८२ ॥

शोभोपशोभेऽपि स्यातां द्विचतुष्षड्विलोपतः ॥ ८३ ॥

त्रिः सप्तकोष्ठानि पृथक् कोणे कोणे तु मार्जयेत्।
पद्मादिकं भद्रकवत् तु सर्वमाभूषयेत् पञ्चविधैस्तु चूर्णैः।
लिङ्गाष्टकं पञ्चमुखोक्तवर्णैरिच्छानुरूपं परिपूरयेद् वा ॥ ८४ ॥

इतीदं पार्वतीकान्तमुक्तं प्रासादमण्डलम् ।
अष्टलिङ्गलतापद्मवीथीप्राकारमण्डितम् ॥ ८५ ॥

पार्वतीकान्तप्रासादाधिकारः ।

चतुरश्रं चतुर्हस्तं क्षेत्रं विंशतिभागिकम् ।
स्याच्चतुश्शतकोष्ठं तन्मध्येऽब्जं तत्त्वकोष्ठकैः ॥ ८६ ॥

पङ्क्त्यैकया पीठमथैकया स्याद् वीथी ततः पङ्क्तिचतुष्टयेन ।
तद्वारलिङ्गैः परितो लताः स्युस्तद्बाह्यपङ्क्त्यापि च वाह्यवीथी ॥ ८७ ॥

कुर्याद् भद्रकवत् पद्मपीठवीथीर्यथाविधि ।
प्रतिपङ्क्ति द्विकोष्ठाष्टकोष्ठैर्द्वाराणि दिक्ष्वपि ॥ ८८ ॥

वीथ्यन्तरा द्वारनिबद्धकोष्ठत्रयेण भूपीठमथैककोष्ठम् ।
स्यात् कण्ठपीठं त्वथ तोयपट्टं कोष्ठैस्त्रिभिर्लिङ्गमथैककोष्ठम् ॥ ८९ ॥

अधश्चोर्ध्वं च तत्कोणान् पीठकोष्ठचतुष्टये ।
कोष्ठान्तः कोणगं सूत्रं कोष्ठसूत्रार्धमानतः ॥ ९० ॥

भ्रमयित्वा त्यजेद् बाह्ये खण्डिताश्रिचतुष्टयम् ।
पीठमेवं भवेद् रम्यं द्वादशाग्रैरलङ्कृतम् ॥ ९१ ॥

प्राग्वत् समापूर्य तु वर्णचूर्णैः पद्मादिवीथ्यन्तमशेषबिम्बम् ।
ख्यातं लतालिङ्गसमुद्भवाख्यं तन्मण्डलं शङ्करवल्लभं यत् ॥ ९२ ॥

लतालिङ्गोद्भवाधिकारः ।

क्षेत्रे षोडशधा भिन्ने चतुरश्रे चतुर्दिशम् ।
पार्वतीकान्तवत् कोष्ठैः कुर्याल्लिङ्गचतुष्टयम् ॥ ९३ ॥

मध्येऽवशिष्टैरपि वेदकोष्ठैर्लिङ्गान्तरालेष्वपि तत्प्रसंख्यैः ।
चतुर्दलाब्जं स्वयमेव तैः स्याल्लिङ्गेषु संवर्तितमस्तकेषु ॥ ९४ ॥

भद्राष्टकं स्यात् कण्ठेषु लताः कोणेषु पूर्ववत् ।
लिखित्वा मण्डलं तत् स्यात् पञ्चब्रह्माभिधानकम् ॥ ९५ ॥

मध्येऽम्बुजे वर्तुलकर्णिका स्यात् पीतात्र रक्ता तनुकेसराली ।
ईशस्तु मध्ये पुरुषादयोऽपि सुवर्णदिग्लिङ्गगता भवन्ति ॥ ९६ ॥

अस्यैव तु लतास्थानेष्वालिख्य स्वस्तिकानि तु ।
एकं त्रीणि ततः पञ्च कोष्ठलोपः क्रमात् स्मृतः ॥ ९७ ॥

एतत् खलु स्वस्तिकमण्डलाब्जं क्षेत्रेऽथवा द्वादशभागिकेऽस्मिन् ।
मध्येऽम्बुजं षोडशकोष्ठकैः स्यात् स्युः स्वस्तिकान्यष्टदिशासु तद्वत् ॥ ९८॥

स्वस्तिकान्यपि पद्मं च प्राग्वदापूर्य चूर्णकैः ।
स्वस्त्यर्थं स्वस्तिकं शस्तं सर्वदेवाभिनन्दनम् ॥ ९९ ॥

स्वस्तिकाब्जद्वयाधिकारः ।

क्षेत्रे तथाष्टादशभागिकेऽस्मिंस्तन्मध्यगस्वस्तिकनाभिमादौ ।
सङ्कल्प्य लुम्पेत् तु चतुष्पथाभं समन्ततः कोष्ठकपञ्चकानि ॥ १०० ॥

कोष्ठमात्रायता रेखाः कुटिलाः स्वस्तिकाकृतौ ।
परस्परोपयोगिन्यः स्थाप्याः स्युः शेषलोपतः ॥ १०१ ॥

पञ्चाशदस्मिन् खलु सप्तकं च स्यात् स्वस्तिकानां सह चार्कभद्रैः ।
मध्येषु पञ्चाशदपि द्वयं च स्यात् सर्वतोभद्रचतुष्पथानाम् ॥ १०२ ॥

कोणेष्वेकैककोष्ठानि शिष्टान्याभूषयेत् सितैः ।
नीलपीतारुणश्यामैर्भद्राण्यपि चतुष्पथान् ॥ १०३ ॥

एतद्धि सर्वतोभद्रस्वस्तिकं नाम मण्डलम् ।
सर्वस्वस्तिकमित्येके प्राहुर्यच्छिवयोः प्रियम् ॥ १०४ ॥

क्षेत्रेऽथवा षोडशधा विभक्ते मन्वर्कदिग्वस्वृषिभेदिते वा ।
प्राग्वद् विलोपात् खलु मण्डलानि स्युः सर्वतः स्वस्तिकभद्रवन्ति ॥ १०५॥

स्वस्तिकसर्वतोभद्राणि ।

चतुरश्रे द्विहस्ते तु चक्राब्जं पीठवर्जितम् ।
स्यादेकनाभं तल्लक्ष्म भवेन्मानाङ्गुलक्रमात् ॥ १०६ ॥

निधाय सूत्रं त्वथ पद्मबिन्दौ पद्मार्धमानेन नवाङ्गुलैश्च ।
त्रिभिश्च वस्वब्धिमितैर्भ्रमेण सरोरुहं नाभ्यरनेमयः स्युः ॥ १०७॥

पद्मं पुरोवदालिख्य नाभिं पीतेन पूरयेत् ।
दलतुल्यारके चक्रे दलरेखाः प्रसार्य तु ॥ १०८ ॥

लिखेत् ततस्तेष्वरकान् यथावद् दलाद् द्विसंख्येष्वरकेषु तद्वत् ।
दलाग्रसूत्रैर्दलसन्धिसूत्रैः प्रसारितैस्तावदिहारकाः स्युः ॥ १०९ ॥

विभज्यारभुवं त्रेधा द्वाभ्यामन्तरथाङ्कयेत् ।
मत्स्यवत् तेष्वथास्फाल्य सूत्राण्येषु लिखेदरान् ॥ ११० ॥

इन्दीवराश्वत्थदलोपमा वा ते मातुलुङ्गाकृतयोऽथवा स्युः ।
अब्जच्छदाभाश्च यवोदरा वा मध्ये कृशा वाथ पिपीलिकाभाः ॥ १११ ॥

अरकास्त्वरुणाः श्यामास्ते स्युरेकान्तराः क्रमात् ।
अन्ते गोरोचनाभाः स्युः पीताः स्युररसन्धयः ॥ ११२ ॥

नेमिं त्रिधा संप्रविभज्य कुर्याच्छुक्लेन मध्ये त्वसितेन बाह्ये ।
पीतेन चान्तः परिपूर्य कोणान् कृष्णेन सस्वस्तिकचिह्नरम्यान् ॥ ११३ ॥

अरसन्ध्यन्तरालस्थो बहिर्नेमेः परिभ्रमेत् ।
अरसन्धेस्तु मध्यस्थो वर्तयेदरमूलकम् ॥ ११४ ॥

मध्येऽरकाणां स्थित्वा तु वर्तयेदरमध्यकम् ।
मातुलुङ्गफलाकारास्त्वेवं सिध्यन्त्यराः क्रमात् ॥ ११५ ॥

अराग्रसंस्थं त्वरसन्धिमूलात् सूत्रं तथारोभयपार्श्वसंस्थम् ।
पृथक् समास्फाल्य तथारकाः स्युर्विस्तारितेन्दीवरपत्रकल्पाः ॥ ११६ ॥

अरमध्ये स्थितोऽराग्रं किञ्चित् त्यक्त्वाब्जपत्रवत् ।
अरसन्धेर्भ्रमाच्चाग्रभ्रमादब्जदलारकाः ॥ ११७ ॥

कृशाग्रमूलाः पृथवस्तु मध्ये कार्यास्तृतीयांशतयारसन्धेः ।
अन्तः प्रविष्टास्तु यवोदराख्याः सिध्यन्ति ते स्युः क्रमशः शिताग्राः ॥

त्रिधा विभज्यारक्षेत्रं द्वितीयप्रथमांशयोः ।
मध्ये स्थित्वा भ्रमं कृत्वा तृतीयांशे दलाग्रवत् ॥ ११९ ॥

अर्धचन्द्राभरेखाभ्यां पत्राग्रं च समालिखेत् ।
इत्थमश्वत्थपत्राभास्तत्रारा: सम्भवन्ति हि ॥ १२० ॥

ि त्वारसन्धेरथ मध्यमेंऽशे तिर्यग्भ्रमाच्चोभयतोंऽशकार्धात् ।
रेखाद्वयान्तः कृशमध्यमकारकाः स्युः (?) पिपीलिकाक्रोडसमाह्वयाराः॥१२१॥

अरसन्ध्यन्तरा पुष्पैर्विचित्रैरभिभूष्य तु ।
बिम्बबाह्येऽप्यथालिप्ते पुष्पालीभिर्विभूषयेत् ॥ १२२ ॥

उक्तं च चक्राम्बुजमेकनाभं प्रियं शिवार्यारविकेशवानाम् ।
अन्यानि च स्युर्नवनाभकान्तान्यूह्यानि चक्राम्बुजमण्डलानि ॥ १२३ ॥

चक्राब्जाधिकारः ।

कर्णिकार्धप्रमाणेन प्राक्स्थसूत्रभ्रमक्रमात् ।
तस्यैव पार्श्वयोगेन मत्स्यद्वादशकं भवेत् ॥ १२४ ॥

सूत्रेषु तेष्वापतितैः ससन्धिसूत्रैश्च तद्द्वादशपत्रमब्जम् ।
अष्टच्छदाब्जस्य समं प्रभेदात् स्यादम्बुजं षोडशपत्रशोभम् ॥१२५॥

केसरव्योमरेखान्तसूत्रात् तत्केसराग्रगात् ।
मत्स्यवल्लाञ्छयित्वा स्यात् पञ्चपत्रं तु पङ्कजम् ॥ १२६ ॥

कर्णिकादलसन्धिभ्यां प्राग्वत् षट्पत्रसिद्धये ।
व्योमरेखाकर्णिकाभ्यां दलाग्रस्थं तु सप्तकैः ॥ १२७ ॥

दलसन्धिकर्णिकाभ्यां दलसन्धौ न्यस्तमत्स्याचिह्नेन ।
नवदलकं स्यात् सूत्रैः पञ्चभिरास्फाल्य पाङ्क्तिपत्रं स्यात् ॥ १२८ ॥

केसराकाशयोर्मध्यव्योम्नि विन्यस्य लाञ्छयेत् ।
एकादशच्छदं त्वेवं पद्मं स्यात् सूत्रपाततः ॥ १२९ ॥

पत्राग्रपत्रसन्धिभ्यां पत्राग्रे न्यस्य लाञ्छिते ।
आस्फाल्य तेषु सूत्राणि तत् स्यादभिकृतिच्छदम् ॥ १३० ॥

अतः परं चेद् दलवृद्धिमिच्छेद् दिशानयैवात्र यथाक्रमेण ।
तदूहतो मत्स्यवशेन सूत्रैर्लिखेत् सरोजानि यथाभिलाषम् ॥ १३१ ॥

दलभेदलक्षणम् ।

अर्धचन्द्रादिकुण्डानां लक्ष्मणा सूत्रपाततः ।
अर्धचन्द्रादिबिम्बानि कुर्यात् साम्यानुसारतः ॥ १३२ ॥

इति कुण्डमण्डलविधिः प्रधानतः कथितः शिवाध्वरविशेषसिद्धिदः ।
बहुशो निरूप्य विविधाञ् शिवागमानिह देशिकेन्द्रपरितोषकारकः ॥ १३३ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे क्रियापादे
उपरिभागे कुण्डमण्डलपटलोऽष्टमः ॥

अथ नवमः पटलः ।

वक्ष्ये स्रक्स्रुवयोश्च लक्षणमथो स्रुग्घस्तमात्रायता
पालाशी खदिरोद्भवापि च तथा स्याच्छामिली शोभना ।
वेदाश्रं तु मुखं स्वराङ्गुलिमितं श्रेष्ठं रसैर्वा शरै-
र्मध्यं चाप्यधमं च निम्नमिह तन्मध्ये त्रिभागास्तृतम् ॥ १ ॥

विस्तारेण समं हि खातमपि तद् वृत्तं बहिर्मेखला-
स्तिस्रः स्युः कमलं तथैव परितस्तासां तु मध्ये भवेत् ।
कण्ठो गोलकविस्तृतोऽङ्गुलमितो दैर्घ्येण तच्चोर्ध्वतः
स्यादग्रं च शराङ्गुलायतमथो विस्तारतस्तत्समम् ॥ २ ॥

कण्ठे स्यादथ मध्यदेशसुषिरं तद्धै त्रिकोणं घृतं
निर्गच्छेद्धि यथायतं तदवटं यद्वत् कनिष्ठा विशेत् ।
तत्पृष्ठं कमलाङ्कितं खलु मुखं सर्वं गजोष्ठोपमं
शिष्टं वर्तुलदण्डमस्य तु भवेदग्रं सरोजाङ्कितम् ॥ ३ ॥

दण्डाग्रं परिणाहतः सरसिजस्याधो यथर्त्वङ्गुल
स्थूलोऽसौ क्रमशः प्रकोष्ठमिव तन्मूलं च वस्वङ्गुलम् ।
तत्र स्याद्वृषभोऽथवा सरसिजं श्लक्ष्णाकृतिः सर्वतो
निर्दोषाञ्छुभदेशजान् क्षितिरुहाञ्छित्त्वा स्रुचं कारयेत् ॥ ४ ॥

स्रुग्जातं तु भवेत् स्रुवं सुविहितं तालद्वयायामकं
कुर्याद् वर्तुलमङ्गुलेनं वदनं तस्यावटेऽर्धाङ्गुले ।
भित्तिर्मध्यगता स्मृता यवमिता तद्वर्तयोः श्लक्ष्णयोः
कर्षाज्यस्थितिगोष्पदाकृति च तत्पृष्ठे यवाभ्यां स्फिजौ ॥ ५ ॥

स्फिङ्मध्येन यवप्रमाणविहिता रेखा च वक्त्रादधः
कण्ठः पङ्कजलक्षणस्तु तदधो दण्डः सुवृत्तः समः।
दण्डाग्रं परिणाहतोऽङ्गुलमितं मूलं ततोऽध्यर्धतः
स्याद् गोपुच्छनिभं गलात् प्रभृति तद् स्थूलं हि मूलं यथा॥
बाहुमात्र्योऽरत्निमात्र्यो वा स्रुच इत्येके।

स्रुक्स्रुवाधिकारः।

छित्त्वा पिप्पलशाखिकामथ शमीगर्भांस्तथाश्वत्थतो
निर्दोषां(श्च) षडङ्गुलायतसमाञ्छित्त्वारणिं कारयेत्।
स्यान्नाहोऽस्य षडङ्गुलेन तु शिरो मूलेऽङ्घ्रिरग्रे स्मृतो
योनिर्मध्यगताङ्गुलैः श्रुतिमितैर्मन्थानयोग्या भवेत्॥ ७॥

अश्वत्थेन तथोत्तरारणिरपि स्यात् षड्भिरेवाङ्गुलैः
कुर्याद् आमकमस्य खादिरमृजुं नेत्रं च रज्जुं दृढाम्।
तत्राग्निं जनयेत् तथेन्धनमपि त्वग्वर्जितं सारवद्
भिन्नं शस्ततरूद्भवं ध(म)नमप्युक्तं पवित्रादिना॥ ८॥

अरणिविधिः।

वक्राः शीर्णदलाः कृशाः कृमिहता भिन्नास्त्वशस्ताहता
ह्रस्वाः स्थूलगतत्वचोऽप्युपहता दीर्घाग्निदग्धादयः।
वर्ज्याः स्युः समिधः शुचिस्थलभुवः शेषाः समं छेदिता
मध्यानामिकयोस्तु नाहसदृशाः शस्ताः कनिष्ठाधमाः॥ ९॥

इध्मोऽष्टादशभिः समिद्भिरुदितः प्रादेशमात्रोऽथवा
रत्न्यायामामितः क्वचित् परिधयो हस्तायताः स्युस्त्रयः।
दीर्घो दक्षिणतस्तु पश्चिमशयः स्थूलस्तनुर्ह्रस्वकः
सौम्ये कौशिकजाश्च वालककुशाः श्रेष्ठा हि दर्भाः क्रमात्॥१०॥

व्यग्रा हस्तनखाहृताः क्रिमिहताः कर्मान्तरायोजिता
याम्या व्याघ्रविलङ्घनाद्युपहता धूम्रोर्ध्वशुष्कादयः।

वर्ज्याः श्यामलकोमलाः प्रतिनवा लूनार्द्रशुष्कास्तथा
दर्भाः स्युर्यदिहाग्निकार्यपटले वेण्यादिकं चोच्यते ॥ ११ ॥

तत्र "त्रिंशद्दर्भकृता वेणिः। अष्टयत्यष्टिधृत्यतिधृतिसंख्या वा दर्भाः, परिस्तरणे पूर्वादितः स्युः। तत्त्वसंख्यादर्भैर्बद्धं कूर्चं ज्ञानखड्गः, द्वात्रिंशद्दर्भैरिति केचित्। दर्भद्वयेन सामान्यम्। दर्भपञ्चकेन विशेषकूर्चम्" इति संहितायाम्।

इध्माबर्हिषां विधिः।

स्थाल्याज्यस्य भवेच्छरावसदृशी विस्तारतोऽष्टाङ्गुला
विस्तारार्धसमुच्छ्रयापि च भवेन्नालं च वेदाङ्गुलम्।
विस्तारेण षडङ्गुलोच्छ्रितसमं पात्रं प्रणीताम्भसां
स्यादष्टाङ्गुलविस्तृतोच्छ्रयसमा नालान्विता प्रोक्षणी ॥ १२ ॥

अत्र पौष्करे—"सर्वत्र स्वर्णरजतताम्रमृन्मयानि पात्राण्युत्तममध्यमाधमफलानि भवन्ती"ति।

अष्टाभिः कुडुबैः प्रपूरितचरुः स्थाली स्मृतात्राधमा
मध्यार्कस्वरसंख्यकैः परिमिता स्यादुत्तमा ताम्रजा।
श्रेष्ठान्या त्वधमा त्रिसप्तकमिता दर्व्यङ्गुलानां भवेद्
दैर्घ्यात् सप्तशराङ्गुलैरिह शिरोवृत्तं तु पुच्छं द्वयात् ॥ १३ ॥
शाल्यः स्युः सितषष्टिकाश्च कलमा नीवारजास्तण्डुलाः
संशुद्धास्तुषशर्करादिरहिताः शुक्लाः प्रशस्ताश्चरोः।
श्रेष्ठं यत् स्वपशोर्घृतं नवमथ क्रीतं नवं मध्यमं
क्रीताज्यं यदनूतनं तदधमं गव्यं भवेद् गालितम् ॥ १४ ॥
क्षौद्रं गन्धरसाद्यदूषितमपि क्रीतं पुनर्गालितं
ग्राह्यं क्रीतसितोपलाद्यभिनवं खण्डं गुलं चैक्षवम्।
पूर्वं पूर्वमिह प्रशस्तमखिलं शुद्धं च शुक्लार्जितं
होमादेश्च तिलादिधान्यमखिलं प्रक्षाल्य संशोधितम् ॥ १५ ॥
यच्चान्यत् फलमूलकादि सुरसं ग्राह्यं विशुद्धं नवं
तत्राङ्गुष्ठमिताहुतिस्तु कथिता ह्यन्य(स्य? त्र) शाल्यादिषु।
स्यात् पञ्चाङ्गुलिभिर्घृतं द्रवरसेपूक्तं स्रुवा पूरितं
लाजानां खलु मुष्टिरेव कुसुमेष्वेकैकमब्जादिषु ॥ १६ ॥

वल्लीनां चतुरङ्गुलं कणतिले सक्तुष्वपि स्यान्मृगी
साङ्गुष्ठा खलु मध्यमाङ्गुलियुता नाम्ना मृगीसंज्ञिता।
गन्धानां चणकीमितं तु बदरीबीजोपमं गुग्गुलो-
र्भक्ष्याणां च महाफलादिषु भवेदक्षप्रमाणाहुतिः॥ १७॥

खर्जूरेङ्गुदगोस्तनीबदरिकाजम्बूफलानां तथा
पत्राणां पृथगेकमेकमुदिता पर्वैकमिक्षोरपि।
नानाभक्ष्यविमिश्रहोमविषये पञ्चाङ्गुलीभिर्धृतं
दूर्वाग्रत्रितयं तथैव समिधामेकैकमेवाहुतिः॥ १८॥

आहुतिप्रमाणम्।

स्याद् वर्धन्यपि पूर्णभारसलिला कुम्भश्च खार्यम्बुभृद्
द्रोणाम्भःपरिपूरितस्तु कलशः पू(र्णः? र्णा) शिवात् कर्करी।
पूर्णा स्याद् घटिकाढकेन कुडुबद्वन्द्वं शरावं स्मृतं
(सं)पूर्णः कुडुबेन वा प्रसरतः शङ्खश्च दीपस्तथा॥ १९॥

पात्रमानम्।

वक्ष्ये शुद्धिमपीह पात्रविषयां द्रव्यादिकानां तथा
यावद् गन्धविलेपनाद्यपगमस्तावज्जलैः क्षालयेत्।
चूर्णैरप्यवघर्षयेत् पुनरपि प्रक्षाल्य चोष्णैर्जलैः
पात्राणां भवतीह शुद्धिरधुना शुद्धिर्विशिष्टोच्यते॥ २०॥

सौवर्णं सलिलेन शुध्यति यथा लेपापनोदो भवेत्
पात्रं शुल्बमयं त्वथाम्लसलिलैस्तारोद्भवं गोमयात्।
कांस्यं भस्मजलैस्तथा मणिमयं सूर्यांशुभिर्वाम्भसा
मृत्पात्रं दहनेन चेदभिनवं तत्क्षणाद् दारवम्॥ २१॥

दाहादायसशुद्धिरेवमुदिता लोहानि तत्कर्तृभिः
स्पर्शाद् वा तुरगाननाभिगमनाच्छुध्यन्त्यनन्याहतौ।
शुद्धिश्चर्मसु रज्जुवस्त्रविषये चेत् क्षारवारिप्लवात्
स्याच्चालाबुकवैणवेऽम्बुपवनं गोवालकाघर्षणात्॥ २२॥

शुद्धिः सोदकभाजनेष्वपि भवेत् पर्यग्निकृत्वा तथा
धान्यानां फलदर्भमूलसमिधां सम्प्रोक्षणाधावनैः ।
कौशेयादिदुकूलपट्टवसनैर्यान्युष्ट्ररङ्काणि ता-
न्यम्भस्सेकविरागकाणि धवलैः शुध्यन्ति सिद्धार्थकैः ॥ २३ ॥

त्याज्यं दारववैणवादिकमथो भाण्डं तथा मार्त्तिकं
श्लेष्मोच्छिष्टमलादिदुष्टमथवा निर्माल्यसन्दूषितम् ।
स्नेहानामपि शुद्धिरप्युपहतिर्नो चेदभिद्योतना-
च्छुध्येताथ जलाशयादिषु निशास्वग्नेः शिखादर्शनात् ।। २४ ॥

गोभिर्वाध्युषिता निखानिततला कृष्टाथवा सूद्धृता
भूः शुध्येद् भवनादिकं च सलिलैः सद्गोमयालेपितम् ।
पुण्याहाद् द्विजभोजनेन च तथा चोल्लेखनाद् वा क्षितिः
शुध्येत् पातकिनाभिभाष्य वचसां शुद्धिर्द्विजाभाषणात् ॥ २५ ॥

प्राणायामैः शुध्यति देहः समनस्कः स्पृष्ट्वास्पृश्यानप्सु निमग्नः सहचेलः ।
जग्ध्वा यत् तद् वा क्षुतनिष्ठीवनजृम्भास्वाचम्यान्तेजातशुनामप्यवलोके ॥

निस्सार्याम्भः कूपजलादेर्महदम्भो वेगात् स्पृष्टं वांशुभिरंशोरिह शुध्येत् ।
अग्निः शुध्येन्मन्त्रवदम्भःपरिषेकात् प्रायश्चित्ताच्चाग्निमुखाद्धाहितवह्निः ॥

गन्धादीनां मन्त्रजलैः प्रोक्षणतः स्याच्छुद्धिः क्षीरान्नादिषु चाज्यं त्वभिघार्य ।
दर्भेणाभिद्योतनतोऽल्पा प्रहतिश्चेच्छिष्टानामप्येवमिवोह्या परिशुद्धिः ॥ २८ ॥

सामान्येन श्रैष्ठ्यगुणानामपि हेतुः कर्मद्रव्यस्वात्मसु शुद्धिर्मनसो या ।
शुद्धिः सा स्यात् यस्य तु रागाद्यविदुष्टा चेच्चत्वारोऽप्यस्य करस्थाः पुरुषार्थाः ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे
क्रियापादे सुक्स्रुवादिलक्षण-
पटलो नवमः ।

अथ दशमः पटलः ।

प्रस्तु(तैः ? ता) प्रथ(म)मा(वि ? गम)दीक्षा, षट्पदार्थपटले सविचारम् ।
सद्गुरुं तदधिकारविशेषैः सप्रभेदमपि तां कथयिष्ये ॥ १ ॥

दीयते यदनया शिवभावो दीक्षया हि पशवेऽत्र ददातेः ।
क्षीयतेऽस्य सह पाशपशुत्वं क्षिक्षयार्थपरिनिष्ठितधातोः ॥ २ ॥

वित्तनाथपथयायिनि सूर्ये वृद्धिमत्युडुपतौ शुभवारे ।
स्वर्क्षलग्नतिथियोगिनि कुर्यात् स्वानुकूलदिवसे खलु दीक्षाम् ॥ ३ ॥

शस्तसिन्धुतटदेवगृहादौ गोष्ठकेऽप्यथ मठे स्वगृहे वा ।
शोधिते भुवि सलक्षणमिष्टं मण्डपं च सुकृतं चतुरश्रम् ॥ ४ ॥

तस्य पूर्वदिशि पश्चिमतो वा शोभनेऽत्र भवने सुविविक्ते ।
रक्षणाय यजमानसमृद्ध्यै मङ्गलाङ्कुरविरोपणमिष्टम् ॥ ५ ॥

उत्सवेषु विविधेष्वपि दीक्षास्थापनादिषु पवित्रविधौ च ।
मङ्गलाङ्कुरविरोपणपूर्वं मङ्गलं भवति कर्म कृतं तत् ॥ ६ ॥

शस्तयागदिवसात् तु पुरस्तात् सप्तमेऽहनि शुभे नवमे वा ।
पञ्चमेऽपि सुदिने सुमुहूर्ते मङ्गलाङ्कुरविधिं विदधीत ॥ ७ ॥

पात्रमत्र विहितं त्रिविधं तत् पालिका च घटिका च शरावम् ।
विष्णुपद्मभवशङ्करदैवं तत्त्रयं पृथगनुक्रमशः स्यात् ॥ ८ ॥

अङ्गुलानि खलु विंशतिरुच्चैः पालिका वदनविस्तरतोऽपि ।
उत्तमाष्टजगतीपरिसंख्ये मध्यमाधमविधौ कथिते द्वे ॥ ९ ॥

पादविस्तृतिरतोऽर्धमिता स्यात् तत्त्रिभागमितकण्ठबिलं च ।
दण्डवद्भवति शिष्टमशेषं कण्ठतुल्यपरिणाहमनोज्ञम् ॥ १० ॥

उच्चविस्तरसमा घटिकाख्या तालमात्रमिह पञ्चमुखी स्यात् ।
दिक्षु तन्मुखचतुष्टयमेकं मध्यतस्तु समवर्तितभागम् ॥ ११ ॥

तालविस्तृतमुखं तु शरावं तत्समोच्छ्रितमतोऽर्धमिताङ्घ्रि ।
दण्डमस्य चतुरङ्गुलनाभं कण्ठमस्य बिलवर्ज्यमुदग्रम् ॥ १२ ॥

सम्भवे कनकरूप्यकताम्रैर्मार्त्तिकान्यभिनवान्यथवा स्युः ।
क्षालितानि सलिलेन शिवास्त्रात् सूत्रवेष्टितगलानि निदध्यात् ॥ १३ ॥

शुद्धमृत्सिकतगोमयचूर्णैः पूरितानि कुशकूर्चयुतानि ।
मङ्गलाङ्कुरगृहे सविताने पात्रकाणि विदधातु मनोज्ञे ॥ १४ ॥

गोमयाद्भिरुपलिप्य तु भूमिं स्वाङ्गमूलमनुयुक्तजलास्त्रात् ।
प्रोक्ष्य पिष्टपरिरूषितसूत्रैरुक्तलक्ष्मविहिते चतुरश्रे ॥ १५ ॥

विघ्नराजमभिपूज्य पुरस्तात् पुण्यकाहमपि वेदविशिष्टैः ।
वाचयेदधिकमेकमशीतेः स्युः पदानि कथिते चतुरश्रे ॥ १६ ॥

मध्यतो नवपदैरथ शुक्लं कर्णिकाष्टदलकेसरशोभि ।
आलिखेत् सरसिजं तु रजोभिः शालिभिः सुविहितोच्छ्रितमध्यम् ॥ १७ ॥

तत्र सूत्रविनिवेष्टितकुम्भं धूपितं तु विनिधाय कुशेषु ।
द्वादशान्तगलितामृततोयैः पूरयेत् सकुशकूर्चहिरण्यम् ॥ १८ ॥

पिप्पलाम्रनवपल्लवगन्धैर्माल्यदामकुसुमाक्षतवक्त्रम् ।
शालितण्डुलफलाढ्यविधानं वस्त्रयुग्मकुसुमैरभिरामम् ॥ १९ ॥

मातृकाम्बुजगतं तु कलाभिः षोडशस्वरयुताभिरुपेतम् ।
तं विभाव्य शिशिरांशुमुदंशुं स्वौषधीशमुडुचक्रसमेतम् ॥ २० ॥

पूजयेत् तदुपचारविशेषैः पायसं च सघृतं विनिवेद्य ।
शोभितेषु रजसाथ पदेषु स्थापयेत् तु पृथगङ्कुरपात्रम् ॥ २१ ॥

आदित्ये समरीचे च विवस्वाति यमे तथा ।
जलाधिपे च मित्रे च सोमे च पृथिवीधरे ॥ २२ ॥

एषां पदेषु घटिकाः स्थापयेदष्ट वै क्रमात् ।
अग्नौ पूषणि पित्राख्ये दौवारे रोगनागयोः ॥ २३ ॥

अदितावपि चेशाने शरावाण्यभिविन्यसेत् ।
एषां मध्यपदेष्वष्टौ दिग्विदिक्क्रमयोगतः ॥ २४ ॥

स्थानानि पालिकानां तु कथितान्येषु विन्यसेत् ।
पदान्यादौ विलिख्यैषु शुक्लचूर्णेन पूरयेत् ॥ २५ ॥

पृथक्छाल्याढके क्षिप्त्वा दर्भविष्टरके पृथक् ।
संस्थाप्य घटिकादीनि तेषु बीजानि वापयेत् ॥ २६ ॥

माषमुद्गकुलस्थानि निष्पावतिलशालयः ।
सर्षपा मार्गगोधूमश्यामाकव्रीहयो यवाः ॥ २७ ॥
प्रियङ्गवस्तथाढक्यो वेणवश्चेत्यनुक्रमात् ।
त्रिपञ्चवर्गबीजानि कथितान्युत्तमाङ्कुरे ॥ २८ ॥
वर्गद्वयं मध्यमे स्यादधमे बीजपञ्चकम् ।
बीजानि क्षालयित्वाद्भिः क्षीरेण तदनन्तरम् ॥ २९ ॥
वस्त्रखण्डे दृढं बद्ध्वा दिनमात्रं जले स्थितम् ।
उद्धृत्य यामद्वितये समतीते तु वापयेत् ॥ ३० ॥
बीजानां दैवतं सोमः स रात्रौ कान्तिमान् यतः ।
तस्माद् बुभुक्षुर्बीजानि निशायामेव वापयेत् ॥ ३१ ॥
अभिमन्त्र्य हृदा पूर्वं मन्त्रेणानेन वापयेत् ।
ओं त्र्यम्बकाय शर्वाय शङ्कराय शिवाय च ॥ ३२ ॥
सर्वलोकप्रधानाय शाश्वताय नमो नमः ।
अनेनैव तु मन्त्रेण सिञ्चेद्धारिद्रवारिणा ॥ ३३ ॥
पञ्चोपचारेणाभ्यर्च्य चाच्छाद्य वसनैः सितैः ।
सप्तरात्रं बलिं दद्याद् वक्ष्यमाणक्रमेण तु ॥ ३४ ॥
ब्रह्मभूतेन्द्रगन्धर्वयक्षरक्षःपिशाचकाः ।
गणा बलिभुजः सप्त क्रमात् तन्नामलक्षिताः ॥ ३५ ॥
सान्नपुष्पकुशं ब्रह्मरात्रे तु प्रथमे बलिः ।
अन्नं दधि निशाचूर्णं लाजसक्तुतिलान्वितम् ॥ ३६ ॥
भूतक्रूरमिति ख्यातं भूतरात्रे प्रदापयेत् ।
इन्द्रवल्लीरसोन्मिश्रमन्नं सक्तुपयोदधि ॥ ३७ ॥
इन्द्ररात्रे तृतीये तु बलिं दद्यात् तु देशिकः ।
वैणवान्नं पयोयुक्तं गान्धर्वे स्याच्चतुर्थके ॥ ३८ ॥
पञ्चमे यक्षरात्राख्ये पुष्पान्नाज्याम्बुभिर्बलिः ।
रक्तान्नं सतुषं मृत्स्नायुक्तं षष्ठे तु राक्षसे ॥ ३९ ॥

सप्तमे त्वथ पैशाचे माषान्नं कृसरं मधु ।
हारिद्रचूर्णं तैलाढ्यं सामिषं तु प्रदापयेत् ॥ ४० ॥

अन्यथा केचिदाचार्याः प्राहुर्वै गणसप्तकम् ।
तच्चात्र कथ्यते भूताः पितरोऽपि च गुह्यकाः ॥ ४१ ॥

नागा ब्रह्मा शिवो विष्णुर्देवताः सप्तरात्रिषु ।
प्रणवादिनमोन्तैः स्वैर्नामभिर्दापयेद् बलिम् ॥ ४२ ॥

प्रथमे भूतरात्रे तु भूतकूरेण दापयेत् ।
तिलैस्तण्डुलमिश्रैस्तु पितृरात्रे द्वितयिके॥ ४३ ॥

तृतीये नालिकेराम्भःशाल्यन्नैर्यक्षरात्रके ।
सक्षीरपिष्टसक्त्वद्भिर्नागरात्रे चतुर्थके ॥ ४४ ॥
सपद्माक्षान्नमाज्यं च ब्रह्मरात्रे तु पञ्चमे ।
सापूपान्नेन साज्येन षष्ठे शैवे तु दापयेद् ॥ ४५ ॥
गुलौदनेन साज्येन सप्तमे वैष्णवे बलिः ।
यदा नव स्युर्दिवसाः पायसं कृसरं क्रमात् ॥ ४६ ॥
उद्दिष्टदैवतगणमुद्दिष्टबलिनार्चयेत् ।
न कश्चिदङ्कुराण्यन्यो निरीक्षेत कदाचन ॥ ४७ ॥

आचार्य एव प्रविशेत् तच्छिष्यो वा तदाज्ञया ।
आरूढैरङ्कुरैः कर्तुर्निर्दिशेत् तु शुभाशुभम् ॥ ४८ ॥

श्यामैः कृष्णैरङ्कुरैरर्थहानिं तिर्यग्रूढैर्व्याधिमालोहितैश्च ।
कुब्जैर्दुःखं (तत्प्र ? त्वप्र)रूढैर्मृतिं च ब्रूयाद् भग्नैः स्थानदेशेष्टहानिम् ॥

शुक्लैः पीतैः सम्प्ररूढैः सुपूर्णैः शीघ्रोत्पन्नैश्चारुभिर्व्यायतैश्च ।
लक्ष्मीं पुष्टिं चेष्टसिद्धिं समग्रां कर्ता विन्देदङ्कुरैर्मङ्गलं च ॥ ५० ॥

आचार्यस्तत्राङ्कुरेष्वप्रशस्तेष्वालक्ष्यास्मिन् शान्तिकं कर्म कुर्यात् ।
मूलेनाङ्गैर्ब्रह्मभिश्चाथ हुत्वा व्याहृत्यन्तं शोभनं स्यात् तिलैश्च ॥ ५१ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
अङ्कुरार्पणपटलो दशमः ।

अथैकादशः पटलः ।

दीक्षाभिषेकेष्वथ देशिकेन्द्रः प्राक्प्रस्तुतं शोभनकालमिष्टम् ।
ईक्षेत शिष्यस्य गुरोश्च यस्मिन् देशे च कालेऽभ्युदयो यथा स्यात् ॥ १ ॥

मुख्यो वसन्तः शिशिरस्तु मध्यो ग्रीष्मः कनिष्ठोऽभिमतोऽत्र शुक्लः ।
पक्षः सितज्ञेन्दुसुरे (ज्य) वाराः शस्तास्तु वर्ज्या हि कुहूश्च रिक्ता ॥ २ ॥

तिष्यप्रजेशादितिसोमविष्णुब्रह्मेन्द्रपूषानिलनैर्ऋतानि ।
मैत्रोत्तराश्चेत्युदितान्युडूनां दीक्षाभिषेकेष्वनवग्रहाणि ॥ ३ ॥

ज्योतिर्विदां चाभिमतं यदन्यल्लग्नादिकं शस्तमनिष्टहीनम् ।
निश्चित्य कालं गुरुरत्र शिष्यान् सन्दीक्षयेत् तानाधिकारियुक्त्या ॥ ४ ॥

विशिष्टदेशे च कुले प्रसूतः स्यादग्रजन्मा श्रुतवान् सुशीलः ।
शुचिः सुधीः शोभनलक्षणाङ्गः सौम्यस्तथाचार्यपदाधिकारी ॥ ५ ॥

सत्यव्रतः शमदमार्जवधर्मनिष्ठः
साष्टाङ्गयोगनिरतः शिवशास्त्रविद् यः ।
भक्त्या शिवेऽष्टविधया समलङ्कृतश्च
त्यागी सदैव करुणानिलयो गुरुः स्यात् ॥ ६ ॥

धीरः कृतज्ञः कुलशीलयुक्तो भक्तः शिवे चापि गुरौ विनीतः ।
शुश्रूषुरत्यर्थमभीष्टदाता शिष्योऽप्यलोभादिगुणान्वितः स्यात् ॥ ७ ॥

श्रुतशीलसमाचारश्रैष्ठ्यसामर्थ्यभक्तिभिः ।
गरीयाननुगृह्णाति योऽन्यान् स गुरुरिष्यते ॥ ८ ॥

तन्त्रचोदितदेशेषु जातो यस्तपसा चरन् ।
ज्ञानेन देशिकः स स्याच्छ्रेयोऽन्येषां च दर्शयन् ॥ ९ ॥

देशेन चरतीति देशिकः ।

देशेन जात्या वृत्तेन यः शिष्टो गुरुसंश्रयः ।
विशेषयिष्यन् स्वात्मानं स गुणैः शिष्य उच्यते ॥ १० ॥

शासुरनुशिष्टावित्यस्माद्धातोः क्वापि तु रूपम् ।

"आगस्त्यहिमवद्भूभृदन्तरालव्यवस्थिताः ।
ककाराष्टकनिर्मुक्ता देशा देशिकसम्मताः ॥"

इत्यादि माहेन्द्रे ।

"कुमारीहिमवन्मध्ये स्वतः कृष्णमृगान्विते ।
(देशे)जातस्तु यो विद्वानाचार्यत्वं द्विजोऽर्हति ।।"

इति वीरे ।

"आर्यावर्तोद्भवोऽन्यो वा ककाराष्टकवर्जितः ।
कुलीनो निपुणो दक्षो विनीतः प्रियदर्शनः ।।
शैवसिद्धान्ततत्त्वज्ञः प्रतिष्ठातन्त्रपारगः ।"

इति प्रतिष्ठासमुच्चये । अत्र योगशिवपद्धतौ—

"मध्यदेशे कुरुक्षेत्रलाटोज्जयिनिसम्भवाः ।।
अन्तर्वेदिप्रतिष्ठाना आव्रन्त्याश्च गुरूत्तमाः ।
गौडाः सुह्मोद्भवास्तैरा मागधाः केरलास्तथा ।।
कोसलाश्च दशार्णाश्च गुरवः सप्त मध्यमाः ।
कर्णाटकमहाराष्ट्रकच्छनीरोद्भवास्तथा ।।
कालिङ्गाश्चैव लाम्बाकाः काम्बोजाश्चाधमाः स्मृताः ।
काञ्चीकाश्मीरसौराष्ट्रपाण्ड्यान्यविषयोद्भवाः ।।
कावेरीकोङ्कणोद्भूता निन्दिता गुरवः स्मृताः ।
कुण्डादयश्च रोगार्ता निन्द्याः स्युर्देशजा अपि ।।
भ्रष्टव्रताच्च पतितादुत्पन्नो यो नराधमः ।
अस्माङ्कुराह्वयौ त्याज्यौ निन्दितौ सर्वकर्मसु ।।
अन्यलिङ्गी तु तत् त्यक्त्वा पुनः शैवे तु दीक्षितः ।
सोऽपि निन्द्यः प्रतिष्ठादौ देशिकत्वं च नार्हति ।।
शैवदीक्षामनासाद्य शास्त्रमात्रप्रपाठकः ।
स्वयम्भूर्नाम निन्द्योऽसौ शैवकर्मसु गर्हितः ।।
सन्न्यासिनोऽङ्गहीनाश्च विरूपा मठभोजनाः ।
+ + + श्चैव कुब्जाद्या नास्तिकाश्चैव निन्दिताः ।।
कर्णाटककलिङ्गाख्यकच्छकाश्मीरवासिनः ।
कोङ्कणाः करहाटाश्च काम्बोजाः कामरूपिणः ।।

ककाराष्टकसंज्ञास्ते देशा देशिकवर्जिताः ।

एते कीकटा इत्येके" इति विजये ।

"क्रूरोऽल्पविद्यो व्यसनी कृतघ्नो डम्भः पुनर्भूर्गुरुभक्तिहीनः ।
मात्सर्ययुक्तो विषयी क्रियासु वर्ज्यः प्रतिष्ठादिषु तार्किकश्च ॥"

इति मञ्जर्याम् । "सन्न्यासी नास्तिकोऽम्बष्ठः" इत्यादिश्लोकैर्देव्या मते गुरुत्वानर्हाः कथिताः ।

"अथाचार्यः समः श्रीमानग्रजन्मा सुपेशलः"

इत्यादि स्वायम्भुवे । अग्रजन्मा तु ब्राह्मण एव, ब्रह्मणः प्रथमजातत्वात् ।

"देशज(न्म)श्रुताकारवृत्तशीलगुणान्वितः ।
सत्त्वप्रभावसम्पन्नो गुरुर्यो गुरुणा कृतः ॥"

इत्यादि ब्रह्मशम्भुः ।

"इत्थं यथाधिकारेण दीक्षाचार्येण साध्यते ।
स च सद्देशसम्भूतः सुमूर्तिः श्रुतशीलवान् ॥"

इत्यादि सोमशम्भुः ।

"दृष्टकर्मा शुचिर्दक्षः शिष्यानुग्रहतत्परः ।
शिवसद्भावविद् विद्वानात्मविद् देशिकोत्तमः ॥"

इति मतङ्गे । "इत्थं भूतादिदीक्षा लब्धाचार्येण क्रियते । स त्वार्यावर्तादिदेशसम्भूतः श्रुतशीलगुणाचारसम्पन्नः शुद्धाशयः स्यादि"ति भोजराजः । "श्रेष्ठो देशकुलाशयैर्विनयवान् वाग्मी कुलीनः" इत्यादि प्रयोगमञ्जर्याम् ।

"आचार्यः शिवशास्त्रज्ञः शस्तदेशसमुद्भवः ।
ब्रह्मचारी गृहस्थो वा शिवभक्तिपरायणः ॥
यजमानानुकूलर्क्षजन्मा देशिक उच्यते" ।

इति देव्या मते ।

"सर्वलक्षणयुक्तेन गुरुणा दीक्षितो नृपः ।
सर्वान् कामानवाप्नोति परत्र च शिवां गतिम् ॥

जटी मुण्डी शिखी वापि शस्तदेशसमुद्भवः ।
शिवशास्त्रार्थतत्त्वज्ञः श्रुतवृत्तान्वितो द्विजः ॥

शिवमेवाश्रितो नित्यं वाङ्मनःकायकर्मभिः ।
आचार्यः स इहोद्दिष्टः शिवदीक्षादिकर्मसु ॥"

इत्यजिते ।

"अनूचानः प्रसन्नात्मा शिवदीक्षाभिषेचितः ।
शिवागमज्ञो मतिमान् शिवपूजापरायणः ॥

रुद्राक्षमालां बिभ्राणस्त्रिपुण्ड्राङ्कितविग्रहः ।
विशुद्धदेशकुलजः शीलाचारसमन्वितः ॥

वेदशास्त्रार्थतत्त्वज्ञो ज्ञानवान् गुरुरुच्यते ।"

इति सान्तानिके ।

"कृष्णवर्णो मृगो यस्मिंश्चरतीह स्वभावतः ।
तं देशं यज्ञियं विद्याद् यश्च विप्रैराधिष्ठितः ॥

तद्देशकालसम्भूतस्त्वाचार्यः शास्त्रसम्मतः ।"

इति सर्वज्ञानोत्तरे ।

"शुभदेशोद्भवः श्रीमान् पदवाक्यप्रमाणवित् ॥
शिवशास्त्रार्थसन्तुष्टः सर्वत्र करुणानिधिः ।
चीर्णाचार्यव्रतो मन्त्री प्रसन्नहृदयाननः ॥

लिङ्गादिलक्षणज्ञाननिपुणः कर्मसन्ततौ ।
अहीनसन्ततिर्यस्तु ब्रह्मचारी गृही तथा ॥

सान्तानिको गृही श्रेष्ठः समयाचारपालकः ।
भौतिको ब्रह्मचारी यः पुरा पश्चाद् गृही भवेत् ॥
स भौतिको गृहस्थः स्यात् तज्ज्ञैराचार्य उच्यते ।
सोऽपि श्रेष्ठः तत्सुतश्च भवेत् सान्तानिको गुरुः ॥

देवताव्याप्तितत्त्वज्ञः षड्विधाध्वविशारदः ।
शुभाशुभनिमित्तज्ञोऽप्यथवा विस्तरेण किम् ॥

सम्यग्जातिः परिज्ञानं वृत्तं चाद्यास्त्रयो गुणाः ।
यस्यैते स गुरुः श्रेष्ठः सर्वकामफलप्रदः ॥”

इति प्रतिष्ठापद्धतौ ।

“पूर्णविद्याव्रतो मन्त्री ज्ञानवान् सुसमाहितः ।
ब्रह्मनिष्ठो यतिः ख्यातो गुरुः स्याद् भौतिकोऽपि वा ॥”

इति मोहशूरोत्तरे ।

“द्रष्टव्यं गुरुणा नित्यं विप्रवृत्त्यनुसारिणा ।
य एवं वर्तते वन्द्यो ब्रह्मवित् स गुरुर्द्विज ! ॥”

इत्यादि पराख्ये ।

“शुभजातिं सुवृत्तस्थं शुभदेशसमुद्भवम् ।
क्रियाकाण्डरतं शान्तं धार्मिकं गुरुवत्सलम् ॥

प्रतिपन्नजनानन्दं शौचोपेतं दृढव्रतम् ।
विद्ययाभयदातारं लौल्यचापलवर्जितम् ॥

एवंविधं गुरुं प्राप्य को न मुच्येत बन्धनात् ।”

इति वातुलोत्तरे । “धार्मिकः सत्यवादी”त्यादि सर्वज्ञानसमुद्रे ।

“सर्वलक्षणहीनोऽपि ज्ञानवान् गुरुरिष्यते ।
ज्ञानं च तत्त्वविज्ञानं षडध्वज्ञानसंश्रयम् ॥”

इत्यादि पौष्करे ।

“ब्राह्मणाः क्षत्रिया वैश्या विशुद्धाः साधकाः स्मृताः ।
स्ववर्णादानुपूर्व्येण स्युराचार्याः षडानन ! ॥”

इति बृहत्कालोत्तरे ।

किमर्थं बहुनोक्तेन ग्रन्थगौरवकारिणा ।
इत्थमागमवाक्यानां बाहुल्याद् विप्र एव हि ॥ ११ ॥

दीक्षितश्चोदितैर्युक्तो गुणैः सौम्यः प्रियंवदः ।
योग्यो नृपगुरुत्वे स्यादन्येषां च न संशयः ॥ १२ ॥

कुलशीलसमाचारैः संयुक्तो गुरुवत्सलः ।
गुरोरधीततन्त्रश्च पूतः साधकदीक्षया ॥ १३ ॥
संसाधयति यो मन्त्रान् दृढभक्तिः स साधकः ।
मत्वासारं च संसारं मानुष्यं जन्म दुर्लभम् ॥ १४ ॥
उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
इहामुत्रार्थभोगानां प्राप्तये चापि मुक्तये ॥ १५ ॥
उपायः सुकरोऽस्त्यन्यो नहि मुख्यः शिवाश्रयात् ।
द्विजानामनुपेतानां स्वकर्माध्ययनादिषु ॥ १६ ॥
यथाधिकारो नास्तीह स्याच्चोपनयनादनु ।
तथा ह्यदीक्षितानां तु तन्त्रमन्त्रार्चनादिषु ॥ १७ ॥
नाधिकारोऽस्त्यतः कुर्यादात्मानं शिवसंस्कृतम् ।

तथाहि —

नारुद्रः संस्मरेद् रुद्रं नारुद्रो रुद्रमर्चयेत् ॥ १८ ॥
नारुद्रः कीर्तयेद् रुद्रं नारुद्रो रुद्रमाप्नुयात् ।
शिवव्रत गृहीत्वा तु प्रत्यहं पालयेत् सुधीः ॥ १९ ॥

तद्यथा —

"वरं हि शिरसश्छेदो वरं हि मरणं मम ।
न त्वनभ्यर्च्य भुञ्जी(यां ? य) भगवन्तं त्रिलोचनम् ॥
न शिवार्चनतुल्योऽस्ति धर्मोऽत्र भुवनत्रये ।
इति विज्ञाय यत्नेन पूजनीयः सदाशिवः ॥"

इति शिवधर्मे —

अतः समयिभिश्चैव साधकैर्गुरुभिस्तथा ।
प्रत्यहं यत्नमास्थाय पूजनीयः सदाशिवः ॥ २० ॥

अत्र पतञ्जलिराह —

"यदृच्छयाप्येकमपेतगन्धं त्वत्पादपद्मे कुसुमं निधाय ।
बहूनि कामं बहुरूप! भुङ्क्ते फलान्यहो स्वादुतराणि लोके ॥"

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
साधकाचार्यलक्षण एकादशः पटलः ।

अथ द्वादशः पटलः ।

अत्र ब्रूमः परिवारोचितानां मूर्तीश्चान्यत् सकलं दैवतानाम् ।
यद् विज्ञेयं यजनादौ विशेषाद् येनापि स्यात् फलसिद्धिः समग्रा ॥१॥

इष्ट्वा सूर्यं प्रथमं विघ्नशान्त्यै विघ्नाधीशं तद + + गुरुं च ।
शम्भोः पूजां विदधीताग्निकार्यं कृत्वा सम्यक् परिवाराश्च पूज्याः ॥ २ ॥

सूर्यार्चायामथ तद्द्वारपालो दण्डी खड्गं विदधद् दक्षिणस्थः ।
खड्गी वामे कपिशः पिङ्गलाख्यो रक्ताकल्पावपि तौ चण्डवेषौ ॥ ३ ॥

विघ्नान् निघ्नन् द्विरदास्योऽरुणाङ्गो रक्ताकल्पः शशिमौलिस्त्रिनेत्रः ।
पूज्यो नित्यं द्विभुजो दक्षिणस्थः शु ाकल्पः स्वगुरुश्चेशकोणे ॥ ४ ॥

प्रभूतासनं नाम हिरण्मयं चतुरश्रपीठं कृतादिचतुर्युगैः सितरक्तपीतकृष्णवर्णसिंहाकृतिभिर्विमलादिनामभिश्चतुष्पादैर्विधृतं तन्मध्यवर्तुलारुणाबिम्बोपरि विकसिताष्टदलं सूर्यपद्मासनं विचिन्त्य तस्याग्न्यादिकोणदलेषु हृदयाद्यङ्गानि दिग्दलेष्वस्त्रं पुरतो नेत्रं च रक्तवर्णानि स्त्रीवेषाणि कृताञ्जलीनि पूजयेत्

रक्ताकल्पा ललिताङ्ग्यः सुवेषाः सिन्दूराभा नव याः शक्तयस्ताः ।
पत्राग्रस्था नवमी कर्णिकायां दीप्ताद्यास्तु द्विभुजा वन्दनीभिः ॥ ५ ॥

तत्पद्मकर्णिकामध्यावस्थितं भगवन्तं भास्करमुभयपार्श्वस्थितप्रभा(सन्ध्या?)संज्ञाभ्यां देवीभ्यां सहितं ध्यात्वावाहनादिभिरभ्यर्चयेत् ।

बन्धूकाभं सुकुमारं सुवेषं दिव्याकारं द्विभुजं पद्महस्तम् ।
रक्ताकल्पं कमलाताम्रनेत्रं वेदात्मानं विलसद्रुक्मदेहम् ॥ ६ ॥

दिव्यैर्मणिकुण्डलाङ्गदकटकहारादिभिराभरणैर्विभूषितं प्रसन्नवदनं भानुमालिनं देवं ध्यायेत् ।

शुक्लाकल्पं विकसत्पद्महस्तं प्रालेयांशुं द्विभुजं हारगौरम् ।
कम्राकारं कमलाक्षं प्रसन्नं चन्द्रं ध्यायेद् धवलाश्वाधिरूढम् ॥ ७ ॥

ऐशान्यां तेजश्चण्डं रक्तं रक्ताम्बरादिभिराभूषितं शूलहस्तं ध्यायेत् ।

अथवा —

श्वेतः श्वेताम्बराकल्पो द्विभुजस्तु गदाधरः ।
दशाश्वरथमारूढश्चन्द्रो ध्येयो वरप्रदः ॥ ८ ॥

रक्ताकल्पो वरदं शक्ति शू(ले दोर्भि)र्बिभ्रद् युगसंख्यैर्गदां च ।
मेषारूढो ललिताङ्गः सुवेषो बन्धूकाभो भगवान् भूमिजः स्यात् ॥ ९ ॥
पीताकल्पो वरदं चापि खड्गं दोर्भिश्चर्माप्यथ बिभ्रद् गदां च ।
दिव्याकारो मकुटी भूषिताङ्गः सिंहारूढः शशिजः पीतवर्णः ॥ १० ॥
पीताकल्पो धिषणः पीतवर्णो दण्डाक्षस्रग्वरदान् कुण्डिकां च ।
दोर्भिर्बिभ्रत् कनकस्यन्दनस्थः स्यादुष्णीषी मणिभिर्भूषिताङ्गः ॥ ११ ॥
श्वेताकल्पो भगवान् हारगौरो दण्डाक्षस्रग्वरदान् कुण्डिकां च ।
दोर्भिर्बिभ्रद् रजतस्यन्दनस्थः स्यादुष्णीषी भृगुजो भूषिताङ्गः ॥ १२ ॥
नीलाकल्पो धृतशूलोऽञ्जनाभः प्रासं बिभ्रद् वरदं चेषुचापे ।
गृध्रारूढः स्वरथे भूषिताङ्गो ध्येयो मन्दो भगवानर्चनादौ ॥ १३ ॥
कृष्णाकल्पः स्फुटभिन्नाञ्जनाभः शूली खड्गी धृतचर्माम्बराढ्यः ।
ध्वान्ताकारः सितदंष्ट्रोत्कटास्यो राहुर्नीलैर्हरिवीरै रथे स्यात् ॥ १४ ॥
धूम्राकल्पा द्विभुजाः स्पष्टदंष्ट्रा धूम्राभासाः सगदास्ते वराढ्याः ।
रौद्राकाराः खलु गृध्रासनस्था ध्येया नैका रथिनः केतवः स्युः ॥ १५ ॥

सर्वे ग्रहाः किरीटादिभिर्भूषणैर्विभूषिता युवानो लोकयात्राप्रवर्तका भोगैश्वर्यवरप्रदा ध्येयाः स्युः ।

सूर्यपूजामूर्तयः ।

प्रासादं यच्छिवशक्त्यात्मकं तच्छक्त्यन्तैः स्याद् वसुधाद्यैस्तु तत्त्वैः ।
शैवी मूर्तिः खलु देवालयाख्येत्यस्माद् ध्येया प्रथमं चाभिपूज्या ॥ १६ ॥
शान्तिद्वारं प्रथमं पूर्वतः स्याद् विद्या याम्ये त्वथ पश्चान्निवृत्तिः ।
कौबेरं यत् तदपि स्यात् प्रतिष्ठा शान्तिद्वारं खलु नित्येषु शस्तम् ॥ १७ ॥
मातङ्गास्यो धवलः पङ्कजस्थो द्वारे दन्ती सृणिपाशेक्षुहस्तः ।
ध्येयस्तुन्दी मकुटी दक्षिणे स्याद् रक्ताकल्पः शशिमौलिस्त्रिनेत्रः ॥ १८ ॥
तद्वद् वाणी स्फटिकेन्दुप्रकाशा मुद्राक्षस्रक्कलशग्रन्थपाणिः ।
शुभ्राकल्पा शशिमौलिस्त्रिनेत्रा वामे ध्येया सितपद्मोपविष्टा ॥ १९ ॥

नन्दीशमहाकालौ द्वारपालावरणे वक्ष्येते ।

गङ्गा तुङ्गस्वतरङ्गाच्छवर्णा दिव्याकारा युवतिर्दक्षिणे स्यात् ।
गौराकल्पा द्विभुजाम्भोजहस्ता वन्द(न्योऽन्या)न्यस्फुटवामैकपाणिः ॥ २० ॥

कालिन्दी स्यान्निजकल्लोलनीला लोलापाङ्गा युवतिर्दिव्यरूपा ।
वामे त्वब्जं दधती वामपाणावन्येनार्धं धृतवन्दन्यमुद्रा ॥ २१ ॥

नाराचास्त्रं तनुविद्युत्प्रकाशं देहल्यां च स्थितमग्न्यर्ककल्पम् ।
वास्त्वीशः स्यादसुरोऽधोमु(खा?खो)ऽङ्गान्याकीर्यैशे कृतशीर्षः शयानः ॥ २२॥

तत्र वास्तुपुरु(षो)ऽधोमुखः प्रसारितपाणिपादो भूमौ शयानो ह्यसुरः। वास्त्वधिपतिर्ब्रह्मा परतो ज्ञेयः ।

आधाराख्या धवला शक्तिरुक्ता ज्योत्स्नाप्रख्या गगनाभा सुरूपा ।
लोकान् सर्वान् परमेशेच्छया या धत्ते नित्यं प्रथमं तेन पूज्या ॥ २३ ॥

द्वात्रिंशद्भिः खलु तत्त्वैर्धराद्यैर्विधान्तैस्तैर्महितं विष्णुतेजः ।
आनन्तं तत् कथितं ह्यासनं स्यात् पीठाकारः स तु नागो ह्यनन्तः ॥ २४ ॥

धर्मं रक्तं वृषरूपं तु सिंहं ज्ञानं श्यामं त्वथ भूतं तु पीतम् ।
वैराग्यं स्याद् गजरूपं सिताङ्गं चैश्वर्यं च क्रमशः पीठपादाः ॥ २५ ॥

सितकाश्मीरतालालिवर्णान् सिंहाकृतीनित्यन्ये ।
पीठस्येषाः स्युरधर्मादयो ये चत्वारस्ते कनकाकाररम्याः ।

"ईषाश्चाधर्मामि"त्यादि मञ्जर्याम् ।

पद्मं शुक्लं विततष्टच्छदं स्यात् किञ्जल्काल्या रुचिरं कर्णिकाढ्यम् ॥ २६ ॥

सौरे बिम्बे चतुरास्यः किरीटी हंसारूढः कलशं चाक्षमालाम् ।
ब्रह्मा बिभ्रद् वरदं चाभयाख्यं हस्तैर्ध्येयः सितवक्त्रश्चतुर्भिः ॥ २७ ॥

सौम्ये बिम्बे गरुडे मेघनीलश्चक्रं शङ्खं गदयाब्जं दधानः ।
हारी माली कटकी सत्किरीटी विष्णुः पीतं वसनं कौस्तुभं च ॥ २८ ॥

अग्नेर्बिम्बे वृषभे चन्द्रमौलिः श्वेतो रुद्रो दशबाहुस्त्रिनेत्रः ।
टङ्कैणाग्नित्रिशिखाहींश्च बिभ्रद् वज्राक्षस्रग्वरदाभीतिपाणिः ॥ २९ ॥

एतेऽत्र पत्रकेसरकर्णिकाव्यापित्वेन ध्येयाः । यथा वातुले —

"ब्रह्मा विष्णुश्च रुद्रश्च सूर्येन्द्वनलबिम्ब(पाः ? गाः) ।
ईश्वरस्तत्र च व्यापी तस्मात् पूज्यः सदाशिवः॥"

इति । ब्रह्मविष्णुरुद्रान् मण्डलव्यापित्वेन पत्रकेसरकर्णिकासु तद्व्यापिनमीश्वरं चार्चयेदिति । सदाशिवदेवस्यासनत्वेन चतुर्णामप्यधिकारः । अत्राह वरुणः—

"अष्टबाहुश्चतुर्वक्त्रः स्फटिकाभस्त्रिलोचनः ।
नागयज्ञोपवीती च विज्ञेयो ध्रुव ईश्वरः ॥"

इति ।

श्वेता रक्ता त्वसिता पीतवर्णा श्यामा कृष्णा (चा)ञ्जना स्याज्जपाभा ।
ज्योत्स्नाभा वेत्युदिता चारुरूपा वामाद्या याः परितो भूषिताङ्ग्यः ॥३०॥

बद्धपद्मासनः शुद्धचन्द्रप्रभः षोडशाब्दोपमश्चारुदिव्याकृतिः ।
ब्रह्मभिः पञ्चभिः पञ्चवक्त्रः क्रियाज्ञानशक्तिस्पृहार्केन्दुवह्नीक्षणः ॥ ३१ ॥

पङ्क्तिसंख्यैर्भुजैः साभयेष्टप्रदे शक्तिशूले दधच्चापि खट्वाङ्गकम् ।
दक्षिणे चान्यतः सर्पमक्षस्रजं डामरूकोत्पले बीजपूरं तथा ॥ ३२ ॥
सुप्रसन्नाननो दिव्यमाल्याम्बरो भूषणैर्भूषितो हेमरत्नोज्ज्वलैः ।
जाटजूटस्फुरच्चन्द्र + पूरश्चिन्तनीयो भवेत् तत्र सादेश्वरः ॥ ३३ ॥

सादेशाभं विभुमीशानरूपं केचित् प्राहुर्ह्यपरे त्वेकवक्त्रम् ।
चन्द्राश्माभं वरदं शूलपाणिं चन्द्रोत्तंसं वरवेषं युवानम् ॥ ३४ ॥
काश्मीराभं सकपर्देन्दुमौलिं बीजापूरं दधतं चाक्षमालाम् ।
दिव्याकारं वरदाभीतिहस्तं ध्यायेत् पीतं पुरुषं भूषिताङ्गम् ॥ ३५ ॥
दष्टोष्ठास्यं कपिलश्मश्रुकेशं भीमाकारं धृतरक्ताम्बराढ्यम् ।
सर्पोष्णीषं सितदंष्ट्राकरालं सर्पैश्चोग्रैरालिभिर्भूषिताङ्गम् ॥ ३६ ॥
दोर्भिः शूलं परशुं चासिदण्डौ खट्वाङ्गाख्यं दधतं चर्मपाशौ ।
हेतीर्ध्यायेत् सकपालं कपालैः सालङ्कारं घननीलं त्वघोरम् ॥ ३७ ॥
बन्धूकाभं ललितं स्त्रीविलासं दिव्याकारं धृतधम्मिल्लकेन्दुम् ।
रक्ताभूषावसनालेपमाल्यं वामं ध्यायेद् धृतचर्मासिहस्तम् ॥ ३८ ॥
सद्योजातं शशिगोक्षीरगौरं शुक्लाकल्पाम्बरगन्धं त्रिनेत्रम् ।
सस्ताभारं वरदाभीतिहस्तं चन्द्रापीडं स्मरतां बालवेषम् ॥ ३९ ॥

"पृथिव्याद्यष्टमूर्तीनां वामाद्याः शक्तयः क्रमात् ।
जगत्प्रवृत्तिसंसिद्धिर्याभिः सिध्येच्छिवाज्ञया ॥"

इति कालोत्तरोदितत्वात् । अतोऽष्टमूर्तयोऽपि स्वरूपतः प्रदर्श्यन्ते —

पृथ्वीमूर्तिश्चतुरास्याष्टबाहुः कूर्मारूढा दधती दिव्यरूपा ।
पीता शालिप्रसवं चोत्पलं च साद्रिद्वीपाम्बुधिनद्यावृताङ्गी ॥ ४० ॥

मेषारूढो वरदाभीतिशक्तीर्बिभ्रद्धस्तैररुणः स्वस्तिकं च।
ज्वालामालामकुटः पञ्चवक्त्रो हेमाकल्पः सुमुखः सप्तजिह्वः ॥ ४१ ॥
श्वेतोष्णीषो नवनीताक्तदेहः साङ्गं चर्मापि च कृष्णं दधानः।
पत्न्या युक्तः सितयज्ञोपवीतिः स्रुक्पाणिः स्याद् यजमानोऽध्वरस्थः ॥

सप्तच्छन्दस्तुरगस्यन्दनस्थो बन्धूकाभः सुमुखश्चारुरूपः।
रक्ताकल्पाम्बरमाल्यानुलेपः सूर्यो वर्मी मकुटी पद्महस्तः ॥ ४३ ॥
अम्भोमूर्तिः कथिता शुक्लवर्णा नक्रारूढा वरपाशौ दधाना।
मुक्ताजालैर्विविधैर्भूषिताङ्गी शुभ्राकल्पा युगमौलिः सुमौलिः ॥ ४४ ॥
एणारूढः पवनो धूम्रवर्ण. पीनाङ्गांसो मकुटी कुञ्चितभ्रूः।
कृष्णाकल्पश्चतुरास्योऽङ्कुशी च दिव्याकारो युगबाहुर्ध्वजी स्यात् ॥

आकाशोऽपि स्फुटितेन्दुप्रकाशो दोर्भिः शूलं डामरूकं च शङ्खम्।
खट्वाङ्गं चादधदर्धेन्दुमौलिस्त्र्यक्षो ध्येयः सकपर्दो वृषस्थः ॥ ४६ ॥
प्रालेयांशुर्हिमगोक्षीरगौरः शुक्लाकल्पो ललिताङ्गः किरीटी।
शङ्खाम्भोजे वरदाख्यं गदां चाबिभ्रद् दोर्भिस्तुरगस्थोऽभिपूज्यः॥ ४७ ॥

शर्वाद्यष्टौ वृषवाहास्त्रिनेत्रा वेदास्यास्ते सकपर्देन्दुखण्डाः।
शूलं वज्रं शर(चापौ) दधाना नागाकल्पाः खलु ते मूर्तिपाः स्युः ॥ ४८ ॥

तद्वद्वर्णैः कमलस्वर्णरक्ताः शुक्लापीतावरणा रक्तकृष्णाः।
मूर्तीशास्ते स्युरनन्तादयो ये विद्याधीशा अपि वर्णैः समानाः ॥ ४९ ॥
योगोपेताः सुमुखाश्चारुरूपा धम्मिलाग्रग्रथितस्र + + +।
सौम्याः सर्वे सुदुकूलाम्बराढ्या विद्याधीशाः कथिता नागहस्ताः॥ ५० ॥

योषिद्रूपाण्यपि चाङ्गानि वर्णैः श्वेतस्वर्णारुणकृष्णानिभानि।
ध्येयानि स्याद् वरदाभीतिकाढ्यं त्र्यक्षं तेषामपि शूलं च टङ्कम् ॥ ५१ ॥

अत्र मञ्जर्यां —

> "हृदयादीनि चाङ्गानि तद्रूपा द्विभुजाः स्त्रियः।
> वरदाभीतिहस्ताः स्युरस्त्रं किञ्चित् तु पिङ्गलम् ॥"

इति।

नन्दीशाख्यो मकुटी स्वर्णवर्णः किञ्चिद्दंष्ट्री सुमुखो दक्षिणस्थः ।
द्वारे शूली गदयावस्थितः स्याद् दैत्याकारो द्युतिमान् सत्रिनेत्रः ॥ ५२ ॥
मेघश्यामः शुभवेषः किरीटी रक्ताकल्पो धृतटङ्कस्त्रिनेत्रः ।
द्वाःस्थो वामे गदयावस्थितः सन् दंष्ट्री किञ्चित् स महाकालसंज्ञः ॥ ५३ ॥
निर्मांसाङ्गो धृतशूलस्त्रिनेत्रः प्रेताकारः कृशदीर्घोदरास्यः ।
भृङ्गीशाख्यः परमेशप्रियोऽसौ याम्यद्वारे स भवेत् पश्चिमस्थः ॥ ५४ ॥
लाक्षावर्णो धृतटङ्काक्षमालो रक्ताकल्पो गजवक्त्रस्त्रिनेत्रः ।
ह्रस्वाङ्गः स्यादहियज्ञोपवीती याम्यद्वारे खलु पूर्वस्थितोऽसौ ॥ ५५ ॥
कैलासाभो हिमचन्द्रांशुगौरस्तुङ्गः शृङ्गी बहलाङ्गः ककुद्मान् ।
धर्मः साक्षाद् वृषरूपी चतुष्पात् पश्चाद्द्वाःस्थः खलु कौबेरभागे ॥ ५६ ॥
षड्वक्त्रोऽस्माद् द्विगुणाक्षश्च दोर्भिर्युक्तो रक्तः शिखिवाहः किरीटी ।
रक्ताकल्पः शिखिशक्त्यक्षमालापूर्वा हेतीर्विदधद् बालवेषः ॥ ५७ ॥
कन्या देवी दधती नीलवर्णा चक्रासीषूंस्त्रिशिखं शङ्खखेटे ।
दोर्भिश्चापं वरदं सिंहवाहा रक्ताकल्पा धनदद्वारपूर्वे ॥ ५८ ॥
संरक्ताङ्गः परशुं चापि कुण्डीं बिभ्रद् दोर्भिस्त्रिशिखं चाक्षमालाम् ।
चण्डेशः स्यान्मकुटी सत्रिनेत्रो दिव्याकारोऽरुणमाल्याम्बराढ्यः ॥ ५९ ॥
इ(न्द्रा ? न्द्रः)पीतो मकुटी युग्मबाहुर्हारैर्निष्कैः कटकैश्चाङ्गदाद्यैः ।
दिव्याकल्पो धृतवज्राशनिः स्यात् प्राच्यां देवैः सह चैरावतस्थः ॥ ६० ॥
तप्तस्वर्णद्युतिरग्निश्चतुर्भिर्दोर्भिर्बिभ्रद् वरदं चाभयं च ।
कुण्डीं तद्वज्जपमालां च हैमीं हैमाकल्पः सुमुखो वृद्धवेषः ॥ ६१ ॥
ज्वालावेष्टितस्वमण्डलस्थो दक्षिणभागाश्रितया स्वाहया सहितो मेषारूढश्च ।
नीलाभ्राभो बलवान् दण्डपाणिर्दिव्याकारो युगबाहुः किरीटी ।
कृष्णाकल्पो महिषं चाधिरूढः प्रेताधीशः खलु धर्मो यमः स्यात् ॥ ६२ ॥
चित्रगुप्तादिभिः स्वगणैः परिवृतश्च ।
रक्षोधीशो निर्ऋतिः कृष्णवर्णो दंष्ट्री खड्गी शितिमाल्याम्बराढ्यः ।
भीमाकारोऽपि च रम्याकृतिः स्यात् स्वाशासंस्थः पुरुषं चाधिरूढः ॥
रक्षोगणैरावृतश्च ।

प्रालेयेन्दुस्फटिकस्वच्छवर्णः पीताकल्पो मकुटी भूषिताङ्गः ।
नक्रारूढो धृतपाशः सुरूपो देवो ध्येयो वरुणः स्यात् प्रसन्नः ॥ ६४ ॥

गङ्गायमुनादिभिर्दिव्यरूपिणीभिर्नागैश्च परिवृतः ।

धूम्रो वायुर्ललिताङ्गो युवा स्यान्नीलाकल्पो युगबाहुर्मृगस्थः ।
हारी बिभ्रद् ध्वजमप्यङ्कुशं च ध्येयो देवः सहितः स्यान्मरुद्भिः ॥ ६५ ॥

हेमाभासो मधुपिङ्गाक्षसौम्यो दिव्याकल्पो नरवाहो गदाधृक् ।
तुन्दी किञ्चिद् बहलो ह्रस्वबाहुर्यक्षाधीशो निधिभिश्चावृतः स्यात् ॥ ६६ ॥

मुक्तावर्णो धृतशूलस्त्रिनेत्रः श्वेताकल्पः सकपर्देन्दुखण्डः ।
सौम्याकारो वृषवाहः शिवांशो विद्याधीशो भवतीशानदेवः ॥ ६७ ॥

विद्यामूर्तिभिः परिवृतश्च ।

तप्तस्वर्णप्रतिमो हंसवाहो वक्त्रैर्युक्तः स चतुर्भिर्भुजैश्च ।
साक्षस्रक्स्रुक्स्रुवकुण्डीकुशांश्च बिभ्रद् ब्रह्मा सकपर्दः सुरूपः ॥ ६८ ॥

वामतः सावित्र्या दक्षिणतः सरस्वत्या च प्रजापतिभिर्देवैश्च समस्तलोकैः परिवृतः कुशध्वजश्च ।

नागाधीशैरखिलैः सेव्यमानः श्वेतारक्तप्रभया सौम्यरूपः ।
दिव्याकल्पः कमले चक्रहस्तो ध्येयोऽनन्तो वसुधाशेखरः स्यात् ॥ ६९ ॥

सहस्रफणामणिकिरणोद्भासितोत्तमाङ्गः स्यात् ।

शङ्खप्रख्यो वृषवाहस्त्रिनेत्रो नागाकल्पः सकपर्देन्दुखण्डः ।
भीमाकारोऽप्यतिभद्रो वटाधः शूली टङ्की निवसन् वीरभद्रः ॥ ७० ॥

हंसारूढा त्वरुणाभा चतुर्भिर्वक्त्रैर्दोर्भिर्धृतकुण्ड्यक्षमाला ।
ब्राह्मी देवी निवसन्ती पलाशे दिव्याकल्पा वरदाभीतिहस्ता ॥ ७१ ॥

प्लक्षे श्वेता सकपर्देन्दुरेखा टङ्कं शूलं वरदं चाभयं च ।
उक्षारूढा दधती सत्रिनेत्रा नागाकल्पा खलु माहेश्वरी स्यात् ॥ ७२ ॥

बन्धूकाभा ह्यरुणाकल्परम्या शक्त्यक्षस्रग्वरदाभीतिपाणिः ।
दिव्याकारा समयूरध्वजा या कौमारी स्यात् स्फुटमौदुम्बरस्था ॥ ७३ ॥

मेघश्यामा धृतपीताम्बराढ्या श्रीवृक्षस्था सकिरीटादिभूषा ।
शङ्खं चक्रं वरदं चाभयं च तार्क्ष्यारूढा दधती वैष्णवी स्यात् ॥ ७४ ॥

मेषारूढा हलचक्राब्जहस्ता नीलाकल्पा स्फुटभिन्नाञ्जनाभा ।
वाराही स्यात् सवराहास्यदंष्ट्रा घोरा रम्या निवसन्ती करञ्जे ॥ ७५ ॥

ऐन्द्री श्यामा वरमाल्यानुलेपा वज्रं पाशं वरदाभीतिके च ।
हेमाकल्पा दधती कल्पवृक्षच्छायासंस्था सचतुर्दन्तिवाहा ॥ ७६ ॥

कृष्णा रौद्री वटवृक्षेऽद्रिकल्पा शूलं खट्वाङ्गं डामरूकं कपालम् ।
रक्ताकल्पा दधती प्रेतवाहा चामुण्डा स्याद् भटमुण्डान्त्रमाला ॥ ७७ ॥

विघ्नाधीशो गजवक्त्रोऽञ्जनाभष्टङ्काक्षस्रग्वरदाभीतिहस्तः ।
रक्ताकल्पः श्री ++++++ भक्ष्यैः प्रीतो भगवानाखुवाहः ॥ ७८ ॥

सर्वा लोके विविधा मातरोऽन्या नानावेषाः शुभवर्णायुधाढ्याः ।
तास्तास्तुष्टाः शिवया(गस्स ? गे स)मेता ध्येयाः पूजामधिगम्य प्रसन्नाः ॥

रुक्मप्रख्या सकिरीटा चतुर्भिर्दोर्भिर्वज्रं दधती चाक्षमालाम् ।
अम्भोजं चाप्यभयं दिव्यरूपा शुभ्राकल्पाम्बुजसंस्था निवृत्तिः ॥ ८० ॥

रक्ताकल्पा स्फटिकस्वच्छवर्णा पाशाक्षस्रक्कमलाभीतिहस्ता ।
नानारत्नैर्मुकुटाद्यैरुपेता ध्येया रक्ताम्बुजसंस्था प्रतिष्ठा ॥ ८१ ॥

गुञ्जारक्ता सकपर्दा त्रिवक्त्रा चन्द्रोत्तंसा धृतशक्त्यक्षमाला ।
अब्जासीना जलजाभीतिहस्ता दिव्याकल्पा खलु विद्या कला स्यात् ॥

दोर्भिर्वक्त्रैरपि युक्ता चतुर्भिः कृष्णा कृष्णैर्वसनाद्यैरुपेता ।
सर्पाकल्पा सकपर्दा ध्वजाक्षस्रक् साभीतिः कथिता शान्तिसंज्ञा ॥ ८३ ॥

शङ्खक्षीरस्फटिकस्वच्छगौरा पञ्चास्या स्यात् सकपर्देन्दुखण्डा ।
पद्माक्षस्रग्वरदाभीतिपाणिः शुभ्राकल्पा जलजे शान्त्यतीता ॥ ८४ ॥

पद्मासीनं चतुरास्यं सुपीतं ध्यानैकाग्रं द्विभुजाङ्कस्थमुद्रम् ।
ऊर्ध्वाक्षस्रक्कलशं दिव्यरूपं दिव्याकल्पं कथिताध्यात्मतत्त्वम् ॥ ८५ ॥

मेघानीलं श्रितपुर्यष्टकाब्जैर्दोर्भिः कुण्डीं जलजार्यक्षमालाः ।
विद्याधारं त्वभयं बोधमुद्रां विद्यातत्त्वं विदधद् दिव्यरूपम् ॥ ८६ ॥

इन्दुश्वेतं सचतुर्बाहुवक्त्रं दिव्याकारं धृतटङ्काक्षमालम् ।
पद्मासीनं सकपर्दं समुद्रं सक्तं ध्येयं शिवतत्त्वं समाधौ ॥ ८७ ॥

सौम्यासौम्यास्त्वपरे चाप्यसंख्या नानारूपा वरवेषायुधाढ्याः ।
स्मर्तव्यास्ते दशदिक्स्था गणेशा ये वक्ष्यन्ते परतोऽस्मिन् समासात् ॥
पीतं रक्तं त्वथ कृष्णं च नीलं विद्युत्प्रख्यं बहुरूपं सुवर्णम् ।
अग्निज्वालाशशिसूर्यद्युतीनि वज्रादीनि क्रमशोऽस्त्राणि विद्यात् ॥ ८९ ॥
रक्षादक्षं निजलोकेशदिक्स्थं विघ्नान्निघ्नं पुरुषाकाररम्यम् ।
रक्ताकल्पं द्विभुजं स्वाङ्कशीर्षे प्राञ्जल्यस्त्रं खलु तत्तद्विधेयम् ॥ ९० ॥

तत्र गदा शक्तिश्च स्त्रियौ ।

कल्पानलसमप्रख्यं कोटिसूर्यसमप्रभम् ।
दंष्ट्राकरालवदनैर्वमदग्निशिखाकुलम् ॥ ९१ ॥
अनेकवक्त्रनयनमनेकायुधभीषणैः ।
भुजैरनन्तैः शस्त्राणि मुञ्चन्तं परिपन्थिषु ॥ ९२ ॥
व्यालयज्ञोपवीताढ्यं नागभूषणभीषणम् ।
रक्तगन्धाम्बरधरं शिरोमालान्त्रभूषितम् ॥ ९३ ॥
सिंहव्यालाहिगृध्रश्वव्याघ्रक्रोडद्विपाननैः ।
भूतैः परिवृतं नैकैरट्टहासविभीषणैः ॥ ९४ ॥
रक्षकं शिवभक्तानां सर्वोपद्रवनाशनम् ।
(छेदनं परदिव्यानां?) परसैन्यनिवारणम् ॥ ९५ ॥
रूपं पाशुपतास्त्रस्य प्रोक्तमेतत् समासतः ।
भिन्नाञ्जनगिरिप्रख्यं रक्ताकल्पसुभीषणम् ॥ ९६ ॥
दंष्ट्राकरालवदनं प्रदीप्तोर्ध्वशिरोरुहम् ।
शूलस्य मूलं वेतालं खड्गं दक्षिणतोऽन्यतः ॥ ९७ ॥
भुजैर्डमरुकं चैव कपालं घण्टयाष्टभिः ।
शूलमध्यं च दधतं व्याघ्रचर्माम्बरं त्रिभुम् ॥ ९८ ॥
सद्यःकृत्तस्रवद्रक्तसङ्घटाननमालिकाम् ।
लूतवृश्चिकमालां च (घण्टा ? कण्ठा)दाजानुलङ्घिनीम् ॥ ९९ ॥
नूपुरे कटिसूत्रं च क्रोडबन्धं तथाङ्गदैः ।
कटकानि तथा निष्कं कुण्डलोत्तंसकानि च ॥ १०० ॥

उपवीतं च बिभ्राणमाक्रान्तमणिपादुकम् ।
अग्रविन्यस्तसव्याङ्घ्रिं युद्धोपक्रमभीषणम् ॥ १०१ ॥

निखिलोपद्रवहरं स्मृतं + + + भञ्जनम् ।
अघोरास्त्रमिति ध्यायेद् यथोक्तपरिवारकम् ॥ १०२ ॥

इत्थं मूलासनाङ्गानि गर्भद्वारेशलोकपैः ।
अस्त्राण्यावरणाख्यानि तेषां या मूर्तयः स्मृताः ॥ १०३ ॥

ताः सर्वा मुख्यशो ह्यत्र कथिताः पूजनादिषु ।
यथायथावत् स्मर्तव्या नित्यादिष्विह कर्मसु ॥ १०४ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
आवरणादिमूर्तिपटलो द्वादशः ।

अथ त्रयोदशः पटलः ।

अथ सूर्यार्चनं वक्ष्ये शिवार्चाविघ्नशान्तिदम् ।
स्नात्वा सन्ध्यामुपास्याथ सन्तर्प्यार्चनमन्दिरम् ॥ १ ॥

गत्वा धौताङ्घ्रिराचम्य तद्वाःस्थावाख्ययार्चयेत् ।

ओं दण्डिने नमः । ओं पिङ्गलाय नमः ।

अन्तः प्रविश्योपविश्य कृत्वा तु प्राणसंयमम् ॥ २ ॥

अस्त्रशुद्धकरोऽङ्गानि हृदयादीनि विन्यसेत् ।
आत्मानं भास्करं ध्यायन् यथोक्तार्घ्यं तु पूरयेत् ॥ ३ ॥

साष्टाङ्गं विन्यसेत् तत्र मूलाङ्गान्यर्चयेदपि ।
तत्प्रोक्षितात्मस्थानार्चाद्रव्यचक्रकुशैस्ततः ॥ ४ ॥

ओं गं गणपतये नमः । ओं गुं गुरुभ्यो नमः ।

इति दक्षिणतो विघ्नं गुरुं चोत्तरतो यजेत् ।
तत्प्रभूतासनं पीठं तारवर्गादिपूर्वकम् ॥ ५ ॥

स्वनाम्नाभ्यर्च्य तत्पादांश्चतुरोऽथ हरीन् यजेत् ।
विमलं सारमाराध्यं सुखं परमपूर्वकम् ॥ ६ ॥

तारबिन्द्वन्तवर्गादियुक्ताख्याभिर्नमोन्तकम् ।
तथैव परमात्मानं सूर्यपद्मासनं तथा ॥ ७॥

दीप्तां सूक्ष्मां जयां भद्रां विभूतिं विमलामपि ।
अमोघां विद्युतां चाष्टदिग्दलेषु क्रमाद् यजेत् ॥ ८ ॥

सप्तमस्य द्वितीयं तु स्वरैर्दीर्घैर्विभेदितम् ।
सबिन्दुमादौ शक्तीनां नमश्चान्ते नियोजयेत् ॥ ९ ॥

नवमीं कर्णिकायां च तारादिं सर्वतोमुखीम् ।
इष्ट्वाथ प्रस्फुरन्मुद्रां दर्शयेदथ भास्करम् ॥ १० ॥

वृत्तस्वतेजोबिम्बस्थं श्वेतपद्मोपरि स्थितम् ।
प्रोक्तमूर्तिधरं देवं सञ्चिन्त्य स्थिरधीर्हृदा ॥ ११ ॥

पुष्पैरञ्जलिमापूर्य खषोल्कं मूलसंयुतम् ।
उच्चार्य द्वादशान्ताब्जात् तदावाहनमुद्रया ॥ १२ ॥

आवाह्य स्थापयेत् पद्मे स्थापन्या सुसमाहितः ।
सन्निधान्या सन्निधाप्य रुद्ध्वा तं निष्ठुराख्यया ॥ १३ ॥

धेन्वा प्ररोच्याथार्घ्यादीन् दत्त्वा चैव खषोल्किना ।
साङ्गमूलेन चाराध्य पद्मं बिम्बं च दर्शयेत् ॥ १४ ॥

स्नानवस्त्रोपवीतानि दत्त्वाङ्गानि यजेत् क्रमात् ।
हृदयादीनि वह्नीशरक्षोवायुदलेष्वथ ॥ १५ ॥

मध्ये नेत्रं ततश्चास्त्रं दिग्दलेषु स्वजातिभिः ।
धेनुमुद्रां हृदादीनां दर्शयेद् गोवृषां दृशः ॥ १६ ॥

त्रासनीमपि चास्त्रस्य पुनर्गन्धादिभिर्यजेत् ।
प्रागादिदिक्षु सोमं च बुधं चैव बृहस्पतिम् ॥ १७ ॥

पूजयेद् भार्गवं चाग्निरक्षोवाय्वीशदिग्गतान् ।
अङ्गारकं शनैश्चारं राहुं केतुमिति ग्रहान् ॥ १८ ॥

तारादिस्वाह्वयाद्यर्णैर्बिन्द्वन्तैरथ नामभिः ।
वन्दन्या तु प्ररोच्यैतान् गन्धाद्यैरथ भास्करम् ॥ १९ ॥

निवेद्यान्तं तु सम्पूज्य ग्रहांश्चैव यथाक्रमम् ।
पद्माख्यां बिम्बमुद्रां च दर्शयित्वाभिनन्दयेत् ॥ २० ॥
यथाशक्ति जपित्वाथ दत्त्वार्घ्यं तु विसर्जयेत् ।
संहृत्य मुद्रया मन्त्रान् साङ्गं देवं ग्रहानपि ॥ २१ ॥
हृदये द्वादशान्ते वा सूर्यबिम्बे नियोजयेत् ।
तन्निर्माल्यादिकं सर्वं तेजश्चण्डाय दापयेत् ॥ २२ ॥
तारवर्गादिपूर्वेण स्वनाम्नैवेशगोचरे ।
सर्वत्र नामभिः पूजा स्याच्चतुर्थ्या नमोन्तकैः ॥ २३ ॥

सूर्यपूजाधिकारः ।

अथ त्यक्त्वा पवित्रं तदाचम्य द्वारमर्चयेत् ।
सामान्यार्घ्येण पुष्पैश्च प्रोक्ष्य द्वारं शिवास्त्रतः ॥ २४ ॥

ओं गं गणपतये नमः । ओं सं सरस्वत्यै नमः ।

(इति)दक्षिणवामस्थावूर्ध्वौदुम्बरके यजेत् ।

ओं गङ्गायै नमः । ओं यमुनायै नमः ।

ऊर्ध्वभागे यजेद्देवं दक्षिणोत्तरभागयोः ॥ २५ ॥

ओं नं नन्दीशाय नमः । ओं मं महाकालाय नमः ।

इति दक्षिणवामस्थौ द्वारशाखाश्रितावधः ।
ज्वलदस्त्रात्मकं पुष्पं विघ्नसङ्घनिबर्हणम् ॥ २६ ॥
नाराचवच्छिवास्त्रेण पूजागेहोदरे क्षिपेत् ।
पार्ष्णिघातैस्त्रिभिर्भौमान्छोटिकाभिर्नभोगतान् ॥ २७ ॥
तर्जनीभिर्दिविष्ठांश्च विघ्नानुत्सारयेत् क्रमात् ।
ततस्तु मनसेन्द्रादीन् स्वाशासु स्थापयेत् (स्व ? सु)रान् ॥ २८ ॥

अत्र मञ्जर्याम् —

“इन्द्रादींल्लोकपालांश्च सायुधान् रक्षणोद्यतान् ।
दशदिक्षु प्रतिष्ठाप्य मण्डलान्तर्विशेत् स्वयम् ॥”

इति ।

अन्तर्दक्षिणपादेन देहलीमस्पृशन् विशेत् ।
द्वागाश्रित्योत्तरां शाखां ततः प्रतिनिवृत्य तु ॥ २९ ॥

ज्वलदस्त्रात्मकं पुष्पं देहल्यां स्थापयेत् स्मरन् ।
विघ्नौघवारणं पश्चात्

ओं वां वास्तुपुरुषाय नमः । ओं वास्त्वधिपतये ब्रह्मणे नमः ।
ब्रह्मस्थानेऽर्पयेदिति ॥ ३० ॥

प्रदक्षिणं यागगृहं वीक्ष्योपकरणान्यपि ।

ओं अं अनन्तासनाय नमः ।

इति स्वासनमभ्यर्च्य तत्रासीनोत्तरामुखः ॥ ३१ ॥
शोषणादिविधानं च भूतशुद्धिं समाचरेत् ।
पूर्वोक्तमार्गाद् गन्धार्द्रं शिवहस्तं विधाय तु ॥ ३२ ॥

कलयेल्लिङ्गमुद्रां च करकच्छविकां पुनः ।
अष्टात्रिंशत्कलान्यासं कृत्वात्मनि यथोदितम् ॥ ३३ ॥

आवाह्य हृदयाम्भोजे मूलमन्त्रं शिवात्मकम् ।
हृदयाद्यङ्गमन्त्रैस्तु षड्भिरात्मनि विन्यसेत् ॥ ३४ ॥

परमीकरणं कृत्वा शिवोऽहमिति भावयेत् ।
महामुद्रां समायोज्य प्ररोच्यात्मानमात्मना । ३५ ॥

तालत्रयच्छोटिकाभिर्वीक्षणैस्तर्जनीस्वनैः ।
विघ्नान् हत्वा विरिच्याशाः शोधयित्वावकुण्ठ्य तु ॥ ३६ ॥

आश्रयं शोधयित्वैवं मन्त्रं सिंहासने स्मरन् ।
हृत्पुण्डरीककुहरे ज्योतिर्लिङ्गे सदाशिवम् ॥ ३७ ॥

अङ्गुष्ठमात्रं मनसा सिद्धैर्द्रव्यैर्यथाक्रमम् ।
पूजयेन्निश्चलधिया चक्रवर्त्युपचारतः ॥ ३८ ॥

परमामृतविष्यन्दैर्नाभिकुण्डेऽनले शिवम् ।
सन्तर्पयेच्च भ्रूमध्ये प्रस्फुरद्बिन्दुगह्वरे ॥ ३९ ॥

ध्यात्वा शिवं परं सूक्ष्ममन्तर्यागं समाप्य तु ।
स्वैक्यं सदाशिवं ध्यात्वा रक्षार्थं चाश्रयस्य तु ॥ ४० ॥

यथा ब्रह्मशम्भुः —

> "तालत्रयमथास्त्रेण प्राकारं च समुद्धृतम् ।
> तद्बहिः खानितं श्वभ्रं तनुत्राणेन कल्पयेत् ॥"

इति ।

यथोपचारपटले विशेषार्घ्यमिहोदितम् ।
आपूर्याभ्यर्च्य तत्तोयैः स्वशिरः प्रोक्षयेत् कुशैः ॥ ४१ ॥

सगन्धभस्मना कृत्वा त्रिपुण्ड्राणि यथाविधि ।
विशुद्धात्माश्रयस्त्वेवं द्रव्यशुद्धिं समाचरेत् ॥ ४२ ॥

यथोक्तपूजाद्रव्याणि शक्तिदृष्ट्यावलोक्य तु ।
कुशमूलेन वा कूर्चादर्घ्यतोयैस्तु वर्मणा ॥ ४३ ॥

अभ्युक्ष्यालभ्य तु जपेदजातेन हृदाथवा ।
गन्धं ततस्तु वामेन शिरसा वाम्बराण्यपि ॥ ४४ ॥

कृष्णेन वाथ शिखया भूषणानि स्रजोऽपि च ।
पुंसा वा वर्मणा वापि नैवेद्यं च फलादिकम् ॥ ४५ ॥

ईशेन वाथ गायत्र्या मुक्तपुष्पादिकं तु यत् ।
कङ्कटेन दधिक्षीरं घृतं तु शिखया पुनः ॥ ४६ ॥

शर्करां हृदयेनाथ शिखया क्षौद्रमम्बु च ।
मूलेन शिष्टं चैतेषु क्षिपेदर्घ्याम्बुशीकरान् ॥ ४७ ॥

ललाटे तिलकं कृत्वा चन्दनेनैव मूलतः ।
मूलेनारोपयेत् पुष्पं प्रोक्ष्य चाथ स्वमस्तके ॥ ४८ ॥

द्रव्यशुद्धिः कृतैवं स्यान्मन्त्रशुद्धिरथोच्यते ।

यथा ब्रह्मशम्भुः —

> "त्रिमात्रादिक्रमेणोर्ध्वं मन्त्रमुच्चारयेच्छनैः ।
> यावन्निष्ठापदप्राप्तिस्तन्मन + + + + णः ॥
> मन्त्रशुद्धिर्भवेदेवं शुद्धतत्त्वसमाश्रयात् ।"

इति ।

लिङ्गशुद्धिं ततः कुर्यादुपचारोदितक्रमात् ॥ ४९ ॥

गड्डुकैर्वर्धनीकुम्भेष्वापूर्य सलिलं शुचिः ।
गर्भागारमथास्त्रेण समुद्धाट्य प्रसन्नधीः ॥ ५० ॥
सामान्यार्घ्यं पुरो दत्त्वा गायत्र्या शिवसंज्ञया ।
+ + + पुष्पैर्धूपं च + + + दत्त्वार्घ्यं च पुनस्तया ॥ ५१ ॥
अपनीय तु निर्माल्यमावर्त्य ब्रह्मपञ्चकम् ।
पुष्पं सपादि तल्लिङ्गमस्तके विनिधाय तु ॥ ५२ ॥
स्थिरालङ्गे(चतु ? तु च)दण्डाय दद्यादर्घ्यपुरःसरम् ।
चले जलादौ प्रक्षिप्य हृदयास्त्राम्बुसेकतः ॥ ५३ ॥
पिण्डिकां क्षालयेत् पूर्वं लिङ्गं च तदनन्तरम् ।

यथाह ब्रह्मशम्भुः—

"यत्नेन क्षालयेल्लिङ्गं दक्षिणेनैव पाणिना ।
विशुद्धं सजलाधारं लिङ्गमस्त्राम्भसा पुरा ॥
सामान्यार्घ्यजलैः पश्चादभिषिञ्चेत् तु मन्त्रवत् ।"

इति ।

अशून्यमस्तकं लिङ्गमभिषेकार्चनादिषु ॥ ५४ ॥
गन्धपुष्पादिभिः कुर्यात् तद्धि सान्निध्यकारकम् ।
इत्थमात्माश्रयद्रव्यमन्त्रलिङ्गविशुद्धयः ॥ ५५ ॥
कर्तव्याः पञ्च शैवानां नान्यथार्चनमिष्यते ।

ओँ गं गणपतये नमः ।

अनेन वायुकोणे तु पूजयेद् गणनायकम् ॥ ५६ ॥
नैर्ऋते वारुणं पद्मे प्रोक्तरूपं गजाननम् ।

ओं गुं गुरुभ्यो नमः ।

गुरूनपि तथैशाने प्रोक्तरूपादिकान् स्मरन् ॥ ५७ ॥
सामान्यार्घ्येण गन्धाद्यैर्निवेद्यान्तं तु शक्तितः ।

गुरूनित्यनेन गुरुं, परमगुरुं, परमेष्ठिगुरुं, पूज्यगुरुं, महापूज्यगुरुं चेति पञ्चगुरूनिति यावत् । ओं हाम् आधारशक्तये नमः ।

पीठाधः पूजनीयेति शक्तिः कूर्मशिलागता ॥ ५८ ॥
मृणालबीजाङ्कुराभा

ओं हाम् अनन्तासनाय नमः

इति ब्रह्मशिलागता ।

धर्मं ज्ञानं च वैराग्यमैश्वर्यं चार्चयेत् क्रमात् ॥ ५९ ॥

आग्नेयादीशपर्यन्तं पीठपादान् यथोदितान् ।
अधर्ममपि चाज्ञानमवैराग्यं दिशास्वपि ॥ ६० ॥

अनैश्वर्यं च पीठेषु प्रागादिषु यजेत् क्रमात् ।
तारहृद्बीजसंयुक्तचतुर्थ्यन्तैस्तु नामभिः ॥ ६१ ॥

पूज्यान्यावरणानि स्युः सामान्येनाविशेषिते ।

ओं हाम् ।

अधस्तान्मेखलायास्तदितीष्ट्वा ज्ञानसन्निधौ ॥ ६२ ॥

ऊर्ध्वच्छदं तथोर्ध्वस्थमैश्वर्याशागतं यजेत् ।

ओं हां पद्माय नमः । ओं हां कर्णिकायै नमः ।

इतीष्ट्वा केसरेष्वष्टौ क्रमाद् वामादिशक्तयः ॥ ६३ ॥

पूज्याः सर्वा दिक्षु यथा सूपविष्टाः पुरोदिताः ।

ओं हां वामायै नमः । ओं हां मनोन्मन्यै नमः ।

नवमीं कर्णिकायां तु यजेच्छक्तिं मनोन्मनीम् ॥ ६४ ॥

ओं हां सूर्यमण्डलाय नमः । ओं हां सूर्यमण्डलाधिपतये ब्रह्मणे नमः ।

इति पद्मदलेष्वग्राद् व्याप्तिं संचिन्त्य पूजयेत् ।

ओं हां सोममण्डलाय नमः । ओं हां सोममण्डलाधिपतये विष्णवे नमः ।

इत्यादि केसराग्राद् वा व्याप्तिं ध्यात्वा यजेद् द्वयम् ॥ ६५ ॥

ओं हां वह्निमण्डलाय नमः । ओं हां वह्निमण्डलाधिपतये रुद्राय नमः ।

इति तत्कर्णिकामध्ये बिम्बबिम्बाधिपौ यजेत् ।

ओं हां व्योममण्डलाय नमः । ओं हां शिवासनाय नमः ।

इति प्रोक्तासनः पूज्यः

अत्र पौष्करे —

“इति स्थिरं स्थिरे लिङ्गे स्वासनं कल्पयेद् यदा ।
चललिङ्गे विशेषः स्यादासनं तच्चलाचलम् ॥

स्नपनानन्तरं न्यस्य पीठे वा मण्डलेऽथवा ।
तत्र स्थिरासनं देवं चललिङ्गस्थमर्चयेत् ॥"

इति ।

पुष्पैरापूर्य चाञ्जलिम् ॥ ६६ ॥

ओं हां हां शिवमूर्तये नमः ।

अनेन मूर्तिलिङ्गे तु विन्यसेत् प्रोक्तलक्षणम् ।

ओं हां हां ज्ञानक्रियात्मिकायै ईश्वरमूर्तये नमः ।

ब्रह्मपञ्च(क)वक्त्रेषु चाष्टात्रिंशत् कलास्तथा ॥ ६७ ॥

विन्यसेत् स्वस्वमुद्राभिर्मूर्तौ न्यासोदितक्रमात् ।
पुनः पुष्पाञ्जलिं बद्ध्वा तस्यां देवं सदाशिवम् ॥ ६८ ॥

विद्यादेहं विभज्याथ तारहृन्मूलहृद्युतम् ।
विद्यादेहाय नत्यन्तमुक्त्वा मूर्तौ तु विन्यसेत् ॥ ६९ ॥

पुष्पाञ्जलिमथोद्यम्य तारहृद्बीजसंयुतम् ।
सद्यमूलेन सन्धाय प्लुतान्तं मन्त्रमुच्चरन् ॥ ७० ॥

हृदयाब्जात् परं ज्योतिर्ध्यायेन्नादसमं शिवम् ।
नीत्वोर्ध्वं द्वादशान्ताब्जं शिवे संयोज्य निष्कले ॥ ७१ ॥

यथाह ब्रह्मशम्भुः—

"तावदुच्चारयेद् यावत् प्राप्तं निष्कलगोचरम् ।
तद्भावभावनाविष्टः प्रस्फुरद्रश्मिमण्डले ॥

बिन्दावभ्युदितं ध्यायन्नावाहनविधिं प्रति ।

तस्मादादाय विस्रब्धः स्थिरधीः पुरतः स्थिते ॥

न्यसेल्लक्षीकृते देहे"

इति ।

एवमावाहयेच्छम्भुमावाहन्या यथोदितम् ।
तारहृद्वामदेवैस्तु स्थापन्या स्थापयेद् विभुम् ॥ ७२ ॥

तारहृद्वक्त्रमुच्चार्य मुद्रया सन्निधापयेत् ।
प्रणवं हृदयाघोरावुक्त्वा तं निष्ठुराख्यया ॥ ७३ ॥

निरोधयेत् पुनः पुष्पैरापूर्योद्यम्य चाञ्जलिम् ।
उक्त्वा नमःस्वधास्वाहावौषड्हृत्कवचानि तु ॥ ७४ ॥

पुष्पाञ्जलिं समायोज्य हस्ताभ्यामवकुण्ठयेत् ।
अङ्गानि च यथास्थानं स्वैर्मन्त्रैर्विन्यसेच्छिवे ॥ ७५ ॥

आवाहनादिकानां तु ये येऽर्थाः सम्प्रदर्शिताः ।
पटले तूपचाराख्ये तांस्तानत्र स्मरन् क्रमात् ॥ ७६ ॥

स्वैरर्चिर्भिर्यथा वह्निर्भानुभिर्भानुमान् यथा ।
समर्थो दुष्प्रधर्षश्च तद्वदङ्गैर्निजैः शिवः ॥ ७७ ॥

हृदयं तस्य सद्भावः शिरः सर्वेशिता गुणाः ।
वशित्वमपराधीनं यच्छिखा सोपरि स्थिता ॥ ७८ ॥

स्वभावगुप्तमन्येषां समर्थमविशेषतः ।
तेजः कवचसाधर्म्यात् तन्नाम्ना व्यपदिश्यते ॥ ७९ ॥

योऽसावप्रसहस्तस्य प्रतापोऽवारितः परैः ।
सोऽस्त्रमस्यति येनाशु दूरमन्तरदायकान् ॥ ८० ॥

इत्यपि ब्रह्मशम्भूक्ते स्मरणेनाङ्गकल्पनाम् ।
विधाय कुर्यान्मूलेनास्यामृतीकरणं तथा ॥ ८१ ॥

प्रोक्तं प्ररोचनं चापि तन्महामुद्रया भवेत् ।
विशेषार्घ्यं च पाद्यं चाप्याचामं हृदयेन तु ॥ ८२ ॥

नमोन्तं च स्वधान्तं च स्वाहान्तं च निवेदयेत् ।

पूर्वं पाद्याचमनीये दत्त्वा पश्चादर्घ्यमिति केचित् ।

हृदैव वौषडन्तेन दत्त्वार्घ्यं पञ्चमूर्धसु ॥ ८३ ॥

दूर्वापुष्पाक्षतव्रातं तच्छिरस्यधिरोपयेत् ।
सद्गन्धपुष्पधूपैश्च सम्पूज्य तु सदाशिवम् ॥ ८४ ॥
स्नानवेदिगतं देवं स्नापयेदुक्तमार्गतः ।
निर्मृज्य वाससा पाद्यं पद्भ्यां दत्त्वाथ मस्तके ॥ ८५ ॥

द्रागर्घ्यं चाप्यथाचामं वस्त्राण्याभरणानि च ।
पुनरासनमूर्त्यादिक्रमेणाराधयेद् विभुम् ॥ ८६ ॥

यथोक्तगन्धकल्केन समालिप्य सपीठकम् ।
हेमपट्टैश्च हारैश्च मालाभिः कुसुमैर्दलैः ॥ ८७ ॥

पुष्पप्रतिसराभिश्च तमिण्डाभिश्च भूषयेत् ।
प्रणवं च तथा मूलं शिवाय नम इत्यपि ॥ ८८ ॥

प्रतिद्रव्यं समुच्चार्य तत्तदारोपयेच्छिवे ।
ब्रह्माणि पञ्चवक्त्रेषु ब्रह्मभिः क्रमशोऽर्चयेत् ॥ ८९ ॥

ईशानादीनि वै शम्भोरङ्गेष्वङ्गानि तैर्यजेत् ।
ततः शिवस्य वक्त्रेभ्यो ब्रह्माण्याहृत्य तान्यथ ॥ ९० ॥

शिवाङ्गेभ्यस्तथाङ्गानि दीपाद् दीपानिवोज्ज्वलन् ।
प्रोक्तरूपादिकं ध्यायन् दलमध्येषु विन्यसेत् ॥ ९१ ॥

तत्कर्णिकायामीशानमैशान्यां पुरतो न्यसेत् ।
यथादिशं दलेष्वन्यानासीनांश्छिवसम्मुखम् ॥ ९२ ॥

अग्नीशरक्षोवाय्वाशादलेषु हृदयादिकम् ।
कवचान्तं तु विन्यस्य दिक्ष्वस्त्रं तु क्रमान्न्यसेत् ॥ ९३ ॥

नेत्रं च पुरतः शम्भोस्तत्तन्मन्त्रेण विन्यसेत् ।
ध्यात्वा यथोक्तरूपाणि पाद्यार्घ्यैः पूजयेत् क्रमात् ॥ ९४ ॥

अत्र ब्रह्मशम्भुः —

"नावकुण्ठनमेतेषाममृतीकरणं न च ।
स्नपनं दीपक्लृप्तिश्च न पृथक् चाङ्गकल्पना ॥"

इति ।

यथोक्तधूपं दद्यात् तु घण्टां वामेन नादयन् ।
देवाय पूर्वं तदनु ब्रह्माङ्गानां यथाक्रमम् ॥ ९५ ॥

राक्षसाश्चासुरा यक्षाः पिशाचा ब्रह्मराक्षसाः ।
नश्यन्ति घण्टाशब्देन धूपः सान्निध्यकारकः ॥ ९६ ॥

दीपं च दीपपात्रस्थं दर्शयित्वेशगोचरे ।
अवतार्य यथोक्तं तद् भ्राम्यमारात्रिकं तथा ॥ ९७ ॥
शिवलिङ्गे शिवो यस्माच्छिवे विश्वं प्रतिष्ठितम् ।
दीपनीराञ्जनं तस्य जगच्छान्तिकरं स्मृतम् ॥ ९८ ॥
धूपे दीपे च नैवेद्ये बलौ होमे तथैव च ।
स्वाहाशब्दः प्रयोक्तव्यः शेषेषु स्यान्नमस्कृतिः ॥ ९९ ॥
उक्तानुक्तं च यत् सर्वं हृद्बीजेन विधीयते ।
निवेद्यं तु ततो दद्यादुपचारोदितं यथा ॥ १०० ॥
मूलेनैव तु देवस्य ब्रह्माङ्गानां तदर्धतः ।
पृथक् पात्रेषु वाङ्गानां नो चेदेकत्र वा स्मृतम् ॥ १०१ ॥
पानीयं च निवेद्यास्मै दद्याद्धस्तावसेचनम् ।
हस्तोद्वर्तनकं चैव दद्यादाचमनीयकम् ॥ १०२ ॥
ताम्बूलं मुखवासं चाप्यञ्जनं दर्पणं तथा ।
छत्रं च चामरे तद्वन्नृत्तं गीतं च वादितम् ॥ १०३ ॥
श्रीमत्पञ्चमहाशब्दैः स्तुतिः स्तोत्रैश्च मङ्गलैः ।
प्रकृत्या सहितं देव्या हृष्टं ध्यात्वा सदाशिवम् ॥ १०४ ॥
एवमादिभिरन्यैश्च तदा तमभिनन्दयेत् ।

अत्र “तदा तदभिनन्दयेत् । प्रकृत्या सहितं हृष्टमि”ति ब्रह्मशम्भुः ।

सौवर्णमुपवीतं च दूर्वाग्राण्यक्षतानि च ॥ १०५ ॥
पवित्रं नैत्यकं स्वेतन्मूलेनारोपयेच्छिवे ।

मूलं तत्त्वत्रयोपेतं स्वाहान्तमुच्चार्य पवित्रं लिङ्गमूर्धन्यारोपयेत् ।

यद्यूनमाधिकं वाथ पूजायां स्खलितं च्युतम् ॥ १०६ ॥
तत् पावयेत् त्रायते च यस्मात् तस्मात् पवित्रकम् ।
प्रकृतेः परमीभावसम्पत्त्यर्थमनन्तरम् ॥ १०७ ॥
परमान्त्रिकमुच्चार्य प्रासादं पूर्ववन्न्यसेत् ।
प्ररोच्य च यथान्यायं मुद्रया प्रागुपात्तया ॥ १०८ ॥

पुष्पैर्धूपैः पुनश्चेष्ट्वा भ्राम्यमारात्रिकं भवेत् ।
शिवस्य दक्षिणे भागे पद्मे मूलाङ्ग(हिं ? भिं)ताम् ॥ १०९ ॥
अक्षमालां तु गन्धाद्यैर्धूपान्तमभिपूजयेत् ।

अत्र

"अक्षाणामक्षकल्पानां संयमो यः प्रसूयते ।
दृष्टादृष्टफलं चेष्टमक्षसूत्रं तदुच्यते ॥
शतेनाष्टाधिकं चा(ष्ट ? क्ष)मक्षाणां मेरुणा सह ।
तदर्धेनाथ पादेन संस्कृतं सर्वशम्बरैः ॥"

इति ब्रह्मशम्भुः ।

मोक्षार्थी पञ्चविंशत्या धनार्थी त्रिंशता जपेत् ॥ ११० ॥
पुष्ट्यर्थी सप्तविंशत्या चतुःपञ्चाशता श्रियै ।
सर्वकामफलावाप्त्यै शतेनाष्टाधिकेन तु ॥ १११ ॥
कन्याक(र्ति ? ल्पि)तसूत्रेण त्रिवृता त्रिगुणेन तु ।
प्रोक्तं तु सम्मुखैरक्षैर्ग्रथितं मेरुमूर्धनि ॥ ११२ ॥
अक्षसूत्रं गुरोर्लब्धं तदभावे स्वनिर्मितम् ।
कुशबन्धैर्जपेन्मुक्त्यै रत्नैर्हैमैश्च भूतये ॥ ११३ ॥
ब्राह्मणः क्षत्रियो वापि शुभैः शुद्धैर्मितैः समैः ।
विट्छूद्रौ पुत्रजीवैस्तु रुद्राक्षैः सर्व एव हि ॥ ११४ ॥
रुद्राक्षास्तु स्वयं रुद्रादुत्पन्नास्ते शिवात्मकाः ।
तैर्जपन् धारयंश्चैनान् रुद्रत्वमधिगच्छति ॥ ११५ ॥

अत्र

"पशवोऽपि हि रुद्राक्षैः संयुक्ताः शिवतां गताः ।"

इति शिवधर्मे ।

यावत् षोडशवक्त्रान्तमेकवक्त्रादिभेदतः ।
+ + + प्रभवन्तीह श्रेष्ठमध्याधमाश्च ते ॥ ११६ ॥
अष्टैकादशवक्त्रौ च षोडशास्या(न्ततो ? स्तथो)त्तमाः ।
रुद्राक्षस्त्वेकवदनो दुर्लभो ह्युत्तमोत्तमः ॥ ११७ ॥
त्रिचतुःपञ्चवक्त्राश्च कनिष्ठाः सुलभाश्च ते ।
शेषास्तु मध्यमाः प्रोक्ताः सर्वे चोक्तफलप्रदाः ॥ ११८ ॥

(सं)पूज्याक्षस्रजं पूर्वममृतीकृत्य वै जपेत् ।
मन्त्रमुच्चारयन्नक्षमेकैकं कर्षयेच्छनैः ॥ ११९ ॥

मोक्षायाङ्गुष्ठतर्जन्या भोगार्थी मध्यया युतम् ।
त्यक्त्वा कनिष्ठमन्याभिरङ्गुलीभिस्तु पुष्टये ॥ १२० ॥

त्रिविधस्तु जपः स स्यादुच्चोपांशू च मानसः ।
उच्चोऽधमफलस्तद्वन्मानसो मध्यसिद्धिदः ॥ १२१ ॥

उपांशुः श्रेष्ठफलदस्तस्मात् तेन जपेद् बुधः ।

अत्र "मानसस्यातियत्नसाध्यत्वाद् (भाष्य ? बाह्य)स्याधमसिद्धिरूपत्वादुपांशुः साधारणरूपत्वात् प्रयोज्यः । त्रिविधोऽपि न द्रुतो न विलम्बितो नास्पष्टाक्षरो न चान्यमनसा कर्तव्यः । नित्यनैमित्तिकेषु प्राङ्मुखोदङ्मुखेन वा एकचित्तेन कार्यः" इति भोजः । अत्र —

"असंख्या(तु ? तं) जपं होमं गृह्णन्त्यसुरराक्षसाः ।
अमौनिना चाशुचिना ततः पैशाचको जपः ॥"

इति बृहत्कालोत्तरे ।

कल्पोक्तं तु जपं कृत्वा पूजामात्मानमेव च ॥ १२२ ॥
मन्त्रपूजादिसिद्ध्यर्थं शिवाय विनिवेदयेत् ।

अत्र भोजराजः — "ततो हृन्मन्त्रसम्पुटमस्त्ररक्षितं कवचावगुण्ठितं कुशपुष्पचन्दनोन्मिश्रगन्धोदकचुलुकत्रये जपं पूजामात्मानं च त्रिभिः श्लोकैर्ममास्तु फलसाधनमिति देवपादयोर्निवेदयेद् बुभुक्षुः" इति ।

मुमुक्षुश्चेदिदं कर्म मास्तु मे देव! बन्धकम् ॥ १२३ ॥

इति । ओम् ।

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवति मे येन त्वत्प्रसादात् त्वयि स्थि(तम् ? ता) ॥ १२४॥

यत्किञ्चित् कुर्महे देव! सदा सुकृतदुष्कृतम् ।
तन्मे शिवपदस्थस्य हुं क्षं क्षपय शङ्कर! ॥ १२५ ॥

शिवो दाता शिवो भोक्ता शिवः सर्वमिदं जगत् ।
शिवो यजति सर्वत्र यः शिवः सोऽहमेव तु ॥ १२६ ॥

निवेद्यैवं सदात्मानं जपं पूजां च (भु ? भ)क्तितः।
ततो नमस्कृत्य शिवं लब्धानुज्ञः शिवेन तु ॥ १२७ ॥

यथोक्तमग्निकार्यं तु सम्यक् कृत्वा समाप्य च।
अग्निष्ठं तु शिवं लिङ्गे समायोज्यानलं तथा ॥ १२८ ॥

अथैकावरणं देवे वक्त्राङ्गेषु नियोजयेत्।
देवं च लिङ्गमूर्तौ तु पुनरर्घ्यपुरस्सरम् ॥ १२९ ॥

अष्टपुष्पिकयाभ्यर्च्य सापेक्षं तं विसर्जयेत्।
योगपीठं च मूर्तिश्च शिवस्तस्याङ्गपञ्चकम् ॥ १३० ॥

इत्यष्टौ पृथगष्टाभिर्मन्त्रैः सत्कृत्य पूजयेत्।
सापेक्षो निरपेक्षश्च विसर्गो द्विविधः स्मृतः ॥ १३१ ॥

लिङ्गे परिगृहीते तु (स्थिरे) वाथ चलेऽपि वा।
सापेक्षं तु विसर्गः स्याच्छिवसान्निध्यकारणात् ॥ १३२ ॥

निरपेक्षं तु सामान्यलिङ्गेषूद्वासनं स्मृतम्।
सामान्यान्यपि लिङ्गानि क्षणिकानि हि मृन्मयम् ॥ १३३ ॥

सैकतं पिष्टजं चाथ नावनीतं च गोमयम्।
फलजं लिखितं चान्नमिति सामान्यमष्टधा ॥ १३४ ॥

एतानि सद्यो निर्माय तदैवावाह्य शङ्करम्।
पूजयित्वा यथान्यायं निरपेक्षं विसर्जयेत् ॥ १३५ ॥

नैषां जलाधिवासो वा स्थापने शयनं न च।
न तिथिर्न च नक्षत्रं लक्षणोद्धारणं नहि ॥ १३६ ॥

सद्यः सपीठं सम्पूज्य विसृज्याप्सु क्षिपेच्च तत्।
अयमेव विधिस्तुल्यः स्थण्डिलेऽग्नौ च (त ? द)र्पणे ॥ १३७ ॥

कुम्भे जले च पूजायामात्मन्यपि सदा भवेत्।
विशुद्धगोमयाम्भोभिर्विलिप्ते चतुरश्रके ॥ १३८ ॥

परिकल्प्यासनं चेष्ट्वा तत्रावाह्य यथाविधि।
पूजयेत् स्नपनं त्वत्र मानसं तु न बाह्यतः ॥ १३९ ॥

स्थण्डिले स्याद् विधिरयं शेषं पूर्ववदाचरेत् ।
तद्वत् सकललिङ्गेषु मार्त्तिकेषु पटादिषु ॥ १४० ॥
चित्रेष्वपि पुरस्तेषां निरम्बुकुसु(मान्य ? मं य)जेत् ।
हेमरौप्यमयानां च रत्नजानां च पूजनम् ॥ १४१ ॥
सकलानां प्रकुर्वीत सर्वं निष्कललिङ्गवत् ।
ताम्रारकूटकांस्यानामम्लाद्यैः शोधनं स्मृतम् ॥ १४२ ॥
नैमित्तिकेषु स्नपनं कुर्यान्नित्यं न कारयेत् ।
निरपेक्षविसर्गेषु प्रागाराध्याष्टपुष्पया ॥ १४३ ॥
विसृज्य प्रणवं न्यस्य तस्मिंश्चण्डेशमर्चयेत् ।
तमप्युद्वास्य मन्त्रांश्च हृत्पद्मे योजयेत् क्रमात् ॥ १४४ ॥

अयं विधिः सामान्यस्थण्डिल एव । परिगृहीतानां स्थिरचललिङ्गानां विसर्गः सापेक्ष एव । यथा ब्रह्मशम्भुः —

"निरपेक्षविसर्गस्तु लिङ्गे साधारणे मतः ।
परिगृहीतालिङ्गे तु सापेक्षः प्राक् प्रदर्शितः ॥
चललिङ्गेऽपि सापेक्षो निरपेक्षः स्थण्डिले सदा ।"

इति । अत्र पौष्करेऽपि—

"परिगृहीतलिङ्गस्य स्थिरस्याथ चलस्य वा ।
निरपेक्षविसर्गे तु महान् दोषोऽभिधीयते ॥

आपिच

प्रशस्तकालनक्षत्रमुहूर्तादौ विधानतः ।
लिङ्गे प्रतिष्ठा क्रियते मन्त्रमूर्तिविधानतः ॥
तदाप्रभृति तल्लिङ्गे वसत्यात्मैव यच्छिवः ।
तस्य प्रतिदिनार्चायामावाहनविसर्जने ॥
तत्पूजाप्रतिपत्त्यर्थं सम्मते ह्योपचारिके ।
विश्वक्रियानुसन्धानं दृष्टं देहं शरीरिणः ॥
यथा जाग्रदवस्थायां तथास्यावाहनादिकम् ।
निवृत्ताखिलबाह्यार्थक्रिया चिन्मात्रशेषिता ॥

यथा सुषुप्त्यवस्थायां स्थितिर्दृष्टा शरीरिणः।
तथा पूजावसाने तु सापेक्षोद्वासनं स्मृतम्॥
लिङ्गे स्थिरे चले वापि प्रतिष्ठिताशिवस्य तु।
यथा हि तस्य कुण्डेऽग्नेः कालेकाले प्रबोधनम्॥
होमादौ क्रियते (चा)न्ते तत्र तस्यैव गोपनम्।
तथा स्यात् स्थापिते लिङ्गे विधिरावाहनादिकः॥
सापेक्षे तु विसर्गेऽर्घ्यं दत्त्वा शम्भोः पराङ्मुखम्।
मुद्रां परां दर्शयित्वा चोत्थाप्याङ्गानि चास्त्रतः॥
संहारिण्या शिवं ध्यात्वा मूर्तामूर्तौ(?)नियोजयेत्।
अष्टपुष्पिकयाभ्यर्च्य ध्यायेत् तं निष्कलात्मकम्॥
ततश्चार्घ्यादिपात्रेभ्यो मन्त्रान् संहृतिमुद्रया।
सम्पूज्य निष्क्रम्य बहिर्गर्भागारं तु वर्मणा॥
विहाय तद्बहिर्गत्वा क्षालिताङ्घ्रिकरद्वयः।
आचम्याथ शिवं ध्यात्वा च्युतस्खलितशुद्धये॥
जपित्वा संहितामन्त्रान् दानं दद्याच्छिवार्पणम्।”

इति।

इतीदमेकावरणं तु पूजनं सदाशिवस्योदितमिष्टसिद्धिदम्।
निरूप्य नानाविधशैवसंहिताः शिवङ्करं शैवजनप्रियङ्करम्॥ १७२॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
एकावरणार्चनापटलस्त्रयोदशः।

अथ चतुर्दशः पटलः।

पूजां तु पञ्चावरणं प्रवक्ष्ये सपञ्चमन्त्रात्मतनोरभीष्टाम्।
पञ्चाननस्येह सदाशिवस्याप्येकाननस्योदिततुल्यकल्पाम्॥ १॥

पूर्वोदितं सर्वमिहापि तुल्यं ससूर्यपूजादि शिवासनं च।
स्याद् ब्रह्मणा मूर्तिगतोऽत्र कश्चित् प्रयोगमञ्जर्युदितो विशेषः॥ २॥
ईशानसंज्ञास्त्विह पञ्चवक्त्रश्चतुर्मुखास्तत्पुरुषादयः स्युः।
विद्येश्वराश्चात्र चतुर्मुखास्ते शरत्रिशूलाशनिचापहस्ताः॥ ३॥

एषां च शेषं सकलं पुरोवद् वर्णाद्यमेकावरणोदितानाम् ।
ज्ञेयं च पञ्चावरणस्थितानां मूर्त्याह्वये यत्पटले तदुक्तम् ॥ ४ ॥

सपञ्चवक्त्रं कमले निषण्णं द्विपञ्चबाहुं स्फटिकावदातम् ।
कपर्दबद्धेन्दुकलं त्रिनेत्रं सदाशिवं षोडशवर्षकल्पम् ॥ ५ ॥

भुजङ्गघण्टाभयदाङ्कुशान् स्वैः पाशं भुजैर्दक्षिणतो दधानम् ।
तथा त्रिशूलं परशुं च खड्गं वज्रं च वह्निं क्रमशोऽपरैश्च ॥ ६ ॥

नागोपवीतं सुविभूषिताङ्गं तरक्षुचर्मोप्रतिमं वसानम् ।
आनीलकण्ठं भसिताङ्गरागं निःशेषसौन्दर्यविशेषरम्यम् ॥ ७ ॥

सञ्चिन्त्य तत्पङ्कजकर्णिकायां प्राग्वद् यजेदप्यथवैकवक्त्रम् ।
दोर्भिश्चतुर्भिर्युतमिन्दुमौलिं ज्ञानक्रियेच्छात्रिदृशं प्रसन्नम् ॥ ८ ॥

धृताक्षमालात्रिशिखं क्रमात् तं यजेत् सखट्वाङ्गकपालखण्डम् ।
विभूषितं शारदनीरदाभं कपर्दिनं पङ्कजसन्निविष्टम् ॥ ९ ॥

सहाङ्गवक्त्रावरणं तदेकं विद्येश्वरैरावरणं द्वितीयम् ।
उमादिभिश्चावरणं तृतीयमिन्द्रादिभिर्मातृगणैश्चतुर्थम् ॥ १० ॥

वज्रादिभिः प्रागुदितैर्दशास्त्रैः स्यात् पञ्चमं त्वावरणं यथावत् ।
हृत्तारपूर्वैर्निजनामधेयैर्यजेच्चतुर्थ्या(च)नमोन्तमेतान् ॥ ११ ॥

तद्यथा —

पद्मबाह्ये तु विद्येशानुमादीन् द्वारबाह्यतः ।
तद्बाह्यवीथ्यां लोकेशानस्त्राण्येषां बहिर्यजेत् ॥ १२ ॥

पूज्यो ह्यनन्तस्त्वथ सूक्ष्मनामा शिवोत्तमश्चापि तथैकनेत्रः ।
प्राग्दक्षिणाप्येन्दुदलान्तपीठव्यवस्थिताब्जेषु पृथङ्निविष्टाः ॥ १३ ॥

ततः शिखण्डी श्रीकण्ठश्चैकनेत्रोऽनलादिषु ।
+ + + + + + + + विद्येशास्त इमे क्रमात् ॥ १४ ॥

उमाचण्डौ च नन्दीशमहाकालौ गणेश्वरः ।
भृङ्गी च वृषभस्कन्दावुदग्द्वारादिषु स्थिताः ॥ १५ ॥

एत एवोत्तराशादिचतुर्द्वारेषु युग्मशः ।
पूज्याः पवित्रादिषु च स्थिरलिङ्गे जयावलौ ॥ १६ ॥

इन्द्रोऽग्निश्च यमश्चाथ निर्ऋतिर्वरुणस्तथा ।
वायुर्वैश्रवणस्तद्वदीशानश्चापि लोकपाः ॥ १७ ॥

ऊर्ध्वलोकाधिपो ब्रह्मा स्यादीशानेन्द्रमध्यगः ।
अधोलोकाधिपोऽनन्तो रक्षोवरुणमध्यगः ॥ १८ ॥

सुराणां तेजसां तद्वत् प्रेतानां रक्षसामपि ।
जलानां प्राणयक्षाणां ज्ञानानां लोकभोगिनाम् ॥ १९ ॥

क्रमादेतेऽधिपतयः सवाहपरिवारकाः ।
रुद्रपार्षदशब्दान्ताः पूज्यास्तत्पार्षदास्तथा ॥ २० ॥

धनदस्य समीपे तु सोमाय नक्षत्राधिपतय इत्यादिना सोमं च यजेत्। ओं हाम् इन्द्राय सुराधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदाय नमः । तत्पार्षदेभ्यो नमः ।

इत्यादिमन्त्रैः पूर्वादिदशाशासु यजेदिमान् ।
लोकपालावृतावेव पूज्याः स्युर्देवताः पुनः ॥ २१ ॥

ओं हां वृषभाय नमः ।

"इन्द्रः प्राच्यां वृषस्थाने ज्योऽस्ति वृषभो यदि ।
स्थिरलिङ्गे वृषः पूज्यो न चले वृषभः स्मृतः ॥"

इति ललिते ।

पश्चाद् यमाद् वीरभद्रः पूज्यः प्रत्यङ्मुखो भवेत् ।
प्राङ्मुखश्चैव विघ्नेशस्तयोर्मध्येन मातरः ॥ २२ ॥

ओं लं वीरभद्राय नमः । ओं नं गणपतये नमः । ओं व्यों ब्रह्माण्यै नमः । ओं मां माहेश्वर्यै नमः । ओं कां कौमार्यै नमः । ओं हां वैष्णव्यै नमः । ओं हें वाराह्यै नमः । ओं हों इन्द्राण्यै नमः । ओं हूं महाकाल्यै चामुण्डायै नमः । एतासामग्रतः पुनः सर्वमातॄरर्चयेत् । ओं मातृभ्यो नमः । ओं सर्वमातृगणेभ्यो नमः इति ।

निर्ऋतेः किञ्चिदाग्नेय्यां शास्तारं स्वाख्यया यजेत् ।
वायोस्तु निकटे किञ्चिदैशान्यां स्कन्दमर्चयेत् ॥ २३ ॥

कुबेरात् पश्चिमे किञ्चिद् यजेद् दुर्गां स्वमन्त्रतः ।
ईशानान्नैर्ऋते किञ्चिच्चण्डेशं मन्त्रतो यजेत् ॥ २४ ॥

पञ्चमस्य चतुर्थ्यान्त्यौ पञ्चमाग्निस्वरान्वितौ ।
प्रणवाद्यौ समुद्धृत्य चण्डशब्दं च वर्म च ॥ २५ ॥

अस्त्रं च सप्तवर्णः स्या(न्मनुश्च)ण्डेश्वरस्य तु ।
ओं चण्डाय नमः । ओं चण्डेशाय नमः इति चार्चयेत् ।

वृषभाद्यास्तु चण्डान्त्या याः प्रोक्ता देवतास्त्विमाः ॥ २६ ॥
स्थिरलिङ्गे तु पूज्याः स्युर्न चले स्थण्डिलेऽपि च ।

यथा ललिते —

"चले वा स्थण्डिले नित्यविधौ न वृषभं यजेत् ।
न सप्तमातरस्तत्र चण्डः स्कन्दोऽपि नेष्यते ॥
नैमित्तिके पवित्रादौ चैषां पूजा विशिष्यते ॥"

इति ।

लोकेशावरणाद् बाह्ये वज्रादीनि स्वनामभिः ॥ २७ ॥

स्वरूपतश्च संस्मृत्य दशदिक्षु क्रमाद् यजेत् ।
यथोपपत्त्या गन्धाद्यैर्यजेदावरणस्थितान् ॥ २८ ॥

यदसम्पन्नमेतेषां मनसा तत् प्रकल्पयेत् ।
उत्सवो बलिदानं च स्थिरलिङ्गे विधीयते ॥ २९ ॥

न चलस्थण्डिलार्चासु द्वयमेतत् समाचरेत् ।
विभवे सति गीतं च नृत्तं वाद्यादिकं च यत् ॥ ३० ॥

सामान्येन प्रशस्तं हि स्थिरेष्वपि चलेषु वा ।
तथाग्निकार्यं सर्वत्र प्रकुर्वीत विधानतः ॥ ३१ ॥

तद्वच्चैत्रपवित्राद्यं कुर्यान्नैमित्तिकं विधिम् ।
इत्थं सपञ्चावरणं शिवार्चनं प्रोक्तं यथावच्छिवतन्त्रचोदितम् ।
येनैहिकामुष्मिकभोगमुक्तयः प्राप्यास्त्वयत्नेन भवन्ति देहिनाम् ॥ ३२३ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
पञ्चावरणपूजाविधिश्चतुर्दशः पटलः ॥

अथ पञ्चदशः पटलः ।

अथाग्निशरणं प्रविश्य प्रदक्षिणं परिक्रामन् मूलं जपन् होमद्रव्याणि निरीक्ष्य कुण्डयोन्यभिमुख उपविश्य उदङ्मुखोऽथ (क ? स्व)दक्षा मूलं जपन् कुण्डं निरीक्ष्यास्त्रेण सन्ताड्य वर्मणाभ्युक्ष्यास्त्रेण खात्वास्त्रेणोद्धृत्य तेनावतीर्य हृदयेनाभिपूर्य तेन समीकृत्य सेचननिकुट्टनसम्मार्जनलेपनान्यस्त्रेण कृत्वा शान्त्यतीतां शान्तिं विद्यां प्रतिष्ठां निवृत्तिं च मध्यप्राग्दाक्षि(णो ? णपश्चिमो)त्तराशासु कुण्डान्ताः कलाः संस्मृत्याभ्यर्च्य तारादिस्वाख्याभिर्नमोन्तकमथ त्रिसूत्र्या कवचेन कुण्डं परिधाप्य ओं कलामयाय कुण्डाय नमः इति कलामयं परिकल्प्येष्ट्वाथ तत्त्वत्रयेण प्रागायता वा उदगायता वा समिदग्रेण तिस्रो रेखाः पुनरेका तिर्यगायतास्त्रमन्त्रेण कार्याः ।

तासां ब्रह्मविष्णुरुद्रशिवा देवताः । तथास्त्रेण त्रिभिः कुशैर्वज्रीकृत्य चतुष्पथं च कुण्डमध्ये ओं वागीश्वरीवागीश्वरासनाय नमः इति दर्भासनं विन्यस्य तत्र श्यामामृतुस्नातां नवयौवनालङ्कृतादिव्यरूपां दिव्याकल्पां रागिणीं वागीश्वरीं ध्यात्वा तारहृद्बीजनामभिर्नमोन्तमावाह्याभ्यर्च्य तदनुरूपरूपादिकं वागीश्वरं च तथाभ्यर्च्यानन्तरं सर्वात्मना जपितेन जनितमरणेर्मणिजं वा श्रोत्रियगृहाद् वाग्निमानीय ताम्रादिपात्रस्थितनिर्धूमेन्धनज्वालं ज्वलदङ्गारमात्रं क्रव्यादांशं परित्यज्य मूलेन निरीक्ष्यास्त्रेण संप्रोक्ष्य वर्मणावगुण्ठ्यास्त्रेण संरक्ष्य तमेवं भौतिकमग्निमुत्पतज्ज्योतिराकारं ध्यात्वा स्वयं शिवात्मा स्वललाटनेत्राद् ओं रौमित्यग्निबीजेन हृदयसम्पुटेन बैन्दवमग्निमादाय पूरकेण भौतिकेऽग्नौ संयोज्याथ स्वनामभिः कुण्डाग्निं रेचकेन पिङ्गलानाड्या समाकृष्य दक्षिणनासिकया निःसार्य पात्रस्थेऽग्नौ योजयेत् ।

इत्यग्नित्रयमेकीकृत्य अग्निचैतन्याय नमः इति स्वबीजेनाग्नौ चैतन्यं विन्यस्य तदेव बीजं दीर्घैः स्वरैः संयुतं हृदयादीनि षडङ्गानि भवन्ति । तैरग्निमभिमन्त्र्य वौषडन्तेन मूलेन धेन्वामृतीकृत्य हृदाभिपूज्य वर्मणा संरक्ष्य कराभ्यां गृहीत्वा वागीश्वरीवागीश्वरयोरस्त्रा(ग्नि?न्नि)रम्बरयोरीशानकोणे दिव्यशयने सङ्गतयोः क्षोभं विचिन्त्याग्निं पात्रस्थमाकण्ठादुद्धृत्य कुण्डस्योपरि त्रिः परिक्रम्य जानुभ्यां भूमौ स्थितः स्वाभिमुखमाग्निं शिवबीजं ध्यात्वा शक्तेर्नाड्या मूलेन प्राक्षिप्य विकीर्णमस्त्रेणैकीकृत्य वस्त्रं परिधाप्य शौचमाचमनादि मनसा सङ्कल्प्येन्धनैः कवचेनाच्छाद्य धवित्रेण प्रज्वाल्य गर्भरक्षार्थं दर्भकङ्कणमस्त्रजपितं वागीश्वर्या दक्षिणहस्ते बद्ध्वाथ गर्भाधानाय सद्योजातेनाभ्यर्च्य तिलैराहुतिपञ्चकं हृदयेन हुत्वा तथा वामेन शिरसा च पुंसवनमथाघोरेण शिखया च सीमन्तोन्नयनं कृत्वा ओं हां पुर्यष्टकदेहाय नमः इति देहं सङ्कल्प्य जलबिन्दुं कुशाग्रेण जीवभूतं शिखया प्रक्षिप्य तिलाहुतिपञ्चकेन सद्यादिपञ्चवक्त्राणि वह्नेः सङ्कल्प्याङ्गकल्पनां च तथा विधाय वक्त्रनिष्कृतिं च तद्वत सम्पाद्यानन्तरमेव वागीश्वरीं प्रसूतां जातकुमारमग्निं च ध्यात्वा तत्पुरुषेणाभ्यर्च्य वर्मणा हुत्वा जातकर्म भवति ।

अथार्घ्यजलैरस्त्रेण कुण्डं परिषिच्य परिस्तरणदर्भांश्च दर्भकङ्कणं च त्यक्त्वा सूतकनिवृत्तये वागीश्वरीं देवं कुमारं चास्त्रजलैः सम्प्रोक्ष्य स्नानवसनविभूषणादिकं मनसैव सङ्कल्प्य दर्भैः कुण्डकण्ठे परिस्तीर्य लालापनोदनार्थं पञ्चपलाशसमिधः साग्राः प्रादेशसम्मिता घृताक्ताः शस्त्रेण जुहोति ।

ततस्त्रिंशद्दर्भैः कृतया प्रागुत्तराग्रया वेण्या कुण्डं संवेष्ट्य यथोक्तपरिधीन् विन्यस्य तेषु परिधिविष्टरेषु प्राच्यां ब्रह्माणं दक्षिणे शङ्करं पश्चिमे विष्णुमुत्तरेऽनन्तमीश्वरं चावाह्य हृद्बीजपूर्वं स्वनामभिरभ्यर्च्य लोकपालांश्च स्वाशास्वस्त्राणि चेष्ट्वा शिवाज्ञां श्रावयेत् । भो भो ब्रह्मेन्द्रविष्ण्वाद्या देवाः सास्त्राः शिवाज्ञया शिवाग्निमेनं रक्षध्वं स्वावकाशेष्वास्थिता इति रक्षां विधाय (स्रुक्स्रुवावस्त्रे) प्रक्षाल्यादाय दर्भचतुष्टयसहितौ हृदा (न ? निरी) क्ष्यास्त्रेण प्रताप्य शिरसा प्रक्षाल्य पुनः प्रताप्य संक्षाल्य स्रुवं विन्यस्य स्रुचमादाय दर्भाग्रैः स्रुचोऽग्रं ओं हां शिवतत्त्वायेति सम्मृज्य मध्यं दर्भमध्येन विद्यातत्त्वायेत्यथ मूलं दर्भमूलेनात्मतत्त्वायेति सम्मृज्य पुनर्मूलमध्याग्रेषु

ब्रह्मविष्णुरुद्रात्मतत्त्वाद्यधिपतीन् संस्मृत्योल्लिख्य प्रक्षाल्य दक्षिणतः प्रस्तरदर्भेष्वधोमुखं विन्यस्य तद्वत् स्रुवमपि संस्कृत्य स्रुचः समीपेऽधोमुखं दर्भेषु विन्यस्य स्रुचि शक्तिं स्रुवे शिवं च स्वनाम्नाभ्यर्च्य च त्रिसूत्र्यावेष्टितग्रीवौ कर्मयोग्यौ भवतः ।

पुनः कुण्डाद् दक्षिणतो ब्रह्माणं कूर्चेष्विष्ट्वा कौबेर्यां दर्भासनं दत्त्वा ग्रन्थं प्रणीतापात्रं सपवित्रमद्भिरापूर्य सकुशाभ्यां पाणिभ्यामानासमुद्धृत्य ब्रह्मणानुज्ञातः प्रणीतासने ओं हां वरुणोऽसीति विन्यस्य ओं हां यज्ञारिसूदनाय विष्णवे नमः इति प्रणीतासु विष्णुमभ्यर्च्याथाज्यं यथोक्तमुक्तपात्रे गालितं हृदा निरीक्ष्यास्त्रेण प्रोक्ष्योत्तरेऽङ्गारेऽधिश्रित्य कुण्डोर्ध्ववह्निकोणे प्रताप्य स्वयं ब्रह्ममूर्तिः ओं हां ब्रह्मणे स्वाहेति कुशाग्रेणाज्यबिन्दुं हुत्वाथैशान्यां कुण्डोपरि कुशैः प्रताप्य स्वयं विष्णुमूर्तिः ओं हां वि(ष्णु ? ष्णवे)स्वाहेति कुशाग्रेणाज्यबिन्दुं हुत्वाज्यं योनौ कुशेषु विन्यस्य हृदयेनाभिमन्त्र्य दर्भद्वयं प्रज्वाल्य कवचेनाज्येऽभिद्योत्य त्रिष्कृत्वाथाग्नौ दर्भोत्मुकं प्रास्य हस्तौ प्रक्षाल्य तौ शुक्लकृष्णौ पक्षौ संस्मृत्य साङ्गुष्ठानामिकाभ्यां पवित्राग्रे मूले च गृहीत्वात्माभिमुखं कवचेन त्रिरुत्प्लाव्य पवित्रं प्रक्षाल्य पुनरग्नेरभिमुखमुत्प्लाव्य प्रक्षाल्य पुनर्हृदयेनोभयत उत्प्लाव्य पवित्रमुन्मुच्य प्रक्षाल्याग्नौ प्रास्येदिति पवित्रीकरणम् ।

अथ कुशानुद्योत्याज्ये नीराज्याग्नौ क्षिपेत् । अथ दक्षिणोत्तरयोराज्यभागयोः पूर्वापरपक्षाविडापिङ्गलानाडियुक्तौ मध्ये च पर्वणी सुषुम्नां च सङ्कल्प्य ओं हां अग्नये स्वाहा ओं हां सोमाय स्वाहा इति दक्षिणोत्तरयोराज्यभागयोराज्यं स्रुवेणादायाग्नेर्दक्षिणवामनेत्रयोर्हुत्वानन्तरं ओं हां अग्नीषोमाभ्यां स्वाहेति ललाटनेत्रे जुहोति । अथाज्यं गृहीत्वा ओं हां अग्नये स्विष्टकृते स्वाहेति अग्नेर्मुखे जुहुयादित्यग्नेर्वक्त्रोद्घाटनं विधाय धेन्वामृतीकृत्यास्त्रेण संरक्ष्य कवचेनावगुण्ठयेदित्याज्यसंस्कारः ।

अयं विधिः पूर्वपक्षे । विशेषश्चापरपक्षे अग्नये सूर्यायाग्निसूर्याभ्यामिति नेत्रेषु जुहोति शेषं पूर्ववत् । अथ संस्कृत्याज्यबिन्दुं घृतक्षीरमध्वादिषु प्रक्षिप्य हृदयेनाभिमन्त्रयेत् । तानि च संस्कृतानि भवन्ति । अथ शिवाग्निं सदाशिववत् पञ्चवक्त्रं जटामकुटं सप्तजिह्वं (प्री ? प्र)तिमुखं त्रिनेत्रमभयवरदशक्तिस्वस्तिकचतुर्बाहुं सुगन्धमाल्याम्बरधरं दिव्याभरणं प्रसन्नाननं ध्यायेत् । चतु-

मुखेषु चतस्रो जिह्वाः तिस्रो मध्यमे । ताश्च दीक्षाप्रतिष्ठादिषु सात्त्विकाः क्षुद्रेषु तामसाः काम्येषु राजसाः । तद् यथा —

+ + + + + + + + + + + + + + + + +।
हिरण्या गगना रक्ताः स्युर्जिह्वाः सप्त सात्त्विकाः ॥ १ ॥
काली कराली च विलोहिता च मनोजवा चैव तु धूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरुचिश्च जिह्वास्तमोगुणाः सप्त भवन्ति वह्नेः ॥ २ ॥
कराली धूमिनी श्वेता लोहिता भद्रलोहिता ।
सुवर्णा पद्मरागा च जिह्वाः सप्तेति राजसाः ॥ ३ ॥

तमेवंभूतं शिवाग्निं संचिन्त्याथ वक्त्राभिघारणं कुर्यात् । ओं हां सद्योजातमूर्तये स्वाहा । ओं हां वामदेवगुह्याय स्वाहा । ओं हां अघोरहृदयाय स्वाहा । ओं हां तत्पुरुषवक्त्राय स्वाहा । ओं हां ईशानमूर्धाय स्वाहा इति यथावक्त्रमभिघार्यानन्तरमेव वक्त्रसन्धानं विदध्यात् । ओं हां सद्योजातमूर्तये वामदेवगुह्याय स्वाहा । ओं हां वामदेवगुह्यायाघोरहृदयाय स्वाहा । ओं हां अघोरहृदयाय तत्पुरुषवक्त्राय स्वाहा । ओं हां तत्पुरुषवक्त्रायेशानमूर्धाय स्वाहा इति द्वन्द्वशो हुत्वा वक्त्राणि सन्धायाथेशानादिबीजपञ्चकं प्रणवपूर्वकं सद्यान्तमुच्चार्याज्यं स्रुवेण गृहीत्वेशानतत्पुरुषाघोरवामदेवसद्योजातेभ्यः स्वाहेत्याग्निकोणाद् वायुकोणं तथा नैर्ऋत्यन्तं तस्माच्चैशानान्तमविच्छिन्नया घृतैकधारया हुत्वा वक्त्रैकीकरणं कुर्यात् । किञ्चान्येषां वक्त्राणां प्रधानवक्त्रेऽनुप्रवेशो वक्त्रैकीकरणम् । तच्च नित्यकर्मणि सद्यस्य प्रधानत्वादन्येषां तदनुप्रवेशो द्रष्टव्यः । यथा संहितायां —

"नित्यकर्मणि सद्यस्य मुख्यत्वमधिगम्यते ।
अन्यत्रोर्ध्वमुखं मुख्यं गुणत्वमितरस्य तु ॥
नैमित्तिके च काम्ये च यस्य वक्त्रस्य मुख्यता ।
तत्र तत्र समुद्दिष्टं तस्यैकीकरणं परैः ॥
तथा(मुमु)क्षोर्दीक्षायां मुख्यं हीशमुखं स्मृतम् ।
इष्टसिद्ध्याप्तये पूर्वं दक्षिणं क्षुद्रकर्मसु ॥
उत्तरं वामदेवाख्यं शान्तिकं पौष्टिकं तथा ।"

इति । प्रधानवक्त्रं नित्यकर्मणि सद्योजातं कुण्डप्रमाणं स्मृत्वा सद्योजाताय नम इत्यभ्यर्च्य ओं हां ईशानाय स्वाहेति पञ्चाहुतीर्हुत्वा ओं हां शिवाग्निर्हुताशनोऽसीति नाम कुर्यात् ।

ततो वागीश्वरीवागीश्वरौ स्वनाम्नाराध्य सकृत्सकृदाज्यं हुत्वा तौ द्वादशान्ते विसर्जयेत् । अथैवं पञ्चसंस्कारसंस्कृतादग्नेः किञ्चिदुद्धृत्य वल्यादौ रक्षयेच्चरुपुरोडाशधूपाद्यर्थम् । यथोक्तं संहितायां —

"पाक्याश्चरुपुरोडाशाः पञ्चसंस्कारसंस्कृते ।
अनावाहितदेवेऽग्नौ होमस्त्वावाहिते भवेत् ॥"

इति ।

अथ मूलेन वौषडन्तेन पृथगाज्याहुतित्रयेणैकादशसंस्कारान् कुर्यात् । तद्यथा — उपनिष्क्रामणान्नप्राशनचौलोपयनोपाकर्मव्रतसंग्रहणव्रतोत्सर्जनगोदानसमावर्तनविवाहाधानानि मूलेनैव कुर्यात् । अत्र मञ्जर्यामुक्तं — "शिवाग्नेः संस्कारेषु प्रकारभेदो दृश्यते गर्भाधानपुरस्सरांश्च सकलाः कुर्यात् क्रियाः षोडश" इत्यादिभिः श्लोकैः यदुक्तं दशाक्षरव्योमव्यापिना गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणं पृथगष्टाष्टाहुतीभिश्चैकैकशः क्रमाद्धुत्वा निष्पाद्य शिवगायत्र्योपनिष्क्रामणमीशानेनान्नप्राशनं तत्पुरुषेण चौलं पुनरीशानेनोपनयनमथ सद्यादिब्रह्मभिरुपाकर्मव्रतसङ्ग्रहणव्रतोत्सर्गगोदानसमावर्तनादि क्रमेण कृत्वा दशाक्षरव्योमव्यापिना विवाहं प्रासादेनाग्न्याधानमित्युक्तयोर्मार्गयोरन्यतमेन संस्कृतेनैवाग्निना नित्यनैमित्तिकक्रियाकाण्डकाम्यानि शैवानां सिध्यन्ति नान्यथा । अथ पूर्णां जुहोति । ततः स्रुचमाज्येन स्रुवेणापूर्य स्रुगुपरि स्रुवमधोमुखं निधाय स्रुगग्रे पुष्पं च तद्दण्डौ संहतौ शङ्खमुद्रया पाणिभ्यां गृहीत्वोत्थाय श्लिष्टसमपादस्तिष्ठन् स्रुगग्रदत्तदृष्टिर्हृदययुक्तमूलं वौषडन्तमुच्चार्याज्यधारां शिवाग्नेर्लब्धानुज्ञः शिवासनादिक्रमेण साङ्गमूर्त्यावरणमग्नेर्हृदयकमले शिवमावाह्य प्ररोचनान्तं कृत्वार्घ्यादिभिर्दीपान्तैर्यथोपपत्त्यभ्यर्च्य शिवयोर्नाडीसन्धानं विदध्यात् । यथा पौष्करे —

"वह्निस्थशिवनासाग्रनिर्गतज्योतिषा सह ।
सन्धानं पिङ्गलानाड्या कृत्वा कर्मसमापनात् ॥
हूयमानं हविर्यत् तत् सुधाविष्य(न्दः?न्दि) चिन्तयेत् ।
द्वयोः सुषुम्नामार्गेण शिवस्याह्लादकारणम् ॥"

इति ।

अथाज्यतण्डुलव्रीहिसमिच्चरुभिर्यथोद्दिष्टैर्हविर्भिर्मूलेन जुहुयात् । तत्र शिवाद् दशांशं मूर्तीनामङ्गानां च नैमित्तिकेष्वपि तत्र तत्र विहितैर्हविर्भिर्यथोद्दिष्टं जुहोति । अत्र ब्रह्मशम्भुः—

"अग्नेर्वर्णांश्च गन्धांश्च शिखाः शब्दांश्च लक्षयेत् ।
सिद्ध्यसिद्ध्योरभिव्यक्तौ भावितेनान्तरात्मना ॥

स्निग्धः प्रदक्षिणावर्तः श्रुतिप्रच्छादितध्वनिः ।
नित्यमूर्ध्वगमोच्छिष्टान् संपिण्डितशिखः शुभः ॥

अप्रदीप्ते न होतव्यं सधूमे नाप्यनिन्धने ।
प्रदीप्ते लेलिहानेऽग्नौ होतव्यं कर्मसिद्धये ॥"

इति । तथाच ललिते —

"शुक्लपीतारुणशिखो विद्युद्वर्णोऽथ पिङ्गलः ।
स्निग्धः प्रदक्षिणावर्तः कर्मसिद्धिकरोऽनलः ॥

कृष्णधूसरधूम्राभः कर्बुरो वाप्रदक्षिणः ।
रूक्षो वा विष्फुलिङ्गाढ्यः प्रोक्तोऽग्निरशुभावहः ॥

तच्छान्त्यै संहितामन्त्रैः शिवव्याहृतिभिस्तथा ।
तिलाज्याभ्यां तथा हुत्वा शुभमेव फलं भवेत् ॥ "

इति । तत्तन्मुद्राभिस्तत्तज्जुहुयात् । नित्याद् द्विगुणं पर्वसु पूजाजपहोमान् कुर्यात् । चरोरवदानत्रयं क्रमेण पृथक्पृथगभिघार्य स्रुचा मूलेन जुहुयात् । सकृन्मूर्त्यङ्गा(नाऽनि) हस्तेनाथ प्रोक्षणीजलैरस्त्रेण परिषिच्य ताम्बूलं च निवेद्य प्रदक्षिणनमस्कारस्तुतिभिः प्रसाद्य भस्म चालभ्य क्षमस्वेत्युक्त्वा नाडीसन्धानं विसृज्य प्रणवहृदयबीजादिभिर्व्याहृतीभिर्हुत्वा मूर्त्यङ्गान्यस्त्रेणोद्धृत्याग्निस्थे शिवे यथास्थानं संयोज्य देवं चाग्नेर्हृदये सन्निरुध्य नैत्यिकमग्निं तस्मिन्नेव कुण्डे रक्षयेत् ।

अथवा प्रतिदिनमग्निं शिवं च सम्पूज्य संहारमुद्रया पूरकेण वह्नेर्मन्त्रान् संहृत्य शिवमग्निमपि क्रमेण द्वादशान्तमानीय स्वहृदि सन्नियोजयेत् ।

शिवमग्निं स्वबिन्दुस्थाने हृदये वोद्वास्य प्रत्यहमग्निं जनयित्वा जुहोति । मार्गगमनादौ कुण्डाभावे गोमयेन गोचर्ममात्रं चतुरश्रमण्डलमुपलिप्य तत्र विशुद्धाभिः सिकताभिः स्थण्डिलं कृत्वा निरीक्षणादिभिः संस्कृत्याग्निमाधाय

होतव्यम् । अत्र साशिवाग्नेः प्रमादाद् निर्वाणे सति त्रिरात्रमुपोषितोऽघोरं जपेत् । आज्यतिलैर्यथाशक्ति जुहुयात् । यद्यपि उद्वासितशिवशिवाग्निनिर्वाणेऽहोरात्रमुपोष्याघोरसहस्रजपहोमौ कृत्वा पुनराधाय जुहुयात् । नित्यकर्मणि स्रुक्स्रुवकर्मणि परिधिवेणीनां प्रक्षालनेन शुद्धिः, नित्य(कर्महो)मोपयोगित्वं च निर्दिष्टम् । साशिवेऽग्नौ भस्मादिकं निर्माल्यं न भवति । तदेवोद्वासितशिवे निर्माल्यमस्पृश्यं स्यात् । एवं शिवमग्निं च निरुध्य परिधिविष्टरान् देवांश्चोद्वास्य कुण्डस्य पुरतो वोत्तरे गन्धादिभिरिष्ट्वा चरुशे(षे)ण बलिं दद्यात् ।

तत्र प्रागादिचतुर्दिक्षु रुद्रमातृगणयक्षेभ्योऽथैशानवायव्यान्तेषु ग्रहासुरराक्षसनागेभ्यस्तन्मध्ये नक्षत्रेभ्यः पुनर्नक्षत्रबाह्यतो रुद्रादीनामन्तरीशानादिकोणेषु राशिभ्यो विश्वदेवगणेभ्यः क्षेत्रपालाय दुर्गायै च तारादिस्वनामभिः स्वाहान्तैर्बलिं दत्त्वा द्वितीयमण्डलके पूर्वादिदशदिक्षु यथाक्रममिन्द्रादिभ्यस्तारादिस्वनामभिर्नमोन्तैर्बलिं दत्त्वा मण्डलबाह्ये सर्वतो विकिरन् ओं वायसादिभ्यः स्वाहेति दद्यात् । अथ बलिमन्त्रान् संहृत्य प्राङ्गणे कृतमण्डले

ये रुद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः ।
सौम्याश्चैव तु ये केचित् सौम्यस्थाननिवासिनः ॥ ४ ॥

मातरो रौद्ररूपाश्च गणानामधिपाश्च ये ।
सर्वे सुप्रीतमनसः प्रतिगृह्णन्त्विमं बलिम् ॥ ५ ॥

सिद्धिं यच्छन्तु मे क्षिप्रं भयेभ्यः पान्तु मां सदा ।

ओं छं छः हुं फट् । अनेन बलिं दत्त्वा हस्तपादौ प्रक्षाल्याचम्य प्रातिलोम्येन लिङ्गान्तिकेऽर्घ्यं दत्त्वा भोगाङ्गानि प्राग्वत् संहृत्य लिङ्गे नियोज्य भगवन्तमुक्तप्रकारेण विसर्जयेत् ।

अथ शिवाश्रमी गृहस्थश्चेद् भोक्तुमिच्छन् चुल्लिहोमगृहबलिवैश्वदेवदशबलीन् कृत्वा भुञ्जीत । तत्र पाकाग्रान्नं पात्रे प्रक्षिप्य चुल्ल्यामग्निं प्रज्वाल्य गोमयेनोपलिप्यार्घ्यजलैः परिषिच्य गन्धपुष्पाक्षतैराग्निं च वक्ष्यमाणदेवताश्चाराध्यान्नमाज्यमिश्रं जुहोति । अग्नये सोमाय सवित्रे बृहस्पतये प्रजापतये विश्वेभ्यो देवेभ्यः सर्वेभ्यो देवेभ्यः अग्नये स्विष्टकृते च प्रणवादिनमोन्तैः सम्पूज्य स्वाहान्तैर्हुत्वार्घ्यजलैः परिषिच्य गृहदेवताभ्यो बलिमुपाहरेत् । तत्र चुल्ल्यां दक्षिणवामयोः धर्मायाधर्माय सन्धाभाण्डे संसारपरिवर्तनाय उदक-

भाण्डे जलामृताय वरुणाय गृहस्य प्रधानद्वारे विघ्नराजाय द्वारश्रियै च पेषण्यां सुभगे उलूखले ओं रौद्रे कोट्टहरिके मुसले बलभद्रप्रियाय महाप्रहरणाय मार्जन्यां मृत्यवे देवोचिते शयनीयाशिरसि कामाय कुसुमायुधाय मध्यस्तम्भस्याधः स्कन्दाय गृहाधिपतये तदनन्तरं वास्तुमध्ये वृत्तमण्डलके वैश्वदेवबलिमुपाहरेत् । तत्र मध्ये ब्रह्मणे वसुभ्यः रुद्रेभ्यः आदित्येभ्यः साध्येभ्यो नक्षत्रेभ्यः पृथिव्यै पृथिवीचरेभ्यो भूतेभ्यः अन्तरिक्षाय अन्तरिक्षचरेभ्यो भूतेभ्यः अधश्चरेभ्यः दिवे दिविचरेभ्यो भूतेभ्यः दिग्भ्यः दिक्चरेभ्यो भूतेभ्य इति प्रदक्षिणवृत्त्या बलिं दत्त्वा विष्णवे सर्वभूतपतये ध्यानगम्याय इति मण्डलमध्ये एतेषां प्रणवादिनमोन्तैः स्वनामभिर्बलिं विक्षिप्याथ प्राचीनावीती मण्डलाद् बहिर्दक्षिणतोऽपसव्येन सोमः पितृमान् यमोऽङ्गिरस्वानाग्निकव्यवाहनादयो ये पितरः तान् पितॄन् स्वधा नमः अग्निपितृभ्यः स्वधा नमः सर्वपितृभ्यः स्वधा नमः इति यथाक्रमं प्रक्षिप्य बहिर्निर्गत्य दिग्देवताभ्यो बलिमुपाहरेत् ।

तत्र ओं इन्द्राय प्रतिगृह्ण नमः ओं ऐन्द्र्यै दिशे प्रतिगृह्ण नमः अथाग्नय इत्यादिभिश्चैवमीशानान्तमष्टलोकपालानादिशान्तं प्रक्षिप्य ओं सुपर्णासौपर्ण्यै चेत्यूर्ध्वायां ब्रह्मदिशि नागाय नागमात्र इत्यनन्तादिश्यधः इति गन्धादिभिरभ्यर्च्य ओं वायसाः क्रिमयः प्रेताः पतिताः श्वानः श्वपचाः समयभेदकाः ये चान्ये ते इमं बलिं प्रतिगृह्णन्तु नमः इति गन्धपुष्पान्वितं प्रक्षिप्य शेषं भूमौ विनिक्षिप्य हस्तौ पादौ प्रक्षाल्याचम्यातिथीनभ्यागतानाश्रितान् बालान् वृद्धानन्धान् दीनाननाथानन्यानप्यर्थिनोऽन्नेन पानेन च स्वशक्त्या तोषयित्वा भोजनोक्तविधानेन भुञ्जीत ।

इत्युक्तं यजनमिदं शिवा(यथाग्ने ? गमाग्नौ)
शैवानां प्रियमिति शैवतन्त्रसिद्धम् ।
येन स्यात् प्रतिदिवसं सदेशपूजा
सम्पूर्णा दिशति फलं जगद्धितं च ॥ ६$\frac{१}{२}$ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापादेऽग्निकार्यपटलः पञ्चदशः ॥

अथ षोडशः पटलः ।

अथ प्रक्षीणदोषाणां शिवानुध्यानयोगतः ।
शक्तिपातो भवेत् तेन धीप्रसादस्ततोऽपिच ॥ १ ॥

गुरूपसदनं तस्माच्छिवदीक्षाभिलभ्यते ।
मलं कर्म च माया च पाशबन्धस्य हेतवः ॥ २ ॥

तद्विशेषाच्छिवज्ञानमनुग्राह्यस्य जायते ।
सा दीक्षा दी क्षयेत्यस्माद्धातोः पाशक्षयो यतः ॥ ३ ॥
दीक्षेति कथ्यते जन्तोरनुग्राह्यस्य वै पशोः ।
तत्रानुग्राह्यस्त्रिविधो विज्ञानकलः प्रलयाकलः सकलश्चेति ।
मलैकबन्धः प्रथमो द्वितीयो मलकर्मवान् ॥ ४ ॥
कर्ममायामलैर्युक्तस्तृतीयः सकलः स्मृतः ।
विज्ञानं विपरीतात्मज्ञानमज्ञानमेव तत् ॥ ५ ॥

कलबन्धनधात्वर्थाद् विज्ञानकल उच्यते ।
अज्ञानात् (क)र्मबद्धोऽसौ प्रलयाकल इत्यतः ॥ ६ ॥

प्रकर्षात् तु लयं प्राप्तं ज्ञानमस्येति कथ्यते ।
त्रिविधैस्तु तथा बन्धैर्मायाकर्ममलाह्वयैः ॥ ७ ॥
वर्तमानः सहेत्यस्मात् सकलो यः स कथ्यते ।
एते शिवस्यानुग्राह्याः श्रेष्ठमध्याधमास्त्रयः ॥ ८ ॥

(अनुग्रहो)ऽपि द्विविधः शिवस्य करुणानिधेः ।
साधारश्च निराधारोऽनुग्राह्यानुगुणः पृथक् ॥ ९ ॥

अत्र निराधारसाधारानुग्रहानुगुणा दीक्षा । दीक्षा च निरधिकरणा साधिकरणा चेति द्विप्रकारा । यथाह भोजराजः — "आचार्यनिरपेक्षेण भगवता स्वशक्त्यानुग्रहरूपया तीव्रतीव्रतरशक्तिपातेन विज्ञानकलप्रलयाकलानां या क्रियते सा दीक्षा निरधिकरणा । यत्राचार्यमूर्तिस्थेन भगवता मन्दमन्दतरतीव्रशक्तिपातेन क्रियमाणा सकलानां (सा) साधिकरणा" (इति) । सा च सबीजा निर्बीजा चेत्यधिकारवशात् ।

सबीजा समयोपेता समयाचारसंयुता ।
पाशच्छेदादिसंयुक्ता विदुषामेव सा स्मृता ॥ १० ॥
निर्बीजा तु पुनर्दीक्षा राज्ञां बालाबलास्वपि ।
अतिवृद्धातिरुग्णानां बालिशानां च शस्यते ॥ ११ ॥
साधकाचार्ययोर्नित्यक्रियानैमित्तिकादिषु ।
स्वपरार्थाधिकारित्वात् सबीजैव विधीयते ॥ १२ ॥
सा च क्रियावती पूर्वा ज्ञानवत्यपरा स्मृता ।
या मण्डपरजःकुण्डपाशच्छेदाध्वशोधनैः ॥ १३ ॥
द्रव्यहोमादिसंयुक्ता दीक्षा सोक्ता क्रियावती ।
विना मण्डपकुण्डाद्यैर्मनोव्यापारमात्रतः ॥ १४ ॥
सम्यग्ज्ञानावबोधान्ता दीक्षा ज्ञानवती स्मृता ।

सा च चतुष्प्रभेदा चाक्षुषी स्पर्शदीक्षा वाचिकी मानसी चेति तद् यथा —

ध्यायञ् शिवात्मा समवेक्ष्य शिष्यं तस्मिन्नियम्याध्वगणं दृशैव ।
छित्वा तु पाशांश्च शिवत्वमस्मिन् सम्पादयेद् या खलु चाक्षुषी स्यात् ॥ १५॥
रुद्रः स्वयं मन्त्रतनुः स्वहस्ते पद्मे समूर्त्यङ्गयुते समूले ।
स्मृत्वा शिवं यत् स्पृशतीह तेन सा स्पर्शदीक्षा च्युतपाशबन्धा ॥ १६ ॥
विश्वाध्वसंयुक्तसदाशिवात्मा मन्त्रान् स्ववक्त्रे विनिधाय सर्वान् ।
छित्त्वास्य पाशान् वचस क्रमेण संदीक्षयेद् यत्र तु वाचिकी स्यात् ॥ १७ ॥
स्वयं शिवात्मा निखिलाध्व युक्तः स्वहृत्सरोजे सकलं समन्त्रम् ।
स्मरञ् शिवं मानसदीक्षयामुं नियोजयेज्ज्ञानवशाच्छिवत्वे ॥ १८ ॥

क्रियावत्यपि समयदीक्षा निर्वाणदीक्षा साधकदीक्षा चेति बहुविधा। यत्र मलशोधनमात्रेण क्रियया संस्कृत्य शिष्यं समये प्रवेश्य रुद्रात्मतां चापादयेत् सा समयदीक्षा ।

षड् यत्र शुध्यन्त्यध्वानः क्रियावाप्तिश्च पुष्कला ॥ १९ ॥
तत् तु पाशशिखाच्छेदो योगः शिवपदे तथा ।
निर्वाणदीक्षा सा प्रोक्ता विशेषेणाधिकारिणाम् ॥ २० ॥

यस्यां तु पाशविश्लेषान्निवृत्त्यादिषु शोध्यते ।
अणिमादिगुणावाप्तिर्योगश्चैवैश्वरे पदे ॥ २१ ॥
अधिकारश्च तत्रादौ दीक्षा सा साधकाह्वया ।

पूर्वोदितैरपि गुणैः सह दीक्षया स्यान्निर्वाणया भवसमुद्रतरीः स्वसंवित् ।
कार्यक्षयादितनुधर्मविपर्ययेण सर्वज्ञतादिगुणलब्धवरं शिवत्वम् ॥ २२ ॥
शिष्यैर्गुरुः परिवृतो विधिनावगाह्य साध्यक्रियाः परिसमाप्य समाहितात्मा ।
दीक्षालयं तु नवसप्तकपञ्चहस्तं शक्त्या कृतं तु चतुरश्रमतीव रम्यम् ॥ २३ ॥
अश्वत्थतोरणचतुष्टयमूलसंस्थैर्द्वारेषु पूर्णकलशैश्च चतुर्दिशासु ।
लाजाक्षतैरपि फलैः कुसुमैर्विचित्रैः संशोभितं च विविधाङ्कुरपालिकाभिः ॥
चन्द्रांशुपाण्डुरविशुद्धवितानमध्यं पर्यन्तलम्बितदुकूलविशेषशोभम् ।
मुक्तावलीकुसुमदामकृतावलम्बं बाह्ये च शुक्लनवकाण्डपटं समेत्य ॥ २५ ॥
सूक्ष्मावदातवसनः सितमाल्यगन्धो रत्नैर्विचित्रकनकाभरणोज्ज्वलाङ्गः ।
धौताङ्घ्रिपाणियुगलः सलिलैर्विशुद्धैराचम्य मौननिरतस्तु पवित्रपाणिः ॥ २६ ॥

अथ सामान्यार्घ्यहस्तोऽस्त्रेण द्वाराणि सम्प्रोक्ष्य पश्चिमद्वारे नित्यवद् द्वारपालानिष्ट्वा पार्ष्णित्वा तच्छोटिकातर्जनीत्रयैः (?) विघ्नानुत्सार्य नाराचास्त्रं क्षिप्त्वान्तः प्रविश्य प्रतिनिवृत्त्य देहल्यां पुष्पेणास्त्रं निधाय मण्डपं तत्त्वदृष्ट्या वीक्षमाणः प्रदक्षिणं पारक्रम्य ब्रह्मस्थाने पुष्पं निक्षिप्य स्वासनमिष्ट्वोदङ्मुख उपविश्य भूतशुद्धिं च कृत्वा

प्राक् प्राकृतादिभवदेहमपास्य बुद्ध्या सोऽहं सदाशिव इति स्वतनुं विभाव्य ।
गन्धानुलिप्तशिवहस्तनिविष्टमन्त्रो नित्यक्रमेण विधिवत् सकलीकृतात्मा ॥ २७ ॥
हृत्पद्मकोटरशिवं मनसार्चयित्वा नाभिस्थमग्निमपि बिन्दुगतं च शम्भुम् ।
तालत्रयेग च बहिः प्रविधाय रक्षां खातास्त्रवप्रपरिनिष्ठितशक्तिभिश्च ॥ २८ ॥

अथापाद्य विशेषार्घ्यं स्नानद्रव्याणि शोधयेत् ॥ २९ ॥
कृत्वा तु पञ्चकोष्ठानि समसूत्रानिपाततः ।

तत्र मध्ये शिवतत्त्वे सुप्रतिष्ठिताख्ये कोष्ठे क्षीरमीशानमूलाभ्यां पात्रे समापूर्य प्राच्यां सदाशिवतत्त्वे स्वशान्ताख्ये कोष्ठे तत्पुरुषेण वर्मणा च दधि,

दक्षिणे विद्यातत्त्वे तेजोरूपाख्येऽघोरेण शिखया च घृतं, सौम्ये पुरुषतत्त्वे निवृत्तिकोष्ठे वामदेवेन शिरसा च रत्नतोययुक्तं गोमूत्रं, पश्चिमे कालतत्त्वेऽमृताख्ये कोष्ठे सद्योजातेन हृदयेन च गोमयमापूरयेत् । एकद्वित्रिचतुष्पञ्चवारं मध्यादिषु जपेत् । कुशोदकं शिवगायत्र्या षड्वारमभिमन्त्र्य यथाक्रमं क्षीरादिषु पञ्च पञ्चसु प्रक्षिपेत् । तदनु दध्यादीनि मध्यपात्रे सुप्रतिष्ठिताख्ये क्षीरेण संयोजयेत् । एकीकृत्य मथित्वा सदाशिववदभिपूज्य स्थापयेत् । अथ तत्त्वसंख्यकुशकूर्चज्ञानखड्गं सम्पाद्य विकिरानायोजयेत् ।

"लाजचन्दनसिद्धार्थभस्मपुष्पकुशाक्षताः ।
हेतयोऽस्त्रेण सप्तैते विधातव्या विमिश्रिताः ॥"

इति ब्रह्मशम्भुः ।

"तिललाजयवा दूर्वाः सिद्धार्थाः कुसुमानि च ।
ईषच्चन्दनकल्केन मिश्रिता विकिराः स्मृताः ॥"

इति मतङ्गे ।

"अस्त्रेणामन्त्र्य धान्यानि संक्षिपेच्चास्त्रवत् परि ।
तत्पाताद् विघ्नबृन्दानि द्रवन्त्यत्र भयाद् भृशम् ॥"

इति पराख्ये । इत्येषामेकप्रकारं विकिरान् सम्पादयेत् । उष्णीषं चाचार्यस्य,

"उष्णीषं धवलं सूक्ष्ममाचार्यो धारयेत् सदा ।
षडङ्गुलोच्चं सुषमं प्रादक्षिण्याभिवेष्टितम् ॥"

इति पौष्करे ।

"मन्त्रसंहितया लब्धमुष्णीषं धवलं गुरुः ।
षडङ्गुलोच्चं शिरसा धारयेन्नृपपट्टवत् ॥"

इति बृहत्कालोत्तरे ।

तद्वदुत्तरीयं च धवलं यज्ञोपवीतवद् धारयेत् । द्विजकन्ययावर्तितं नवगुणं सूत्रं पाशसंयमनाय सम्पाद्य शिखयालभ्य पात्रे निदध्यात् ।

मण्डलाद् द्विगुणं सूत्रं नवतन्तुविनिर्मितम् ।
करणीत्युच्यते तद्वद् घटिका चातिपाण्डरा ॥ ३० ॥

तदुभयं मूर्तिमन्त्रैर्जपितं निदध्यात् । अयोमयीं कर्तरीं च तन्तुशिखाच्छेदनयास्त्रेण निदध्यात् ।

रजांसि पञ्चवर्णानि मण्डलार्थं प्रकल्पयेत् ।
रत्नानि हेम धान्यानि कुम्भं च करकं तथा ॥ ३१ ॥
कलशांश्चरुपात्राणि गन्धपुष्पादिकं च यत् ।
वासांसि च विकेशानि शुक्लान्यभिनवानि च ॥ ३२ ॥
समिदाज्यतिलान् लाजान् स्नानद्रव्यादिकं च यत् ।
कल्पयेच्छान्त्यतीतादिकलामन्त्रैः पृथक् पृथक् ॥ ३३ ॥
मूलेन सितमुष्णीषं सप्तवारं जपेत् ततः ।
वेष्टयित्वा शिरसि तत् सोत्तरीयः समाहितः ॥ ३४ ॥
अनुग्रहः समर्थोऽस्मि सर्वज्ञोऽहं सदाशिवः ।
स्वतन्त्रोऽहं पशूनेतान् मोचयामीति चिन्तयन् ॥ ३५ ॥

अथ पात्रस्थान् विकिरान् वामहस्ते निधाय मण्डपस्य नैर्ऋत्यां दिशि स्थित्वेशानाभिमुखोऽघोरास्त्रे(ण) शिवास्त्रेण वा सप्त परिजप्य मण्डपमध्यादीशानकोणान्तं ज्वलदग्निनिभान् विकिरानुत्तानेन दक्षिणे (न) हस्तेन विकिरेत् । विकिरेच्छर्वशर्वेतिपदेन । कुशमुष्ट्या धूधूपदेन विकीर्णान् संहृत्यैशानकोणे संस्थाप्य तत्रैव कृतपद्मपीठे शाल्याढकं दर्भासनं च निधाय सूत्रितं हैमाद्येकक्रमं शिवकुम्भं सुधौतं धूपितमधोमुखं निधाय तत्पृष्ठे कूर्चं च पृथिव्यादिप्रकृत्यन्ततत्त्वमयं कुम्भं ध्यात्वोत्तानयित्वा तत्कूर्चमुत्तानं तस्मिन् निधाय द्वादशान्तामृतं ध्यायंस्तीर्थसलिलैरापूर्य नवरत्नहिरण्यौषधिकुसुमगन्धाक्षतान् प्रक्षिप्याश्वत्थ (प्लु ? पल्ल) वान्युत्तानानि तस्मिन् निधायाक्षतफलाढ्यविधाविधानेनपिधाय,

आच्छाद्य शुक्लवसनद्वयशुक्लमाल्यैस्तस्मिंश्चलाचलवृषासनसन्निविष्टम् ।
योगेश्वरं तु सशिवासनमूर्तिदेहमावाह्य गन्धकुसुमादिभिरर्चयित्वा ॥ ३६ ॥

कुम्भान्तिके तदनु दक्षिणतस्तथैव प्राक् संहृतेषु विकिरेष्वपि वर्धनीं च ।
आपूर्य कुम्भमिव शस्त्रजपेन शक्तिं त्वावाह्य केसरिगतां विधिनाभिपूज्य ॥

अथात्र ब्रह्मशम्भुः —

"दशस्वपि दिशास्वैन्द्रीप्रभृतिष्विन्द्रपूर्वकान् ।
सुरानुपेन्द्रपर्यन्तानिष्ट्वा तु विधिवत् क्रमात् ॥"

इति ।

अथ तान् प्रार्थयेत् । चलाचलासनगतां वर्धनीमभिपूज्य, तदनु

अत्र मञ्जर्यां —

"जप्त्वा मन्त्रमघोरशस्त्रमभितः कुड्यं ततो वर्धनी-
माचार्यो भ्रमयेत् प्रदक्षिणवशादच्छिन्नया धारया ।
तन्मार्गेण तथा परः शिवघटं सङ्गृह्य नीत्वा पुनः
स्थाने पूर्ववदासने शिवघटं तां वर्धनीं च न्यसेत् ॥

मूलं न्यसेच्छिवघटे तु शिवश्च तस्मिन् पूज्यः स्थिरासनगतः सहिताङ्गमूर्तिः।
तारं च पाशुपतशस्त्रमथात्र तोये तस्मिन्नुमां भगवतीमभिपूज्य सम्यक् ॥"

लिङ्गमुद्रया शिवकुम्भं स्पृष्ट्वा सव्यया तन्मुष्ट्या वर्धनं स्पृशेत् ।

"सव्यमुष्टिरुमा पिण्डी लिङ्गमङ्गुष्ठको हरः ।"

इति ब्रह्मशम्भुः ।

एवं भुक्तिकामो मुक्तिकामश्चेत् पूर्वं वर्धनीं पश्चात् घटं स्पृशेत् ।

उमायै भग(वद् ?)रूपिण्यै लिङ्गरूपधराय च ॥ ३८ ॥

शङ्कराय नमस्तुभ्यमिति स्तुत्यानुमोद्य तु ।
यज्ञस्यास्य पतिस्त्वं हि शक्तिरेषा तवाचला ॥ ३९ ॥

एष ते ज्ञानखड्गोऽयं तं गृहाण स्वमायुधम् ।
मया प्रवर्तितश्चायं यज्वनां भवता क्रतुः ॥ ४० ॥

रक्षणीयस्त्वया देव ! समाप्तिर्यावदस्य हि ।

इत्थं शिवं समभिवन्द्य समर्प्य सम्यक् तं ज्ञानखड्गमथ तावभिपूज्य सम्यक्।
कृत्यं च तद्भगवते विनिवेद्य रक्षां विघ्नाधिपं स्वादिशि तत्र यजेद् यथावत् ॥

यः सुरेशाध्वरोऽस्माभिः पश्वनुग्रहहेतवे ।
प्रवर्तितः प्रयात्वन्तमविघ्नस्तव सन्निधौ ॥ ४२ ॥

एवं गणेशमभिवन्द्य तु मण्डपे प्राङ् मध्ये सगन्धजलगोमयसम्प्रलिप्ते ।
लिङ्गोद्भवान्यतममप्यथ भद्रकं वा संलिख्य मण्डलमथात्र यजेन्महेशम् ॥

आनन्तमासनमथो परिभाव्य तस्मिन्नावाह्य चोक्तविधिना (च सदा)शिवं तम् ।
मुख्योपचारपरिबर्हसमेतमिष्ट्वा तुष्टे शिवे विधिवदावरणान्यपीष्ट्वा ॥ ४४ ॥

आवरणानीति पञ्चावरणान्युच्यन्ते ।

प्राच्यां तथाग्निशरणे चतुरश्रकुण्डे त्वाधाय वह्निमपि तत्र सदाशिवाख्यम् ।
+ + + + + दिचरोऽस्तु चतुर्थमंशं मूलाङ्गमूर्तिमनुभिः क्रमशो जुहोति ॥

तद्यथा — यथोदितमग्निमुक्तप्रकारेणाधाय शिवसन्धानं च कृत्वा पञ्चसंस्कारसंस्कृतादग्नेः पूर्वमेव किञ्चिदुद्धृत्य चुल्ल्यां प्रज्वालितं कपिलाक्षीरे पञ्चप्रसृतिशालितण्डुलैरेकशिष्यदीक्षायां प्रतिशिष्यं प्रतिकुडुम्बवृद्ध्या प्रोक्तक्रमेण चरुं श्रपयित्वा यथावदभिघार्य कुण्डान्तिके वारुण्यां दर्भेषु संस्थाप्य मन्त्रसंहितयाज्येन हुत्वा चरौ सम्पात्य धेन्वामृतीकृत्य चतुर्धा चरुं विभज्य (म ? मू)लस्थायैकमंशं भगवते कुम्भस्थायापरं निवेद्यान्यमग्नये शिष्टं सशिष्यायात्मने स्थापयेत् । अत्र ब्रह्मशम्भुः —

"अभिनीय शिवायांशमग्नये कलशाय च ।
सशिष्यायात्मने शेषं रक्षेदविहतं चरोः ॥"

इति ।

अथावदानत्रितयं जुहुयात् तु पृथक् पृथक् ।
स्रुचैव मूलमन्त्रेण क्रमेणाज्याभिघारितम् ॥ ४६ ॥

अथाज्यामिश्रितं हुत्वा मूलेनैकादशाहुतीः ।
ब्रह्माङ्गमूर्तिमन्त्रैस्तु हुत्वैकैकां पृथक् पृथक् ॥ ४७ ॥

अत्र

"ब्रह्माख्यमन्त्रैश्च षडङ्गमन्त्रैराज्येन सर्वैः परिवारमन्त्रैः ।
विद्येश्वराद्यैर्जुहुयात् क्रमेण"

इति मञ्जर्याम् ।

तद्वत् तिलैश्च हुत्वाथ हुत्वा पूर्णाहुतिं तथा ॥ ४८ ॥

रुद्रादिभ्यो बलिं क्षिप्त्वा लब्धानुज्ञः शिवाद् गुरुः ।
शिष्यं तु शिष्यौ शिष्यान् वा दीक्षयेदधिकारतः ॥ ४९ ॥

एतावत् कर्म सामान्यक्रियादीक्षासु देशिकैः ।
सामग्र्याद्यासु विज्ञेयं साधकान्तास्वनुक्रमात् ॥ ५० ॥

सामान्यक्रियाधिकारः ।

अथ समयदीक्षायां यथोदितान् शिष्यान् कृतदन्तधावनान् निर्वर्तितस्नानसान्ध्यनित्यानुष्ठानान् धवलाम्बरोत्तरीयान् द्वाराद् बहिः संस्थाप्य स्वयमन्तः प्रविश्य प्रणम्य देवं विज्ञापयेत् ।

यदर्थोऽयं मया देव! शिवयज्ञः प्रवर्तितः ।
त इमे पशवः शान्ता द्वारि तिष्ठन्ति वारिताः ॥ ५१ ॥

तत् कुरुष्व प्रसादं मे तत्प्रवेशाय शङ्कर! ।
करोम्यनुग्रहमिति देवेनानुग्रहे कृते ॥ ५२ ॥

सकलीकृत्य चात्मानं सदाशिवतनुर्गुरुः ।
दीक्षाधिकरणेष्वेकः पञ्चस्वपि शिवो ह्यहम् ॥ ९३ ॥

यज्ञसंरक्षकः कुम्भैः कर्मसाक्षी च मण्डले ।
होमाधिकरणेनाग्नौ शिष्ये तत्पाशबन्धहृत् ॥ ५४ ॥

आचार्योऽनुग्रहपरः सोऽहमेवेति भावयेत् ॥ ५५ ॥

द्वारस्य बाह्यभुवि मण्डलकेऽथ शिष्यं दर्भाक्षतप्रणवपङ्कजविष्टरस्थम् ।
बद्धाञ्जलिं भगवदुन्मुखमूर्ध्वकायं पश्येद् गुरुः स्वयमुदग्वदनोऽर्घ्यहस्तः ॥

अत्र ब्रह्मशम्भुः —

“विलेखयेच्छिखातस्तं यावत्पादनखाग्रकम् ।
नखाग्राच्चूडिका यावत् तत्त्वज्ञानदृशा गुरुः ॥”

इति ।

आत्मायमस्य शिथिलीकृतबन्धजाल-
स्त्व(ह?न्तः)शिवत्वमधुना शिवशक्तिपातम् ।
ध्यात्वेत्थमर्घ्यसलिलैस्त्रिरवोक्ष्य चास्मात्
तं भस्मना त्रिरभिताड्य शिरस्यथाद्भिः ॥ ५६ ॥

सम्प्रोक्ष्येति यावत् । शिष्यस्य शिरसि कुसुमं विन्यस्य कुशाग्रमूलाभ्यां हृदयादूर्ध्वं त्रिधातिर्यगुल्लिखेत् । “नाभेरूर्ध्वमधश्चे”ति भोजराजः । अथाधारशक्तितत्त्वत्रयस्थं (?) ज्ञानक्रियाशक्तियुक्तं पशुमूर्तिमन्त्रेणोद्भाव्य विद्यादेहं च विन्यस्य मूलाङ्गमूर्तिभिः सकलीकृत्याभिपूज्य सितसूक्ष्मेण विशुद्धेनाहतेन वस्त्रेण प्रोक्षितकवचावगुण्ठितमूलाभिमन्त्रितेन नेत्रमन्त्रेण शिष्यस्य नेत्रबन्धं विधाय यागगृहं प्रवेश्य कुम्भाग्निमण्डलशिवानां प्रदक्षिणं कारयेत् ।

शिवस्य दक्षिणे भागे कल्पिते कमलासने ॥ ५७ ॥

धर्मादिभिश्चतुर्भिश्च सकुशे तं निवेशयेत् ।
हृद्बीजपुटहंसेन मूलेन प्लुतनादिना ॥ ५८ ॥

संहारमुद्रया तस्य संज्ञां संहृत्य देशिकः ।
स्थूलपाशकलाजालमपि शुद्धफलाप्तये ॥ ५९ ॥

शिष्यदेहगतं ध्यात्वा बैन्दवीभिर्विशोधयेत् ।
भूतशुद्धिविधानेन धारणाभिर्विशोध्य तम् ॥ ६० ॥

हृदये तस्य सूर्यादिबिम्बब्रह्मादिपङ्कजे ।
पञ्चमन्त्रकलाजालमूर्त्यङ्गाढ्यं सदाशिवम् ॥ ६१ ॥

सासनं मूर्तिसहितं विद्यादेहं यथाविधि ।
मनसाराध्य तन्नाभिकुण्डाग्नौ जुहुयाद्धिया ॥ ६२ ॥

भ्रूमध्याम्भोरुहे बिन्दौ शिवध्यानेन चास्य तु ।
आत्मशुद्धिं समापाद्य गन्धालिप्तकरः स्वयम् ॥ ६३ ॥

शिवहस्तं विधाय स्वे वामपाण्यम्बुजे स्मरन् ।
आसनादिक्रमात् साङ्गं शिवं सम्पूज्य वै धिया ॥ ६४ ॥

हृद्बीजमूलहंसाढ्यं तस्मिन् विन्यस्य चेतसा ।
तं हस्तं शिष्यहृदये विन्यसेत् प्रथमं ततः ॥ ६५ ॥

हृदादिग्रन्थिभेदार्थं क्रमात् तत्कण्ठतालुगम् ।
भ्रूमध्यगं च मूर्ध्निस्थं कुर्याद् रुद्रपदाप्तये ॥ ६६ ॥

तदनु शिष्यस्य पाण्योः पुष्पाञ्जलिं गन्धपुष्पाधिवासितं कृत्वोत्थाय देवाग्रे शिष्यमूर्ध्वकायं देवाभिमुखं संस्थाप्य स्वयमुदङ्मुखस्तिष्ठन् पशोस्तिरोधायकं नेत्रबन्धं ध्यात्वा ज्ञानासिना पाशुपतास्त्रेण नेत्रबन्धमपनीय पुष्पाञ्जलिं क्षिपेत्युक्त्वा तमञ्जलिं मण्डले पातयेत् । बद्धनेत्र एव पुष्पाञ्जलिं क्षिपेदिति केचित् । तत्र मूर्त्यङ्गादिषु यत्र पति पुष्पाञ्जलिस्तन्नामधेयान्तं (?) कुर्यात् ।

शिवान्तं ब्राह्मणस्य स्याद् देवगणान्तमन्ययोः ।
शूद्रस्य मुनिशब्दान्तं नाम कुर्याद् यथाक्रमम् ॥ ६७ ॥
तस्याष्टाङ्गनमस्कारमुपदिश्य प्रणामयेत् ।

अत्र भोजराजपक्षे तु प्रदक्षिणानन्तरं पुष्पाञ्जलिं (प्रक्षिप्यान)न्तरमुपवेश्य शिष्यं धारणाभिर्विशोध्य सकलीकृत्य शिवहस्तं विन्यसेदिति । नैतन्मूलागमसम्मतं, यतो धारणाभिर्विशुद्धस्यैव मण्डलस्थविशिष्टशिवे पुष्पाञ्जलिप्रक्षेपाधिकार इत्यतः प्रागुक्त एव पक्षो ब्रह्मशम्भुना च स्वीकृतः । तदनु शिवकुम्भायाग्नये च पुष्पाञ्जलिपूर्वं नमस्कारमुपदिश्य कुण्डाद् वायव्यभागे प्राग्वत् कल्पितासने शिष्यं निवेश्य मन्त्रसंहितयाज्येन हुत्वा सम्पात्य शिष्यस्यात्मनश्च नाडीसन्धानं विदध्यात् । तत्र दर्भमूलं स्वजङ्घासन्धौ गृहीत्वा दर्भाग्रं शिष्यहस्ते दद्यात् । विपरीतमिति भोजराजः ।

अथ शिष्यस्येडापिङ्गलासुषुम्नानाडीः स्वनाडीः प्रविष्टाः सम्भाव्य मूलेनाहुतित्रयं पञ्चकं वा हुत्वा तच्चैतन्यग्रहणाय प्रवेशनिर्गमौ विधायाष्टशतमूलेन दशांशेनाङ्गमूर्तीनां हुत्वा पूर्णां च विधाय प्रायश्चित्तार्थं पुनरष्टोत्तरशतं मूलेन हुत्वा तदीयां प्राक्तनजातिमुद्धरेत् ।

अत्र ब्रह्मशम्भुः —

"नाद्विजो युज्यते सिद्धचा न च निर्वाणमश्नुते ।
द्विजोऽपि हि यतस्तेन कुर्यात् तं द्विजसत्तमम् ॥"

इति । एतस्माद् द्विजानां जात्युद्धारेण द्विजोत्तमत्वं च पशुजातिमोक्षाच्छिवत्वं (च) भवति ।

शूद्रस्यापि शूद्रत्वपशुभावव्यावर्तनाच्छिवत्वलक्षणद्वितीयजन्म जात्युद्धारेण भवतीत्यतो दीक्षितः शूद्रो न भवति, किन्तु शिवसंस्कारजातस्य शिवत्वसम्भवात् पूर्वजन्मव्यपगमाच्च वेदमन्त्रव्यतिरिक्तशैवमन्त्रतन्त्रश्रवणपूजासु योग्यता भवति ।

ननु शिवसंस्कारजात्युद्धाराच्छूद्रस्य द्विजत्वमस्ति चेत् किमिति वेदमन्त्रानधिकारित्वमिति चोद्ये ब्राह्मण्यां ब्राह्मणाज्जातस्यापि वैदिकमन्त्रैरुपनयनेन संस्कृतस्य वैदिकद्विजस्यैव वेदेऽधिकारः, कारणानुगुणकार्यत्वात्; तद्वच्छैवमन्त्रसंस्कृतस्य तदनुगुणद्विजत्वसिद्धौ तन्मन्त्रपूजादावेवाधिकार इत्युपपन्नम् ।

तत्राचार्यः स्वहृत्पद्मे मायापर्यङ्कशोभिते ॥ ६८ ॥
रागतत्त्वास्तृते रम्ये पशुसंज्ञोपधानके ।
विद्याप्रदीपे सुश्लिष्टौ स्मरेद् विद्यापती शिवौ ॥ ६९ ॥
तौ च संपूज्य मनसा पशुं पश्चात् समुद्धरेत् ।
तस्य हृत्पङ्कजे जीवं प्रोक्ष्य सन्ताड्य हेतिना ॥ ७० ॥
रेचकेन स्वयं मूर्ध्ना निर्गत्य तु सुषुम्नया ।
शिष्यदेहं प्रविश्यात्महृत्पद्मस्थं तु पुद्गलम् ॥ ७१ ॥
उद्धरेच्छेदविश्लेषौ विधायास्त्रेण चाङ्कुशात् ।
आकृष्य चोर्ध्वं नाड्या तु द्वादशान्ते निवेश्य तु ॥ ७२ ॥
अभिपूज्य ध्रुवेणाथ तारं हंसं च कारकम् ।

जपेदिति यावत् ।

संहारमुद्रया तस्मात् समाहृत्य तु पुद्गलम् ॥ ७३ ॥

अथ पूरकेण स्वहृदयाब्जे शिवयोर्गर्भे निवेश्य कुम्भकेन समरसीकृत्य मनसाभ्यर्च्य तत्र विद्यायां जातं विचिन्त्य रेचकेन सुषुम्नयोर्ध्वं नीत्वा ब्रह्म-

विष्णुरुद्रेश्वरसदाशिवेषु क्रमादायोज्यतानतिक्रम्य द्वादशान्ते संयोज्य ध्रुवेणाभिपूज्य प्रणवहंसप्रणवैस्ततः संहारिण्या तं गृहीत्वा तथैव सुषुम्नया शिष्यस्य हृदम्भोजे निवेश्य हृदयसम्पुटहंसेन समरसीकृत्य द्वादशान्तामृतेनाप्लाव्य पुनर्जातं निर्मलं कुमारं चिन्तयेत् ।

ब्रह्मादिकारणोपाधिशिवसंसर्गपावितम् ।
तज्जातं शिष्यमुद्धाव्य द्विजत्वेनोपपादयेत् ॥ ७४ ॥

अत्र मकुटोत्तरे —

"अन्यं कीटकमादाय कुड्यसंवेष्टितं मृदा ।
भ्रमरो घूर्णनादाद्यैः स्वजातिं कुरुते यथा ॥
तद्वद् दीक्षासु संस्कारैर्निर्मलः शिवतामियात् ।"

जात्युद्धारायाहुतित्रयं मूलेन हुत्वा ततो द्विजत्वापादनाय च ओं हौं शिवाय स्वाहा इति च हुत्वा, ओं भगवन्नयमात्मयोनिबीजाहारभावदेशशुद्धो द्विजो भवतु स्वाहा । पुनराहुतित्रयेण हुत्वा रुद्रांशतामापादयेत् । ओं भगवन्नयमात्मा रुद्रो भवतु स्वाहा । "तत्संस्काराश्च पञ्चैव शिवाग्नेरिव" इति ब्रह्मशम्भुमतदर्शनाद् अग्निकार्यपटलमार्गेण गर्भाधानादिसंस्कारनिष्पत्तये सद्यादिभि पृथक् पृथगभ्यर्च्य हृदयादिभिः पृथक् पृथग् जुहुयात् । संसारितद्विजसंस्कारेभ्यो (?) दीक्षितद्विजसंस्कारव्यतिरेकं दर्शयति ।

गर्भाधानं स्मृते शक्तौ(?) मलापायसमाश्रयात् ।
बीजं + + + + + + ब्रह्मादिस्पर्शशोधितम् ॥ ७५ ॥

व्यक्तिः स्वतन्त्रतायास्तु तस्य पुंसवनं भवेत् ।
मायात्मनोर्विवेकेन ज्ञानं सीमन्तकल्पना ॥ ७६ ॥

ज्ञातहेयपरित्यागादुपादे(या?य)परिग्रहः ।
जातकर्म भवेत् तस्य शिवत्वव्यञ्जकं हि तत् ॥ ७७ ॥

उक्तं हि नामकरणमित्थं संस्कारपञ्चकम् ।
ब्रह्मशम्भुरिह प्राह निष्क्रामान्नाशनादयः ॥ ७८ ॥

अशिवाः शिवमार्गेऽस्मिन् भवभूतिफला अपि ।

एतस्मादुपनिष्क्रामणादीनप्ये(तान्) संस्कारान् जीवाग्नेरुक्तमार्गेण कृत्वा ततोऽस्य यज्ञोपवीतं मूलेन दत्त्वा प्रायश्चित्तार्थं शतं सहस्रं वा प्रासादेनाज्येन

हुत्वा पूर्णाहुतिं चाथ कुम्भाग्निशिवानां प्रणामं कारयेत् । पुनः शिवं चाभिपूज्य त्रिः प्रदक्षिणीकृत्य सुवर्णकुसुमादिभिरशून्यहस्तः शिवं गुरुं च शिष्यो दण्डवत् प्रणमेत् ।

तमुत्थाप्य गुरुः शिष्यमाशीर्भिरभिनन्द्य च ॥ ७९ ॥
जातः समययोग्यस्त्वमिति ब्रूयात् प्रसन्नधीः ।

इहामुत्रार्थाप्त्यै खलु समयदीक्षेति कथिता
द्विजो जात्युद्धाराद् भवति पतिविद्याश्रयवशात् ।
ततः पूजाजप्यश्रवणविधियोग्यश्च स भवेत्
तथा रुद्रांशात्मा प्रतिदिनशिवार्चादिगुणवान् ॥ ८० ॥

अत्र ब्रह्मशम्भुः—

"यथाव्यवस्थितान् वर्णान् सापेक्षान् स्वाश्रमानपि ।
स्थापयेन्नित्यमीशा(ना ?)ग्निगुरुपूजानतिक्रमात् ॥
पूर्वाश्रमानपेक्षं तु व्रतं यद् ब्रह्मचारिणः ।
भौतिको नैष्ठिको वापि सम्यगायातुमर्हति (?) ॥"

इति । एतस्माद् भस्माधाराक्षसूत्रकौपीनदण्डांश्च जटाशिखयोरन्यतमां चेति पञ्च मुद्राः पञ्चब्रह्मभिरङ्गैश्चाभिमन्त्र्याथ धारयेत् ।

नाडीसन्धानहोमः प्रथममथ भवेन्मन्त्रसन्तर्पणार्चा-
जात्युद्धारद्विजत्वैः प्रतिपदगमनाच्छक्तिचैतन्ययोगः ।
संस्काराद् रुद्रताप्तिस्तदनु निगदितं चोपवीतप्रदानं
प्रायश्चित्तं प्रणामः समय इति भवेत् सामयी नाम दीक्षा ॥ ८१ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
सामान्यक्रियासमयदीक्षापटलः षोडशः ।

अथ सप्तदशः पटलः ।

अथ निर्वाणदीक्षादिक्रियानिष्पत्तिसाधनम् ।
यथावदध्वनां षण्णां स्वरूपं तु निरूप्यते ॥ १ ॥

तत्त्वाध्वा चैव वर्णाध्वा मन्त्राध्वाध्वा च भौवनः ।
पदाध्वा च कलाध्वा च षट्प्रकारोऽध्वनिर्णयः ॥ २ ॥
व्याप्यास्तत्त्वादयः पञ्च मलाद्या व्यापकास्त्रयः ।
पुनर्मलादयो व्याप्याः कलाध्वा व्यापकः स्मृतः ॥ ३ ॥
तत्र तत्त्वानि षट्त्रिंशत् तत्त्वाध्वा स्याद् विलोमतः ।
क्षकारादिरकारान्तो वर्णाध्वाक्षरसन्ततिः ॥ ४ ॥
सद्यादिकानि ब्राह्माणि मन्त्राश्च हृदयादयः ।
मूलमन्त्रश्च मन्त्राध्वा प्रागेवात्र प्रदर्शितः ॥ ५ ॥
कालाग्न्यादीनि शक्त्यन्तं भुवनानि शतद्वयम् ।
सचतुर्विंशतिपुरं भुवनाध्वेति कथ्यते ॥ ६ ॥
व्योमव्यापिपदान्यत्र यान्येकाशीतिसंख्यया ।
विलोमतः पदाध्वा स्यान्मन्त्रोद्धारे स चोदितः ॥ ७ ॥
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिश्च पञ्चमी ।
शान्त्यतीतेति हि कलाः कलाध्वा सोऽपि दर्शितः ॥ ८ ॥
तन्त्रेऽस्मिन् प्रागनुक्तत्वाद् भुवनाध्वाथ कथ्यते ।
कालाग्निसंज्ञं कूष्माण्डं हाटकं ब्राह्मवैष्णवे ॥ ९ ॥
रौद्रं च भुवनान्यत्र ब्रह्माण्डान्तःस्थितानि षट् ।
ब्रह्माण्डमूले कालाग्निभुवनं दशकोटिभिः ॥ १० ॥
योजनैर्विस्तृतं तस्य विमानं लक्षयोजनम् ।
तस्य सिंहासनं पञ्चसहस्रैः साग्निमण्डलम् ॥ ११ ॥

अत्र मञ्जर्यां —

"कालाग्निः स च योजनायुततनुर्लोकान् दिधक्षुः स्थितो-
ऽभ्युद्दीर्णाग्निशिखैस्त्रिनेत्रविकटैर्वक्त्रैश्च दंष्ट्रोज्ज्वलैः ।
सत्पाशाङ्कुशखड्गखेटकशरेष्वासाग्निखट्वाङ्गकै-
र्दोर्भिः शूलकपालसाभयवरैर्नानाहिभूषान्वितः ॥"

इति । अपिच

अनतिकृशकृशानुश्रेणिविद्युद्धितान-
द्युतिकपिलजटाभिर्विप्रकीर्णाभिरुग्रः ।

प्रतिभयभटमुण्डस्रग्धरः कृत्तिवासाः
सितभसितसिताङ्गो भाति कालाग्निरुद्रः ॥ १२ ॥

सप्तकोटिगणैर्भीमैरात्मवेषानुकारिभिः ।
रुद्रैः परिवृतो देवस्तेषां चैव दशेश्वराः ॥ १३ ॥

धूम्रेश्वरश्च कपिलः कालकोऽधीश्वरस्तथा ।
जलदश्चञ्चलोऽर्थेश ईशोऽनन्तश्च पद्मभूः ॥ १४ ॥

एते पूर्वादिदशदिक्षु प्रतिसप्ततिलक्षगणानामधिपतयः सपरिवारास्तिष्ठन्ति ।

कालाग्निभुवनादूर्ध्वं कूष्माण्डभुवनं स्थितम् ।
योजनानां नवतिभिर्लक्षैस्तद्विस्तृतोच्छ्रितः ॥ १५ ॥

तन्मध्ये पञ्चसाहस्रयोजनस्तस्य चालयः ।

कूष्माण्डस्तु सहस्रयोजनतनुस्त्र्यक्षैस्त्रिभिश्चाननै-
र्दंष्ट्राभीषणदन्तुरैश्च दहनज्वालाट्टहासात्मवान् ।
विद्युत्पिङ्गजटः करैर्डमरुकं खट्वाङ्गपाशाङ्कुशान्
बिभ्रच्छूलकपालवह्निभुजगानान्त्रास्थिमालाधरः ॥ १६ ॥

अपिच,

घण्टाशृङ्खलबद्धकेशवसनः प्रेतासने संस्थितो
भस्मोद्धूलितविग्रहश्च भुजगैर्नानाविधैर्भूषितः ।
भूतप्रेतपिशाचजम्भकगणैः षट्कोटिसंख्यैर्वृतो
भीमः स्वे भुवने विभाति भगवान् कूष्माण्डरुद्रः स्थितः ॥ १७ ॥

तस्याधस्तात् परितः पञ्चकोटिसंख्यया
नरकाण्यतिदुःखानि पच्यन्ते येषु पापिनः ॥ १८ ॥

तेषामपि च मुख्यानि द्वात्रिंशन्नरकाणि तु ।
तेषामपि त्रयो वर्गाः स्युस्तेषां चाधिपास्त्रयः ॥ १९ ॥

रौरवः कुम्भीपाकोऽवीचिश्च । तानि च रौरवमहारौरवशीतोष्णसन्तापनविदारणपङ्कमहापङ्कासिपत्रवनसूचीमुखकालसूत्रक्षुरधारसंज्ञान्येकादश रौरवप्रधानानि । तद्वत् कुम्भीपाकाङ्गारनिचयश्वभक्षणासृक्पूयपङ्कक्रकचपाटनतप्तलो-

हतप्तवालुकास्थिभङ्गसूकरस्वमांसभक्षणावाङ्मुखलम्बनानि कुम्भीपाकप्रधानान्येकादश। अवीचिक्रिमिनिचयकूटशल्मलिनिरुच्छ्वासामेध्यकूपक्रिमिकूपान्धकूपनिरालम्बनपतनशूलप्रोतवैतरणिसंज्ञान्यवीचिप्रधानानि दश।

कूश्माण्डरुद्रः सर्वेषां नरकाणां प्रभुः स्मृतः।
+++(योज)नादूर्ध्वं सप्तपातालसंस्थितिः ॥ २० ॥

तेषां नवतिलक्षाणि प्रत्येकं विस्तृतिः स्मृता।
उपर्युपरि सप्तापि पातालानि स्थितानि हि ॥ २१ ॥

अतलं चैव पातालं नितलं च गभस्तितम्।
महातलं च सुतलं रसातलमतःपरम् ॥ २२ ॥

तानि च क्रमाद्धेममाणिक्येन्द्रनीलपुष्यरागरजतस्फाटिकमयानि। रसातलं तु शैलमयं मुक्ताफलाकीर्णमिति विद्यात्।

दैतेया दानवा नागाः कृतपुण्यास्तु ये पुरा।
पातालेषु वसन्त्येषु हरपादार्चने रताः ॥ २३ ॥

विरोचनहिरण्याक्षप्रह्लादबलिशम्बराः।
वृत्राद्याश्चैव दैत्येन्द्राः पातालस्वर्गवासिनः ॥ २४ ॥

भूमेश्च धारणे युक्तो विष्णुर्योऽनन्तविग्रहः।
सोऽप्यास्ते भवने दिव्ये नागेन्द्रैरर्चितः सदा ॥ २५ ॥

तत्र भोगवती नाम वासुकेर्नगरी शुभा।
हेमरत्नमयी दिव्या दिव्यभोगसमन्विता ॥ २६ ॥

क्रमात् पातालानामधिपतयः सप्त रुद्रास्तत्र तत्र निवसन्ति। ते च चण्डविजयज्येष्ठामयाथर्वपदमहारुद्रैर्कृतसंज्ञाः। सामान्येन सर्वपातालानामधिपतिर्हाटकेश्वरदेवः।

हैमं तु हाटकेशस्य पुरं दिव्यगणावृतम्।
विस्तारायामतस्तुल्यं सहस्रद्वययोजनैः ॥ २७ ॥

तस्य विमानं द्विशतयोजनप्रमाणम्।

तन्मध्ये कनकद्युतिस्त्रिनयनः सिंहासनस्थो भुजै-
र्बिभ्राणो वरदाभये च हरिणं टङ्कं च दिव्याकृतिः।

धुर्धूरेन्दुकलाभुजङ्गवलयस्रग्जाटजूटोज्ज्वलः
पार्वत्या सहितस्तु हाटकशिवो दिव्यैर्गणैरावृतः ॥ २८ ॥

दैत्यदानवनागेन्द्रकन्याभिश्च कुमारकैः ।
अभ्यर्च्यमानः सततं सुगन्धकुसुमोत्करैः ॥ २९ ॥

तस्योर्ध्वं खलु भूलोकादासत्यात् सप्तधा स्थितम् ।
ब्राह्मं तु भुवनं प्रोक्तं ब्रह्मसृष्ट्याभिपूरितम् ॥ ३० ॥

तस्य दशलक्षयोजनघना भूमिः पञ्चाशत्कोटियोजनविस्तृता पद्माकारावस्थिता ।

मध्येऽस्याः कर्णिकाकारो मेरुः कनकपर्वतः ।
स्थितः षोडशसाहस्रयोजनं त्ववनावधः ॥ ३१ ॥

चतुरशीतिसाहस्रं योजनानां तथोच्छ्रितः ।
मूले षोडशसाहस्रं योजनं विस्तृतश्च सः ॥ ३२ ॥

ततोऽपि द्विगुणं मूर्ध्नि विस्तृतः स महागिरिः ।
चतुर्दशसहस्रैस्तु योजनैर्ब्रह्मणः पुरी ॥ ३३ ॥

मध्येऽत्र मानसी दिव्या नानारत्नप्रभोज्ज्वला ।

तस्याः पूर्वाद्यष्टदिक्षु इन्द्रादिलोकपालानामष्टौ पुर्यो विश्वकर्मविनिर्मिताः । ताश्चामरावती तेजोवती सांयमनी कृष्णावती शुद्धावती गन्धावती महोदया यशोवतीसंज्ञाः ।

किञ्चित् पश्चिमतस्तत्र विष्णोरपि पुरं महत् ॥ ३४ ॥

तद्वत् पूर्वोत्तरे भागे ज्योतिःशिखरसंज्ञितः ।
पर्वतोऽष्टसहस्राणां योजनानां प्रमाणतः ॥ ३५ ॥

तत्र दिव्यविमानेषु पार्वत्या सहितो हरः ।
गणेश्वरैः परिवृतो रमतेऽभ्यर्चितः सुरैः ॥ ३६ ॥

स्वर्गादापतिता गङ्गा प्लावयन्तीन्दुमण्डलम् ।
तस्मिन् हरजटाजूटे पतितास्माच्च निर्गता ॥ ३७ ॥

ख्याता सीता गता प्राचीं भद्राख्या चोत्तरां दिशम् ।
'याम्यामलकनन्दाख्या सुचक्षुः पश्चिमां गता ॥ ३८ ॥

चतुर्दिक्षु गत्वा लवणसागरं प्रविष्टा इति यावत् ।

पूर्वेण मन्दरो मेरोर्दक्षिणे गन्धमादनः ।
विपुलः पश्चिमगिरिः सुपार्श्वश्चोत्तरे स्थितः ॥ ३९ ॥

एते चत्वारोऽपि मेरोर्विष्कम्भगिरयः प्रत्येकमष्टसहस्रयोजनप्रमाणा रत्नबहुला दिव्यजनसेव्याः । तेषु क्रमाद् देवोद्यानानि सरांसि च । यथा—

वनं चैत्ररथं प्राच्यां दक्षिणे गन्धमादनम् ।
वैभ्राजं विपुले तद्वत् सुपार्श्वे नन्दनं स्मृतम् ॥ ४० ॥

अरुणोदं सुभद्रं च सितोदमथ मानसम् ।
सरांसि देवभोग्यानि मन्दरादिष्वनुक्रमात् ॥ ४१ ॥

मन्दरादिषु तद्वच्च वृक्षाणां तु चतुष्टयम् ।
विद्यात् कदम्बो जम्बूश्च पिप्पलोऽथ वटस्तथा ॥ ४२ ॥

ते च प्रत्येकं द्विसहस्रयोजनविष्कम्भोच्छ्रयाः ।

गन्धमादनसंस्थस्तु जम्बूद्वीपस्थपादपः ।
जम्बूस्तन्नामधेयेन जम्बूद्वीपोऽयमुच्यते ॥ ४३ ॥

महागजप्रमाणानि स्वादूनि रसवन्ति च ।
सार्वकालं फलान्यस्य निपतन्ति सहस्रशः ॥ ४४ ॥

तस्मिन् फलरसोद्भूता नाम्ना जम्बूनदी सरित् ।
प्रवृत्ता देवगन्धर्वसिद्धचारणसेविता ॥ ४५ ॥

तज्जलस्पर्शनात् काष्ठमृत्तिकाशर्करादिकम् ।
जाम्बूनदाख्यं भवति स्वर्णं षोडशवर्णकम् ॥ ४६ ॥

तज्जलस्नानपानेन प्राणिनो ये चतुर्विधाः ।
सर्वे भवन्ति सौवर्णा निर्जराश्चायुतायुषः ॥ ४७ ॥

मेरोस्तु परितः ख्यातो लक्षयोजनविस्तृतः ।
जम्बूद्वीपस्य खण्डानि नव वर्षाणि तानि हि ॥ ४८ ॥

लावणेन समुद्रेण द्वीपोऽयं वेष्टितो बहिः।
नवानामपि वर्षाणां मध्यमं स्यादिलावृतम् ॥ ४९ ॥

मेरुश्च तन्मध्यगतः केसराचलसङ्गतः।
इलावृताद् दक्षिणतो हरिकिम्पुरुषाह्वये ॥ ५० ॥

(भारतं) नव वर्षाणि त्रीणि तेष्वचलास्त्रयः।
निषधो हेमकूटश्च हिमवांश्चात्र दक्षिणे ॥ ५१ ॥

पूर्वापरायताः सर्वे पूर्वापरसमुद्रगाः।
रम्यहैरण्यकुरवो वर्षत्रयमिलावृतात् ॥ ५२ ॥

उत्तरे गिरय(स्ते च) प्राग्वत् प्रागायतास्त्रयः।
नीलः श्वेतस्त्रिशृङ्गी च वर्षसीमास्ववस्थिताः ॥ ५३ ॥

प्राच्यामिलावृताद् वर्षो ह्येको भद्राश्वसंज्ञितः।
पश्चिमे केतुमालश्च तयोर्द्वौ वर्षपर्वतौ ॥ ५४ ॥

आनीलनिषधायामौ माल्यवद्गन्धमादनौ।
इलावृते पद्मवर्णा जम्बूफलरसाशिनः ॥ ५५ ॥

त्रयोदशसहस्रायुस्तेषां पूज्यश्च शङ्करः।
भद्राश्वे मानवाः शुक्ला दिव्यरूपायुतायुषः ॥ ५६ ॥

दिव्यान्नभोजना देवं यजन्ति च महेश्वरम्।
कुसुम्भकुसुमप्रख्या हरिवर्षेऽयुतायुषः ॥ ५७ ॥

विष्णुं यजन्ते मनुजाः सर्वे चैक्षवभोजिनः।
किम्पूरुषे हैमवर्णा नरास्ते चायुतायुषः ॥ ५८ ॥

प्लक्षवृक्षफलाहारा ब्रह्माणं पूजयन्ति ते।
भारते नैकवर्णास्तु नानाभाषाशनायुषः ॥ ५९ ॥

नानादेवार्चनाः सर्वे नानाकर्मकरास्तथा।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः ॥ ६० ॥

विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्वताः।
मुख्यशोऽत्र तथा नद्यो गङ्गा गोदावरी तथा ॥ ६१ ॥

यमुना नर्मदा तापी कृष्णवेण्णा सरस्वती ।
तुङ्गभद्रा च कावेरी सिन्धुताम्रादिकास्तथा ॥ ६२ ॥
स्पृष्टाः पीतास्तथा स्नाताः सर्वाः पापपहाः स्मृताः ।
इदं तु भारतं वर्षं नवद्वीपविभूषितम् ॥ ६३ ॥
कुमारीहिमवन्मध्ये द्वीपोऽयं पुण्य उच्यते ।
कर्मभूमिरियं स्वर्गमपवर्गं च गच्छताम् ॥ ६४ ॥
अन्ये म्लेच्छजनाकीर्णा द्वीपास्ते भारतस्य ये ।
इन्द्रद्वीपः कशेरुश्च ताम्रवर्णो गभस्तिमान् ॥ ६५ ॥
नागः सौम्यश्च गान्धर्वो वारुणश्चाष्टमः स्मृतः ।
अस्मिन् कुमारीद्वीपे तु देवर्षीणां तु मुख्यशः ॥ ६६ ॥
स्थानानि यानि तानि स्युः संक्षेपादत्र तान्यपि ।
अप्तत्त्वादिषु वक्ष्यन्ते षट्पञ्चाशत् पुराण्युत ॥ ६७ ॥
अमरेशादिसंज्ञाभिर्दृश्यन्तेऽत्रापि तानि ह ।

शम्भोः स्थानानीति यावत् । अत्र

महेन्द्रे जामदग्न्यश्चाप्यगस्त्यो मलयाचले ॥ ६८ ॥
सह्ये ब्रह्महरीशानाः कुमारः शुक्तिमद्गिरौ ।
ऋक्षे शिवो निवसति पारियात्रे नृकेसरी ॥ ६९ ॥
विन्ध्ये दुर्गा हिमवति नरनारायणाश्रमः ।
केतुमाले नरा नीलाः स्त्रियश्चोत्पलसन्निभाः ॥ ७० ॥
क्षीरान्नभोजिनो रुद्रभक्तास्ते चायुतायुषः ।
रम्ये रजतसङ्काशाः पञ्चसाहस्रजीविनः ॥ ७१ ॥
मध्वाशा ब्रह्मभक्तास्ते रम्याङ्गाः स्थिरयौवनाः ।
हिरण्यके हेमवर्णा द्राक्षाशाश्चायुतायुषः ॥ ७२ ॥
सूर्यभक्ता नरास्तद्वत् कुरुवर्षे सुरोपमाः ।
श्यामवर्णा मिथुनजाः कल्पवृक्षोपजीविनः ॥ ७३ ॥
आयुर्द्वादशसाहस्रं तेषां पूज्यौ शिवौ स्मृतौ ।
कैलासे हेमकूटे च हिमवत्युत्तरेऽपि च ॥ ७४ ॥

त्रिशृङ्गे मन्दरे नीले गन्धमादनपर्वते ।
कर्णिकारवने चैव पुराणि पुरशासितुः ॥ ७५ ॥
हेमरत्नविमानानि प्राधान्येन भवन्ति हि ।
अलकाख्या तु कैलासे धनदस्य पुरी शुभा ॥ ७६ ॥
वसुधारे वसूनां च रत्नधारे सुरर्षिणाम् ।
एकशृङ्गे ब्रह्मणस्तु जैगीषव्यस्य चाश्रमः ॥ ७७ ॥
गजशैले तु दुर्गायां सुनीले रक्षसां पुरी ।
सुमेघे देवराजस्य श्वेताद्रौ गरुडस्य च ॥ ७८ ॥
षण्मुखस्य च तत्रैव क्रौञ्चे जारुधिपर्वते ।
यक्षाणां शतशृङ्गे तु त्रिशृङ्गाद्रौ तथा श्रियः ॥ ७९ ॥
सहस्रशिखरेऽद्रीन्द्रे विद्याधरपुराणि हि ।
महालक्ष्म्याः पारिजाते सरस्वत्याः सुपार्श्वके ॥ ८० ॥
अञ्जनाद्रावप्सरसां गन्धर्वाणां च पाण्डरे ।
कुमुदाद्रौ तु रुद्राणां जारुधौ भास्करस्य च ॥ ८१ ॥
पिञ्जराद्रौ गणपतेर्हंसकूटे तु वेधसः ।
तत्रैव सनकादीनां दैत्यानां पञ्चशैलके ॥ ८२ ॥
दक्षिणे लवणाम्भोधौ लङ्काख्या रक्षसां पुरी ।
ऐक्षवाब्धौ गणेशस्य द्वीपाः सन्ति पुराणि च ॥ ८३ ॥
सुराब्धौ भद्रकाल्याश्च भैरवाणां पुराण्यपि ।
वीरभद्रस्य मातृणां क्षेत्रेशस्यापि तत्र हि ॥ ८४ ॥
घृतोदेऽग्नेश्च देवानां दध्यब्धौ ब्रह्मणो हरेः ।
नारायणस्य क्षीराब्धौ श्वेतद्वीपोऽतिशोभनः ॥ ८५ ॥
हेमरत्नविमानाढ्यः पञ्चलक्षप्रविस्तृतः ।
चतुर्भुजैः श्वेतवर्णैः शङ्खचक्रगदाधरैः ॥ ८६ ॥
विष्णुसारूप्यमुक्तैस्तु जनैः स्त्रीभिश्च शोभितम् ।
तत्र दिव्ये विमाने तु शेते नारायणो विभुः ॥ ८७ ॥
शेषाहिशयने दिव्ये श्रीभूमिसहितो विराट् ।
सेवितः कुमुदाद्यैश्च विष्वक्सेनादिकैर्गणैः ॥ ८८ ॥

तत्रापि च गणाः केचिद् दिव्यरूपास्त्रिलोचनाः ।
भस्मच्छन्नास्त्रिपुण्ड्राढ्याः सन्ति रुद्रार्चने रताः ॥ ८९ ॥

स्वादूदकाब्धौ स्वाशासु लोकेशानां (पुरा)ण्यपि ।
प्रजापतीनां च पृथग् भोगवन्ति भवन्ति हि ॥ ९० ॥

अलमतिविस्तरेण । प्रस्तुतमेव प्रस्तूयते ।

जम्बूः शाकः कुशः क्रौञ्चः शल्मलप्लक्षपुष्कराः ।
लवणक्षीरदध्याज्यगुलमद्यजलार्णवाः ॥ ९१ ॥

इति + + + + + + + न्त्रेष्वपि च केषुचित् ।
मध्वादिकः क्रमः प्रोक्तो द्वीपाब्धीनां विभागशः ॥ ९२ ॥

जम्बूः प्लक्षः शाल्मलश्च कुशः क्रौञ्चस्ततः परम् ।
शाकश्च पुष्कराख्यश्च द्वीपाः सप्तार्णवावृताः ॥ ९३ ॥

लवणेक्षुसुरासर्पिर्दधिदुग्धजलार्णवाः ।
प्रोक्ताः + + + + + + + + + + पि सर्वशः ॥ ९४ ॥

मिथोविरोधिनोरेवं द्वीपाब्धिक्रमपक्षयोः ।
उत्तरं मतबहुल्यादत्राश्रित्य निगद्यते ॥ ९५ ॥

जम्बूद्वीपाल्लावणोऽब्धिर्द्विगुणस्तस्य बाह्यतः ।
लावणाद् द्विगुणो द्वीपः प्लक्षाख्यो वलयाकृतिः ॥ ९६ ॥

तस्मिन् सप्तैव वर्षाणि सन्ति सप्त (च) पर्वताः ।

तद्यथा—शान्ताभयशिशिरसुखोदयानन्दाशिवक्षेमकध्रुवसंज्ञानि वर्षाणि । गोमेदचक्रकनारददुन्दुभिसोमकऋषभवैभ्राजसंज्ञा वर्षगिरयो लवणेक्षुसमुद्रस्पर्शिनः सर्वे सहस्रयोजनविस्तारोच्छ्रयाः । तत्र तु—

आर्यकाः कुरराश्चैव विदंशा भाविनस्तथा ॥ ९७ ॥

वर्णाश्चत्वार एवं स्युर्यथात्र ब्राह्मणादयः ।
ते च पञ्चसहस्रायुःस्थिरयौवनशालिनः ॥ ९८ ॥

सोममूर्तिं महादेवं यजन्तः सुखमासते ।
वर्षनद्योऽपि सप्तात्राप्यनुतप्ता शिवामृता ॥ ९९ ॥

विपापा त्रिदिवा नन्दा सुकृता चामलोदका ।
प्लक्षाद् द्विगुण इक्षूदो द्विगुणोऽस्माच्च शाल्मलः ॥ १०० ॥
द्वीपस्तत्र च वर्षाणि सप्त शैलाश्च निम्नगाः ।

यथाहुः —

हरीतजीमूतरोहितवैद्युतमानसहंससुप्रभसंज्ञानि वर्षाणि । कुमुदकुमुदोन्नतवलाहकद्रोणकङ्कमहिषककुद्मसंज्ञाः पर्वता ऋज्वायता इक्षूदसुरोदस्पर्शिनः ।

योनितोया वितृष्णा च चन्द्रा शुक्ला विमोचनी ॥ १०१ ॥
निवृत्तिश्च सुभद्रा च सप्त नद्यस्तु शाल्मले ।
कापिला अरुणाः पीताः कृष्णाख्याश्च द्विजादयः ॥ १०२ ॥
तत्रायुतायुषो मर्त्या धूम्रा वायुं यजन्ति ते ।
शाल्मलाद् द्विगुणो बाह्ये सुरोदो मण्डलाकृतिः ॥ १०३ ॥
द्विगुणोऽस्य कुशद्वीपस्तस्मिन् वर्षाणि सप्त वै ।
उद्भिदो वेणुमांश्चैव सुरयो लम्बनो धृतिः ॥ १०४ ॥
प्रभाकरश्च कपिलो वर्षाः स्फीतजनाकुलाः ।
विद्रुमो द्युतिमान् हेमो हरिः पुष्टः कुशेशयः ॥ १०५ ॥
मन्दरश्चेति गिरयः सुराज्योदधिसङ्गताः ।
हेमाभास्ते च वर्षाणां सप्तसाहस्रजीविनः ॥ १०६ ॥
कुशाद् घृतोदाद् द्विगुणो बाह्येऽस्माद् द्विगुणः पुनः ।
क्रौञ्चद्वीपोऽस्य वर्षाणि सप्त नद्यश्च पर्वताः ॥ १०७ ॥

कुशलमनोहरोष्णकप्रवरान्धकारमुनिदुन्दुभिसंज्ञानि वर्षाणि । क्रौञ्चवामनकारण्डकादिविस्पृग्विविदपुण्डरीकदुन्दुभिस्वनसंज्ञाः पर्वताः ।

गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा ।
ख्यातिश्च पुण्डरीका च नद्यः प्राधान्यतः स्मृताः ॥ १०८ ॥
पुष्कराः पुष्कला धन्यास्तिष्याश्च ब्राह्मणादयः ।
जीवन्त्यष्टसहस्राणि वर्षाणि शिवपूजकाः ॥ १०९ ॥

क्रौञ्चात् तु द्विगुणो बाह्ये दध्यब्धिस्तस्य बाह्यतः ।
शाकद्वीपो द्विमानोऽस्मात् तत्र वर्षाणि सप्त हि ॥ ११० ॥

जलदकुमारसुकुमारमणिचककुसुमोत्तरमोदकमहाद्रुमसंज्ञानि वर्षाणि ।

उदयो रैवतश्चैव श्यामाकोऽस्तगिरिस्तथा ।
आम्बिकेयस्तथा रम्यः केसरी चेति पर्वताः ॥ १११ ॥

सुकुमारी कुमारी च नन्दिनी वेणुका तथा ।
इक्षुका धेनुका चैव गभस्तिः सप्त निम्नगाः ॥ ११२ ॥

तत्र वर्णाश्च चत्वारो नगा मगधवामनाः ।
नन्दकाश्चैव पीताभाः सप्तसाहस्रजीविनः ॥ ११३ ॥

ते च सूर्यमूर्तिं यजन्ते ।

शाकाद् बाह्ये तु दुग्धाब्धिर्द्विगुणोऽस्माच्च पुष्करः ।
तत्र वर्षाचलस्त्वेको मानसोत्तरसंज्ञितः ॥ ११४ ॥

मध्येन वलयाकारः पञ्चाशद्भिः सहस्रकैः ।
योजनानां तु विस्तीर्णस्तावदुच्चो महागिरिः ॥ ११५ ॥

तस्य चोभयतो वर्षे तथैवोपारिमण्डले ।
अभ्यन्तरे महावीतो धातकी षण्डको बहिः ॥ ११६ ॥

तस्मिन् न नद्यो वर्णा वा द्विजप्रायोऽखिलो जनः ।
अयुतायुर्हेमवर्णो वायुमूर्तिं यजत्यसौ ॥ ११७ ॥

तस्य मानसोत्तरस्य मध्ये त्रिषहस्रयोजनप्रमाणो न्यग्रोधतरुः, तस्मिन् ब्रह्मा सपरिवारो निवसति ।

तस्योत्तरेण हर्यर्धतनोः शम्भोर्निकेतनम् ।
वसत्यास्मिन् हरिहरः पूज्यमानः सुरासुरैः ॥ ११८ ॥

पुष्करात् द्विगुणो बाह्ये स्वादूदः सागरो महान् ।
तद्बाह्ये दशकोट्यास्ति योजनानां हिरण्यभूः ॥ ११९ ॥

स्वाद्वब्धेस्तु बहिर्हिरण्यधरणिः कोट्या दशास्या बहि-
र्लोकालोकगिरिस्तु मेरुसदृशश्चोत्सेधविस्तारतः ।

निर्जीवः खलु बाह्यतोऽस्य तु तमः षट्त्रिंशता कोटिभि-
र्बाह्ये चाण्डकटाहतः स च घनः षट्कोटिगव्यूतिभिः ॥ १२० ॥

अलमतिप्रसङ्गेन । अथ भुवर्लोकादयः कथ्यन्ते । तद् यथा —

भूमेरूर्ध्वं योजनानां लक्षे सूर्यगतिः स्मृता ।
योजनैर्नवसाहस्रैर्विष्कम्भोऽर्करथस्य तु ॥ १२१ ॥

तत्प्रभामण्डलं तस्मात् त्रिगुणं हि प्रमाणतः ।
सूर्यलोकस्तु विज्ञेयो विमानशतसङ्कुलः ॥ १२२ ॥

उद्यानैः ससभैः रम्यैः शोभितः सजलाशयैः ।
सूर्याल्लक्षे स्थितश्चन्द्रस्तस्मान्नक्षत्रमण्डलम् ॥ १२३ ॥

तस्माद् द्विलक्षे तु बुधो द्विलक्षेऽस्माच्च भार्गवः ।
द्विलक्षे भार्गवाद् भौमस्तद्वद् भौमाद् बृहस्पतिः ॥ १२४ ॥

योजनानां द्विलक्षे तु गुरोः सौरिर्व्यवस्थितः ।
रथस्त्रिचक्रः सोमस्य कुन्दगौराश्च वाजिनः ॥ १२५ ॥

दश ते च वहन्त्येनं सोमलोकस्तु स स्मृतः ।
रक्ताष्टाश्वो बुधस्यापि रथो लोकः स तस्य हि ॥ १२६ ॥

कुसुम्भसदृशाष्टाश्वः शुक्रस्यापि रथो महान् ।
पद्मरागारुणाष्टाश्वो हैमो भौमस्य वै रथः ॥ १२७ ॥

रथस्तु पाण्डराष्टाश्वो हैमः ख्यातो बृहस्पतेः ।
रथस्तु शबलाष्टाश्वः शनेरपि हिरण्मयः ॥ १२८ ॥

धूसरस्तु रथो राहोर्नीलाष्टाश्वैरलङ्कृतः ।
अष्टौ धूम्रारुणाः केतोरश्वा युक्ता रथे स्मृताः ॥ १२९ ॥

तयोरपि स्थितिः ख्याता ह्यधस्तात् सोमसूर्ययोः ।
एतेषां तु पृथग् लोकास्त एव परिकीर्तिताः ॥ १३० ॥

शनेरुपरि लक्षे तु सप्तर्षीणां तु मण्डलम् ।
तेषामुपरि लक्षे तु मेधीभूते ध्रुवः स्थितः ॥ १३१ ॥

ग्रहनक्षत्रताराणां प्रेरको ध्रुव ईरितः ।
भूमेरूर्ध्वं भुवर्लोकस्त्वा नक्षत्रपथात् स्मृतः ॥ १३२ ॥

तदूर्ध्वमा ध्रुवपथात् स्वर्लोकः स्वर्ग उच्यते ।
तत्रामरावती नाम शक्रस्य तु पुरी शुभा ॥ १३३ ॥

देवर्षीणां विमानानि तत्र सन्ति सहस्रशः ।
आदित्यानां च रुद्राणां वसूनामश्विनोरपि ॥ १३४ ॥

मरुतामपि साध्यानां पुराणि भुवनानि च ।
स्वदिक्षु लोकपालानां राजर्षीणां च मुख्यशः ॥ १३५ ॥

गन्धर्वाणां पितॄणां च विमानानि सहस्रशः ।
अन्येषां च स्वर्गजितामावासः स्वरि(तः ? ति)स्मृतः ॥ १३६ ॥

ते स्वपुण्यानुरूपांस्तु भोगांस्तत्रैव भुञ्जते ।
शिंशुमारो ध्रुवस्यापि स्यादाधारो ध्रुवोपरि ॥ १३७ ॥

ध्रुवात् कोट्या महर्लोको वैमानिकसुरैर्वृतः ।
कोटिद्वये महर्लोकादूर्ध्वं लोको जनः स्मृतः ॥ १३८ ॥

तत्र सिद्धा विमानेषु मानसा ब्रह्मणः सुताः ।
निवसन्ति महात्मानो योगैश्वर्योपबृंहिताः ॥ १३९ ॥

आ ब्रह्मप्रलयादिति यावत् ।

कोटित्रये जनादूर्ध्वं तपोलोकः प्रतिष्ठितः ।
वैराजा नाम ये देवास्तपोलोके वसन्ति ते ॥ १४० ॥

आ ब्रह्मप्रलयात् तेऽपि वसन्ति ।

तपोलोकात् तु षट्कोट्यामूर्ध्वं सत्यं प्रतिष्ठितम् ।
ब्रह्मलोकस्तु स ज्ञेय आब्रह्मप्रलया स्थितिः ॥ १४१ ॥

प्रजानां पतयश्चैव दक्षभृग्वादयोऽमलाः ।
ब्रह्मलोकजितोऽन्ये च यतयो ब्रह्मवादिनः ॥ १४२ ॥

यत्र यद् ब्रह्मसदनं न तद् वर्णयितुं क्षमम् ।
सत्यलोकात् ततः किञ्चिदूर्ध्वं विष्णुपुरं महत् ॥ १४३ ॥

तेजोमयमपर्यन्तं तन्न वर्णयितुं क्षमम् ।
ब्राह्मे ब्रह्मा सदैवास्ते पूज्यमानः सुरादिभिः ॥ १४४ ॥

स्वर्लोके भगवान् विष्णुरास्तेऽनन्तासने विभुः ।
योगिभिः कुमुदाद्यैश्च विष्वक्सेनादिभिर्गणैः ॥ १४५ ॥

चक्राद्यैश्चायुधैः सर्वैर्मूर्तिमद्भिरुपस्थितः ।
योजनानां तथा कोट्यां विष्णुलोकादथोपरि ॥ १४६ ॥

रुद्रलोकः स्थितस्तस्य प्रभावो नोदितुं क्षमः ।
ज्योतिःप्राकारसंवीतः सूर्यकोटिसमप्रभः ॥ १४७ ॥

तत्र दिव्यवपुर्देवस्त्रिणेत्रश्चन्द्रशेखरः ।
स्कन्दनन्दिगणेशैश्च गणैर्दिव्यवपुर्धरैः ॥ १४८ ॥

उपास्यमानः सारूप्यमुक्तैरीशार्चने रतैः ।
आस्ते दिव्यविमानेषु शश्वद् देव्या सहोमया ॥ १४९ ॥

अलं वर्णनया । भूरादिसत्यान्तेषु पृथक् पृथग् रुद्रास्तदधिपतयः सप्त । यथा मञ्जर्यां —

"भूमौ सुभद्रो दिवि वायुवेगः स्वर्गे महावीर्यपराक्रमाख्यः ।
रुद्रो महःस्थो विकटः परस्तात् ख्यातो महाकालकवैद्युतौ च ॥

सत्यलोकेश्वरः श्वेतस्ततो ब्रह्मा ततो हरिः ।
रुद्रः स्वयं स्वर्लोकेशो ब्रह्माण्डान्तरितीरितः ॥"

अथ ब्रह्माण्डाद् बाह्यतो दशदिक्षु प्रतिदिशं दश दश रुद्रपुराणि । तेषां नामधेयानि कपालीशादिशतरुद्राणां संज्ञावेद्यानि । अत्र पौष्करे —

"लक्षयोजनमानानां तेजिष्ठानां पृथक् पृथक् ।
तत्रास्ते रुद्रशक्तिर्या भद्रकाली स्वकैर्गणैः ॥

एवं कालाग्निपूर्वाणि भुवनानि पृथक् पृथक् ।
भद्रकालीपुरान्तानि पृथ्वीतत्त्वे स्थितानि हि ॥"

अष्टोत्तरशतं भुवनानीति यावत् ।

अतः परं च भुवनान्यप्तत्त्वादिस्थितानि हि ।
तानि चातिविशालानि तेजिष्ठानि महान्ति च ॥ १५० ॥

स्वरूपतो वर्णयितुं तानि वर्षशतैरपि ।
न शक्यानि यतो ग्रन्थगौरवाद् भयमस्त्यतः ॥ १५१ ॥
समासेन प्रदर्श्यन्ते भुवनाध्वप्रसिद्धये ।
पृथ्वीतत्त्वादथाप्तत्त्वं ज्ञेयं दशगुणं ततः ॥ १५२ ॥
तेजस्तत्त्वं दशगुणं ततो वायुस्ततो वियत् ।

एवमुत्तरोत्तरप्रमाणानि पृथिव्यादिमायान्तानि तत्त्वानि विद्यात् । शुद्धविद्येश्वरसदाशिवतत्त्वानि क्रमात् सहस्रगुणितानि । शक्तिशिवतत्त्वयोरनाद्यन्तत्वात् परि(माणं नो)च्यते ।

अथाबादिषु तत्त्वेषु भुवनानां व्यवस्थितिः ॥ १५३ ॥
क्रमात् पृथग् वेदितव्या देशिकैरध्वशोधने ।
गुह्याष्टकाख्यमप्तत्त्वेऽप्यमरेशादिकं न + ॥ १५४ ॥
वह्नौ गुह्यातिगुह्याख्यं हरिश्चन्द्राद्यमष्टकम् ।
+ + + + + वित्राख्यमष्टकं वायुतत्त्वगम् ॥ १५५ ॥
वस्त्रापदाद्यं भीमाख्यमष्टकं व्योम्नि संस्थितम् ।
अहङ्कारान्तकं गन्धतन्मात्राद्येषु सप्तसु ॥ १५६ ॥
तत्त्वेषुच्छगलण्डादिशर्वाष्टकमवस्थितम् ।
पैशाचाद्यं तथा बुद्धौ देवयोन्यष्टकं स्थितम् ॥ १५७ ॥
योन्यष्टकाद्यं प्रकृतावकृताद्यमिह स्थितम् ।
स्थलेश्वराष्टकं यत् तु महादेवादिकं तु तत् ॥ १५८ ॥
कालतत्त्वे च मायायां विज्ञेयं स्याद् व्यवस्थितम् ।
वामाज्येष्ठादि नवकं शुद्धविद्याह्वये स्थितम् ॥ १५९ ॥
अनन्तेशादिसंज्ञाभिर्विद्येशभुवनाष्टकम् ।
स्थितमीश्वरतत्त्वे तु विज्ञेयं देशिकैः क्रमात् ॥ १६० ॥
सदाशिवाख्यं भुवनं स्थितं तत्त्वे सदाशिवे ।
निवृत्त्यादिकलासंज्ञं बिन्दौ भुवनपञ्चकम् ॥ १६१ ॥
इन्धिकाद्यं पञ्चकं तु स्थितं नादे ततः परम् ।
व्यापिन्याद्यं पञ्चकं यच्छक्तावेव व्यवस्थितम् ॥ १६२ ॥

भुवनानां चतुर्विंशत्यधिकं यच्छतद्वयम् ।
संक्षेपात् कथितं विद्यादेवं तत्त्वाध्वनि स्थितम् ॥ १६३ ॥

पूर्णान्येतानि सर्वाणि भुवनानि शरीरिभिः ।
प्रवर्तितैः शिवेच्छातः क्रियाशक्तेर्विजृम्भणात् ॥ १६४ ॥

भूलोकान्तं शरीराणि पार्थिवैर्द्व्यणुकादिभिः ।
प्रारब्धान्यधिकैर्यस्मात् पार्थिवानि भवन्ति हि ॥ १६५ ॥

भुवर्लोकादिलोकेषु देवानां तनवः शुभाः ।
आप्याश्च तैजसाः काश्चिद् वायवीयाः स्मृताः काचित् ॥ १६६ ॥

सर्वत्रगं स्मृतं व्योम पुर्यष्टकाविमिश्रितम् ।
मनःप्रभृति तत्त्वेषु मायान्तं भुवनेष्विह ॥ १६७ ॥

तत्तत्त्वप्रधानाः स्युर्देहा मायाविजृम्भणात् ।
शुद्धविद्यादिशक्त्यन्तमणूनां[1] देहसङ्ग्रहः ॥ १६८ ॥

विद्यामयः स्मृतः शुद्धः शुद्धतत्त्वोपलम्भनात् ।
किन्तु निर्वाणदीक्षादौ प्राक्कर्मागामिकर्मभिः ॥ १६९ ॥

भुवनेष्वेषु सर्वेषु पशुः शोध्यः शरीरवान् ।

अलमातिविस्तरेण ।

अथाध्वनां क्रमादेषां व्याप्तिः सम्यङ् निगद्यते ॥ १७० ॥

पृथ्वीतत्त्वं क्षवर्णश्च मन्त्रौ हृदयसद्यकौ ।

कालाग्निरपि कूश्माण्डो हाटकं ब्राह्मवैष्णवे ॥ १७१ ॥

रौद्रं च भुवनान्यन्तर्ब्रह्माण्डस्य भवन्ति षट् ।
अण्डाद् बहिः शतरुद्रा दशदिक्षु व्यवस्थिताः ॥ १७२ ॥

कपालीशो ह्यजो बुद्धो वज्रदेहः प्रमर्दनः ।
विभूतिरव्ययः शास्ता पिनाकी त्रिदशाधिपः ॥ १७३ ॥

अग्नी रुद्रो हुताशश्च पिङ्गलः खनको हरः ।
ज्वलनो दहनो बभ्रुर्भस्मान्तश्च क्षयान्तकः ॥ १७४ ॥

---

१. 'सू' क. पाठः.

यमो मृत्युर्हरो धाता विधाता च तथापरः ।
कर्ता चैव च संयोक्ता वियोक्ता धर्म एव च ॥ १७५ ॥

तद्वद् धर्मपतिस्तत्र दशमो दक्षिणे स्थितः ।
निर्ऋतिर्मारणो हन्ता क्रूरदृष्टिर्भयानकः ॥ १७६ ॥

ऊर्ध्वकेशो विरूपाक्षो धूम्रलोहितदंष्ट्रिणः ।
बलश्चातिबलश्चैव पाशहस्तो महाबलः ॥ १७७ ॥

श्वेतोऽथ जयभद्रश्च दीर्घहस्तो जलान्तकः ।
मेघनादः सुनादश्च वारुण्यां दश संस्थिताः ॥ १७८ ॥

शीघ्रो वायुर्वायुवेगः सूक्ष्मस्तीक्ष्णः क्षयान्तकः ।
पञ्चान्तकः पञ्चशिखः कपर्दी मेघवाहनः ॥ १७९ ॥

रुद्रा दशैते विख्याता वायव्यां दिशि संस्थिताः ।
निधीशो रूपवान् धन्यः सौम्यदेहो जटाधरः ॥ १८० ॥

लक्ष्मीधरो रत्नधरः श्रीधरश्च प्रसादनः ।
प्रकाशो दशमश्चेति कौबेर्यां दिशि संस्थिताः ॥ १८१ ॥

विद्याधिपे[1]शसर्वज्ञा ज्ञानभुग् वेदपारगः ।
सुरेशशर्वज्येष्ठाश्च भूतपालो बलिप्रियः ॥ १८२ ॥

वृषो वृषधरोऽनन्तः क्रोधनो मारुताशनः ।
ग्रसनोदुम्बरीशश्च फणीन्द्रो वज्रदंष्ट्रिणौ ॥ १८३ ॥

शम्भुर्विभुर्गणाध्यक्षस्त्रिदशस्त्रिदशेश्वरः ।
संवाहश्च विवाहश्च लिप्सुर्ब्रह्मा त्रिलोचनः ॥ १८४ ॥

तेषामुपरि रुद्राणां वीरभद्रो व्यवस्थितः ।
भद्रकाल्याश्च भुवनमेवमष्टाधिकं [2]शतम् ॥ १८५ ॥

भुवनानि क्रमोक्तानि रुद्राणां स्वाख्यया पृथक् ।

ओं नमोऽनन्त नमः शिवाय ओं नमोनमः सर्वद शर्व शिव सूक्ष्म सूक्ष्म शब्द शब्द पिङ्ग पिङ्ग पतङ्ग पतङ्ग तुरुङ्ग तुरुङ्ग साक्षिन् साक्षिन् पूर्वस्थित असंस्तु(त ? ता)संस्तुत अनर्चिता(न)र्चित ब्रह्मविष्णुरुद्रपर सर्वसान्निध्य-

---

१. 'च', २. 'शुभम्' क. पाठः.

कर सर्वभूतसुखप्रद भवोद्भव भव भव सर्व सर्व प्रथम प्रथम मुञ्च मुञ्च योगाधिपते महातेजः सद्भावेश्वर महादेव । थप्र=२८ ॥

मन्त्रावसानिकपदान्महादेवपदावधि ॥ १८६ ॥
विलोमतः पदानि स्युरष्टाविंशतिसंख्यया ।
इत्यध्वपञ्चकं षष्ठ्या निवृत्तिकलया समम् ॥ १८७ ॥
व्याप्तं सञ्चिन्तनीयं स्यादध्वषट्कं विभागतः ।
आपोऽग्निर्वायुराकाशो गन्धश्च रसरूपके ॥ १८८ ॥
स्पर्शः शब्दश्च वाक्पादपाणिपायुभगानि च ।
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणश्चेतीन्द्रियाणि च ॥ १८९ ॥
मनोहङ्कारबुद्ध्याख्यं तदन्तःकरणत्रयम् ।
सर्वेषां त्रिगुणाथ स्यात् प्रकृतिः कारणं परा ॥ १९० ॥
त्रयोविंशतितत्त्वानि विलोमादिति संख्यया ।
हसषाः शवला रो यमभबाः फपना धदौ ॥ १९१ ॥
यंतणा ढडठा टश्च त्रयोविंशतिवर्णकाः ।
शिरश्च वामदेवाख्यौ मन्त्रौ तद्वत् पुराणि तु ॥ १९२ ॥
षट्पञ्चाशत् क्रमेण स्युरमरेशादिनामभिः ।
अमरेशः प्रभासश्च नैमिशः पुष्कराषढी ॥ १९३ ॥
डिण्डी मुण्डी भारभूतिरित्यष्टावम्बुतत्त्वके ।
हरिश्चन्द्रश्च श्रीशैलो जल्पीशाम्रादकेश्वरौ ॥ १९४ ॥
मध्यमेशो महाकालः केदारो भैरवस्तथा ।
भुवनाष्टकमित्येतत् तेजस्तत्त्वे व्यवस्थितम् ॥ १९५ ॥
गया चैव कुरुक्षेत्रं नोखलं कनखालकम् ।
विमलेशोऽट्टहासश्च महेन्द्रो भीमकेश्वरः ॥ १९६ ॥
इत्यष्टौ भुवनानि स्युर्वायुतत्त्वगतानि तु ।
वस्त्रापदो रुद्रकोटिरविमुक्तो महालयः ॥ १९७ ॥
गोकर्णभद्रकर्णौ च स्वर्णाक्षः स्थाणुरित्यपि ।
भुवनाष्टकमाकाशसंज्ञे तत्त्वे व्यवस्थितम् ॥ १९८ ॥

---

१. 'थ' ख. पाठः.

छगलण्डो द्विरण्डश्च माकोटो[1] मण्डलेश्वरः ।
कालञ्जरः शङ्कुकर्णः स्थूलेशोऽथ स्थलेश्वरः ॥ १९९ ॥
प्रारभ्य गन्धतन्मात्रमहङ्कारान्तमध्वनि ।
स्थितानि भुवनान्यष्टावेतानि च यथाक्रमम् ॥ २०० ॥
पैशाचं राक्षसं याक्षं गान्धर्वं चैन्द्रसौम्यके ।
प्राजेशं ब्राह्ममित्येतद् देवयोन्यष्टकं धियाम्[2] ॥ २०१ ॥
अकृतं च कृतं चैव भैरवं ब्राह्मवैष्णवे ।
कौमारमौमं श्रीकण्ठमिति योगाष्टकं स्थितम् ॥ २०२ ॥
गुणप्रकृतितत्त्वे तु स्थितमेतत् तु भौवनम् ।
अष्टकैः सप्तभिस्त्वेवं षट्पञ्चाशद् यथाक्रमम् ॥ २०३ ॥
भुवनानि स्थितान्येवं पदान्यप्येकविंशतिः ।

महेश्वर परमात्मन् शर्व शिव निधनोद्भव निधन[3] अनिधन ओं स्वः ओं भुवः ओं भूः धू धू धू ना ना ना अनादे अभस्म अधूम अनग्ने अरूप ज्योति ज्योति तेज तेज प्रथम प्रथम अरूपिन् अरूपिन् । थन=२१ ॥

महेश्वराख्यात् प्रारभ्य स्यादरूपिपदावधि ॥ २०४ ॥
एवं पञ्चविधाध्वा स्यात् प्रतिष्ठाकलया समम् ।
षष्ठ्या व्याप्तं विचिन्त्यं स्यात् षोढाध्वव्याप्तिरीदृशी ॥ २०५ ॥
अथ विद्याकलायां तु पुरुषो राग एव च ।
अशुद्धविद्या च कला नियतिः काल एव च ॥ २०६ ॥
माया च सप्त तत्त्वानि वर्णसप्तकसंयुतम् ।
ञझजाश्छचङा घश्च शिखाघोरौ च मन्त्रकौ ॥ २०७ ॥
वामानि भुवनानि स्युः सप्तविंशतिसंख्यया ।
वामो भीमस्तथैवोग्रो भवश्चेशान एव च ॥ २०८ ॥
एकवीरश्च पुरुषे षडेते भुवनेश्वराः ।
प्रचण्डोमापतिश्चाजो ह्यनन्तश्चैकरुद्रकः ॥ २०९ ॥
रागतत्त्वे स्थितं त्वेतद् भुवनानां तु पञ्चकम् ।
क्रोधचण्डाव[4]शुद्धायां विद्यायां तु व्यवस्थितौ ॥ २१० ॥

---

१. 'का', २. 'त्', ३. 'न ओं' ख. पाठः. ४. 'ल' क. पाठः.

नियत्यां ज्योतिसंवर्तौ ततः सुकरसंज्ञितः ।
पञ्चान्तकैकवीरौ च शिवदश्च कलागताः ॥ २११ ॥

काले चेति यावत् ।

महादेवो वामदेव उद्भवश्चैकपिङ्गलः ।
एकनेत्रस्तथेशानो भुवनेशस्ततः परः ॥ २१२ ॥

अङ्गुष्ठमात्र इति चाप्यष्टावेते स्थलेश्वराः ।
कालतत्त्वाच्च मायायां भौवनी सप्तविंशतिः ॥ २१३ ॥

व्यापिन्व्यापिन् व्योम्निव्योम्नि अचेतनाचेतन महेश्वरपराय ज्योतीरूपाय सर्वयोगाधिपाय सर्वविद्याधिकृताय अनिधनाय गोप्त्रे गुह्यातिगुह्याय ओं नमोनमः सद्योजातमूर्तये वामदेवगुह्याय अघोरहृदयाय तत्पुरुषवक्त्राय ईशानमूर्धाय शिवाय सर्वप्रभवे ओं नमः शिवाय ध्यानाहाराय ।

व्यापिन्निति समारभ्य ध्यानाहारपदावधि ।
पदानां विंशतिश्चात्र स्याद् विद्याकलयाखिलम् ॥ २१४ ॥

व्याप्तं संचिन्तयेदेवं षड्विधाध्वव्यवस्थितिः ।
अथ शान्तिकलायां स्याच्छुद्धविद्येश्वरावपि ॥ २१५ ॥

सदाशिवश्च तत्त्वानि त्रीणि तस्यां स्थितानि हि ।
वर्णास्त्रयः स्युर्गखका मन्त्रौ कवचपूरुषौ ॥ २१६ ॥

अष्टादशैव भुवनान्यत्र वामादिसंज्ञया ।
वामा ज्येष्ठा च रौद्री च काली कलविकरणी ॥ २१७ ॥

बलविकरणी चैव बलप्रमथनी तथा ।
सर्वभूतदमन्येका नवमी तु मनोन्मनी ॥ २१८ ॥

शुद्धविद्याह्वये तत्त्वे स्थितान्येवमनुक्रमात् ।
अनन्तेशश्च सूक्ष्मश्च ततश्चापि शिवोत्तमः ॥ २१९ ॥

एकनेत्रश्चैकरुद्रस्त्रिमूर्तिश्च तथापरः ।
श्रीकण्ठश्च शिखण्डी च भुवनानीश्वराह्वये ॥ २२० ॥

सदाशिवाख्यं भुवनं स्थितं तत्त्वे सदाशिवे ।

---

१. 'तत्त्वे च' क. पाठः.

नित्ययोगिने योगपीठसंस्थाय शाश्वताय ध्रुवाय अनाश्रिताय अनाथाय अनन्ताय शिवाय सर्वव्यापिने व्योमरूपाय व्योमव्यापिने नमः ।

पदान्येकादशान्येव नित्ययोगिनआदितः ॥ २२१ ॥
व्योमव्यापिपदान्तानि स्थितान्येवं तु पञ्चधा ।
षष्ठ्या तु शान्तिकलया व्याप्तान्येवं विचक्षणैः ॥ २२२ ॥
षड्विधाध्वमयी व्याप्तिर्बोद्धव्या क्रमशो भवेत् ।
तथैव शान्त्यतीतायां शिवतत्त्वं व्यवस्थितम् ॥ २२३ ॥
वर्णाः षोडश सर्गाद्याः स्वराः स्युस्ते विलोमतः ।
अस्त्रेशानौ तथा मूलं त्रयो मन्त्रा भवन्ति हि ॥ २२४ ॥
निवृत्त्यादीनि भुवनान्यत्र पञ्चदशैव हि ।
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च ॥ २२५ ॥
शान्त्यतीतेति हि कलाः स्युर्बिन्दौ भुवनानि हि ।
इन्धिका दीपिका रोचिर्मोचिका चोर्ध्वगा तथा ॥ २२६ ॥
भुवनादीनि पञ्च स्युस्तानि नादकलाः खलु ।
व्यापिनी व्योमरूपा चाप्यनन्ता चाप्यनाथया ॥ २२७ ॥
अनाश्रिता चेति कलाः शाक्ताः स्युर्भुवनान्यपि ।
मन्त्राद्यं प्रणवं यत् तद् विलोमेनान्तकं तु तत् ॥ २२८ ॥
पदमेकं भवेदेवमध्वायं पञ्चधोदितः ।
शान्त्यतीतकलाव्याप्तं विद्यादित्यध्वनां क्रमात् ॥ २२९ ॥
षड्विधा व्याप्तिरुद्दिष्टा शैवागमविनिर्णयात् ।
भुवनानि चतुर्विंशत्यधिकं तु शतद्वयम् ॥ २३० ॥
षडध्वज्ञानवान् मुच्येन्मोचयेच्च भवार्णवात् ।
एकत्राध्वा षड्विधैकादश स्युर्मन्त्रास्त्वेकं चाप्यशीतिः पदानि ।
षट्त्रिंशच्चाप्यत्र तत्त्वानि वर्णाः पञ्चाशत् स्युः पञ्चसंख्याः कलाश्च ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापादे षडध्वनिर्णयपटलः सप्तदशः ।

---

1 'स्ता:' क. पाठः,

अथ निर्वाणदीक्षार्थं कृतनित्यक्रियो गुरुः ।
संहृतोदितसंहारः सकलीकृतविग्रहः ॥ १ ॥
विकिरक्षेपपूर्वेष्टशिवकुम्भास्त्रवर्धनिः ।
मण्डलेऽन्यतमे शम्भुमावाह्याभ्यर्च्य पूर्ववत् ॥ २ ॥

अत्र ज्ञानशम्भुः—

"न पुष्पैर्न च गन्धेन नाक्षतैः सलिलेन वा ।
रजसां रचनाभङ्गं कुर्यात्"

इति ।

त(स्या ? स्मि)न्मण्डलपर्यन्ते यजेच्चित्रपटे यथा ।
कुण्डेऽग्नौ शिवमिष्ट्वा तु प्राग्वत् सन्तर्प्य चोदितैः ॥ ३ ॥
विकीर्य च बलिं त्यक्त्वा पवित्रं वाग्यतो गुरुः ।
क्षालिताङ्घ्रिकरः सम्यगाचान्तो धवलाम्बरः ॥ ४ ॥
सोष्णीषः सोत्तरीयश्च सपवित्राङ्गुलीयकः ।
सकलीकृतदेहस्तु सामान्यार्घ्येण पूर्ववत् ॥ ५ ॥

प्रोक्षणनिरीक्षणभसितताडननेत्रबन्धमण्डपप्रवेशशिष्यान्तःकरणशोधनपुष्पाञ्जलिक्षेपाशिवकुम्भाग्निपूजनकुण्डोपान्तनाडीसन्धानमन्त्रसमर्पणपूर्णाहुत्यन्तं कर्म सर्वं समयदीक्षोक्तं कृत्वा

ततो मूलाङ्गमन्त्राणां क्रमात् कुर्वीत दीपनम् ।
अग्नियुक्तशिखाबीजसम्पुटानि पृथक् पृथक् ॥ ६ ॥
तारादीनि फडन्तानि मूलाङ्गार्णान्युदीर्य तु ।
त्रिवारं जुहुयादाज्यं मन्त्रस्फूर्तिकरं तु तत् ॥ ७ ॥
अथोर्ध्वकायशिष्यस्य नवतन्तुविनिर्मितम् ।
देहायतं तु यत् सूत्रं पाशसंयमनाय तत् ॥ ८ ॥

अस्त्रप्रोक्षितं कवचावगुण्ठितमभ्यर्चितं शिष्यशिखायां बद्ध्वा दक्षिणपादाङ्गुष्ठाक्रान्तं भुक्त्यर्थं लम्बयेत् पुरुषस्य । स्त्रियो वामाङ्गुष्ठाक्रान्तम् । मुमुक्षोः पादाङ्गुष्ठे पूर्वं बद्ध्वा पश्चात् शिखायां तत्सूत्रं शिष्यसुषुम्नात्मकं ध्यात्वा ओं हुं सुषुम्नायै नमः इति शिष्यदेहात् सुषुम्नां संहारिण्या संगृह्य तत्सूत्रे संयोज्य सुषुम्नात्मकं सूत्रं सम्पूज्य वर्मणावगुण्ठ्य सान्निध्यार्थं त्रिवारं जुहुयात् ।

सम्प्रोक्ष्य हृत्प्रदेशेऽस्य सन्ताड्य कुसुमात्ततः ।
स्वयं रेचकमार्गेण हुङ्कारं प्लुतमुच्चरन् ॥ ९ ॥

प्रविश्य शिष्यहृदयं नाड्या तच्चेतनां स्मरन् ।
स्फुरत्तारकसङ्काशामाच्छिद्यास्त्रेण मूलतः ॥ १० ॥

आकृष्य द्वादशान्तःस्थां शिवशक्त्युपबृंहिताम् ।
हृत्सम्पुटां गृहीत्वा तु संहारिण्याथ सूत्रके ॥ ११ ॥

संयोज्य व्यापकं ध्यात्वा कवचेनावगुण्ठ्य तु ।
सम्पूज्य जुहुयात् तिस्रो मूलेनैवाहुतीस्ततः ॥ १२ ॥

ताडनग्रहणादीनि सूत्रे कुर्यान्न विग्रहे ।
मलादिपाशांस्तत्सूत्रे पशोरस्य विभावयेत् ॥ १३ ॥

भोक्तृत्वभोगविषयशरीरजननक्षमान् ।
ततश्च शान्त्यतीताद्याः कलाः सूत्रे नियोजयेत् ॥ १४ ॥

तद् यथा —

बीजमूलमतीतायां मूर्ध्नि स्थानमुदाहृतम् ।
तथैव सान्तो वायुस्थो द्वादशस्वरबिन्दुमान् ॥ १५ ॥

शान्तिबीजं ललाटात् तत्स्थानं कण्ठावधि स्मृतम् ।
वह्न्यारूढं शिखाबीजं विद्याबीजमिति स्मृतम् ॥ १६ ॥

कण्ठादानाभि तत्स्थानं विद्या तत्र व्यवस्थिता ।
सान्तं ञान्तसमारूढं चतुर्थस्वरबिन्दुमत् ॥ १७ ॥

बीजमुक्तं प्रतिष्ठाया नाभेरागुल्फकस्थितिः ।
पृथ्वीदीर्घयुतं सान्तं निवृत्त्या बिन्दुशेखरम् ॥ १८ ॥

बीजं स्यात् स्थानमप्युक्तं गुल्फात् पादतलान्तकम् ।
तारादिकैः कलाबीजैः कलाख्याः सचतुर्थिकाः ॥ १९ ॥

ताडने हुंफडन्ताः स्युर्नमोन्ताः स्युर्नियोजने ।
स्वाहान्ताश्चैव होमे स्युरेवं सूत्रे नियोजयेत् ॥ २० ॥

एवं मूर्धादिषूक्तस्थानेषु पुष्पास्त्रेण सन्ताड्यातीताद्याः कलाः संहारिण्या मुद्रया संहृत्य तत्र तत्र सूत्रे क्रमेण नियोजयेत्। तदनु व्याप्यव्यापकभावं विभावयेत् । तत्र तत्त्वभुवनपदवर्णमन्त्राः व्याप्याः मलकर्ममायेशा व्यापकाः । पुनर्मलादयो व्याप्याः शान्त्यतीतादयो व्यापकाः । अत एव व्यापकानां ग्रहणात् तत्त्वाद्या मलादयश्च सङ्गृहीता भवन्तीत्युपस्थापिताभिः संनिहिताः शोधिताभिः शुद्धाः स्युः ।

अथ सूत्रस्थितान् पाशान् स्वमन्त्रादभिपूज्य तु ।
उद्दीपनं विधातव्यं वक्ष्यमाणक्रमेण तु ॥ २१ ॥

ताराघोरकलाबीजैः कलानाम चतुर्थियुक् ।
हुंफडन्तं क्रमादुक्त्वा जुहुयादाहुतित्रयम् ॥ २२ ॥

अतीतादिकलानां स्यादेवमुद्दीपनं ततः ।
पाशबन्धो विधातव्यस्त्वतीतादिकलाक्रमात् ॥ २३ ॥

तद् यथा—प्राग्वत् पुष्पास्त्रेण सन्ताड्य प्रणवपूर्वं मूलसम्पुटान्यतीतादिकलाबीजान्युच्चार्य भगवन्! शान्त्यतीतकलापाशमलमायाकर्मशक्तितत्त्वभुवनमन्त्रवर्णपदा(ध्व)व्यापकं बन्ध बन्ध हुंफडित्यतीतादिकलास्थाने सूत्रे ग्रन्थि कुर्यात् । एवं शान्त्यतीतादिनिवृत्त्यन्तं क्रमेण पाशबन्धनाय ग्रन्थि कुर्यात्। तदनु,

शरावसम्पुटे कृत्वा पाशांस्तन्मन्त्रहोमतः !
सम्पात्य मण्डले शम्भोर्निवेद्याभ्यर्च्य देशिकः ॥ २४ ॥
तस्माच्च नीत्वा रक्षार्थं शिवकुम्भे निवेदयेत्।

अत्र मन्त्रदीपनसूत्रावलम्बनसुषुम्नासंयोगशिष्यचैतन्ययोजनमलादिसङ्कल्पशान्त्यतीतादिताडनग्रहणसंयोगपूजासमर्पणोद्दीपनपाशबन्धनसम्पातशिवकुम्भसमर्पणानि चतुर्दश कर्माणि विधाय,

ततः कुम्भाशिवाग्नीनां प्र(माणं ? णामं) कारयेदमुम् ॥ २५ ॥
मण्डपाद् बाह्यतः प्राच्यां पृथङ्मण्डलकत्रये ।
क्रमात् समुपविष्टाय शिष्याय प्राङ्मुखाय तु ॥ २६ ॥

---

१. 'क्षास्वत' क. पाठः.

पञ्चगव्यं चरोरंशं दन्तकाष्ठं च दापयेत् ।
पलाशपत्रे मुक्त्यर्थं भुक्तयेऽश्वत्थपत्रके ॥ २७ ॥

तत्राष्टग्रासमात्रं चरुं प्राशयेन्नाधिकमिति केचित् ।

दन्तकाष्ठाग्रपातेन ज्ञेयमस्य शुभाशुभम् ।
सोमेन्द्रेशाग्रपातस्तु शुभोऽन्याशास्वशोभनः ॥ २८ ॥

अशुभे शान्तिहोमं तु कुर्यान्मूलाङ्गदक्षिणैः ।
सुलिप्तायां क्षितौ दर्भसंस्तरे सोत्तरच्छदे ॥ २९ ॥

प्राचीनेऽस्त्रशतालब्धे भुक्तये प्राक्छिराः स्वपेत् ।
मुमुक्षुर्भस्मशय्यायां स्वपेद् दक्षिणमस्तकः ॥ ३० ॥

हृन्मन्त्रेणालभेतैनं बध्नीयात् तच्छिखां हृदा ।
अस्त्रेणाच्छादयेच्चैनं सितसूक्ष्मेण वाससा ॥ ३१ ॥

तिलसर्षपरक्षाभिः शय्याबाह्ये त्रिवर्तुलम् ।
प्राकारवद् विलिख्यास्त्राद् दत्त्वा भूतबलिं ततः ॥ ३२ ॥

स्वयं च पञ्चगव्यादि प्राश्याचम्य गुरुः स्वपेत् ।
तत्र प्रातः समुत्थाय स्नात्वानुष्ठितनैत्यकः ॥ ३३ ॥

शिवानुज्ञातमानीय शिष्यं स्वप्नान् विचारयेत् ।
अनुमोद्य शुभे स्वप्ने त्वशुभे तस्य शान्तये ॥ ३४ ॥

तिलाज्यचरुसिद्धार्थैर्मन्त्रसंहितया शतम् ।
अघोरेण तथास्त्रेण हुत्वा दत्त्वा च दक्षिणाम् ॥ ३५ ॥

द्विजेभ्यश्चैव लिङ्गिभ्यः सुस्वप्नोऽस्त्विति वाचयेत् ।

अथ स्वप्नास्त्वशुभाः शुभाश्च कथ्यन्ते ।

श्रुतो दृष्टोऽनुभूतश्च प्रार्थितः कथितस्तथा ॥ ३६ ॥

एष्यंश्च सूचकश्चेति स्वप्नः सप्तविधः स्मृतः ।
पञ्चैषु विफलाः पूर्वे फलदौ चैष्यसूचकौ ॥ ३७ ॥

स्वाङ्गकेशनखानां च दन्तप्रासादवेश्मनाम् ।
देवचन्द्रार्कवृक्षाणां पातश्चोच्चात् तथात्मनः ॥ ३८ ॥

क्षौराभ्यङ्गविवाहाश्च शृङ्गिभिर्दंष्ट्रिभिः खगैः ।
पीडनं वा खरोष्ट्राश्वडोलारोहणकानि च ॥ ३९ ॥

दक्षिणाभिमुखं यात्रा गर्तपङ्काप्सु मज्जनम् ।
अनुत्थानं ततो मार्गविधानं पतितस्य च ॥ ४० ॥

रण्डाभिर्वाथ मुण्डाभिर्विकृताभिरथापि वा ।
अतिकृष्णातिरौद्राभिः कृष्णरक्ताम्बरायसैः ॥ ४१ ॥

भूषिताभिरसौम्याभिः स्त्रीभिः सङ्गोपगूहनम् ।
कर्षणं च सरित्सिन्धुसमुद्राणां च शोषणम् ॥ ४२ ॥

दीपाग्निज्योतिषां नाशः प्रतिमालिङ्गभेदनम् ।
कृष्णस्रगम्बरालेपरक्तवस्त्रादिधारणम् ॥ ४३ ॥

हरिद्रालेपनं स्थौल्यं देहाङ्गानां च खण्डनम् ।
कार्पासतिलपिण्याकसुवर्णमरि[1]चान्धसाम् ॥ ४४ ॥

लाभो विरेचनं चैव घृतं मत्स्यं च शासनम्(?) ।
मधुतैलेक्षुतक्राणां पानं गीतं च नर्तनम् ॥ ४५ ॥
इष्टैर्वियोगोऽनिष्टैश्च योगो देवद्विजन्मभिः ।
पितृभिर्लिङ्गिनश्चापि भर्त्सनं ताडनादिकम् ॥ ४६ ॥
अपूपसक्तुशुष्कान्नभक्षणं सलिलादिभिः ।
निर्वापणं वा दीपादेः पतनं पादचर्मणोः ॥ ४७ ॥
दिग्वाससामसौम्यानां मुण्डानां कृष्णवाससाम् ।
काषायिणां कपीनां च दर्शनस्पर्शनादिकम् ॥ ४८ ॥

खरोष्ट्रकोलमहिषाद्यारोहस्तद्रथस्य वा ।
गोमयोन्मज्जनालेपावसौम्यशिशुसङ्ग्रहः ॥ ४९ ॥

समाजः पानगोष्ठ्यादौ मृतैरप्युपगूहनम् ।
इत्येवमादिकं स्वप्ने विनाशभयदुःखदम् ॥ ५० ॥
स्वस्थानामपि रोगाय मरणायाथवा भवेत् ।
अतःपरं शुभाः स्वप्नाः कथ्यन्ते सिद्धिसूचकाः ॥ ५१ ॥

---

१. 'णि' ख. पाठः.

शुक्लस्रगम्बरालेपदीपदर्पणसङ्ग्रहः ।
दधिक्षीराज्यताम्बूलफलतण्डुलवाससाम् ॥ ५२ ॥
व्रीहिशालियवानां च शङ्खमौक्तिकयोषिताम् ।
सुरूपशुक्लवेषाणां लाभश्च रुधिरार्द्रता ॥ ५३ ॥
नद्यब्धितोयतरणं प्रज्वलद्वह्निदर्शनम् ।
चन्द्रार्कतारकास्पर्शो नरयानाधिरोहणम् ॥ ५४ ॥
वृक्षाद्रिहस्तिप्रासादफलक्षीरमहीरुहाम् ।
अस्थितुङ्गविमानानामारोहो- नृगवामपि ॥ ५५ ॥
विशिष्टलिङ्गिविप्रेन्द्रपितृदेवाद्यनुग्रहः ।
लिङ्गाक्षसूत्रप्रतिमाविशिष्टायुधसङ्ग्रहः ॥ ५६ ॥
स्वाङ्गवस्त्रगृहादीनामनिर्वाणाग्निदीपनम् ।
तेष्वान्त्रवेष्टनं वापि विडालेपः स्वविग्रहे ॥ ५७ ॥
मृतिर्वा कुणपस्पर्श आर्द्रमांसस्य भक्षणम् ।
दंशः स्वदक्षिणकरे शुक्लवर्णेन भोगिना ॥ ५८ ॥
पौष्करे स्वर्णपात्रे वा घृतपायसभोजनम् ।
दधिक्षीराशनं पानं मैरेयस्यामृतस्य वा ॥ ५९ ॥
तत्पूर्णकुम्भलाभो वाप्यगम्यस्त्रीनिषेवणम् ।
बलाकाकुक्कुटीक्रौञ्चीहंसीलाभः सुतागमः ॥ ६० ॥
मन्त्रपुस्तकविद्यानां वीणायाश्चौषधस्य वा ।
छत्राणां चामराणां च लाभस्तीर्थावगाहनम् ॥ ६१ ॥
इत्यादिदर्शनं स्वप्ने सिद्धिश्रीसुखसूचकम् ।
ब्राह्मणाश्चैव देवाश्च पितरो लिङ्गिनस्तथा ॥ ६२ ॥
यद् यद् वदन्ति हि स्वप्ने तत् तथैव भविष्यति ।

इति स्वप्नाधिकारः ।

अथ शिष्यं स्नातं निर्वर्तितसन्ध्योपासनं शम्भुकुम्भशिवाग्नीनां कृतप्रणामार्चनं प्राग्वदालम्बितपाशसूत्रं शिवानुज्ञया मण्डपं प्रवेश्य कुण्डान्तिक

---

१. 'श्री' ख. पाठः,

उपवेश्य ओं हाम् आधारशक्तये नमः इति तामग्नावावाह्य स्वाहान्तेन तेनाज्यं त्रिवारं जुहुयात् ।

तस्यामाधारशक्तौ तु विन्यसेदध्वपञ्चकम् ॥ ६३ ॥
तद्व्यापिकां निवृत्तिं च विभागोऽस्यैव कथ्यते ।
पृथ्वीतत्त्वं क्षवर्णश्च मन्त्रौ हृदयसद्यकौ ॥ ६४ ॥
अष्टाविंशतिसंख्यानि पदान्यन्त्याद् विलोमतः ।
कालाग्न्यादीनि काल्यन्तं भुवनाष्टोत्तरं शतम् ॥ ६५ ॥
स्वमन्त्रेण निवृत्तिं तु सूत्रात् संहृत्य तेन तु ।
वह्नौ शक्तौ निवेश्येष्ट्वा सान्निध्यायाहुतित्रयम् ॥ ६६ ॥
तेनैवाग्निप्रियान्तेन हुत्वा तत्र विभावयेत् ।
मलं कर्म च तन्मायारूपपाशात् पशोः पुनः ॥ ६७ ॥
भोक्तृत्वभोगदेहादिजनकं च शिवेच्छया ।
सङ्कल्प्य भुवनेष्वेषु योनीर्नानाशरीरिणीः ॥ ६८ ॥
भुवनानुगुणं याः स्युरनन्ताः कर्मसम्भवाः ।
तद्व्यापिकां च वागीशीं

ओं हां वागीश्वर्यै नमः

अनेनावाह्य पूजयेत् ॥ ६९ ॥

अनेनैव स्वाहान्तेन त्रिवारं हुत्वा भगवति! वागीश्वरि! पशोरनुग्रहाय सन्निहिता भवेति सम्प्रार्थ्यार्घ्याम्बुभिरस्त्रेण सम्प्रोक्ष्य पुष्पास्त्रेण हृदि सन्ताड्य रेचकेन स्वयं शिष्यहृदयं सुषुम्नया प्रविश्य तच्चैतन्यमस्त्रेणाच्छिद्याङ्कुशमुद्रयोत्कृष्य मूलेन द्वादशान्ते बिन्दुरूपे संयोज्य प्रणवसंपुटितं हंसं समुच्चारयंस्तच्छिष्यचैतन्यं पूरकेण स्वहृदयपद्ममानीय मूलमन्त्रं स्मृत्वा कुम्भकं च कृत्वा ततो मूलेन सङ्गृह्य रेचकेन द्वादशान्तं नीत्वा भवमुद्रया जरायुजाण्डजस्वेदजोद्भिज्जमानसीषु सर्वास्वनन्तासु योनिषु पूर्वोक्तासु तच्छरीरग्रहणव्यक्तिरूपेण शिष्यचैतन्यस्य युगपत् संयोगं कुर्यात् । तदनु

तारमूलं शिवायाग्नेर्जायासप्ताक्षरस्त्वयम् ।
योनिसंयोगगर्भाप्तिजन्मादौ मन्त्र ईरितः ॥ ७० ॥
होमे प्रयोज्यस्त्वस्यान्ते

भगवन्! अस्यात्मनः सर्वासु योनिषु युगपत् संयोगं कुरु कुर्विति ।

इमं मन्त्रमुदीरयेत् ।

तत्रास्यात्मनःपदादूर्ध्वं सर्वासु योनिषु संयोगमित्यस्मिन् स्थाने गर्भनिष्पत्तिगर्भजन्मादीनि वक्ष्यमाणानि कर्माणि तत्तन्नामधेयेन संयोज्य कुरु कुर्वित्युच्चार्य तत्तत् कर्म निष्पादयेत् । सर्वत्र मूलेनाहुतित्रयं हुत्वा सप्ताक्षरेण च त्रिवारं हुत्वा भगवन्नादिकं त्रिवारमुच्चार्य प्रार्थयेत् । तत्र सर्वयोनिसंयोगं गर्भनिष्पत्तिं सर्वगर्भजननं च क्रमान्निष्पाद्य

ततः सर्वशरीराणां युगपद् वृद्धिमादितः ॥ ७१ ॥
भोगनिष्पत्तये स्मृत्वा प्राक्कर्मागामिकर्म च ।
सर्वयोनिशरीरेषु भोगकर्मार्जनं स्मरेत् ॥ ७२ ॥

तत्र प्राग्वद्धुत्वा भगवन्नादौ नानाभोगदायकं कर्मार्जनं कुरु कुर्विति लोकधर्मिकायां प्राक्कर्मागामिकधर्माधर्मरूपकर्मार्जनं विभाव्य होतव्यम् ।

अपि साधकदीक्षायां प्राक्कर्मागामिकं स्मरन् ।
हुत्वा तद्देशकालाप्तशरीरविषयक्रियाः ॥ ७३ ॥
भेदेन नानारूपाढ्याः प्राक्तनागामिकर्मणाम् ।
भोक्तृत्वालिङ्गितस्यास्य ह्यात्मनः सुखदुःखयोः ॥ ७४ ॥
वेदनादस्य भोगस्य विषयासक्तिनिघ्नताम् ।
संस्मृत्य तिस्रो जुहुयान्मूलेनाब्ध्यर्णकेन च ॥ ७५ ॥

तत्र पशोरस्य सर्वभोगनिष्पत्तिं कुरु कुर्विति ।

अत्र भोजराजः — “लोकधर्मिकायां प्रागागामिकधर्माधर्मजनितदेशकालशरीरविषयभेदेन नानारूपं भोगं सञ्चिन्त्याहुतीर्दद्यात् । साधकदीक्षायां प्राक्कर्मणैव जनितदेशकालशरीरविषयभेदेन नानारूपं भोगं सञ्चिन्त्याहुतिदानं कर्तव्यमि”ति ।

ततो लयं च भोगेषु परमप्रीतिलक्षणम् ।
अभिसन्धाय जुहुयात् प्राग्वत् तल्लयकारणात् ॥ ७६ ॥

भोगेषु परमप्रीतिरूपं लयं कुरु कुर्विति । तदनु

जात्यायुर्भोगसंस्कारसिद्ध्यर्थं हृदयेन तु ।
शतं जुहोतु चात्राह ब्रह्मशम्भुः प्रयोजनम् ॥ ७७ ॥
“उपयुक्तोदकस्येव शरन्मेघस्य लाघवम् ।
शुद्धिरस्य विनिर्दिष्टा तत्त्वस्य क्षीणकर्मणः ॥

अपुनःप्रसवित्वं च निष्कृतिश्चेति सोच्यते ।
हृदयेनाहुतीनां तु तदर्थं जुहुयाच्छतम् ॥"

इति ।

ततो मूलेन त्रिवारं हुत्वा सप्ताक्षरेण च भगवन्नादिना निष्कृत्य सर्वकर्मशुद्धिं कुरु कुर्विति प्रार्थयेत् ।

भोगाभावं च सङ्कल्प्य मायापाशाद् बहिर्गतः ।
तद्विश्लेषं च सञ्चिन्त्य मूलसप्ताक्षरादिभिः ॥ ७८ ॥
हुत्वाथ भोक्तृतामस्य विषयासक्तिलक्षणम् ।
मलकार्यं विभाव्यास्य विशुद्ध्यै जुहुयाद् दश ॥ ७९ ॥
मूलेन मलविश्लेषं सङ्कल्प्य जुहुयात् त्रयम् ।
कर्मणोऽपि विशुद्धस्य विश्लेषायाहुतित्रयम् ॥ ८० ॥
मूलसप्ताक्षराभ्यां तु भगवन्नादिना पुनः ।

मायामलकर्मरूपस्य पाशत्रयस्य विश्लेषं कुरु कुर्विति पाशविश्लेषं विधाय मलादितत्त्वादिव्यापकस्य निवृत्तिपाशस्यास्त्रेण मूलेन सप्ताक्षरेण च त्रिवारं हुत्वा भगवन्नादिना निवृत्तिपाशच्छेदं[1] कुरु कुर्विति तत्पाशच्छेदं विभाव्य तदनु

सर्वयोनिशरीराणां विनाशात् तद्गतात्मनः ॥ ८१ ॥
एकत्वं परिभाव्याथ वौषड्जातियुतेन तु ।
मूलेन पूर्णां हुत्वा तु सतारं ब्रह्मणे नमः ॥ ८२ ॥
इत्युक्त्वावाह्य सम्पूज्य

ओं ब्रह्मन् शब्दस्पर्शौ गृहाण स्वाहा ।

इति हुत्वाहुतित्रयम् ।

तदनु

कारणेश त्वया नास्य यातुः पदमनामयम् ॥ ८३ ॥
प्रतिबन्धो विधातव्य आज्ञैषा पारमेश्वरी ।

एवं शिवाज्ञां दत्त्वा निवृत्तिकलापाशादिकारणेशं ब्रह्माणं विसर्जयेत् ।

एवं तु शिष्यचैतन्यं विशुद्धं स्फटिकप्रभम् ॥ ८४ ॥
निवृत्तिपाशनिर्मुक्तं स्मृत्वोद्धारं समाचरेत् ।

---

[1] 'च्छेदं विभाव्य' क. पाठः.

प्राग्वद्धुत्वा तु भगवन्नादीनां निवृत्तिकलापाशादुद्धारं कुरु कुर्विति ।

संहारिण्या तदुद्धृत्य चैतन्यं पूरकेण तु ॥ ८५ ॥

कृत्वात्मस्थं गुरुः पश्चाद् रेचकेनोद्धृतं क्षणात् ।
योजयेत् सूत्रदेहेऽस्य स्थैर्यार्थं त्रिर्जुहोतु च ॥ ८६ ॥

ततो वागीश्वरीमिष्ट्वा तिस्रो हुत्वा स्वमन्त्रतः ।
तां विसृज्याथ सन्दध्यात् कलां शुद्धामशुद्धया ॥ ८७ ॥

बीजं निवृत्त्याः शुद्धाया ह्रस्वमुच्चारयेत् ततः ।
विशुद्धायाः प्रतिष्ठाया दीर्घान्तं नामनी क्रमात् ॥ ८८ ॥

समस्य तु चतुर्थ्यन्तं नम इत्यभिपूज्य तु ।
अनेनैवाग्निजायान्तं हुत्वा वारत्रयं ततः ॥ ८९ ॥

लीनां निवृत्तिं संशुद्धां प्रतिष्ठायां विभावयेत् ।

इति निवृत्तिकलाशोधनम् ।

उक्तानां कर्मणामत्र क्रमपाठो विधीयते ॥ ९० ॥

प्रतिष्ठादिकलानां च य एव स्याद् विशोधने ।
आधारशक्तिस्तत्त्वं च वागीश्या नैकयोनिता ॥ ९१ ॥

शिष्यात्मनः समादानं योजनं सर्वयोनिषु ।
गर्भनिष्पत्तिजनने कर्मार्जनमतःपरम् ॥ ९२ ॥

ऐश्वर्यं भोगसिद्धिश्च लयो निष्कृतिरेव च ।
विश्लेषश्च मलादीनां पाशच्छेदश्च पूर्णया ॥ ९३ ॥

कारणेशार्पणोद्धारग्रहणैक्यान्यतः परम् ।
नियोजनं सूत्रदेहे वागीश्वर्या विसर्जनम् ॥ ९४ ॥

शुद्धतत्त्वात्मतालोकः कलासन्धानपूजने ।
इति कर्मक्रमस्तुल्यः प्रतिष्ठादिकलास्वपि ॥ ९५ ॥

अथ शक्तिं समाराध्य स्वमन्त्रेण प्रतिष्ठामावाह्य संस्थाप्याभ्यर्च्य सान्निध्याय तेन त्रिवारं हुत्वा मलकर्ममायापाशरूपं भोक्तृत्वभोगशरीरादिज-

---

१. 'का' ख. पाठः.

नकं प्रतिष्ठया व्याप्तं सञ्चिन्त्याबादिप्रकृत्यन्ते तत्त्वाध्वनि षट्पञ्चाशद् भुवनान्येकविंशतिपदानि वर्णानां त्रयोविंशतिः शिरोवामौ प्रतिष्ठया व्याप्ताश्चिन्तनीयाः। मूलसप्ताक्षराभ्यां त्रिवारं हुत्वा भगवन्नस्यात्मनो मलादितत्त्वानि प्रतिष्ठाकलायां सन्निधिं कुरु कुर्विति। तदनु षट्पञ्चाशद्भुवनेषु नानाविधा योनीः सङ्कल्प्य तद्व्यापिनीं वागीश्वरीमावाह्य संस्थाप्याभ्यर्च्य सान्निध्याय त्रिवारं हुत्वा प्रोक्षणताडनप्रवेशनच्छेदाकर्षणग्रहणादीनि पूर्ववत् कृत्वा पूरकेणात्मस्थं शिष्यचैतन्यं कुम्भीकृत्य रेचकेन द्वादशान्तगतं सङ्गृह्य पूर्ववत् सर्वासु योनिषु युगपद् व्यक्तिमापाद्य मूलसप्ताक्षराभ्यां त्रिवारं हुत्वा भगवन्नादिना च सर्वयोनिषु संयोगगर्भनिष्पत्तिजननकर्मार्जनभोगलयांश्च पृथक् पृथक् प्राग्वन्निष्पाद्य निष्कृतौ शिरसा शतं हुत्वा निष्कृतिं च प्राग्वदापाद्य भोगाभावान्मायापाशाद् बहिर्निष्क्रमणाद् विश्लेषं च पूर्ववद्धुत्वापाद्य मलकार्यभोक्तृत्वादिभ्यो बहिर्निर्गमाद् विश्लेषं ध्यात्वा तद्विशेषं च पूर्ववद्धुत्वापाद्य कर्मणो विश्लेषं तथैवापादयेत्। ओं विष्णो! अस्यात्मनः पुर्यष्टकं गृहाण स्वाहेति त्रिवारं हुत्वा कारणेशत्वयेत्यादिनाज्ञां विश्राव्य विसर्जयेत्। ततो मूलसप्ताक्षराभ्यां प्राग्वद्धुत्वा भगवन्नादिना प्रतिष्ठापाशादुद्धारं कुरु कुर्वित्युद्धृत्य तच्चैतन्यं प्राग्वदात्मस्थं कृत्वा सूत्रशरीरे प्रवेशयेत्। वागीश्वरीमिष्ट्वा विसृज्य कलासन्धानं च प्रतिष्ठाविद्याभ्यां स्वबीजोच्चारणादिना विधाय सम्पूज्य हुत्वा प्रतिष्ठां विद्यायां लीनां चिन्तयेत्। अथ विद्याकलां शोधितुं शक्तिमभ्यर्च्य स्वमन्त्रेण विद्याकलामावाह्य संस्थाप्याभ्यर्च्य तेन त्रिवारं हुत्वा व्याप्तिमवलोकयेत्। पुरुषादिमायान्तं सप्त तत्त्वानि सप्त वर्णाः सप्तविंशतिर्भुवनानि शिखाघोरौ मन्त्रौ पदानां विंशतिश्च मलादित्रयं च सर्वं विद्याकलया व्याप्तं विभाव्य सर्वयोनिव्यापिकां स्वमन्त्रेण वागीशीमावाह्य संस्थाप्याभ्यर्च्य तत्सान्निध्याय त्रिवारं हुत्वा प्रोक्षणताडनादिकं च सर्वयोनिसङ्कल्पसंयोगगर्भनिष्पत्तिजननभोगलयान्तं कर्म सर्वं मूलेन सप्ताक्षरेण त्रिवारं त्रिवारं हुत्वा भगवन्नादिना च यथायोगं विधाय निष्कृतौ शिखया शतं हुत्वा मूलेन सप्ताक्षरेण च प्राग्वन्निष्कृतिमापादयेत्। तत्र निष्कृत्या सर्वपाशशुद्धिं कुरु कुर्विति तथैव विश्लेषपाशच्छेदपूर्णाहुतीः प्राग्वद् विधाय ततो रुद्राय नम इत्यावाह्य संस्थाप्याभ्यर्च्य त्रिवारं हुत्वा ओं रुद्र! रूपगन्धौ गृहाण स्वाहेति त्रिर्जुहोति। ततः कारणेशेत्यादिनाज्ञां श्रावयित्वा तं विसृज्य पूर्ववद् विद्याकलापाशादुद्धृत्यात्मस्थं कृत्वा द्वादशान्तात् सूत्रे देहे निवेश्य

स्थिरीकरणाय त्रिवारं हुत्वा वागीशमभ्यर्च्य हुत्वा विसृज्य प्राग्वद् विद्याशान्तिबीजे ह्रस्वदीर्घे सन्धाय सन्निधीकृत्य मूलेन त्रिवारं हुत्वा विद्यां शान्तिकलायां विलीनां विभाव्य शान्तिं शोधयेत् ।

ततः शक्तिं समभ्यर्च्य हुत्वा सप्ताक्षरेण तु ।
शान्तिं स्वमन्त्रेणावाह्य संस्थाप्येष्ट्वा जुहोति च ॥ ९६ ॥

सन्निधानाय मूलेन हुत्वा ध्यात्वाध्वपञ्चकम् ।
सदाशिवान्तं तत्त्वानि पुराण्यष्टादशैव तु ॥ ९७ ॥

एकादश पदान्यत्र मन्त्रौ कवचपूरुषौ ।
त्रयो वर्णाश्च विज्ञेयाः शान्त्या व्याप्ताः पृथक् पृथक् ॥ ९८ ॥

ततो वागीश्वरीं नानायोनिसञ्जननीं स्मरन् ।
आवाह्याभ्यर्च्य हुत्वाथ मूलेन प्राग्वदाहुतीः ॥ ९९ ॥

तदनु प्रोक्षणताडनप्रवेशच्छेदाकर्षणग्रहणयोजनगर्भजन्मकर्मार्जनैश्वर्यभोगलयांश्च पूर्ववद् विधाय निष्कृतौ वर्मणा शतं हुत्वा मूलसप्ताक्षराभ्यां भगवन्नादिना निष्कृत्य सर्वपाशशुद्धिं कुरु कुर्विति समाप्य

भोगाद् बहिर्निर्गमनान्मूलसप्ताक्षरादिभिः ।
विश्लेषं सर्वभोगेभ्यः कृत्वाथ मलकर्मणोः ॥ १०० ॥

विश्लेषायाहुतीर्हुत्वा पाशच्छेदेऽस्त्रतस्तथा ।
मूलात् सप्ताक्षराद्धुत्वा भगवन्नादिनात्मनः ॥ १०१ ॥

मलादितत्त्वादिव्यापकस्यच्छेदनं कुरु कुर्विति समाप्य

प्राग्वत् पूर्णाहुतिं दत्त्वा

ओं ईश्वराय नम इति

आवाह्याभ्यर्चयेदमुम् ।
हुत्वा च बुद्ध्यहङ्कारौ गृहाणेति तदाख्यया ॥ १०२ ॥

हुत्वा त्रिवारं संश्राव्य कारणेशादिना ततः ।
तं विसृज्यैश्वरं शिष्यं शान्तिपाशैर्वियोजितम् ॥ १०३ ॥

मूलसप्तार्णहोमेन भगवन्नादिनात्मनः ।
प्राग्वच्छान्तिकलापाशादुद्धारं कुरु कुर्विति ॥ १०४ ॥

संहारिण्या तदुद्धृत्य पूरकेणात्मयोजितम् ।
रेचकेनोद्धृतं पाशसूत्रदेहे प्रवेशयेत् ॥ १०५ ॥
स्थिरीकृत्य तु मूलेन हुत्वा वागीश्वरीमपि ।
सम्पूज्य हुत्वा चोत्सृज्य कलासन्धानमाचरेत् ॥ १०६ ॥
प्राग्वद्ध्रस्वं च दीर्घं च शुद्धाशुद्धविभागतः ।
शान्त्याश्च शान्त्यतीतायाः प्राग्वदिष्ट्वा जुहोतु च ॥ १०७ ॥
शान्तिं लीनामतीतायां कृत्वातीतां च शोधयेत् ।
शान्त्यतीतामथावाह्य संस्थाप्येष्ट्वा जुहोतु च ॥ १०८ ॥
प्राग्वद् व्याप्तिं स्मरेदत्र मलकर्मविमिश्रिताम् ।
शक्त्यन्तोऽध्वा त्रयो मन्त्रा वर्णाः षोडश वै पदम् ॥ १०९ ॥
एकं तु भुवनानां च चिन्त्यं पञ्चदशैव हि ।
बिन्दुनादकलाशक्तिव्यक्तान्येतान्यतीतया ॥ ११० ॥
व्याप्तानि तत्सन्निधाने मूलेन त्रिर्जुहोत्वथ ।
वागीशीं भुवनेष्वेषु व्याप्तामावाह्य चार्चयेत् ॥ १११ ॥
तत्सान्निध्याय जुहुयात् त्रिवारं पूर्ववद् घृतम् ।

तदनु प्रोक्षणताडनच्छेदाकर्षणयोनिसंयोगगर्भजन्मकमैश्वर्यभोगलयान्तं तिसृभिस्तिसृभिराहुतिभिर्मूलसप्ताक्षराभ्यां हुत्वा भगवन्नादिना तत्तत्कर्माभिसन्धाय सम्पाद्य निष्कृतौ मूलेन शतं हुत्वा प्राग्वन्निष्कृतिं कुरु कुर्विति च शान्त्यतीतापाशेभ्यो बहिर्निर्गमाद् विश्लेषं ध्यात्वा मूलेन त्रिवारं हुत्वातीतापाशस्य मलादिव्यापकस्य प्रणवेनाहुतित्रयं हुत्वा तत्पाशच्छेदाय मूलसप्ताक्षराभ्यां च भगवन्नस्यात्मनः शान्त्यतीतापाशच्छेदं कुरु कुर्वित्युक्त्वा मूलेन पूर्णां हुत्वा कलानां शुद्ध्यर्थं [1]समयसमयाचारपाशं सादेशे सङ्कल्प्य शोधयेत् ।

ओं [2]समयसमयाचारपाशाधिपेभ्यो गणेभ्यो नम इत्यावाह्य संस्थाप्याभ्यर्च्यानेन स्वाहान्तेन सन्निधानाय त्रिवारं हुत्वा सप्ताक्षरेण च ततः प्रणवमूलादिकं सदाशिवपुर्यष्टकांशं मनः सङ्गृहाण स्वाहेति त्रिवारं हुत्वा कारणेशेत्यादिना संश्राव्य तं विसर्जयेत् । ततः शिवास्त्रेण प्रणवसम्पुटेन रेचकेनातीतापाशात् संहृत्यात्यन्तं निर्मलमात्मस्थं शिष्यस्थं च विधाय तच्छिरस्सु-

---

१. २. 'समाचार' ख. पाठः.

दकबिन्दुं दत्त्वाथ वागीशीमभ्यर्च्य सन्तर्प्य विज्ञापयेत् । भगवति ! पञ्चतत्त्वखेदितासि गच्छेदानीं स्वविषयमिति विसृज्य शान्त्यतीतकलां शक्तितत्त्वे विलीनां ध्यात्वा मायातत्त्वान्तमात्मतत्त्वमुपस्थापयेत् । प्रणवमूलादिकमात्मतत्त्वाय नम इति सन्निधीकृत्य सप्ताक्षरेणोच्चैरुच्चारयन्नाहुतिशतं हुत्वैवं विधिवैकल्यकर्मशुद्धिर्भवेत् ।

ततः सदाशिवान्तं विद्यातत्त्वं स्वमन्त्रेणावाह्य स्थापयित्वाभ्यर्च्य तेनैवोपांशूच्चारणेनाष्टोत्तरशतं हुत्वा मन्त्रोच्चारणवैकल्यं शुध्यति । ततः शक्त्यन्तं शिवतत्त्वमुपस्थाप्यावाह्य स्थापयित्वाभ्यर्च्य तेनैव मानसोच्चारणेनाष्टोत्तरशतं हुत्वा मनोविज्ञानवैकल्याच्छुध्यति । ततस्तु

विश्वाध्वव्यापिकां शक्तिमध्वान्तःस्थां विभावयेत् ॥ ११२ ॥
सर्वकारणरूपां च तदग्रे शिष्यपुद्गलम् ।
विशुद्धमणिसङ्काशं विचिन्त्याभ्यर्च्य तं गुरुः ॥ ११३ ॥
कर्तरीं शिखयामन्त्र्य बुभुक्षोर्द्वादशाङ्गुलात् ।
परतस्तु शिखां छिन्द्यान्मोक्षायाष्टाङ्गुलात् परम् ॥ ११४ ॥
शिखयैव शिखां छित्त्वा स्नायाच्छिष्यो विशुद्धये ।
गुरुश्च धौतपाण्यङ्घ्रिराचान्तः प्रोक्षणाच्छुचिः ॥ ११५ ॥
ततो गुरुः प्रविश्यान्तः सशिष्यः सकलीकृतः ।
सपाशसूत्रां तु शिखां छन्नां गोमयगोलके ॥ ११६ ॥
स्रुचि स्रुवेण विहितां कृत्वा पूर्णाहुतिं यथा ।
हुत्वा बहिस्ततो गत्वा क्षालयेत् स्रुक्स्रुवावपि ॥ ११७ ॥
कर्तरीं च समाचम्य शिवमिष्ट्वा विशेषतः ।
विज्ञापयेद् भो भगवन्नध्वशुद्धिस्त्वदाज्ञया ॥ ११८ ॥
अस्यात्मनः कृता देव! लूनपाशशिखा यतः ।
शिवत्वं च परं धाम यात्वयं त्वदनुग्रहात् ॥ ११९ ॥
आज्ञा मे दीयतामस्य शिवत्वगुणयोजने ।

एवं कुरुष्वेति भगवतानुज्ञातः प्रहृष्टोऽर्घ्यपात्रहस्तः शिष्यसहितोऽग्निसमीप उपविश्य प्राग्वत् प्रोक्षणताडनान्तःकरणसकलीकरणनाडीसन्धान-

मन्त्रतर्पणानि विधाय संहितामन्त्राणामेकैकाहुत्या सकलीकरणशोधनं विधाय शिवात्मनि शिष्यचैतन्यं नियोजयेत्। ततः गुरु(वि?र्वि)न्दुतत्त्वास(न?ने) स्वयं विद्यातत्त्वास्पद इन्धिका दीपिका रोचिका मोचिका ऊर्ध्वगामिनी सूक्ष्मा सुसूक्ष्मा अमृता ऋता शक्तिरिति नादशक्तिकलास्तद्व्यापिनी व्योमरूपा अनन्ता अनाथा अनाश्रिता चेति बहिष्करणं विभाव्यान्तःकरणशुद्धात्मतत्त्वस्तत्त्वत्रयापूर्णतनुः पूरककुम्भकेन कृत्वा तालुके जिह्वां संयोज्य किञ्चिद्विवृतवक्त्रो दन्तैर्दन्तानसंस्पृशन् ऋजुकायः शिष्यचैतन्यमात्मानि संयोज्य सुषुम्नायामन्यनाडीः प्राणवायुनैकीकृत्य शिष्यात्मानं समन्त्रं शुद्धस्फटिकनिभं विचिन्त्य मूलमन्त्रं हंसं चोच्चारयन् हृत्कण्ठतालुबिन्दुमूर्धगतान् ब्रह्मादिकारणेशानतीत्य शिष्यात्मानं पूर्णाहुत्या बहिः कुम्भकेन शिवे संयोज्य शिष्यं शिवीभूतं ध्यात्वा तस्मै शिवविषयान् षडङ्गगुणानापादयेत्। तद्यथा—

ओं हुं आत्मन्! सर्वज्ञो भव स्वाहा इत्याज्याहुतिं हुत्वा एवमिव परितृप्त अनादिबुद्ध स्वतन्त्र अलुप्तशक्ति अनन्तशक्ति इत्येकैकाहुतिं हुत्वा शिवीभूतं सार्वज्ञ्यादिगुणसम्पन्नं शिष्यं विभाव्य मूलेनार्घ्यजलेन मन्त्रसंहितया तमभिषिच्याष्टौ समयान् ज्ञापयेत्।

तद्यथा —

माहेश्वरांश्च तच्छास्त्रसमयाचारसाधकान् ॥ १२० ॥
शिवं गुरुं च तद्भक्तान् न निन्देत् प्रथमस्त्वयम्।
विमानगुरुलिङ्गानां (जा?छा)यां लिङ्गिगवामपि ॥ १२१ ॥
न लङ्घयेच्च निर्माल्यं नाश्नीयात् पतितादिभिः।
पुष्पिकासौतिकाशौचिस्पृष्टं नाद्यान्न तान् स्पृशेत् ॥ १२२॥

अयं द्वितीयः समयः।

समयान् समयाचारान् मन्त्रतन्त्राण्यदीक्षितैः।
न लेखयेच्छ्रावयेद् वा तृतीयः समयस्त्वयम् ॥ १२३ ॥
द्विकालं वा त्रिकालं वाप्येककालं शिवं गुरुम्।
पूजयित्वैव भुञ्जीत चतुर्थः समयस्त्वयम् ॥ १२४ ॥

---

१. 'ने' क. पाठः.

अनापतितशक्तींश्च पतितान् वाथ नास्तिकान् ।
न दीक्षयेत् पापशीलान् समयः पञ्चमः स्मृतः ॥ १२५ ॥
शिवाग्निगुरुविद्यानां यदिष्टं नवमेव च ।
अन्नाद्यं कुसुमाद्यं वा नानिवेद्य चरेत् स्वयम् ॥ १२६ ॥
तद्वद् बालाबलावृद्धरोगार्तकृपणानपि ।
अतिथीनन्नपानाद्यैस्तर्पयित्वा स्वशक्तितः ॥ १२७ ॥
शुककाकश्वचण्डालेभ्योऽन्नं दद्यादनुग्रहात् ।
इति षष्ठं तु शैवानां विज्ञेयं समयव्रतम् ॥ १२८ ॥
अष्टमीपर्वभूतासु स्त्रीक्षौराभ्यङ्गवर्जनम् ।
कांस्यपात्राशनं पानं मत्स्यं मांसं मधूनि च ॥ १२९ ॥
सर्वथा सर्वदा वर्ज्यं समयस्त्वेष सप्तमः ।
यमानां नियमानां च यथायोगनिषेवणम् ॥ १३० ॥
चतुर्दश्यष्टमीपर्वग्रहविष्वयनादिषु ।
पवित्रचैत्रकादौ च विशेषविधिपूजनम् ॥ १३१ ॥
कुर्यान्नक्तं दिवा वापि सकृत् सङ्कल्प्य भोजनम् ।
शरणागतरोगार्तपाथिकत्रस्तविह्वलान् ॥ १३२ ॥
शिवभक्तानथाप्यन्यान् साधून् गोब्राह्मणानपि ।
पोष्यान् भृत्यादिकान् शक्त्या पालयेदिति चाष्टमः ॥ १३३ ॥
समयः कथितो ह्येष पालनीयः प्रयत्नतः ।
इति गुरुसमयानां प्राप्य शिक्षां तु शिष्यो
गुरुमभिमतवित्तैः प्रश्रयैस्तोषयित्वा ।
प्रणतिमतिविधायानुज्ञया तस्य शश्वत्
प्रियहितविनिविष्टः शम्भुपूजां विदध्यात् ॥ १३४$\frac{३}{२}$ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
निर्वाणदीक्षापटलोऽष्टादशः ।

अथैकोनविंशः पटलः ।

अथोच्यते क्रियावत्या दीक्षया दीक्षितस्य तु ।
सम्यग्विज्ञाततन्त्रस्य साधकस्याभिषेचनम् ॥ १ ॥

अत्र ब्रह्मशम्भुः —

“त्रिपदार्थां चतुष्पादां भुक्तिमुक्तिफलोदयाम् ।
संहितां यो विजानाति शिष्योऽसौ सेकमर्हति ॥”

इति । इष्टदिवसमुहूर्तादौ यथावच्छिष्यमधिवास्य कुम्भमण्डलाग्नीनां पूजां कारयित्वा प्राच्यामैशान्यामुदीच्यां वा नवसप्तपञ्चहस्तान्यतमे चतुरश्रे मण्डपे अर्धहस्तोच्छ्रितचतुस्त्रिद्विहस्तान्यतमचतुरश्रवेदिकायामक्षतैर्यवैर्वा चतुष्कोणविरचितस्वस्तिकायां विद्येश्वरसदाशिवाधिष्ठितं कलशनवकं वा ब्रह्मभिर्निवृत्त्यादिकलाभिश्चाधिष्ठितं कलशपञ्चकं वा संस्थाप्य सर्वरत्नौषधिगन्धमिश्रितं तीर्थजलैरापूर्य सितवसनाभ्यामाच्छाद्य कुशकूर्चाश्वत्थचूतपल्लवबीजपूरफलानि कलशमुखेषु निधाय शक्तिं शिवं साध्यमन्त्रं च तेषु सम्पूज्य वेद्यां दक्षिणतः शिवमुपवेश्य सिद्धार्थाक्षततिलदूर्वाज्यचरुभिः क्रमात् साध्यमन्त्रेण हुत्वाथ सम्पाताज्यं कलशेषु किञ्चिन्निर्वाणदीक्षोक्तमार्गेण निवृत्त्यादिकलात्रयं शिष्यदेहे संशोध्य ततः शान्त्यतीतां शोधयित्वा विद्यादेहं सदाशिवं ध्यात्वा शिष्यहृदये समावाह्य संस्थाप्य सकलीकृत्यासनादिक्रमेणाभ्यर्च्य पूर्णां हुत्वा अथ शान्तिकलां शोधयेत् । तदनु

प्रणवं च ततो मूलमात्मञ्छब्देन योजितम् ।
अणिमादिगुणाख्यान्ते ते भवन्त्यग्निजायया ॥ २ ॥

अणिमादिगुणानां तु पृथक्पृथगुदीर्य तु ।
हुत्वा चाष्टाहुतीः शिष्यं कुर्यादष्टगुणैर्युतम् ॥ ३ ॥

अणिमा महिमा चैव लघिमा प्राप्तिरेव च ।
प्राकाम्यं चं तथेशित्वं वशित्वं च ततः परम् ॥ ४ ॥

यत्रकामावसायित्वमित्यैश्वर्यगुणाष्टकम् ।
ततः शिष्यं तु साङ्गेन साध्येन सकलीकृतम् ॥ ५ ॥

शिवेन च तथा शक्त्या समधिष्ठितविग्रहम् ।
गन्धाद्यैरभिपूज्याथ गीतवाद्यसमन्वितम् ॥ ६ ॥

वर्णपिष्टकृतैर्वस्त्रैर्वज्राद्यैः पात्रयोजितैः ।
प्राज्यप्रदीपैर्नीराज्य प्राङ्मुखं तमुदङ्मुखः ॥ ७ ॥

तदनु

दधिगोमयसिद्धार्थदूर्वाचन्दनपङ्कजैः ।
वल्मीकमृत्क्षारक्षाभिर्निर्मृज्य सलिलाप्लुतैः ॥ ८ ॥
धूपान्तमभिपूज्यैनं कलशैरभिषेचयेत् ।
अनन्तादिनिवृत्त्यादिक्रमात् तन्मन्त्रयोजितैः ॥ ९ ॥
परिस्रवत्सुधाधारामैक्येनास्य सुषुम्नया ।
पातयंश्चिन्तयेत् तत्तन्मन्त्रमूर्तिप्रवेशनम् ॥ १० ॥
परमामृतविष्यन्दक्षालिताशेषकल्मषम् ।
तद्धृदम्भोजचिद्व्याप्तां मन्त्रमूर्तिं च भावयेत् ॥ ११ ॥

अत्र ब्रह्मशम्भुः—

“अमृतं तोयमाधारः शक्तिस्तस्य तु कुण्डली ।
अभिषेक्ता शिवो ज्ञेय अभिषिच्यस्तु पुद्गलः ॥”

इति । ततः शिष्यं परिवर्तितशुक्लाम्बरं प्रक्षालितपाणिपादमाचान्तं देवस्य दक्षिणवेद्यां श्रीपर्ण्यादिमये परिकल्पितानन्तासने प्राङ्मुखमुपवेश्य भूतशुद्धिं विधायोपवीतभूषणगन्धपुष्पैरलङ्कृत्य सकलीकृत्याभ्यर्च्यारात्रिकं च दधिदूर्वाक्षतार्चितं त्रिवारमुद्भ्राम्य शीताम्बुचुलुकत्रयेण मङ्गलाष्टकं सवन्दनं स्पर्शयेत् । तच्च

रोचना चन्दनं दूर्वाः सुमनोदधिपायसम् ।
यवाः सिद्धार्थकाश्चेति कथितं मङ्गलाष्टकम् ॥ १२ ॥
ततः संयोजयेच्छिष्यमधिकारेण साधनैः ।
कटकं चोत्तरीयं च छत्रं चामरपादुके ॥ १३ ॥
पुस्तकं चाक्षसूत्रं च भृङ्गारं यानवाहने ।
अन्यच्च राजचिह्नं यत् सर्वमर्हति साधकः ॥ १४ ॥
आचार्यस्यापि तुल्योऽयमधिकारः परिच्छदे ।
विशेषस्तस्य मकुट उष्णीषं करणी तथा ॥ १५ ॥

तदनु गुरुः स्वसव्यहस्तेन तस्य दक्षिणकरं गृहीत्वा पश्चिमद्वारेण प्रविश्य शम्भुकुम्भमण्डलशिवानां प्रदक्षिणत्रयं पूजां च कारयित्वा जानुभ्यां प्रणामेनावनिं गतस्य शिष्यस्याञ्जलौ सगन्धकुसुमसलिलं साध्यमन्त्रमुच्चार्याञ्जलिना सोपदेशं मन्त्रं दद्यात् । सोऽपि तमञ्जलिं स्वशिरसि निधाय गुरवे नमस्कृत्य सुषुम्नामार्गेण सृष्टिक्रमेणानीय स्वहृदयकमले निवेश्य द्वादशान्तामृतेनाप्लाव्य मन्त्रसंहितयाज्येन हुत्वा शिवकुम्भाग्नीनां दक्षिणतः पद्मासने साध्यमन्त्रं साङ्गमावाह्य स्थापयित्वा शिववत् पूजयित्वा तस्मान्मन्त्रमुद्धृत्य साधकः स्वदेहे शक्त्यादिक्रमेण विचिन्त्य स्थापयेत् ।

यथा ब्रह्मशम्भुः —

"शिवाच्छक्तिं ततो बिन्दुं बिन्दोर्नादं च नादतः ।
अर्धचन्द्रं हकारं च षष्ठमाद्यस्वरं तथा ॥

तदथो द्विपदं ब्रह्म कलाकारणमक्षरम् ।
मन्त्रबीजमनुच्चार्यं सृष्टिसंहारकारणम् ॥"

इति । एतेषां नव ग्रन्थिस्थानानि विज्ञेयानि द्वादशान्ताशिखारन्ध्रललाटभ्रूमध्यतालुगलहृदयनाभिवस्तीनि । एतेषां स्थानेषु पद्मेषु क्रमं ध्यात्वामृतेनाप्लावयेत् । अथ तं समयाचारान् गुरुर्ग्राहयेत् । ते च निर्वाणदीक्षितस्योदिताः साधकस्यापि समाना एव । अस्यापि सेवाव्रतधारणं विशिष्टलिङ्गपरिग्रहो विशुद्धाहारसेवा सङ्गपरित्यागो निग्रहानुग्रहेष्वनास्था च निषिद्धवर्जनं विहितानां कर्मणामपरित्यागश्चेति संक्षेपः ।

अथाग्निं संहितामन्त्रैः सन्तर्प्य च विसर्जयेत् ।
मण्डलस्थं तदाज्ञातः शिवकुम्भे नियोजयेत् ॥ १६ ॥

भूतेभ्योऽथ बलिं दिक्षु विकीर्य स्वस्वमन्त्रतः ।
ततः शिष्यं यथापूर्वमासनस्थं तु पूजितम् ॥ १७ ॥

मङ्गलैः शिवकुम्भेन गुरुस्तमभिषेचयेत् ।
अनेनैव विधानेन राज्यश्रीविजयाप्तये ॥ १८ ॥

आयुरारोग्यसौभाग्यपुत्रस्त्रीपुष्टयेऽपि वा ।
नृपं वापि नरानन्यान् स्त्रियश्चाप्यभिषेचयेत् ॥ १९ ॥

तत्तदाप्नोत्ययत्नेन शिवभक्तस्तु नान्यथा ।
प्राप्ताभिषेकमन्त्रोऽथ प्राप्यानुज्ञां गुरोस्ततः ॥ २० ॥

साधकः साधयेन्मन्त्रं दृष्टादृष्टफलाप्तये ।
शस्तर्क्षतिथिवारादौ स्वानुकूले विशेषतः ॥ २१ ॥

समभ्येत्य शिवक्षेत्रं भूरिपुष्पकुशाम्बुमत् ।
दक्षिणोत्तरदिग्द्वारं लिङ्गं यत्नेन वर्जयेत् ॥ २२ ॥

ब्रह्मस्कन्देन्द्रनन्दीशवृषविष्णुगणेश्वरैः ।
मातृभास्करदुर्गाभिर्युक्तं लिङ्गं तु कीलतम् ॥ २३ ॥

वर्जयेदित्यर्थः । अपिच साधकान्तरसेवितं मानुषप्रतिष्ठितं पूजारहितं म्लेच्छान्त्यजजनदूषितं चलितभिन्नादिदोषदुष्टमनेकलिङ्गं च वर्ज्यम् । एकलिङ्गं पश्चिमद्वारं स्वयम्भुलिङ्गं च श्रेष्ठम् । पूर्वं दैवमार्षं च बाणं च मध्यमम् । असुरराक्षसपिशाचादिप्रतिष्ठितं कनिष्ठम् । एतेषु लिङ्गेषु सर्वार्थमन्त्रसाधारणतया मन्त्रसङ्करो नास्तीत्यतः स्वमन्त्रमेषु विन्यस्य पूजयेत् । अज्ञातमन्त्रलिङ्गेषु प्रणवं मातृकां वापि विन्यस्य स्वहृदये पूरकेण समानीय रेचकेन द्वादशान्ते लयं नीत्वा प्रतिष्ठाविधानेन स्वमन्त्रं विन्यस्य पूजयेत् । त्रिविधलिङ्गानामसम्भवे शक्तिमता गुरुणा वात्मनान्येन वा प्रतिष्ठितं सान्निध्यवल्लिङ्गमप्याश्रयणीयमिति चतुर्थः पक्षः । तदनु

साङ्गं कृत्वास्त्रयागं तु हुत्वाज्येन तिलैरपि ।
वास्तुपूजां विधायादौ वास्तुदेवाभिरक्षिते ॥ २४ ॥

अष्टौ तिलान् हस्तमात्रान् लोकेशास्त्रैरधिष्ठितान् ।
दिक्षु तत्क्षेत्ररक्षार्थं निखनेत् तत्तदस्त्रतः ॥ २५ ॥

सूत्रेण वर्मालब्धेन शङ्कुना वेष्टयेद्बहिः ।
हस्तेन सप्तबीजानि विकीर्य परितः पुनः ॥ २६ ॥

रेखां च भस्मना कुर्याद् यवमिश्रैस्तिलैरपि ।
प्राकारं परिकल्प्यात्र दत्त्वा भूतबलिं तथा ॥ २७ ॥

अकृष्टमन्नमक्षारलवणं शुचि यल्लघु ।
सकृदश्नन् परिमितं स्नाने त्रिषवणे रतः ॥ २८ ॥

सन्नियम्येन्द्रियग्रामं साधयेन्मन्त्रमीप्सितम् ।
सिद्धमन्त्रः पुनस्तस्मिञ्छिवमाराध्य भक्तितः ॥ २९ ॥

कीललोकाधिपास्त्राणि विसृज्य प्रणतः शिवम् ।
अनुज्ञाप्य व्रजेदिष्टं देशं तत्रैव वा वसेत् ॥ ३० ॥

साधकदीक्षाधिकारः ।

अथाचार्योऽभिषेकार्हो वृत्तवाञ्छीलवाञ्छुचिः ।
प्रशस्तदेशजो विद्वान् प्रशस्तोदितलक्षणः ॥ ३१ ॥

सबीजदीक्षया सम्यग् दीक्षितो विजितेन्द्रियः ।
सम्यक् साधितमन्त्रश्च निग्रहानुग्रहक्षमः ॥ ३२ ॥

विज्ञाताशेषतन्त्रार्थ उदारः करुणारसः ।
शिवपूजापरः शान्तः समयाचारपालकः ॥ ३३ ॥

स निर्गत्य गृहात् पूर्वं तीर्थयात्रां समाचरेत् ।
देशकालवयश्शक्तिसामर्थ्यानुगुणं क्रमात् ॥ ३४ ॥

निर्वर्त्य तीर्थसेवां तु गङ्गादेः सरितस्तटे ।
शिवक्षेत्रेऽथवा शैले तत्राचार्यव्रतं चरेत् ॥ ३५ ॥

उदङ्मार्गगते सूर्ये शुक्लपक्षे शुभे दिने ।
गणेश्वरं गुरुं चेष्ट्वा सविशेषं यजेच्छिवम् ॥ ३६ ॥

अस्त्रयागं च निर्वर्त्य स्नाने त्रिषवणे रतः ।
गोमूत्रेण तथा स्नायादथ त्रिदिनसंख्यया ॥ ३७ ॥

एकभुक्तेन नक्तेन तथैवायाचितेन च ।
केवलं पञ्चगव्येन तत्सिद्धचरुणा पुनः ॥ ३८ ॥

उपवासेन च त्रीणि दिनानि क्षपयेत् पृथक् ।
पक्षं चतुर्थकालाशी षष्ठकालाशनस्तथा ॥ ३९ ॥

एवं पक्षद्वयादूर्ध्वं क्षपयेद् दिवसत्रयम् ।
भस्मदर्भशयो नित्यं भस्मस्नानरतः सदा ॥ ४० ॥

अक्षारलवणं यावमन्नं भुक्त्वोदितक्रमात् ।
समाप्तौ दीक्षितान् विप्रान् भोजनाच्छादनादिभिः ॥ ४१ ॥
परितोष्य यथाशक्त्या सादेशः प्रीयतामिति ।
ततो यथोदिते देशे शुद्धे सूद्धृतशल्यके ॥ ४२ ॥
नवहस्तं तथा सप्तपञ्चहस्तमथापि वा ।
अर्धहस्तोच्छ्रितं कृत्वा मण्डपं सुमनोरमम् ॥ ४३ ॥
न्यग्रोधोदुम्बराश्वत्थप्लक्षैः पूर्वादितोरणम् ।
पलाशामलकौ चैव मधूको बिल्व एव च ॥ ४४ ॥
आग्नेयादिषु कोणेषु तोरणांस्तैः प्रकल्पयेत् ।
ध्वजांश्च दश दिक्पालवर्णहेतिविलक्षणान् ॥ ४५ ॥
मण्डपस्य वितानं च विचित्रं धवलं शुचि ।
घण्टाकिङ्किणिकाजालमुक्तादामविराजितम् ॥ ४६ ॥
पर्यन्तपट्टवसनमणिकन्दुकचामरैः ।
अलङ्कृतं दुकूलादिकृतप्रतिसरान्वितम् ॥ ४७ ॥
प्राच्यामग्न्यालयं तस्य कुर्यात् कुण्डं च शोभनम् ।
द्वारेषु कलशांस्तस्य न्यसेच्चाङ्कुरपालिकाः ॥ ४८ ॥
वास्तुपूजां च निर्वर्त्य पुण्याहं वाचयेत् ततः ।
विकिरक्षेपपूर्वं तु कुम्भास्त्रे चाभिपूज्य तु ॥ ४९ ॥
दिक्षु संस्थाप्य लोकेशान् वज्रादीन्यायुधानि च ।
पञ्चगव्यं च सम्पाद्य पञ्चकोष्ठोदितक्रमात् ॥ ५० ॥

प्रोक्ताष्टादशसंस्कारैः संस्कृते कुण्डे शिवाग्निमाधाय यथावत् सन्तर्प्य तस्मिन् यथोक्तं सदाशिवमावाह्याभिपूज्य समिदाज्यचरुतिलैः पञ्चपञ्चाहुतीर्हुत्वा पूर्णां च विधाय

मध्येऽस्य सर्वतोभद्रं भद्रकं वा लिखेच्छुभम् ।
विप्रादीनां क्रमात् पञ्चचतुस्त्रिद्विकै[1]र्मितम् ॥ ५१ ॥

---

[1] ‘र्म’ ख. पाठः.

रजोभिरपि तावद्भिस्तन्मध्येऽब्जं च पाण्डुरम् ।
विप्रादीनां स्मृतं मुख्यं द्वारं प्रागादिदिग्गतम् ॥ ५२ ॥

पीठस्य बाह्यवीथ्यां तु वल्लीपत्रादिकं लिखेत् ।
मण्डलाद् बाह्यदिक्ष्वष्टौ लिखेच्छङ्खान् सुपाण्डरान् ॥ ५३ ॥

तेषां नामानि चानन्दः सुनन्दो नन्द एव च ।
नन्दिवर्धननामा च श्रीमुखो विजयस्तथा ॥ ५४ ॥

तारः सुतारश्चैतेषां मन्त्राः स्युः प्रणवास्त्रयः ।
आकाराद्याः स्वरा दीर्घाः सानुस्वाराः स्वनाम च ॥ ५५ ॥

आत्मनेन्ते नमः शब्दस्त्वेभिरावाह्य पूजयेत् ।
शङ्खानां मध्यदेशेषु विलिखेत् कलशाष्टकम् ॥ ५६ ॥

मण्डलाभिमुखं तच्च शुक्लं चित्रं च वर्णकैः ।
सुभद्रश्च विभद्रश्च सुनन्दः पुष्पनन्दकः ॥ ५७ ॥

जयोऽथ विजयः पूर्णः पूर्णकुम्भश्च ते क्रमात् ।
तेषां च मन्त्रान् स्वाख्याभिः शङ्खानामिव योजयेत् ॥ ५८ ॥

तोरणानां तथाष्टानां लोकेशाख्यान्वितं पृथक् ।

तत्रायं विशेषः — ओं आं ईं ॐ न्यग्रोधात्मने सुराधिपतोरणाय नमः ।

एवमेव पलाशादिष्वपि मन्त्रा भवन्ति हि ॥ ५९ ॥

ततः पीठाद् ब(लि ? हि)र्वीथ्यां शङ्खान् षोडश विन्यसेत् ।
तद्बाह्ये कलशानष्टौ स्थापयेद् दिग्विदिग्गतान् ॥ ६० ॥

सर्वरत्नौषधीबीजैर्गण्डैर्मृद्भिर्जलैरपि ।
शङ्खांश्च कलशानेतान् पूरयेत् स्वस्वमन्त्रतः ॥ ६१ ॥

वस्त्रस्रग्दामकण्ठांश्च चन्दनाक्षतचर्चितान् ।
पञ्चपल्लववक्त्रांश्च बीजपूरफलाननान् ॥ ६२ ॥

अत्र षोडशशङ्खानामष्टकलशानां च नामान्युच्यन्ते — यान्येव प्रणवदीर्घस्वरत्रयादिकानि आत्मनेनमश्शब्दान्तानि तत्तन्मन्त्रा भवन्ति। तद् यथा—

आयतः आनन्दः नन्द्यायतः सुनन्दः महाकुक्षिः नन्दी[1] सुनाभिः नन्दिवर्धनः ह्रस्वनाभिः श्रीसुखनाभिः मण्डली विजयः सुघोषः तारः उत्तारः सुतारश्च षोडश शङ्खाः पूरणीयाः। मन्थरः सुभद्रः पृथुलोष्ठः सुदन्तः ह्रस्वोष्ठः मन्थरग्रीवः जयो विजयश्च कलशा एते पृथक् पृथक् शालिदर्भविष्टरेषु स्थाप्याः। अथौषध्यः कथ्यन्ते — जया विजया जयन्ती अपराजिता विष्णुक्रान्ता शङ्खपुष्पी हेमपुष्पी नाकुली विशाला बला अतिबला गन्धनाकुली सहा सहदेवा वाराही शतावरी मेदा महामेदा वृधिश्चर्धिः काकोलीसंज्ञा यथालाभमोषधयो ग्राह्याः। रत्नानि माणिक्यमुक्तागोमेदकमरकतपुष्यरागवज्रनीलप्रवालस्फटिकानि। बीजानि शालियवमुद्गमाषतिलसिद्धार्थगोधूमा इति सप्त। चन्दनकुङ्कुमागरुकर्पूरकुष्ठमांसीकच्चोरोशीराण्यष्टौ गन्धाः। वल्मीकाग्रगन्धपर्वताग्रनदीतीरमहानदीसङ्गमबिल्वमूलगजदन्तगोशृङ्गेभ्यो गृहीता मृदोऽष्टौ। इत्येभिर्द्रव्यैर्मिश्रितैः शङ्खांश्च कलशांश्च तीर्थजलैरापूर्य षोडशस्वरैः शङ्खान् क्रमेणापूरयेत्। अष्टवर्गैः कलशान् शङ्खेषु पृथिव्यादिमूर्त्यष्टकमष्टदिक्षु विदिक्च्छङ्खेषु वामादिशक्त्यष्टकं बहिः कलशाष्टके विद्येश्वराष्टकं च सर्वान् समावाह्य संस्थाप्य विधिवदर्चयेत्। मध्ये पद्मकर्णिकायां सुवर्णरजतताम्रमृन्मयाद्यन्यतमे शक्त्यनुगुणे कुम्भे सर्वौषधीबीजरत्नगन्धपुष्पान्विते सहिरण्ये तीर्थजलैः मन्त्रसंहितया द्वादशान्तामृतं स्मृत्वापूर्य मनोन्मनीं शक्तिं साङ्गमूर्तिमूलमन्त्रं सदाशिवमासनादिक्रमेण यथावदावाह्य सर्वत्र कूर्चानि पल्लवफलानि च निधायाहतवस्त्रैरावेष्टितकण्ठमालाभिरलङ्कृत्य यथावन्नैवेद्यान्तं सम्पूज्य, तत्र रत्नादीनां प्रक्षेपमन्त्रा उच्यन्ते। ओं आं ईं ऊं सर्वरत्नेभ्यो विश्वात्मकेभ्यो नमः। प्राग्वत् सर्वबीजेभ्य इन्द्रात्मकेभ्यो नमः। प्राग्वत् सर्वौषधिभ्यः सोमात्मकेभ्यो नमः। सर्वगन्धेभ्यः पार्थिवात्मकेभ्यो नमः, सर्वमृद्भ्यः पृथिव्यात्मकेभ्यो नमः इति विन्यसेत्। एवं कलशशङ्खतोरणरत्नादीन्यभिमन्त्र्य सम्पूज्य नियोजयेत्। तदनु शिष्यं कृतोपवासं कृतस्नाननित्यविधिं निर्वर्तितनैत्यकशिवार्चाग्निकार्यं शुक्लाम्बरं प्रक्षालितपाणिपादं मण्डपस्य प्रदक्षिणं कारयित्वा प्रागादि शान्तिकलाद्वाराणां तोरणानां च कृतपूजं प्रागादिस्वर्णानुगुणद्वारेण प्रवेश्य शिवकुम्भास्त्राग्नीनां कृतार्चनप्रणामं स्वयं मन्त्रसंहि-

---

[1] 'नदी' ख. पाठः.

तया एकैकाहुत्या सन्तर्पितशिवाग्निमानीय मण्डपाद् दक्षिणतः कृतपद्मे औदुम्बरं श्रीपर्णिकं वा भद्रासनं सदशेन वस्त्रेणास्तीर्णं विन्यस्य तस्मिन् गायत्रीजपपरं तस्मिन्ननन्तासन उपवेश्य शङ्खपटहादिमङ्गलवाद्यगीतध्वनिभिर्यथा दिक्षु ब्राह्मणैः पठ्यमानवेदघोषैश्च तिरोहितान्यध्वनि सबीजदीक्षादीक्षितैः प्रथमवर्णैः षोडशभिरष्टाभिर्वा मूर्तिधरैः सहितो गुरुर्बीजशरावचित्रमुखाञ्जलिकारकनागकर्णाभिन्नपुटोल्काभिः शिष्यं निर्मथ्य तदनु पूर्वोक्ताभिः मृद्भिस्तन्मन्त्रेण सर्वाङ्गमालिप्य ततः पञ्चगव्यबिल्वपद्मकेसरप्रियङ्गुचूर्णैश्चाथाश्वत्थोदुम्बरप्लक्षवटबिल्वक्वथितकषायोदकेन पृथक्कलशस्थापितेन प्रथममभिषिच्य प्रक्षाल्य धूपान्तमभ्यर्च्य सकलीकृत्य विद्येश्वरकलशैस्तत्तन्मन्त्रैरभिषिच्य धूपान्तमभ्यर्च्य ततः षोडशशङ्खैस्तथैवाभिषिच्य धूपान्तमभ्यर्च्य, ततः शिवकलशेन मूर्त्यङ्गमूलजपितेनाभिषिञ्चन् सविद्याविद्येश्वरस्य सशक्तिकस्य बिन्द्वादिक्रमोत्पद्यमानमूलाङ्गादिसमस्तमन्त्रसहितस्य सर्वज्ञत्वादिगुण(युक्त ?) सहितस्य सृष्टिक्रमेण सुषुम्नया शिष्यहृदये प्रवेशव्याप्तिं च शिवस्य भावयेत्।

ततश्चास्त्रवर्धन्यास्य परितो रक्षां विधाय शिवकुम्भेनापि तद्वदभिषेचयेत्। ततो निवर्तिताम्बरस्य वर्णसंख्यया यज्ञोपवीतं दत्त्वोष्णीषमकुटहारमुकुराङ्गुलीयच्छत्रचामरगजाश्वशिबिकाभृङ्गारकपादुकादीनि चिह्नानि दत्त्वा गन्धादिभिरभ्यर्च्य स्वर्णादिपात्रनिहितैर्वज्राद्यायुधपिष्टप्रदीपाभिः कन्याभिर्वधूभिश्चोपनीतैरेनं मङ्गलवाद्यघोषैर्नीराजयेत्।

तदनु शिवाभिमुखं नत्वा सदक्षिणं प्रणामं कारयित्वा देवं विज्ञापयेत्—

त्वत्प्रसादेन भगवन्! एष प्राप्तस्त्वदाज्ञया।
महाभिषेकमाचार्यो भवत्वद्यप्रभृत्ययम्॥ ६३॥

इति विज्ञाप्य देवेशं शिवेनोक्तस्तथास्त्विति।
विसृज्य देवमग्निं च कलशान् शङ्खतोरणान्॥ ६४॥

लोकेशांश्च यथाकामं संपूज्य तु बलिं क्षिपेत्।
विसर्जयेत् ततस्त्वेनान् मूर्तिधारांश्च लिङ्गिनः॥ ६५॥

विप्रांश्च हेमवस्त्रान्नैः दीनानाथांश्च शक्तितः ।
परितोष्य गुरुं त्वेनं स्वाधिकारे नियोजयेत् ॥ ६६ ॥

इदं स्थानमिमे धर्माश्चैते पुस्तकसञ्चयाः ।
दासीदासादयश्चैते परिपाल्या यथा पुरा ॥ ६७ ॥

अधिकारानुरूप्येण दीक्षाभिर्दीक्षयेज्जनान् ।
कर्षणादिप्रतिष्ठान्तं कर्मचक्रं प्रवर्तयन् ॥ ६८ ॥

व्याख्येयानि च शास्त्राणि दीक्षितेभ्यो न चान्यथा ।
पालयन् समयाचाराननुग्रहपरो भव ॥ ६९ ॥

इति ।

इति सन्दिश्य तं पूर्वो गुरुर्नवगुरुं ततः ।
शिवमिष्ट्वा विशेषेण मूलमन्त्रायुतं जपेत् ॥ ७० ॥

अनेनैव विधानेन राज्यकामं तदाप्तये ।
अष्टैश्वर्यमपुत्रं च स्त्रियं सौभाग्यसिद्धये ॥ ७१ ॥

अभिषिञ्चेच्छिवे भक्तान् दीक्षयित्वा न चान्यथा ।

इत्याचार्यमहाभिषेकाधिकारः ।

एवं कर्तुमशक्तस्याप्याचार्यत्वाभिलाषिणः ॥ ७२ ॥
चीर्णाचार्यव्रतस्यैवमसमर्थस्य तद्व्रते ।
दद्याद्द्विगुणदानस्य युक्त्या शक्त्यानुरूपतः ॥ ७३ ॥

मण्डपे सर्वतोभद्रं लिखित्वा मण्डलं शुभम् ।
ऐशान्यां विकिरक्षेपात् कुम्भास्त्रे च न्यसेद् यजेत् ॥ ७४ ॥

मध्यपद्मेऽस्य तु शिवं यथावदभिपूजयेत् ।
मण्डलाद् बाह्यतो दिक्षु स्वस्तिकाद्यैरलङ्कृते ॥ ७५ ॥

पश्चिमोत्तरयाम्यैन्द्रशिवदिक्षु विधानतः ।
कलशान् पञ्च विन्यस्य भूम्यम्ब्वग्निमरुद्वियत् ॥ ७६ ॥

निवृत्त्यादिकलाङ्गैश्च सद्याद्यैश्चाभिपूजितान् ।
सर्वरत्नौषधीबीजसृद्गन्धकुसुमान्वितान् ॥ ७७ ॥

सहेमफलकूर्चोक्तफलपल्लवशोभितान् ।
सवस्त्रमालाभरणानासनादिक्रमेण तु ॥ ७८ ॥
परमीकरणान्तेष्वावाह्य तु कलाः क्रमात् ।
मूर्त्यङ्गान्यभिसम्पूज्य कुण्डे वह्निं च पूर्ववत् ॥ ७९ ॥
इष्ट्वा पञ्चाहुतीर्हुत्वा पृथ्व्यादीनां स्वनामभिः ।
कलानामङ्गमूर्तीनां तारहृन्मूलपूर्वकम् ॥ ८० ॥
समिदाज्यचरून् लाजतिलान् हुत्वा बलिं क्षिपेत् ।
शिवमग्निं च सन्धाय पूर्णां हुत्वा यथोदिताम् ॥ ८१ ॥
अनुज्ञाप्य शिवं पश्चान्मण्डलाद् दक्षिणेऽम्बुजे ।
कृतनित्यविधिं शिष्यं स्वस्तिकाद्यैः सुवर्चिते ॥ ८२ ॥
भद्रानन्तासने प्राग्वत् सकलीकृत्य पूजयेत् ।
सिद्धार्थदधिमृद्भस्मदूर्वागोमयगोलकैः ॥ ८३ ॥
निर्मथ्य गन्धतोयेन प्रक्षाल्याभ्यर्च्य धूपितम् ।
पृथङ्मूलशतालब्धैस्तैः कुम्भैः स्वस्वमन्त्रतः ॥ ८४ ॥
अभिषिच्यात्तवसनमनन्तासनगतं पुनः ।
सकलीकृत्य सम्पूज्य दत्त्वोष्णीषादिसाधनम् ॥ ८५ ॥
अधिकारं च विज्ञाप्य शिवायास्मै समर्पयेत् ।
अनुज्ञाप्य शिवं पश्चाद् गत्वा कुण्डान्तिकं पुनः ॥ ८६ ॥
पञ्च पञ्चाहुतीराज्यं कलानां च जुहोत्यथ ।
पूर्णां च हुत्वा तद्धस्तं दक्षिणं परिगृह्य तु ॥ ८७ ॥
दर्भोल्मुकेन पञ्चाङ्गैः कनिष्ठादिषु लाञ्छयेत् ।
प्राग्वच्छिवं तथैवाग्निं कुम्भास्त्रे च विसर्जयेत् ॥ ८८ ॥
हेमवस्त्रान्नपानाद्यैः परितोष्याथ तज्जनम् ।
शिवगुर्वाज्ञया लब्धमधिकारं प्रवर्तयेत् ॥ ८९ ॥
इत्थं दीक्षाः साभिषेका यथावत् प्राधान्येनात्रोदितास्तन्त्रसिद्धाः ।
याभिर्विश्वक्लेशहानिं च विन्देद् भोगैश्वर्याण्यप्ययत्नेन मोक्षम् ॥ ९० ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
साधकदीक्षाचार्याभिषेकपटल एकोनविंशः ।

अथ विंशः पटलः ।

अथ प्रमादस्खलितविस्मृतिच्युतजन्मनाम् ।
दोषाणां प्रशमायात्र प्रायश्चित्तं निगद्यते ॥ १ ॥

हस्तान्निपतिते लिङ्गे स्पृष्टेऽन्यैर्वाप्यदीक्षितैः ।
अघोरायुतजापी स्यात् सविशेषार्चनाच्छुचिः ॥ २ ॥

विशेषार्चनशब्देन पञ्चगव्यपञ्चामृतस्नपनमहानैवेद्याग्निकार्यान्तमर्चयेदिति यावत् ।

द्विहस्तात् पतिते लक्षं जपेत् सम्प्रोक्षणात् परम् ।
द्वित्रिलक्षादिजापी स्यादतश्चोच्चात् पतेद् यदि ॥ ३ ॥

भिन्ने लिङ्गेऽथवा पीठे प्रायश्चित्तं न विद्यते ।
तत एवाप्र(मो ? मा)देन रक्षणीयं प्रयत्नतः ॥ ४ ॥

तथा विशीर्णलिङ्गादेर्महापातकशान्तये ।
प्रायश्चित्तं दशगुणं कृत्वा कृच्छ्रेण शुध्यति ॥ ५ ॥

अविसर्जित एवेशे स्थण्डिलादावुपद्रुते ।
अघोरपञ्चसाहस्रं जपेद्धुत्वा दशांशतः ॥ ६ ॥

नष्टे दग्धेऽथवा भ्रष्टे लिङ्गे चोरादिभिर्हृते ।
लक्षं जपित्वा सम्प्रोक्ष्य लभ्यं चेत् तद् यजेत् पुनः ॥ ७ ॥

तदलाभेऽन्यलिङ्गं वा प्रतिष्ठाप्याभिपूजयेत् ।
सन्ध्यालोपे तु नीरोगः सोपवासः शतं जपेत् ॥ ८ ॥

पूजोपकरणे वाग्नौ पादस्पृष्टे च लङ्घिते ।
जपेत् पञ्चसहस्रं तच्छोधयेत् क्षालनेन च ॥ ९ ॥

पुष्पाम्बुगन्धमृत्पात्रक्षीरान्नाज्यं परित्यजेत् ।
एकाहमर्चनालोपे त्रिरात्रोपोषितो जपेत् ॥ १० ॥

सहस्रं द्विदिनाद्यर्चालोपेऽप्येवं समूहयेत् ।
पञ्चाहादधिकभ्रंशे कृत्वास्मादपि षड्गुणम् ॥ ११ ॥

सहस्रं जुहुयाज्जापस्तत्संख्यो ब्रह्मणां स्मृतः ।
अकामात् सङ्कराणां तु ब्रह्मपञ्चशतं जपेत् ॥ १२ ॥

सोपवासः शुचिः पञ्चगव्यं प्राश्य जुहोति च ।

तत्र

निर्माल्यसङ्करे जाते पञ्चब्रह्मशतं जपेत् ॥ १३ ॥

अकामाद् भक्षणे तस्य सार्धसाहस्रकं जपेत् ।
कामादनन्तयागेन दीक्षया च पदाध्वनः ॥ १४ ॥

शुध्येदतस्तु निर्माल्यं नाश्नीयान्न स्पृशेदपि ।

अनन्तयागो नाम अनन्तेशादिविद्येश्वरपरिवृतस्य शिवस्य पञ्चब्रह्ममण्डलेऽस्मिन्नेव पटले वक्ष्यमाणो यागो निर्दिष्टः ।

निर्माल्यभेदाः कथ्यन्ते षड्विधास्तेऽपि तद् यथा ॥ १५ ॥

देवद्रव्यं च देवस्वं नैवेद्यं च निवेदितम् ।
चण्डद्रव्यं च निर्माल्यं तेषां लक्षणमुच्यते ॥ १६ ॥

वस्त्रभूषणगन्धाद्यं देवद्रव्यमिति स्मृतम् ।
देवस्वं देवसम्बन्धि ग्रामक्षेत्रादि गोधनम् ॥ १७ ॥

देवार्थं कल्पितान्नाद्यं नैवेद्यं नाम तत् पुनः ।
निवेदिताख्यमुत्सृष्टं चण्डद्रव्यं च तद्गतम् ॥ १८ ॥

गर्भागाराद् बहिःक्षिप्त निर्माल्यं तन्न संस्पृशेत् ।
षड्विधं चापि निर्माल्यं नोपयुञ्ज्यात् कदाचन ॥ १९ ॥

अत्र भोजराजः —

"षड्विधमपि निर्माल्यं न जिघ्रेन्न लङ्घयेत् नाद्यान्न विक्रीणीयात् क्रव्यादो भवति भुक्त्वा मातङ्गो लङ्घनेऽसिद्धिराघ्राणे वृकः स्पर्शने स्त्रीत्वमथ चण्डालो विक्रये शवरः" इति ।

शिवनिर्माल्यवत् सौरं चण्डे दत्तं ततोऽधिकम् ।

गुरुपुस्तकवाह्नियक्षनागयोगीन्द्रगणमातृगौरीषु शिवनिर्माल्यवद् न भवति । अचरेष्वपि दशस्थानेषु गुरुव्याख्याकाले शिवकुम्भे देवप्रदक्षिणे विसर्जितेऽपि देवे लिङ्गस्था पूजा । [1]चललिङ्गे अघटितलिङ्गे आस्थाप्यलिङ्गे चित्ररत्नजे हेमजे अन्यस्मिन्नपि सद्यः प्रतिष्ठेति चतुर्थीकर्मा[2]वधि निर्माल्यं न भवतीति भोजराजः ।

---

[1]. 'चाल' क. पाठः.   [2]. 'वि' ख. पाठः.

पूजायां गन्धधूपादेरवशाघ्राणदर्शने ॥ २० ॥
नास्ति दोषो नदीवेगादागतस्पर्शनादिषु ।
दीक्षितः सूतके वाथ शावाशौचे च भुक्तवान् ॥ २१ ॥
न कामतः सोपवासो वामदेवसहस्रकम् ।
जपेत् कामकृते तस्मात् त्रिगुणं शुद्धये स्मृतम् ॥ २२ ॥
आत्मसम्बन्धिकेऽशौचे तं जनं न स्पृशेत् स्वयम् ।
पृथक् पाकमुपाश्नीयात् स्नानपूजादि कर्म च ॥ २३ ॥
निर्वाणदीक्षितो ज्ञानी निःशङ्कः प्राग्वदाचरेत् ।
निर्बीजदीक्षया चापि सामय्या दीक्षितोऽपि वा ॥ २४ ॥
स्वयं न संस्पृशेल्लिङ्गमग्निं चान्येन पूजयेत् ।
दीक्षितेनैव शिष्येण पुत्राद्यैर्वाथ बन्धुभिः ॥ २५ ॥
निर्वर्त्य पूजाहोमाद्यं स्नातः संयतवाङ्मनाः ।
मनसैवोच्चरन् मन्त्रान् सकलीकरणादिकम् ॥ २६ ॥
कृत्वा पुष्पाञ्जलिक्षेपैः शिवं तु कृतमण्डले ।
सम्पूज्य मनसा मन्त्रं जपित्वाग्निं प्रणम्य च ॥ २७ ॥
पृथक्पाकेन भुञ्जानः सूतकादिदिनं नयेत् ।
सम्यग् ज्ञानी न दुष्येत् तु सूताशौचशतैरपि ॥ २८ ॥
तृणकाष्ठचयच्छन्नो यथा प्रज्वालितोऽनलः ।
प्रमादात् सूतकाशौचे भुक्त्वैकाहमुपोषितः ॥ २९ ॥
जपेत् सहस्रं कामेन भुक्त्वा तत्त्रिगुणाच्छुचिः ।
भुक्त्वा तु सूतकाशौचे तत्समो ह्यशुचिर्भवेत् ॥ ३० ॥
तद्दिनान्ते तु तावन्ति दिनानि निशि यावकम् ।
अश्नंस्त्रिकालस्नायी स्यात् प्रत्यहं त्रिशतं जपेत् ॥ ३१ ॥
प्रतिषिद्धान्नभुक्तावप्ययमेव विधिः स्मृतः ।
रेतः स्कन्देद् यदि निशि सहस्रं पुरुषं जपेत् ॥ ३२ ॥
दिवसे द्विगुणं तस्माद् दद्याच्च यवसं गवाम् ।
वर्णानां ब्राह्मणादीनां जातीशाः पुरुषादयः ॥ ३३ ॥

अत्र स्वयमुच्छिष्टस्य समानजातीयोच्छिष्टस्पर्शे स्नात्वा स्वजातीश्वरशतजपाच्छुद्धिर्भवेत् । अदीक्षितोच्छिष्टस्पर्शे द्विशतं जपेत् । स्वस्मादनन्तरवर्णोच्छिष्टस्पर्शे त्वेकाहमुपोष्य स्वजातीश्वरं स्पृष्टवर्णेश्वरं चाप्येकीकृत्य शतं जपेत् । तत्रैकान्तरवर्णोच्छिष्टस्पर्शे त्वेकाहमुपोष्य स्वजातीश्वरं स्पृष्टवर्णेश्वरं चाप्येकीकृत्य शतं जपेत् । तत्रैकान्तरवर्णोच्छिष्टस्पर्शे द्विरात्रं द्व्यन्तरे त्रिरात्रमुपोष्य प्राग्वज्जपेत् । एतेषामदीक्षितानां स्पर्शे द्विगुणम् । तद्वत् स्वोत्तरवर्णोच्छिष्टस्पर्शेऽपि पादहीनमर्धं च जपोपवासौ विधेयौ । उच्छिष्टः स्वयमुच्छिष्टमन्त्यजं स्पृशेद् यदि त्रिरात्रोपोषितः स्नातः स्वजातीश्वरायुतं जपेत् ।

एकोच्छिष्टे तदर्धं स्यादनुलोमे तदर्धकम् ।
अन्त्यजाः प्रतिलोमाः स्युः कर्माररजकादयः ॥ ३४ ॥
चण्डालोच्छिष्टसंस्पर्शे तीर्थे कृच्छ्रं समाप्य तु ।
अघोरस्यायुतजपाच्छक्त्या दत्त्वा च शुध्यति ॥ ३५ ॥

अत्र स्वयमनुच्छिष्टः प्रोक्तानामुच्छिष्टानां स्पर्शे यथोक्तात् पादं चरेत् । स्वयमुच्छिष्टस्त्वेषामनुच्छिष्टानां स्पर्शे अर्धं प्रायश्चित्तं चरेत् । यद्वा अन्येषामुच्छिष्टं भुक्त्वा पञ्चब्रह्ममण्डले ब्रह्माण्यभिपू(ज्य) जात्युद्धारेण दीक्षयेत् । तच्च मण्डलं चतुर्हस्तं चतुर्द्वारं विधेयम् । तस्मिन् यथादिशं पुरुषादीन् संस्थाप्य मध्ये स्वजातीश्वरमीशानं तत्स्थाने यथावदभिपूज्य स्वजातीश्वरमन्त्रेण फडन्तेन संशोध्य जातिमुद्धृत्य स्वाहान्तेन तेनैव मण्डलस्थस्वजातीशे प्रक्षिप्योद्धृत्य संशोध्यात्मनि तथैव संयोजयेत् । एवं जातिमुद्धृत्य सामय्या दीक्षया गुरुणा दीक्षयेत् । असन्निहितगुरुः स्वयमेवात्मानं दीक्षयेत् । एवं दीक्षयितुमसामर्थ्ये षडहान्युपोष्य वन्याशनः स्वजातीश्वरलक्षं जपेत् । अत्र सजातीयस्योच्छिष्टं भुक्त्वैकाहमुपोष्य शतं जपेत् । अनन्तरस्य द्व्यहमुपोष्य सहस्रं जपेत् । एकान्तरस्य त्र्यहं द्विसाहस्रं च । द्व्यन्तरस्य द्विगुणमयुतं जपः । ब्राह्मणः शूद्रोच्छिष्टं भुक्त्वा पञ्चरात्रमुपोष्य जात्युद्धारदीक्षितो लक्षं जपित्वा कृच्छ्रेण शुध्यति । अनुलोमानामप्येवमूह्यं प्रायश्चित्तम् । अन्त्यजोच्छिष्टभोजने प्रायश्चित्ताभावात् पतत्येव । तस्माद् यत्नेन तत् परिहरेत् । एवं परलिङ्ग्यन्नभोजने तज्जातीश्वरस्यायुतं जपेत् । ते चार्हतशाक्यपाशुपतकापालिकाः । एतेषां सद्योजातादयः पतयः । तत्र च कापालिकान्नभोजने कृच्छ्रचान्द्रायणे कृत्वा ईशानं लक्षं जपित्वा जातीश्वरमण्डलेऽन्यलिङ्गेश्वरमभिपूज्य

---

१. 'रु' ख. पाठः.

जात्युद्धारदीक्षितः शुध्यति । अन्यलिङ्गिसंसृष्टान्नभोजने त्रिलक्षजपं चान्द्रायणं कुर्यात् ।

परायत्तगृहस्थस्य स्वायत्ताद् द्विगुणो जपः ।
स्वायत्तस्यैतदेव स्यादाचार्य(स्यैक ? स्येति) सूचितम् ॥ ३६ ॥
अर्धं समयिनः प्रोक्तं त्रिपादं पुत्रकस्य तु ।
अनुक्तानां च पापानामबुद्धिकरणे तु यत् ॥ ३७ ॥
प्रायश्चित्तं बुद्धिपूर्वे ततोऽपि द्विगुणं स्मृतम् ।

तत्रैकभुक्तनक्तान्नायाचितोपवासानां पृथक् पृथक् क्रमेण त्रिगुणानुष्ठानं कृच्छ्रद्वादशरात्रमिति यावत् । चान्द्रायणं च शुक्लप्रतिपदं प्रारभ्य त्रिषवणस्नायी नियतेन्द्रिय एकग्रासात्प्रभृति प्रतिदिवसं ग्रासवृद्ध्या पौर्णमास्यां पञ्चदश ग्रासान् भुक्त्वा तद्वदपरपक्षे प्रतिपदं प्रारभ्य प्रत्यहमेकग्रासह्रासादमावास्यायामेकग्रासं भुक्त्वा समाप्य यवमध्यं भवति । एतद्विपरीतेन शुक्लप्रतिपदि पञ्चदश ग्रासान् भुक्त्वा प्रतिदिनं ग्रासह्रासेन पौर्णमास्यामेकग्रासभोजी कृष्णप्रतिपदं प्रारभ्य ग्रासवृद्ध्यामावास्यायां पञ्चदश ग्रासान् भुक्त्वा पिपीलिकमध्यं चान्द्रायणं भवति । सर्वेषां दुष्कृतानामनुक्तानामपि तत्तत्पापशुद्ध्यर्थं व्रतोपवासकृच्छ्रचान्द्रायणजपहुतदानतीर्थसेवाशिवार्चनादिप्रायश्चित्तानि तत्तद्दोषगौरवानुगुणं धर्मशास्त्रोक्तानि विधेयानि । तान्यत्र ग्रन्थगौरवभयान्न लिख्यन्ते । प्रायश्चित्तेषु रोगपीडयातिवार्द्धकेन वा स्वयमसमर्थः शिष्यपुत्रभ्रातृमातृपितृभागिनेयादिभिरात्मनोऽर्थमुपवासजपादिकं कारयेत् ।

प्रायश्चित्तं त्वेवमुक्तं तु येषां दोषाणां तच्छुद्धये तान् प्रयत्नात् ।
बुद्ध्या बुद्ध्वा वर्जयेदेव विद्वान् पङ्कास्पर्शः क्षालनाद् यद् वरिष्ठः ॥३८½॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
प्रायश्चित्तपटलो विंशः ॥

अथ एकविंशः पटलः ।

सर्वपूजाविधिच्छिद्रच्युतस्खलितपूर्तिदम् ।
पवित्रारोपणं कुर्यात् प्रतिसंवत्सरं बुधः ॥ १ ॥
उपेक्षयाथवाज्ञानाद् यो न कुर्यात् पवित्रकम् ।
स सिद्धभ्रंशमाप्नोति विघ्नैश्च परिभूयते ॥ २ ॥

विघ्नापहारपूर्णादि फलमस्येति देशिकैः ।
साधकैः पुत्रकैश्चान्यैः कर्तव्यं हिं पवित्रकम् ॥ ३ ॥

पूजाजपाग्निकार्यादेश्च्युतस्खलितदोषतः ।
यत् कृतं पावयत्येनं तस्मादुक्तं पवित्रकम् ॥ ४ ॥

अपि मोहात् प्रमादाद् वा पवित्रं न करोति यः ।
स त्रिलक्षं जपेत् कृष्णं दशांशं जुहुयाद् घृतम् ॥ ५ ॥

अत्र मोहशूरोत्तरे —

"पवित्रेण विना पूजा तामसी परिकीर्तिता ।
राजसी च भवेदिन्द्रपरमीकरणं विना ॥

पत्रिकाभिः प्रसूनैर्वा कुशैर्वा परिकल्पयेत् ।
पवित्रं प्रत्यहं शम्भोर्महापुण्यजिगीषया ॥

इति नित्यपवित्रं स्यात् नैमित्तिकमथोच्यते ।
आषाढस्य सिते पक्षे श्रावणस्य सितेऽसिते ॥

सप्तम्यां वा त्रयोदश्यां कुर्याद् गन्धपवित्रकम् ।
पवित्रमथ भूतायामाषाढे नियतं स्मृतम् ॥

दीक्षादिस्थापनं चैव पवित्रादि शतक्रतोः ।
अधिमासे न कुर्वीत यदीच्छेच्छुभमात्मनः ॥

पर्वत्रयं भवेद् यत्र रविसङ्क्रान्तिवर्जितम् ।
अधिमासः स विज्ञेयः सर्वकर्मबहिष्कृतः ॥"

इति ।

सिनीवालीद्वयं यत्र रविसङ्क्रान्तिमध्यतः ।
अधिमासस्तु स ज्ञेयः सर्वकर्मबहिष्कृतः ॥ ६ ॥

अथ पौष्करेऽपि —

"आषाढादित्रिमासेषु श्रेष्ठमध्याधमं क्रमात् ।
पवित्रफलमुद्दिष्टं नान्यदा काल इष्यते ॥"

इति ।

वसन्तेषु यजेतेति यथासौ वैदिको विधिः ।
व्यावृत्तिमन्यकालस्य दर्शयत्येव नान्यदा ॥ ७ ॥

एतस्मादाषाढश्रावणभाद्रपदानां सितासितपक्षेष्वष्टम्यां चतुर्दश्यां वा शम्भोः पवित्रं करणीयम् । तदपि मुमुक्षुभिः कृष्णपक्षे बुभुक्षुभिः शुक्लपक्षे विधेयम् । अन्येषामपि देवानां स्वास्वेव तिथिषु पवित्रकं विधेयम् ।

सौवर्णं राजतं ताम्रं सूत्रमुक्तं कृतादिषु ।
युगेष्वत्र कलौ शस्तं सूत्रं कार्पासजं नवम् ॥ ८ ॥

नातिस्थूलं नातिसूक्ष्मं विकेशं हिमपाण्डरम् ।
कर्तितं द्विजकन्याभिर्मुख्यं सूत्रं पवित्रके ॥ ९ ॥

मध्यं क्षत्रियवैश्याभिः शूद्राभिरधमं स्मृतम् ।
अधमाङ्कितसूत्रं च ग्राह्यं शक्त्यनुकूलतः ॥ १० ॥

दर्भमुञ्जादिभिर्वापि सूत्राभावे पवित्रकम् ।
विदधीत पवित्रं तत् सर्वथा न विलोपयेत् ॥ ११ ॥

सूत्रितं[1] गन्धसूत्रे स्यादन्यत्र नवतन्तुकम् ।
सम्पाद्य तद्दिनात् पूर्वं सप्तमे पञ्चमेऽह्नि वा ॥ १२ ॥

कृत्वाङ्कुरार्पणं सम्यक् तत्सम्भारान् समाहरेत् ।
चतुरश्रं चतुर्द्वारं मण्डपं कारयेच्छुभम् ॥ १३ ॥

बृहतीमुनिहस्तं वा पञ्चहस्तमथाधमम् ।
चतुस्तोरणसंयुक्तमर्धहस्तोच्छ्रितं स्थलम् ॥ १४ ॥

दुकूलपट्टदेवाङ्गैरथवा वसनैः सितैः ।
सवितानं तु तत् कृत्वा मुक्तादामोपशोभितम् ॥ १५ ॥

नानाविधैः फलैः पुष्पैः मालाभिश्चावलम्बितम् ।
विलिप्तं गोमयाम्भोभिर्दर्पणोदरकुट्टिमम् ॥ १६ ॥

अग्न्यगारं च तत्प्राच्यमैन्द्रकुण्डं मनोहरम् ।
दर्भमालावृतं कुर्यात् स्रुक्स्रुवौ चोक्तलक्षणौ ॥ १७ ॥

कलशान् करकं कुम्भान् वर्धनी(भ? भा)ण्डगड्डुकान् ।
विकेशनववासांसि होमपात्रादिकं च यत् ॥ १८ ॥

चन्दनागरुकर्पूरगुग्गुलंश्च घृतं मधु ।
शर्करालाजसिद्धार्थतिलशालीयवादिकम् ॥ १९ ॥

---

[1] 'त्रिसूत्रीं ग' ग. पाठः

शालिजांस्तण्डुलान् शुक्लान् समित्कुशफलानि च ।
दीपधूपनिवेद्यादावन्यदप्युपयोगि यत् ॥ २० ॥
सम्पाद्य तत्कर्मकरं जनं तत्र नियोजयेत् ।
ततः सूत्रमुपादाय गत्वा भूरि जलं शुचिः ॥ २१ ॥
क्षाराम्बुशोधितं सम्यक् क्षालितं शुचिभिर्द्विजैः ।
गीतवाद्यादिसंयुक्तं पीठे संस्थाप्य पूजयेत् ॥ २२ ॥
सामान्यार्घ्येण गन्धाद्यैरभ्यर्च्य च गणेश्वरम् ।
सद्येन क्षालयेत् सूत्रमघोरेण विशोषयेत् ॥ २३ ॥
अभ्यर्च्य हेमपात्रादौ वैणवे वा निधाय तत् ।
आरोप्य गजयानादौ छत्रचामरशोभिते ॥ २४ ॥
शङ्खतूर्यादिनिर्घोषैः सङ्गीतध्वनिमङ्गलैः ।
अलङ्कृतनरस्त्रीकमुच्छ्रितध्वजशोभितम् ॥ २५ ॥
ग्रामं वा नगरं वान्यच्छनैः कृत्वा प्रदक्षिणम् ।
गत्वा यागालयद्वारं ब्राह्मणैः स्वस्ति वाचयेत् ॥ २६ ॥
संस्थाप्य पीठे सूत्रं तु पुण्याहं वाचयेत् ततः ।
सूत्रे तु नवतन्तूनां देवताश्च विभावयेत् ॥ २७ ॥
प्रणवश्चन्द्रमा वह्निर्ब्रह्मा नागा गुहो रविः ।
सादेशः सर्वदेवाश्च तन्तूनां नव देवताः ॥ २८ ॥
पृथिव्याद्या मूर्तयोऽष्टौ शिवश्चाप्यधिदेवताः ।
वामाद्याः शक्तयस्त्वेषां ताः शक्तीर्नव संस्मरेत् ॥ २९ ॥
एतेषां नामभिस्तन्तून् नमोन्तैरभिपूजयेत् ।
कालात्मानं ततः सूत्रे नवभेदं च तन्तुषु ॥ ३० ॥
त्रुटिं लवं निमेषं च काष्ठां चैव कलामपि ।
घटिकां च मुहूर्तं च दिवसं च निशां यजेत् ॥ ३१ ॥
नक्षत्रतिथिवारांश्च पक्षौ मासानृतूनपि ।
संवत्सरं च क्रमशस्तन्तुसंस्थान् प्रपूजयेत् ॥ ३२ ॥

तारहृदयादिभिः स्वनामभिर्नमोन्तैः पूजयेत् प्रार्थयेच्च ।

तुट्यादिरब्दपर्यन्तः कालात्मा विश्वगो विभुः ।
अनाद्यन्तश्च यो नित्यस्तस्मै कालात्मने नमः ॥ ३३ ॥

इति सूत्रे यजेद् देवं कालतत्त्वात्मकं शिवम् ।
सान्निध्यं तस्य संस्मृत्य यावदारोप्यते शिवे ॥ ३४ ॥

तदनु

शिवहस्तं विधायाग्रे परमीकरणान्वितम् ।
कुर्यात् पवित्रनिर्माणं वामदेवं स्मरन् जपन् ॥ ३५ ॥

तत्र गन्धपवित्रं स्यादेकग्रन्थ्यल्पतन्तुकम् ।
कनिष्ठसंख्यमित्येके त्रिसूत्रेण विनिर्मितम् ॥ ३६ ॥

हस्तादिनवहस्तान्तलिङ्गानां स्यात् पवित्रकम् ।
अष्टाविंशतिमारभ्य यावदष्टोत्तरं शतम् ॥ ३७ ॥

दशवृद्धिक्रमात् कुर्यात् पवित्रं नवतन्तुभिः ।
अयं हि पाक्षिकः कल्पो मुख्यपक्षोऽभिधीयते ॥ ३८ ॥

सर्वेषां स्थिरलिङ्गानामव्यक्तानां विशेषतः ।
चलानां च यथा सूत्रैरष्टोत्तरशतैः स्मृतः ॥ ३९ ॥

अथैकाशीतिसंख्यैर्वा पञ्चाशद्भिस्ततः परम् ।
षट्त्रिंशत्संख्यसूत्रैर्वा श्रेष्ठमध्याधमो विधिः ॥ ४० ॥

प्रोक्तः कनिष्ठलिङ्गेषु कनिष्ठार्चनशक्तिषु ।
तस्माच्छक्त्यनुसारेण विदधीत पवित्रकम् ॥ ४१ ॥

स्थिराणामिह लिङ्गानां लिङ्गमस्तकमानतः ।
शिरःपवित्रत्रितयं कुर्यात् तत्त्वत्रयात्मकम् ॥ ४२ ॥

चतुर्थं सार्वतत्त्वं तु कुर्याद् गङ्गावतारकम् ।
निश्शेषपिण्डिकास्पर्शलम्बितं लिङ्गमस्तकात् ॥ ४३ ॥

कथ्यते चललिङ्गानां स्थण्डिलानां पवित्रके ।
उत्तमाद्यर्चनाभेदाद् विस्तारो हि यथा भवेत् ॥ ४४ ॥

द्वादशाष्टचतुःसंख्यैरङ्गुलैर्विस्तृतानि तु ।
श्रेष्ठमध्याधमानि स्युः पवित्राणि यथाक्रमम् ॥ ४५ ॥

द्वादशाङ्गुलान्यष्टाङ्गुलानि चतुरङ्गुलानी'ति भोजराजः ।

शिरःपवित्रत्रितयमुत्तमादित्रयं भवेत् ।
एकस्मिन्नेव लिङ्गे तत् प्रयोज्यं मकुटाकृति ॥ ४६ ॥
गङ्गावतारकं तत्र कुर्यात् तत्त्वाङ्गुलैः समम् ।

अत्र पवित्रग्रन्थिपरिमाणे सोमशम्भुः—

“ग्रन्थयो दश कर्तव्या अथवा तत्त्वसंख्यया ।
अन्तरं वा यथाशोभमेकद्विचतुरङ्गुलम् ।
अधिका वा यथाकामं कर्तव्या ग्रन्थयः समाः ॥”

दशग्रन्थीनां नामधेयानि चाह—

“प्रकृतिः पौरुषी वीरा चतुर्थी त्वपराजिता ।
पञ्चमी तु जया षष्ठी अजिता सप्तमी क्रिया ॥
शिवा मनोन्मनी चैव दशमी सर्वतोमुखा ।”

इति ।

गङ्गावतारकस्यापि ग्रन्थयो द्वादशाथवा ॥ ४७ ॥
तत्तन्तुसंख्यया वा स्युर्यथाशोभं च तद् भवेत् ।
कुर्यादव्यक्तलिङ्गानां पवित्राणां चतुष्टयम् ॥ ४८ ॥
तथैव मुखलिङ्गानां व्यक्तेष्वेकैकमेव वा ।
स्वमूर्तौ च गणाधीशे गुरुपङ्क्तौ च पुस्तके ॥ ४९ ॥
शिवकुम्भेऽस्त्रवर्धन्यां दिक्पालास्त्रवृषेष्वपि ।
द्वारेशानां तथैकैकं पवित्रं परिकल्पयेत् ॥ ५० ॥
कण्ठादानाभिलम्बीनि तानि व्यक्तेषु कल्पयेत् ।
गौर्याश्चैव महालक्ष्म्या दुर्गायाश्चाष्टमातृषु ॥ ५१ ॥
सरस्वत्याः पवित्राणि त्रीणि त्रीणि प्रकल्पयेत् ।

गङ्गावतारहीनानीति यावत् ।

विष्णुभास्करवह्नीनां चण्डेशस्कन्दवेधसाम् ॥ ५२ ॥

---

१. 'त' क. पाठः.

शिवतुल्यं पवित्राणां पृथगुक्तं चतुष्टयम् ।
एवं कृत्वा पवित्राणि तद्ग्रन्थीनथ रञ्जयेत् ॥ ५३ ॥
कर्पूरकुङ्कुमनिशारोचनागरुगैरिकैः ।
यथालाभं समं पिष्ट्वा पुरुषेणाभिरञ्जयेत् ॥ ५४ ॥
अथ मृद्दारुवंशादिपात्रव्रातं पुरातनम् ।
परित्यज्य नवं सर्वं ग्राह्यं पूजोपयोगि यत् ॥ ५५ ॥

"स्रुक् पुराणाप्यदुष्टैव स्रुवं कुर्यान्नवं शुभम् "

इति पौष्करे ।

"विहाय स्रुक्स्रुवौ शक्तो त्यजेत् सर्वं पुरातनम् "

इति मोहशूरोत्तरे ।

तदनु सप्तम्यां त्रयोदश्यां वा सोपवासः कृतस्नानसन्ध्याविधिः स्नानपटलोक्तमार्गेण कृतमन्त्रादिविशेषतर्पणो यागधामादिकं सर्वं त्रिवृत्सूत्रेणावेष्ट्य परिगृहीतभूप्रदेशे प्राग्भागे सूर्यं यथावदभ्यर्च्य तदनन्तरं नित्यविधिना शिवमग्निं च संपूज्य मण्डपस्य प्राग्दक्षिणोत्तरपश्चिमेषु ऋग्यजुःसामाथर्वविदो विशुद्धान् ब्राह्मणान् पवित्रारोपणमङ्गलाङ्गतया भवद्भिरध्ययनं कर्तव्यमिति गन्धपुष्पादिभिरभ्यर्च्याध्ययने नियोज्य प्रक्षालितपाणिपादो नैमित्तिकपूजार्थं यागमण्डपद्वाराण्यस्त्रेण संप्रोक्ष्य तत्र प्राच्यां[1] शान्तिकलाद्वारं दक्षिणे विद्यां पश्चिमे निवृत्तिमुत्तरे प्रतिष्ठां च तारहृद्बीजादिकं तत्कलानाम्ना द्वाराय नमोन्तं संपूज्य तत्तच्छाखाश्रयौ द्वारपालौ च नन्दीशादिकौ तन्नामाभिर्नमोन्तमर्चयेत् ।

नन्दीशं च महाकालं भृङ्गीशं गणनायकम् ।
वृषभं षण्मुखं देवीं चण्डं पूर्वादितो यजेत् ॥ ५६ ॥
ततस्तु पश्चिमे द्वारे नित्योक्तान् द्वारपान् यजेत् ।
नाराचास्त्रं प्रयुज्याथ पार्ष्णिघातत्रयेण च ॥ ५७ ॥
छोटिकातर्जनीभिश्च विघ्नानुत्सार्य दक्षिणाम् ।
शाखामाश्रित्य गेहान्तः प्रविश्यास्त्रं यथापुरम् ॥ ५८ ॥
विन्यस्य देहलीमध्ये[3] परिक्रामन् प्रदक्षिणम् ।
वास्तुपं वेधसं चेष्ट्वा स्वासनं च यथापुरम् ॥ ५९ ॥

---

१. 'न्ति' क. पाठः. २. 'न्तं', ३. 'नं' ख पाठः.

अथ वेदिकायामुदङ्मुख उपविश्य कृतात्मशुद्धिः सकलीकृत्य विशेषार्घ्यमभ्यर्च्य स्वशिरश्च पूजोपकरणान्यर्घ्यजलैरस्त्रेण सम्प्रोक्ष्य वर्मणावकुण्ठ्य द्रव्याश्रयमन्त्रशुद्धिं प्राग्वद् विधाय विधृतभस्मत्रिपुण्ड्रचन्दनतिलकसितकुसुमः सोत्तरीयो गृहीतज्ञानखड्गः सुप्रतिष्ठादिपञ्चकोष्ठेषु दीक्षोक्तमार्गेण विहितपञ्चगव्यो निरीक्षणप्रोक्षणताडनाभ्युक्षणखननावकिरणपूरणसमीकरणसेचननिकुट्टनसंमार्जनोपलेपनवज्रीकरणानि हृदयास्त्रवर्ममूलैः क्रमेण विधाय पञ्चगव्येन सम्प्रोक्ष्यैवं मण्डपं संस्कृत्य दीक्षोक्तमार्गेण[1] विकिरणक्षेपपूर्वं कुम्भवर्धन्यौ चलाचलासनस्थावभिपूज्य तदनु मण्डपान्तर्यथादिशं कृतमण्डलधान्योपरि त्रिसूत्रवेष्टितचूतादिपल्लवफलविधानगन्धाक्षतपुष्पकूर्चाढ्येषु सलिलपूर्णकुम्भेषु लोकपालानावाह्याभ्यर्च्य तदस्त्राणि च तेषां शिवाज्ञाः श्रावयेत्।

भो भो शक्र! त्वया स्वस्यां दिशि विघ्नप्रशान्तये।
स्थातव्यं सावधानेन ह्यायागान्तं शिवाज्ञया॥ ६०॥

इति संश्राव्य लोकेशान् परिभ्रम्यास्त्रकुम्भकौ।
अस्त्रदुर्गमनुस्मृत्य स्थिरासनगतौ यजेत्॥ ६१॥

संस्मृत्य च तयोर्योगं मुद्रया प्रागुपात्तया।
कुम्भेशे ज्ञानखड्गं तं समर्प्य प्रार्थयेच्छिवम्॥ ६२॥

ओम्

आयागान्तं त्वया शम्भो! स्थातव्यं शिवया सह।
ससुतेन गणैः सार्धं योगाध्यक्षेण शङ्कर!॥ ६३॥

इति विज्ञाप्य निवेद्यान्तमभ्यर्च्य संनिरोध्य यथास्थानमुपवेश्य लिङ्गशुद्धिप्रभृत्यावाहनादिभिश्च पञ्चगव्यपञ्चामृतगन्धजलाभिषेकैरुपचारपटलोक्तमार्गेण संस्नाप्य वसनभूषणगन्धादिभिश्च लिङ्गस्थं शिवं निवेद्यान्तमभ्यर्च्याथ मध्ये वैशान्यामुत्तरे वा भद्रकालिङ्गोद्भवाद्यन्यतमे मण्डले च शिवमासनावाहनादिभिः स्नपनवर्जं निवेद्यान्तमभिपूज्याग्निकार्यपटलोक्तमार्गेण प्राच्यां कुण्डेऽग्निमाधाय शिवमावाह्याभ्यर्च्य यथावत् सन्तर्प्य मण्डलस्थशिवशिखानिर्गतज्योतिषा वह्निस्थशिवनासाग्निनिर्गतज्योतिः स्वनाडीमार्गेणाविच्छिन्नं विद्युल्लतासंस्थानं सञ्चिन्त्य सन्धायाग्नेर्हृदये शिवमभिपूज्याथ चरुं श्रपयेत्।

---

[1] 'र्गे कूर्चाढ्येषु' ख. पाठा.

तद् यथा —

कुण्डात् पश्चिमतश्चुल्लिं दक्षिणे वोपलिप्य तु ।
अस्त्रेणोल्लिख्य[1] चावोक्ष्य कवचेनावकुण्ठयेत् ॥ ६४ ॥
मार्जयित्वोपलिप्याथ चुल्लिं शक्तिं विभावयेत् ।
धर्माधर्मभुजामेवं कल्पिताशेषविग्रहाम् ॥ ६५ ॥
अभ्यर्च्य गन्धधूपाद्यैस्ततोऽग्निं पूर्वमुद्धृतम् ।
संस्कृतं पञ्चसंस्कारैस्तस्यां चुल्ल्यां नियोजयेत् ॥ ६६ ॥
शिवमग्निं च तां शक्तिशुभावभ्यर्चयेत् पुनः ।
औदुम्बरीं मृन्मयीं वा चरुस्थालीं तु निर्व्रणाम् ॥ ६७ ॥
धौतामस्त्रेण कवचेनावकुण्ठ्य निरीक्षिताम् ।
सम्प्रोक्ष्याभ्युक्ष्य सन्ताड्य गन्धेनालिप्य धूपयेत् ॥ ६८ ॥
कुशदाम्ना तु तत्कण्ठे वर्मणावेष्ट्य मण्डले ।
प्रोक्षितेऽस्त्रेण कवचेनावृतेऽस्त्राभिमन्त्रिते ॥ ६९ ॥
स्थापयेत् तामधोवक्त्रां षड्डुत्थे दर्भविष्टरे ।
तस्यां साङ्गं शिवं चेष्ट्वा प्रोत्तानामाज्यरूषिताम् ॥ ७० ॥
सद्योदुग्धेन गव्येन शुद्धक्षीरेण पूरयेत् ।
स्थालीमारोप्य तच्चुल्ल्यां धवलाञ्शालितण्डुलान् ॥ ७१ ॥
पञ्चप्रसरमात्रांस्तु धौतान् क्षीरे विनिक्षिपेत् ।
आग्नेय्यामुपविश्याथ चालनोद्घाटनं क्रमात् ॥ ७२ ॥
दर्व्यास्त्रेण सकृत् कुर्याद्ध्रस्वप्रासादमुच्चरन् ।
तं चरुं श्रपयित्वाथ मन्त्रसंहितया चरौ ॥ ७३ ॥
सुसंस्विन्नो भवेत्युक्त्वा घृतेनैवाभिघारयेत् ।
तस्याभिघारं कृत्वैवं मण्डले दर्भविष्टरे ॥ ७४ ॥
अवतार्य द्वितीये तं चरुं संहितया पुनः ।
शीतो भवेति आज्येन कृत्वा शीताभिघारणम् ॥ ७५ ॥

---

[1] 'णालिख्य' क. पाठः.

मृदम्भोभिर्बहिः स्थालीं संमृज्याञ्जेण रक्षया ।
त्रिपुण्ड्राङ्कां विधायैनाममृतीकृत्य मुद्रया ॥ ७६ ॥
कुण्डस्य पश्चिमे किञ्चिन्मण्डले पूर्ववन्न्यसेत् ।
हृदाभ्यर्च्य घृतं हुत्वा शिवाङ्गैस्तु सकृत् सकृत् ॥ ७७ ॥
संपातयेच्चरौ तस्मिन् मूलेनाष्टोत्तरं शतम् ।
हुत्वा सम्पात्य तं पश्चात् त्रिभागं विभजेच्चरुम् ॥ ७८ ॥
शिवाग्न्योर्मधुसर्पिर्भ्यामात्मभागं घृतेन तु ।
आयोज्य शिवभागं तु हृदा संपूज्य विन्यसेत् ॥ ७९ ॥

तदनु देवसमीपं गत्वाष्टपुष्पिकां दत्त्वा दन्तकाष्ठताम्बूले प्राच्यां पुरुषेण भस्माक्षमालादण्डकौपीनभिक्षापात्राणि दक्षिणेऽघोरेण मृत्कुशाम्बुहोमद्रव्याणि पश्चिमे सद्येन धात्रीफलरोचनाकुङ्कुमशलाकाकङ्कतकज्जलान्युत्तरे वामेन पञ्चगव्यपादुकाछत्रयोगपट्टासनान्यैशान्यामीशानेन विन्यस्यार्चयेत् ।

एतेषां यदसम्पन्नं मनसा तत् प्रकल्पयेत् ।
देवांशं तु चरुं शस्त्रप्रोक्षितं वर्मरक्षितम् ॥ ८० ॥
हृदाभ्यर्च्यामृतीकृत्य ब्रह्मभिस्तं निवेदयेत् ।
ततः पवित्राण्यादाय हेमवेत्रादिपात्रके ॥ ८१ ॥
कृष्णाजिनदुकूलादिच्छादिते विन्यसेद्धृदा ।
प्रोक्ष्यास्त्रात् संहितामन्त्रैरालभ्याभ्यर्च्य संस्मरेत् ॥ ८२ ॥
संवत्सरात्मकं शम्भुं सर्वकृत्यैकसाक्षिणम् ।
गोप्तारमव्ययं विश्वभोगमोक्षफलप्रदम् ॥ ८३ ॥
कृताकृतसमुत्सृष्टक्लिष्टकर्माभिपूरकम् ।
विभावयेत् पवित्रेषु ततः प्रकृतिसंख्यया ॥ ८४ ॥
हुत्वाग्नौ तत्र मूलेन तेषु संपातयेद् घृतम् ।
संपातशोधितान्येवमिष्ट्वा संहितया ततः ॥ ८५ ॥
प्राक् पूजिताय सूर्याय दद्याद् गन्धपवित्रकम् ।
सुधूपितं सपुष्पं तन्मूलकुम्भामृतीकृतम् ॥ ८६ ॥

---

१. 'क' ख. पाठः.

रेचान्तमूलमन्त्रेण तारं सर्वात्मनेन्तकम् ।
उत्तार्यारात्रिकं पश्चादाचान्तः सकलीतनुः ॥ ८७ ॥

त्रिसूत्र्या वेष्टयेत् सर्वं प्रासादं मण्डपं तथा ।
पूजोपकरणव्रातं सर्वं तारेण वेष्टयेत् ॥ ८८ ॥

नन्द्यादिद्वारपालेभ्यो वास्तुपब्रह्मणोरपि ।
लोकेशेभ्यस्तदस्त्रेभ्यो दत्त्वा गन्धपवित्रकम् ॥ ८९ ॥

तदनु कुण्डसमीपात् पवित्राणि पात्रस्थान्यादाय शिवकुम्भाग्रे संस्थाप्य रक्षार्थं कुम्भस्थाय शिवायानेन समर्पयेत् ।

ओं

भगवन्! संस्कृतान्यत्र पवित्राणि यथाविधि ।
समर्पयामि तानीह तुभ्यं रक्षस्व शङ्कर! ॥ ९० ॥

इति समर्पयेत् ।

तदनु तस्माद् गन्धपवित्राणि गृहीत्वा शिवकुम्भास्त्रवर्धनीगणपतिगुरुपङ्क्तिषु तत्तन्मन्त्रैः सर्वतत्त्वात्मने नमोन्तैरारोप्य पृथगारात्रिकमुत्तार्य कृतमण्डलके देवाभिमुखः स्वयमुपविश्य स्वात्मन्यनेन पवित्रमारोपयेत् ।

ओं

सांवत्सरस्य यागस्य परिपूर्तिकरे व्रते ।
पवित्रके पवित्रात्मा पवित्रं धारयाम्यहम् ॥ ९१ ॥

इत्युक्त्वा तारमूलशिवाय नमोन्तमात्मन्यारोप्याचम्य देवाभिमुख उपविश्य तदर्थं निर्मितं गन्धपवित्रकं गन्धपङ्कानुरञ्जितं सुधूपितं सदूर्वाक्षतमञ्जलिनादाय मन्त्रसंहितयामृतीकृत्यानेनाभिमन्त्र्यारोपयेत् ।

ओं समस्तविधिच्छिद्रपूरणेशमघं प्रति ।
प्रभोऽद्यामन्त्रयामि त्वां (त्वःम)दिच्छावासिकारक! ॥ ९२ ॥

तत्सिद्धिमनुजानीहि यजतश्चिदाचित्पते! ।
सर्वथा सर्वदा शम्भो! नमस्तेऽस्तु प्रसीद मे ॥ ९३ ॥

इति रेचकेणामृतीकृत्य तारमूलं च शिवाय नमोन्तमुच्चार्य भगवते गन्धपवित्रमारोपयेत् । अनन्तरमारात्रिकमुत्तार्यानेन प्रार्थयेत् ।

ओं

आमन्त्रितोऽसि देवेश! सह देव्या गणेश्वरैः ।
मन्त्रेशैर्लोकपालैश्च सहितः परिवारकैः ॥ ९४ ॥
निवेदयाम्यहं तुभ्यं प्रभाते तु पवित्रकम् ।
नियमं च करिष्यामि परमेश! तवाज्ञया ॥ ९५ ॥

इति शिवं प्रार्थ्य तथास्त्विति शिवेनानुज्ञातः तदनु विभवानुगुणं विशेषनैवेद्यं देवाय निवेद्य ताम्बूलमुखवासान्तं गीतनृत्तादिभिराभिनन्द्य भगवतानुज्ञातः बहिर्निर्गत्याग्नये च मेखलायां गन्धपवित्रमारोप्य चरोरंशमपि हुत्वा तच्छेषेण तत्समीपे अग्निकार्यबलिं निक्षिप्यानुज्ञाप्य बहिर्निर्गत्य सगन्धकुसुमजलधूपदीपं पात्रशेषान्नेन संहितामन्त्रैर्दशदिक्षु बलिं दद्यात् ।

ओमिन्द्राय प्रतिगृह्ण नम इत्यादिभिः । पुनश्च,

ओं पूर्वादिदिग्वासिभ्यो दिगीश्वरभूतमातृगगरुद्रक्षेत्रपालादिकेभ्यः स्वाहेति दशदिक्षु बलिं विकीर्य समाचम्यच्छिद्रपूरणकप्रायश्चित्तमन्त्रैस्त्रिष्कृत्वो मूर्तिभिः पञ्चकृत्वो मूलेन दशकृत्वोऽघोरेणाष्टोत्तरशतं तिलसिद्धार्थलाजघृतैर्हुत्वा पूर्णां चाथ व्याहृतीभिश्चाग्नये सोमायाग्नीषोमाभ्यामग्नये स्विष्टकृते चेति हुत्वाभ्यर्च्य वह्निस्थशिवं संहितया नाडीमार्गेण मण्डलस्थशिवे संयोज्य देवमभिपूज्य सिद्धान्तपुस्तकाधिष्ठिते विद्यापीठे शिववद् विद्यानामभिरभ्यर्चिते दशाक्षरीवागीश्वर्या प्रणवहृदयमूलविद्यातत्त्वात्मने नमोन्तं गन्धपवित्रमारोप्यारात्रिकमुत्तार्याथास्त्रवर्मसंपुटे पात्रे महापवित्राणि संस्थाप्य मन्त्रसंहितयाभिमन्त्र्यास्त्रवर्मभ्यां संरक्ष्याभिपूज्य कुम्भस्थाय रक्षां विज्ञाप्य भगवन्तं प्रणम्य क्रियां समर्प्य निश्छिद्रं कर्म मेऽस्त्विदमिति भगवतानुज्ञातो बहिर्निर्गत्य प्राचीनेषु त्रिषु मण्डलेषु दीक्षोक्तमार्गेण पञ्चगव्यं चरुं दन्तधावनं च भजेत् ।

तत्रोपवासस्य नियतत्वाच्चरोः शेषभक्षणस्य प्राप्तत्वाच्च प्राणाहुतिपञ्चकमात्रमेव प्राश्नीयात् ।

अत्र पौष्करे —

"उपवासे तु नियते सम्प्राप्ते शेषभक्षणे ।
प्राणाग्निहोत्रमात्राशी सोपवासो न दुष्यति ॥"

इति ।

---

१. 'णप्रा', २. 'ववि' क. पाठः.

अन्यत्रापि श्राद्धप्रकरणे —

"उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत् ।
उपवासं तदा कुर्यादाघ्राय पितृसेवितम् ॥"

इति । अथाचम्य दर्भशय्यायां प्राचीनमस्तको बुभुक्षुः मुमुक्षुर्भस्मशय्यायामुपविशेत् ।

अत्र सोमशम्भुः —

"आचान्तो मन्त्रसन्नद्धः कृतसङ्गीतजागरः ।
आसीतानुस्मरन्नीशं बुभुक्षुर्दर्भसंस्तरे ॥
अनेनैव प्रकारेण मुमुक्षुरपि संविशेत् ।
केवलं भस्मशय्यायां सोपवासः समाहितः ॥"

इति । कृतसङ्गीतजागर इत्युक्तत्वात् स्वापो न कर्तव्यः ।

मोहशूरोत्तरे च —

"क्रियासमर्पणं कृत्वा शिवाग्रे क्षपयेन्निशाम् ।
जपध्यानरतो भूत्वा स्तुतिगीतपरोऽथवा ॥"

इति । एतस्माद् दर्भविष्टरस्थेन देवाग्रे सोपवासेन जागरिणा भवितव्यम् ।

अथ सूर्योदयात् पूर्वं स्नातः सन्ध्यां समाप्य च ।
सामान्यार्घ्येण सम्पूज्य गन्धसूत्राण्यनुक्रमात् ॥ ९६ ॥

अविसर्जित एवेशे ऐशान्यां मण्डले न्यसेत् ।
देवं विसृज्य सापेक्षं निर्माल्यमपनीय च ॥ ९७ ॥

समाचम्य यथापूर्वं कृत्वात्मादिविशोधनम् ।
इष्ट्वा सूर्यं ततो द्वारलोकेशास्त्रार्चनादनु ॥ ९८ ॥

पञ्चगव्यादिभिर्देवं यजेन्नित्यविधानतः ।
कुम्भास्त्रमण्डलेशाग्नीनिष्ट्वा पूर्णां बलिं तथा ॥ ९९ ॥
कृत्वा नित्यं समाप्यैवं नैमित्तिकमुपक्रमेत् ।

तत्राविसर्जित एव देवे अग्नौ च निर्माल्यमपनीय चरुवर्जं दन्तकाष्ठादिकं च यथास्थानं विन्यस्य यन्त्रलिङ्गहेमगोलकपट्टस्रग्गन्धादिभिर्यथाविभवं देवमलङ्कृत्याघोराष्टशतं प्रायश्चित्तं हुत्वा पूर्णां चाथ सूर्याय स्वमन्त्रेण महापवित्राणि धूपितान्यारोप्यारात्रिकमुत्तार्याचम्य प्राग्वद् द्वारेशवास्तुपब्रह्मलोकेशास्त्रगणपतिगुरूणां स्वस्वमन्त्रैः प्राग्वदारोप्यात्मनि च पूर्ववन्मन्त्रेण पवित्रमारोप्याचम्य स्वयं सदाशिवात्मा देवाभिमुखमुपविश्यार्घ्यं दत्त्वाष्टपुष्पिकयाभ्यर्च्य कालात्मानं त्रुटिलवनिमेषकाष्ठाघटिकामुहूर्ताहोरात्रपक्षमासर्त्वयनसंवत्सरविग्रहं सर्वशरीरेन्द्रियार्थव्यवहारकारणं

कृताकृतसमुत्सृष्टक्लिष्टकर्मैकसाक्षिणम् ॥ १०० ॥
क्षेत्रगोप्तारमीशानं शरण्यं शुद्धमानसः ।

एवम्भूतं शिवमनुस्मरन् शिरःपवित्रं प्रथममादाय धूपयित्वा सपुष्पाक्षतदूर्वाग्रं किञ्चित् कुम्भाभिमुखशिवमनेन विज्ञाप्यारोपयेत् ।
ओम्

कालात्मना त्वया देव ! यद् दृष्टं मामके विधौ ॥ १०१ ॥
कृतं क्लिष्टं समुत्सृष्टं धृतं गुप्तं च मत्कृतम् ।
तदस्तु क्लिष्टमक्लिष्टं कृतं पुष्टं सुसत्कृतम् ॥ १०२ ॥
सर्वात्मनामुना शम्भो ! पवित्रेण त्वदिच्छया ।

ओम् पूरय पूरय मखव्रतनियमेश्वराय स्वाहा । तारमूलं शिवतत्त्वाधिपतये शिवाय नमः इत्यनेनैकं पवित्रमारोप्यान्यत् पवित्रद्वयमप्येवं विद्यातत्त्वात्मतत्त्वाधिपतये नमः इत्यारोपयेत् ।

शिवतत्त्वे शिवान्ते तु रुद्रकारणपालिते ॥ १०३ ॥
मूलं शिवान्तमुच्चार्य पवित्रमधिरोपयेत् ।
विद्यातत्त्वे तु विद्यान्ते विष्णुकारणपालिते ॥ १०४ ॥
ईश्वरान्तं समुच्चार्य द्वितीयमधिरोपयेत् ।
आत्मतत्त्वे प्रकृत्यन्ते ब्रह्मकारणपालिते ॥ १०५ ॥
मूलं सदाशिवान्तं स्यात् तृतीयं चाधिरोपयेत् ।
सर्वतत्त्वाधिपान्तं तत् सर्वकारणपालितम् ॥ १०६ ॥

मूलं शिवान्तमुच्चार्य देयं गङ्गावतारकम् ।
भुक्तिकामस्य चैवं स्याद् विपरीतं हि मुक्तये ॥ १०७ ॥

आत्मविद्याशिवैस्तत्त्वैः पवित्राण्यधिरोपयेत् ।
अथारात्रिकमुत्तार्य देवं विज्ञापयेत् सुधीः ॥ १०८ ॥

त्वं गतिः सर्वभूतानां संस्थितस्त्वं चराचरे ।
अन्तश्चारेण सर्वेषां द्रष्टा त्वं परमेश्वर! ॥ १०९ ॥

कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम ।
मन्त्रहीनं क्रियाहीनं द्रव्यहीनं च यत् कृतम् ॥ ११० ॥

जपहोमार्चनाहीनं कृतं नित्यं मया तव ।
स्तुतिभक्तिविहीनं च तत् पूरय महेश्वर ! ॥ १११ ॥

सुपूतस्त्वं सुरेशान ! पवित्रं पापनाशनम् ।
त्वया पवित्रितं सर्वं जगत् स्थावरजङ्गमम् ॥ ११२ ॥

खण्डितं यन्मया देव ! व्रतं वैकल्ययोगतः ।
एकीभवतु तत् सर्वं त्वदाज्ञासूत्रयोजितम् ॥ ११३ ॥

इत्यस्यान्ते सर्वतत्त्वात्मने सर्वकर्मसाक्षिणे सर्वपरिपूरणाय सर्वफलप्रदाय सर्वज्ञाय शिवाय नम इति विज्ञाप्य सजलेन पुष्पाञ्जलिना पवित्रपूजामात्मानं च शिवपादाम्बुजयोः समर्प्य दण्डवत् प्रणमेत् ।

चतुरस्त्रीनथो मासान् द्वौ मासं पक्षमेव वा ।
सप्ताहं पञ्चरात्रं वा द्विरात्रं वैकरात्रकम् ॥ ११४ ॥

व्रतं सङ्कल्प्य देवाग्रे करोम्येतावदित्यपि ।
तथेत्युक्तः शिवेनापि निर्गत्य तदनुज्ञया ॥ ११५ ॥

लोकपालास्तनन्द्यादिद्वाःस्थानिष्ट्वा पवित्रकैः ।
अग्नौ च विद्यापीठे च पवित्राण्यधिरोपयेत् ॥ ११६ ॥

ततो व्याहृतिभिश्चाग्निं सोमाग्नीषोमयोरपि ।
हुत्वा स्विष्टकृते चैव बलिं प्राग्वद् विनिक्षिपेत् ॥ ११७ ॥

अथ गुरौ सति शिववत् तमभिपूज्य वसनाभरणधनादिभिः परितोष्य पवित्रं च तस्मिन्नतिशोभनमारोप्य तदभावे तत्पादुकादावभ्यर्च्यारोपयेत् । ततश्चाध्ययनहोमादिफलं तैस्तैरुदकपूर्वं स्वहस्ते गृहीत्वा देवपादाब्जयोः समर्प्य तेषां दक्षिणाश्च सूत्राणि च दद्यात् । दीक्षितब्राह्मणलिङ्गिनां बन्धुजनानां च सूत्राणि प्रदाय दीक्षितब्राह्मणलिङ्गिनो हेमवस्त्रादिभिः परितोष्य दीनान्धकृपणादिभ्यश्चार्थिभ्यो यथाशक्ति सर्वेभ्यो हिरण्यादिकं दत्त्वा सर्वानपि भोजयित्वा तद्भोजनदानफलमशेषमनेन शिवे समर्पयेत् ।

ओम्,

वित्तशाठ्यविहीनस्य भक्त्या शक्त्यनुरूपतः ।
दानेनानेन दत्तेन प्रीयतां मे सदाशिवः ॥ ११८ ॥
इति दानादिकं शम्भोः पादाम्भोजे समर्पयेत् ।

यावद्व्रतान्तं तावन्नित्यमेवं सविभवमभ्यर्च्य प्रतिदिनं पवित्राणि देवस्योपरि प्रथमबन्धनसूत्रमूले समुद्धृत्य लम्बयित्वा निर्माल्यमपनीय स्नदनं विधाय पुनः पवित्राण्यारोपयेत् ।

अथ व्रतान्ते सविशेषमभिपूज्य

ओम्,

पवित्रकव्रतं चीर्णं यथासङ्कल्पितं मया ॥ ११९ ॥
त्वत्प्रसादेन कर्मेदं गमास्तु फलसाधकम् ।
इत्यर्पयेद् भुक्तिकामो मुक्तिकामोऽपि शम्भवे ॥ १२० ॥
निवेदयीत पादाब्जे मास्तु मे कर्म बन्धकम् ।

इति ।

तदनु मन्त्रतर्पणान्तं कर्म कृत्वा पूर्णां हुत्वा वह्निस्थं भगवन्तं नाडीमार्गेण शिवे संयोजयेत् ।

ब्राह्मणः क्षत्रियो वापि वैदिकश्चेज्जयादिभिः ॥ १२१ ॥
हुत्वाग्निं वैदिकैर्मन्त्रैः प्रायश्चित्तैर्जुहोति च ।

ततोऽग्नेर्मन्त्रान् संहृत्य द्वादशान्तं नीत्वा हृदि सन्निवेश्य वह्निं च द्वादशान्ते संयोज्य परिधिविष्टरस्थानुद्वास्य समाचम्य कृतसकलीकरणोऽन्तः प्रविश्य शिवकुम्भास्त्रवर्धन्योर्मन्त्रान् संहृत्य तत्रस्थं शिवं च शिवे लिङ्गस्थे संयोज्य दिक्पालादीनपि विसृज्य सति चण्डे पवित्राणि सप्ताक्षरेण तन्मन्त्रे-

---

१. 'त्य तत्रस्थं शिवं' ख. पाठः.

णारोप्यासति स्थण्डिले समावाह्याभ्यर्च्य तन्निर्माल्यादिकमशेषं चण्डनाथाय समर्पयेत् ।

"अथवा स्थण्डिले चण्डं पीठस्थं + + पूजयेत् ।"

इति सोमशम्भुः ।

ओम्,

यत् किञ्चिद् वार्षिकं कर्म कृतं न्यूनाधिकं मया ॥ १२२ ॥
सर्वं तदस्तु सम्पूर्णं चण्डनाथ ! तवाज्ञया ।
इति तं प्रार्थयेत् पश्चाद् गन्धाद्यैरर्चयेदपि ॥ १२३ ॥
पायसं च निवेद्यास्मै नत्वा स्तुत्वा विसर्जयेत् ।
तन्निर्माल्यादिकं सर्वमन्धकूपेऽथवाम्भसि ॥ १२४ ॥
प्रभूते निक्षिपेत् तन्तूञ्जप्त्वा छित्त्वा विशेषतः ।
अथ संशोध्य भूमिं तु सलिलैर्गोमयाप्लुतैः ॥ १२५ ॥
ततस्त्वष्टोत्तरशतैः कलशैर्वाथ शक्तितः ।
नवकेनाथवा देवं स्नपयेदुक्तमार्गतः ॥ १२६ ॥
सविशेषं च सम्पूज्य प्राप्नोत्यविकलं फलम् ।

पवित्रमेवं प्रतिवत्सरं तु यः करोति भक्त्या स्खलिताभिपूरणम् ।
अवाप्य पूजादिफलं स चाखिलं प्रयाति शम्भोः पदमव्ययं शिवम् ॥१२७॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
पवित्रारोपणपटल एकविंशः ॥

अथ द्वाविंशः पटलः ।

अथोच्यते दामनकी तु पूजा वासन्तिकी तुष्टिकरीन्दुमौलेः ।
यदाश्रमं हैमवतं तु देवो देव्या विहीनश्चिरमध्युवास ॥ १ ॥
नन्दीश्वराद्यैः सहितो गणेशैरुपास्यमानश्च मुनीन्द्रवृन्दैः ।
स्वात्मानमात्मन्यवलोक्य शश्वत् सबीजयोगं प्रथयन् समाधिम् ॥ २ ॥
कालेऽथ तस्मिन् किल तारकाख्यो जित्वा सुरेन्द्रं सह देववृन्दैः
सन्तापयामास नितान्तमुग्रः कल्पान्तसूर्यप्रतिमोऽसुरेन्द्रः ॥ ३ ॥

अथेन्द्रमुख्यैश्च सुरैर्मुनीन्द्रैरभ्यर्थितस्तच्छमनाय वेधाः ।
प्रोवाच देवान् गिरिशाय गौरीं यतात्मने रोचयितुं यतध्वम् ॥ ४ ॥

नान्यो[1]ऽस्ति लोके शिवयोः प्रभावाद् दैत्येन्द्रतेजःप्रशमे[2]ऽभ्युपायः ।
एतद्धि कार्यं महदेवमुक्तैर्देवैस्तथा तत् प्रतिपन्नमासीत् ॥ ५ ॥

तत्रेन्द्रमुख्यैरखिलैर्मरुद्भिस्तत्कर्म सम्पादयितुं नियुक्तः ।
सख्या वसन्तेन सहैव कामः स्थाण्वाश्रमं हैमवतं जगाम ॥ ६ ॥

समाधिभङ्गाय कृतप्रयत्ने कामे वसन्तोऽपि सहायकृत्यम् ।
समर्थयामास वनैः प्रफुल्लैः पङ्केरुहाणां पवनैश्च मन्दैः ॥ ७ ॥

गौरीसमक्षं गिरिशोऽपि किञ्चिद् वितर्कयंश्चित्तविकारहेतुम् ।
स्मरस्य तस्याविनयं विदित्वा कोपं प्रवृत्तं न नियन्तुमैच्छत् ॥ ८ ॥

अथास्य नेत्रान्निरगात् तृतीयादग्निः प्रचण्डः स च भैरवोऽभूत् ।
त्रिलोचनः शूलकपालपाणिर्भस्मावशेषं स चकार कामम् ॥ ९ ॥

तद् भैरवं कर्म च भैरवस्य भीमाट्टहासं रवतो विलोक्य ।
भीता विषेदुः सहसैव सर्वे दान्ताः सदेवासुरसिद्धयक्षाः ॥ १० ॥

तं भैरवं देववरोऽपि रुद्रः प्रेक्ष्य प्रसन्नोऽभ्यवदत् त्वयाद्य ।
दान्तास्त्रिलोका दहतैव कामं यस्मात् त्वमस्माद् दमनोऽसि नाम्ना ॥ ११ ॥

अथात्र गौरीपरिचर्ययागताः स्मरस्य पत्न्या सह देवयोषितः ।
रतिः स्वपत्युर्विलयं विजज्ञुषी पपात कृत्ता कदलीव विह्वला ॥ १२ ॥

तथागतां तत्र रतिं च मन्मथं क्षणादनङ्गं समवेक्ष्य पार्वती ।
शशाप कोपान्मनसैव भैरवं चिराय वीरुद् भव भूमिगोचरः ॥ १३ ॥

तथा स शप्तोऽम्बिकया तथाभवत् क्षणेन वीरुद्दमनाह्वयस्तदा ।
स्मराङ्गभस्मन्यभिरामसौरभः सुकोमलाङ्गै रतिबाष्पसेकजः ॥ १४ ॥

शिवस्तदामोदमतीव मोदनं विभाव्य देव्या विहितानुमोदनम् ।
स्मयन् स तस्याः शमयन् रुषं ददौ वरं वरेण्यो दमनाय वीरुधे ॥ १५ ॥

वसन्तकाले सवसन्तमन्मथं यजन्ति येऽद्यप्रभृतीह मां जनाः ।
त्वदङ्गभूतैर्दमनच्छदादिभि[3]र्भजन्तु कामानभिवाञ्छितांश्च ते ॥ १६ ॥

---

१. 'न्यखिलो', २. 'मा' ख. पाठः. ३. 'र्ये' क. पाठः.

त्वयार्चितेनाङ्ग सहोमया मया वरं द्वितीयं तव दीयते पुनः ।
तथा हरिर्ब्रह्ममुखाश्च देवतास्त्वयार्चिताः सन्त्वभिवाञ्छितप्रदाः ॥ १७॥
न कुर्वते येऽपि च पर्व दामनं नरा वसन्ते मम शासनातिगाः ।
तदर्चनापुण्यफलं वसन्तजं गृहाण सर्वं मदनुग्रहार्पितम् ॥ १८ ॥
इत्थं वृषाङ्को दमनाय दत्त्वा वरं ततोऽस्मिन् विदधे विधानम् ।
स्वच्छन्दतन्त्रे तदपि प्रसिद्धं ततस्तु शैवैरपरैश्च दृष्टम् ॥ १९ ॥

अत्र सोमशम्भुः —

"स्वच्छन्दभैरवे तन्त्रे यद्यपीत्थमुदाहृतम् ।
तथापीह समासत्वात् सिद्धान्तेऽप्युपदिश्यते ॥"

इति । तद्यथा —

अष्टम्यां वा चतुर्दश्यां मधुमाधवमासयोः ।
शम्भोर्दामनकं पूर्व[1]पक्षयोर्भुक्तिमुक्तिदम् ॥ २० ॥
तत्पूर्वमेव सप्ताहात् पञ्चाहाद् वाङ्कुरार्पणम् ।
कुर्याच्चोदितसम्भारान् मण्डपादींश्च सम्भृतान् ॥ २१ ॥
सप्तम्यां वा त्रयोदश्यां कृतनित्यार्चनाविधिः ।
भूषयेद् यागगेहं तं वितानस्रक्फलादिभिः ॥ २२ ॥
ततो दमनकाराममशोकतरुमण्डितम् ।
गत्वाशोकतरोर्मूलं रमणीयमलङ्कृतम् ॥ २३ ॥
त[2]दभावेऽर्चनागारे कृतकारामकेऽपि वा ।
कुर्याद् वासन्तिकीं पूजां मन्त्रैरेभिरनुक्रमात् ॥ २४ ॥

नैर्ऋत्यां गणपतिमैशान्यां गुरुं चावाह्याभ्यर्च्य तदनु ॐ
अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन! ।
शोकार्तिं हर मे नित्यमानन्दं जनयस्व मे ॥ २५ ॥

इत्यनेनाशोकतरुं गन्धादिभिः दीपान्तं संपूज्य
त्रुट्यादि[3]र्युगपर्यन्तः कालरूपोऽव्ययो विभुः ।
कलते चैव योऽनादिस्तस्मै कालात्मने नमः ॥ २६ ॥

---

१. 'पर्व प', २. 'नन्दभा', ३. 'र्युं' क. पाठः.

इति कालात्मानमशोकमूले समावाह्याभ्यर्च्य तत्रैव दक्षिणोत्तरकृतमण्डलयोर्धान्योपरिसूत्रितौ धूपितौ कुम्भौ गन्धजलादिपूर्णौ सहिरण्यकूर्चकुसुमौ फलवसनमाल्याक्षतालङ्कृतौ संस्थाप्य तयोर्दक्षिणे कुम्भे वसन्तम् उत्तरे कामं चाधारशक्त्यनन्तासनधर्मादिपीठरजस्तमस्सत्त्वमयपद्मविष्टरे तत्तन्नामभिरभ्यर्च्य ओं वसन्ताय नमः इति तन्मूलमन्त्रः । ओं वां हृदयाय नमः इत्यादिभिः दीर्घस्वरैः पञ्चाङ्गानि जातियुक्तानि परिकल्प्य अस्त्रशुद्धकरयोर्ज्येष्ठादिकनिष्ठान्तं हृदयाद्यङ्गानि विन्यस्य, शिरोवक्त्रहृद्गुह्यपादेषु हृदयादिस्वस्थानेषु चाङ्गानि विन्यस्य मूलेन कुम्भे पूजितासने पुष्पाञ्जलिना पद्मद्वयवरदाभयकरं हेमवर्णं रक्तवसनगन्धमाल्यहेमकिरीटकुण्डलहाराङ्गदादिभिः समलङ्कृतं युवानं वसन्तं ध्यात्वा स्वहृदयादावाह्य स्थापनसान्निध्यादिकं विधाय तस्य दक्षिणतः पद्मावतीं वामतः कुसुमावतीं च रक्तशुक्लवर्णे समलङ्कृते देव्यौ चावाह्यार्घ्यादिभिर्गन्धादिभिश्च निवेद्यान्तं मूलमन्त्रेणाभ्यर्च्य

ओं

वसन्ताय नमस्तुभ्यं वृक्षगुल्मलताप्रिय ! ।
सहस्रमुखसंवाह ! कामबन्धो ! नमोऽस्तु ते ॥ २७ ॥

इत्यनेन पुष्पाञ्जलित्रयेण देवीभ्यां सहितं वसन्तमभिपूज्य तत्पद्मदलाग्रेषु तच्छक्तीर्वनदेवताः पूजयेत् ।

आह्लादिनीं गन्धवतीं सुरभीं चैव मालिनीम् ।
मदिरां मदयन्तीं च रमां पुष्पवतीं तथा ॥ २८ ॥

वासन्तीं चापि नवमीं स्वनाम्नाभ्यर्चयेत् क्रमात् ।
सर्वाः सुवेषाभरणा ललिताङ्ग्यः स्मिताननाः ॥ २९ ॥

तदनु आरामस्थं दमनकमर्चयेत् । तत्र भैरवं शूलकपालहस्तं रक्तवर्णं रक्तगन्धमाल्याम्बरालङ्कृतं सद्यःकृत्तसद्भटमुण्डमालाधरं शिञ्जन्नूपुरकिङ्किणीकमाक्रान्तकान्तपादुकं खड्गशूलडमरुकपाशहस्तं विरूढप्रभूतदमनकाङ्कितशिरसं ध्यात्वानेनार्घ्यादिभिर्गन्धादिभिश्चार्चयेत् ।

ओं

कामभस्मसमुद्भूत ! रतिबाष्पजलाप्लुत ! ।
ऋषिगन्धर्वदेवादिविमोहन ! नमोऽस्तु ते ॥ ३० ॥

ओं दं दमनकाय नमः इति दमनकमभ्यर्च्य ततः कामकुम्भे शक्त्यादिसत्त्वान्तं पद्मासनमभ्यर्च्य ओं क्लीं कामाय नमः इति मूलमन्त्रः । ओं क्लां हृदयाय नमः इत्यादिभिर्दीर्घस्वरैः जातियुक्तान्यङ्गानि प्राग्वत् करशाखासु देहे च स्वेषु स्थानेषु चाङ्गानि विन्यस्य पुष्पाञ्जलिना कामासनाय नमः इति कामासनमभ्यर्च्य दलाग्रस्थास्तच्छक्तीः पूजयेत् ।

सौभाग्यां ह्लादिनीं हर्षां धृतिं प्रीतिं तथोन्मदाम् ।
सङ्गमां चैव निर्वाणां नवमीं मध्यगां रतिम् ॥ ३१ ॥

ओं क्लीं मन्मथाय विद्महे कामदेवाय धीमहि तन्नो गन्धर्वः प्रचोदयात् । इत्यनङ्गगायत्री । अथ पुष्पाञ्जलावनङ्गं ध्यात्वावाहयेत् ।

रक्तं रक्ताम्बरधरं युवानं मृष्टकुण्डलम् ।
हारकेयूरकटकमौलिकुण्डलनूपुरैः ॥ ३२ ॥
अन्यैश्च दिव्याभरणैर्माल्यैर्गन्धैश्च भूषितम् ।
पुष्पचापशरांश्चाथ दधतं पाशमङ्कुशम् ॥ ३३ ॥
वामाङ्कारोपितरतिं युवतीगणमध्यगम् ।
रूपलावण्यसौन्दर्यसौकुमार्यविभूषितम् ॥ ३४ ॥
एवं ध्यात्वार्चयेत् काममर्घ्यगन्धादिभिः क्रमात् ।
मूलेन चैव गायत्र्या निवेद्यान्तं यथाविधि ॥ ३५ ॥

तदनु ओं

नमोऽस्तु पुष्पबाणाय जगदाह्लादकारिणे ।
मन्मथाय जगन्नेत्रे रतिप्रीतिप्रदाय ते ॥ ३६ ॥
अनेन पुष्पाञ्जलिभिरिष्ट्वा तं प्रार्थयेत् पुनः ।
वसन्तकामाशोकानां बाह्ये लोकाधिपान् यजेत् ॥ ३७ ॥
तदस्त्राणि च तद्दिक्षु पूजेयं सर्वकामदा ।
ततो दमनमादाय वसन्ताशोकमन्मथान् ॥ ३८ ॥
प्रोक्तैरावरणैरिष्ट्वा मन्त्रयेद् दमनं ततः ।

ओं

हरप्रसादसम्भूत! त्वमात्रवाहितो मया ॥ ३९ ॥

---

१. 'पूजयेत् स्र' क. पाठः,

नैतव्यं कुरु सान्निध्यं शिवार्चायां शिवाज्ञया ।

एवं दमनकमामन्त्र्य

ओं

वसन्तकौसुमीसम्पत्सम्पादितजगत्प्रिय! ॥ ४० ॥
त्वया स्मरसहायेन सेव्यो देवः सहोमया ।

ओं वं क्लीं वसन्तकामाभ्यां नमः इति सहितौ तावामन्त्र्यानुज्ञाप्य तत्र रक्षां विधाय स्वभवनं गत्वा भुञ्जीत ।

इति वसन्तपूजाधिकारः ।

अथ प्रातः समुत्थाय कृत्वा नित्यक्रियां ततः ॥ ४१ ॥
सायाह्ने यागवस्तूनि समाहृत्योचितानि तु ।
गत्वा दमनकारामं गृह्णीयाद् दमनं बहु ॥ ४२ ॥

समूलं किञ्चिदुद्धृत्य पात्रेष्वाधाय चाखिलम् ।
वसम्तस्मरकुम्भौ चाप्यविसर्जितदैवतौ ॥ ४३

उत्थाप्यारोपयेच्चैव गजयानादिकेऽखिलम् ।
सनृत्तगीतवादित्रमङ्गलच्छत्रचामरम् ॥ ४४ ॥

अलङ्कृत्य पथा यायात् पुरग्रामालयादिकम् ।
वाचयित्वा द्विजैः स्वस्ति मण्डपान्तः प्रवेश्य तु ॥ ४५ ॥

देवस्योभयतः कुम्भौ संस्थाप्याभ्यर्च्य पूर्ववत् ।
स्नात्वाथ तर्पणं प्राग्वत् समाप्याभ्यर्च्य भास्करम् ॥ ४६ ॥

शान्तिं विद्यां निवृत्तिं च प्रतिष्ठां द्वारवद् यजेत् ।
नित्योक्ताः पश्चिमद्वारे सम्पूज्य द्वारदेवताः ॥ ४७ ॥

पार्ष्णिघातादिपुष्पास्त्रक्षेपैरन्तः प्रविश्य तु ।
अस्त्रं विन्यस्य देहल्यामिष्ट्वा वास्त्वीशवेधसौ ॥ ४८ ॥

विन्यस्य दिक्षु लोकेशानिष्ट्वा विघ्नं गुरुं तथा ।
विकिरक्षेपपूर्वं तु कृत्वा कुम्भास्त्रपूजनम् ॥ ४९ ॥

---

१. 'ह' ख. पाठः.

तत्परिभ्रमणादूर्ध्वं ताविष्ट्वा ज्ञानखड्गधृक् ।
कुण्डे च मण्डले लिङ्गे शिवमिष्ट्वा विशेषतः ॥ ५० ॥
प्राग्वच्च नाडीसन्धानं कुर्याच्चाथाधिवासनम् ।

तद्यथा —

दमनमूलं मृदा सहितं पश्चिमे सद्येन तन्नालं गन्धामलकं चोत्तरे वामेन तत्पत्रं भस्म च दक्षिणेऽघोरेण तत्पुष्पं दन्तधावनं च प्राच्यां पुरुषेण तत्फलं गन्धपिष्टं चैशान्याम् ईशानेनान्यदपि सर्वं यागद्रव्यं यथावकाशं विन्यस्य दमनपञ्चाङ्गैरञ्जलिमापूर्य भगवन्तं प्रार्थ्यानेन तारमूलशिवायनमोन्तेनारोपयेत् ।

ओम्

आमन्त्रितोऽसि देवेश ! प्रातःकाले मया विभो ! ॥ ५१ ॥
कर्तव्यं दामनं (पू ? प)र्वं पूर्णं शक्त्या तवाज्ञया ।
अथारात्रिकमुत्तार्य नैवेद्यान्तं यजेत् ततः ॥ ५२ ॥
पवित्रकविधानेन हुत्वा सम्पातयेद् घृतम् ।
दमनापूरिते पात्रे सम्पूज्यास्त्राभिरक्षिते ॥ ५३ ॥
वर्मावकुण्ठितं कृत्वा कुम्भेशाग्रे निवेश्य तु ।
भक्ष्यं च विनिवेद्यास्मै हुत्वाघोरशताहुतीः ॥ ५४ ॥
बलिं विकीर्य बाह्ये चाप्यविसर्जितदैवतः ।
भुञ्जीताथ हविर्भुक्त्यै मुक्त्यै चोपवसेदपि ॥ ५५ ॥
ध्यायन् जपन् वा सङ्गीतैः कुर्याज्जागरणं निशि ।
ततः प्रत्युषसि स्नात्वा सूर्यद्वारार्चनादनु ॥ ५६ ॥
शम्भुं विसृज्य सापेक्षं पञ्चशुद्धिपुरःसरम् ।
कुम्भाग्निलिङ्गबिम्बेषु नित्यवत् पूजयेच्छिवम् ॥ ५७ ॥
अपनीय तु निर्माल्यमविसर्जितदैवतः ।
विभवानुगुणं शम्भोः कृत्वा वैशेषिकार्चनम् ॥ ५८ ॥
सूर्ये दमनमारोप्य स्वमूलेनेश्वरान्तकम् ।
द्वारेशब्रह्मवास्त्वीशकुम्भास्त्रगणनायकान् ॥ ५९ ॥
गुरूंश्च दमनेनेष्ट्वा स्वमूलैरीश्वरान्तकैः ।
आरात्रिकं तथोत्तार्य देवाग्रे मण्डले स्वयम् ॥ ६० ॥

सकलीकृत्य दमनं स्वशिरस्यधिरोपयेत् ।
निर्गत्य बहिराचम्य प्रविश्याथोपविश्य तु ॥ ६१ ॥
आसनादिक्रमाच्छम्भुं यजेद् दमनकाङ्कुरैः ।
तत्पञ्चाङ्गैस्तु सद्यादिक्रमेणारोपयेच्छिवे ॥ ६२ ॥
पञ्चाङ्गैः पिण्डितैः पश्चात् पञ्चब्रह्मभिरर्चयेत् ।
पुनर्दमनपञ्चाङ्गैर्गन्धदूर्वाक्षतान्वितम् ॥ ६३ ॥
अञ्जलिं सम्यगापूर्य ध्यायेद् देवं सदाशिवम् ।
शिवविद्यात्मतत्त्वैस्तु पवित्रकविधानवत् ॥ ६४ ॥
क्रमादारोपयेच्छम्भोर्दमनस्याञ्जलित्रयम् ।
पुनश्चतुर्थं चापूर्य साक्षतं दमनाञ्जलिम् ॥ ६५ ॥

ओं मखेश्वराय मखं पूरय पूरय शूलपाणये नमः ।

अस्यान्ते प्रणवमूलाभ्यां सर्वतत्त्वाधिपतये शिवाय नमः इत्यारोपयेत् । अथारात्रिकमुत्तार्य महानिवेद्यं दत्त्वाग्नौ हविर्हुत्वा दमनकेन परिधिविष्टरगतानाराध्याग्नावपि शिववत् स्रुचा दमनकमारोप्य विद्यापीठे च स्वमन्त्रेण तदनु स्वगुरौ सति वसनविभूषणादिभिर्दमनकेन च तमाराध्य दीक्षितलिङ्गिद्विजबन्धुजनानां दमनकं दत्त्वा यथायोग्यं भोजयित्वा दक्षिणाभिर्दानेन च सर्वमर्थिजनं परितोष्यानेन दमनकाञ्जलिर्देवं प्रार्थयेत् ।

ओम्

देवदेव ! जगन्नाथ ! वाञ्छितार्थप्रदेश्वर ! ।
हृदिस्थान् पूरयेः कामान् मम कामेश्वरप्रिय ! ॥ ६६ ॥

प्रणवमूलयुतं सौम्याय शिवाय नमः इति काम्याञ्जलिं शिवपादयोः पादाम्बुजेष्वारोप्य (?) दामनकपूजाफलं च निवेद्य पुनरेवं प्रार्थयेत् ।

भगवन्नतिरिक्तं वा हीनं वा यन्मया कृतम् ।
सर्वं तदस्तु सम्पूर्णं दामनं पर्व ते विभो ! ॥ ६७ ॥
इति विज्ञाप्य देवेशमग्निस्थं मण्डले शिवे ।
संयोज्य तं च लिङ्गस्थे कुम्भस्थं च सदाशिवम् ॥ ६८ ॥
आयोज्य वह्निहृत्पद्मे नत्वा स्तुत्वा महेश्वरम् ।
प्रणिपत्य क्षमस्वेति यथापूर्वं विसर्जयेत् ॥ ६९ ॥

अस्त्रादिद्वारलोकेशान् स्वेषु स्थानेषु योजयेत् ।
एतद् दामनकं पर्व कृत्वा चण्डं च पूजयेत् ॥ ७० ॥
गोमयाम्बुविलिप्तायां क्षितौ नित्यं यजेच्छिवम् ।

इत्थं वसन्तविहितं सवसन्तयागं
प्रोक्तं तदन्तमिह दामनकं हि पर्व ।
यद्वद् वसन्ततिलकं सुमनोभिरामं
तद्वन्मनोभिलषितान् फलतीह कामान् ॥ ७१ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापादे दमनकपर्वविधिपटलो द्वाविंशः ॥

अथ त्रयोविंशः पटलः ।

अथ भूः सर्ववर्णानामुपजीव्या तथाश्रया[1] ।
प्रतिष्ठादिक्रियाचक्रं यतो यस्यां प्रवर्तते ॥ १ ॥
तस्मात् तल्लक्षणं सम्यक् संक्षेपादिह कथ्यते ।
पुण्यक्षेत्रनदीतीर्थपर्वताद्यन्विता मही ॥ २ ॥
प्रयच्छत्यधिकां सिद्धिं यतस्तामाश्रयेद् बुधः ।
स्वतः कृष्णमृगैर्युक्ता कुशकाशैरलङ्कृता ॥ ३ ॥
वेदविद्भिर्द्विजैर्जुष्टा यज्ञियैस्तरुभिर्वृता ।
प्रागुदक्प्रवणा रम्या प्रभूतसलिलाशया ॥ ४ ॥
नीरन्ध्रा चैव सुस्निग्धा समित्पुष्पफलान्विता ।
स्वारामगोकुलकुला भूः सामान्या प्रशस्यते ॥ ५ ॥
पूर्णा सुपद्मा भद्रा च धूम्रा चेति चतुर्विधा ।
भूमिः स्यादानुपूर्व्येण तासां लक्षणमुच्यते ॥ ६ ॥
अङ्कोलाशोकवकुलशिंशपानिम्बकिंशुकैः ।
माधवीगुल्मनिष्पावैः संयुक्ताल्पजलाशया ॥ ७ ॥
पूर्णा(स्यात्) पुष्टिदा भूमिः पर्वतानूपशायिनी ।
चन्दनागरुकर्पूरकदम्बार्जुनकेसरैः ॥ ८ ॥

---

[1] 'ज्ञ' ख. पाठः.

तिलकैः केतकीकुन्दैः पद्माढ्यैश्च जलाशयैः ।
कौबेर्यामन्विता भूमिः सुपद्मा प्राक्प्लवा भवेत् ॥ ९ ॥

अब्धेः समीपे वा नद्याः सुतीर्थैसलिलाशया ।
यज्ञियैः फलवृक्षैश्च पश्चिमस्थैरलङ्कृता ॥ १० ॥

क्षेत्रैर्दक्षिणसंस्थैश्च भद्रा भूमिः सुखप्रदा ।
स्नुहिश्लेष्मातकैरर्कैः पीलुवेणुविभीतकैः ॥ ११ ॥

अन्विता सोषरा रूक्षा परुषा शर्करोपलैः ।
श्येनगृध्रवराहर्क्षकाकगोमायुसंकुला ॥ १२ ॥

धूम्रा नाम मही निन्द्या शोकदुःखभयावहा ।
न तत्र स्थापयेल्लिङ्गं न मन्त्रं साधयेदपि ॥ १३ ॥

चातुर्वर्ण्यजनस्तत्र न वासमभिरोचयेत् ।
भुजङ्गवक्रा शूलाभा मध्यनिम्ना त्रिकोणका ॥ १४ ॥

शूर्पाभा कूर्मपृष्ठाभा षडश्रा निर्जलाथवा ।
यमवह्निमरुद्रक्षोदिक्प्लवा नित्यकर्दमा ॥ १५ ॥

चण्डवाताहता नित्यं वामावर्तजला च या ।
दुर्गन्धा केशकीटास्थिभस्मवल्मीकदूषिता ॥ १६ ॥

सङ्कीर्णा नाम सा भूमिः सर्ववर्णैर्विगर्हिता ।
विप्रादिवर्णभेदेन चतुर्धा भूरथोच्यते ॥ १७ ॥

श्वेताज्यगन्धा मधुरा कुशकाशैरलङ्कृता ।
सौम्येशानप्लवैः स्निग्धा पलाशौदुम्बरान्विता ॥ १८ ॥

चतुरश्राकृतिः प्रोक्ता विप्रभूमिस्तु शान्तिदा ।
रक्ता रुधिरगन्धा या कषाया प्राक्प्लवा मही ॥ १९ ॥

साश्वत्था क्षत्रिया प्रोक्ता व्यासाष्टांशाधिकायता ।
पीता गोमूत्रगन्धाढ्या तिक्तावाम्लरसा च या ॥ २० ॥

प्राक्प्लवा प्लक्षवृक्षाढ्या षडंशाधिकमायता ।
वैश्यभूमिः समुद्दिष्टा नानासस्यविभूषिता ॥ २१ ॥

कृष्णा या मधुगन्धा भूः कटुका प्राक्प्लवोदका ।
शूद्रजातिरिति ज्ञेया ह्यथवा पश्चिमप्लवा ॥ २२ ॥

गोवीथी प्राक्प्लवा भूमिरग्निनिम्ना तथानला ।
याम्या यमप्लवा ज्ञेया नागवीथिस्तु नैर्ऋते ॥ २३ ॥

पश्चात्प्लवा वारुणी स्यात् भूतवीथिर्मरुत्प्लवा ।
धनवीथिः सौम्यनिम्ना धान्यवीथिः शिवप्लवा ॥ २४ ॥

विप्रादीनां च देवानां प्रागैशान्योत्तरप्लवाः ।
शस्ताः स्युर्वीथयः शेषा वर्ज्याः स्युरशुभा यतः ॥ २५ ॥

इत्थं भूमेस्तु लक्ष्मोक्तं सामान्येनाथ कथ्यते ।
कुशशैलाविशिष्टाद्रेतीर्थक्षेत्रवनाश्रया ॥ २६ ॥

न्यायेनैवार्जिता शस्तप्लवा वर्णसमा समा ।
अलाभे धवला रम्या सर्ववर्णहितावहा ॥ २७ ॥

अगर्हानूषरा सर्पवल्मीकान्त्यजवर्जिता ।
श्मशानाङ्गाररहिता सुस्वादुसलिलान्विता ॥ २८ ॥

न्यग्रोधोदुम्बराश्वत्थप्लक्षाः पूर्वादिगाः शुभाः ।
सर्वत्र केसराश्चूताः पुन्नागा नागडाडिमाः ॥ २९ ॥

पनसाश्चम्पकाः पूगा नालिकेराश्च शोभनाः ।
प्राच्यां निषिद्धो हि गिरिस्तच्छाया ह्युदये रवेः ॥ ३० ॥

यत्रापतति तत्रापि ग्रामाद्यं न प्रशस्यते ।
अम्भः कुम्भगतं श्रेष्ठं मध्यमं मीनमेषयोः ॥ ३१ ॥

मकरे च वृषे नीचं ग्रामादेरालयस्य वा ।
धान्यपूर्णामकुम्भं तु निधायेष्ट्वास्य चोपरि ॥ ३२ ॥

आमे शरावे कुडुवं गव्यमाज्यं विनिक्षिपेत् ।
चतुर्दिक्षु क्षिपेद् वर्तीः शुद्धाः कार्पासवस्त्रजाः ॥ ३३ ॥

सितरक्तपीतकृष्णाश्चतस्रः समवार्तिताः ।
ऐन्द्रदक्षिणसौम्याप्यवर्त्यो विप्रादिकाः क्रमात् ॥ ३४ ॥

पुरुषाद्यैस्तु जातीयैर्युक्तास्तन्मन्त्रमन्त्रिताः ।
सङ्कल्प्य ज्वालयेद् दीपान् गन्धाद्यैः पूजयेदपि ॥ ३५ ॥
याममात्रावधिं कृत्वा सुलिप्ते भूतले न्यसेत् ।
यस्य वर्णस्य या वर्ती सा ज्वलन्ती सुखावहा ॥ ३६ ॥
निर्वापिता चेद् वर्ज्या स्याद् विमानकरणादिषु ।
ज्वलन्ति यदि सर्वास्ताः सर्ववर्णसुखावहाः ॥ ३७ ॥
हस्तमात्रं समं खातं तन्मृदा पूरयेत् पुनः ।
मृत्स्नयाधिकया श्रेष्ठा समया मध्यमा हि भूः ॥ ३८ ॥
न्यूनया त्वधमा त्याज्या त्रिधैवं परिकल्पयेत् ।
तत्खातं वा जलापूर्णं कृत्वा पदशतं व्रजेत् ॥ ३९ ॥
पुनरागच्छतः प्राग्वत् पूर्णं चेद् भूमिरुत्तमा ।
यवन्यूना मध्यमा स्यात् त्याज्या न्यूना ततोऽधिकम् ॥ ४० ॥

एवं विचार्य रहितां कथितैश्च दोषैः
शस्तैर्गुणैश्च सहितां धरणीं सुरम्याम् ।
तस्यामभीष्टफलसिद्धिकरं विदध्याद्
यागं शिवस्य भवनं च यथोक्तमार्गात् ॥ ४१ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापादे भूलक्षणपटलस्त्रयोविंशः ।

अथ चतुर्विंशः पटलः ।

अथोत्तरायणस्थेऽर्के प्रशस्ते दिवसोदये ।
गृहीतवास्तुं खात्वा तु शल्यमुद्धृत्य शोधयेत् ॥ १ ॥
सर्वतः सुसमं कृत्वा स्थलं दर्पणसन्निभम् ।
तन्मध्ये दण्डमात्रं वा जलावस्थानतः समम् ॥ २ ॥

तद्यथा —

सच्छिद्रमध्यं तु घटं भाराम्बुपरिपूरितम्[1] ।
यन्त्रिकाधारगं कृत्वा स्थलमध्ये समं न्यसेत् ॥ ३ ॥

---

[1] 'न्यसेत् तद् यथा' क. पाठः.

ततः परिस्रुताम्भोभिः समं सिक्ते तु भूतले ।
अन्यूनाधिकसंस्थानं यथा ज्ञेयं तदम्भसाम् ॥ ४ ॥
बिन्दुं कृत्वा स्थलं मध्ये तस्मिन् शङ्कुं समं न्यसेत् ।

तद्यथोक्तं चान्यैः—

"भ्रमविरचितवृत्तस्तुल्यमूलाग्रभागो द्विरदशनजन्मा सारदारूद्भवो वा ।
सममृजुरवलम्बादव्रणः षट्कवृत्तः समतल इह शस्तः शङ्कुरर्काङ्गुलोच्चः ॥"

इति ।

शङ्कोः पुच्छाग्रयोर्मध्ये यवस्थूलायते समे ॥ ५ ॥
लोहजे घटयेत् सूच्यौ तच्छायामध्यसिद्धये ।
शङ्कुमानायतं सूत्रं बिन्दौ तस्मिन् निधाय तु ॥ ६ ॥
भ्रमयेत् परितस्तेन बिन्दौ स्थित्वा सुवर्तुलम् ।
तन्मध्यबिन्दौ तं शङ्कुं स्थापयेदुदये रवेः ॥ ७ ॥
तद्बिम्बवृत्तरेखायां शङ्कुच्छायाशिरो[1] यदा ।
ह्रासाद् विंशतिपूर्वाह्णे तत्र च्छायाग्रमङ्कयेत् ॥ ८ ॥
तथापराह्णे च्छायायां निर्गच्छन्त्यां तु मण्डलात् ।
संस्पृशन्त्यां तु तद्रेखां प्राग्वत् तत्रापि लाञ्छयेत् ॥ ९ ॥
तयोरास्फालयेत् सूत्रमृजुं पूर्वापराङ्कयोः ।
दिशौ प्राक्पश्चिमे ख्यातां ब्राह्मी प्राची स्मृता हि सा ॥ १० ॥
पाश्चात्याङ्कस्थितं सूत्रमर्धरक्षोघ्नमानतः ।
प्रागङ्काद् दक्षिणे न्यस्य सा दिगैन्द्रीति कथ्यते ॥ ११ ॥
प्रागङ्कादुत्तरे तद्वदैशी काष्ठा तु सा भवेत् ।
शिवालयादिकरणेष्वैशी प्राचीति केचन ॥ १२ ॥
विप्राद्यावासकरणे स्यादैन्द्रीत्यपरे जगुः ।
ब्राह्मी दिगेव सर्वेषां नैकतन्त्रनिदर्शनात् ॥ १३ ॥
निरक्षदेशे लङ्कादौ स्यादयं दिग्विनिर्णयः ।
इत्याहुः केचिदित्यस्मात् साक्षदेशस्य कथ्यते ॥ १४ ॥

---

[1] 'रोदया ह्रा' क. पाठः.

विशेषः साक्षदेशानामस्त्येवार्कापसर्पणात् ।

उक्तं चान्यैः —

"याति भानुरपमण्डलवृत्त्या दक्षिणोत्तरदिशोरनुवेलम् ।
तेन सा दिगनृजुः प्रतिभाति स्यादृजुः पुनरपक्रममौर्व्या ॥"

इति । उत्तरगोलस्थ उत्तरां दिशमपक्रममण्डलेन गच्छति । दक्षिणगोलस्थो दक्षिणां दिशमपक्रममण्डलेन चरति । तस्मात् सा दिगनृजुः प्रतिभाति । तस्मादिदानीमपक्रमज्यया दिगार्जवं प्रतिपादयन्नाह —

"छायानिर्गमनप्रवेशसमयार्काक्रान्तिजीवान्तरं
क्षुण्णं सश्रवणेन लम्बकहृतं स्यादङ्गुलाद्यं फलम् ।
पश्चाद् बिन्दुरनेन रव्ययनतः सञ्चालयेद् व्यत्ययात्
स्पष्टा प्राच्यपराथवायनवशात् प्राग्बिन्दुमुत्सारयेत् ॥"

इति । यावतीभिर्वृत्ताभिर्घटिकाभिर्वृत्तरेखां स्पृशति शङ्कुच्छाया यावतीभिः वृत्तान्निर्गच्छति स खलु च्छायानिर्गमनप्रवेशसमयः । तयोः कालयोरर्काक्रान्तिजीवान्तरं नामार्कघटिकामानमित्यर्थः[1] । तत् स्वश्रवणेन प्रवेशनिर्गमनकालच्छायायाः कर्णेन गुणितं लम्बकहृतं लम्बज्यया हृतमङ्गुलाभ्यां फलं भवति । तेन फलेन पश्चाद् बिन्दुं प्राप्ताङ्गुलप्रमाणेन रवेरयनस्य व्यत्ययात् सञ्चालयेत् । अयनव्यत्ययश्चोत्तरायणे दक्षिणेन दक्षिणायने तूत्तरेण सञ्चालयेदित्यर्थः । तथास्फालितं सूत्रं साक्षदेशे स्पष्टा प्राची भवति । अथार्कावलम्बकैर्विनापि प्रकारान्तरेण दिक्परिज्ञानार्थमुच्यते —

छायात्रयाग्रोद्भववृत्तमध्यस्पृक्सूत्रयोर्यत्र युतिः प्रदेशे ।
याम्योत्तरा शङ्कुदिशा ककुप् स्यात् क्रमेण सौम्येतरगोलयोः स्यात् ॥ १५ ॥

पूर्वकपाले वापरकपाले च्छायात्रयाग्रं दृष्ट्वा तैर्वृत्तत्रये लिखिते यन्मत्स्यद्वयमुत्पद्यते तयोर्मुखपुच्छानुसारिसूत्रद्वयं यस्मिन् प्रदेशे संयुक्तं तिष्ठति तत आरभ्य शङ्कुमूलपर्यन्तं सूत्रमास्फालयेत् । सा दक्षिणोत्तरा दिग् भवति । रवावुत्तरगोलस्थे शङ्कुमूलाद् दक्षिणा भवति । दक्षिणगोलस्थे शङ्कुमूलादुत्तरा भवति । अत्र पुनः स्पष्टमुच्यते । तद् यथा — जलसमीकृते स्थले

---

[1] 'र्थः छायात्र तत्' क. पाठः.

प्रोक्तप्रमाणं शङ्कुं विन्यस्य पूर्वाह्णे वापराह्णे छायाग्रेष्वभिनिविष्टेषु त्रिषु त्रयो बिन्दवः कार्याः। तत एकं बिन्दुं मध्ये कृत्वेष्टप्रमाणेन वृत्तमालिखेत्। तावतैव द्वितीयं बिन्दुमवलम्ब्य द्वितीयं वृत्तं तद्वत् तृतीयं बिन्दुं मध्ये कृत्वा तृतीयं वृत्तमालिखेत्। ततस्तावत्प्रमाणमेव वृत्तम्। तथाचालिखेद् यथा मध्यबिन्दुवृत्तं पार्श्वद्वयबिन्दुवृत्तद्वयस्य खण्डमुत्पादयति। तथाकृते मत्स्यद्वयमुत्पद्यते। तयोश्च यस्यां दिशि महदन्तरं ते मुखे भवतः। तयोर्यस्यां दिशि सन्निकर्षस्ते पुच्छे भवतः। मुखयोः सूक्ष्मकीलकौ विन्यस्य तयोः सूत्रे बद्ध्वा पुच्छमध्यगे निःसार्य स्वगत्यैकैकं नयेत्। तयोः सूत्रयोर्मुखपुच्छगत्यनुसारेण यत्र सन्निपातः सा दक्षिणा दिग् भवति शङ्कुतल(न्यु ? दु)त्तरगोलस्थेऽर्के ततो दक्षिणगोलस्थे सवितरि। तथा मध्यगतसूत्रयोर्युति बिन्दुः शङ्कुमूलादेवोत्तरा दिग् भवति। एवं शङ्कुमूलयुति बिन्द्ववगाहि सूत्रं प्रसार्य रेखां कुर्यात् सा दक्षिणोत्तरा दिग् भवति। तत एकैकं बिन्दुं मध्ये कृत्वा वृत्तद्वयेन मत्स्यमुत्पादयेत्। तस्य मुखपुच्छावगाहिसूत्रं पूर्वापरा दिग् भवति। एवं साक्षदेशे दिक्साधनमुक्तम्। निरक्षदेशे तु पूर्वोक्तैव पूर्वापरा दिग् भवति। तत्सूत्रस्य मध्यबिन्दौ स्थित्वा दशाङ्गुलमानेन सूत्रमध्ये पूर्वापरादङ्कौ कृत्वा तयोरङ्कयोरन्तरसमानसूत्रमङ्कयोर्निधाय दक्षिणोत्तरयोः पारेश्रन्योत्पन्नयोर्मत्स्ययोः सूत्रमास्फाल्य दक्षिणोत्तरा दिग् भवतीत्यलम्। अपिच

नरच्छायानुसारेण कल्प्यं चार्कापसर्पणम् ॥ १६ ॥
गणयित्वा धनुर्ज्यावद् ज्ञेयं स्यादर्कमार्गयोः ।
अर्धाङ्गुलमपच्छाया वृषयुग्माङ्गनासु च ॥ १७ ॥
तुलालिचापेष्वृद्धा स्याद्धीना कर्किमृगादिषु ।

तच्च प्रतिदिनमिति यावत् ।

द्वयमेकं न नैकं द्वे नेत्राग्निश्रुतिसंख्यया ॥ १८ ॥
वेदाग्निद्वयमानेन द्वयमेकं न किञ्चन ।
नैकनेत्राब्धिरामाक्षियुगबाणर्तुसंख्यया ॥ १९ ॥
षट्सप्ताष्टकमानेन चाष्टाब्धिरससंख्यया ।
ऋतुबाणश्रुतिसमं वेदाग्न्यक्षिमितं क्रमात् ॥ २० ॥

---

१. 'पुत्र' क. पाठः.

अर्धार्धपादमानेन मेषादिद्वादशस्वपि ।
दशके दशके त्वह्नां नरच्छायामितिं त्यजेत् ॥ २१ ॥

अत्र

समीक्ष्य भानोर्गमनं सराशिकं त्यजेत् पुरोक्ताङ्गुलमत्र युक्तितः ।
ततस्तु काष्ठामुपगृह्य तद्वशाद् विसृज्य सूत्रं विदधीत वस्त्वलम् ॥ २२ ॥
स्थलं समं जलवशाल्लम्बसूत्रात् स्थितार्जवम् ।
भुजासमत्वं स्यात् कर्णैस्त्रिनरात् तिर्यगार्जवम् ॥ २३ ॥
प्राचीसूत्रात् प्रसिद्ध्यन्ति दिशोऽन्याश्चतुरश्रगाः ।

शङ्कुच्छायाधिकारः ।

परमाणुरजोरोमलिक्षायूकायवाष्टकैः ॥ २४ ॥
क्रमान्मानाङ्गुलं ज्ञेयं वितस्तिर्द्वादशाङ्गुला ।
मानाङ्गुलद्वादशकं वितस्तिर्वितस्तियुग्मं खलु सीकष्कुंज्ञम् ।
हस्तो भवेद्धस्तचतुष्टयं स्याद्धनुश्च दण्डोऽपि स एव नाम्ना ॥ २५ ॥
दण्डपञ्चाशतायामो गव्यूत्यर्धं निगद्यते ॥ २६ ॥
द्विगुणं तत् तु गव्यूतिस्तद्द्वयं क्रोश उच्यते ।
योजनं तु चतुष्क्रोशं द्विष्क्रोशं चार्धयोजनम् ॥ २७ ॥

अत्रार्यभटः —

"हस्तोऽङ्गुलविंशत्या चतुरुत्तरया चतुष्करो दण्डः ।
तद्द्विसहस्रं क्रोशो योजनमेकं चतुष्क्रोशम् ॥"

इति ।

प्राजापत्याख्यहस्तः स्यात् पञ्चविंशतिकाङ्गुलः ।
षट्सप्ताधिकविंशत्या धनुर्मुष्टिधनुर्ग्रहौ ॥ २८ ॥
आ सन्धेर्बद्धमुष्टिस्तु रत्निः कर उदाहृतः ।
स एवारत्निरुद्दिष्टा सृष्टा चेत् तत्कनिष्ठिका ॥ २९ ॥
प्रादेशतालगोकर्णवितस्त्यः स्युर्यथाक्रमम् ।
तर्जन्यादिकनिष्ठान्तमाङ्गुष्ठाग्रात् प्रसारिता ॥ ३० ॥

यन्मध्यमामध्यमपर्वदैर्घ्यान्मानेन मात्राङ्गुलमायतं स्यात् ।
तत्पर्वमानेन तदेव तिर्यङ्मात्राङ्गुलं तच्च तताभिधानम् ॥ ३१ ॥
देहोपलब्धाङ्गुलमिष्यते यत् तन्मानयुक्त्या प्रतिमासु विद्यात् ।
दण्डानामष्टकं रज्जुः सा च सीमादिषु स्मृता ।
किष्कुहस्तेन यानादिशयनीयादिसाधनम् ॥ ३२ ॥

अत्राह मयः—

"याने च शयने किष्कुः प्राजापत्यं विमानके ।
वास्तूनां तु धनुर्मुष्टिर्ग्रामादीनां धनुर्ग्रहः ॥
सर्वेषामपि वास्तूनां किष्कुर्हस्तोऽथवा भवेत् ।"

इति ।

दण्डेन तु ग्रामनिवेशनाद्यं पुराणि खेटं निगमं च कुर्यात् ।
हस्तेन वेश्मादिषु मानमुक्तं स्वल्पेन चैवाङ्गुलकैर्यवैर्वा[1] ॥ ३३ ॥
देवालयगृहादीनि कुर्यान्मात्राङ्गुलेन हि ॥ ३४ ॥
कुण्डादिकानामपि मण्डलानां सर्वत्र मात्राङ्गुलमानतः स्यात् ।
निर्माणमित्यत्र यथावदुक्ता तत्तत्क्रियाभेदविशेषसिद्धिः ॥ ३५ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापादे शङ्कुच्छायाङ्गुलादिविधिर्नाम
चतुर्विंशः पटलः ॥

अथ पञ्चविंशः पटलः ।

अथातः पदविन्यासः कथ्यते वस्तुसिद्धये ।
सकलं पेचकं पीठं महापीठोपपीठके ॥ १ ॥
उग्रपीठं स्थण्डिलं च मण्डूकं परशायिकम् ।
आसनं चेति दशधा ग्रामादिन्यासचण्डितम् ॥ २ ॥
प्रान्तसूत्रचतुष्कान्तरेकं स्यात् सकलं पदम् ।
प्राच्योदीच्यैकसूत्रादिवृद्ध्या तत् स्याच्चतुष्पदम् ॥ ३ ॥
एवं प्रागुत्तरपदपङ्क्तिवृद्धिं क्रमान्नयेत् ।
चतुष्पदं पेचकं स्यात् पीठं नवपदं स्मृतम् ॥ ४ ॥

---

[1] 'र्वा ॥ इति श्रीम' क. पाठः.

महापीठं षोडशभिः पञ्चविंशतिभिः पदैः ।
उपपीठं तु षट्त्रिंशत्पदैः स्यादुग्रपीठकम् ॥ ५ ॥

स्थण्डिलं ह्यूनपञ्चाशन्मण्डूकं चाष्टकाष्टकैः ।
एकाशीतिपदैः ख्यातं क्षेत्रं परमशायिकम् ॥ ६ ॥

आसनं शतकोष्ठैः स्याद् ग्रामाद्यं त्वेषु सिद्ध्यति ।
चतुरश्राष्टदण्डा भूः काकणी तच्चतुर्गुणः ॥ ७ ॥

माषो वेदगुणं तस्माद् भवेद् वर्तनकाह्वयम् ।
तत्पञ्चगुणिता वाटी कुडुवं तच्चतुर्गुणम् ॥ ८ ॥

भूमानमेवं कथितं दण्डमानं तु कथ्यते ।
महाग्रामस्योत्तमस्य पर्यन्तो लक्षदण्डवान् ॥ ९ ॥

तस्माद् विंशतिसाहस्रदण्डह्रासात् क्रमेण तु ।
ग्रामाणां पञ्चधा मानं मुख्यं त्वेवमुदीरितम् ॥ १० ॥

दण्डविंशतिसाहस्राद् दण्डपञ्चशतस्य तु ।
क्रमह्रासाद् ग्राममानान्या पञ्चशतदण्डतः ॥ ११ ॥

चत्वारिंशत्प्रभेदानि मध्यमाने भवन्ति हि ।
ग्रामाधिवासक्षेत्रादेः सीमामानमिदं स्मृतम् ॥ १२ ॥

प्राकारान्तरथावाससीमामानमिहोच्यते ।
ग्रामश्च खेटकश्चाथ खर्वटं दुर्गमेव च ॥ १३ ॥

नगरं राजधानी च पत्तनं द्रोणिकामुखम् ।
शिबिरं स्कन्धवारश्च स्थानीयं च विडम्बकम् ॥ १४ ॥

निगमश्चाथ निर्दिष्टः स्याच्छाखानगरं ततः ।
एषां चतुर्दशानां च लक्षणं पृथगुच्यते ॥ १५ ॥

अष्टाष्टदण्डविस्तारो ग्रामः स्यादधमाधमः ।
द्विगुणत्रिगुणौ तस्माद् ग्रामौ मध्योत्तमौ स्मृतौ ॥ १६ ॥

षट्पञ्चाशच्च द्विशतं दण्डाः खेटेऽधमे स्मृताः ।
विंशत्या त्रिशतैर्दण्डैर्मध्यश्चतुरशीतिभिः ॥ १७ ॥

त्रिभिः शतैश्चोत्तमः स्यात् खेटस्त्वेवं त्रिधा स्मृतः ।
अष्टौ च चत्वारिंशच्च दण्डास्तद्वच्चतुःशतम् ॥ १८ ॥
हीने तु खर्वटे ज्ञेया मध्ये पञ्चशताधिकम् ।
द्वादशैवोत्तमे षड्भिः सप्तत्या पञ्चभिः शतैः ॥ १९ ॥
हीनदुर्गं षट्शतैश्च चत्वारिंशाद्भिरन्वितम् ।
चतुर्दण्डोत्तरैः सप्तशतैर्दुर्गं तु मध्यमम् ॥ २० ॥
अष्टषष्टियुतैः सप्तशतैर्दुर्गमिहोत्तमम् ।
सद्वात्रिंशद्वसुशतैः षण्णवत्याष्टभिः शतैः ॥ २१ ॥
षडुत्तरैर्नवशतैर्नीचत्रिनगराणि वै ।
सहस्रेण च सार्धेन द्विसहस्रेण च क्रमात् ॥ २२ ॥
नीचं मध्यं तथा श्रेष्ठं नगरं मध्यमत्रये ।
त्रिचतुष्पञ्चसाहस्रैर्नगराण्युत्तमत्रये ॥ २३ ॥
षट्सप्ताष्टसहस्रैस्तु दण्डैः स्युश्चोत्तमोत्तमे ।
नगराणां त्रये तानि नगराणि यथाक्रमम् ॥ २४ ॥
विकारदण्डवृद्ध्या तु प्रत्येकं नवधा पुनः ।
ग्रामादीनां प्रमाणानि प्रोक्तादूर्ध्वं भवन्ति हि ॥ २५ ॥
राजधान्यादिकानां तु मानं नगरवद् भवेत् ।
एतावन्मानुषेष्वेव मानं ग्रामादिषु स्मृतम् ॥ २६ ॥
देवासुरपुरादीनां मानं न ज्ञायते नरैः ।
विस्तारात् पादमर्धं वा त्रिपादद्विगुणं तु वा ॥ २७ ॥
मुखायामो भवेदेषां ग्रामादिनगरान्तकम् ।
एतेषां विपुलायामावयुग्मैरेव दण्डकैः ॥ २८ ॥
विधातव्यावतः शेषं वाटीसञ्चारभूमिका ।
नद्यादेर्दक्षिणाद्ये तु तीरे ग्रामान् निवेशयेत् ॥ २९ ॥
ग्रामयोरन्तरे खेटं राष्ट्रमध्ये तु खर्वटम् ।
पर्वतान्तर्वने वाब्धौ दुर्गं स्याद् वा जलावृतम् ॥ ३० ॥

दुर्गं तु पार्वतं वन्यमौदकं चैरिणं तथा ।
दैविकं धान्वनं चैव कृतकं चेति सप्तधा ॥ ३१ ॥

राष्ट्रस्य मध्ये नद्या वा समीपे नगरं स्मृतम् ।
तदेव शङ्कुपङ्काद्यैः परिखाभिर्दुरासदम् ॥ ३२ ॥

उच्चप्राकारकाट्टालगोपुरक्षेपणीहुलैः ।
शतघ्नीभिश्च परितः परिस्तीर्णोच्छ्रिताट्टकम् ॥ ३३ ॥

एकद्वित्रिचतुर्द्वारं राजधानीति कथ्यते ।
नानापण्यधनाकीर्णं सागरानूपसंश्रितम् ॥ ३४ ॥

सांयानिकवणिग्जुष्टं पत्तनं परिचक्षते ।
तदेवाब्धेश्च नद्याश्च सङ्गमागतपोतकम् ॥ ३५ ॥

द्वीपान्तरवणिग्जुष्टं विदुर्द्रोणमुखं बुधाः ।
परराष्ट्रे स्वदेशे वा चतुर्विधबलान्वितम् ॥ ३६ ॥

विजिगीषोः सान्निवेशं शिबिरं तत् प्रचक्षते ।
नातिदूरे तदेव स्यान्नृपयोर्युध्यतोर्मिथः ॥ ३७ ॥

सेनानिवेशस्तु पृथक् स्कन्धावार इति स्मृतः ।
पर्वतस्याथवा नद्याः पार्श्वे राजबलान्वितम् ॥ ३८ ॥

राष्ट्रान्ते सान्तपालं यत् तत् स्थानीयं विदुर्बुधाः ।
कृषीवलादिकावासो ग्रामोपान्ते विडम्बकम् ॥ ३९ ॥

चातुर्वर्णैः कर्मकारैर्नानाकर्मोपजीविभिः ।
पण्यैश्च धनधान्याद्यैर्युक्तस्तु निगमः स्मृतः ॥ ४० ॥

वने वा नगरोपान्ते नागरैस्तु जनैर्वृतम् ।
क्षेत्रारामाकरोपेतं शाखानगरमिष्यते ॥ ४१ ॥

सहस्रैर्जगतीपङ्क्तिवसुसंख्यैर्द्विजन्मनाम् ।
श्रेष्ठोत्तमः श्रेष्ठमध्यो ग्रामः श्रेष्ठाधमस्तथा ॥ ४२ ॥

सप्तषट्पञ्चसाहस्रैर्ग्रामा मध्योत्तमादयः ।
चतुस्त्रिद्विसहस्रैस्तु ग्रामाः स्युरधमे त्रयः ॥ ४३ ॥

विप्राणां दशसप्तेषुशतैर्नीचोत्तमादयः ।
ग्रामा भवन्त्यथ क्षुद्रास्तेऽप्येकादशधा स्मृताः ॥ ४४ ॥
चतुस्त्रिद्विशतैरष्टशतैश्चतुरशीतिकैः ।
सचतुष्षष्टिपञ्चाशद्द्वात्रिंशत्त्र्यष्टकैरपि ॥ ४५ ॥
विकारादित्यसंख्यैश्च ब्राह्मणैस्तु निवेशितैः ।
एकद्विजाद्यादशान्तास्त्वेकभोगादिका दश ॥ ४६ ॥
सकलाद्यासनान्ते तु ग्रामादिन्यासचण्डिते ।
युग्मे सूत्रे तु वीथ्यः स्युरयुग्मे पदपङ्क्तिषु ॥ ४८ ॥
द्वयोर्न सङ्करं कुर्यात् सङ्करश्चेद् विनाशकृत् ।
दण्डकः स्वस्तिकश्चैव प्रस्तरश्च प्रकीर्णकः ॥ ४८ ॥
नन्द्यावर्तः परागश्च पद्माख्यः श्रीप्रतिष्ठितः ।
ग्रामादीनां तु सामान्याद् विन्यासास्त्वेवमष्टधा ॥ ४९ ॥
ग्रामपर्यन्तवीथिस्तु ख्याता मङ्गलवीथिका ।
नगरे जनवीथी स्याद् रथ्याख्या खेटकादिषु ॥ ५० ॥
एकद्वित्रिचतुष्पञ्चदण्डैः स्याद् वीथिविस्तृतिः ।
प्रागुत्तराभ्यां वीथीभ्यां ककरीबद्धमध्यमम् ॥ ५१ ॥
सचतुर्द्वारपर्यन्तवप्राढ्यो दण्डकाह्वयः ।
यस्मिन्नेकैव वीथी स्यात् प्राचीना सोऽपि दण्डकः ॥ ५२ ॥
पदानां पञ्चविंशत्या ग्रामे तन्मध्यकोष्ठकात् ।
प्रागादिषु चतुर्दिक्षु पृथग् लुम्पेत् पदद्वयम् ॥ ५३ ॥
तस्मात् पदद्वयं बाह्ये प्रागाद्यं तु प्रदक्षिणम् ।
विलोप्य स्वस्तिकाकारो विन्यासः सिद्ध्यति स्फुटम् ॥ ५४ ॥
प्राक्प्रत्यगायतास्तिस्रः सौम्यास्तिस्रोऽथ वीथयः ।
चतस्रः पञ्च वा षड् वा सप्त वा प्रस्तरे स्मृताः ॥ ५५ ॥
चतस्रो वीथयः प्राच्याः सौम्या द्वादश वीथयः ।
रुद्रदिङ्नन्दवसुभिर्मिताः स्युर्वा प्रकीर्णके ॥ ५६ ॥

प्राक् प्रत्यग्वीथयः पञ्च सौम्याश्च स्युस्त्रयोदश ।
शङ्कर्या चातिशकर्या चाष्टयात्यष्ट्या च सम्मिताः ॥ ५७ ॥

नन्द्यावर्ते तु विन्यासे ग्रामादेः प्रभवन्ति हि ।
प्राच्याः षड् वीथयो यस्मिन् सौम्या धृत्यादिसंख्यया ॥ ५८ ॥

आकृत्यन्तं समा यत्र परागः सोऽभिधीयते ।
प्राचीना वीथयः सप्त त्रयोविंशादितः क्रमात् ॥ ५९ ॥

आ सप्तविंशतेः सौम्या विन्यासे पद्मके स्मृताः ।
प्राचीना वीथयोऽष्टौ स्युरष्टाविंशतिमादितः ॥ ६० ॥

आद्वात्रिंशमुदीच्याः स्युर्विन्यासे श्रीप्रातिष्ठिते ।
महेन्द्रे गृहरक्षे च भल्लाटे पुष्पदन्तके ॥ ६१ ॥

महाद्वाराणि चैव स्युरुपद्वाराणि सन्ति चेत् ।
भृशे पूषणि भृङ्गाख्ये दौवारे शोषनागयोः ॥ ६२ ॥

दितावपि च पर्जन्ये जलमार्गास्त्वथैन्द्रतः ।
ईशार्गलान्तं शस्ताः स्युः प्रागुदीचीप्लवो यथा ॥ ६३ ॥

सूर्ये सूर्यो भृशे विष्णुरग्नौ काली यमे गुहः ।
विष्णोर्मध्ये च वरुणे सुग्रीवे सुगतालयः ॥ ६४ ॥

भृङ्गे जिनस्य ज्येष्ठाया वायौ चण्ड्यास्तु मुख्यके ।
कुबेरस्य महाकाल्या मातॄणां च निशाकरे ॥ ६५ ॥

अदितौ वास्तुचामुण्ड्याः शस्त ऐशे शिवालयः ।
निर्ऋतौ वा जयन्ते वा विघ्नेशस्य गृहं भवेत् ॥ ६६ ॥

अथवा देवतानां तु विन्यासमपरे जगुः ।
तद्ग्रामपुरराष्ट्राणां स्यान्मध्ये ब्रह्मणो गृहम् ॥ ६७ ॥

प्राच्यां वा पश्चिमे विष्णोर्ग्रामादीनां च सम्मुखम् ।
पराङ्मुखं स्यादैशान्यां मानुषं शिवमन्दिरम् ॥ ६८ ॥

स्वयम्भुदैविकं चार्षं यत्र तत्र स्थितं तु वा ।
न दोषाय भवेत् तस्याप्यग्रं वर्ज्यं शुभार्थिभिः ॥ ६९ ॥

प्राच्यामैशेऽथवा मध्ये गौर्याः सूर्यस्य च श्रियः ।
मातॄणां दक्षिणे धाम शास्तुः काल्याश्च नैर्ऋते ॥ ७० ॥

षण्मुखस्य तु वारुण्यां ज्येष्ठायास्तदनन्तरम् ।
वायौ सौम्ये च दुर्गाया लोकेशानां स्वगोचरे ॥ ७१ ॥

इन्द्रेशसोममध्ये वा क्षेत्रपालनिकेतनम् ।
देशग्रामपुरादीनामेवमृद्धिकरं भवेत् ॥ ७२ ॥

गोशाला दक्षिणे प्राच्या वापी त्वैशे तथोत्तरे ।
सर्वत्र वा जलं शस्तमुत्तरे पुष्पवाटिका ॥ ७३ ॥

दक्षिणे गणिकावाटः परितः शूद्रजन्मनाम् ।
वैश्यानां वणिजां प्राच्यां मध्ये राजापणो भवेत् ॥ ७४ ॥

प्रागुदीच्योः कुलालानां नापितानां च तत्र हि ।
जालिकानां च वायव्ये सूनानां पश्चिमे गृहम् ॥ ७५ ॥

तैलविक्रयिणां सौम्ये तक्ष्णां वाप्यनिलेऽनले ।
वायव्ये कारुकादीनां कुविन्दानां तु पश्चिमे ॥ ७६ ॥

क्रोशद्वये वा क्रोशे वा बहिश्चण्डालपक्कणम् ।
प्रागुत्तरेण तु क्रोशाद् बहिः पितृवनं भवेत् ॥ ७७ ॥

अनुक्तानां तथान्येषां युक्त्या वासं प्रकल्पयेत् ।
राजधान्यां नृपावासो ब्रह्मांशादपरांशके ॥ ७८ ॥

तस्य प्राच्यां तु बाह्यालिरिन्द्रकोशसभान्वितः ।
पाकशालान्तरिक्षेऽग्नौ शयनं गृहरक्षके ॥ ७९ ॥

अश्वशाला च निर्ऋतौ वरुणे भोजनालयः ।
विहारशाला वायौ स्याद् भल्लाटे कोशसञ्चयः ॥ ८० ॥

कोष्ठागारं तथा सौम्ये व्यायामोऽप्यर्गले स्मृतः ।
पर्जन्ये स्नानभवनमैशे होमार्चनागृहे ॥ ८१ ॥

नृत्तशाला तु गान्धर्वे गजशाला तु पूषाणि ।
दित्यदित्योस्तुरङ्गाणां स्त्रीणां सौम्ये च पश्चिमे ॥ ८२ ॥

मध्ये प्रपां मण्डपं वा युक्त्यान्यच्चापि कारयेत् ।
ब्राह्मणक्षत्रियविशां शूद्राणां धनिनामपि ॥ ८३ ॥

वक्ष्यमाणास्तु ये जातिप्रासादाः सम्पदां पदम् ।
अशक्तानां तु शालाः स्युस्तत्तद्युक्त्या विनिर्मिताः ॥ ८४ ॥

इत्थं ग्रामपुरादिमानमखिलं प्रोक्तं तथा लक्षणं
ब्रह्मागस्त्यपुरन्दरैरपि यथा त्वष्ट्रा मयेनोदितम् ।
यद् विज्ञाय निवेशितेषु विधिना धामस्वशेषामरैः
सम्पूज्यो मुनिभिस्तथैव मनुजैर्देवो मृडानीपतिः ॥ ८५ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापादे पदविन्यासग्रामपुरलक्षणं नाम
पञ्चविंशः पटलः ।

अथ षड्विंशः पटलः ।

अथ लिङ्गप्रतिष्ठायै प्रासादकरणं प्रति ।
कर्षणादिक्रियाचक्रं ज्ञेयं तल्लिख्यतेऽधुना ॥ १ ॥

गुणवद्देशकालाप्तिरवेक्ष्यास्मिन् विशेषतः ।
सुक्षेत्रे चोदिते काले बीजमुप्तं हि रोहति ॥ २ ॥

जलसेकादिभिः कृत्यैरभीष्टफलदं च तत् ।
कर्षणादिक्रियासिद्धे प्रासादे लक्षणान्विते ॥ ३ ॥

विशिष्टदेशे काले च विधिनैव प्रतिष्ठिते ।
लिङ्गे करोति सान्निध्यं शिवः कर्तुश्च भूतये ॥ ४ ॥

अत्रोत्तरायणः कालो नियतः कर्षणादिके ।
मासाश्चानधिकाः पक्षः शुक्लस्तु तिथयः शुभाः ॥ ५ ॥

पर्वरिक्ताष्टमीत्रिष्टिप्रतिपद्वर्जितास्तु याः ।
करणानि विना विष्टिं शकुनिं च चतुष्पदम् ॥ ६ ॥

नागकिंस्तुघ्नकौ हित्वा शस्तानि सुखदानि च ।
चन्द्रज्ञगुरुशुक्राणां वारद्रेक्काणकांशकाः ॥ ७ ॥

शस्ता गुरुज्ञकाव्यानां होराश्चोदयदृष्टयः ।
पापानामंशदिवसद्रेक्काणोदयदृष्टयः ॥ ८ ॥

होराश्चाशोभनाः सर्वे ग्रहा(स्त्वो?स्त्वा)य गताः शुभाः ।
त्रिषष्ठायगताः पापाः शस्ता नेष्टास्ततोऽन्यतः ॥ ९ ॥

षट्सप्तदशगः शुक्रो नेष्टोऽन्यत्र शुभावहः ।
सर्वेऽप्यष्टमगा नेष्टाः शुक्रस्तत्रापि शोभनः ॥ १० ॥

द्वितीयपञ्चगश्चन्द्रो ज्ञः सप्तनवपञ्चगः ।
द्विसप्तपञ्चनवमे गुरुश्चैते शुभावहाः ॥ ११ ॥

सौम्यादित्याश्वितिष्याणि हस्तपौष्णे त्रिरुत्तराः ।
रोहिणी श्रवणं स्वाती मैत्रं चेष्टानि भानि वै ॥ १२ ॥

ग्रहमुक्तं ग्रहयुतं ग्रहेणाकाङ्क्षितं त्यजेत् ।

तद्यथा —

उल्कापातं सूर्याद् दशमे नक्षत्रे भूकम्पः । सप्तमे ब्रह्मदण्डः । पञ्चदशे मोघम् । एकविंशतिके शुक्रात् सप्तमे नक्षत्रे मृत्युः राहोरेकादशमे च । शनैश्चरयुक्तनक्षत्राद् दशमषष्ठविंशाति(खा?भा)नि च खण्डनक्षत्राणि वर्ज्यानि । बुधादष्टममष्टादशकं चतुर्विंशे त्रिकं च महाकण्टकाख्यानि । भौमात् पञ्चमसप्तमनवमचतुर्दशत्रिकभानि ज्वालाग्निगुरोर्नवमं रोगाख्यं च वर्ज्यम् ।

अपिच

अश्वे चित्रे च रोहिण्यां धनिष्ठायां तथोत्तरे ॥ १३ ॥
अर्कादियोगो दग्धाख्यो ज्येष्ठायां चापि पूषभे ।
द्वादश्येकादशी तद्वत् पञ्चमी च द्वितीयया ॥ १४ ॥

षष्ठ्यष्टमी च नवमी दग्धाः सूर्यादिभिर्युताः ।
अनूराधा वैश्वदेवं शतभाश्वीन्दुसर्पभम् ॥ १५ ॥

हस्तं चार्कादिसंयोगान्मृत्युयोगा भवन्ति हि ।
मखा विशाखाथार्द्रा च मूला शतभिषक् तथा ॥ १६ ॥

रोहिणी चोत्तराषाढा विषयोगास्त्विनादिभिः ।
अर्केऽग्निपञ्चमीयोगः सोमे चित्राद्वितीयया ॥ १७ ॥

भौमे च रोहिणी पूर्णा बुधे याम्येन सप्तमी।
गुरौ ज्येष्ठा प्रतिपदं शुक्रे षष्ठी च वैष्णवम् ॥ १८ ॥
शनौ पौष्णाष्टमीयोगो मृतयोगस्त्यजेदिमान्।
प्राजापत्यं तृतीयायां सौम्यं षष्ठ्यां तु तिष्यभम् ॥ १९ ॥
दशम्यां द्वादशी मैत्रं पञ्चम्यां श्रवणं तथा।
सप्तम्यां पौष्ण(भा?भं) याम्यमष्टम्यां चोग्रसंज्ञिताः ॥ २० ॥
चित्रा विशाखा चाग्नेयमजैकपदवैष्णवे।
शतोडुमथाहिर्बुध्न्यमश्विना भरणी तथा ॥ २१ ॥
रोहिण्यार्द्रादितीशानि शून्यान्यृक्षाण्यजादिषु।
मासेष्वेतानि वर्ज्यानि क्रमाद् द्वादश भान्यपि ॥ २२ ॥
विष्कम्भशूलगण्डाश्चाप्यतिगण्डोऽथ वज्रकम्।
व्याघातश्चैषु योगेषु त्रिपञ्चर्तुरसैर्मितम् ॥ २३ ॥
नवापि नव हित्वैषां घटिकाः शुभदाः पराः।
विष्कम्भशूलयोरादौ मध्ये गण्डातिगण्डयोः ॥ २४ ॥
व्याघातवज्रयोरन्ते त्यजेदुक्तास्तु नाडिकाः।
व्यतीपातं च परिघं वैधृतिं चाखिलं त्यजेत् ॥ २५ ॥
यावदर्कारयोर्मूलं मूलात् तत्संख्यतारकम्।
दग्धं च कण्टकं स्थूणं प्रतिष्ठादिषु वर्जयेत् ॥ २६ ॥
सर्पाश्विपित्र्यपौष्णानि ज्येष्ठा मूलं परस्परम्।
याम्याहिर्बुध्निमैत्राणि पुष्यपूर्वाप्यभान्यपि ॥ २७ ॥
श्रोणाप्रजेशशतभहस्तार्द्रास्वातयो मिथः।
पादभं पादभाविद्धमर्धर्क्षं चार्धभाहतम् ॥ २८ ॥
ग्रहैरेषु स्थितैरेषां वेधं ज्ञात्वा विवर्जयेत्।
नाना(रा? यो)गे यथासंख्यं पक्षयोस्तिथियोजिते ॥ २९ ॥
मुनिसंख्याविभक्तेऽस्मिन् ज्ञेयाः श्रीदिवसादयः।
श्रीदिवसः कलिदिवसो नान्दीदिवसश्च कालकर्णी च।
जयदिवसो वधदिवसो धनार्णवश्चैव सप्तैते ॥ ३० ॥

कलिश्च कालकर्णी च वधसंज्ञश्च वर्जितः ॥ ३१ ॥

यमो नागः सनः पारं खलश्चेति प्रसंख्यया ।
नन्दादिषु क्रमान्नाडीस्तिथिरूपाह्वयास्त्यजेत् ॥ ३२ ॥

हारी सानुर्मयो नेत्रं सूनुर्मौनी कपिः पटुः ।
हरो हारी नरः संज्ञा मान्यो मृत्युः पटुर्नरिः ॥ ३३ ॥

मग्ना सेनामयास्थेयं योग्या संज्ञार्थिनां मृदः ।
दूरे जरामुनिश्चेति ऋक्षरूपांश्च वर्जयेत् ॥ ३४ ॥

अश्विन्यादिषु नक्षत्रेषु वाक्यसंख्यघटिकान्ते घटिकाद्वयं वर्ज्यम् ।

घटिकाद्वयमृक्षान्ते दिनान्ते पञ्च नाडिकाः ।
मासान्ते द्विदिनं त्याज्यमयनान्ते दिनत्रयम् ॥ ३५ ॥

पक्षं संवत्सरान्ते च प्रतिष्ठादिषु वर्जयेत् ।
नागो नाभिर्वरः कोपो नीलो नीरं नगो नगः ॥ ३६ ॥

अरं दया खरः क्रूरः पापो भूयो[3] नयो भयम् ।
नारी प्रिया नरो नीप्रं नारं देयं द्वयो हयः ॥ ३७ ॥

वारं दिशा वरश्चेति प्रोक्ताः स्युर्वि[4]षनाडिकाः ।
कृत्तिकादिषु वाक्यान्ते चतस्रो नाडिकास्त्यजेत् ॥ ३८ ॥

अर्धप्रहारमपि वेसरमन्दगीतैः शम्भुर्गुरुः पथि जनैर्यमकण्टकं च ।
साक्षाच्छिवं गुरुपदै[5]र्गुलिकं च विद्यात् सूर्यादिवारदिवसाष्टमभागयुक्त्या ॥

ब्रह्माण्याद्यास्तु योगिन्यः पार्थरम्भाम्बुशान्तिदैः ।
वेद्याः प्रागादिरव्यादिवह्निदुर्गादिकं तिथौ ॥ ४० ॥

भूपरिग्रहयात्रादौ शिलास्वीकरणादिषु ।
योगिन्यभिमुखं यात्रां परिहृत्य व्रजेत् सदा ॥ ४१ ॥

अमावास्यादिकानां तु तिथीनां दशकत्रिके ।
तिथयो नन्ददिक्संख्यास्त्वाकाशं च रसातलम् ॥ ४२ ॥

आकाशे चापि पाताले शुभकर्म न कारयेत् ।
दोषानेतांस्तथान्यांश्च ज्योतिःशास्त्रविनिश्चितान् ॥ ४३ ॥

---

१. 'मनः । द्', २. 'क्यं', ३. 'यं चयो', ४. 'घ्न', ५. 'गं' ख. पाठः.

पञ्च दोषांश्च चक्रार्धं षडशीतिमुखं तथा ।
ग्रहणे विषुवे तद्वत् संक्रान्तीश्चायने त्यजेत् ॥ ४४ ॥
सर्वदोषवियुक्तं तु स्वतो न सुलभं दिनम् ।
लग्नं वातो बहुगुणं स्वल्पदोषं समाश्रयेत् ॥ ४५ ॥
दोषाणां शतसाहस्रं लग्नस्थः शमयेद् गुरुः ।
शुक्रः पञ्चसहस्राणि बुधः पञ्चशतानि च ॥ ४६ ॥
तस्माच्छुभे बलवति लग्नस्थे कर्षणादिकम् ।
कुर्यात् स्थानविवृद्ध्यर्थं कर्तुः कारयितुस्तथा ॥ ४७ ॥
सम्भवे शुभयोगानां कुर्वीत स्थापनादिकम् ।

तद्यथा —

मूलं द्वितीया चार्केण श्रोणा प्रतिपदिन्दुना ॥ ४८ ॥
कुजे तृतीयाहिर्बुध्न्यं कृत्तिकासु बुधेऽष्टमी ।
गुरावदितिपञ्चम्यौ चतुर्थ्यां भृगुफल्गुनी ॥ ४९ ॥
शनिः स्वातिश्च सप्तम्यां योगाः स्युरमृताः शुभाः ।
हस्तसौम्याश्विमैत्राणि पुष्यं पौष्णं च रोहिणी ॥ ५० ॥
सूर्यादिवारसंयुक्ताः सिद्धयोगाः शुभाः स्मृताः ।

उक्तं चान्यैः —

"ज्वलनपवनचित्रारेवतीवारुणानां
फणिहरनिर्ऋतीनामेकमेकं क्रमेण ।
यदि रविकुजयोर्वा योगमभ्येति नन्दा
स भवति परयोगः कर्मणां सिद्धिहेतुः ॥"

इति । तस्माच्चोदितमासपक्षतिथिकरणनक्षत्रवारादिवसयोगशुभग्रहांशकहोराद्रेक्काणनिरीक्षणोदयानां समस्तानां व्यस्तानां वा यथासम्भवं गुणवति काले कर्षणादीनि प्रतिष्ठान्तं कर्माणि विदध्यात् ।

इति देशकालाधिकारः ।

लिङ्गप्रतिष्ठामान्विच्छन् यजमानो गुणान्वितः ॥ ५१ ॥

न्यायोपार्जनसंशुद्धधनधान्यादिसाधनः ।
विशुद्धाशयमाचार्यं प्रोक्तलक्षणभूषणम् ॥ ५२ ॥
सम्पूज्य हेमवसनैर्गन्धैर्माल्यैः फलैरपि ।
वरयेत् तं प्रतिष्ठार्थं स्वानुकूलदिनोदये ॥ ५३ ॥
देवागारेऽथवा रम्ये नदीतीरे निवेश्य तम् ।
साधकैर्दीक्षितैर्वापि श्रेष्ठलक्षणलक्षितैः ॥ ५४ ॥
अष्टसंख्यैर्मूर्तिधरैः शुद्धैर्विप्रैः समन्वितम् ।
पाद्यादिभिस्तु धूपान्तं मन्त्रैरेभिस्तु पूजयेत् ॥ ५५ ॥

अत्र मञ्जर्यां —

"तानष्टमूर्तीनथ मूर्तिपांश्च सङ्कल्प्य सम्पूज्य यथाक्रमेण ।
मन्त्रैरमीभिः प्रणिपातपूर्वं सन्तोषयेदंशुकभूषणाद्यैः ॥"

इति ।

ओं

पृथ्वी धारयते लोकान् लोकाः पृथ्वीमयाः स्मृताः ।
सर्वगं पृथिवीरूपं पृथ्वीमूर्ते! नमोऽस्तु ते ॥ ५६ ॥

ओम्

अग्निर्धारयते लोकान् लोका अग्निमयाः स्मृताः ।
सर्वगं चाग्निरूपं ते अग्निमूर्ते! नमोऽस्तु ते ॥ ५७ ॥

ओम्

आत्मा यजति वै यज्ञैर्लोका यज्ञमयाः स्मृताः ।
सर्वगं यज्ञरूपं ते यज्ञमूर्ते! नमोऽस्तु ते ॥ ५८ ॥

ओं

सूर्यो धारयते लोकान् लोकाः सूर्यमयाः स्मृताः ।
सर्वगं सूर्यरूपं ते सूर्यमूर्ते! नमोऽस्तु ते ॥ ५९ ॥

ओं

जलं धारयते लोकान् लोका जलमयाः स्मृताः ।
सर्वगं जलरूपं ते जलमूर्ते! नमोऽस्तु ते ॥ ६० ॥

ओं

वायुर्धारयते लोकान् लोका वायुमयाः स्मृताः ।
सर्वगं वायुरूपं ते वायुमूर्ते ! नमोऽस्तु ते ॥ ६१ ॥

ओं

सोमो धारयते लोकान् लोकाः सोममयाः स्मृताः ।
सर्वगं सोमरूपं ते सोममूर्ते ! नमोऽस्तु ते ॥ ६२ ॥

ओं

व्योम धारयते लोकान् लोका व्योममयाः स्मृताः ।
सर्वगं व्योमरूपं ते व्योममूर्ते ! नमोऽस्तु ते ॥ ६३ ॥

एवं क्ष्माग्न्यात्मसूर्याम्बुवाय्विन्दुव्योमसंज्ञिताः ।
मूर्तयोऽष्टौ शिवस्योक्ता जगद्यन्त्रप्रवर्तिकाः ॥ ६४ ॥

शर्वो रुद्रः पशुपतिरीशानश्च तथा भवः ।
उग्रश्चैव महादेवो भीमश्चेत्यष्ट मूर्तिपाः ॥ ६५ ॥

एवं क्षित्यादिशर्वादिमूर्तिमूर्तीश्वरात्मकान् ।
अभ्यर्च्य ब्राह्मणानष्टौ गन्धपुष्पाम्बरादिभिः ॥ ६६ ॥

आचार्यं च विशेषेण सम्पूज्याभिप्रणम्य च ।
ततस्तु वरयेदेतान् यजमानः प्रसन्नधीः ॥ ६७ ॥

शिवलिङ्गप्रतिष्ठार्थमाचार्यं त्वामहं वृणे ।
एभिर्मूर्तिधरैः सार्धं प्रसादं कुरु मे विभो ! ॥ ६८ ॥

इत्युक्त्वा यजमानस्तान् प्रणम्य वरयेच्च ते ।
आचार्यसहिता ब्रूयुर्यजमानं तथास्त्विति ॥ ६९ ॥

ततः सङ्कल्पिते देशे स्वानुकूलदिनादिके ।
भूमेः प्राकारसीमान्तं ज्ञात्वा कुर्यात् परिग्रहम् ॥ ७० ॥

तद्यथा —

चतुरश्रं चतुर्हस्तं चतुःस्तम्भं तु मण्टपम् ।
प्रासादगर्भादैशान्यां कृत्वा कुण्डं च शोभनम् ॥ ७१ ॥

द्वाराणीष्ट्वा प्रविश्यान्तः कुण्डे त्वाधाय पावकम् ।
हुत्वाज्यं संहितामन्त्रैर्लोकेशास्त्राह्वयैरपि ॥ ७२ ॥

अघोरास्त्रेण च पुनः सहस्रं शतमेव वा ।

अथ मण्डपमध्ये पञ्चकोष्ठेषु मध्ये पद्मं दिक्षु स्वस्तिकचतुष्टयं चालिख्य तेषु पञ्च कुम्भान् सप्तधान्योपरि संस्थाप्य यथाविधि तीर्थजलैरापूर्य तेषु हिरण्यरत्नगन्धपुष्पाक्षतप्रशस्तौषधीर्निक्षिप्य बिल्वाश्वत्थादिपञ्चपल्लवकुशकूर्चफलवदनान् सवसनमाल्यालङ्कृतकण्ठान् साङ्गमूलासनादिक्रमेणावाहितशिवान् यथावदभिपूज्य तेषामैशान्यां कृतमण्डलपीठपङ्कजे सप्तधान्योपरि शिवकुम्भं विधिवत् प्रतिष्ठाप्यापूर्यालङ्कृत्य तस्मिन्नपि साङ्गं शिवं चलाचलासनमावाह्याभ्यर्च्य वहिस्थं शिवं साङ्गं कुम्भजलेष्वायोज्य प्रासादगर्भमध्ये कुम्भजलैरीशानेनाप्लाव्य पूर्वदक्षिणपश्चिमोत्तरप्रासादसीमासु पूर्वादिकुम्भजलैः पुरुषादिभिराप्लाव्य स्वीकृतवास्तोर[1]भिपदस्थानमुदङ्मुखेन शिल्पिना कुन्दालेन खानयित्वा तन्मृदं वेणुवेत्रादिपिटकेनोद्धृत्य नैर्ऋतपदे सप्तकृत्वः प्रक्षिप्य कुम्भावशिष्टाम्भसा खातमापूर्य शिष्टजलेन खनित्रादिकं संस्नाप्य स्नातस्याहताम्बरस्य विप्रस्य शिरसि स्कन्धे वा शिवकुम्भमुद्धृत्य निधायानेकजनसाक्षिकं गीतवाद्यवेदघोषपुरस्सरं प्राकारपूर्वसीमान्तं कुम्भं नीत्वा तत्र क्षणमात्रं स्थित्वा तस्मादाग्नेयादिदिक्षु प्रदक्षिणवृत्त्या क्रमादीशान्तं कुम्भं परिभ्रम्य सीमाकोणचतुष्टये शङ्कुचतुष्टयं संस्थाप्य रात्रौ भूतक्रूरेण भूतेभ्यो बलिं दिक्षु विकीर्याचार्यस्तत्र[2]स्थानि भूतान्यन्यत्र[3] निवासायानेनप्रस्थापयेत् ।

ओं भूतराक्षसा यक्षाः पिशाचा ब्रह्मराक्षसाः ॥ ७३ ॥
ये चान्येऽत्रावतिष्ठन्ते सर्वे तेऽन्यत्र यान्त्वतः ।
अद्यप्रभृति यत् स्थानमिदं देवस्य शूलिनः ॥ ७४ ॥

ओं हः हुं फड् इति भूतवर्गं प्रस्थाप्य प्रतिष्ठमानानां तेषां बलिं पुनर्विकीर्य प्रभातायां रजन्यां सुमुहूर्ते कर्षणं विदध्यात् । तद्यथा —

कपिलैर्वा वृषैः शुक्लैर्बलिभिर्लक्षणान्वितैः ।
क्षीरवृक्षयुगैर्युक्तैः खदिरासनलाङ्गलैः ॥ ७५ ॥
स्नातैर्नवाम्बरैः पुंभिस्तैश्च सर्वैरलङ्कृतैः ।
गुरुस्तल्लाङ्गलं स्पृष्ट्वा त्वजातेनाभिमन्त्रयेत् ॥ ७६ ॥
ततः प्राचीनरेखाभिः कर्षणं तैः प्रवर्तयेत् ।
जपित्वा वामदेवेन सप्त धान्यानि वापयेत् ॥ ७७ ॥

---

१. 'भिसुपस्था', २. 'न्त्र', ३. 'त्र वा' क. पाठः.

जलैरघोरेणासिच्य रक्षामीशेन कल्पयेत् ।
तानि सस्यानि पक्वानि गोभिर्वक्रेण घासयेत् ॥ ७८ ॥

अथात्र मञ्जर्याम् —

"भूयस्तत्र निधाय गोनिवसनं नीत्वा च संवत्सरं
मुद्गादीनि पुनश्च तत्र निवपेद्धान्यानि पूर्वक्रमात् ।
भूयस्तान्यथ भक्षयेच्च पशुभिः शुद्धे मुहूर्ते ततः
खात्वा शल्यविमोचितामतिदृढां भूयो विदध्यान्महीम् ॥"

इति ।

कर्षणाधिकारः ।

यावत् प्रासादसीमान्तं तावत् कृत्वा समं भुवम् ।
दर्पणोदरसंकाशां विलिप्तां गोमयाम्बुभिः ॥ ७९ ॥
शङ्कुना दिक्परिच्छेदं विधायात्रोदितक्रमात् ।
शङ्कून् पुन्नागनागादिदृढशस्ततरूद्भवान् ॥ ८० ॥
हस्तायतांश्चतुर्थांशपरिणाहान् सुवर्तुलान् ।
नवसंख्यांस्तु गन्धाद्यैः पूजितान् मध्यमादितः ॥ ८१ ॥
न्यसेदैन्द्रादिदिक्ष्वष्टावग्न्यादिष्विति केचन ।
शङ्कून् प्रासादसीमासु विन्यस्य प्रथमं गुरुः ॥ ८२ ॥
ताडयेल्लोहकूटेन मुद्गरेणाथवा समम् ।
नाश्मना न च काष्ठेन ताडयेद् दोषकृद् यतः ॥ ८३ ॥
अष्टमङ्गलसंसिद्ध्यै प्राङ्मुखोऽष्टैव ताडयेत् ।
ततः शिल्पी यथेष्टं तु शङ्कून् कूटेन ताडयेत् ॥ ८४ ॥
सहसा प्रविशेच्छङ्कुर्न विशेद् वात्र विघ्नकृत् ।
शनैर्विशेदृजुः शङ्कुः कर्मसिद्धिं तदा वदेत् ॥ ८५ ॥
भिन्ने शीर्णेऽथवा रुग्णे तस्य पुत्रस्य वा मृतिः ।
पूर्वादिदिक्षु प्रणते धनं चाग्निभयं मृतिम् ॥ ८६ ॥
धनक्षयं भयं रोगवृद्धिं सौख्यं च निर्दिशेत् ।
अविशीर्णोच्छ्रितशिखे स्थानवृद्धिं समादिशेत् ॥ ८७ ॥

कार्पाससूत्ररज्जुः स्यात् प्रशस्ता सुदृढा समा ।
शाणी कौश्यथवा मौञ्जी तया सूत्रं प्रसारयेत् ॥ ८८ ॥

रेखा सूत्रानुगा कार्या स्फुटं हेमशलाकया ।
राजत्याप्यथवा दध्नाप्यक्षतैर्वा यथादिशम् ॥ ८९ ॥

नियुक्तः सूत्रपाते यो यजमानोऽथवा परः ।
निर्विकारौ यदा स्यातां निःशल्यां भुवमादिशेत् ॥ ९० ॥

कण्डूयनादिविकृतौ शल्यमस्तीति निर्दिशेत् ।
श्वसृगालाजगोश्वादीन् सहसैव तदागतान् ॥ ९१ ॥

यदि पश्येदधस्तत्र शल्यमस्तीति निर्दिशेत् ।

तद्यथा —

शिरःकण्डूयने शिरसोऽस्थि तालद्वयखाते, मुखस्पर्शे काष्ठं कपालं वा द्विहस्ते, ग्रीवायां लोहशृङ्खला करत्रये, अंसयोर्बाह्वोर्वा सार्धहस्तद्वये तदस्थि, प्रकोष्ठयोर्जानुमात्रे खट्वापादः कपालमस्थि वा, कटिमात्रे कटिस्पर्शे लोहम्, ऊर्वोरस्थि दारु वा तन्मात्रे, उरोहृदयाभ्यां तावति तदस्थि, जान्वोर्हस्तमात्रे स्तम्भः, जङ्घयोर्नापितोपस्करं जङ्घास्थि वा, पद्भ्यां कुञ्जरास्थि, अङ्गुष्ठे घटिका रीतिका वा, अङ्गुलिष्वश्वपादः सार्धताले कांस्यं वा, मिश्रचेष्टाभिः शल्यमपि विमिश्रं ब्रूयात् । मार्जारलङ्घने रभसास्थि(?) तत्प्रमाणे, शुना गवास्थि, अजेनाजं शौनं वास्थि, अश्वेन माहिषं, माहिषेण जाम्बुकं, जाम्बुकेन वाराहं, वाराहेण वैयाघ्रं, वैयाघ्रेणैभम्, इभेन नारं, नारेण गार्दभं, गार्दभेनाजं, सूत्रलङ्घनेन क्षेत्रप्रवेशेन वा दर्शनेन तत्कीर्तनेन चाप्येवं ब्रूयात् । भस्मतुषाङ्गारादीनि पक्षिणां प्रवेशान्निर्दिशेत् ।

एवमादिशल्येष्वनुद्धृतेष्वेव देवालयगृहादिकं यदि कुर्यात् तत्र देवतायाः सान्निध्यहानिः कर्तुश्च तद्वंश्यानामनभ्युदयात्ययरोगप्रवासनैर्धन्यविनाशपरिक्लेशादयो दोषा भवन्ति । तानि ग्रन्थगौरवभयान्न विविच्योच्यन्ते । अथ शोभनानि च शल्यानि भवन्ति । अत्र यथा ब्रह्मशम्भुः —

"जीवन्मत्स्यस्तु धान्यार्ष्टिं कूर्मो योगं प्रवर्तयेत् ।
नित्यं श्रियं च मण्डूको मूषिको धर्मशीलताम् ॥"

अपिच,

मत्स्यमण्डूककूर्मांश्च सुवर्णं पारतं मणीन्।
खातान्नास्युद्धरेत् तस्मादुद्धरेच्चेदनर्थकृत् ॥ ९२ ॥

इति शल्योद्धाराधिकारः।

अथात्र शल्यमुद्धृत्य वास्तुपूजां प्रवर्तयेत् ॥ ९३ ॥

अत्र ब्रह्मशम्भुः—

"वास्तुर्वस्तुतनुर्दैत्यः कोपजो दैत्यमन्त्रिणः।
श्रूयते वास्तुविद्यासु तथापि च शिवागमे ॥"

इति।

पुरा सुरासुरे युद्धे पुरन्दरमुखैः सुरैः।
विष्णोः प्रभावभून्नैव भग्ना नेशुः पुरासुराः ॥ ९४ ॥
गुरुर्भृगुसुतस्तेषां संरम्भाद् भृशकोपनः।
जुहाव हव्यं हव्याशे छागं चैकं सलक्षणम् ॥ ९५ ॥
स्वेदाम्भो जुह्वतस्तस्य यत् पपात हविर्भुजि।
तत्तेजसा स तु च्छागश्छागवक्त्रोऽसुरोऽभवत् ॥ ९६ ॥
भूमिं दिवं च सञ्छाद्य भैरवाभोगवर्ष्मणा।
उदतिष्ठन्मुनिश्रेष्ठं किं करोमीति चाब्रवीत् ॥ ९७ ॥
तमाबभाषे भृगुजो जृम्भमाणं भयानकम्।
विबुधानबुधप्रज्ञान् भ्रंशयेथास्त्रिविष्टपात् ॥ ९८ ॥
इत्युक्तस्तर्जयन् नादैर्निर्गच्छन्द् स्वमुखानलैः।
भर्जयन्निव लोकांस्त्रीन् निर्जरानभ्यधावत ॥ ९९ ॥
ऋ(षभो ? भवो)ऽपि भयात् तस्य विभावैर्भ्रंशितैः स्वकैः।
अभिजग्मुर्विभुं शम्भुमभयं भूतिभूषणम् ॥ १०० ॥
भवोऽप्यभयदस्तेषां भार्गवाभिभवाद् भृशम्।
भग्नानां भूतयेऽथाक्ष्णस्तृतीयादग्निमुत्थितम् ॥ १०१ ॥
आदिशद् भूतरूपं तद् भस्मीकृत्य भृगोः सुतम्।
ततश्छागासुरं क्रूरं प्रवृद्धं दग्धुमर्हसि ॥ १०२ ॥
इत्युक्तः काप्यसक्तोऽग्निरभिदुद्राव भार्गवम्।
विप्रद्रुतो भयात् सोऽपि बभ्राम भुवनत्रयम् ॥ १०३ ॥

न लेभेऽभयदं कञ्चिदृते भासितभूषणात् ।
ततस्तनीयसीं कृत्वा तनुं स्वां योगशक्तितः ॥ १०४ ॥

विवेश शर्मणे शम्भोः श्रवणेन शिवां तनुम् ।
स तस्योदरमाविश्य शङ्करस्य शिवङ्करम् ॥ १०५ ॥

ददृशे च जगद्विश्वं विश्वस्तं च समाश्वसत् ।
देवोऽपि दिव्यदर्शी तं निशम्य शरणागतम् ॥ १०६ ॥

अविस्मयः स्मयन्नाहायुगाक्षस्तु योगिनम् ।
मा भैर्भार्गव! तुष्टोऽहं नयबुद्ध्यानया तव ॥ १०७ ॥

अशोषितोऽसि पुत्रो मे निर्गच्छ स्वेच्छया ह्यतः ।
अग्र्यं ग्रहपदं दत्तं तदैश्वर्यं महत् तव ॥ १०८ ॥

नयानयौ तथा वर्षमवर्षं च जगत्त्रये ।
प्रवर्तयेथाः सततमित्युक्त्वा तं त्रिलोचनः ॥ १०९ ॥

असृजच्छुक्लमार्गेण शुक्रोऽभून्नामतस्ततः ।
अथ शुक्रः प्रणम्येशं विज्ञायेष्टं व्यजिज्ञपत् ॥ ११० ॥

कृतार्थोऽनुगृहीतोऽस्मि धन्यः कोऽन्यतरो मया ।
यदेवं देवदेवेन प्रसादादभिनन्दितः ॥ १११ ॥

इत्युक्त्वा प्रणतं प्रीतः शुक्रं वक्रेन्दुशेखरः ।
वरमन्यं वृणीष्वेति सोऽब्रवीद् ब्राह्मणं विभुः ॥ ११२ ॥

सोऽपि वव्रे वरं तत्र त्रस्तं छागासुरं पुरा ।
पुरारेः पातयन् पश्चामभयं तस्य भूतये ॥ ११३ ॥

अथाधोवदनं दैत्यं दण्डवत् पतितं क्षितौ ।
प्राह प्रसन्नः सन्नं तेऽभयं दास्मि वरं च यत् ॥ ११४ ॥

वाञ्छितं छाग! तत् तुभ्यमित्युक्तः शम्भुनासुरः ।
व्यजिज्ञपद् यदज्ञानान्मयेश! दुरनुष्ठितम् ॥ ११५ ॥

क्षन्तुमर्हसि तत् क्षमायां वसेयं त्वत्प्रसादतः ।
अविरोधेन देवानां वरमेतत् प्रयच्छ मे ॥ ११६ ॥

मयि ब्रह्मादयो देवा वसन्तः सन्तु पूजिताः।
श्रुत्वैतच्छूलहस्तोऽपि प्राह वस्तुं वरं त्वया॥ ११७॥

वृतोऽहं यत् ततो नाम्ना वास्तुपोऽसि तथास्तु ते।
वसेर्धातोर्निवासार्थादावस त्वं वसुन्धराम्॥ ११८॥

वसन्तु च त्वयि प्रीताः शतानन्दादिदेवताः।
अद्यप्रभृति भूलोके दैवं वान्यच्च मानुषम्॥ ११९॥

कुर्वते वास्तु वासार्थं प्रथमं त्वां यजन्तु ते।
पुष्पैश्च धूपदीपैश्च बलिभिश्च विलक्षणैः॥ १२०॥

त्वं च त्वद्देहसंस्थाश्च पूज्याः स्युर्देवताः क्रमात्।
एवं मयैव विहितं कुर्वतां वास्तुपूजनम्॥ १२१॥

तदायतनवेश्मादौ वसतां सन्तु सम्पदः।
अकृत्वा वास्तुयजनं प्रासादभवनादिकम्॥ १२२॥

कृतं तदासुरं सर्वं भूयात् तत्र च यत् कृतम्।
इति दत्त्वा वरं देवः शुक्रवास्तुपयोः पृथक्॥ १२३॥

वस्तुं देवान् नियुज्यास्मिंस्तत्रैवान्तरधीयत।
यद्देशादिङ्मुखं शम्भोः प्रणतः पातितोऽसुरः॥ १२४॥

शुक्रेण देवैरुषितं तद्देशाभूद् विभोर्वरात्।
तथैवाधोमुखोऽद्यापि वास्तुरीशानदिक्छिराः॥ १२५॥

प्रसार्य पादौ नैर्ऋत्यामधिशेते स्म काश्यपीम्।

इत्थं हि वास्तोष्पतिना पुरेशाल्लब्धं वरं तद् यदभूदभीष्टम्।
इष्टो विमानादिविधावतस्तद्यज्ञः सुराणामपि मानवानाम्॥ १२६½ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
देशकालकर्षणशल्योद्धारवास्तूत्पत्तिविधि-
पटलः षड्विंशः।

अथ सप्तविंशः पटलः।

अत्रास्य पूजां विदधीत वास्तौ वास्तोष्पतेस्तद्गतदेवतानाम् ।
तन्नामभिश्चाप्यथ वक्ष्यमाणैर्द्रव्यैर्यथावच्च बलिं विकीर्य ॥ १ ॥

उद्दिष्टदेशे नवगोमयाम्भस्सेकोपलिप्ते चतुरश्रमादौ ।
कृत्वाष्टधा तद् विभजेदथैवमुक्तं चतुष्षष्टिपदं तु तत् स्यात् ॥ २ ॥

तस्मिन् विभक्ते नवधा तु सूत्राण्यास्फाल्य शालीयकपिष्टमिश्रम् ।
एकोत्तराशीतिपदं तदुक्तं देवालयानामपि भूमिपानाम् ॥ ३ ॥

कृत्वा चतुष्षष्टिपदं तु तस्य कोणेषु सूत्रे विनिवेश्य तस्मिन् ।
मध्ये पदानां हि चतुष्टये स्याद् ब्रह्माभिपूज्यस्तदनन्तरं च ॥ ४ ॥

प्राक् कोष्ठयुग्मे स मरीचिनामा याम्ये विवस्वान् वरुणे च मित्रः ।
महीधरः सौम्यपदद्वयस्थः कोणार्धयुग्मेषु वदामि देवान् ॥ ५ ॥

सावित्रः सविता च वह्निहरिति स्यातां पदार्धे गता-
विन्द्रश्चेन्द्रजयश्च राक्षसदिशि ख्यातावथो मारुते ।
रुद्रो रुद्रजयस्तथेशदिशि चाप्यापापवत्साह्वयौ
बाह्ये कोणचतुष्टयेऽपि च पुनर्वक्ष्यामि देवाष्टकम् ॥ ६ ॥

शर्वः स्कन्दोऽर्यमाह्वश्च जम्भकः पिलिपिञ्जकः ।
चरकी च विदारी च पूतना पापराक्षसी ॥ ७ ॥

अथ प्रान्तचतुष्पादीद्वात्रिंशत्कोष्ठदेवताः ।
प्रागादिक्रमशो ज्ञेयाश्चतुर्धैव चतुर्दिशम् ॥ ८ ॥

प्राच्यामीशानपर्जन्यजयन्तेन्द्रार्कसत्यकाः ।
भृशान्तरिक्षावित्यष्टौ देवताः स्युः प्रदक्षिणम् ॥ ९ ॥

अग्निः पूषाथ वितथो यमश्च गृहरक्षकः ।
गन्धर्वभृङ्गराजौ च मृगाख्योऽपि च दक्षिणे ॥ १० ॥

निर्ऋतिर्दौवारिकश्च सुग्रीववरुणावपि ।
पुष्पदन्तासुरौ शोषः पापयक्ष्मा च पश्चिमे ॥ ११ ॥

मारुतो नागमुख्यौ च भल्लाटश्च निशाकरः ।
अर्गलश्च दितिस्तद्वददितिश्चोत्तरास्थिताः ॥ १२ ॥

ईशानेऽस्य शिरो निवेशितमभूद् वास्तोष्पतेर्मारुते
वह्नौ चापि करद्वयं पदयुगं नक्तञ्चरे स्थापितम्।
पर्जन्यो नयनेऽदितिश्च वदनेऽस्यापापवत्सौ गले
कर्णे चापि दितिर्जयन्तसहिताविन्द्रार्गलावंसयोः ॥ १३ ॥

सूर्यश्चापि निशाकरश्च भुजयोर्भल्लाटसत्यादिभिः
सावित्रश्च तथैव रुद्रसहितस्तत्पार्श्वयोः संस्थितौ।
नाभौ स्याच्चतुराननोऽस्य कुचयोर्भूभृन्मरीचिस्तथा
मित्रश्चापि विवस्वता तदुदरे गुह्येन्द्रकश्चापरः ॥ १४ ॥

ऊर्वोरस्य तु जङ्घयोश्च निहिता गन्धर्वपूर्वाह्वयो
दौवारः सुगलस्तथैव वरुणः शिष्टास्तु पार्श्वस्थिताः।
एतस्माद् गर्भविन्यासं वास्त्वङ्गेषु न कारयेत्।
अज्ञानाद् वा यदा कुर्यात् तदा सर्वविनाशकृत् ॥ १५ ॥

ईशानपूजा तु घृताक्षताद्भिः पर्जन्यकस्योत्पलगन्धतोयैः।
पीता जयन्तस्य भवेत् पताका रक्तान्नदीपैश्च यजेन्महेन्द्रम् ॥ १६ ॥

सूर्यस्य पीतान्नवितानकाभ्यां सत्यस्य साज्येन तथौदनेन।
गोधूमकान्नेन भृशस्य पूजा कार्यान्तरिक्षस्य तु मांसमाषैः ॥ १७ ॥
अग्निं स्रुचाभ्यर्च्य तथैव लाजैः पूषाख्यमिष्ट्वा वितथं च हेम्ना।
मध्वोदनाभ्यां गृहरक्षकाख्यं मांसौदनाभ्यां यममर्चयेच्च ॥ १८ ॥
गन्धर्वमिष्ट्वा कुसुमैः सगन्धैः स्यात् पक्षिजिह्वा त्वथ भृङ्गराजे।
पूजा मृगस्यापि तिलैर्यवैर्वा सिद्धं निर्ऋत्यै कृसरं यथावत् ॥ १९ ॥

दौवारिकं शोभनदन्तकाष्ठैः सुग्रीवमिष्ट्वा तु यवैः सधूपैः।
स्तम्बैः कुशानामपि पुष्पदन्तं तद्वज्जलेशं सितपुण्डरीकैः ॥ २० ॥

मध्वक्षताभ्यामसुराय पूजा शोषाय चान्नं घृतमिश्रितं स्यात्।
नीवारकान्नं त्वथ पापयक्ष्मण्याज्येन वायोरपि मण्डकाः स्युः ॥ २१ ॥

नागप्रसूनैरपि नागपूजां कुर्यात् तु मुख्याय तु मोदकैश्च।
भल्लाटसंज्ञस्य समुद्गमन्नं सोमाय राज्ञे मधुपायसाज्यम् ॥ २२ ॥

शाल्यक्षतैरर्गलमर्चयित्वा संरक्तशाल्यन्नघृतैर्दितिं च ।
माषान्नभक्ष्यैरदितिं यथावद् द्वात्रिंशदित्थं क्रमशोऽर्चयित्वा ॥ २३॥
आपस्तु दुग्धेन तथापवत्सः पूज्यस्तु दध्ना घृतलड्डुकैश्च ।
सावित्रमिष्ट्वा तु कुशैर्गुलान्नैस्तथा सवित्रे यजनं विदध्यात् ॥ २४ ॥
हारिद्रमन्नं सघृतं तथेन्द्रे शुद्धान्नमेवेन्द्रजयाय शस्तम् ।
रुद्राय मांसं विहितं तु पक्वं मांसं तथा रुद्रजये त्वपक्वम् ॥ २५ ॥
अथाभिपूज्याः समरीचिकाद्यास्ते लड्डुकालोहितशुक्लभक्तैः ।
तथैव माषैः-सघृतैर्यथावत् स्वस्वप्रदेशे विधिवत् क्रमेण ॥ २६ ॥
ब्रह्माणमाज्याक्षतपञ्चगव्यैः पुष्पैः सगन्धैश्चरुणा तिलैश्च ।
सम्पूज्य तु प्राग् घृतपायसेन शर्वाह्वयं स्कन्दमथो यजेत ॥ २७ ॥

याम्येऽर्यम्णे समांसाज्यं ततः पीतस्रगामिषे ।
जम्भकाय तु वारुण्यां पिलिपिञ्जाय चोत्तरे ॥ २८ ॥

सान्द्रलोहितपुष्पान्नैर्बलिमित्थं प्रदापयेत् ।
मांसौदनघृतापूपैरैशान्यां चरकीबलिः ॥ २९ ॥

बाह्ये पित्तेन मांसेन विदार्यै वह्निदिग्बलिः ।
पूतनायास्तु राक्षस्यां दधिरक्तोदनैर्दिशि ॥ ३० ॥

क्षीरपित्तास्थिरक्तान्नैर्वायव्यां प्राप्य राक्षसीम् ।
यजेत् सर्वान् स्वनाम्नैव नमोन्तं सोपचारकम् ॥ ३१ ॥

बाह्ये त्वष्टविधेभ्योऽथ भूतेभ्यो बलिमाहरेत् ।
प्रत्येकमुक्तद्रव्याणामलाभे कुसुमाक्षतैः ॥ ३२ ॥

सुगन्धधूपदीपैश्च शुद्धान्नेन स्मृतो बलिः ।
स्वैर्नामभिस्तु प्रणवादियुक्तैर्नमोन्तकैरर्चनमेषु कृत्वा ।
पञ्चोपचारैर्निशि शुक्लवासा विशुद्धभावस्तु बलिं प्रदद्यात् ॥ ३३ ॥
इत्थं वास्तुशरीरस्था देवताः सम्यगर्चिताः ॥ ३४ ॥

तत्तत्कर्मसु संसिद्धिं प्रयच्छन्ति च शान्तिकम् ।

एकाशीतिपदेषु पूर्ववदमुं विन्यस्य वास्तोष्पतिं
मध्ये तस्य तु वेधसं नवपदेष्वभ्यर्च्य तद्बाह्यतः ।

कोणेष्वत्र पदद्वयेष्वधिगताः सावित्रपूर्वाः सुरा-
स्तन्मध्ये समरीचपूर्वकसुराश्चत्वार उक्ताः क्रमात् ॥ ३५ ॥
पूर्वाद्यासु दिशासु बाह्यवृतिका एकैककोष्ठास्थिता
द्वात्रिंशत् पृथगीशपूर्वकसुराः पूज्याः पुरोवत् क्रमात् ।
बाह्येऽन्याः पदवर्जितास्तु चरकी चैशे विदार्यानिले
कोणे रक्षसि पूतनाथ पवनस्याशागता राक्षसी ॥ ३६ ॥
शर्वस्कन्दादिचत्वारः पदव(र्ज्य ? र्जं) बहिःस्थिताः ॥ ३७ ॥
प्राग्याम्यवरुणाशासु कौबेर्यां च क्रमाद् यजेत् ।
अनयोर्मार्गयोरेकमाश्रित्यावाह्य वास्तुपम् ॥ ३८ ॥
तदङ्गपदगाश्चापि देवताः क्रमशोऽर्चयेत् ।

वास्तुपूजाधिकारः ।

इत्थं सम्पूज्य वास्त्वीशं ब्राह्मणांस्तत्र भोजयेत् ॥ ३९ ॥
लिङ्गिनश्च यथाशक्ति शिल्पिकर्मकरानपि ।
ततः प्रासादसीमान्तं स्थलं यत् तदशेषतः ॥ ४० ॥
उद्बाहुनरमात्रं तु खात्वोद्धृत्य त्यजेन्मृदम् ।
जलान्तं शर्करान्तं वा खानयेदिति केचन ॥ ४१ ॥

अत्र प्रतिष्ठापद्धतौ —

"शर्करान्तं जलान्तं वा खानयेद् देवसद्मनि ।
पुरुषार्धं गृहे वाथ यावद् भूमिर्विशुध्यति ॥"

इति ।

खातं सम्प्रोक्ष्य चास्त्रेण पूर्वमष्टाङ्गुलं मृदा ।
लोष्टाद्यदुष्टयापूर्य शुद्धया चाविवर्णया ॥ ४२ ॥
ततस्तु वृत्तपाषाणैर्मृज्जलान्तरितं क्रमात् ।
हस्तप्रमाणमास्तीर्य सिकताभिर्मृदा पुनः ॥ ४३ ॥
आप्लाव्य सलिलेनाथ गजैराक्रामयेत् स्थलम् ।
प्रशस्ततरुसम्भूतैर्हस्तिपादैर्दृढैः समम् ॥ ४४ ॥

आकोट्याघर्षयेच्चैव सुदृढं चिनुयात् स्थलम् ।
वेदांशशेषिते खाते स्थापयेत् प्रथमेष्टकाम् ॥ ४५ ॥

प्रासादादुत्तरे कृत्वा मण्डपं चतुरश्रकम् ।
चतुर्द्वारं चतुस्तम्भं चतुस्तोरणभूषितम् ॥ ४६ ॥

कृतनित्यक्रियः स्नातो गुरुर्मूर्तिधरैर्युतः ।
सामान्यार्घ्यकरः पश्चाद् द्वारे द्वाराधिपान् यजेत् ॥ ४७ ॥

अस्त्रं क्षिप्त्वा प्रविश्यान्तः पुण्याहं तत्र वाचयेत् ।
शुद्धात्मस्थानमन्त्रस्तु ज्ञानखड्गधरो गुरुः ॥ ४८ ॥

पञ्चगव्यविशेषार्घ्यप्रोक्षितद्वारमण्डपः ।
वास्त्वीशपद्मजौ मध्ये प्राच्यां लक्ष्मीं गणेश्वरम् ॥ ४९ ॥

दक्षिणे पश्चिमे दुर्गां क्षेत्रेशं चोत्तरे यजेत् ।
विकिरक्षेपपूर्वं तु कुम्भास्त्रयजनादनु ॥ ५० ॥

कुम्भेषु लोकपालांश्च ध्वजेष्वस्त्राणि च न्यसेत् ।
शिवाज्ञां श्रावयेत् तेषां भोभोःशक्रादिमन्त्रतः ॥ ५१ ॥

अस्त्रकुम्भभ्रमादूर्ध्वं स्थिरे कुम्भास्त्रके यजेत् ।
संस्पृश्य मुद्रया कुम्भे ज्ञानखड्गं समर्पयेत् ॥ ५२ ॥

प्राच्यां वेदाश्रकुण्डेऽग्नावावाहितशिवे घृतम् ।
हुत्वा तु संहितामन्त्रैरिध्मं पञ्चाक्षरेण च ॥ ५३ ॥

तारादाघाराज्यभागौ पुनः पञ्चाक्षरैः पृथक् ।
स्वाहान्तैस्तारपूर्वैस्तु हुत्वाज्यं त्रिस्त्रिराहुतीः ॥ ५४ ॥

समिदाज्यचरूल्लाँजान् ब्रह्मभिः पञ्चभिः पृथक् ।
शतं शतं पृथग्घुत्वा शतं व्याहृतिभिर्घृतम् ॥ ५५ ॥

लोकपालास्त्रमन्त्रैश्च प्रत्येकं त्वाहुतिद्वयम् ।
नक्षत्रेभ्योऽथ भूतेभ्यो नागेभ्योऽपि सकृत् सकृत् ॥ ५६ ॥

विश्वेभ्यश्चापि सर्वाभ्यो देवताभ्यः स्वनामभिः ।
नमःस्वाहान्तकं हुत्वा पुनः पञ्चाक्षरेण तु ॥ ५७ ॥

हुत्वा व्याहृतिभिः पूर्णां स्विष्टकृत्पूर्विकां घृतम् ।
हुत्वा बलिं विकीर्यात्र जपेदेकादशात्मकम् ॥ ५८ ॥

पञ्चाक्षरं च तत्संख्यं ततः प्रासादभूतले ।
चतुरश्रे चतुष्कोष्ठे कोणसूत्रे प्रसार्य तु ॥ ५९ ॥

एकाशीतिपदं तत्र कृत्वा मर्माणि कल्पयेत् ।
सिराश्च वास्तोरङ्गानि तेषु न स्थापयेच्छिलाः ॥ ६० ॥

स्तम्भं प्राथमिकं वापि मर्मादिषु न विन्यसेत् ।
प्राक्सूत्रमूर्ध्ववंशाख्यं वंशाः[1] स्युः कोणरज्जवः ॥ ६१ ॥

पार्श्ववंश उदक्सूत्रं सूत्राण्यस्य सिरा मताः ।
सन्धयस्तत्र मर्माणि पूर्वोक्तैर्वाङ्गकल्पना ॥ ६२ ॥

प्रथमेष्टकादिविन्यासे तानि परिहरणीयानीत्यतोऽङ्गानि वास्त्वीशस्य पुनरप्युच्यन्ते । तद्यथा — ईशाने शिरः पाणिद्वयमग्निमारुतयोः पर्जन्यदिती नयने मुखमापे आपवत्से कण्ठः कर्णयोरदितिः जयन्तार्गलयोरंसौ सूर्यसोमादयो भुजौ रुद्रः पृष्ठे सावित्रसवितारौ रोगशोषौ च प्रकोष्ठयोः ब्रह्मा नाभौ स्तनयोर्भूभृदर्यमणौ मित्रविवस्वन्तावुदरे इन्द्रेन्द्रजयौ गुह्ये पादद्वयं निर्ऋताविल्येतस्माद् वास्तुपुरुषस्याङ्गभूतानेतान् देवांश्च सिरा मर्माणि च परिहृत्य प्रथमेष्टकाः स्थापयेत् । तद्वत् प्रथमस्तम्भं मण्डपगृहादिषु स्थापयेत् ।
अत्र विश्वकर्मीये —

> "यद्यज्ञानात् प्रमादाद् वा वास्त्वङ्गे स्थापयेच्छिलाम् ।
> स्थाननाशो भवेत् कर्तुर्दुःखं मरणमेव वा ॥"

इति ।

द्वाराद् दक्षिणतस्तस्मादन्तरा भुजवंशयोः ।
पादावशिष्टे खाते तु स्थापयेत् प्रथमेष्टकाः ॥ ६३ ॥

---

[1] 'श्याः' क. पाठः

शिरःपृष्ठविभक्ताङ्ग्यो निर्दोषाः शुभलक्षणाः ।
करायतास्तदर्धं च विस्तृताष्टाङ्गुलोच्छ्रिताः ॥ ६४ ॥
सुपक्वा लोहितरुचः खण्डस्फोटादिवर्जिताः ।
नवसंख्यास्तु वा पञ्च कार्याः स्युः प्रथमेष्टकाः ॥ ६५ ॥
उत्तमोत्तमलिङ्गस्य प्रासादे चोत्तमोत्तमे ।
ऐष्टकोऽयं विधिः प्रोक्त उत्तमादिष्वथोच्यते ॥ ६६ ॥
अङ्गुलैः संख्यया दीर्घाः जगतीपङ्क्त्यनुष्टुभाम् ।
क्रमात् तदर्धविस्तारा विस्तारार्धसमुच्छ्रयाः ॥ ६७ ॥
उत्तमादिविमानानां निर्दिष्टाः प्रथमेष्टकाः ।
स्थूलमूलेष्टका स्त्री स्यादग्रस्थूला नपुंसकम् ॥ ६८ ॥
सर्वत्र समविस्तारस्थौल्या स्यात् पुरुषेष्टका ।
पुंसां पुमिष्टका शस्ता स्त्री स्त्रीणामिति केचन ॥ ६९ ॥
पुमिष्टकैव सर्वेषां सर्वाभिप्रायसिद्धिदा ।
शैले देवालये वा स्युः शैलेयाः प्रथमेष्टकाः ॥ ७० ॥
अथ मण्डपमध्ये तु स्थण्डिले शालिभिः कृते ।
दर्भैस्तारासने क्लृप्ते विन्यसेदिष्टकास्तु ताः ॥ ७१ ॥

तत्र सामान्यार्घ्येणेष्टकाः संप्रोक्ष्यास्त्रेण सन्ताड्य कवचेनोल्लिख्य मृद्भिः प्रक्षाल्य गोमयगोमूत्रपञ्चगव्यपञ्चामृतसुवर्णरत्नफलगन्धाम्बुभिर्जलधूपान्तरितैः संस्नाप्य गन्धैर्विलिप्य प्रत्येकं हेमकौतुकसूत्राभ्यां बद्ध्वा अहतवस्त्रैराच्छाद्य प्रोक्तस्थण्डिले यथादिशं संस्थाप्य त्रिखण्डं तासु भावयेत् । तत्र बुद्ध्यादिगन्धान्तं पुर्यष्टकं च पृथिव्यादिव्योमान्तं मूर्त्यष्टकं च शर्वादिभीमान्तं मूर्तिपाष्टकं च शिवविद्यात्मतत्त्वैश्च रुद्रविष्णुब्रह्मकारणेश्वरैः क्रमेण सहितं तत्तन्नामभिः प्रत्येकं प्रणवादिनमोन्तैः स्वनामभिः सचतुर्थिकैरिष्टकास्वष्टासु मूलमध्याग्रेष्वावाह्य विभाव्यार्चयेद् ओं बुद्धये नम इत्यादिगन्धान्तम् । ओं शिवतत्त्वाय नमः ओं शिवतत्त्वाधिपतये रुद्राय नमः इति प्रथमखण्डमूलेषु ओं पृथिवीमूर्तये नमः इत्यादि व्योमान्तमष्टौ ओं विद्यातत्त्वाय नमः विद्यातत्त्वाधिपतये विष्णवे नम इति मध्येषु ओं पृथिवीमूर्त्यधिपतये शर्वाय नम इति भीमान्तम् ओम्

आत्मतत्त्वाय नमः ओम् आत्मतत्त्वाधिपतये ब्रह्मणे नम इत्यग्रेषु एवमिष्टकामूलमध्याग्राणि कुशास्त्रेण स्पृष्ट्वाथ मध्येष्टकायां सर्वतत्त्वसर्वमूर्तिमूर्तीश्वरत्रितत्त्वाधिपाय शिवाय नम इति विन्यस्यार्चयेत् ।

रक्षादर्भतिलैः परितो रक्षां विधायाथ कुण्डाग्र उपविश्य बुद्ध्यादिपृथिव्यादिशर्वादितत्त्वत्रयं तत्रेश्वरान् स्वनामभिस्तारादिसचतुर्थिकस्वाहान्तैराज्येन प्रत्याहुतित्रयेण सन्तर्प्य तच्छेषं पात्रे सम्पात्य इष्टकासु त्रिखण्डे तु सम्पातयेत् ।

अथ सान्निध्यार्थं तत्त्वसन्धानं कुर्यात् । ओम् आम् ईम् आत्मतत्त्वविद्यातत्त्वाभ्यां नमः । ओम् ईम् ऊम् विद्यातत्त्वशिवतत्त्वाभ्यां नम इति सन्धायाथेष्टकासंख्यातुल्यान् नव वा पञ्च वा ताम्रमयान् निधिकुम्भांस्त्रिमधुरापूर्णान् नवपक्षे सुभद्रविभद्रसुनन्दपुष्पदन्तजयविजयजयन्तपूर्णसंज्ञेष्वष्टसु कुम्भेषु पद्ममहापद्ममकरकच्छपमुकुन्दानन्तनीलशङ्खाख्यानष्टौ निधीनावाह्य मध्येऽनन्तकुम्भे शक्तिनिधियुक्ते लवणारूढमूलेनाधोऽनन्तमुपरि ब्रह्माणं चार्चयेत् । एतेषु निधिषु अष्टौ लोकपालानिन्द्रादीनावाह्याभ्यर्चयेत् । अथ पञ्चपक्षे धर्मज्ञानवैराग्यैश्वर्यसर्वसिद्धिसंज्ञकुम्भेषु नन्दाभद्राजयारिक्तापूर्णाख्यतिथिमत्सु पद्ममहापद्ममकरशङ्खसमुद्रसंज्ञपञ्चनिधीनावाह्य ब्रह्मादिपञ्चकारणेशान् पञ्चनिधिष्वावाह्य सम्यगभ्यर्च्य सर्वेष्वपि कुम्भेषु नवरत्नानि नववसुपञ्चरत्नानि च पञ्चपक्षे प्रक्षिप्य यथादिशं गर्तेष्वामुखात् प्रतिष्ठाप्यार्घ्यादिभिर्निधींश्च लोकपालान् वा कारणेशान् वार्चयेत् ।

अथेष्टकाः स्थण्डिलगताः क्रमादानीयोद्दिष्टमुहूर्ते निधिकुम्भानां मुखेषु तत्तन्निधिलोकपालनामभिस्तारादिनमोन्तैः पूर्वाग्रमुत्तराग्रं च संस्थापयेत् । प्रादक्षिण्येन पूर्वादीशान्तं मध्ये च पञ्चपक्षे पूर्वादुत्तरान्तं मध्ये च सर्वाश्च निम्नोन्नतविवर्जिताः सुसमाश्चिनुयात् । असमासु राष्ट्रभयं कर्तुः स्थानस्य च दुःखमावहेत् । इत्येतस्मात् सममेव संस्थाप्य शिवकुम्भाम्भसा ताः संस्नाप्य गन्धोदकेन गर्तमापूर्य प्रणवेनैकं पुष्पं प्रक्षिप्य तत् पश्येत् । प्रदक्षिणावर्ते चेच्छोभनं वामावर्ते होमजपदानैः शान्ति कुर्यात् । अथ यथोद्दिष्टं शिलाभिः इष्टकाभिर्वा स्थलस्य चयनमुद्दिष्टहस्तान्तमुच्छ्रितं कृत्वा समतलं विधायाचार्यमूर्तिधरशिल्पिनः सम्पूज्य निशि दर्भशय्यायां स्वप्नं दृष्ट्वाशुभस्वप्ने शान्ति कुर्यात् । शुभस्वप्ने पुनश्च वास्तुयागं कृत्वा गर्भन्यासं कुर्यात् ।

इति प्रथमेष्टकाधिकारः ।

अथ गर्भस्य विन्यासं कुर्यादायतनादिषु ।
बीजभूतो हि यस्तस्य प्रकृतिश्च समृद्धिदः ॥ ७२ ॥

इन्द्रपावकयोर्मध्ये द्वाराद् दक्षिणतो भुवि ।
कुर्वीरन् गर्भविन्यासं सर्वे वर्णाः समृद्धये ॥ ७३ ॥

प्रतेरुपरि विप्राणामुपानोपरि भूभुजाम् ।
विशां चाथ चतुर्थानां भूमावित्यपि केचन ॥ ७४ ॥

दृढां ताम्रमयीं फेलां कुर्याद् गर्भस्य भाजनम् ।

अत्र मञ्जर्याम् —

“अष्टाङ्गुलं चार्धसमुच्छ्रयं तत्पादोनमूर्ध्वे विहितोच्छ्रयं च ।
हस्तायतं पात्रमथोत्तमं स्यात् त्रैराशिकेनोच्छ्रयमत्र कल्प्यम् ॥”

इति ।

सपि[1]धानं तु तत् कुर्याद् घनं विंशतिभागतः ॥ ७५ ॥

विस्तारोऽस्य चतुर्थांशादुच्छ्रयः कोष्ठभित्तिषु ।
अथायामसमोत्सेधमुत्तमं त्विति केचन ॥ ७६ ॥
त्रिपादहीनं मध्यं स्यादधमं चार्धमुच्छ्रितम् ।
तृतीयांशं पिधानं स्यात् सर्वत्र च समं दृढम् ॥ ७७ ॥

प्रक्षाल्य पञ्चगव्येन पात्रं तत्रावटं हृदा ।
गोमयेनोपलिप्याथ पुण्याहमपि वाचयेत् ॥ ७८ ॥

अनन्तनागमालिख्य पिष्टेनास्य फणोपरि ।
विन्यस्य गर्भपात्रं तद् बाह्यतश्चतुरङ्गुलम् ॥ ७९ ॥

शालिभिः स्थण्डिलं कृत्वा तस्मिन् सागरमृत्स्नया ।
सप्तद्वीपार्णववतीं लिखेद् भूमिं सपर्वताम् ॥ ८० ॥

गर्भपात्रस्य मूलेऽन्तःक्लृप्ताभिकृतिकोष्ठके ।
मध्यकोष्ठे स्थितो ब्रह्मा वसुकोष्ठेषु तद्बहिः ॥ ८१ ॥

समरीचकसावित्रविवस्वच्छक्रमित्रकाः ।
रुद्रपृथ्वीधरौ तद्वदापवत्सश्च कोष्ठगाः ॥ ८२ ॥

---

[1] 'वि' क. पाठः.

तद्बाह्ये स्वरकोष्ठेषु स्थिताः षोडश देवताः ।

ते च—

ईशानश्च जयन्तश्च प्राच्यां सूर्यो भृशस्तथा ॥ ८३ ॥
अग्निर्वितथकीनाशभृङ्गराजाश्च दक्षिणे ।
पश्चान्निर्ऋतिसुग्रीववरुणाः शोष एव च ॥ ८४ ॥
वायुर्मुख्यश्च सोमश्चाप्यदितिश्चोत्तरे स्थिताः ।
वज्रमौक्तिकवैडूर्यशङ्खान् मरतकं तथा ॥ ८५ ॥
स्फटिकं च महानीलं प्रवालं च न्यसेत् क्रमात् ।
समरीचादिकेष्वष्टौ माणिक्यं ब्रह्मणि न्यसेत् ॥ ८६ ॥
यवान् मनःशिलां शालीहरिताले च पूर्वतः ।
नीवारमञ्जनं चैव तुवरं च प्रियङ्गुभिः ॥ ८७ ॥

दक्षिणे न्यसेदिति यावत् ।

श्यामाकं सीसकं माषान् सौराष्ट्रं पश्चिमे न्यसेत् ।
कुलस्थं रोचनां सौम्ये निष्पावं गैरिकं न्यसेत् ॥ ८८ ॥
सुवर्णं तारताम्रायस्त्रपुकूर्माम्बुजानि च ।
शूलं च दिक्षु कोणेषु तथाष्टौ विन्यसेत् क्रमात् ॥ ८९ ॥
खट्वाङ्गार्धेन्दुवृषभपिनाकाब्जपरश्वधान् ।
सौवर्णान् हरिणं चक्रं ब्रह्मस्थाने क्रमान्न्यसेत् ॥ ९० ॥
गिरितीर्थनदीनां च मृदस्तद्वद्ध्रदस्य च ।
पूर्वादिदिक्षु विन्यस्य ततः कार्कटकाद् बिलात् ॥ ९१ ॥
वल्मीकादम्बुधेः पाराद्[1] वृषशृङ्गाच्च मृत्तिकाः ।
गजदन्ताच्च वह्न्यादिकोणेषु विनिधाय तु ॥ ९२ ॥
वृषशृङ्गेभदन्तोत्थे मृदौ मध्ये तु विन्यसेत् ।
सरोजनीलोत्पलयोः कुमुदस्योत्पलस्य च ॥ ९३ ॥
तगरस्य च मूलानि दिक्षु मध्ये च विन्यसेत् ।
अथ सद्यादिभिर्दिक्षु समिदाज्यचरूंस्तिलान् ॥ ९४ ॥

---

[1] 'फालाद्' क. ख. पाठः.

मूर्तिपा जुहुयुर्द्वौ द्वौ जपेयुश्च विभागशः ।
मण्डपाद् दक्षिणे कुण्डे त्वावाहिताशिवेऽनले ॥ ९५ ॥

मन्त्रसंहितयाचार्यो हुत्वाज्यं त्रिस्त्रिराहुतीः ।
समिदाज्यचरूल्लाँजान् पृथगेकादशाहुतीः ॥ ९६ ॥

हुत्वा पञ्चाक्षरेणापि व्योमव्यापिदशाक्षरात् ।
अष्टात्रिंशत्कलाभिश्च ब्रह्मभिश्च सकृत् सकृत् ॥ ९७ ॥

हुत्वाज्यमथ रत्नानां बीजानां च सकृत् सकृत् ।
ओषधीनां च धातूनां मूलानां च मृदामपि ॥ ९८ ॥

लोकेशानां तथास्त्राणां द्वीपाब्धीनां दिशामपि ।
पातालानां च नागानां सर्वशब्दपुरःसरम् ॥ ९९ ॥

ताराद्यैर्नामभिः स्वैः स्वैः स्वाहान्तैः सचतुर्थिकैः ।
सर्वाहुतीनां शेषाज्यं पात्रे सम्पात्य तद् घृतम् ॥ १०० ॥

तारेण गर्भे प्रक्षिप्य तं ध्यात्वा पृथिवीमयम् ।
गन्धादिभिरथाभ्यर्च्य स्पृष्ट्वा पञ्चाक्षरं जपेत् ॥ १०१ ॥

रात्रावखण्डनक्षत्रे स्थिरराशौ गुणान्विते ।
तां फेलां पृथिवीं देवीं सप्तद्वीपार्णवान्विताम् ॥ १०२ ॥

चतुर्विधैर्भूतवर्गैर्जङ्गमाजङ्गमैर्युताम् ।
उद्दिष्टायतनादेस्तु बीजगर्भात्मिकां स्मरेत् ॥ १०३ ॥

ओं हां हां पृथिव्यै सर्वभूतधारिण्यै नमः ।

अनेनावाह्य सद्येन स्थापयेत् सोत्तरेण तु ।
साघोरेण निरुध्यैनां सवक्त्रेणाभिपूज्य तु ॥ १०४ ॥
सेशानेनावगुण्ठ्याथ गन्धाद्यैः पुनरर्चयेत् ।

ओं

सर्वभूतधरे! कान्ते! पर्वतस्तनमण्डिते! ॥ १०५ ॥
समुद्रवसने! देवि! वसुधे! गर्भमाश्रय ।

अनेन पूर्वोक्तमन्त्रान्तेन पृथिवीं स्थिरां फेलगतामभिमन्त्रयेत् । अत्र मञ्जर्याम् —

"उच्चार्यैवमिमं च मन्त्रमसकृद् ध्यात्वा महीमण्डलं
गोमूत्रेण परिप्लुते तु विधिवद् गर्भे निधायावटे ।
गर्भाधानमिमं प्रकल्प्य विधिवत् सन्तोष्य वित्तैर्गुरुं
प्रासादं सुदृढं च लक्षणयुतं कुर्यात् ततः शिल्पिभिः ॥"

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
वास्तुपूजाप्रथमेष्टकागर्भन्यासपटलः
सप्तविंशः ।

अथ अष्टाविंशः पटलः ।

अथात्र लिख्यते लक्ष्म प्रासादानां समासतः ।
देवादीनां नराणां च येषु रम्यतया चिरम् ॥ १ ॥

मनांसि च प्रसीदन्ति प्रासादास्तेन कीर्तिताः ।
नानामानविधानत्वाद् विमानं शास्त्रतः कृतम् ॥ २ ॥
पितामहेन मुनिभिर्मयेन च यथा पुरा ।
मुख्यादीनि विमानानि कथितान्यनुपूर्वशः ॥ ३ ॥

यानि तान्यत्र कथ्यन्ते देवादीनां समासतः ।
तत्रेशब्रह्मविष्णूनां मुख्यानां मुख्यविंशतिः ॥ ४ ॥

जातीतराणि द्वात्रिंशत् सार्वदेवानि तान्यपि ।
अथ जातिविमानानां द्वादशैव द्विजन्मनाम् ॥ ५ ॥

राज्ञां सङ्कृतिसङ्ख्यानि तथाष्टौ वैश्यशूद्रयोः ।
क्षुद्राल्पाख्यान्यसामर्थ्ये सर्वेषां विहितानि हि ॥ ६ ॥

तत्र मुख्यादिषण्णवतिविमानानां नामानि भवन्ति ।

तद्यथा —

नालिनं च प्रलीनं च स्वस्तिकं च चतुर्मुखम् ।
ततः स्यात् सर्वतोभद्रं हस्तिपृष्ठं समुज्ज्वलम् ॥ ७ ॥

श्रीच्छन्दं वृत्तभद्रं च श्रीकान्तं श्रीप्रतिष्ठितम् ।
शिवभद्रं शिवच्छन्दमष्टाङ्गं पद्मकाकृति ॥ ८ ॥
विष्णुच्छन्दं च सौभद्रं छन्दे कैलासरुद्रयोः ।
ततो ललितभद्राख्यं विमानं चेति विंशतिः ॥ ९ ॥
मेरुमन्दरकैलासा जयाङ्गविमलाकृती ।
कुम्भाख्यं विमलाङ्गं च वृषच्छन्दं सुदर्शनम् ॥ १० ॥
हंसच्छन्दं पद्मकान्तं गरुडच्छन्दमेव च ।
भोगिच्छन्दं पद्मभद्रं ततः कैलासकान्तकम् ॥ ११ ॥
रुद्रकान्तं स्कन्दकान्तं योगभद्रं च मङ्गलम् ।
विन्ध्यच्छन्दं मेरुकूटं महेन्द्रं चित्रकूटकम् ॥ १२ ॥
श्रीमण्डनं च सौमुख्यं नीलं निषधसंज्ञितम् ।
ततो ललितकान्ताख्यं विजयं श्रीकरं तथा ॥ १३ ॥
श्रीविशालं च कथितं तथैव जयमङ्गलम् ।
जातीतराणि द्वात्रिंशद् विमानानि दिवौकसाम् ॥ १४ ॥

द्वात्रिंशद् दैविकविमानानि ।

नागभागाह्वयच्छन्दे कुब्ज्यावर्तं त्रिकूटकम् ।
श्रीवर्धनं पद्मगृहं प्रेक्षागृहमुखं तथा ॥ १५ ॥
अत्यन्तभानुचन्द्राणां कान्तानि क्रतुवर्धनम् ।
वृत्तं च द्वादशैतानि विमानानि द्विजन्मनाम् ॥ १६ ॥

ब्राह्मणविमानानि द्वादश ।

चतुष्कुटं मन्त्रपूतमावन्त्यं माहिषं तथा ।
तन्त्रीकान्तं कर्णभद्रं विजयाङ्गं विशालकम् ॥ १७ ॥
विशालभद्रं गणिकाविशालं कर्णशालकम् ।
पद्मासनं चेन्द्रकान्तं स्यात् सर्वललितं ततः ॥ १८ ॥
योगप्रत्यन्तकान्ताख्ये ततश्चोत्पलपत्रकम् ।
महाराजाह्वयच्छन्दं मालागृहमतःपरम् ॥ १९ ॥
पृथिवीविजयं चाथ भवेन्नन्दिविशालकम् ।
सर्वाङ्गसुन्दरं चापि छायागृहमतःपरम् ॥ २० ॥

रतिवर्धनमित्येवं चतुर्विंशतिकं स्मृतम् ।
चतुर्विंशातिर्विमानानि क्षत्रियाणाम् ।
विशालालयसंज्ञं च चतुष्पादिकमेव च ॥ २१ ॥
तुरङ्गवदनं तद्वद् गणिकापिण्डिकं तथा ।
श्येनच्छन्दं चोत्पलाग्रं ततः कुक्कुटपुच्छकम् ॥ २२ ॥
(मुण्डप्रासादकाभिख्यं विमानं तु ततः परम् ।)
इत्यष्टौ जातिहर्म्याणि वासार्थं वैश्यशूद्रयोः ।
विट्शूद्रविमानान्यष्टौ ।
उक्तानां तु विमानानामलङ्कारो निगद्यते ॥ २३ ॥
आदौ नलिनकाख्यस्य चतुरश्रं समं शुभम् ।
अधिष्ठानं तत्रिभागाद् गर्भागारं तदर्धतः ॥ २४ ॥
अर्धारिका च हारा स्यादथ गर्भे नवांशतः ।
अधिकायतवृत्तं स्यात् स्तूपिभिः शिखरं त्रिभिः ॥ २५ ॥
कण्ठश्चं शिखराभः स्याद् वेदांशार्धारिकांशतः ।
निर्गमो[2] मध्यबिम्बस्य[3] स्यात् ततो गर्भसद्मनः ॥ २६ ॥
पुरो वृत्तस्फुटितकं तच्चतुर्भागनिर्गतम् ।
ततो द्विगुणविस्तारनिर्गमा पृथुनासिका ॥ २७ ॥
पुरस्तादथ पार्श्वाभ्यां षोडशैवाल्पनासिकाः ।
तदर्धव्यासनिर्याणा पश्चिमस्थैकनासिका ॥ २८ ॥
अर्धारिकाव्यासतोऽर्धनिर्गते द्विगुणायते ।
सोदरे नासिके पार्श्वकोष्ठके मूर्ध्नि चार्पयेत् ॥ २९ ॥
गृहपिण्ड्यर्धतश्चान्तर्लीनमूर्ध्वाधिरोहणम् ।
प्रादक्षिण्येन सोपानं भवेत् प्रतितलं क्रमात् ॥ ३० ॥
गृहपिण्डिः साष्टनासा महा(पा ? हा)रक्रियान्विता ।

अत्र पराशरः — "गृहपिण्डेरधस्तात् कूटकोष्ठपञ्जरगजवृत्तस्फुटितक्षुद्रशालाहारातोरणस्तम्भतोरणकुम्भलतादिभिर्हर्म्यं, हर्म्यात् प्रभृत्यामूलतलं यथोचितभागेन योजयेदि"ति ।

---

१. 'स्य' क. ख. पाठः. २. 'मान्मध्य', ३. 'म्बास्या' ग. पाठः.

समं त्रिपादमर्धं वा प्रासादस्य तु मण्डपम् ॥ ३१ ॥

पुरस्तादुक्तमानान्तं त्रिद्व्येकतलकं तु वा ।
प्रासादतुल्यालङ्कारं तत्समाङ्गं च मण्डयेत् ॥ ३२ ॥

त्रितलादि यथेच्छातः प्रासादं भूषयेत् तलैः ।
कर्णे मध्येऽन्तरे भित्तेर्बाह्ये वा मानसूत्रतः ॥ ३३ ॥

निर्गतैरुक्तमानेन कूटकोष्ठकपञ्जरैः ।
गजपृष्ठादिभिश्चोक्तैः कुर्यादवयवैर्युतम् ॥ ३४ ॥

गलादुपरि वेदाश्रं वृत्तमष्टाश्रकं तु वा ।
कर्णाश्रितं मध्यमैकनासिकास्तूपिकान्वितम् ॥ ३५ ॥

प्रासादावयवं प्राज्ञाः कूटं नाम प्रचक्षते ।
सायतं समुखपट्टिकमर्ध(विस्पष्टवि?)स्पष्टकोटियुतमध्यमनासम् ।
शक्ति + ध्वजमपि त्रिमुखं तत् पार्श्वयोर्बहुशिखं खलु कोष्ठम् ॥ ३६ ॥
।शिखाशब्देन स्तूपिकोच्यते ।

मुखे शालामुखं चैव स्तूपिकं हस्तिपृष्ठवत् ॥ ३७ ॥
पञ्जरं नाम तत् प्रोक्तमत्र प्राह पराशरः ।

"तदेव पाशमुखं हस्तितुण्डं कूटकोष्ठयोरन्तरे विहितं क्षुद्रकोष्ठं च । कूटकोष्ठयोरन्तरे हारा भागेन भागार्धेन वा कार्या । वृत्तस्फुटितकमपि पञ्जरमिव तदर्धनिर्गतवृत्तरूपं स्यात्" इति ।

समानकण्ठशिखरस्तूपिकं सर्वमेव हि ॥ ३८ ॥

जातिक्रमोऽयं भवति प्रासादानां समासतः ।
कर्णे कोष्ठं मध्यकूटमन्तरे पञ्जरादिकम् ॥ ३९ ॥

सान्तःप्रस्तरकं यत् तद् विकल्पमभिधीयते ।
तैरेव मिश्र आभासः सर्वतः सममेव हि ॥ ४० ॥

प्रासादमुखशोभां तु जलावास्थितचन्द्रवत् ।
योजयेत् तु विमानानां भेदः संस्थानभेदतः ॥ ४१ ॥

शिखरस्य तु भेदेन सर्वेषां भेदमुद्दिशेत्।
यथार्हं तु यथाशोभं सर्वमन्यत् समं स्मृतम् ॥ ४२ ॥

मरुत्पथं योजयेच्च यथाशोभं यथोचितम्।
मुखे मुखे महानास्या युक्तं तत् स्याद्धि पक्षयोः ॥ ४३ ॥

अर्धकोष्ठद्वयाद् व्योम्नि प्लवमानविहङ्गवत्।
विमानं नलिनं त्वेतत् कथितं शिववल्लभम् ॥ ४४ ॥

नलिनकम्।

प्रलीनकस्याधिष्ठानं समानचतुरश्रकम्।
तद्व्यासेऽष्टांशके भागैस्त्रिभिर्गर्भगृहं भवेत् ॥ ४५ ॥

वेदाश्रे गर्भशिखरे गर्भार्धे निर्गतायता।
स्यात् पुरस्तान्महानासी पार्श्वयोश्चाल्पनासिकाः ॥ ४६ ॥

चतस्रश्चापरे भागे महत्येकैव नासिका।
गर्भपादांशविस्तारे कोष्ठके द्विगुणायते ॥ ४७ ॥

पार्श्वयोर्मूर्ध्नि च[1] स्यातां गर्भाद् रामांशतस्ततम्[2]।
खण्डहर्म्ये च तत्तुल्यं द्विगुणं द्राघिमा तयोः ॥ ४८ ॥

अन्तर्लीनं तु सोपानं गृहपिण्डै[3]चर्धरोहणम्।
अर्धारिहा(रि ? र)मध्येऽन्तर्गृहं निर्व्यूहतः समम् ॥ ४९ ॥

एकत्र पक्षे तल्पं स्यात् त्रिपक्षे त्वप्तलं भवेत्।
कुड्यं चैव यथाशोभं शेषं प्रागिव योजयेत् ॥ ५० ॥

तदधिष्ठानपार्श्वाभ्यां सोपाने हस्तितुण्डके।
पक्षबन्धं छत्रशीर्षं गृहपिण्डि महाक्रिया(?) ॥ ५१ ॥

तस्यामष्टौ चाल्पनास्यः सर्वास्ताः स्वस्तिकान्विताः।
प्रतिबन्धमधिष्ठानं स्तम्भाः स्युश्चतुरश्रकाः ॥ ५२ ॥

प्लवमानामिषग्राहिविहङ्गसदृशाकृति।
कूटकाद्यैरवयवैः प्राग्वद् युक्त्या विभूषयेत् ॥ ५३ ॥

---

[1] 'चा' क., 'प' ख. पाठः. [2] 'तः' क. पाठः. [3] 'ण्ड्या' ग. पाठः.

Digitized by eGangotri/Sarayu Trust Foundation-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पार्श्वयोरर्धकोष्ठाभ्यां नासीषट्केण[1] मूर्धनि ।
प्लवमानामिषग्राहिविहङ्गवदवस्थितम् ॥ ५४ ॥
एकादितलसम्पन्नं प्रलीनं शिवमन्दिरम् ।

प्रलीनकम् ।

स्वस्तिकस्याप्यधिष्ठानं व्यासपादांशमायतम् ॥ ५५ ॥
चतुरश्रं तु तद्व्यासादष्टनन्दांशतः क्रमात् ।
द्वित्र्यंशं स्याद् गर्भगृहं गृहपिण्ड्यादि पूर्ववत् ॥ ५६ ॥
[2]शिखरं दीर्घवेदाश्रं पुरा गर्भार्धमानतः ।
निर्गता स्यान्महानासिस्तदर्धात् पार्श्वनासिका ॥ ५७ ॥
शिखरे चाल्पनास्योऽष्टौ सर्वा नास्यः सभद्रकाः ।
कोष्ठानि खण्डहर्म्याणि स्वास्तिकाभानि योजयेत् ॥ ५८ ॥
कूटकोष्ठाद्यवयवं प्राग्वत् सर्वं तु कारयेत् ।

स्वस्तिकम् ।

अधिष्ठानादिशिखरात् समवृत्तं चतुर्मुखम् ॥ ५९ ॥
नालीगृहार्धारिकाद्यं स्वस्तिकोक्तप्रमाणतः ।
दिक्षु वेदमहानास्यो गर्भपादांशनिर्गताः ॥ ६० ॥
शिखरे मध्यतस्तासां तदर्धेनाल्पनासिकाः ।
नालीगृहव्याससमां समांशकांशनिर्गमाम् ॥ ६१ ॥
गृहपिण्डि चतुर्दिक्षु मध्ये च परिकल्पयेत् ।
समभद्राः कर्णसभौश्चतस्रः[3] कल्पयेत् समाः ॥ ६२ ॥
कूटकोष्ठादिकं प्राग्वद् यथाशोभं तु योजयेत् ।
चतुर्दिक्षु मुखाकारैर्भद्रैर्युक्तं चतुर्मुखम् ॥ ६३ ॥

चतुर्मुखम् ।

चतुरश्रमधिष्ठानं सर्वतोभद्रकस्य तु ।
तद्दिङ्नन्दाष्टभागैः स्याद् गर्भं वेदाग्निनेत्रतः ॥ ६४ ॥

---

[1] 'को' क. पाठः. [2] 'शिखामंदी' ख. पाठः. [3] 'द्दा' ग. पाठः.

गृहपिण्ड्यादिकं प्राग्वत् पिण्डिः षोडश सैष्ठिकाः ।
अष्टाश्रे कण्ठशिखरे स्यातां तत्राष्टनासिकाः ॥ ६५ ॥

तले तले चतुर्दिक्षु मध्यं भद्रान्वितं भवेत् ।
पञ्चमूर्तिविधानार्थं गर्भविस्तारमानतः ॥ ६६ ॥

तद्दिक्षु कर्णकूटानि त्रिमुखाभानि योजयेत् ।
चतस्रस्तत्र शालाः स्युः कूटकोष्ठादि पूर्ववत् ॥ ६७ ॥

स्वव्यासार्धात् सभद्राणि कूटादीन्यस्य योजयेत् ।
तस्याष्टदिक्षु वा मध्ये नव लिङ्गानि वा न्यसेत् ॥ ६८ ॥

अव्यक्तव्यक्तलिङ्गानां सर्वतोभद्रमीरितम् ।

सर्वतोभद्रम् ।

वेदाश्रं हस्तिपृष्ठस्याप्यधिष्ठानं तदायतम् ॥ ६९ ॥

व्यासपादांशतः प्राग्वद् गृहपिण्ड्यादिकं स्मृतम् ।
कूटकोष्ठाद्यवयवं प्राग्वत् सर्वं समूहयेत् ॥ ७० ॥

वृत्तं पृष्ठे तु शिखरमग्रं द्व्यश्रं समं शुभम् ।
स्थितहस्तिसमाकारं शालाकारमुखं च तत् ॥ ७१ ॥

पार्श्वयोः पृष्ठतोऽपि स्युस्तिस्रस्तिस्रश्च नासिकाः ।
गर्भवेदांशविस्तारास्तदर्धं च विनिर्गताः ॥ ७२ ॥

ब्रह्मद्वारपताकाभिः कपोताद्यैश्च भूषयेत् ।
एकानेकतलं वैतद् ब्रह्मविष्ण्वीशमन्दिरम् ॥ ७३ ॥

हस्तिपृष्ठम् ।

समुज्ज्वलस्याधिष्ठानं समवेदाश्रकं स्मृतम् ।
तत्तृतीयांशतो गर्भं तत्त्रिभागार्धपिण्डिकम् ॥ ७४ ॥

अलिन्दं चैव हारं च तन्मानेनैव योजयेत् ।
गर्भत्रिभागविस्तारा अर्धनीव्राश्च नासिकाः ॥ ७५ ॥

चतस्रः स्युस्तदर्धेन तावत्यः क्षुद्रनासिकाः ।
वृत्तं शिखरसंस्थानं पिण्ड्यां नास्यस्तु षोडश ॥ ७६ ॥

गृहपिण्डेरधो मूलतलं कूटादिभिः पृथक् ।
अलङ्कृत्य चतुर्दिक्षु महाकोष्ठैर्विभूषयेत् ॥ ७७ ॥
तले तले सौष्ठिकाग्रमण्डलं[1] मुख्यमण्डपम् ।
अन्तर्मुखं हि तत् कुर्याच्छेषं पूर्ववदाचरेत् ॥ ७८ ॥

अत्र पराशरः —

"समुज्ज्वलं तत् सकलेशमन्दिरं सुवृत्तसौष्ठ्यग्रशिरोगलान्वितम् ।
सभद्रशालं सकलाङ्गमाण्डितं जयर्द्धिकीर्त्तिद्युतिदं मनोहरम् ॥"

समुज्ज्वलम् ।

श्रीच्छन्दस्याप्यधिष्ठानं समानचतुरश्रकम् ।
अष्टा[2]श्रं शिखरे साष्टनासिकं स्याद् गलेऽपि च ॥ ७९ ॥
अष्टाश्र[3]सौष्ठिकाग्रं च शुकनासिकयान्वितम् ।
शेषं समुज्ज्वलस्यैव कुर्यादेतच्छिवप्रियम् ॥ ८० ॥

श्रीच्छन्दम् ।

अधिष्ठानादा[4]शिखराद् वृत्तभद्रे तु वर्तुलम् ।
मध्ये नालीगृहं वृत्तं तन्मध्ये च चतुर्दिशम् ॥ ८१ ॥
कोष्ठानि समभद्राणि प्रमाणभवनं तथा ।
समविस्तारानिर्याणं तयोर्मध्ये विभूषयेत् ॥ ८२ ॥

अत्र पराशरः — "तयोरन्तरे हस्तिपृष्ठक्षुद्रकोष्ठादिभिर्महाविन्यासेषु परितो मण्डनीयं तन्मुख[5]मण्डपं सभद्रं समसूत्रं बहुतुलं सर्वदेवानां प्रशस्तमेव" इति ।

वृत्तभद्रम् ।

श्रीकान्तस्याप्यधिष्ठानं समवेदाश्रकं स्मृतम् ।
विस्तारेऽष्टनवांशे तु द्वित्र्यंशाद् गर्भमन्दिरम् ॥ ८३ ॥

---

१. 'नं', २. 'श्रं', ३. 'श्र' ग. पाठः. ४. दि' क. पाठः. ५. 'खं' ख. पाठः.

अर्धारिकार्धहारा वा भागार्धाः स्युश्च भागतः ।
वेदाश्रं गर्भभवनं शिखरं चार्धनिर्गमम् ॥ ८४ ॥

शिखरे वेदनास्यः स्युस्तावत्यश्चाल्पनासिकाः ।
गृहपिण्ड्यां द्व्यष्टनास्यः कर्णकूटचतुष्टयम् ॥ ८५ ॥

चतुरश्राष्टवृत्तं स्यात् तदन्तः कोष्ठकानि च ।
निर्गतैः पञ्जरैर्मध्ये चतुर्दिक्षु नियोजयेत् ॥ ८६ ॥

क्षुद्रकोष्ठैर्हस्तितुण्डैः सार्धपञ्जरजालकैः ।
तोरणैरपि सोपानैरधिष्ठानपदैरपि ॥ ८७ ॥

भूषयेद् युक्तितस्त्वेतच्छ्रीकान्तं सार्वदैवतम् ।

श्रीकान्तम् ।

अधिष्ठाना(दि?दा)शिखरं वृत्तं स्याच्छ्रीप्रतिष्ठिते ॥ ८८ ॥
विस्तारत्रिचतुर्भागाद् भागो गर्भगृहं भवेत् ।
गृहपिण्ड्यलिन्दहाराश्चैकैकांशेन कल्पयेत् ॥ ८९ ॥

गर्भवेदांशविस्ताराः सभद्रा वेदनासिकाः ।
गृहपिण्ड्यां षोडश स्युः क्षुद्रनास्यस्तु पूर्ववत् ॥ ९० ॥

वेदाश्रं बाह्यसंस्थानमन्तर्लीनप्ररोहणम् ।
चतुर्दिक्ष्वपि गर्भार्धव्यासनिर्गमकोष्ठकैः ॥ ९१ ॥

प्रमाणभवनाङ्गानि सौष्ठिकान्तानि योजयेत् ।
श्रीप्रतिष्ठितकं नाम्ना विमानं विष्णुमन्दिरम् ॥ ९२ ॥

श्रीप्रतिष्ठितम् ।

चतुरश्रमधिष्ठानं शिवभद्रस्य तस्य तु ।
विस्तारेऽष्टनवांशे तु द्वित्र्यंशं गर्भमन्दिरम् ॥ ९३ ॥

गर्भं वेदाश्रकं वृत्तं शिखरं वेदनासिकम् ।
कुर्याद् गर्भचतुर्थांशं व्यासनास्योऽर्धनिर्गमाः ॥ ९४ ॥

गर्भार्धत्र्यंशभागेन गृहपिण्ड्यादयस्त्रयः ।
खण्डहर्म्यैश्च कूटाग्रैः परिभूष्य समन्ततः ॥ ९५ ॥

घ्राणषोडशकं पिण्ड्यां तिलकस्वस्तिकाङ्कितम् ।
नानाधिष्ठानपादाद्यैरलङ्कृत्य तलानि तु ॥ ९६ ॥

वेदवस्वश्रवृत्ताग्रकर्णकूटानि योजयेत् ।
द्वित्रिदण्डानि कोष्ठानि समभद्राणि योजयेत् ॥ ९७ ॥

अन्तर्लीनं हस्तिसंज्ञं सोपानमथ तस्य तु ।
प्रासादाङ्गसभोपेतं मण्डपं प्रमुखे भवेत् ॥ ९८ ॥

एकनानातलं वा स्यादूहप्रत्यूहसंयुतम् ।
खण्डहर्म्यं तथा कुर्याच्छिवभद्रमिदं स्मृतम् ॥ ९९ ॥

शिवभद्रम् ।

शिवच्छन्दस्य तु प्राग्वदधिष्ठानादिकं भवेत् ।
अभद्राण्येव कोष्ठानि मध्ये पञ्जरभद्रकैः ॥ १०० ॥

युक्तानि स्युर्बहुतलैः प्रोक्तं युक्त्या नियोजयेत् ।
शिवस्यैव शिवच्छन्दं सर्वालङ्कारसंयुतम् ॥ १०१ ॥

शिवच्छन्दम् ।

अष्टाङ्गस्याप्यधिष्ठानं शिवभद्रसमं भवेत् ।
गर्भगेहादिकं तद्वद् विशेषोऽत्र निगद्यते ॥ १०२ ॥

कपोतपञ्जरोपेतभद्राङ्गान्येव षोडश ।
मुण्डनास्यौ तथा द्वे द्वे गलादुपरि शीर्षकम् ॥ १०३ ॥

भवेदामलकाकारं तत्राष्टौ नासयः समाः ।
गर्भवेदांशविस्तारास्तदर्धसमनिर्गमाः ॥ १०४ ॥

अल्पनास्यस्तथैवाष्टौ मध्ये स्याच्चतुरश्रकम् ।
गृहपिण्ड्यादिकं प्राग्वत् पुरः पक्षद्वयोर्ध्वगम् ॥ १०५ ॥

सोपानकर्मकोणाभ्यां हस्तितुण्डविभूषितम् ।
साष्टमङ्गलकं कुर्यान्मध्यद्वारं सतोरणम् ॥ १०६ ॥

वृद्धसोपानमप्यन्तर्लीनमत्र नियोजयेत् ।
नानामसू[1]रकस्तम्भवेदिकादिमरुत्पथैः ॥ १०७ ॥
अष्टाश्रसौष्ठिकं कर्णे मस्तकान्यत्र योजयेत् ।
अल्पानल्पक्रियोपेतं त्रितलादितलान्वितम् ॥ १०८ ॥
सर्वाङ्गालङ्कृतं ह्येतदष्टाङ्गं देवमन्दिरम् ।

अष्टाङ्गम्।

चतुरश्रमधिष्ठानं व्यासवेदांशकायतम् ॥ १०९ ॥
वसुनन्दांशके द्वित्रिभागान्नालीगृहं स्मृतम् ।
तदप्यायतवृत्तं स्यात् प्राग्वदर्धारिकायतम् ॥ ११० ॥
गृहपिण्ड्यश्चतुर्दिक्षु पादभद्रकनासिकाः ।
वृत्तायतं तु शिखरं तस्मिन् गर्भार्धभागतः ॥ १११ ॥
सभद्रका महानास्यः प्राग्वत् कूटादिकं स्मृतम् ।
गृहपिण्ड्यां षोडशैव कपोते तिलनासिकाः ॥ ११२ ॥
कर्णकूटादिकैः प्राग्वद् भूषयेत् पद्मकाकृतौ ।

पद्माकृति ।

विष्णुच्छन्दस्य च प्राग्वदधिष्ठानं तदायतम् ॥ ११३ ॥
व्यासवेदांशरामांशगर्भागारं षडश्रकम् ।
पद्मबन्धमधिष्ठानमूर्ध्ववेदाश्रसौष्ठिकम् ॥ ११४ ॥
गृहापिण्ड्यादिकं प्राग्वच्छिखरं च षडश्रकम् ।
षडेव नासयस्तस्मिन् कण्ठश्चापि षडश्रकः ॥ ११५ ॥
स्वविस्तारार्धनिष्क्रान्तं खण्डहर्म्ये च सौष्ठिकम् ।
ब्रह्मद्वारपताकाभिर्गूढं गूढक्रियान्वितम् ॥ ११६ ॥
कपोतेऽपि च नास्यः स्युः समभद्राश्च सर्वतः ।
भोगभूमियुतं दारुक्रियानिर्माणशोभितम् ॥ ११७ ॥

---

१. 'सूकरस्त' क. ख. पाठः.

चतुष्कोणेषु मध्ये च पञ्चमूर्तिविधानतः ।
चतुष्कोणे सौष्ठिकानि वृत्तायतशिरांसि च ॥ ११८ ॥

सर्वाङ्गालङ्कृतं ह्येतद् विष्णुच्छन्दं हि वैष्णवम् ।
तले तले च कूटानां शिखरं वृत्तमायतम् ॥ ११९ ॥

इष्टकादारुकर्माढ्यं सर्वाङ्गपरिमण्डितम् ।

विष्णुच्छन्दम् ।

सौभद्रस्याप्यधिष्ठानं समानचतुरश्रकम् ॥ १२० ॥

चतुस्त्र्यंशैकभागेन गर्भव्यासस्ततोऽपि च ।
द्वित्रिभागैकभागैः स्युर्गृहपिण्ड्यादयः क्रमात् ॥ १२१ ॥

शिखरं चतुरश्रं तु सभाकारं चतुर्दिशम् ।
गर्भवेदांशविस्तृताः पादभद्रकनासयः ॥ १२२ ॥

चतस्रोऽल्पाश्च नास्योऽष्टौ सर्वाः सस्वस्तिभद्रकाः ।
कूटकोष्ठादिकं सर्वं पादार्धत्र्यंशभद्रवत् ॥ १२३ ॥

वेदाष्ट[1]षोडशाश्राः स्युर्वृत्ताः स्तम्भास्तलक्रमात ।
अतलं खण्डहर्म्यं च प्रोक्तालङ्कारभूषितम् ॥ १२४ ॥

सौभद्रम् ।

कैलासच्छन्दकस्यापि चतुरश्रं मसूरकम् ।
व्यासाष्टांशे त्रिभागेन गर्भागारं समन्ततः ॥ १२५ ॥

शेषैः स्युर्गृहपिण्ड्याद्या वेदाश्रं गर्भमन्दिरम् ।
अष्टाश्रं स्याद् गलादूर्ध्वं पृथक् स्वल्पाष्टनासिकम् ॥ १२६ ॥

द्विगुणं गृहपिण्ड्यां स्या[2]दथ कर्णाग्रसौष्ठिकम् ।
चतुरष्टाश्रवृत्ताभं नासीयुक्तं तले तले ॥ १२७ ॥

मध्यमण्डनमंशेन विस्तारार्धविनिष्क्रमम् ।
श्रीबन्धाख्यमसूरेण त्वलङ्कृत्य तदन्तरे ॥ १२८ ॥

महापञ्जरकक्षुद्रशालागजमुखैरपि ।
नानामसूरकस्तम्भवेदिकाजालतोरणैः ॥ १२९ ॥

---

१. 'श्र', २. 'स्युरथ' ग. पाठः.

प्राग्वदङ्गैरलङ्कृत्य खण्डहर्म्ये यथार्हतः ।
एकादितलवृद्ध्या तु हीने हीने नियोजयेत् ॥ १३० ॥
ब्रह्मद्वारपताकाभिः कूटकोष्ठादिभिस्तथा ।
पुरस्तात् सान्तरालं तु प्रासादाङ्गोपमं पुनः ॥ १३१ ॥
सन्मण्डपं नैकतलमन्तर्लीनाधिरोहणम् ।
जातिच्छन्दविकल्पादिक्रमसर्वाङ्गयोजितम् ॥ १३२ ॥
उन्नतावनतैः कूटकोष्ठैर्मध्यमभद्रकैः ।
नानाशिखरसंस्थानैः कैलासगिरिसन्निभम् ॥ १३३ ॥
कैलासच्छन्दमुद्दिष्टं शिवस्यैव शिवङ्करम् ।

कैलासच्छन्दम् ।

चतुरश्रमधिष्ठानं रुद्रच्छन्दस्य पूर्ववत् ॥ १३४ ॥
नालीगृहादिकं प्राग्वत् कर्णे मध्येऽन्तरे तथा ।
कूटकोष्ठादयो योज्या व्यासपादांशनिर्गमाः ॥ १३५ ॥
ब्रह्मद्वारं तु भागेन विस्तृतं पिण्डिसंश्रितम् ।
अलङ्कारोच्चशीर्षे स्यान्नानाङ्गैरथ भूषयेत् ॥ १३६ ॥
अधिष्ठानस्तम्भवेदीजालतोरणपूर्वकैः ।
चतुरष्टाश्रवृत्ताः स्युः क्रमान्मूलादिभूमयः ॥ १३७ ॥
गलं च शिखरं वृत्तं पुरः पार्श्वे च नासिकाः ।
गर्भत्र्यंशैकविस्तारास्तिस्रः स्युरथ पश्चिमे ॥ १३८ ॥
तन्मानार्धेन नासी द्वे तिस्रस्तिस्रश्च पार्श्वयोः ।
तिलकैरन्विताः शेषं रुद्रच्छन्दस्य योजयेत् ॥ १३९ ॥

रुद्रच्छन्दम् ।

चतुरश्रमधिष्ठानमुक्तं ललितभद्रके ।
तद्विस्तारेऽष्टनन्दांशे द्वित्र्यंशैर्गर्भमन्दिरम् ॥ १४० ॥
गृहपिण्ड्यादयः शेषैर्भागैर्वेदाश्रकाणि च[1] ।
अष्टाश्रमस्य शिखरमल्पानल्पाष्टनासिकम् ॥ १४१ ॥

---

[1] 'तु' ख. पाठः.

स्वव्याससमनिर्यूहकोष्ठकानि चतुर्दिशम् ।
मध्ये तेषां तृतीयांशं स्मृताः शालास्त्रिभिर्मुखैः ॥ १४२ ॥

कर्णप्रासादविपुलत्र्यंशैकांशेन विस्तृतम् ।
मध्यभद्रं तदर्धार्धनिर्गमं स्यात् तदन्तरे ॥ १४३ ॥

सिंहपञ्जरकक्षुद्रकोष्ठादीनपि योजयेत् ।
सकर्णसौष्ठिकाग्रं तदष्टाश्रप्रतिमं भवेत् ॥ १४४ ॥

तले तले स्वस्तिकाभा योज्यास्तिलकनासयः ।
गृहपिण्ड्यादिकं प्राग्वत् कूटाद्यैर्भूषयेदपि ॥ १४५ ॥

हस्तिसोपानमेवान्तर्लीदं ललितभद्रकम्[1] ।

ललितभद्रम् ।

इत्थं समासान्नलिनादिकानि प्रोक्तान्यलङ्कारयुतानि तानि ।
शम्भोर्विमानान्युचितानि मुख्यान्यम्भोजगर्भस्य हरेश्च तानि ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापादे मुख्यविमानादिलक्षणपटलोऽष्टविंशः ।

अथ एकोनत्रिंशः पटलः ।

अथ जातीतराख्यानां विमानानां निगद्यते ।
लक्षणं मेरुपूर्वाणां तत्तन्निष्पत्तिसिद्धिदम् ॥ १ ॥

मेरुसंज्ञस्य वेदाश्रमधिष्ठानं तु वर्तुलम् ।
गलं च शिखरे तच्च चतुर्नासीभिरन्वितम् ॥ २ ॥

मुखनासी महत्येका गर्भार्धसमनिर्गमा ।
व्यासे त्रयोदशांशे तु पञ्चांशं गर्भमन्दिरम् ॥ ३ ॥

गृहपिण्ड्यलिन्दहाराः पृथगेकांशतः क्रमात् ।
कूटमेकांशतः कोष्ठं त्रिभिरंशैरथांशतः ॥ ४ ॥

---

[1] 'के' ख. पाठः.

नीडं शेषं हि हारांशं कूटादिसमसूत्रकम् ।
स्वस्तिकाबन्धवन्नास्यात्त्रिचतुःपञ्चभूमिकम् ॥ ५ ॥
नानाधिष्ठानकस्तम्भवेदिकाजालतोरणैः ।
वृत्तस्फुटितनीडाद्यैर्भूषयेन्मेरुमादरात् ॥ ६ ॥

मेरुविमानम् ।

तदेव कण्ठे शिखरे चतुरश्रं तु मन्दरम् ।

मन्दरम् ।

तदेव वस्वश्रगलशिखरं वसुनासिकम् ॥ ७ ॥
अष्टपञ्जरकूटं च नाम्ना कैलासमिष्यते ।

कैलासम् ।

वेदवस्वश्रवृत्ताभगर्भगेहं तदेव हि ॥ ८ ॥
सभद्रनासिकं ख्यातं विमानं कुम्भसंज्ञितम् ।

कुम्भविमानम् ।

वेदाश्रगर्भगेहं तज्जयाङ्गाख्यं सभद्रकम् ॥ ९ ॥

जयाङ्गम् ।

विशालाङ्गं तदेव स्याद् वृत्तं शिखरकण्ठयोः[1] ।

विशालाङ्गम् ।

तदेव मध्ये हित्वांशं कोष्ठयुक्तं द्विभागतः ॥ १० ॥
अष्टाश्रशिखरग्रीवं तथाष्टगलनासिकम् ।
अष्टपञ्जरकूटं च द्विषष्टितिलकान्वितम् ॥ ११ ॥
सावारं वा निरावारं त्रिचतुःपञ्चभूमिकम् ।
विमलाकृतिसंज्ञं हि विमानमिदमद्भुतम् ॥ १२ ॥

विमलाकृति ।

---

[1] 'मण्डयोः' क. ख. पाठः.

तदेव कोष्ठकं सर्वं स्वविस्तारार्धनिर्गतम् ।
तले तले महानास्यौ पक्षयोरर्धकोष्ठवत् ॥ १३ ॥
हंसच्छन्दामिदं प्रोक्तं विमानमतिसुन्दरम् ।

हंसच्छन्दम् ।

एतदेव हि वेदाश्रकण्ठं वेदाश्रमस्तकम् ॥ १४ ॥
शेषं प्रागुक्तवत् सर्वं वृषच्छन्दमिदं स्मृतम् ।

वृषच्छन्दम् ।

तदेव गरुडच्छन्दं विमानमथ कथ्यते ॥ १५ ॥
मुखे[1] भद्राङ्गनासं तु पक्षयोरर्धकोष्ठवत् ।
पार्श्वयोर्द्विद्विनासं च सवृत्तस्फुटितं गलम् ॥ १६ ॥
शेषं मेरुसमाकारं गरुडच्छन्दमेव तत् ।

गरुडच्छन्दम् ।

तदेवाष्टाश्रकण्ठं चेदष्टाश्रशिखरं पुनः ॥ १७ ॥
पद्मसङ्काशशीर्षं च पद्माङ्गं ब्रह्ममन्दिरम् ।

पद्माङ्गम् ।

तदेव व्यासनिष्क्रान्तं मध्यकोष्ठं चतुर्दिशम् ॥ १८ ॥
पद्मकुट्मलशीर्षं तु पद्मभद्रमिदं स्मृतम् ।

पद्मभद्रम् ।

तदेव कण्ठे शिखरे वृत्तं चेत् पृथुनासिकम् ॥ १९ ॥
मुखे मुखे द्विपक्षे तु तिस्रो नास्यः समानिकाः ।
तलं प्रति सभद्राङ्गं सर्वत्र तिलकैर्युतम् ॥ २० ॥
सद्वारं वापि चाद्वारं योगकैलासकान्तकम् ।

कैलासकान्तकम् ।

---

[1] ‘ख’ क. पाठः.

एकादशकरव्यासं सप्ताष्टनवभागवत् ॥ २१ ॥
त्रिचतुष्पञ्चभागेन नालीगेहं समन्ततः ।
शेषं हारावलीकूटकोष्ठाद्यैर्भूषयेदपि ॥ २२ ॥
सभद्रं शिखरं वृत्तं चतुर्नासं द्विभूमिकम् ।
चतुष्कूटं चतुश्शालं समन्तात् तिलकैर्युतम् ॥ २३ ॥
सुवृत्तकर्णकूटाग्रं विमानं रुद्रकान्तकम् ।

रुद्रकान्तम् ।

तदेव भद्रकोष्ठाङ्गं योगभद्रं प्रचक्षते ॥ २४ ॥

योगभद्रम् ।

तदेव वेदाश्रशिरःसौष्ठिकाग्रमलङ्कृतम् ।
शिखरेऽष्टाल्पनासं च भोगिच्छन्दाह्वयं भवेत् ॥ २५ ॥

भोगिच्छन्दम् ।

तदेव कण्ठे शिखरे षडश्रं चेत् सुदर्शनम् ।
सुदर्शनस्य विष्णोर्वा भवनं तत् प्रचक्षते ॥ २६ ॥

सुदर्शनम् ।

तदेव स्कन्दकान्तं स्यात् षण्णासीभिरलङ्कृतम् ।
यथोचिताङ्गसम्पन्नं विमानं षण्मुखप्रियम् ॥ २७ ॥

स्कन्दकान्तम् ।

तदेवाखिलमष्टाश्रं कर्णकूटशिरोगलम् ।
सभद्राङ्गं चतुर्नासं विन्ध्यच्छन्दं द्विभूमिकम् ॥ २८ ॥

विन्ध्यच्छन्दम् ।

नवसप्तकरव्यासं सप्तषड्भागयान्वितम् ।
चतुष्कूटचतुःशालायुक्तं वृत्तशिरोगलम् ॥ २९ ॥
अल्पानल्पचतुर्नासमष्टपञ्जरतोरणम् ।
समध्यंभद्रातिलकैर्मसूरस्तम्भकैर्युतम् ॥ ३० ॥

१, 'ष्यपञ्ज' ख. पाठः,

सोपपीठमधिष्ठानं नानावयवसुन्दरम् ।
विमानं मेरुकूटाख्यं कूटाद्यङ्गैश्च मण्डितम् ॥ ३१ ॥

मेरुकूटम् ।

मध्यभद्रं विना तत्र कोष्ठकं कक्करं भवेत् ।
शेषं पूर्ववदाभूष्य चित्रकूटं हरि[1]प्रियम् ॥ ३२ ॥

चित्रकूटम् ।

तदेव सौष्ठिकैर्युक्तमष्टाभिः साष्टनासिकम् ।
श्रीमण्डनं विमानं स्याच्छ्रीकरं सार्वदैवतम् ॥ ३३ ॥

श्रीमण्डनम् ।

तदेव खलु सौमुख्यमष्टकूटाष्टशालकम् ।

सौमुख्यम् ।

तदेव चतुरश्राभशिखरं जयमङ्गलम् ॥ ३४ ॥

जयमङ्गलम् ।

तदेवाष्टाश्रशिखरं नीलपर्वतसंज्ञितम् ।

नीलपर्वतम् ।

तदेव कूटशालाभिर्विहीनः सोऽष्टपञ्जरः ॥ ३५ ॥
यथेष्टशिखरच्छन्दः प्रासादो निषधः स्मृतः ।

निषधः ।

वेदाश्रदीर्घाधिष्ठानं शालाकारशिरोन्वितम् ॥ ३६ ॥
कूटकोष्ठकनीप्राद्यैः सर्वाङ्गैरपि मण्डितम् ।
नानाधिष्ठानपादाढ्यं विमानं मङ्गलाह्वयम् ॥ ३७ ॥
श्रीश्रीधरधरादुर्गागौरीमातृगणप्रियम् ।

मङ्गलम् ।

---

[1] 'र' ख, पाठः.

चतुरश्रमधिष्ठानं सभद्रं वृत्तशीर्षकम् ॥ ३८ ॥
एकभौमं चतुर्नासं विजयाख्यं हरिप्रियम् ।

विजयम् ।

तदेव सौष्ठिकोपेतमष्टाश्रगलशीर्षकम् ॥ ३९ ॥
युक्तं ललितकान्ताख्यं सर्वाङ्गैः सार्वदैवतम् ।

ललितकान्तम् ।

तदेव वृत्तशिखरं श्रीकरं श्रीधरप्रियम् ॥ ४० ॥

श्रीकरम् ।

तदेव चतुरश्राश्रशिखरं साष्टपञ्जरम् ।
कर्णकूटविहीनं तु श्रीविशालं शिवप्रियम् ॥ ४१ ॥

श्रीविशालम् ।

इत्थं द्वात्रिंशदुक्तानि सामान्यानि विशेषतः ।
जातीतराणि सर्वेषां विमानानि दिवौकसाम् ॥ ४२ ॥

अत्र पराशरः —

"एभिरेवाप्यलङ्कारैः स्यात् कनिष्ठाल्पकेष्वपि ।
नामान्यपि च तान्याहुस्तत्तन्मण्डनभेदतः ॥"

इति । तानि च क्षुद्राल्पविमानानि परतः कथ्यन्ते ।

जातीतरविमानालङ्काराधिकारः ।

अथ जातिविमानानामलङ्कारो निगद्यते ।
सोमच्छन्दस्य वेदाश्रमधिष्ठानमथास्य तु ॥ ४३ ॥
रामांशाद् गर्भगेहं स्याद् गर्भार्धाद् गृहपिण्डिका ।
पिण्ड्या सहैवाम्बुतलं परितः शेषतोऽपि च ॥ ४४ ॥

---

१. 'क' ख. पाठः. २. 'षि' क. ख. पाठः.

खण्डहर्म्यं भवेच्चूडहर्म्यं चापि समन्ततः ।
वृद्धसोपानमेवान्तर्लीनमङ्गानि पूर्ववत् ॥ ४५ ॥
प्रयोज्यानि सभाकारं शिखरं तत्र नासयः ।
द्विपञ्चाशत् समान्येवं (?) पुरस्तान्मण्डपान्वितम् ॥ ४६ ॥
एकानेकतलं ह्येतत् सोमच्छन्दं द्विजोचितम् ।

सोमच्छन्दम् ।

चतुरश्रायतं तु स्यान्नागच्छन्दमसूरकम् ॥ ४७ ॥
तत्त्रिवेदांशतोंऽशेन गर्भव्यासस्ततोपि च ।
तृतीयांशेन परितो गृहपिण्डि प्रकल्पयेत् ॥ ४८ ॥
प्रासादखण्डहर्म्यान्तं मण्डपं स्याच्च तादृशम् ।
सोपानं खण्डहर्म्यार्धाच्छिखरं वृत्तमायतम् ॥ ४९ ॥
सभाकारं तु तस्याग्रे गर्भार्धात् पृथुनासिका ।
तदर्धात् परितो नास्यः सर्वा नागोपमाः समाः ॥ ५० ॥
वृत्तस्फुटं पुरोनास्यां मूलभूमौ तथोपरि ।
वसुवेदाश्रकाः स्तम्भाः शेषं पूर्ववदाचरेत् ॥ ५१ ॥

नागच्छन्दम् ।

अधिष्ठानादिकं प्राग्वत् कुड्यावर्तस्य योजयेत् ।
ब्रह्मद्वारपताकाभ्यां शेषमाभूष्य यत्नतः ॥ ५२ ॥
अन्तर्लीनं हस्तिसंज्ञं सोपानं शिखरं तथा ।
शालाकारं भवेत् तत्र नास्यः सङ्कृतिसङ्ख्यया ॥ ५३ ॥
मुखे मुखे महानास्यः पार्श्वे तिलकनासिकाः ।
प्रयोज्यास्तादिदं प्रोक्तं कुड्यावर्तं द्विजोचितम् ॥ ५४ ॥

कुड्यावर्तम् ।

द्विकूटस्याप्यधिष्ठानं गर्भागारं च पूर्ववत् ।
शेषं जलस्थलं खण्डहर्म्यकूटादिभूषितम् ॥ ५५ ॥

विमानस्य पुरस्तात् तु ग[1]र्भमानेन मण्डपम् ।
पार्श्वयोश्च सभारूपा वेदशालास्तु मध्यतः ॥ ५६ ॥
नासी स्याच्छिखरोपेता पिण्ड्यां नास्यस्तु षोडश ।
सभाशालाभशिखरं चतस्रस्तत्र नासिकाः ॥ ५७ ॥
पादबन्धमधिष्ठानं स्तम्भाः सर्वे विकल्पकाः ।
ऊहप्रत्यूहसंयुक्तं हस्ति[2]सोपानसंयुतम् ॥ ५८ ॥
जालकाद्यैः समाभूष्य विमानं स्याद् द्विकूटकम् ।

द्विकूटकम् ।

श्रीवर्धनस्य च प्राग्वदधिष्ठानादिकं समम् ॥ ५९ ॥
शिखरं स्यात् सभाकारमायतं तस्य चाग्रतः ।
पृष्ठे च नासिकैका स्याद् द्वे द्वे स्यातां च पार्श्वयोः ॥ ६० ॥
वेदिकापञ्जराद्यैश्च यथायुक्त्या विभूषयेत् ।

श्रीवर्धनम् ।

वृत्तायतमधिष्ठानमुक्तं पञ्चगृहस्य तु ॥ ६१ ॥
तद्व्यासे वसुनन्दांशे द्वित्र्यंशैर्गर्भमन्दिरम् ।
शेषं प्रागिव योज्यं स्यान्नासिकाः षोडशैव तु ॥ ६२ ॥
वृत्तायतं च शिखरं चतस्रस्तत्र नासिकाः ।
अल्पाश्च नासयोऽत्राष्टौ चतस्रस्तिलकान्विताः ॥ ६३ ॥

पञ्चगृहम् ।

प्रेक्षागृहमुखस्यापि स्यादधिष्ठानमायतम् ।
चतुरश्रस्य विस्तारादर्धं गर्भगृहं भवेत् ॥ ६४ ॥
गर्भव्यासेन तत्पार्श्वमण्डपानां चतुष्टयम् ।
शिखरं कोष्ठकाकारं तत्र[3] नास्यः षडेव हि ॥ ६५ ॥
कपोते चार्कसंख्यास्ताः शेषं प्राग्वन्नियोजयेत् ।
अलङ्कारश्च कर्तव्यो वेदीजालमरुत्पथैः ॥ ६६ ॥

प्रेक्षागृहम् ।

---

१. 'द' क. पाठः. २. 'स्त' क. ख. पाठः. ३. 'स्य' क. पाठः.

ऋतुवर्धनकस्यापि स्वव्यासार्धायताश्रकम् ।
अधिष्ठानं तु तद्व्यासत्रिभागाद् गर्भमन्दिरम् ॥ ६७ ॥

समन्ताद् गर्भरामांशभागादर्धारिका भवेत् ।
शेषमष्टतलचूडीकहर्म्यं कुट्टिमसंयुतम् ॥ ६८ ॥

मुखेमुखे विमानस्य मण्डपं गर्भसम्मितम् ।
प्रासादवत् स्थलं बाह्ये चूडहर्म्यान्वितं तु तत् ॥ ६९ ॥

कर्णकूटानि चत्वारि शिखरं कोष्ठकं महत् ।
चतस्रस्तत्रार्धसभा गर्भकूटानि वै मुखे ॥ ७० ॥

पुरः पृष्ठे सभा मत्तवारणं मण्डपो भवेत् ।
चतस्रोऽङ्गसभाः कार्याः शेषाण्यङ्गानि पूर्ववत् ॥ ७१ ॥

विवृतस्तम्भकैर्बाह्ये जालं स्यात् परितोऽपि च ।
अन्तर्लीनं हि सोपान(मु?यु)क्तं स्यात् ऋतुवर्धनम् ॥ ७२ ॥

ऋतुवर्धनम् ॥

वृत्तं वृत्तगृहस्य स्यादधिष्ठानं तदायतम् ।
तादृशं शिखरं तत्र चतस्रः पृथुनासिकाः ॥ ७३ ॥

अल्पास्तावत्य एवास्य गृहपिण्ड्यादि पूर्ववत् ।
पृष्ठे गर्भप्रमाणं तदर्धभद्रं तु पिण्डिके ॥ ७४ ॥

त्रिरष्टौ नासिका योज्या मुखे मण्डिगृहो (?) भवेत् ।

वृत्तगृहम् ।

आयताश्रमधिष्ठानं भानुकान्तस्य तस्य तु ॥ ७५ ॥

व्यासार्धाद् गर्भगेहं स्याच्छेषेण गृहपिण्डिका !
अष्टतलं खण्डहर्म्यं च शिखरं द्वादशाश्रकम् ॥ ७६ ॥

नासयो द्वा[1]दशैवास्मिन् गृहपिण्ड्यामथो सभाः ।
षोडश स्युश्च तन्मध्ये महाकोष्ठचतुष्टयम् ॥ ७७ ॥

---

१. 'द्वौ' क. ख. पाठः.

वृद्धसोपानमेवान्तर्लीनं स्याद् भानुकान्तके ।

भानुकान्तम् ।

अत्यन्तकान्ताधिष्ठानं चतुरश्रं हि तस्य तु ॥ ७८ ॥
तृतीयांशाद् गर्भगृहं शिखरार्धं सभाकृति ।
अर्धायमलहाराश्चाप्यंशाभ्यां कर्णकेष्वथ ॥ ७९ ॥
गर्भतुल्या वेदसभा महाकोष्ठानि चान्तरे ।
कपोते परितश्चापि द्व्यष्टौ तिलकनासिकाः ॥ ८० ॥
यथार्हं भूषयेच्छेषमेतदत्यन्तकान्तकम् ।

अत्यन्तकान्तम् ।

मसूरं चन्द्रकान्तस्याप्यायतं मण्डलाकृति ॥ ८१ ॥
व्यासार्धाद् गर्भगेहं स्याच्छेषं पिण्ड्यादिकं भवेत् ।
दीर्घवृत्तं च शिखरं तत्राष्टौ पृथुनासिकाः ॥ ८२ ॥
अल्पनास्यश्च तावत्यः शेषं प्रागिव भूषयेत् ।

चन्द्रकान्तम् ।

ब्राह्मणविमानाधिकारः ॥

चतुःस्फुटस्याधिष्ठानं प्राग्वद् दीर्घायतं भवेत् ॥ ८३ ॥
व्यासपादाद् गर्भगृहं गर्भार्धं गृहपिण्डिका ।
शिष्टनामलकं चूडाखण्डहर्म्ये च कल्पयेत् ॥ ८४ ॥
शिखरं कोष्ठकाकारं गर्भार्धान्मध्यनासिका ।
पार्श्वे द्वे द्वे महानास्यौ कूटकोष्ठादि पूर्ववत् ॥ ८५ ॥
तलेतले तु स्तम्भेषु वेदिकाजालकादिकम् ।
पुरस्तान्मण्डपं तुल्यमन्तःस्तम्भं तु तद्बहिः ॥ ८६ ॥
लाङ्गलाकृति कुड्यं तु यथाशोभं विभूषयेत् ।
त्रितलादियुतं नैकतलमेतच्चतुःस्फुटम् ॥ ८७ ॥

चतुःस्फुटम् ।

मन्त्रपूतस्य वेदाश्रमायतं स्यान्मसूरकम् ।
विस्तारार्धेन गर्भाख्यं शेषात् पिण्डी जलं[1]स्थले ॥ ८८ ॥
हारावली च स्यात् तस्य शिखरं तु सभाकृति ।
अन्तःस्तम्भं बहिः कुड्ये नानाजालकशोभितम् ॥ ८९ ॥
कूटकोष्ठादिकैर्दिक्षु विदिक्षु च विभूषयेत् ।
द्व्यष्टनास्यस्तु शिखरे कपोते लम्बनासिकाः ॥ ९० ॥
चतुर्विंशतिसंख्याः स्युर्द्वाराण्यपि चतुर्दिशम् ।
पुरस्तान्मण्डपं गर्भसमं बाह्ये च कुड्यकम् ॥ ९१ ॥
अलिन्दं खण्डहर्म्यं च कर्णे गर्भमिताः सभाः ।
तदन्तरे महाकोष्ठैः कूटाद्यैश्च विभूषयेत् ॥ ९२ ॥

मन्त्रपूतम् ।

आवन्त्यस्याप्यधिष्ठानं स्वव्यासार्धायताश्रकम् ।
अष्टांशांशौ गर्भगृहं भागैः पिण्ड्यादिकं त्रयम् ॥ ९३ ॥
पिण्ड्याश्चापि चतुष्कर्णौ लाङ्गलाकारभित्तिकम् ।
तदन्तरे च पूर्वाश्रस्तम्भाढ्यं शिखरं तु तत् ॥ ९४ ॥
सभाकारं चतुर्नासं मुखे भद्रसभान्विते ।
पक्षयोरल्पनास्यः स्युरन्तरे पृथुनासिकाः ॥ ९५ ॥
वल्लीमण्डलसोपानमन्तर्लीनं प्रयोजयेत् ।
गुह्यागुह्यक्रियाकुड्यस्तम्भयुक्तं तु नैकधा ॥ ९६ ॥
पादैश्च वेदीजालाद्यैर्भूषयेद् बहुभूमिकम् ।

आवन्त्यम्[2] ।

माहिषस्यायताश्रं स्यादधिष्ठानं तु तच्चतौ[3]त् ॥ ९७ ॥
तृतीयांशाद् गर्भगृहं शेषात् पिण्ड्यादिकं त्रयम् ।
तत्पुरस्ताच्च पृष्ठे च मध्यरङ्गे तु मण्डपे ॥ ९८ ॥

---

१. 'लं' क. ख. पाठः. २. 'न्तिकम्' ख. पाठः. ३. 'त्तदा' क. पाठः.

स्यातां च परितः खण्डहर्म्यं सत्कूटजालकम् ।
मूलमण्डपकण्ठाभ्यां हस्तिसोपानमन्तरे ॥ ९९ ॥
पुरः स्वस्तिकवद् वंशसभाकारमथापरे ।
नवनासं तु शिखरे शालावन्महिषाननम् ॥ १०० ॥
वेदीजालादिभिः शेषं प्राग्वदाभूष्य माहिषम् ।

माहिषम् ।

तन्त्रीकान्तमसूरं च चतुरश्रायतं भवेत् ॥ १०१ ॥
तद्व्यासार्धं गर्भगृहं शेषं स्याद् गृहपिण्डिका ।
अप्तलं खण्डहर्म्यं च शिखरं कोष्ठमेव हि ॥ १०२ ॥
सभामुखं पुरस्तात् स्यान्महानासी च पृष्ठतः ।
तत्र षोडश नास्यः स्युरष्टौ तिलकनासिकाः ॥ १०३ ॥
महाद्वारे क्रमात् सिंहपञ्जराणि दशैव तु ।
कपोताधो वेदकर्णलाङ्गलाख्यसभोद्गमम्[1] ॥ १०४ ॥
मध्यं[2] सभामुखोपेतमहानासीचतुष्टयम् ।
प्रमाणगेहविपुलनिर्गतं स्याद् यथारुचि ॥ १०५ ॥
कूटाद्यैर्भूषितं स्वाङ्गैस्तन्त्रीकान्तं प्रचक्षते ।

तन्त्रीकान्तम् ।

आयताश्रमधिष्ठानं विजयाङ्गस्य तस्य तु ॥ १०६ ॥
व्यासत्रिभागाद् गर्भाख्यं शेषं पिण्ड्यप्तलादिकम् ।
अष्टनासं तु शिखरं भवेत् ककरकोष्ठकम् ॥ १०७ ॥
कपोते तिलनास्यः स्युश्चतुर्विंशतिसंख्यया ।
सोपानमन्तर्लीनं स्याद् भूमौ भूमौ च मण्डपम् ॥ १०८ ॥
गर्भप्रमाणं तद्बाह्ये खण्डहर्म्यावली[3] भवेत् ।
युक्त्याङ्गैः[4] शेषमाभूष्य विजयाङ्गमिति स्मृतम् ॥ १०९ ॥

विजयाङ्गम् ।

---

१. 'भङ्गमम्' ग. पाठः. २. 'ध्या' क. ख. पाठः. ३. 'ण्डं', ४. 'क्ता' क. पाठः.

विशालभद्राधिष्ठानं प्राग्वद् व्यासे दशांशके ।
[१]द्विभागो गर्भविस्तारः शेषेण गृहपिण्डिकाम् ॥ ११० ॥

ब्रह्मद्वारं चूडहर्म्यं खण्डहर्म्यं च कल्पयेत् ।
पुरस्ताद् गर्भदीर्घं तु वेदाश्रं मण्डपं भवेत् ॥ १११ ॥

अभितोऽर्धेन कुड्यं चाप्यस्तलं खण्डहर्म्यकम् ।
चूडीककर्णप्रासादः शृङ्गं ककरकोष्ठकम् ॥ ११२ ॥

कपोतशाला पिण्डिः स्यादथ पिण्ड्यास्तु निर्गतम् ।
समर्पितसभारूपं मध्यमं मण्डनं भवेत् ॥ ११३ ॥

गर्भव्यासं तदध्यर्धद्विगुणायाममानतः ।
हारापञ्जरपूर्वाङ्गैर्निष्क्रान्तस्य सभाकृतिः ॥ ११४ ॥

प्रासादमण्डपाग्रे च पृष्ठे तत्पार्श्वपत्रयुक् ।
शिखरं चाष्टनासं स्यात् तिलकान्यथ षोडश ॥ ११५ ॥

मण्डपोपरि रङ्गं स्यादेकानेकतलान्वितम् ।

विशालभद्रम् ।

अधिष्ठानं तु वेदाश्रं चतुरंशाधिकायतम् ॥ ११६ ॥

गणिकादिविशालस्य शेषमर्धारिकास्तले ।
खण्डहर्म्यं च भवति कर्णप्रासादमध्यमे ॥ ११७ ॥

प्राग्वन्मण्डननिर्यूहकर्णमध्ये तथान्तरे ।
स्तम्भाः स्युर्गृहपिण्ड्याश्च पुरस्तान्मण्डपं भवेत् ॥ ११८ ॥

नालीगृहायामसमं मध्ये रङ्गं च तस्य तु ।
शेषं हर्म्यस्थलं वाह्ये कुट्टिमं जालकान्वितम् ॥ ११९ ॥

पिण्डिः कपोतजाला स्यात् तस्यां षोडश नासिकाः ।
शिखरं कोष्ठकं तु स्यात् पुरे ककरभद्रकम् ॥ १२० ॥

---

१. 'द्वितीयो ग' क. पाठः

तत्राष्टौ नासयः पार्श्वे (सु?स)भद्रं वा विभद्रकम् ।
एकाद्यभीष्टतलकं राजस्त्रीणां निकेतनम् ॥ १२१ ॥

गणिकाविशालम् ।

कर्णभद्रस्य च प्राग्वदधिष्ठानादिकं भवेत् ।
शिखरं च सभाकारं सचतुर्मुखनासिकम् ॥ १२२ ॥

अन्तर्लीनार्कनासाः स्युर्गृहपिण्ड्यप्तलान्तरे ।
स्तम्भान्तर्लीनसोपानाः कपोतेनैकनासिकम् ॥ १२३ ॥

कर्णप्रासादकाश्चूडहर्म्ये गर्भसमायताः ।
कपोतपञ्जरैः सिंहपञ्जरैर्लम्बनासिकैः ॥ १२४ ॥

गूढागूढक्रियास्तम्भभित्तिद्वारैश्च तोरणैः ।
चतुष्कोणे भद्रयुक्तं दिक्षु भद्रसभान्वितम् ॥ १२५ ॥

स्वस्तिभद्रकजालाद्यैर्भूषितं कर्णभद्रकम् ।

कर्णभद्रकम् ।

कर्णशालस्य च प्राग्वदधिष्ठानादिकं स्मृतम् ॥ १२६ ॥

चतुष्कर्णे भद्रशाला मध्यानिर्यूहकाः सभाः ।
भारान्तरप्रयोगं च यथाविधि निवेशयेत् ॥ १२७ ॥

गृहपिण्ड्या समाश्लिष्टमन्तर्लीनमलिन्दकम् ।
पिण्डिः कपोतशाला स्यात् कर्ण लाङ्गलभित्तिकम् ॥ १२८ ॥

अन्तरे स्थापयेत् स्तम्भं तद्भित्तावष्टनासिकाः ।
ऊर्ध्वभूकण्ठशिखरं सभाकारं प्रयोजयेत् ॥ १२९ ॥

ककरीभद्रवक्राङ्गं युग्यद्वारं यथारुचि ।
त्रिभौमं सप्तभौमं वा आवृताल्पार्कनासिकम् ॥ १३० ॥

वेदीजालादिभिश्चापि यथेष्टावयवैर्युतम् ।

कर्णशालम् ।

---

१. 'रुमद्रा' क. पाठः.

पद्मासनस्याधिष्ठानमायतं चतुरश्रकम् ॥ १३१ ॥
पञ्चमांशाद् गर्भगृहं गर्भार्धाद् गृहपिण्डिकाः ।
शेषेणाष्टलचूडीकखण्डहर्म्याणि गर्भवत् ॥ १३२ ॥
संश्लिष्टमध्यवासेन दिक्षु कर्णप्रमाणतः ।
प्रासादास्तत्र चत्वारः पृथङ्मण्डपसंयुताः ॥ १३३ ॥
विविधस्तम्भवद् रङ्गं तद्बाहिः कुड्यकं भवेत् ।
जालवेदीद्वारयुतं खण्डहर्म्याणि बाह्यतः ॥ १३४ ॥
समांशनिष्क्रमाढ्यानि चतुष्कर्णेषु वै पृथक ।
कूटानि स्युश्च तन्मध्ये कोष्ठकानि च योजयेत् ॥ १३५ ॥
मध्यावासावृतचतुष्कर्णलाङ्गलकुड्यकम् ।
अन्तःपूर्वाश्रकस्तम्भमन्तर्लीनमलिन्दकम् ॥ १३६ ॥
सभाभाशिखरे वेदमहानासाः स्युरल्पकाः ।
द्वादशैव बहिष्कर्णान्मुखशालाः समन्ततः ॥ १३७ ॥
यथार्हावयवैर्युक्तमेतत् पञ्चवसन्तकम् ।

पञ्चवसन्तकम् ।

व्यासत्रिभागदीर्घाश्रमिन्द्रकान्तस्य कुट्टिमम् ॥ १३८ ॥
तद्भामांशाद् गर्भगृहं गृहपिण्ड्यादि शेषतः ।
वेदभद्रसभा दिक्षु चतुष्कर्णेषु नासिकाः ॥ १३९ ॥
कपोतशालानिर्यूहमुखनास्यो भवन्ति च ।
गृहपिण्ड्यां षोडशैव शिखरं च सभाकृति ॥ १४० ॥
तत्कर्णहलभित्तेः स्यात् स्तम्भनिर्यूहमन्तरे ।
मुखशोभाल्पनास्योऽष्टौ प्राग्वच्छेषं विभूषयेत् ॥ १४१ ॥

इन्द्रकान्तम् ।

दीर्घाश्रं योगकान्तस्याप्यधिष्ठानमथोपरि ।
परिवृत्तायतं व्यासादष्टांशाद् गर्भमन्दिरम् ॥ १४२ ॥

अर्धेनार्धारिका हारा खण्डहर्म्यावली भवेत् ।
शिखरं दीर्घवृत्तं स्यात् पुरस्तान्नासिकाद्वयम् ॥ १४३ ॥
तदर्धात् पृष्ठतस्त्वेका परितश्चाल्पनासिकाः ।
चतुःसप्ततिसङ्ख्याः स्युः सोपानं पृष्ठरोहि च ॥ १४४ ॥
अन्तर्लीनं भवेदेतद् योगकान्तं नृपोचितम् ।

योगकान्तम् ।

स्यात् सर्वललितस्यापि दीर्घाश्रं हि मसूरकम् ॥ १४५ ॥
व्यासत्र्यंशाद् गर्भगृहं तदर्धाद् गृहपिण्डिका ।
कपोतशालाः कर्णेषु कुर्याद् भद्रसभाः पुनः ॥ १४६ ॥
तदन्तरे च शालाः स्युरन्तर्लीनं यथेष्टतः ।
सरङ्गे मण्डपे स्यातां पुरस्ताच्चास्य पृष्ठतः ॥ १४७ ॥
शिखरं च सभाकारं सभद्रं वेदनासिकम् ।
शेषैरङ्गैरनल्पैश्चाप्यल्पैरपि च भूषयेत् ॥ १४८ ॥

सर्वललितम् ।

प्रत्यन्तकान्ताधिष्ठानं समानचतुरश्रकम् ।
मध्ये वेदांशतः स्तम्भैरावृतं स्यात् तदर्धतः ॥ १४९ ॥
गृहपिण्डिर्भवेत् तस्य कर्णेषु हलकुड्यकम् ।
अप्तलं खण्डहर्म्यं च भागाभ्यां कर्णकोटिषु ॥ १५० ॥
सभाः स्युर्मध्यतस्तासां भद्रशालचतुष्टयम् ।
स्यात् पञ्जराद्यैर्जालाद्यैर्हारामध्येषु भूषयेत् ॥ १५१ ॥
वस्तुमध्यं सभाकारं मुखशालान्वितं भवेत् ।
शिखरे क्षुद्रनास्योऽष्टौ भद्रकूटैश्च भूषयेत् ॥ १५२ ॥

प्रत्यन्तकान्तम् ।

अधिष्ठानं विशालस्य दीर्घाश्रं तस्य विस्तृतेः ।
त्रिभागाद् गर्भगेहं स्याच्छेषेणाम्बुतलं भवेत् ॥ १५३ ॥

चूडिकाखण्डहर्म्ये च शिखरं कोष्ठकाकृति ।
पुरे पुरे च षण्णेत्रे नास्यौ तत्र नियोजयेत् ॥ १५४ ॥
गृहपिण्ड्यां द्विरष्टौ स्युः कर्णेष्वपि च मध्यतः ।
विशालसमभद्रैश्च कूटाद्यैरपि भूषयेत् ॥ १५५ ॥

विशालम् ।

भवेदुत्पलपत्रस्य दीर्घाश्रं तु मसूरकम् ।
नालीगृहं तृतीयांशाच्छेषांशाद् गृहपिण्डिका ॥ १९६ ॥
कपोतशालासदृशी स्यात् तद्बाह्येऽप्तलादिकम् ।
शिखरं च सभाकारं तत्र नासीत्रयं भवेत् ॥ १५७ ॥
कपोते परितोऽल्पाः स्युरष्टात्रिंशत् तु नासयः ।
वेदिकाजालसोपानतोरणाद्यैश्च भूषयेत् ॥ १५८ ॥

उत्पलपत्रम् ।

अधिष्ठानं महाराजच्छन्दस्याप्यायताश्रकम् ।
नालीगृहं व्यासपादाच्छेषं पिण्ड्यप्तलादिकम् ॥ १५९ ॥
कोष्ठकं शिखरं गर्भसमव्यासार्धनिर्गतम् ।
शालामुखस्य संस्थानं पुरस्तादपि पृष्ठतः ॥ १६० ॥
गृहपिण्ड्यां चार्धहारे चतस्रः स्वल्पनासिकाः ।
चतुर्दिशं महाशाला गर्भमानास्तु कर्णगाः ॥ १६१ ॥
सभाः स्युर्भागनिष्क्रान्ताश्चान्तर्लीनाधिरोहणम् ।
निर्यूहार्धेन तत्रापि सोन्नतानतकोष्ठकैः ॥ १६२ ॥
पञ्जराणि तथा कुर्यान्नासयः स्वस्तिकोपमाः ।
हस्त्यादिकानि चत्वारि सोपानानि प्रदक्षिणम् ॥ १६३ ॥
श्रीखण्डचित्रखण्डाख्यौ स्तम्भौ स्यातामधस्तले ।
पद्मासनपिण्डिपादस्तम्भाश्चोपरिभूमिषु ॥ १६४ ॥
नन्द्यावर्तं गजाक्षं च गवाक्षं च मरुत्पथम् ।
तले तले प्रयुञ्जीयादुत्तरं त्रिविधं तथा ॥ १६५ ॥

---

१. 'षणैः' ग. पाठः.

प्रतयस्त्रिविधास्तद्वत् तोरणानि च वेदिकाः ।
सर्वकायानुकायाढ्यं सर्वाङ्गैरपि मण्डितम् ॥ १६६ ॥
महाराजाह्वयच्छन्दमावासश्चक्रवर्तिनाम् ।

महाराजच्छन्दम् ।

मालीगृहस्याधिष्ठानं चतुरश्रायतं स्मृतम् ॥ १६७ ॥
स्याद् वेदांशाद् गर्भगृहं गर्भार्धाद् गृहपिण्डिका ।
जलस्थलं चूडहर्म्यं खण्डहर्म्यं च शेषतः ॥ १६८ ॥
शिखरं स्याद् दीर्घसभा पुरस्तान्नासिकाद्वयम् ।
पश्चादेका गेहपिण्ड्यां द्व्यष्टौ नास्यो यथार्हतः ॥ १६९ ॥
निष्क्रमोपेतकूटाद्यैरुपेतं नैकभूमिकम् ।

मालीगृहम् ।

नन्दीविशालाधिष्ठानं त्र्यंशोद्रिक्तायताश्रकम् ॥ १७० ॥
गर्भाख्यं व्यासरामांशाच्छेषेणार्धारिकातलम् ।
चूडीकखण्डहर्म्ये च कूटकोष्ठादिभिर्युतम् ॥ १७१ ॥
खण्डहर्म्याग्रतो गर्भात् कर्णप्रासादकः समः ।
पार्श्वयोर्हस्तितुण्डे च स्यातां तद्गृहपिण्डिके ॥ १७२ ॥
शिखरे चापि नास्योऽष्टौ विंशतिश्च भवन्ति हि ।
शिखरं कोष्ठकं सर्वं कूटाद्यङ्गैश्च भूषयेत् ॥ १७३ ॥

नन्दीविशालम् ।

पृथिवीजयसंज्ञस्य वेदाश्रायतकुट्टिमम् ।
गर्भगेहं च वेदांशाद् गृहपिण्डिस्तदर्धतः ॥ १७४ ॥
शिखरं कोष्ठकं मध्ये रङ्गं स्याद् गर्भमानतः ।
मुखे मुखे मण्डपं स्याच्छेषं हर्म्यातलादिकम् ॥ १७५ ॥
गृहपिण्डीसमोद्दीर्णे कोष्ठे पूर्वापरस्थिते ।
पार्श्वयोश्च तथा मूर्ध्नि नासिकास्तिलकान्विताः ॥ १७६ ॥

ऊहप्रत्यूहसहितं नैकभौममिदं स्मृतम् ।

पृथिवीजयम् ।

सर्वाङ्गसुन्दरस्यापि दीर्घाश्रं स्यान्मसूरकम् ॥ १७७ ॥
नालीगृहं खरामांशात् तदर्धाद् गृहपिण्डिका ।
शेषं जलस्थलं चूडाखण्डहर्म्यावली तथा ॥ १७८ ॥
कर्णप्रमाणप्रासादाश्चत्वारः स्युस्तदन्तरे ।
तद्व्यासद्विगुणायामवेदकोष्ठानि योजयेत् ॥ १७९ ॥
आयताश्रे तु शिखरे महानास्यः षडेव हि ।
स्वल्पा[1]स्तत्परितश्चाष्टौ चत्वारिंशच्च नासयः ॥ १८० ॥
प्रमुखे मण्डपं [2]भक्तिद्वयकूटादिशोभितम् ।
शालामुखानि कोष्ठानि सोपानं समखण्डकम् ॥ १८१ ॥
त्रितलादितलैर्युक्तं वेदीजालादिशोभितम् ।
उक्तानुक्तैश्च सर्वाङ्गैर्युक्तं सर्वाङ्गसुन्दरम् ॥ १८२ ॥

सर्वाङ्गसुन्दरम् ।

छायागृहस्याधिष्ठानमायताश्रं तदर्धतः ।
नालीगृहं मण्डपवत् तच्छिरोहर्म्यसंयुतम् ॥ १८३ ॥
गर्भार्धे गृहपिण्डी स्यात् कूटाद्यङ्गैश्च भूषितम् ।
वेदिकाजालकाद्यैश्चच्छायागृहमिदं स्मृतम् ॥ १८४ ॥

छायागृहम् ।

अधिष्ठानं चायताश्रं रतिवर्धनकस्य तु ।
व्यासार्धाद् गर्भगेहं स्याच्छेषेणार्धारिकासलम् ॥ १८५ ॥
चूडीकखण्डहर्म्ये च कर्णे मध्येऽन्तरे पुनः ।
कूटाद्यैर्वेदिकाद्यैश्च सर्वाङ्गैरपि भूषयेत् ॥ १८६ ॥
कर्करीकृतकोष्ठं स्याच्छिखरं साष्टनासिकम् ।
पुरस्तान्मण्डपं तस्य गर्भव्यासायतं भवेत् ॥ १८७ ॥

---

[1] 'स्तत्पुरत' क. पाठः [2] 'पङ्क्तिद्व' ग. पाठः.

खण्डहर्म्यादिभिर्युक्तं नैकस्तम्भैरलङ्कृतम् ।
पिण्ड्यां तिलकसंयुक्ताश्चतुर्विंशतिनासिकाः ॥ १८८ ॥
कायानुकायभूषाढ्यं रतिवर्धनकं भवेत् ।

रतिवर्धनम् ।

क्षत्रियविमानानि चतुर्विंशतिः ।

स्वव्यासपाददीर्घाश्रं विशालायतकुट्टिमम् ॥ १८९ ॥
व्यासाष्टांशद्विभागेन गर्भगेहं तदर्धतः ।
अर्धारिकं भवेद् ब्रह्मद्वारशोभाध्वजादिभिः ॥ १९० ॥
शिखरं दीर्घवृत्तं स्यात् पुरस्तान्नासिकात्रयम् ।
परितोऽष्टौ विंशतिश्च नासिकाः समनिर्गमाः ॥ १९१ ॥
व्यासनिर्गतकूटानि कोष्ठानि परितस्तथा ।
शेषं तिलकनासादिहारापञ्जरकादिभिः ॥ १९२ ॥
एकद्वित्रितलं ह्येतद् विशालालयसंज्ञितम् ।

विशालालयः ।

आयताश्रमधिष्ठानं स्याच्चतुष्पादिकस्य तु ॥ १९३ ॥
व्यासरामांशतो दीर्घं गर्भं रामैकभागतः ।
वेदाश्रं तु सभाकारं शिखरं नवनासिकम् ॥ १९४ ॥
व्यासद्विगुणकायामौ पार्श्वयोः कोष्ठकौ तथा ।
शेषेणाप्तलखण्डाख्यहर्म्ये स्यातां च तत्पुरः ॥ १९५ ॥
पृष्ठे च विवृतस्तम्भं सरङ्गं मण्डपं भवेत् ।
तद्वशान्निर्गतं खण्डहर्म्यं तत्कर्णकोटिषु ॥ १९६ ॥
हलशालाश्चतस्रः स्युर्व्यासायामविभागके ।
कर्णकूटान्तरेष्वष्टौ दण्डशाला भवन्ति हि ॥ १९७ ॥
बहिरन्तश्च कोष्ठानि विमानस्य चतुर्दश ।
शेषं यथार्हमाभूष्य विमानं विट्चतुर्थयोः ॥ १९८ ॥

चतुष्पादिकम् ।

अधिष्ठानं चायताश्रं तुरङ्गवदनस्य तु ।
व्यासत्र्यंशाद् गर्भगृहं तदर्धार्धारिका भवेत् ॥ १९९ ॥
अप्तलं खण्डहर्म्यं च स्यातां शेषविभागतः ।
दिक्षु गर्भसभा चान्तः कर्णकूटादिमध्यतः ॥ २०० ॥
कोष्ठानि स्युश्च शिखरं सभाकारं तु तत्पुरः ।
अश्वाननसभाकारं पुरस्ताद् वेदनासिकम् ॥ २०१ ॥
सोपानमन्तर्लीनं स्यात् प्राग्वदङ्गानि योजयेत् ।

तुरङ्गवदनम् ।

अधिष्ठानादिकं प्राग्वद् गणिकापिण्डिकस्य तु ॥ २०२ ॥
गर्भार्धं[1] गृहपिण्डिः स्याच्छेषं तोयस्थलादिकम् ।
मध्ये चतुर्दिशं गर्भसभाः स्युर्गर्भमानतः ॥ २०३ ॥
बाह्ये कूटं कोष्ठकं च स्वेष्टभद्रसभान्वितम् ।
अन्तर्लीनं हि सोपानं चतस्रः पृथुनासिकाः ॥ २०४ ॥
मण्डपं प्रागगर्भमितं शिखरं कोष्ठकाकृति ।

गणिकापिण्डिकम् ।

दीर्घपृष्ठमधिष्ठानं श्येनच्छन्दस्य तस्य तु ॥ २०५ ॥
व्यासवेदांशतो गर्भं कुर्याच्चार्धेन पिण्डिकाम् ।
शेषेणाप्तलकं खण्डहर्म्यं च परितो भवेत् ॥ २०६ ॥
श्येनाकारे तथा नास्यौ कुर्यात् तु शिखराग्रतः ।
शिखरे नासयोऽल्पाः स्युरष्टाविंशतिसंख्यया ॥ २०७ ॥

श्येनच्छन्दम् ।

प्राग्वत् कुक्कुटपुच्छस्याप्यधिष्ठानं तु तत्ततः ।
तृतीयांशाद् गर्भगृहं तदर्धाद् गृहपिण्डिका[2] ॥ २०८ ॥

---

१. 'ण्डं' ख. पाठः. २. 'कम्' ग. पाठः.

अप्तलं चूडहर्म्यं च शिखरं च सभाकृति ।
सोपानमन्तर्लीनं स्यादष्टाविंशतिनासयः ॥ २०९ ॥
कूटादिभिः पुरोक्ताङ्गैर्युक्तं कुक्कुटपुच्छकम् ।

कुक्कुटपुच्छकम् ।

उत्पलस्याप्यधिष्ठानं व्यासार्धेनायताश्रकम् ॥ २१० ॥
तत्पादांशाद् गर्भगृहं शेषेण गृहपिण्डिका ।
स्तम्भाः स्युर्विवृतास्तस्य शिखरं चाष्टनासिकम् ॥ २११ ॥
कपोते नासयो द्व्यष्टौ प्राग्वेदाश्रसभा भवेत् ।
नृत्तरङ्गं च मध्ये स्याच्छेषेणाम्बुतलादिकम् ॥ २१२ ॥
कूटाद्यैर्वेदिकाद्यङ्गैर्युक्तं स्यादुत्पलाह्वयम् ।

उत्पलम् ।

अधिष्ठानं त्वायताश्रं मुण्डप्रासादकस्य तु ॥ २१३ ॥
व्यासत्रिभागान्नालीकं तदर्धाद् गृहपिण्डिका ।
पुरस्ताच्चतुरश्रं स्यान्मण्डपं गर्भसम्मितम् ॥ २१४ ॥
शिखरं कोष्ठकं नास्यो द्वादशैव समन्ततः ।
शेषं कपोतशाला स्याच्चूडहर्म्यादिभिर्युतम् ॥ २१५ ॥
एकद्वित्रितलं नाम मरुत्पथसमन्वितम् ।
मुण्डप्रासादसंज्ञं तु भवनं वैश्यशूद्रयोः ॥ २१६ ॥

मुण्डप्रासादम् ।

एवं तु जातीतरसंज्ञितानां जात्याह्वयानामपि चालयानाम् ।
देवोचितानां च नरोचितानां प्रोक्तो ह्यलङ्कारविधिः समासात् ॥ २१७ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
जातीतरजात्यलङ्कारविधिपटल एकोनत्रिंशः ।

अथ त्रिंशः पटलः ।

अथ द्वादशभौमादि यावत् तु त्रितलं भवेत् ।
प्रोक्तानां च विमानानामुत्तमादिप्रभेदतः ॥ १ ॥

उत्सेधव्यासमानं तु हस्तैः पृथगिहोच्यते ।
तत्रादित्यतलं श्रेष्ठं शतहस्तोच्छ्रितं भवेत् ॥ २ ॥

हस्तसप्ततिविस्तारं मुख्यं जात्यपि च क्रमात् ।
त्रिषष्टिहस्तविस्तारं त्रिनवत्युन्नतं तु यत् ॥ ३ ॥

उत्तमेन तु मानेन स्यादेकादशभूमिकम् ।
तथा चतुरशीत्युच्चं सप्तपञ्चाशता ततम् ॥ ४ ॥

दशभौमं स्मृतं धाम श्रेष्ठमानेन शोभनम् ।
पञ्चसप्ततितुङ्गं यदेकपञ्चाशता ततम् ॥ ५ ॥

नवभौमं तु तन्मुख्यं यथायुक्ति नियोजितम् ।
उच्चं षडधिकं षष्ट्या चत्वारिंशच्च पञ्च च ॥ ६ ॥

कराणां विस्तृतं धाम भवेदष्टतलं शुभम् ।
सप्तपञ्चाशदुत्तुङ्गं त्रिंशता नवकेन च ॥ ७ ॥

कराणां विस्तृतं धाम सप्तभौमं प्रकीर्तितम् ।
त्रयस्त्रिंशत्करव्यासं चत्वारिंशत्करैरपि ॥ ८ ॥

नन्दहस्तैश्च यत्तुङ्गं पञ्चभौमं तु तद्भवेत् ।
त्रिंशता चैकविंशत्या तुङ्गव्यासं चतुस्तलम् ॥ ९ ॥

प्रकृत्या चातिशक्वर्या त्रिभौमं तुङ्गविस्तृतम् ।
एवं त्रितलमारभ्य यावद् द्वादशभूमिकम् ॥ १० ॥

उक्तमानात् प्रतितलं ह्रासयेद् द्विकरं क्रमात् ।
मध्यमानि विमानानि भवन्तीह दश क्रमात् ॥ ११ ॥

तद्वन्मध्यविमानानां ह्रासेन द्विकरं पृथक् ।
कनिष्ठादिविमानानि सिद्ध्यन्त्या जगतीतलात् ॥ १२ ॥

अथवा युग्महस्तैस्तु विकारकरमादितः ।
सप्तम्यन्तं विमानानि जात्यादि प्रभवन्ति हि ॥ १३ ॥

तान्यपि त्रितलादीनि भवन्त्यर्कतलान्तकम् ।

जातिविमानाधिकारः ।

अत्यष्टिहस्तादारभ्य आत्रिषष्टिकराततात् ॥ १४ ॥
छन्दानि पञ्चभौमादि भवन्त्यार्कतलादिह ।
द्विद्विहस्तविवृद्धानां कनिष्ठाद्यष्टकत्रयम् ॥ १५ ॥

छन्दविमानाधिकारः ।

त्रयोदशकरव्यासात् पञ्चपञ्चाशदाततेः ।
द्विहस्तवर्धनात् प्राग्वद् विकल्पान्येकविंशतिः ॥ १६ ॥

विकल्पविमानानि ।

एकादशकरात् सप्तचत्वारिंशत्कराततेः ।
द्विहस्तवर्धनात् प्राग्वदूनविंशतिसंख्यया ॥ १७ ॥
चतुर्भौमाद्यार्कभौमादाभासाख्यानि तानि वै ।

आभासविमानानि ।

युग्मायुग्मकरैः पङ्क्तिनवहस्तादितः क्रमात् ॥ १८ ॥
अष्टसप्तकषट्पञ्चकरैः श्रेष्ठादिकानि तु ।
चतुस्त्रिद्वितलानि स्युः क्षुद्राख्यानि यथाक्रमम् ॥ १९ ॥
अथवा त्रिचतुर्हस्तव्यासात् क्षुद्रेषु धामसु ।
एकभौमं द्विभौमं च यथायुक्ति नियोजयेत् ॥ २० ॥
द्विद्विहस्तविवृद्ध्या तु नीचादीनि समूहयेत् ।

अत्र पितामहः —

“पाङ्क्तिहस्तैस्ततं नन्दकरव्यासमिहोत्तमम् ।
भवेदेकतलं हस्तैर्मध्यं वस्वृषिसम्मितैः ॥
कनिष्ठमृतुबाणैः स्यादेवमेकतलत्रयम् ।”

इति ।

क्षुद्रविमानाधिकारः ।

अथवा सर्वजात्यानां विमानानां समासतः ॥ २१ ॥

स्वव्यासद्विगुणादुच्चमष्टांशं वाधिकं भवेत् ।
अथवाल्पकनिष्ठानां व्यासे सप्तविभागके ॥ २२ ॥
षडङ्गाधिकमुच्चं स्यान्मध्यानां पञ्च चाधिकम् ।
त्र्यंशाधिकं चोत्तमानां प्रासादानामिहोन्नतिः ॥ २३ ॥
यथाधिकारं प्रासादा देवादीनां समृद्धिदाः ।
ब्रह्मविष्णुशिवानां चाप्युत्तमं चक्रवर्तिनाम् ॥ २४ ॥
शस्तं द्वादशभौमं स्यान्नान्येषां तद् विधीयते ।
त्रयस्त्रिंशत्सुराणां च यक्षनागेन्द्रवेधसाम् ॥ २५ ॥
एकादशतलं शस्तं द्वितलं शशिसूर्ययोः ।
महाराजाधिराजानां विमानं नवभूमिकम् ॥ २६ ॥
अष्टभौमं तु गन्धर्वसिद्धविद्याधरोचितम् ।
सप्तभौमं द्विजेन्द्राणां नृपाणां च समृद्धिदम् ॥ २७ ॥
षड्भौमं मण्डलेन्द्राणां पञ्च स्युर्यौवराजकम् ।
सामन्तानां चतुर्भौमं पुरेशानां च शस्यते ॥ २८ ॥
श्रीमतां वैश्यशूद्राणां सेनेशानां त्रिभौमकम् ।
द्वितलं चैकभौमं च सर्वदेवनरोचितम् ॥ २९ ॥

अत्र —

यदुक्तं तु द्विजातीनामन्येषां तलसंख्यकम् ।
तत् सर्वं द्युसदा[1]मिष्टं द्विजेन्द्रोक्तं च भूभुजाम् ॥ ३० ॥
वैश्योक्तं चैव शूद्राणां द्विजानां सर्वमेव वा ।
हीनानां नाधिकोक्तं स्यादिति प्राह पराशरः ॥ ३१ ॥
विमानाच्छतहस्तोच्चादाधिकं न कलौ स्मृतम् ।
महावातादिपीडाभिः पीड्यते यद्यतोऽधिकम् ॥ ३२ ॥
स्वव्यासार्धाद् गर्भगृहमाविशेषोदिते भवेत् ।
विमा[2]नव्यासनन्दांशात् कूटशालाविशालता ॥ ३३ ॥

---

1. 'मादिष्टं' क. ख. पाठः. २. 'ने' ग. पाठः.

विस्तारद्विगुणायामो युग्मायुग्मे च कोष्ठके ।
पञ्जरालिन्दके तुल्ये भागार्धार्धारिको भवेत् ॥ ३४ ॥
पञ्चत्र्यंशमलिन्दं वा गृहपिण्ड्यादि शेषतः ।

तलविभागाधिकारः ।

कायश्चाप्यनुकायश्च प्रासादाङ्गं द्विधा स्मृतम् ॥ ३५ ॥
अधिष्ठानं तथा स्तम्भो भित्तिः कुम्भश्च मण्डिकाः ।
पोतिका स्याद् भारतुला जयन्तय इति क्रमात् ॥ ३६ ॥
अनुमार्गाश्च कायः स्यादनुकायोऽथ कथ्यते ।
उत्तरं वाजनं श्रेणी बलीकं कर्णपत्रिका ॥ ३७ ॥
सन्धिद्वारकपाटानि योगः प्रच्छादनानि च ।
कुम्भवल्ली तोरणानि मुष्टिबन्धाष्टमङ्गलैः ॥ ३८ ॥
मृणालिका दण्डिका च नीप्र[1]हाराश्च नासिकाः ।
पट्टिका वलभी बन्धवेदिका जालकानि च ॥ ३९ ॥
कर्णकूटास्तथा कूटा नीडकोष्ठादयोऽपि च ।
ऊर्ध्वप्रच्छादविन्याससुधालोष्टेष्टकादयः ॥ ४० ॥
अनुकायाभिधानानि सामान्यानि भवन्ति हि ।
देशोचितानि क्षुद्राल्पविमानानि भवन्ति हि ॥ ४१ ॥
नागरं द्राविलं चैव वेसरं च त्रिधा मतम् ।
चतुरश्रं वायताश्रं नागरं तत् प्रचक्षते ॥ ४२ ॥
षडश्रं वाथवाष्टाश्रं समं वा दीर्घमेव वा ।
द्राविलं सौधमुद्दिष्टं वेदाश्रं वा गलादधः ॥ ४३ ॥
कण्ठादुपरि चाष्टाश्रं तदपि द्राविलं स्मृतम् ।
वृत्तं वृत्तायतं वापि द्व्यश्रं वृत्तमथापि वा ॥ ४४ ॥
कण्ठादधस्ताद् वेदाश्रं तदूर्ध्वं वर्तुलं च यत् ।
विमानं वेसराख्यं स्यात् त्रयं तत्त्रिगुणं स्मृतम् ॥ ४५ ॥

---

[1] 'प' क. ख. पाठः.

सात्त्विकं नागरं तत् स्याद् राजसं द्राविलं स्मृतम् ।
तामसं वेसरं चेति त्रयं ब्रह्मादिदैवतम् ॥ ४६ ॥
त्रियुगं तत् त्रिवर्णं च त्रितत्त्वं च क्रमात् स्मृतम् ।
नागरस्य स्मृतो देशो हिमवद्विन्ध्यमध्यगः ॥ ४७ ॥
द्राविलस्योचितो देशो द्राविडः स्यान्न चान्यथा ।
आगस्त्यविन्ध्यमध्यस्थो देशो वेसरसम्मतः ॥ ४८ ॥
सर्वाणि सर्वदेशेषु भवन्तीत्यपि केचन ।
समासादत्र सामान्यं तलनिर्माणमिष्यते ॥ ४९ ॥
त्रिपञ्चसप्तनवभिः करैरेकतलं स्मृतम् ।
रुद्रातिजगतीसंख्यैर्हस्तैः स्याद् द्वितलं पुनः ॥ ५० ॥
त्रितलं पञ्चदशभिः कुर्यात् सप्तदशैव तु ।
अत ऊर्ध्वं प्रतितलं पञ्चहस्ताविवर्धनात् ॥ ५१ ॥
आद्वादशतलं धाम्नां यथावन्मानमूहयेत् ।
अल्पोत्तमविमानानां व्यासाद् द्विगुण उच्छ्रयः ॥ ५२ ॥
द्विगुणात् सप्तमांशोनमल्पमध्येषु तुङ्गता ।
तस्मादर्धांशहीनः स्यादुत्सेधोऽल्पाधमस्य तु ॥ ५३ ॥
व्यासेऽभिकृतिकोष्ठे स्यात् पीठं कोष्ठेन मध्यतः ।
तद्बहिर्वसुकोष्ठानां पङ्क्त्या गर्भगृहं भवेत् ॥ ५४ ॥
कोष्ठपङ्क्त्या बहिर्भित्तिस्तत्र द्वारं तु कोष्ठतः ।
एकभित्त्येकतलकं दैवं धामेदमीरितम् ॥ ५५ ॥
तद्वत् प्रासादविस्तारस्यैकाशीतिपदस्य तु ।
मध्यस्थनवकोष्ठे स्यात् सपीठं गर्भमन्दिरम् ॥ ५६ ॥
तद्बाह्ये कोष्ठपङ्क्त्या तु भित्तिं द्वारं च कल्पयेत् ।
तद्बाह्यपङ्क्त्या परितः कल्पयेन्मध्यनाडिकाम् ॥ ५७ ॥
प्रासादभित्तिं तद्बाह्ये पङ्क्त्या द्वारं च योजयेत् ।
प्राच्यां वा पश्चिमे भित्त्योर्द्वारमेकैककोष्ठतः ॥ ५८ ॥
एवं चाल्पविमानानि विज्ञेयानि यथारुचि ।
एकभौमानि वा कुर्याद् द्वितलान्तानि शक्तितः ॥ ५९ ॥

एतेषामात्तविस्ताराद् द्विगुणः स्यादिहोच्छ्रयः ।
उच्छ्रये चाष्टधा भक्ते स्यादधिष्ठानमंशतः ॥ ६० ॥
स्तम्भोत्सेधस्तु भागाभ्यां प्रस्तरश्चैकभागिकः ।
कण्ठश्चांशेन शिखरं द्वाभ्यां स्थूपिस्तथांशतः ॥ ६१ ॥
एवं धामैकतलकं द्वितलं च समूहयेत् ।
तत्राधिष्ठानतुङ्गस्य त्रिधा भक्तस्य भागशः ॥ ६२ ॥
भागेन जगतीं कुर्यादंशेन कुमुदं तथा ।
शिष्टभागे तु वेदांशे कुर्यादंशेन पट्टिकाम् ॥ ६३ ॥
स्यादंशेनान्तरं शेषावंशौ प्रतिमुखं भवेत् ।
अल्पक्षुद्रविमानानामधिष्ठानमिदं भवेत् ॥ ६४ ॥
मुख्यजातीतराणां च जात्यानां च यथोचितम् ।
विमानानामधिष्ठानं सोपपीठं निगद्यते ॥ ६५ ॥
मसूरकं चाधिष्ठानं वस्त्वाधारं च कुट्टिमम् ।
तलं चाद्याङ्गमिति च शब्दाः पर्यायवाचकाः ॥ ६६ ॥
प्रासादस्तु निजैरङ्गैरधितिष्ठति यं सदा ।
दृढं शिलादिघटितं तदधिष्ठानसंज्ञितम् ॥ ६७ ॥
पूर्वमुक्तप्रकारेण स्थले दृढतरं चिते ।
गर्भन्यासं च कृत्वादावुपपीठं तु योजयेत् ॥ ६८ ॥
अधोऽधिष्ठानकानां स्यादुपपीठं भवेद् यदि ।
उन्नत्यर्थं च शोभार्थं रक्षार्थं च विशेषतः ॥ ६९ ॥
वेदीभद्रं प्रातिभद्रं सुभद्रं च त्रिधा मतम् ।
अर्कांशे तूपपीठोच्चै[1]रुपानद्व्यंशमंशतः ॥ ७० ॥
पद्मं क्षेपणमर्धांशाद् ग्रीवा पद्मांशतो भवेत् ।
अर्धेन कम्पस्तस्योर्ध्वमब्जं चांशेन वाजनम् ॥ ७१ ॥

---

[1] 'च्चे उपा' क. ख. पाठः.

शिष्टांशेनोर्ध्वकम्पश्चेत्यष्टाङ्गमुपपीठकम् ।
षडङ्गं वा विधातव्यमूर्ध्वाधः पङ्कजं विना ॥ ७२ ॥
वेदीभद्रमिदं प्रोक्तं सर्वहर्म्योचितं द्विधा ।
अश्विदृक्छिवभागैस्तु भानुभागांशकांशकैः ॥ ७३ ॥
रामांशांशकभागैस्तु द्वाभ्यामंशेन योजयेत् ।
जन्मनो वाजनान्तं तत्तुङ्गे त्रिनवभागिके ॥ ७४ ॥
पादुकं पङ्कजं कम्पः कण्ठमुत्तरमम्बुजम् ।
कपोतालिङ्गकान्तादि प्रतिवाजनमुच्यते ॥ ७५ ॥
प्रतिभद्राह्वयं त्वेतत् सर्वालङ्कारसंयुतम् ।
प्रकृत्यंशे तदुत्सेधे भागाभ्यां जन्म चाम्बुजम् ॥ ७६ ॥
अर्धेन गलमर्धेन पद्मं द्व्यंशं तु वाजनम् ।
अर्धेनाब्जं तथा कम्पमष्टौ कण्ठोंऽशमुत्तरम् ॥ ७७ ॥
अर्धेनाब्जं तु गोपानं त्रिभिः स्यात् कम्पमूर्ध्वतः ।
सुभद्रकमिदं नाम्ना कथितं ह्युपपीठकम् ॥ ७८ ॥
सिंहेभमकरव्यालभूतपत्राद्यलङ्कृतम् ।
प्रतिवक्त्रझषास्यं स्याद् बालेनारूढमस्तकम् ॥ ७९ ॥

अत्र मयः —

"आत्ताधिष्ठानतुङ्गाद् द्विगुणमथ समं सार्धमर्धत्रिपादं
पञ्चांशं द्व्यंशकं वानलसममिति त्रिद्व्येकमात्रोपपीठम् ।
सप्रत्यङ्गं समङ्गं तदपि च महता वाजनेनोपयुक्तं
सर्वेषां चापि धाम्नां दृढमुचितमधो योजयेत् तूपपीठम् ॥"

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापादे जात्यादिविमान[1]विभागोपपीठविधि-
पटलस्त्रिंशः ॥

शुभं भूयात् ।

---

[1] 'नभा' ख· पाठः. 'जात्यादिविभागविमानोपपीठः' ग. पाठः.

स्मृतग्रन्थाः।

ग्रन्थनाम.	पृष्ठम्.
अजितम्	७९, ८०, ९८.
कालोत्तरम्	१६, २९, ३३, ३४, ४६, ६०, १०४.
कालोत्तरटीका	३२, ४६.
किरणम्	२, ५, २२, २३, ४५.
कूर्मम्	८.
चन्द्रज्ञानम्	७०.
तत्त्वप्रकाशः	१०, ११, १२, १३, १९.
तत्त्वसागरः	७९.
तत्त्वसिद्धिः	१४, १५, १९.
देव्या मतम्	९७.
न्यायः	९.
पराख्यम्	४०, २१, २३, ४३, ९९, १४०.
पौरुषम्	४३.
पौष्करम्	६५, ८८, ९९, ११६, १२४, १३३, १४०, २०३, २०८, २१३.
प्रतिष्ठापद्धतिः	९९.
प्रतिष्ठासमुच्चयः	९६.
प्रयोगमञ्जरी	६५, ९७, १२५.
बृहत्कालोत्तरम्	२३, ९९, १२२, १४०.
ब्राह्मम्	८.
भोजेन्द्रपद्धतिः	७४, ७५.
मकुटोत्तरम्	१४८.
मञ्जरी	७५, ९७, १०३, १०५, ११२, १३३, १४२, १४४, १५०, १६३, २४६, २४९, २६२, २६४.

ग्रन्थनाम. पृष्ठम्.

मतङ्गम् २०, २१, २२, २५, २६, २७, ३७, ४९, ५९, ९७, १४०.
माहेन्द्रम् ९५.
मोहशूरोत्तरम् ९९, २०३, २०८, २१४.
योगशिवपद्धतिः ९६.
योगानुशासनम् ४०.
रत्नत्रयम् १०, ११, १६, ५९.
लम्बितम् २.
ललितम् १२७, १२८, १३४.
वातुलम् ९२, १०३.
वातुलोत्तरम् ९९.
विजयम् ४९, ९७.
विश्वकर्मीयम् २५९.
वीरम् ९६.
वैष्णवम् ८.
शिवधर्मः १००, १२१.
श्रुतिः ३, ९, १६.
षट्त्रिंशत्तत्त्वसिद्धिः १२.
सर्वज्ञानसमुद्रः ९९.
सर्वज्ञानोत्तरम् ९८.
संहिता ८८, १३२, १३३.
सान्तानिकम् ९८.
स्कान्दम् ८.
स्मृतिः ७.
स्वच्छन्दभैरवम् २२०.
स्वायम्भुवम् ४, ५, ६, १६, २२, २४, ९७.

स्मृतग्रन्थकर्तारः ।

कर्तृनाम.	पृष्ठम्.
आर्यभटः	२३३.
पतञ्जलिः	१००.
पराशरः	२६७, २६८, २७२, २८१.
पितामहः	३०१.
ब्रह्मशम्भुः	३१, ३८, ४२, ४५, ४७, ४८, ५०, ९७, ११४, ११५, ११७, ११८, ११९, १२०, १२१, १२४, १३४, १४०, १४२, १४३, १४५, १४६, १४७ १४८, १४९, १७१, १८७, १८८, १८९, २५०, २५१.
भोजः	४८, ७५, ७८, ९७, १२२, १३७, १४५, १४६, १७८, १९९, २०७.
मयः	२३४, ३०६.
रामकण्ठः	२, २१, २५, २६.
वरुणः	२२, २३, १०३.
सद्योज्योतिः	५.
सोमशम्भुः	९७, २०७, २१४, २१८, २२०.

READY FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah.	1	0	0
स्यानन्दूरपुरवर्णनप्रबन्धः (Kavya) Syânandûrapuravarnanaprabandha by H. H. Svâti Sri Râma Varma Mahârâjah, with the commentary Sundarī of Râjarâja Varma Koil Tampurân.	2	0	0

Trivandrum Sanskrit Series.

	RS.	AS.	P.
No. 1—दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni.	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni.	0	2	0
No. 3—नलाभ्युदयः (Kâvya) by Vâmana Bhatta Bâna (Second Edition).	0	4	0
No. 4—शिवलीलार्णवः (Kâvya) by Nîlakantha Dîkshita.	2	0	0
No. 5—व्यक्तिविवेकः (Alankâra) by Mahima Bhatta with commentary	2	12	0
No. 6—दुर्घटवृत्तिः (Vyâkarana) by Saranadeva.	2	0	0
No. 7—ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa.	1	0	0
No. 9—विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10—मातङ्गलीला (Gajalakshana) by Nîlakantha.	0	8	0
No. 11—तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	4	0
No. 12—परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda.	0	8	0
No. 13—सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	0	0

	RS.	AS.	P.
No. 14—नीतिसारः (Nîti) by Kâmandaka, with the commentary of Sankarârya.	3	8	0
No. 15—स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition).	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa.	1	8	0
No. 17—पञ्चरात्रम् Do. Do.	1	0	0
No. 18—नारायणीयम् (Stuti) by Nârâyana Bhatta with the commentary of Desamangala Vârya.	4	0	0
No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyana Bhatta and Nârâyana Pandita.	1	4	0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.	1	8	0
No. 21—बालचरितम् Do. Do.	1	0	0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa.	1	8	0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part I. 1st & 2nd Kândas).	1	12	0
No. 24—जानकीपरिणयः (Kâvya) by Chakra kavi.	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri.	0	12	0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa.	0	12	0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I. 1st & 2nd Sargas).	1	12	0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas.	0	8	0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II. 3rd Kânda).	2	4	0
No. 30—वास्तुविद्या (Silpa).	0	12	0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III. 4th, 5th & 6th Kândas).	1	0	0

	RS.	AS.	P.
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part II, 3rd, 4th & 5th Sargas)	2	8	0
No. 33—वाररुचसंग्रहः (Vyâkarana) with the commentary Dîpaprabhâ of Nârâyana.	0	8	0
No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râja chûdâmanimakhin.	1	4	0
No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopinâtha.	1	8	0
No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part III. 6th, 7th & 8th Sargas).	3	0	0
No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghatîya Sarvânanda (Part I. 1st Kânda).	2	0	0
No. 39—चारुदत्तम् (Nâtaka) by Bhâsa.	0	12	0
No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Srî Ruyyaka with the Alankârasarvaswa of Sri Mankhuka and its commentary by Samudrabandha.	2	8	0
No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivarana of Srî Sankara Bhagavat Pâda.	0	4	0
No. 42—प्रतिमानाटकम् (Nâtaka) by Bhâsa.	1	8	0
No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswamin and Tîkâsarvaswa of Vandyaghatîya Sarvânanda (Part II. 2nd Kânda 1—6 Vargas).	2	8	0

	RS.	AS.	P.
No. 44—तन्त्रशुद्धम् (Tantra) by Bhattâraka Srî Vedottama.	0	4	0
No. 45—प्रपञ्चहृदयम् (Prapanchahridaya).	1	0	0
No. 46—परिभाषावृत्तिः (Vyâkarana) by Nîlakantha Dîkshita.	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Sarasvatî. (Part I.)	1	12	0
No. 48— Do. Do. (Part II.)	2	0	0
No. 49—गोलदीपिका (Jyotisha) by Parameswara.	0	4	0
No. 50—रसार्णवसुधाकरः (Alankâra) by Singa Bhûpâla.	3	0	0
No. 51—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswâmin and Tîkâsarvaswa of Vandyaghatîya Sarvânanda (Part III. 2nd Kânda 7—10 Vargas)	2	0	0
No. 52—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvaswa of Vandyaghatîya Sarvânanda (Part IV. 3rd Kânda)	1	8	0
No. 53—शाब्दनिर्णयः (Vedânta) by Prakâsâtmayatîndra	0	12	0
No. 54—स्फोटसिद्धिन्यायविचारः (Vyâkarana)	0	4	0
No. 55—मत्तविलासप्रहसनम् (Nâtaka) by Srî Mahendravikramavarman.	0	8	0
No. 56—मनुष्यालयचन्द्रिका (Silpa).	0	8	0
No. 57—रघुवीरचरितम् (Kâvya).	1	4	0
No. 58—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Saraswatî (Part III.)	2	0	0
No. 59—नागानन्दम् (Nâtaka) by Srîharshadeva with the commentary Nâgânandavimarsinî of Sivarâma.	3	4	0
No. 60—लघुस्तुतिः (Stuti) by Srî Laghubhattâraka with the commentary of Srî Râghavânanda	0	8	0

	RS.	AS.	P.
No. 61—सिद्धान्तसिद्धाञ्जनम् (Vedanta) by Srî Krishnânanda Sarasvati (Part IV.)	1	8	0
No. 62—सर्वमतसंग्रह: (Sarvamatasaṇgraha).	0	8	0
No. 63—किरातार्जुनीयम् (Kâvya) by Bharavi with the commentary Sabdârthadipika of Chitrabhanu (1, 2 and 3 Sargas).	2	8	0
No. 64—मेघसन्देशः (Kâvya) by Kâlidasa with the commentary Pradîpa of Dakshinâvartanatha.	1	0	0
No. 65—मयमतम् (Silpa) by Mayamuni.	3	8	0
No. 66—महार्थमञ्जरी (Darsana) with the commentary Parimala of Maheswarânanda.	2	8	0
No. 67—तन्त्रसमुच्चयः (Tantra) by Nârâyana with the commentary Vimarsini of Sankara. (Part I. 1–6 Patalas)	3	4	0
Nc. 68—तत्त्वप्रकाशः (Agama) by Srî Bhojadeva with the commentary Tâtparyadîpikâ of Srî Kumara.	2	0	0
No. 69—ईशानशिवगुरुदेवपद्धतिः (Tantra) by Isânasivagurudevamisra (Part I. Sâmānyapâda).	1	8	0
No. 70—आर्यमञ्जुश्रीमूलकल्पः (Part I).	2	8	0
No. 71—तन्त्रसमुच्चयः (Tantra) by Narayana with the commentary Vimarsini of Sankara (Part II. 7—12 Patalas).	3	8	0
No. 72—ईशानशिवगुरुदेवपद्धतिः (Tantra) by Isanasivagurudevamisra (Part II. Mantrapada)	4	0	0
No. 73—ईश्वरप्रतिपत्तिप्रकाशः (Vedanta) by Sri Madhusudanasarasvati	0	4	0

	RS.	AS.	P.
No. 74— श्रीयाज्ञवल्क्यस्मृतिः (Dharmasâstra) with the commentary Bâlakrîdâ of Visvarûpâchârya. (Part I—Âchâra and Vyavahâra Adhyâyas)	4	0	0
No. 75— शिल्परत्नम् (Silpa) by Srikumara (Part I).	3	4	0
No. 76—आर्यमञ्जुश्रीमूलकल्पः (Part II).	3	4	0
No. 77—ईशानशिवगुरुदेवपद्धतिः by Isanasivagurudavamisra (Part III. Kriyapada 1—30 Patalas).	3	4	0

Apply to:—

The Agent for the sale of
Government Sanskrit Publications,
Trivandrum.

TRIVANDRUM SANSKRIT SERIES
No. LXXXIII.

THE
ÎSÂṆASIVAGURUDEVAPADDHATI

BY

ÎSÂNASIVAGURUDEVAMISRA

EDITED BY
MAHÂMAHÔPÂDHYÂYA
T. GAṆAPATI SÂSTRÎ,
Honorary Member of the Royal Asiatic Society of Great Britain and Ireland;
Doctor of Philosophy, University of Tubingen;
Curator of the Department for the Publication of
Sanskrit Manuscripts, Trivandrum.

Part IV—Kriyapâda 31 - 64 Patalas & Yogapada.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF
HER HIGHNESS THE MAHARANI REGENT OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.
1925.

(All Rights Reserved.)

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ८३.

ईशानशिवगुरुदेवपद्धतिः

श्रीमदीशानशिवगुरुदेवमिश्रविरचिता

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण
लण्डनपुरस्थराजकीयैष्याखण्डीयविद्यासेवकसमाजपूज्यसभ्यपदभाजा
पिहेच्. डि. (टूबिञ्जन्) पदसत्कृतेन
महामहोपाध्यायेन
त. गणपतिशास्त्रिणा
संशोधिता ।

चतुर्थो भागः — क्रियापादे ३१–६४ पटलाः योगपादश्च ।

सा च
अनन्तशयने
महामहिमश्रीसेतुलक्ष्मीमहाराज्ञीशासनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशिता ।

MOTI LAL BANARSI DASS
LAHORE.
BOOK-SELLERS

कोलम्बाब्दाः ११००, क्रैस्ताब्दाः १९२५.

विषयानुक्रमणी ।

विषयाः.	पृष्ठम्.
अधिष्ठानाधिकारः	३०७
स्तम्भालङ्कारः	३०९
उत्तरलक्षणम्	३१३
प्रस्तराद्यधिकारः	३१४
द्वारलक्षणम्	३१६
तोरणादिलक्षणम्	३२०
शिखरलक्षणम्	३२५
सोपानलक्षणम्	३२६
नाललक्षणम्	३२७
मण्डपलक्षणम्	,,
प्रपालक्षणम्	३२९
दारुनियमः	३३०
दारुस्वीकरणम्	३३१
इष्टकाः	३३३
इष्टकालोष्टकरणम्	,,
सुधाधिकारः	३३४
स्तम्भसन्धिः	३३६
सन्धिविशेषाः	३३७
स्तूपीविन्यासः	३३९
कुम्भविन्यासः	३४०
विमानप्रतिष्ठाधिकारः	३४१
हृत्प्रतिष्ठाधिकारः	३४४
अनुकर्मविधानम्	३४६
अद्भुतशमनम्	३४८
प्राकारलक्षणम्	३५०
परिवारदेवतातत्स्थानानि	३५१
गोपुरविधिः	३५५
लिङ्गोपादानाधिकारः	३५८
क्षणिकलिङ्गविधिः	३६०
लिङ्गपीठोपादानाधिकारः	,,
शकुननिमित्तानि	,,
शिलाग्रहणविधिः	३६३
शिलादोषास्तज्ज्ञानोपायश्च	३६६
लिङ्गविकल्पाधिकारः	३६७
मानुषशिलालिङ्गलक्षणम्	३७१
आर्षादिलिङ्गभेदः	३७३
लक्षणोद्धाराधिकारः	३७५
सामान्यपीठविधिः	३७९
नागरादित्रयपीठम्	३८०
मेरुसुन्दरादिद्वादशपीठानि	३८१
नालविधिः	३८४
पादशिलालक्षणम्	३८७
मुखलिङ्गविधिः	३८८
स्फटिकलिङ्गविधिः	३९०
रत्नलिङ्गाधिकारः	३९१
लोहलिङ्गानि	३९२
दारवलिङ्गविधिः	,,
उत्तमदशतालपुरुषमानविधिः	,,
मध्यमदशतालस्त्रीमानम्	४०३
मध्यमदशतालपुरुषमानम्	४०४
कनिष्ठदशतालस्त्रीमानम्	४०७
षोडशमूर्तिलक्षणम्.	४०९
तत्र	
सोमास्कन्दलक्षणम्	४०९
भुजङ्गत्रासनृत्तलक्षणम्	४१२
गङ्गाधरलक्षणम्	,,
त्रिपुरान्तकलक्षणम्	४१३
कल्याणसुन्दरलक्षणम्	,,
अर्धनारीश्वरलक्षणम्	,,
पाशुपतलक्षणम्	४१४
कङ्काललक्षणम्	,,
हरिहरलक्षणम्	,,
भिक्षाटनलक्षणम्	,,
चण्डेशानुग्रहलक्षणम्	४१५

विषयाः.	पृष्ठम्.
दक्षिणामूर्तिलक्षणम्	४१५
कालकाललक्षणम्	,,
लिङ्गोद्भवलक्षणम्	४१६
वृषलक्षणाधिकारः	,,
वृत्तत्रिशूललक्षणम्	४१७
त्रिभङ्गशूलम्	४१८
वेतालशूललक्षणम्	,,
खट्वाङ्गाधिकारः	,,
गणेशलक्षणम्	,,
रक्षोघ्नवास्तुहोमविधिः	४१९
प्रतिष्ठाविधिः	४२१
स्नपनादिविधिः	४३०
तत्त्वतत्त्वेश्वरमूर्तिमूर्तीश्वरन्यासः	४३४
होमजपादिविधिः	४३६
शिवसन्ध्याधिकारः	४३९
शिवप्रतिष्ठाधिकारः	४४०
नित्योत्सवाधिकारः	४५०
शिबिकाधिकारः	४५३
रथादियानशयनाधिकारः	४५५
ध्वजोच्छ्रयाधिकारः	४५८
आलयालङ्कारपूजायात्रादिविधिः	४६३
स्वस्तयेस्तुतिः	४६५
बलिदानं तन्मन्त्राश्च	४६६
रात्रिभेदेन देवताबलिभेदाः	४७५
उत्सवावभृथाधिकारः	४७७
उत्सवान्ते कर्तव्यविधिः	४८०
अल्पस्नपनपदाधिकारः	४८१
पञ्चविंशतिकलशाधिकारः	४८३
त्रिविधाष्टोत्तरकलशाधिकारः	४८४
द्विपञ्चाशदधिकशतद्वयकलशाधिकारः	४८५
त्रिशतकलशाधिकारः	,,
चतुरधिकपञ्चशतकलशाधिकारः	४८६
विंशत्यधिकसप्तशतकलशाधिकारः	,,
पञ्चावरणे सहस्रकलशाधिकारः	,,
अष्टोत्तरसहस्रकलशाधिकारः	४८७
विषयाः.	पृष्ठम्.
चतुरावरणे सहस्रकलशाधिकारः	४८८
एकविंशतिव्यूहसहस्रकलशाधिकारः	४८९
साधारणकर्माधिकारः	४९०
कलशभेदेन द्रव्यादिभेदाः	४९२
पञ्चावरणसहस्रकलशाधिकारः	५००
सहस्रकलशेषु मन्त्रद्रव्यदेवताविधिः	५०४
स्नपनानन्तरकार्यविधिः	५०८
सूर्यप्रतिष्ठाधिकारः	५१०
सूर्यनित्योत्सवविधिः	५१४
महोत्सवविधिः	५१५
गणेशप्रतिष्ठाधिकारः	,,
गणेशोत्सवविधिः	५१८
स्कन्दप्रतिष्ठाधिकारः	५१९
स्कन्दोत्सवविधिः	५२४
शङ्करनारायणप्रतिष्ठाधिकारः	५२६
उत्सवबलिदेवताविधिः	५३१
दुर्गाप्रतिष्ठाधिकारः	५३८
दुर्गोत्सवविधिः	५४१
गौरीप्रतिष्ठाधिकारः	५४५
गौर्युत्सवविधिः	५५०
सरस्वतीप्रतिष्ठाधिकारः	५५३
सरस्वत्युत्सवविधिः	५५७
भूतनाथमन्त्रोद्धाराधिकारः	५६०
भूतनाथप्रतिष्ठाधिकारः	५६१
शास्तुरुत्सवविधिः	५६५
मातृमन्त्रोद्धाराधिकारः	५६७
मातृप्रतिष्ठाधिकारः	५६८
मातृनित्योत्सवाधिकारः	५७६
महाशान्तिविधिः	५७७
क्षेत्रपालप्रतिष्ठाधिकारः	५८०
क्षेत्रपालोत्सवविधिः	५८४
नवनैवेद्याधिकारः	५८६
दीपोत्सवविधिः	५८८
अन्त्येष्ट्यधिकारः	५९१
एकोद्दिष्टविधिः	५९५

विषयाः.	पृष्ठम्.
सपिण्डीकरणाधिकारः	५९७
अष्टकाश्राद्धविधिः	५९९
अल्पप्रायश्चित्तम्	६०३
महादोषप्रायश्चित्तम्	६०८
अस्त्रयागाधिकारः	६०९
बलिविकिरणविधिः	६११
जीर्णोद्धारविधिः	६१२

योगपादः।

विषयाः.	पृष्ठम्.
योगलक्षणम्	६१६
यमनियमादिनिरूपणम्	६२१
प्राणायामाधिकारः	६२८
प्रत्याहाराधिकारः	६३३
धारणाधिकारः	६३३
ध्यानाधिकारः	६३४
समाध्यधिकारः	६३५

स्मृतग्रन्थकर्तारः ।

कर्तृनाम.	पृष्ठम्.
पराशरः	३१०, ३१३, ३१४, ३१७, ३३७, ३५३, ३५४, ३५६, ३८४, ३८९, ६१९.
पितामहः	३३९.
मयः	३०९, ३३८, ३५०, ३५१, ३५३, ३५४, ३५५, ३६८, ३७१, ३७२, ३७३, ३७४, ३७६, ३७७, ३८४, ३८६, ३९०, ४४०.
याज्ञवल्क्यः	६३२.
वसिष्ठः	६३२.

स्मृतग्रन्थाः ।

ग्रन्थनाम.	पृष्ठम्.
कारणम्	३४०
पिङ्गलामतम्	३६९
पुराणम्	६००
पौष्करम्	३७०
बृहत्तन्त्रम्	३६९
भगवद्गीता	६२३
मञ्जरी	३६६, ३७३, ४३३, ४३८, ४५०, ४६३, ४६५, ४७५.
योगशिवपद्धतिः	३९०
योगशिवीयम्	३७४
संहिताटीका	४६५
स्मृतिः	६०१
स्वायम्भुवम्	४१८

॥ श्रीः ॥

ईशानशिवगुरुदेवपद्धतिः

श्रीमदीशानशिवगुरुदेवमिश्रविरचिता ।

(क्रियापादः ।)

अथ एकत्रिंशः पटलः ।

अधिष्ठानं मयः प्राह चतुर्दशविधं पृथक् ।
पराशरोऽपि द्विविधं त्रिविधं च परे जगुः ॥ १ ॥

पराशरोक्तं द्विविधं पादबन्धं प्रतिक्रमम् ।
एकैकं तच्चतुर्भेदं यतोऽष्टविधमुच्यते ॥ २ ॥

तद्यथा —

अधिष्ठानोच्छ्रये त्रेधा भक्तेंऽशो जगती भवेत् ।
अंशः कुमुदकं शेषमष्टधांशं विभज्य तु ॥ ३ ॥

पट्टिकांशेन कम्पोंऽशात् कण्ठोंऽशादूर्ध्वकम्पकम् ।
अंशेनाथ त्रिभिर्भागैर्वाजनं परिकल्पयेत् ॥ ४ ॥

पादबन्धमिदं ज्ञेयं मुख्यजात्यादिषूदितम् ।

पादबन्धम् ।

आत्ताधिष्ठानतुङ्गे तु चतुर्विंशतिभागिके ॥ ५ ॥

स्यादष्टभागैर्जगती सप्तांशैः कुमुदं भवेत् ।
पद्मं च पट्टिका कम्पश्चैकैकांशाद् गलं द्वयात् ॥ ६ ॥

भागेनैवोर्ध्वकम्पः स्यात् त्रिभिर्भागैश्च वाजनम् ।
विप्रबन्धमिदं प्रोक्तं चारुबन्धं तथोच्यते ॥ ७ ॥

सप्तांशैर्जगती षड्भिः कुमुदं चैकमम्बुजम् ।
पट्टं च कम्पश्चैकैकं कण्ठोंऽशावब्जमंशतः ॥ ८ ॥

द्वौ वाजनं चाब्जमेकमंशाभ्यामूर्ध्वपट्टिकम् ।
चारुबन्धमधिष्ठानमिदं सङ्कृतिभेदितम् ॥ ९ ॥

चारुबन्धम् ।

प्राग्वच्छरांशैर्जगती त्वेकेनाब्जं धृगेकतः ।
ऊर्ध्वपद्मं च वेदांशैः शेषं प्रागिव पुष्कलम् ॥ १० ॥

पुष्कलम् ।

अत्र 'जगतीकुमुदं समानं, सार्धेनालिङ्गं समानमन्तरितं त्र्यंशं प्रत्युत्तमांशं पद्मं वाजनमेतत् प्रतिक्रमाख्यं देवद्विजनरेन्द्राणां प्रशस्तम् । अन्येषामप्रशस्तम् । अथ मुखं ककरीभूतमकरास्यं व्यालमृगेभालिमण्डितं सर्वेषामप्रशस्तमेवे'ति पराशरः ।

ककरीभूतमकरं मृगव्यालगजाननम् ।
कुर्यात् समतलं व्यापिक्रियं[2] तत् प्रतिबन्धकम् ॥ ११ ॥

प्रतिबन्धम् ।

तदेव नागबन्धं स्यान्नागवक्त्रनिबन्धनम् ।
तदेव जगती स्थाने वस्वंशे बृहदम्बुजम् ॥ १२ ॥
कण्ठोऽशेनाम्बुजं चांशाच्छरांशैः कुमुदं भवेत् ।
ऊर्ध्वपद्ममथैकांशादालिङ्गान्तरितं त्रिभिः ॥ १३ ॥
प्रत्युन्नतं समानं स्याच्छेषं वाजनमेव हि ।
श्रीबन्धाख्यमिदं प्रोक्तं देवद्विजनृपोचितम् ॥ १४ ॥

श्रीबन्धम् ।

एकोनत्रिंशदंशेऽस्मिन्नधिष्ठानोदये भवेत् ।
तदेव पद्मं कुमुदं प्राग्वत् कम्पं च वाजनम् ॥ १५ ॥
ऊर्ध्वाब्जमंशादध्यर्धात् कपोतं चांशतोऽशतः ।
आलिङ्गान्तरितं द्व्यंशं प्रत्युन्नतमथांशतः ॥ १६ ॥
सार्धेन वाजनं चेति प्रोक्तं कापोतबन्धनम् ।
द्विचतुर्यवपादार्धत्रिपादांशविवर्धनात् ॥ १७ ॥

---

१. 'कम्', २. 'यं न प्र' ग. पाठः,

हान्या प्रत्यङ्गमङ्गं तु शोभां कुर्याद् यथारुचि ।
उपानोपर्युपोपानं सपद्मं कम्पकं तथा ॥ १८ ॥
चतुरश्रं यथाशोभमधिष्ठानेषु योजयेत् ।

अत्र मयः —

"तैतिलानां चतुर्हस्तं त्रिहस्तार्धं द्विजन्मनाम् ।
राज्ञां त्रिहस्तं साध्यर्धं द्विहस्तं यौवराजकम् ॥
द्विहस्तमेव वणिजां शूद्रस्यैककरं स्मृतम् ॥"

इति ।

अधिष्ठानाधिकारः ।

स्तम्भाः स्थूणास्तथा पादाः कुम्भाः कम्पाङ्घ्रयोऽपि च ॥ १९ ॥
स्तम्भपर्यायशब्दाः स्युरथ तल्लक्ष्म कथ्यते ।
आमूलाग्रं तु वेदाश्रः कुम्भमण्डिसमन्वितः ॥ २० ॥
ब्रह्मकान्ताभिधानः स्यात् स्तम्भः शैलोऽपि दारुजः ।
अष्टाश्रो विष्णुकान्ताख्यः स्कन्दकान्तः षडश्रकः ॥ २१ ॥
स एवेन्द्राह्वयो भानुकान्तः स्याद् द्वादशाश्रकैः ।
षाडशाश्रश्चन्द्रकान्तो [1]वृत्तश्चेदीशकान्तकः ॥ २२ ॥
स्वतुङ्गरामभागेषु वेदवस्वश्रवर्तुलम् ।
कुम्भमण्ड्यादिसंयुक्तं रुद्रकान्तं प्रचक्षते ॥ २३ ॥
मूले पद्मासनश्चाथ चक्रवाकैरलङ्कृतः ।
सभद्रमध्यभागश्च भद्रकान्तो द्विमण्डिकः ॥ २४ ॥
व्यालेभसिंहभूतैस्तु मूले यः परिमाण्डितः ।
इष्टाकारस्तथैवोर्ध्वं तत्तत्कान्ताह्वयो भवेत् ॥ २५ ॥
[2]वृत्त एव स्वदीर्घेण शुण्डुभेदेन संयुतः ।
शुण्डुपा[3]दो भिण्डिपादः स चेन्मुक्ताविचित्रितः ॥ २६ ॥
मूले वेदाश्रकश्चोर्ध्वं षोडशाश्राद्यलङ्कृतः ।
स्यान्मूलचतुरश्राख्यः पद्मापद्मासनः स्मृतः ॥ २७ ॥

---

१. २. 'नृ' ख. पाठः. ३. 'दः पि' ग. पाठः.

मूलान्त्ययोस्तु वेदाश्रो मध्ये अष्टाश्रचलङ्कृतः ।
वज्रकान्तः स विज्ञेयो मुक्तास्तम्भः समौक्तिकः ॥ २८ ॥
यद्रत्नचित्रितस्तम्भस्तत्तद्रत्नाह्वयो भवेत् ।
मूले पद्मासनो मध्ये षोडशाश्रैरलङ्कृतः ॥ २९ ॥
ऊर्ध्वांशे चतुरश्रोऽङ्घ्रिश्चित्रखण्डाह्वयः स्मृतः ।
स एवाष्टाश्रको मध्ये श्रीखण्डः पट्टबन्धवान् ॥ ३० ॥
मध्ये कलाश्रः पट्टेन नद्धः श्रीवज्रसंज्ञितः ।
पट्टक्षेपणसंज्ञः स्याच्चतुरश्रस्त्रिपट्टधृक् ॥ ३१ ॥
मूलाग्रयोस्तु विपुलो मध्ये रामांशतः कृशः ।
वृत्तश्चेद् दण्डपादाख्यो वज्रपादः कलाश्रकः ॥ ३२ ॥
स्यादुलूखलपादाख्यो मूलस्थोलूखलासनः ।
पादमर्धं त्रिभागं च भित्तिस्तम्भविनिर्गमः ॥ ३३ ॥
चतुरश्राष्टवृत्तानां विज्ञेयस्तु क्रमाद् भवेत् ।
मूलभूस्तम्भविस्तारो ह्यष्टाविंशतिकाङ्गुलः ॥ ३४ ॥
द्व्यङ्गुलद्व्यङ्गुलं[1] हाप्यो व्यासः प्रतितलं क्रमात् ।
आत्ताधिष्ठानतुङ्गात् तु स्तम्भोत्सेधो द्विधा मतः ॥ ३५ ॥
रुद्रदिङ्नन्दवस्वंशादंशोनोऽङ्घ्रिस्तले तले ।
एवं मूलाग्रयोर्व्यासतुङ्गता स्तम्भकुड्ययोः ॥ ३६ ॥

अत्र —

"कुड्यस्तम्भाग्रविपुलं यत्तद्दण्ड इत्युच्यते ।
तन्मानेन विमानानां सर्वाण्यङ्गानि मेयानि ॥"

इति पराशरः ।

मूले चाग्रे च पादानां त्रिचतुष्पञ्चभागतः ।
शिखामानेन कर्तव्या स्था[2]प्याः सर्वे तथा[3]श्मसु ॥ ३७ ॥
स्वद्रव्येणैव पादानां मूले वेदिं प्रकल्पयेत् ।
पादोच्चनन्दभागाद् वा वस्वंशाद् वेदिकोच्छ्रयः ॥ ३८ ॥
विस्तारश्च भवेत् तावान् सा वेदी स्याच्चतुर्विधा ।
पुष्पखण्डा चित्रखण्डा शैवला चित्रशैवला ॥ ३९ ॥

---

१. 'लाहाप्यो' ख, ग. पाठः. २. 'पाः' ग. पाठः. ३. 'त्स्म' ख. पाठः.

कम्पनिद्रा कम्पयुता पुष्पवत् समखण्डिता ।
मूलपादार्चना वेदिः पुष्पखण्डेति कथ्यते ॥ ४० ॥

सैव निद्राकम्पपट्टपद्मपत्रविचित्रिता ।
पादे पादान्तरे चित्रा चित्रखण्डाभिधीयते ॥ ४१ ॥

स्तम्भकम्पाब्जपट्टाढ्या पट्टे शैवलचित्रिता ।
ऊर्ध्वाधःपद्मपत्राढ्या पादे पादान्तरेऽपिच ॥ ४२ ॥

नरनारीपत्रचित्रा शैवलाख्या हि वेदिका ।
सैवाधरोर्ध्वाम्बुजयोर्वेत्रयुग्ममनोरमा ॥ ४३ ॥

प्राग्वद् विचित्रवेषा स्यात् सा वेदी चित्रशैवला ।
जालार्थं[1] वेदिकां नैवच्छिन्द्यादन्यत्र तोरणात् ॥ ४४ ॥

द्वारं वात्र यथोद्देशं वेद्याश्छेदो न दुष्यति ।
पुष्पखण्डा चित्रखण्डा नृणां द्वे वेदिके स्मृते ॥ ४५ ॥

वेदीचतुष्कं स्तम्भादौ देवागारेषु सम्मतम् ।
स्तम्भायामे त्रिभागे स्याद् वेदाश्रोंऽशस्तु मूलतः ॥ ४६ ॥

अष्टाश्रः षोडशाश्रो वा मध्यांशो वृत्त एव वा ।
अग्रभागोऽपि वेदाश्रो भवेत् स्तम्भेषु केषुचित् ॥ ४७ ॥

मूलव्यासे तु पञ्चांशे द्व्यंशोनः स्तम्भमध्यतः ।
अन्त्योंऽशः सप्तमांशोनो मूलविस्तारितो भवेत् ॥ ४८ ॥

कुम्भाः स्युः पादविष्कम्भाश्चतुर्थांशाधिकास्तु वा ।
साध्यर्धाः पादहीना वा द्विगुणा वा भवन्ति हि ॥ ४९ ॥

श्रीकरश्चन्द्रकान्तश्च सौमुख्यः प्रियदर्शनः ।
इति कुम्भाश्चतुर्धा स्युर्वृत्तानां[2] श्रीकरो भवेत् ॥ ५० ॥

अष्टाश्राणां चन्द्रकान्तः श्रीकरः स्यात् कलाश्रके ।
स्तम्भानां चतुरश्राणां सौमुख्यः कुम्भ इष्यते ॥ ५१ ॥

शेषाणां चातिभाराणां कुम्भः स्यात् प्रियदर्शनः ।
कुम्भभागे नवांशे तु धृगेकेन विधीयते ॥ ५२ ॥

---

१. 'र्थे', २. 'वा' ग. पाठः.

चतुर्भिः कुम्भ एव स्यात् कण्ठोंऽशेनांशतो मुखम् ।
शिष्टभागद्वयं त्र्यंशं कृत्वैकेनाम्बुजं भवेत् ॥ ५३ ॥

भागेन वृत्तं शिष्टांशादूर्ध्वं कण्ठे तु भिन्नकौ ।
स्तम्भाग्रकर्णमार्गेण स्कन्धः स्यात् समविस्तृतः ॥ ५४ ॥

ऊर्ध्वं तद्वीरकाण्डस्य पोतिकां तु निवेशयेत् ।
स्तम्भव्यासात् त्रिगुणितं चतुर्गुणमथापि वा ॥ ५५ ॥

मण्ड्यायामः स्मृतोऽङ्घ्रयग्रसमो वेष्वब्धिभागतः ।
मण्ड्युत्सेधो भवेत् तावान् वीरकाण्डस्य चोच्छ्रयः ॥ ५६ ॥

विस्तारो दण्डमात्रः स्यादथ मण्ड्याः शरांशतः ।
सार्धेन फलकास्थौल्यं तत्समो वेत्रनिर्गमः ॥ ५७ ॥

मण्ड[1]युत्पलदलाकारा पाल्याकाराब्जपत्रवत् ।
ताम्बूले[2]समसौन्दर्यं यजमानसुखावहम् ॥ ५८ ॥

विपरीतं विरूपं च वर्ज्यं तदशुभं यतः ।
अथवा स्यात् प्रकारोऽन्यो घृक्कण[3]ठापादविस्तृतिः ॥ ५९ ॥

पोतिकाखण्डमण्डीनि कुम्भं लशुनमूलकम् ।
अम्भोजमालास्थानानि स्तम्भाग्रे योजयेत् क्रमात् ॥ ६० ॥

अग्रहीनं तु लशुनं मूलोच्चं विपुलं भवेत् ।
साष्टांशाधिकमर्धं वा त्रिपादोदयमम्बुजम् ॥ ६१ ॥

मालास्थानविशालोच्चं दण्डमात्रं नियोजयेत् ।
मण्ड्यायामो भवेत् पादात् त्रिगुणो वा चतुर्गुणः ॥ ६२ ॥

स्तम्भाग्रतुल्यं मण्ड्युच्चं पञ्चभागोनमेव वा ।
त्रिभिरंशै[4]स्त्रिपादैर्वा वीरकाण्डश्च तत्समः ॥ ६३ ॥

मण्ड्युत्सेधशरांशेन सार्धांशः फलकोच्छ्रयः ।
वेत्रं च तत्समं ज्ञेयं मण्ड्युत्सेधोपपादकम् ॥ ६४ ॥

पाल्याकारं तु पद्माभं त्रिधा नागदलोपमम् ।
तदूर्ध्वं पोतिका स्थाप्या तस्या लक्षणमुच्यते ॥ ६५ ॥

---

१. 'ण्डयुच्चोत्पादनाका' ग. पाठः. २, 'लतलसौ' ग. पाठः. ३. 'ण्ठः' ख. पाठः, ४, 'काः' ख. पाठः.

सा च स्यात् स्तम्भविस्तारात् त्रिगुणं वा चतुर्गुणम् ।
दीर्घा पञ्चगुणं वापि नीचमध्योत्तमा स्मृता ॥ ६६ ॥

नागवृत्ता पत्रचित्रा समुद्रोर्मिश्च पोतिका[1] ।
त्रिविधा नामभिर्ज्ञेयास्तासां लक्षणमुच्यते ॥ ६७ ॥

स्तम्भव्याससमोत्सेधविस्तारा श्रेष्ठपोतिका ।
शरांशोना मध्यमा स्यादूनद्व्यंशा कनिष्ठिका ॥ ६८ ॥

भूतेभमकरव्यालरत्नबन्धविचित्रिता ।
वल्लीचित्राग्रपट्टा च सा ख्याता चित्रपोतिका ॥ ६९ ॥

केवलं पत्रवल्लीभिर्विचित्रा पत्रपोतिका ।
तरङ्गमात्रचित्रा या पोतिका स्यात् तरङ्गिणी ॥ ७० ॥

तरङ्गाश्चात्र वेदर्तुवस्वाशादित्यसंख्यया ।
कार्यास्तूभयतस्तुल्याः पट्टिकाच्छन्नमध्यगाः ॥ ७१ ॥

त्रिभागे पोतिकोत्सेधे सा(ध्यं ? र्धां)शेनाग्रपट्टकम् ।
तदर्धार्धेन तदधः क्षेमच्छायान्वितं भवेत् ॥ ७२ ॥

तदुच्चार्धात् त्रिभिर्वांशैरंशाभ्यां वात्र कल्पयेत् ।
स्वव्यासार्धात् त्रिपादाद् वा कुर्यात् ताखग्रमण्डनम् ॥ ७३ ॥

अत्र पराशरः —

"नानाविधाकृतियुता अपि सर्वपादाः
प्रासादमण्डपविधौ मुनिभिः प्रशस्ताः ।
शालासभागृहविधौ चतुरश्रवृत्ताः
सम्पत्परास्तु विपरीतफलास्त्वथो[2]न्ये ॥"

इति ।

मिश्रामिश्रा अपि स्तम्भा देवागारेषु पूजिताः ।
अमिश्रा एव गेहेषु नराणां शुभदाः स्मृताः ॥ ७४ ॥

स्तम्भालङ्कारः ।

उत्तरं विन्यसेदूर्ध्वं तच्चापि त्रिविधं मतम् ।
खण्डोत्तरं पत्रबन्धं ततो रूपोत्तरं भवेत् ॥ ७५ ॥

---

१. 'काः', २. 'थो' ग. पाठः.

स्तम्भविस्तारविस्तीर्णमुन्नतं चाङ्घ्रिजातिकम् ।
खण्डोत्तरं स्यादेतस्मात् पादोनं पत्रबन्धकम् ॥ ७६ ॥
स्तम्भव्याससमोत्सेधमुत्सेधार्धेन विस्तृतम् ।
विपरीतं तु वा नीचं रूपोत्तरमिदं भवेत् ॥ ७७ ॥
उत्तरोत्सेधरामांशभागेनैकेन पट्टिका ।
तदूर्ध्वांशद्वयेनापि विधेया पद्मपट्टिका ॥ ७८ ॥

उत्तरलक्षणम् ।

अत ऊर्ध्वं प्रस्तरः स्यात् प्रस्तरे सप्तभागिके ।
भागाभ्यां तु कपोतं स्यादुपानसमनिर्गमम् ॥ ७९ ॥
पट्टिका चापि भागेन कर्णश्चैकांशतो भवेत् ।
द्वाभ्यां तु कम्पकं कुर्याच्छिष्टेनाप्यूर्ध्वपट्टिका ॥ ८० ॥
उत्तरोपरि कुर्यात् तु वाजनं तस्य कथ्यते ।
त्रिचतुष्पञ्चदण्डानामायामस्तस्य सम्मतः ॥ ८१ ॥
स्तम्भविस्तारपादं वा त्रिपादं वोच्छ्रितं भवेत् ।
वाजनस्योपरिष्टात् तु कुर्याद् भारतुलावलिम्[1] ॥ ८२ ॥
स्तम्भविस्ताररामांशमुच्छ्रितार्धेन विस्तृता ।
तुलावली स्यात् तासामप्यूर्ध्वे कुर्याज्जयन्तिकाः ॥ ८३ ॥
तुलाविस्तारमानोच्चा यथालाभं सुविस्तृताः ।
जयन्त्यश्चानुमार्गः स्याद् दण्डार्धबहलश्रितः ॥ ८४ ॥
अध्यर्धसममुच्चः स्यादथ पार्श्वानुगोत्तरम् ।
वाजनं च तुलाद्वारानुगताः स्युस्ततोऽपि च ॥ ८५ ॥
वंशानुगा जयन्त्यः स्युस्तुलावदनुमार्गकाः ।

अत्र पराशरः —

“प्रस्तरः पादविष्कम्भो द्विदण्डार्धं[2] द्वित्रिदण्डेन[3] धवलीकतुलान्तरं स्यात् । द्विदण्डान्तरं जयन्तीनां, दण्डान्तरमनुमार्गाणां, तदुपरि सारफलकाभिर्यथाबलविपुलघनाभिराच्छादयेत् । इष्टकादिभिर्वा फलकोर्थे वाजनवद् वर्णपट्टिका निवेशयितव्या” इति ।

---

१. ‘ली’ ग. पाठः, २. ‘र्धे’ ख. ग. पाठः, ३. ‘ण व’ क. ख. पाठः,

शिलामये[1] शिलाभिः स्यादाच्छाद्यं वाजनोपरि ॥ ८६ ॥

वसन्तकोपरिष्टाच्च सञ्छाद्यैवं यथाबलम् ।
हंसभूतावली वापि निद्रा वा दण्डमुच्छ्रिता ॥ ८७ ॥

त्रिपादं वा वाजनोर्ध्वमुत्तरोपरि वाजनम् ।
निद्रा च वर्णपट्टी च तुलापादश्च तद्गतः ॥ ८८ ॥

वाजनोर्ध्वे कपोतालिं कुर्यादध्यर्धदण्डतः ।
द्वित्रैः कपोतनिर्यूहमुत्सेधं भिन्नवेणुवत् ॥ ८९ ॥

साग्रपट्टं तदुपरि कर्णमध्यमपालिके ।
अर्धत्रिपाददण्डेन कपोतालम्बनं पुनः ॥ ९० ॥

उत्तराद् वाजनस्योर्ध्वे नव चात्र भवन्ति हि ।
उत्तरात् पोतिकाधस्ताद् गोपानस्यास्तु लम्बनम् ॥ ९१ ॥

तदन्तरं तुलामानादुच्चता [2]चार्धदण्डतः ।
त्रिभिर्वांशैस्तु बाहल्यां कम्पा योज्याः समन्तरा ॥ ९२ ॥

सौवर्णै राजतैः शौल्वैर्लौष्ठैर्वाच्छाद्य मार्त्तिकैः ।
अथ गोपाननीप्रार्धाद् दण्डिकानियमो भवेत् ॥ ९३ ॥

दण्डिकाव्यासबाहल्यां स्तम्भव्यासार्धतो भवेत् ।
चतुरायतसंस्थानमनुमार्गेण बन्धयेत् ॥ ९४ ॥

दण्डिकाद्वारबहलमधोमण्डिः सनालिकम् ।
दण्डसमं मुष्टिबन्धं तत्पृथग् वाजनोपरि ॥ ९५ ॥

अथ व्यालकसिंहेभभूतनाटकभूषितम् ।
कपोतोपरि भूतालिः पादात् पादविनिर्गता ॥ ९६ ॥

पादव्याससमा वार्धत्रिपादसदृशोच्छ्रया ।
[3]प्रतिर्निवेश्या तत्तुङ्गत्रिचतुर्भागनिर्गमात् ॥ ९७ ॥

वाजनं स्यात् समतलमुन्नतं तत्र शोभनम् ।
ऊर्ध्वाधस्तलयोर्भूमेरवधिः प्रतिरेव हि ॥ ९८ ॥

देवद्विजनरेन्द्राणां मकरास्यं प्रतेर्मुखम् ।
स्वस्तिकं चैव देवानामर्धेन्दुर्वैश्यशूद्रयोः ॥ ९९ ॥

---

१. यो' ग. पाठः. २. 'वा' ग. पाठः. ग. ३. 'प' ख. पाठः.

नागवृत्तं तु शेषाणामेवमूह्यं पृथक् पृथक् ।
पार्श्वे प्रतिः सशिखरं मुखपृष्ठं प्रतिद्वयम् ॥ १०० ॥
समानं सार्धदण्डं स्यात् प्रत्यास्थे निर्गमोद्गमौ ।
सर्वत्र प्रत्युपर्यैव द्वारं कुर्याद् विचक्षणः ॥ १०१ ॥
प्रतिच्छेदेन तु द्वारं न कुर्वीत कदाचन ।

प्रस्तराद्यधिकारः ।

स्तम्भायामे तु दिङ्नन्दवसुसप्तांशके क्रमात् ॥ १०२ ॥
नन्दवस्वृषिषड्भागैर्द्वारोत्सेधं प्रकल्पयेत् ।
तदर्धविस्तृतं च स्याद् द्वारं देवालयेषु त्रै ॥ १०३ ॥
तद्वन्नालीगृहव्यासरामभागैकभागतः ।
अर्धे नवांशे पञ्चांशैः[1] पञ्चांशे[2] वांशकैस्त्रिभिः ॥ १०४ ॥
द्वारोत्सेधो भवेत् तस्मादर्धं विस्तृतिरिष्यते ।

इति देवविमानद्वाराणि ।

लब्धोत्सेधे तु दिङ्नन्दवसुसप्तांशके भवेत् ॥ १०५ ॥
सप्तषट्पञ्चवेदांशो द्वारव्यासस्तु मानुषः ।

मानुषद्वारम् ।

अर्धमण्डनकस्तम्भौ द्वारस्योभयपार्श्वयोः ॥ १०६ ॥
भूषणार्थं स्वबाह्ये तु स्थापयेत् सुविचित्रितौ ।
द्वारव्यासोच्चमखिलमङ्गुलिच्छेदवर्जितम् ॥ १०७ ॥
अङ्गुलीकृत्य वसुभिर्वृद्धमर्काप्तशेषितम् ।
आयः स्याद् रामवृद्धानि मन्वाप्तानि व्ययः स्मृतः ॥ १०८ ॥
त्रिवृद्धान्यष्टभिर्हृत्वा योनिर्भाप्तमुडुर्भवेत् ।
पर्यन्ते त्रिंशदाप्ते तु तिथिर्वारं च सप्तभिः ॥ १०९ ॥
आयाधिकानुकूलर्क्षं द्वारं श्रेष्ठं तथा गृहम् ।
मार्गरूपतरुस्तम्भकोणविद्धमशोभनम् ॥ ११० ॥

---

[1] 'शे' क. पाठः [2] 'वैर्वा' ग. पाठः.

मुख्यद्वारं तु देवानां नराणां च विशेषतः ।
द्वारोच्चशेषे पञ्चांशे भवेदंशद्वयं त्वधः ॥ १११ ॥
ऊर्ध्वे त्रयोंऽशास्तत्र स्युः फलका चात्र चित्रिता ।
मध्येऽष्टमङ्गलानि स्युः पार्श्वयोर्न[1]क्रवल्लयैः ॥ ११२ ॥
दण्डाच्चतुष्षडष्टांशं कवाटफलकाघनम् ।
श्रेष्ठमध्याधमं ज्ञेयं क्रमात् सर्वेषु धामसु ॥ ११३ ॥
फलकाबहलादर्धं चतु[2]र्थांशोनमेव वा ।
तलपदण्डस्य विस्तारस्तदर्धं तद्घनं भवेत् ॥ ११४ ॥
रामेषुमुनिनन्देशसंख्या दण्डा भवन्ति हि ।
दण्डाग्रं बोधिपत्रं वाप्यश्वस्कन्धनवाकृतिः ॥ ११५॥
स्वस्तिकाभं तु वां कुर्यादत्र प्राह पराशरः ।

"श्रीमुखसन्धिपालपत्रहृस्वदण्डकुण्डलै[3]श्शृङ्गगुल्फान्तर्गलकविषार्ण[4]वलाहकपिञ्जरीगुच्छकै[5]वनकार्धचन्द्राद्यवयवानि मुख्यलोहैरयसा वा दृढतरं कुर्यात्" इति ।

कवाटं चैव योगश्चाप्येकजातितरूद्भवौ ॥ ११६ ॥
सम्पत्करौ तदन्यौ तु विपरीतफलप्रदौ ।
स्त्रीणां दुःशीलता च स्यात् तस्मान्मिश्रं न कारयेत् ॥ ११७ ॥
बहिर्भागस्तु बाह्ये स्यादन्तर्भागोऽन्तरेव हि ।
कवाटानि चतुर्धा स्युर्युग्मं चायुग्ममेव च ॥ ११८ ॥
संहारो धावनं चैषां पृथग् लक्षणमुच्यते ।
कवाटयुगलाभ्यां तु स्थिताभ्यां वामदक्षिणम् ॥ ११९ ॥
सस्कन्धपट्टिकाभ्यां स्याद् युग्मं यत्राभिधीयते ।
वामभागे स्थितं त्वेकमयुग्माख्यं कपाटकम् ॥ १२० ॥
गूढप्रवेशनिर्यूहं स्तम्भे वाप्युत्तरेऽपि वा ।
संहाराख्यं कपाटं तद् भित्तिगूढं च धावनम् ॥ १२१ ॥
देवद्विजनृपाणां तु युग्मायुग्मे च पूजिते ।
अयुग्मादीनि चान्येषां कवाटानि भवन्ति हि ॥ १२२ ॥

---

[1] 'भः', [2] 'र्धा' ग. पाठः. [3] 'लगु' ख. पाठः. [4] 'णकव', [5] 'कमवार्ध' ग. पाठः.

फल्काभिरयुग्माभिर्युग्माभिश्च सुरालये ।
कवाटं तु मनुष्याणां स्यादयुग्माभिरेव हि ॥ १२३ ॥

कवाटसन्धिर्दण्डान्तस्त्रिचतुर्भागवर्जितः ।
मध्यवर्जित एव स्यात् कथ्यते स्कन्धपट्टिका ॥ १२४ ॥

तल्पव्यासद्वयव्यासा त्रिपादसमनीप्रका ।
नानारूपलताचित्रा चतुरश्रा तु निर्व्रणा ॥ १२५ ॥

साष्टाश्रपट्टावयवा पार्श्वयोः पद्मभूषिता ।
स्यात् स्कन्धपट्टिका युग्मप्रवेशे दक्षिणाश्रिता ॥ १२६ ॥

योगोच्छ्रितत्रिभागं वा चतुर्थांशमर्धेस्त्यजेत् ।
शेषमूर्ध्वं कवाटादेर्मञ्जरीभिश्च पङ्कजैः ॥ १२७ ॥

वल्लीपत्रनरैर्नारीभूतहंसगजैरपि ।
तद्वत् सिंहादिभिर्व्यालैरलङ्कुर्याद् यथारुचि ॥ १२८ ॥

योगावगाढै[3]र्योज्यं स्यादूर्ध्वं चोपप्रतेः शिखा ।
भवेच्च तल्पविस्तारकर्णायामा त्वयुग्मके ॥ १२९ ॥

परिघा स्यात् तथा नाहात् पादः पादार्धतोऽपि वा ।
परिघापादयोस्तुङ्गं तद्दैर्घ्याद् द्विगुणं भवेत् ॥ १३० ॥

दण्डव्यासार्धतस्त्र्यंशाद् बहलौ चापि विस्तृतौ ।
वे(ध ? द्ध)व्यौ परिघापादौ घातोपेतौ यथाबलम् ॥ १३१ ॥

दण्डायामत्रिपादेन विस्तृता चतुरश्रका ।
त्रिचतुर्भागतः स्थूला त्वे[4]कैतल्पस्य चार्गला ॥ १३२ ॥

अयोदण्डेन चायामौ योगमध्याद् विहाय तु ।
अर्धाङ्गुलं तु बध्नीयाद् यथैव सुदृढं भवेत् ॥ १३३ ॥

घटिकायामदण्डस्य व्यासो वेदांशवार्जितः ।
आयतश्चतुरश्रो वा वृत्तो वा स्याद् यथाबलम् ॥ १३४ ॥

त्रिचतुर्दण्डदीर्घं तदर्धार्धव्यासनाहकम् ।
बहिः पञ्चाननोपेतं कण्ठयुग्मं यथार्हतः ॥ १३५ ॥

---

१. 'सत्रि' ग. पाठः. २. 'थल्यजे' ग. पाठः. ३. 'ढं' ख. पाठः
४. 'कृत्वे यस्य' ग. पाठः.

आयतं घटिकायुग्मयुक्तमायसकीलकम् ।
युग्मार्गलौ तु युग्माख्ये कवाटे योजयेत् समौ ॥ १३६ ॥

पादकर्णसमन्यासा विष्कम्भादर्धनीप्रका ।
युक्ता चोत्तरवासी स्याद् दण्डैर्दण्डोपधानकैः ॥ १३७ ॥

आयसैः पाशकीलाद्यैर्युक्तं कृत्वाङ्गुलत्रयम् ।
उत्थाप्य तल्पं संस्थाप्य [1]भित्तेर्व्यासार्कभागतः ॥ १३८ ॥

बहिरन्तः शरांशान्तं रामांशान्तं क्रमेण तु ।
कवाटयोगमध्यं स्यात् तन्मध्यं भित्तिमध्यकम् ॥ १३९ ॥

सप्तांशे वाथ पञ्चांशे कुड्ये श्रुत्यग्निभागतः ।
क्रमाच्छराश्विभागे वा स्थाप्यो योगोऽधिकोऽन्तरे ॥ १४० ॥

देवानां च नराणां च मध्ये द्वारो विधीयते ।
शेषाणामुपमध्ये स्याद् द्वारोपर्यष्टमङ्गलम् ॥ १४१ ॥

सनकशूलां फलकां द्वारोर्ध्वे साष्टमङ्गलाम् ।
[2]देवद्विजादिवर्णानां तोरणार्थं निधापयेत् ॥ १४२ ॥

वृत्तौ तोरणदण्डौ तु त्रिपादविस्तृतौ समौ ।
सपादं वापि सार्धं वा विस्तारोऽप्यनयोर्मतः ॥ १४३ ॥

दिङ्नन्दवसुभागोनमग्रं स्याच्च शिखा तयोः ।
तदूर्ध्वोत्तरदण्डार्धसत्रिपादसमोदयम् ॥ १४४ ॥

समनिर्गमपार्श्वाभ्यां स्थूलं त्रिचतुरंशतः ।
[3]सार्धं दण्डं सपादं वा स्यादूर्ध्वं फलकोदयः ॥ १४५ ॥

तस्यां स्युर्मङ्गलान्यष्टौ तदूर्ध्वं त्रिशिखान्यपि ।
पञ्चवक्त्राणि तानि स्युर्द्विदण्डोच्चानि मध्यतः ॥ १४६ ॥

समं त्रिपादविस्तारात् पार्श्वपत्रावधिर्भवेत् ।
द्वित्रिवेदाङ्गुलं युक्त्या पत्राणां विततिः स्मृता ॥ १४७ ॥

उत्सेधोऽष्टनवैकांशात् पत्राणां बहुलं स्मृतम् ।
शिला दृढप्रवेशा स्यात् पार्श्वपत्राविचित्रिता ॥ १४८ ॥

---

[1] 'भक्तेर्व्या' ग. पाठः. [2] 'वविप्रादि' ख. ग. पाठः. [3] 'र्धं' ख. पाठः.

गर्भन्यासोदितान्यष्टौ मङ्गलानि पृथक् पृथक् ।
कुर्यादत्रापि तान्येव देवानामपि वर्णिनाम् ॥ १४९ ॥

द्वारलक्षणम् ।

प्रासादानामित्यधिष्ठानभेदा नैके स्तम्भाश्चाथ कायानुकायौ ।
नानाभेदाः षोतिकाश्चोत्तराणि द्वारं द्वारालङ्कृतिश्चाभ्यधायि ॥ १५० ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
अधिष्ठानादिद्वारान्तविधिपटलः
एकत्रिंशः ॥

अथ द्वात्रिंशः पटलः ।

तोरणं त्रिविधं ज्ञेयं मकरं चित्रपत्रके ।
देवद्विजनृपाणां तु शस्तं मकरतोरणम् ॥ १ ॥
विशां तु चित्रसंज्ञं स्याच्छूद्राणां पत्रतोरणम् ।
पार्श्वयोः पृष्ठतश्चापि प्रकुर्यात् कुड्यतोरणम् ॥ २ ॥
प्रतेरुत्तरसीमान्तं तोरणोदय ईरितः ।
तदर्धेनास्य विस्तारस्तद्व्यासेऽथ शरांशके ॥ ३ ॥
त्रिभिर्मकरयुग्मं स्यादंशाभ्यां पादयोः स्थितिः ।
यथा शोभान्तरं तत्र गुहावेशो भवेदपि ॥ ४ ॥
अर्धेन्दुसदृशैः पत्रैश्चित्रितं पत्रतोरणम् ।
नक्रयोर्वदनासक्तमध्यपूरिममण्डितम् ॥ ५ ॥
चित्रतोरणमुद्दिष्टं मध्यपूरिमपार्श्वयोः ।
विगृह्य मकरस्योत्थरत्नमालाधिरोपितैः ॥ ६ ॥
भूतविद्याधरव्यालसिंहैश्चारूढबालकैः ।
विलम्बितं तूभयतो भवेन्मकरतोरणम् ॥ ७ ॥
गुहासु तोरणानां तु यथार्हं प्रतिमास्तथा ।
न्यस्येन्नारीनरादींश्च यथाशोभं विचित्रितम् ॥ ८ ॥

हारासु वलभीमध्ये प्रमाणभवनेऽपि वा ।
कुड्येषु तोरणानि स्युस्तत्कुड्यं पञ्चधा स्मृतम् ॥ ९ ॥

शिलामयं चैष्टकं च जालकामयमित्यपि ।
फलकामयमप्यन्त्यं मृन्मयं चापरं क्रमात् ॥ १० ॥

यथार्हव्यासतुङ्गं तत् कुड्यं शैलं शिलामयम् ।
नानाजालकनिष्पाद्यं कुड्यं यज्जालकामयम् ॥ ११ ॥

यथार्हस्तम्भविन्यासं शस्तदारुमयक्रियम् ।
फलकाभिश्चितं मध्ये कुड्यं स्यात् फलकामयम् ॥ १२ ॥

मृत्तिकाभिः प्रशस्ताभिः कषायसलिलादिभिः ।
मर्दिताभ्युषिताभिश्च चि(त्रं ? तं) कुड्यं तु मृन्मयम् ॥ १३ ॥

कुड्यव्यासत्रिदेवांशबहलां वाग्रपङ्कजाम् ।
पट्टिकां चतुरश्रां वा कुड्योपरि नियोजयेत् ॥ १४ ॥

स्तम्भान्तरं द्विहस्तादि भवेत् पञ्चकरान्तरम् ।
वितस्तिवृद्ध्या तन्मध्ये कार्या कुड्यलता त्रिधा ॥ १५ ॥

कुड्यस्तम्भस्य विस्ताराद् द्विगुणं चार्धमुच्छ्रितम् ।
अधः पद्मासनं कुर्यात् तदूर्ध्वं च यथारुचि ॥ १६ ॥

विनिर्गतोन्नतिं कुम्भं पार्श्वयोस्तस्य तन्मुखात् ।
पत्रैर्विनिर्गतैश्चित्रं यथाशोभं नियोजयेत् ॥ १७ ॥

तदूर्ध्वं कुड्यकस्तम्भसमपादाम्बुजासनम् ।
अखण्डकलशं कुर्यात् पद्मकुम्भलतायुतम् ॥ १८ ॥

सा तु कुम्भलतासंज्ञा सैव खण्डोपरि क्रमात् ।
नक्रतोरणवन्न्यस्ता स्तम्भकुम्भलता मता ॥ १९ ॥

कुम्भपद्मासनयुता सैव सर्वलतान्विता ।
पद्मकुम्भलता नाम विज्ञेया हि लता भवेत् ॥ २० ॥

तले तले विमानानां (नि? दि)क्षु बेराणि विन्यसेत् ।
नन्दीश्वरमहाकालौ पूर्वद्वाराधिपौ न्यसेत् ॥ २१ ॥

दक्षिणे दक्षिणामूर्तिं पश्चिमे लिङ्गसम्भवम् ।
विष्णुं वाप्यथ कौबेरे दुर्गां ब्रह्माणमेव वा ॥ २२ ॥

मण्डपे मध्यपत्रे तु दक्षिणे च विनायकम् ।
उत्तरे नृत्तरूपं तु क्षेत्रेशं चैशगोचरे ॥ २३ ॥

रुद्रावतारक्रीडादिकथारूपाणि चैव हि ।
मूलभित्तौ च परितो विन्यसेदुक्तलक्षणम् ॥ २४ ॥

अथोपरितलात् प्राच्यामिन्द्रं षण्मुखमेव वा ।
दक्षिणे दक्षिणामूर्ति वीरभद्रमथापि वा ॥ २५ ॥

पश्चिमे नारसिंहं चाप्युत्तरे चार्थदं विधिम् ।
द्वितीये तु तले चैवं तृतीये तु मरुद्गणान् ॥ २६ ॥

तले तलेऽमरान् सिद्धान् यक्षविद्याधरानपि ।
गन्धर्वानप्यप्सरसः सिद्धान् नागांस्तथा मुनीन् ॥ २७ ॥

प्रमथांश्चैव दैत्यादीन् षोडशप्रतिमास्तथा ।
कण्ठादधः प्रतेरूर्ध्वं कोणे कोणे वृषान् न्यसेत् ॥ २८ ॥

सर्वेषामपि देवानां कोणे कोणे स्ववाहनम् ।
कण्ठादधश्चान्त्यतले प्राकारादौ च विन्यसेत् ॥ २९ ॥

इत्येवमादिभिर्युक्तं विमानं सम्पदां पदम् ।
गर्भार्द्धसमविस्तारा महानासाश्चतुर्दिशम् ॥ ३० ॥

तदर्धाद् वा त्रिपादाद् वा तासां निर्गम ईरितः ।
क्षुद्रनासास्तदर्धाद् वा रामांशाद् वापि कारयेत् ॥ ३१ ॥

नासिकानां तु करणमष्टधोक्तं पुरातनैः ।
सिंहपञ्जरमादौ स्यात् पञ्जरं चार्धपञ्जरम् ॥ ३२ ॥

निर्यूहपञ्जरं चैव कथितं लम्बनासिकम् ।
सिंहश्रोत्रं तथा खण्डनिर्यूहझषपञ्जरम् ॥ ३३ ॥

द्विदण्डादिचतुर्दण्डविस्तृतं शालयान्वितम् ।
सूचिपादद्वयोपेतं श्लिष्टप्राकारनीप्रकम् ॥ ३४ ॥

षड्वर्गसहितं व्याससमनिर्गममेव वा ।
शक्तिध्वजयुतं चापि तथा सम्मुखपट्टिकम् ॥ ३५ ॥
वेदिकाजालकस्तम्भयुक्तं स्यात् सिंहपञ्जरम् ।
प्रासादनीप्रसंश्लिष्टस्वनीप्रादर्धनिर्गतम् ॥ ३६ ॥
अधिष्ठानाङ्घ्रियुक्तं च प्रस्तरग्रीवसंयुतम् ।
तद्वत् सशिखरं शक्तिध्वजसम्मुखपट्टिकम् ॥ ३७ ॥
वेदिकाजालकर्णाढ्यं सार्धपञ्जरसंज्ञितम् ।
प्राग्वच्छेषं च विस्तारपादसम्मितनिर्गमम् ॥ ३८ ॥
व्यासत्रिभागनिर्यूहं वृत्तस्फुटितकर्मवत् ।
पञ्जराख्यं स्मृतं चाथ स्वतुल्यशिखराग्रकम् ॥ ३९ ॥
श्लिष्टनीप्राङ्गकर्णं च कपोताद्यङ्गसंयुतम् ।
निर्यूहपञ्जरं त्वेतल्लम्बनासिकमुच्यते ॥ ४० ॥
संश्लिष्टनीप्रकर्णाङ्घ्रि कृतनागदलाद्यपि ।
निर्यूहसहितं युक्तसर्वाङ्गं लम्बनासिकम् ॥ ४१ ॥
सिंहश्रोत्रशिखायुक्तमेतदेव तु पादवत् ।
नीप्रसंश्रितकर्णांशं सिंहश्रोत्राभिधानकम् ॥ ४२ ॥
यत् स्वविस्तारपञ्चांशद्व्यंशनिर्गमसंयुतम् ।
नीडाधस्तात् कपोताद्यैः खण्डनिर्यूहकं युतम् ॥ ४३ ॥
दण्डदण्डार्धनिष्क्रान्तनीप्राधस्तात् तथोपरि ।
कण्ठोर्ध्वतोरणोपेतं कपोताद्यङ्गसंयुतम् ॥ ४४ ॥
झषपञ्जरसंज्ञं स्यादथ कूटादि कथ्यते ।
कूटं प्रासादषड्भागादंशः शाला द्वि-गतः ॥ ४५ ॥
प्रासादजयभूम्यादिकपोतोर्ध्वनिबन्धनात् ।
उन्नतः पञ्जरोत्सेधस्तद्विभागोऽत्र कथ्यते ॥ ४६ ॥
पञ्जरोच्चे शरांशे तु सपादांशोऽङ्घ्रितुङ्गता ।
तदर्धं प्रस्तरोत्सेधस्तत्समः कर्णकोच्छ्रयः ॥ ४७ ॥
शेषेणाप्यर्धकर्णः स्यादूर्ध्वं शीर्षोदयः स्मृतः ।
तत्स्तम्भार्धादधिष्ठानं शेषेणाप्युपपीठकम् ॥ ४८ ॥

एवमुक्ता हि सर्वेषां पञ्जराणामिहोन्नतिः ।
अथ तोरणशालाया मूलाधिष्ठानतोऽर्धतः ॥ ४९ ॥
उच्चं भवेदधिष्ठानं स्तम्भस्तद्द्विगुणः स्मृतः ।
अधिष्ठानाष्टभागोनः प्रस्तरः कन्धरा तथा ॥ ५० ॥
तोरणोच्चं तु शेषेण शालाभं वापि कारयेत् ।
शालाकूटान्तरे शालामध्ये वा पन्जरं भवेत् ॥ ५१ ॥
ऊर्ध्वे कुर्यान्महानासिं पन्जरं शुकनासिकाः ।
नासिकोपरि नासीं तु न कुर्वीत कदाचन ॥ ५२ ॥
सर्वाः स्तम्भाश्रया नास्यः स्यात् प्रत्यूर्ध्वे च वेदिका ।
सार्धं वा द्वित्रिदण्डं वा वेदिकोच्चं प्रकल्पयेत् ॥ ५३ ॥
पुष्पखण्डं चित्रखण्डं शैवलं चित्रशैवलम् ।
चतुर्धा प्राग्वदाभूष्य पादादौ कुड्यभूषणम् ॥ ५४ ॥
प्रत्यूर्ध्वे गलभूषा स्याद् वेदिकोपरि जालकम् ।
त्रिचतुष्पञ्चदण्डं वाप्युत्तरान्तोन्नतं भवेत् ॥ ५५ ॥
उच्चात् त्रिवेदभागोनं विपुलं जालकस्य तु ।
ऋजुसंज्ञं गवाक्षं च गजाक्षं गुलिका तथा ॥ ५६ ॥
गोमूत्रं पत्रकं चैव नन्द्यावर्तं च सप्तमम् ।
जालानां सप्तभेदानां पृथग् लक्षणमुच्यते ॥ ५७ ॥
ऋजुसूचिकपादं यदृजुजालकसंज्ञितम् ।
आयामचतुरश्रोर्ध्वकर्णकं स्याद् गवाक्षकम् ॥ ५८ ॥
चतुरश्रकर्णलब्धच्छिद्रमुक्तं गजाक्षकम् ।
मूलाग्रमध्यगुलिकमृजुभित्त्यन्तरार्पणात् ॥ ५९ ॥
नाटकान्तरितच्छिद्रं गुलिकाख्यं तु जालकम् ।
विदिग्वक्रगतच्छिद्रं गोमूत्राख्यं तदाकृति ॥ ६० ॥
पत्रैर्विचित्रान्तरितरन्ध्रं स्यात् पत्रजालकम् ।
पञ्चसूत्रान्तरा रन्ध्रैः प्रादक्षिण्यकृतं तु यत् ॥ ६१ ॥

---

१. 'न्नो' क. पाठः. २. 'ञ्ज' ग. पाठः.

नन्द्यावर्ताकृतिच्छिद्रं नन्द्यावर्ताख्यजालकम् ।
वेदिकाद्द्विगुणोऽध्यर्धं समो वा स्याद् गलोदयः ॥ ६२ ॥

भित्तिविस्ताररामांशाद् वेदिकावेशनं भवेत् ।
ग्रीवावेशस्तदूर्ध्वं स्याच्छरांशोनोऽपि तत्समः ॥ ६३ ॥

मृणालिकावक्रपादभूतहंसमृगैरपि ।
व्यालनाट्यकथाभिर्वा गलभूषणमाचरेत् ॥ ६४ ॥

अथ कण्ठार्धमानेन शिखरं वर्तयेत् समम् ।
कण्ठाद् द्विदण्डमानेन भवेच्छिखरनिर्गमः ॥ ६५ ॥

निर्गमाद् वर्तना बाह्ये वर्तयित्वा द्विदण्डतः ।
स्तूपीं सकुम्भां कुर्वीत यथैव शिखराकृतिः ॥ ६६ ॥

शिखरस्य च संस्थानमष्टधा तच्च कथ्यते ।
चतुरश्रमायताश्रं वृत्तं वृत्तायतं तथा ॥ ६७ ॥

शालाकारं षडश्रं चाप्यष्टाश्रं षोडशाश्रकम् ।
इत्यष्टौ शिखराकारास्तेषामथ निगद्यते ॥ ६८ ॥

अर्धमौलिसभाग्रमुखपाट्टिकाकार[1]प्रस्तरच्छत्रशीर्षगृहपिण्डिहस्तितुण्डकादीनां पाञ्चालादयोऽष्टौ लुपा भवन्ति । दण्डिकोत्तरविस्तारे पञ्चाद्विसप्तत्रिचतुरेकादश[2]पञ्चत्रयोदशषट्पञ्चदशसप्तदशाष्टव्यासादर्धोदयादीनि (?) क्रमेण पाञ्चालवैदेहमागधकौरवकौसलशौरसेनगान्धारावन्तिकानि भवन्ति ।

विस्तारार्धोच्चमावन्त्यं तद्व्यामिश्रं तु नामतः ।
तद्द्वयं द्व्यधा भक्तमेकद्वित्र्यंशकोऽपि च ॥ ६९ ॥

चतुःपञ्चकषट्सप्तभागाधिक्यात् क्रमेण तु ।
भवन्ति शिखरोच्चानां नामान्यपि च सप्तधा ॥ ७० ॥

कालिङ्गकाश्यवाराटकोल्लकानि च शौण्डिकम् ।
काश्मीरं चैव गाङ्गेयं शिखराणि पृथग् विदुः ॥ ७१ ॥

एतानि दैवधिष्ण्यानामर्धवेधेतरन्नृणाम् ।
सर्वत्र चापि स्तम्भा वा हस्तवंशतुला अपि ॥ ७२ ॥

---

१. 'रलांत्र शी',　२. 'शषट्' ग. पाठः.

स्तूपिकाश्चापि देवानामयुग्माश्चैव शोभनाः ।
युग्मा एव मनुष्याणां प्रशस्ताः सर्वधामसु ॥ ७३ ॥
शिखरोदयवेदांशात् पञ्चांशाद् वाब्जतुङ्गता ।
तस्मात् पादाधिकं वा स्यात् सार्धपादाधिकं तु वा ॥ ७४ ॥
स्तूप्युच्छ्रयः स्यात् तन्न्यासः परतोऽत्र निगद्यते ।

शिखरलक्षणम् ।

अग्रसोपानकरणं गुह्यागुह्यमिति द्विधा ॥ ७५ ॥
वेदाश्रं दीर्घवेदाश्रं वृत्तं चेति त्रियोनिकम् ।
चतुर्विधः प्रकारः स्यात् त्रिखण्डं शङ्खमण्डलम् ॥ ७६ ॥
अर्धगोमूत्रकं चाथ वल्लीमण्डलमित्यपि ।
त्रिखण्डाकारानिचितं यत् सोपानं त्रिखण्डकम् ॥ ७७ ॥
मूलाद्याग्रं तु संक्षिप्तं क्रमाद् यच्छङ्खमण्डलम् ।
तद्द्विखण्डं तु सोपानमर्धगोमूत्रसंज्ञितम् ॥ ७८ ॥
वृक्षारो[2]हिलताकारं वल्लीसोपानसंज्ञितम् ।
शयितव्यासपादार्धत्रिपादोच्चानि वै पृथक् ॥ ७९ ॥
समखण्डानि कुर्वीत सोपानानि यथाक्रमम् ।
द्विदण्डं वाध्यर्धदण्डं भवेद्धस्तबिलं ततः ॥ ८० ॥
त्रिपादाद् वापि चार्धाद् वा हस्तनीप्रं विधीयते ।
स्थितस्य शयितस्यापि प्रवेशः स्याद् यथाबलम् ॥ ८१ ॥
अश्व्यग्निवेदबाणर्तुस्वरदण्डान्तविस्तृतिः ।
सोपानानां भवेद् द्वित्रिचतुर्दण्डोऽश्वपादके ॥ ८२ ॥
अर्धचन्द्रसमाकारं तत्संस्थानं प्रकल्पयेत् ।
तच्च हस्तघनं वा स्यात् त्रिपादं वास्य चोपरि ॥ ८३ ॥
स्थित्वा तले तले शस्तप्रादक्षिण्याधिरोहणम् ।
तदप्ययुग्ममेव स्यात् प्रासादे मण्डपेऽपि वा ॥ ८४ ॥

---

1. 'ट' ग. पाठः, 2. 'लो' ख. पाठः,

शालादिषु च रङ्गेषु सोपानं प्रमुखं स्मृतम् ।
पार्श्वयोर्मुखसोपानमन्यत्र परिमण्डयेत् ॥ ८५ ॥

सोपानम् ।

सर्वेषां च भवेद् धाम्नां सञ्चितं चाप्यसञ्चितम् ।
उपसञ्चितकं चेति लिङ्गं पुंस्त्रीनपुंसकम् ॥ ८६ ॥

शिलाभिरिष्टकाभिर्वा कृतं सञ्चितसंज्ञितम् ।
कपोतादिशिरोयुक्तं पुँल्लिङ्गं नाम यद् घनम् ॥ ८७ ॥

ऐष्टकं दारुजं वापि भोगभूम्यङ्गसञ्चितम् ।
असञ्चिताख्यं स्त्रीलिङ्गं विमानं तदुदाहृतम् ॥ ८८ ॥

इष्टकादारुभिर्मिश्रमघनं च घनं क्वचित् ।
उपसञ्चितकं षण्डं भोगाभोगाङ्गसंयुतम् ॥ ८९ ॥

द्वारस्योभयपार्श्वे वा द्वारपालगुहा भवेत् ।
छिद्रं कुर्यादधश्चोर्ध्वे बाह्ये नालं प्रयोजयेत् ॥ ९० ॥

जगत्यङ्गुलमारभ्य त्र्यङ्गुलविवर्धनात् ।
आसङ्कृत्यङ्गुलं नालस्यायामः पञ्चधा स्मृतः ॥ ९१ ॥

मयोऽष्टाङ्गुलमारभ्य द्विद्व्यङ्गुलविवर्धनात् ।
नालं षोडशमात्रान्तं पञ्चधेति जगाद ह ॥ ९२ ॥

समं त्रिपादमर्धं वा खनच्छिद्रं तु मध्यमे ।
त्रिचतुष्पञ्चतन्मात्रं तारं[1] तत्समनिम्नकम् ॥ ९३ ॥

मूलात् पञ्चत्रिभागं स्यादग्रं धाराभिरन्वितम् ।
सिंहवक्त्रेण घटितं द्राङ्नताग्रं तु मूलतः ॥ ९४ ॥

प्रासादस्योत्तरे मध्ये नालमेवं प्रकल्पयेत् ।
अन्तःस्थपीठनालस्य समं वा बाह्यनालकम् ॥ ९५ ॥

विस्तारायामतः कुर्याद् भूषयेच्च यथोचितम् ।

नाललक्षणम् ।

मण्डपस्याप्यधिष्ठानं प्रासादोक्तं यदेव तत् ॥ ९६ ॥

---

१ 'तारं' क. ख. पाठः. २. 'छ' ख. पाठः.

पूर्वोक्ता एव पादाः स्युः प्रस्तरोऽपि च पूर्ववत् ।
ऊर्ध्वदण्डाग्रविपुलमनुमार्गं च कारयेत् ॥ ९७ ॥
चतुरश्रचतुःस्तम्भो नन्द्यावर्तस्तु मण्डपः ।
अष्टाभिः स्वस्तिकाख्यः स्याद् वीरासनमिनाङ्घ्रिभिः ॥ ९८ ॥
स्तम्भैः षोडशभिर्विद्यान्मण्डपं श्रीप्रतिष्ठितम् ।
द्वात्रिंशद्भिर्जयभद्रं षट्त्रिंशद्भिरथाङ्घ्रिभिः ॥ ९९ ॥
मण्डपो माणिभद्रः स्याच्छतस्तम्भैर्विशालकम् ।
अत ऊर्ध्वं युताः स्तम्भैर्विशालास्तेऽपि मण्डपाः ॥ १०० ॥
पादायतं वाप्यध्यर्धं द्विगुणं वा ततोऽधिकम् ।
चतुरश्रायतं कुर्यान्मण्डपं दैवमानुषम् ॥ १०१ ॥
द्वित्रिहस्तान्तरान् स्तम्भांश्चतुर्हस्तान्तरांस्तु वा ।
मण्डपे युक्तितः कुर्याद् भारनाहोत्तरोचितम् ॥ १०२ ॥
कुर्वीत मण्डपं युक्त्या प्रासादाभिमुखेष्वपि ।
आरामपुण्यक्षेत्रादौ ग्रामगेहादिमध्यतः ॥ १०३ ॥
दीक्षाभिषेकयागार्थं नृत्तस्थानार्थमेव च ।
आरभ्य सार्धहस्तं तु रसाङ्गुलविवर्धनात् ॥ १०४ ॥
शरहस्तावधिर्यावद् विद्यात् स्तम्भान्तरं क्रमात् ।
एकद्वित्रिचतुष्पञ्चभागे भक्त्या[1]न्तरे कृते ॥ १०५ ॥
एकभागेन वृद्धिः स्यादायामः स्वविशालतः ।
स्वभक्तिविस्तृता त्रित्रिमात्रवृद्ध्या करान्ततः ॥ १०६ ॥
आयामस्त्वष्टधा प्रोक्तस्तेन मानेन योजयेत् ।
सायतं चापि तत्सर्वं तन्नाम्नैव प्रपद्यते ॥ १०७ ॥
सार्धद्विहस्तमारभ्य षट्षडङ्गुलवर्धनात् ।
अष्टहस्तान्तमङ्घ्र्युच्चं त्रयोविंशत्प्रमाणकम् ॥ १०८ ॥
द्वित्र्यङ्गुलिविवृद्ध्या तु स्तम्भोत्सेधोऽथवा भवेत् ।
अष्टाङ्गुलं समारभ्य चार्धार्धाङ्गुलवर्धनात् ॥ १०९ ॥

---

[1] 'क्ष्या' ग. पाठः.

नन्दपञ्चाङ्गुलं यावत् संख्यया पूर्ववत् ततिः ।
स्तम्भोत्सेधे तु रुद्रांशे पङ्क्ति[1]नन्दाष्टभागिके ॥ ११० ॥

मूलतारं तु भागेन तत्तद्भागोनमग्रतः ।
स्तम्भोच्चे शरभागे तु द्विभागोच्चं तु वा तैलम्[2] ॥ १११ ॥

तृतीयांशैकभागेन स्तम्भस्योच्चं मसूरकम् ।
सोपपीठमधिष्ठानं केवलं वा मसूरकम् ॥ ११२ ॥

अधिष्ठानोपरि स्तम्भः प्रस्तरश्च त्रिपट्टकः ।
कपोतप्रतिसंयुक्तः सामान्यो मण्डपः स्मृतः ॥ ११३ ॥

चतुरश्रश्चतुष्पादो वसुनासाविभूषितः ।
प्रपासनाभिधानैः[3] स्यान्मण्डपो वा प्रपाथवा ॥ ११४ ॥

त्रिभक्ति षोडशस्तम्भं सरङ्गं द्व्यष्टनासिकम् ।
सकूटं वा चतुर्द्वारं चतुर्भिस्तोरणान्वितम् ॥ ११५ ॥

देवद्विजनरेन्द्रार्हं सर्वकर्मसु पूजितम् ।
नाम्ना सिद्धं वदन्तीह मण्डपं वा प्रपामपि ॥ ११६ ॥

मण्डपलक्षणम् ।

अथ प्रपाणां लक्ष्मापि सामान्येनेह कथ्यते ।
पादायामः पुरोक्तः स्याद् वेदर्त्वष्टदशाङ्गुलैः ॥ ११७ ॥

पादविष्कम्भमानं स्यात् पादाः स्युः सारदारुजाः ।
त्वक्सारैर्निर्मिता वा स्युरूर्ध्ववंशोत्तराण्यपि ॥ ११८ ॥

प्राग्वंशं चानुवंशं च नालिकेरच्छदादिभिः ।
अन्यैर्वाप्युपपत्त्या तु पत्रैः प्रच्छादयेत् प्रपाम् ॥ ११९ ॥

पङ्क्तिनन्दाष्टसप्तर्तुशरांशे पादतुङ्गके ।
भागेन वेदिकोच्चं स्यान्मध्ये रङ्गं च कल्पयेत् ॥ १२० ॥

चतुर्थांशेन पादोच्चाद् भागाद् वेदिमसूरकम् ।
स्याद् द्व्यंशस्तालिमायामः प्रस्तरोंऽशेन तस्य तु ॥ १२१ ॥

---

१. 'ग', २. 'लकम्', ३. 'नस्य मण्डानो वा' ग. पाठः.

युग्मायुग्मे द्विभक्त्यैकभक्त्या वा तद्विशालता ।
चतुःस्तम्भं वसुस्तम्भं षोडशस्तम्भकं तु वा ॥ १२२ ॥
सर्वावयवसंयुक्तं मिश्रद्रव्यं तु वा भवेत् ।
शालासभाप्रपाणां वा मण्डपानां तु मध्यतः ॥ १२३ ॥
प्रतिष्ठितचतुःस्थानं त्रिमानं रङ्गसंज्ञितम् ।
इत्थं यथावदिह तोरणकुड्यनालाः
सोपानपञ्जरगवाक्षविशेषकण्ठाः ।
बेराणि च प्रतितलं शिखराणि सम्यक्
प्रोक्तानि मण्डपविशेषयुताः प्रपाश्च ॥ १२४३ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
तोरणादिलक्षणपटलो द्वात्रिंशः ।

अथ त्रयस्त्रिंशः पटलः ।

द्रव्याण्यथ विमानादेः शिला दारूणि चेष्टकाः ।
लोष्टानि-मृत् सुधा चेति षड्विधानि प्रचक्षते ॥ १ ॥
तत्र लक्ष्म शिलायास्तु परतोऽत्र निगद्यते ।
दार्वादीनां तु पञ्चानां सङ्ग्रहः पूर्वमुच्यते ॥ २ ॥
वर्ज्यास्तु तरवः पूर्वं वक्ष्यन्ते ये सकोटराः ।
सवल्लीका लताश्लिष्टाः कीटजुष्टाः सकण्टकाः ॥ ३ ॥
सदा पुष्पफलाढ्या वा नृगोदेवाश्रिताश्च ये ।
बहुपक्षिमृगैर्जुष्टाश्चैत्यमार्गश्मशानजाः ॥ ४ ॥
वक्राः शुष्काश्च ये भग्नाः सर्वभूतादिसंश्रयाः ।
पलाशाः कुटजा लोध्रा बिल्वपीलुशिरीषकाः ॥ ५ ॥
श्लेष्मातकाः कदम्बाश्च कोविदाराः सकिंशुकाः ।
पथ्याक्षामलकाः पार्थाः स्नुहिस्नुग्वरणा अपि ॥ ६ ॥
अम्बष्ठाः सप्तपर्णाश्च कारस्करविकङ्कताः ।
न्यग्रोधोदुम्बराश्वत्थप्लक्षशल्मलितिन्दुकाः ॥ ७ ॥

नन्द्यावर्ताश्च बदराः करवीराः कपित्थकाः ।
सर्षमारारिमेदाश्च पुत्रजीवाः सडुण्डुकाः ॥ ८ ॥
तिन्त्रिणीपाटलाशोककपूरागरुगृञ्जनाः ।
अर्काश्च वर्जनीयाः स्युर्देवमानुषधामसु ॥ ९ ॥
ऋजवः सारवन्तश्च दृढाश्च चिरजीविनः ।
वर्षवातातपसहा जलस्थलसहाश्च ये ॥ १० ॥
तत्तद्देशोचिताः शस्ता ग्राह्याः स्युः शुभधामसु ।
प्रायशः क्षीरतरवो न मनुष्यगृहोचिताः ॥ ११ ॥
देवधामसु ते योग्याः सर्वेषां लिकुचः शुभः ।
वृत्ताकारस्तु मूलाग्राद् बहुशाखो दृढायतः ॥ १२ ॥
पुंवृक्षः स्यात् तरोः स्त्रीत्वं स्थूलमूलकृशाग्रता ।
मूलाग्रयोः कृशत्वं च मध्ये स्थौल्यं च षण्डता ॥ १३ ॥
मुहूर्तगर्भस्तम्भादौ पुंवृक्षेणैव कारयेत् ।
शेषकर्मसु सर्वेषु त्रिलिङ्गैरपि शस्यते ॥ १४ ॥

दारुनियमः ।

शुक्लपक्षे शुभर्क्षादौ कर्ता स्थपतिना सह ।
स्नातः सिताम्बरालेपः कृतकौतुकमङ्गलः ॥ १५ ॥
वाचयित्वा द्विजैः स्वस्ति सर्वातोद्यपुरस्कृतः ।
यथोद्दिष्टं व्रजेद् देशमुद्दिष्टैस्तरुभिर्युतम् ॥ १६ ॥
प्रयाणसमये शस्तैर्निमित्तैर्ज्ञातमङ्गलः ।
उद्दिष्टवृक्षच्छायायामुपलिप्य तु मण्डलम् ॥ १७ ॥
गणेशं गन्धपुष्पाद्यैर्भक्ष्यैर्भोज्यैश्च पूजयेत् ।
क्षेत्रेशमोषधीशं च तथैव वनदेवताः ॥ १८ ॥
गन्धादिभिश्च चरुणा फलपायसमोदकैः ।
इष्ट्वा भूतबलिं दद्याद् भूतान्नकृसरौदनैः ॥ १९ ॥

सटङ्कः स्थपतिः स्नात्वा मन्त्रावेतावुदीरयेत् ।
अपक्रामन्तु भूतानि देवताश्च सगुह्यकाः ॥ २० ॥
युष्मभ्यं सुबलिर्भूयात् सोमो दिशतु पादपान् ।
शिवमस्तु महीपुत्रा युष्मभ्यं चापि नः सदा ॥ २१ ॥
कर्मैतत् साधयिष्यामि क्रियतां वासपर्ययः ।
एवमुक्त्वा नमस्कृत्य पादपेभ्यः प्रसन्नधीः ॥ २२ ॥
तरोश्छेद्यस्य तु प्राच्यां पीत्वा गव्यं पयो निशि ।
दर्भेषु स्थपतिः सुप्त्वा सुस्वप्नैः प्रातरुत्थितः ॥ २३ ॥
स्नात्वा स्वलङ्कृतः शस्ते मुहूर्ते स्थपतिः सुधीः ।
आलिप्य परशोरास्यं पञ्चगव्येन वाग्यतः ॥ २४ ॥
वाद्यैश्च मङ्गलैर्गीर्भिः प्राङ्मुखो वाप्युदङ्मुखः ।
किष्कुमात्रं तरोर्मूलं त्यक्त्वा छिन्द्यात् तदूर्ध्वतः ॥ २५ ॥
छेदात् क्षीरस्रुतिर्लक्ष्म्यै जलस्रावस्तु सौख्यकृत् ।
रुधिरस्य विनाशाय कर्तुश्छिन्द्यान्न तं तरुम् ॥ २६ ॥
सिंहेभवृषभध्वानाः पतने तु शुभावहाः ।
हसिताक्रोशरुदितकूजितान्यशुभान्यतः ॥ २७ ॥
तं वृक्षं वर्जयित्वान्यं गृह्णीयाच्छुभलक्षणैः ।
इन्द्रेशार्थददिक्पातस्तन्मुखाग्रं च शस्यते ॥ २८ ॥
अन्यथा पतितस्त्याज्यो भङ्गः सर्वत्र गर्हितः ।
वृक्षान्तरादौ सङ्गोऽपि विघ्नक्लेशकरोऽशुभः ॥ २९ ॥
शुभच्छेदाग्रपतनं तरुमूलाग्रयोः समम् ।
इष्टप्रमाणतश्छित्त्वा चतुरश्रं तु तक्षयेत् ॥ ३० ॥
मुहूर्तस्तम्भमुद्दिश्य शुक्लेनाच्छाद्य वाससा ।
शकटादौ समारोप्य यथोद्देशमुपाहरेत् ॥ ३१ ॥
देवद्विजनरेन्द्राणां विशां च शकटैर्गजैः ।
दार्वाहरणमिष्टं स्यादन्येषां नृभिराहरेत् ॥ ३२ ॥
प्रवेश्य शस्तद्वारेण कर्मशालास्थले ततः ।
वालुकासञ्चये दारु शाययेत् पूर्वमस्तकम् ॥ ३३ ॥

न परावर्तनं कुर्यादष्टपञ्चत्रिमासतः ।
इत्थं दारोर्विधानेन सङ्ग्रहेद् धामकर्मणि ॥ ३४ ॥
स्वीकारः सर्वदारूणां विधिनैव कृतो भवेत् ।

दारुस्वीकरणम् ।

अथेष्टकानां करणं सुधा चैव निगद्यते ॥ ३५ ॥
चिक्कणा पाण्डराख्या च सलोणा च विगर्हिता ।
चतुर्थी ताम्रफुल्ला तु कर्मयोग्या मृदिष्यते ॥ ३६ ॥
तुषाङ्गारास्थिपाषाणकाष्ठशर्करलोष्टकैः ।
वर्जिता सूक्ष्मासिकता ताम्रफुल्लेष्टकोचिता ॥ ३७ ॥
तां प्रक्षिप्यावटे मृत्स्नां जानुदघ्नं जलं क्षिपेत् ।
आलोड्य पद्भिः संक्षोभ्य मर्दयेत् तां पुनः पुनः ॥ ३८ ॥
ततः क्षीरागशैरीषत्वक्क्वाथैस्त्रिफलाम्बुभिः ।
मर्दयेन्मासमात्रं तु तत्कर्मकुशलैर्नरैः ॥ ३९ ॥
इष्टकाः कल्पयेत् सम्यग् द्वादशाङ्गुलमायताः ।
तदर्धविस्तृताः कुर्याद् व्यासरामांशमुच्छ्रिताः ॥ ४० ॥
त्रिपादोनास्त्वतो वा स्युर्घर्मे ताः परिशोषयेत् ।
अखण्डर्क्षे सुलग्नादौ चुल्लीं कृत्वानुमारुतम् ॥ ४१ ॥
तत्रेष्टकास्ताः सन्दध्यात् सान्तरं क्रमशश्चिताः ।
काष्ठैः पलालभाराद्यैराचिताः स्युर्निरन्तरम् ॥ ४२ ॥
बहिराच्छादयेत् सम्य मृत्स्नया च विलेपयेत् ।
तन्मुखेष्वग्निमाधाय दशाहं पक्षमेव वा ॥ ४३ ॥
संस्कृत्य ज्वलने शान्ते समुद्धृत्येष्टकास्ततः ।
प्रक्षिप्य सलिले वर्षमष्टौ मासान् षडेव वा ॥ ४४ ॥
उद्धरेदिष्टकास्ताः स्युर्विमानादिक्रियोचिताः ।

इष्टकाः ।

इष्टकोक्तमृदा तद्वन्मृल्लोष्टकरणं स्मृतम् ॥ ४५ ॥

---

१. 'कं' ग. पाठः.

तत्तन्मात्राङ्गुलैरर्कदिग्वसूनां तु संख्यया ।
आयतान्युत्तमादीनि मृल्लोष्टानि भवन्ति हि ॥ ४६ ॥
स्वायामार्धात् स्मृतो व्यासः शरांशे द्व्यंशतोऽपि वा ।
व्यासे रामाब्धिबाणांशे लोष्टोत्सेधोंऽशतो भवेत् ॥ ४७ ॥
उत्तमादिक्रमादेवं मृल्लोष्टेषु स्मृतो विधिः ।
सुवर्णरूप्यताम्राणां लोष्टैः श्रेष्ठादिकं फलम् ॥ ४८ ॥
लभते देवधिष्ण्यादौ मार्त्तिकैरधमाधमम् ।
मानप्रमाणं लोहानां ज्ञेयं वित्तानुसारतः ॥ ४९ ॥
सर्वाण्यपि समानानि सप्तभेदानि तान्यपि ।
द्व्यश्रं चैव द्विकोणाग्रं पार्श्वलोष्टं च वर्तुलम् ॥ ५० ॥
कोणलोष्टं च वक्रं च प्रह्वलोष्टं च सप्तमम् ।
क्रमपङ्क्तिनिवेशस्तु तैर्विधेयं तु युक्तितः ॥ ५१ ॥

इष्टकालोष्टकरणम् ।

करालमुद्गगुल्मासकल्कचिक्कणकाह्वयाः ।
चूर्णोपयुक्ताः पञ्चैते सुधाप्रकृतयो मताः ॥ ५२ ॥
अभयाक्षबीजमात्राः शर्कराः स्युः करालकाः ।
मुद्गा मुद्गसमा ज्ञेया मुद्गिनः क्षुद्रशर्कराः ॥ ५३ ॥
सार्धत्रिपादद्विगुणकिञ्जल्कसिकतान्वितम् ।
चूर्णं तु शर्कराशुक्त्योर्यद् गुल्मासं तदुच्यते ॥ ५४ ॥
करालमुद्गयोः पूर्वोक्तमानेन सिकतान्वितम् ।
चणकस्य च चूर्णस्य पिष्टं यत् कल्कमिष्यते ॥ ५५ ॥
चिक्कणं केवलं त्वम्बु बद्धोदकमिति द्विधा ।
केवलेनाम्भसा पूर्वं पूर्वोक्तांस्त्रिः प्रकुट्टयेत् ॥ ५६ ॥
क्षीरद्रुमामलाक्षाणां कदम्बाभययोरपि ।
त्वग्जलैस्त्रिफलातोयं माषयूषं च तत्समम् ॥ ५७ ॥
संयम्य शर्कराशुक्त्योश्चूर्णं तत् खातवारिणि ।
खुरसंकुट्टनं कृत्वा स्रावयित्वाथ वाससा ॥ ५८ ॥

चिक्कणं कल्पयेत् तेन बद्धोदकमथोच्यते ।
दधिदुग्धमाषयूषैर्गुलाज्यकदलीफलैः ॥ ५९ ॥
नालिकेराम्रफलयोर्जलैश्चैतत् सुकल्पितम् ।
बद्धोदकं भवेत् तच्च समभागं नियोजयेत् ॥ ६० ॥
लब्धचूर्णं शतांशं तु क्षौद्रमंशद्वयं भवेत् ।
आज्यं तु कदलीपक्कं नालिकेराम्बुमाषयूः ॥ ६१ ॥
क्षीरागत्वककषायश्च क्षीरं दधि ततो गुलम् ।
पिच्छिलं त्रिफलाम्भश्च त्र्यंशादिकमिदं क्रमात् ॥ ६२ ॥
अंशवृद्धया समायोज्य चूतपकाम्बु शक्तितः ।
एकीकृत्य करालं च प्रक्षिपेद् दृढपेषितम् ॥ ६३ ॥
अतीत्यैकदिनं पश्चाद् यथैव घनता भवेत् ।
नारिकेलस्य शाखादिदण्डैः सन्ताडयेन्मुहुः ॥ ६४ ॥
अतीत्य दशरात्रं तु मुद्गगुल्मासकल्ककैः ।
युक्तं सुकुट्टितं युक्त्या सुधा भवति शोभना ॥ ६५ ॥

अपिच —

पूर्वं द्व्यंशं करालं मधुघृतकदलीनालिकेराम्बुमाष-
यूषं वार्क्षः कषायः स्तनजदधिगुलत्रैफलाम्भांसि चैवम् ।
वृद्धान्यंशक्रमेण स्फुटशशिधवलं चूर्णमुक्तं शतांश
पिष्टं सर्वं यथावद् भवति वरसुधा वज्रबद्धं यथैव ॥ ६६ ॥

चतुस्त्रिद्वयमासान्तमुषिता युक्तिमर्दिता ।
श्रेष्ठमध्याधमा ज्ञेया सुधा सौधादिबन्धनी ॥ ६७ ॥

अथ कुड्यादिकं शुष्कं नीरन्ध्रं सुसमं मृदु ।
शुद्धाम्भसादौ प्रक्षाल्य दधिक्षीरगुलान्वितम् ॥ ६८ ॥
बद्धोदकेन चालिप्य व्यपोह्यैकदिनं ततः ।
सुधां नियोजयेद् युक्त्या यथा यत्रोचितं भवेत् ॥ ६९ ॥
भित्त्यादौ तत्र लेख्यं स्याच्चित्रं चित्रतराकृति ।
स्वागमोदितदेवादिपुराणोक्तकथान्वितम् ॥ ७० ॥

रङ्गवर्णान्वितं रम्यं न न्यूनं नाधिकं क्वचित् ।
तत्रतत्रोचिताकाररसभावक्रियान्वितम् ॥ ७१ ॥
चित्रं विचित्रफलदं भर्तुः कर्तुश्च सर्वदा ।
अतोऽन्यदशुभं चित्रं विपरीतफलप्रदम् ॥ ७२ ॥
न लेखयेत् तत्र लिखेल्लोकद्वयसुखेच्छया ।

सुधाधिकारः ।

द्रव्याणामपि दारूणां बलायामादिसिद्धये ॥ ७३ ॥
स्थितानां शायितानां च सन्धिकर्म निगद्यते ।
बाह्यं चाभ्यन्तरं पार्श्वेऽप्यधस्ताच्च तथोपरि ॥ ७४ ॥
अन्यत्रापि च यत्रेष्टं सन्दध्यादुचितं यथा ।
सर्वदारूणि पूर्वाग्रमुत्तराग्रं च योजयेत् ॥ ७५ ॥
शुभदं विपरीताग्रमशुभायेह कल्पते ।
मूले मूलं न सन्दध्यादग्रेणाग्रं न योजयेत् ॥ ७६ ॥
मूलाग्रद्रव्ययोगेन सन्धानं सम्पदां पदम् ।
वास्तुमध्ये ततो द्वारे देवांशेष्वपि कर्णयोः ॥ ७७ ॥
सन्धानं स्थाननाशाय कुलक्षयकरं त्यजेत् ।
मेषयुद्धं त्रिखण्डं च सौभद्रं चार्धपाणिकम् ॥ ७८ ॥
(महा?मान)वृत्तं च सन्धानं स्तम्भानां पञ्चधैव हि ।
षट्शिखं झषदन्तं च सूकरघ्राणमप्यथ ॥ ७९ ॥
सङ्कर्णकीलं वज्रं च शयिते पञ्च सन्धयः ।
स्तम्भद्रव्यस्य विस्ताराद् रामांशान्मध्यतःशिखम् ॥ ८० ॥
मेषयुद्धं स्वस्तिकाभं सत्रिचूडं त्रिखण्डकम् ।
सौभद्रमिति तत् प्रोक्तं पार्श्वप्राप्तचतुश्शिखम् ॥ ८१ ॥
गृहीतघनमानार्धं छित्त्वा मूलाग्रयोर्मिथः ।
निश्छिद्रमर्पितः प्रोक्तः सन्धिः स्यादर्धपाणिकः ॥ ८२ ॥
मध्ये स्वार्धेन यद् वृत्तशिखं तन्मानवृत्तकम् ।
निवृत्ताकृतिनिष्पाद्ये योजयेदुक्तमार्गतः ॥ ८३ ॥
अथार्धपाणिखण्डाभ्यां हलाकारास्तु तच्छिखाः ।
समध्यस्थितकीलं च यत्र स्यात् षट्छिखस्तु सः ॥ ८४ ॥

झषदन्तो निजायामतिर्यग्बाहुशिखायुतः ।
आधाराधेययोगेन यथाबलशिखायुतम् ॥ ८५ ॥

सूकरघ्राणवद्योज्यः सूकरघ्राणसंज्ञिते ।
यथायुक्ति यथायोगं शूलैर्नानाविधैर्युतम् ॥ ८६ ॥

सङ्कीर्णकीलसंज्ञः स्याद् वज्राभो वज्रचूडकः ।
स्वव्यासकर्णाध्यर्धं वा सन्ध्यायामः स्थिते भवेत् ॥ ८७ ॥

स्तम्भमध्ये न सन्दध्यान्मध्यसन्धिर्विनाशकृत् ।
दक्षिणेऽपि च वामे च स्तम्भचूडान्तरं तु तत् ॥ ८८ ॥

सन्धिमध्यं नियोज्यं स्यात् तदेवं सम्पदां पदम् ।
अन्योन्यसन्धिविद्धं तु शिखाकीलं न वेधयेत् ॥ ८९ ॥

तद्द्रव्यव्यासमध्यस्था शिखा सम्पद्विनाशिनी ।
दक्षिणोत्तरयोर्युक्ता शिखा सम्पत्करी भवेत् ॥ ९० ॥

गृहीतस्तम्भविपुले त्वष्टसप्तषडंशके ।
शिखायाः कीलकस्यापि विस्तारो भागतो भवेत् ॥ ९१ ॥

एकपङ्क्तिगतस्तम्भेष्वेकाकारास्तु सन्धयः ।
मिश्रसन्धिर्विनाशाय तस्मान्मिश्रं तु वर्जयेत् ॥ ९२ ॥

स्तम्भसन्धिः ।

अर्धार्धदीर्घद्रव्याभ्यां सन्धयः स्युर्बहिर्बहिः ।
अन्तरन्तर्नियोज्यं स्याद् दक्षिणादक्षिणा तथा ॥ ९३ ॥

मध्यद्रव्यं यथादीर्घं ह्रस्वद्रव्येषु पार्श्वयोः ।
सन्दध्याच्छायितद्रव्ये समं वापि त्रयं क्वचित् ॥ ९४ ॥

मूलाग्रयोरलङ्कारांस्त्यक्त्वा सर्वत्र सन्धयेत् ।
अन्तर्मूलं बहिश्चात्र शायितद्रव्यसन्धिषु ॥ ९५ ॥ —

अत्र पराशरः —

“मूलं मूलेन नैर्ऋत्यामग्रेणाग्रं तु शूलिनि ।
मूलाग्रयोस्तु संयोगः शायितेऽग्नौ च मारुते ॥
नवद्रव्यं नवेनैव जीर्णं जीर्णेन सन्धयेत् ।
दारुणा दारु सन्दध्यात् त्वक्सारं त्वचिसारकैः ॥

स्वजातिभिः स्वजातांस्तु सन्दध्यान्न विजातिभिः ।
शिलाः शिलाभिः सन्दध्यादिष्टकाभिस्तथेष्टकाः ॥
विपरीतं विनाशाय यथोद्दिष्टं सुखावहम् ॥”

इति । मयोऽप्याह—

“मल्लकोलं तथा ब्रह्मराजं वै वेणुपर्वकम् ।
क्रमुकं देवसन्धिश्च दण्डकः षष्ठ उच्यते ॥”

इति ।

द्रव्यद्वयस्य त्वेकत्र सन्धिः स्यान्मल्लकीलकः ।
त्रिद्रव्यैर्ब्रह्मराजाख्यो वेणुपर्वाब्धिबाणकैः ॥ ९६ ॥

क्रमुकः षण्मुनिद्रव्यैर्देवसन्धिर्नवाष्टभिः ।
बहुसन्धिर्बहुद्रव्यैर्दण्डिकासन्धिरुच्यते ॥ ९७ ॥

स्वस्तिकं वर्धमानं च नन्द्यावर्तमतःपरम् ।
ततश्च सर्वतोभद्रं तत्तदाकारसन्धयः ॥ ९८ ॥

अन्तर्मूलं बहिश्चाग्रं पार्श्वद्रव्येषु शोभनम् ।
विपरीतं विनाशाय यतस्तन्न समाचरेत् ॥ ९९ ॥

पितामहादिशास्त्रेषु यथादृष्टं पुरातनैः ।
तथा तत्तत् प्रकुर्वीत सौख्यायुस्संप्रवृद्धये ॥ १०० ॥

दार्विष्टकालोष्टसुधाविशेषाः प्रोक्ता यथालक्षणतश्च योगाः ।
सन्धिः स्थितानामपि शायितानां सन्दर्शितोऽनेकविधो यथावत् ॥ १०१ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
दार्वादिलक्षणपटलस्त्रयस्त्रिंशः ।

अथ चतुस्त्रिंशः पटलः ।

वस्त्वारम्भेषु सर्वेषु मानोन्मानप्रमाणवित् ।
पूर्वं स्थपतिरेष्टव्यः शिल्पशास्त्रविशारदः ॥ १ ॥

---

१. ‘व’ ग. पाठः.

तथैव शिवशास्त्रज्ञो युक्तस्त्वाचार्यलक्षणैः ।
स्थापकोऽपि वृतः कर्ता वस्तुकर्म समाचरेत् ॥ २ ॥

ताभ्यामुभाभ्यां प्रारब्धं विमानं वान्यदेव वा ।
निष्पाद्यमासमाप्तेः स्यात् ताभ्यामेव हि नेतरैः ॥ ३ ॥

तयोरभावे तत्पुत्रैः शिष्यैर्वा कर्म तत्परम् ।
आसमाप्तेर्विधेयं हि चित्रस्थगुरुशासनात् ॥ ४ ॥

अत्र पितामहादिवचनं —

"[1]प्रथमं कृतवान् विधिं[2] यथा यः स तथा तत् प्रकरोतु निष्ठितान्तम् ।
अथवान्यकृतोऽन्यनिष्ठितश्चेदशुभं स्वामिनरेन्द्रदेशभाजाम् ॥"

इति । वस्त्वारम्भादासमाप्तेः कर्तृनियमः ।

विमानस्य कृतस्याग्रे स्तूपीकुम्भौ च विन्यसेत् ।
चतस्र इष्टकाः प्राग्वदधिवास्य विधानतः ॥ ५ ॥

शिखराग्रस्य मध्ये तु कृत्वा पञ्चावटानथ ।
सर्वरत्नौषधीबीजलोहधातुरसानपि ॥ ६ ॥

ततो[3] वरसुगन्धांश्च मूलेशानाद्यमन्त्रितान् ।
प्रदक्षिणक्रमेणैव मध्यश्वभ्रे निधाय तु ॥ ७ ॥

पृथिव्यादिचतुस्तत्त्वैः सद्याद्यैर्हृदयादिभिः ।
आग्नेयादिषु कोणेषु चतस्रोऽपीष्टका न्यसेत् ॥ ८ ॥

निष्पाद्य स्तूपिकाकीलं लौहं दारवमेव वा ।
लिङ्गाभं सूचिकाग्रं वा शिखराकारमेव वा ॥ ९ ॥

ऊर्ध्वभूस्तम्भदीर्घं तद् विस्तृतं पादमानतः ।
आनुपूर्व्यात् कृशं कुर्यादग्रे चाङ्गुलिविस्तृतम् ॥ १० ॥

आयामे तु त्रिधा भक्ते चतुरश्रं तु मूलतः ।
भवे[4]च्चे वृत्तो मध्यांशश्चान्त्यांशः शिखिपादवत् ॥ ११ ॥

---

१. 'अधमं', २. 'धिः', ३. 'धोपरसग' ग. पाठः. ४. 'च्च मध्ये वृत्तांशश्चा' ग. पाठः.

पुण्याहवाद्यघोषाद्यैर्लग्ने कीलं तु विन्यसेत् ।
प्रागुक्ते मध्यमे गर्ते स्तूप्यायामे शरांशके ॥ १२ ॥
अंशत्रयमदृश्यं स्याद् दृश्यावूर्ध्वांशकौ यथा ।
शिलाभिरिष्टकाभिर्वा बध्नीयात् परितो दृढम् ॥ १३ ॥
एकद्वित्रिद्रव्ययुते तेन ताभ्यां च तैरपि ।
द्रव्यैराच्छादनं मूर्ध्नि स्तूप्यास्तु परितः स्मृतम् ॥ १४ ॥
सुधयाथ दृढीकृत्य सवल्लीकं सलक्षणम् ।
पद्ममष्टदलं कृत्वा स्तूपिकां भूषयेत् ततः ॥ १५ ॥
क्षौमैः कार्पासिकैर्वापि नवैर्वस्त्रैर्महाध्वजम् ।
स्तूप्यन्तमूलभूम्यादिव्यायतं समविस्तृतम् ॥ १६ ।
स्तूप्यग्रे तु ध्वजं बद्ध्वा विसृजेदुत्तरामुखम् ।
सोमेशानेन्द्रादिग्भूमिं यदि पूर्वं स्पृशेद् ध्वजः ॥ १७ ॥
शुभदः स्यात् ततोऽन्यस्माच्छान्त्यर्थं जुहुयात् तिलैः ।
सहस्रं संहितामन्त्रैर्घृतेन चरुणा तथा ॥ १८ ॥
कुर्वीत वास्तुहोमं च दद्याद् वास्तुबलिं निशि ।
स्थपतिं च तथाचार्यं हिरण्यवसनादिभिः ॥ १९ ॥
तोषयेद् ब्राह्मणांश्चान्यांस्तक्षणः कर्मकरानपि ।

स्तूपीविन्यासः ।

अथ कुम्भं तु सौवर्णं राजतं शौल्बमेव वा ॥ २० ॥
सौधं वा मार्त्तिकं वापि गृहीत्वा लक्षणान्वितम् ।
सुदिनर्क्षमुहूर्तादौ स्नात्वाथ स्थपतिः सुधीः ॥ २१ ॥
भूषितो वस्त्रहेमाद्यैः प्राङ्मुखोदङ्मुखोऽपि वा ।
कुम्भाधारे तु विन्यस्य हेमरत्नौषधीरसान् ॥ २२ ॥
स्तूपिकाच्छादकं कुम्भं स्तूप्याकारशिखं न्यसेत् ।
ऋजुमालाग्रविन्यासमेकं त्रीन् वाथ पञ्च वा ॥ २३ ॥
तदानुगुण्यतो मूर्त्तिं मूर्तीर्वा मन्त्रतो न्यसेत् ।
एकस्मिञ्छिव एव स्यात् त्रये ब्रह्महरीश्वराः ॥ २४ ॥

---

१ 'रान्' ग. पाठः.

ब्रह्माद्यास्तु सदेशान्ताः स्थाप्याः स्युः कुम्भपञ्चके ।
यथा दृढं सुनिश्छिद्रं कुम्भमूलं समन्ततः ॥ २५ ॥
सुधालोहादिबन्धेन बध्नीयाच्छ्लक्ष्णकुट्टिमम् ।

कुम्भविन्यासः ।

निष्ठितस्य विमानस्य प्रतिष्ठाविधिरुच्यते ॥ २६ ॥
उत्तरायणसंस्थेऽर्के मुहूर्तादौ गुणान्विते ।
अङ्कुरार्पणपूर्वं तु कृत्वैशान्यां तु मण्डपम् ॥ २७ ॥
नन्दर्षिशरहस्तं वा वेदाश्रं तूत्तमादिकम् ।
द्वादशाष्टचतुस्तम्भं वितानाद्यैरलङ्कृतम् ॥ २८ ॥
द्विहस्तमानं तन्मध्ये स्थण्डिलं शालितण्डुलैः ।
चतुरश्रं वितस्त्युच्चं चतुष्षष्टिपदान्वितम् ॥ २९ ॥
तस्मिन् ब्रह्मादिकानिष्ट्वा वास्तुदेवान् यथाविधि ।
पञ्चविंशतिसङ्ख्यांस्तु कलशानम्बुपूरितान् ॥ ३० ॥
युक्तान् हिरण्यवस्त्राद्यैश्चोपपीठस्थदैवतैः ।
संस्थाप्य स्थपतिः स्नातः शुक्लवस्त्रादिभूषितः ॥ ३१ ॥
तस्योत्तरे कुशास्तीर्णे पयः पीत्वा निशि स्वपेत् ।
प्रातः प्रासादतः प्राच्यां प्राग्वद् वेदाश्रमण्डपे ॥ ३२ ॥
अलङ्कृते वितानाद्यैः सचतुर्द्वारतोरणे ।
मण्डपव्यासरामांशां व्यासोच्चायामतः समाम् ॥ ३३ ॥
कृत्वा वेदिं तु वेदाश्रां तस्यां तत्र चतुर्दिशम् ।
चतुरश्राणि कुण्डानि विदिक्ष्वश्वत्थपत्रवत् ॥ ३४ ॥
इन्द्रेशमध्ये चाष्टाश्रं कुण्डं कृत्वा शिवानले ।
आचार्यो मूर्तिपैः सार्धं मूर्तिमन्त्रैश्चतुर्दिशम् ॥ ३५ ॥
जुहोतु चाङ्गैः कोणेषु वस्वश्रे संहितास्ततः ।
मूर्त्तिपैर्दिक्षु होतव्यमाचार्येणाष्टकोणके ॥ ३६ ॥
वेदिकास्थण्डिले कुम्भे साङ्गमूलं शिवं यजेत् ।
विमानस्य चतुर्दिक्षु वृत्तकुण्डेषु मूर्त्तिभिः ॥ ३७ ॥

जुहुयादपि सर्वत्र समिदाज्यौदनैस्तिलैः ।
विमानमथ जन्मादिस्तूप्यन्तं वसनैर्नवैः ॥ ३८ ॥

वेष्टयेद् दर्भमालाभिर्माल्यैश्चाप्युपपत्तितः ।
चतुर्वर्णौदनैश्चापि या(वी ? वैः)कृसरपायसैः ॥ ३९ ॥

दधिदुग्धगुलक्षौद्ररत्नहेमफलाक्षतैः ।
हेमपात्रं समापूर्य वास्तुभूतबलिं निशि ॥ ४० ॥

दत्त्वा ततः प्रभाते तु स्थपतिः स्थापकोऽपिच ।
स्नानादिकाः क्रियाः कृत्वा विमानमधिरुह्य तु ॥ ४१ ॥

स्थापको मूर्तिपैः सार्धं कलशैस्तैर्यथाक्रमम् ।
अभिषिच्य विमानं तद् गन्धाद्यैरर्चयेत् ततः ॥ ४२ ॥

शिखरस्य पुरोभागे स्वर्णसूच्याथ नेत्रयोः ।
स्थण्डिलानि लिखित्वा तु नेत्रमोक्षं तथाचरेत् ॥ ४३ ॥

आच्छाद्याहतवस्त्रेण व्यपनीयाथ दर्शयेत् ।
सवत्सां गां च विप्रांश्च धान्यराशिं च काञ्चनम् ॥ ४४ ॥

ततः स्थपतिरव्यग्रः शङ्खतूर्यादिनिस्वनैः ।
प्रलम्बयेद् ध्वजं प्राग्वत् स्तूप्यग्रग्रन्थितानननम् ॥ ४५ ॥

प्राग्वच्छुभाशुभान् ज्ञात्वा शान्तिं कुर्याच्छुभेतरे ।
ततो वेदिस्थकलशकुशाम्भोभिश्च सर्वतः ॥ ४६ ॥

संप्रोक्ष्य तु विमानं तत् प्रजपेद् भुवनेश्वरीम् ।
विमानादवरुह्याथ स्थपतिस्तक्षकैर्वृतः ॥ ४७ ॥

सगर्भमण्डपं धिष्ण्यं कुशगन्धजलैः क्रमात् ।
संप्रोक्ष्य चाष्ट धान्यानि विकिरेत् सर्वतोऽपिच ॥ ४८ ॥

स्थपतिः प्रमुखे स्थित्वा पुष्पगन्धाक्षताम्बुभिः ।
पूर्णाञ्जलिरिमान् श्लोकान् पठेद् देवाननुस्मरन् ॥ ४९ ॥

वर्षाम्बुवाधादशनिप्रपाताच्चण्डाच्च वायोरपि चाग्निदाहात् ।
चोरादिकेभ्यः परचक्रघाताद् रक्षन्त्विदं सद्म सुरासुराद्याः ॥ ५० ॥

अगदा मनुजाः सधनाः सुखिनः प्रथिता यशसा च भवन्तु चिरम् ।
विजयी निखिलां पशुसस्यवतीं सुकृती नृपतिः पृथिवीमवतात् ॥ ५१ ॥
ब्रह्मा विष्णुः शङ्करश्चन्द्रसूर्यौ नन्दी लक्ष्मीर्वाग् वधूः(?) स्कन्द इन्द्रः ।
भूमिर्देवाश्चर्षयश्च प्रजानां श्रीसौभाग्यारोग्यभोगान् कृषीरन् ॥ ५२ ॥

इति ।

स्थपतिस्त्वेवमुच्चार्य स्वकर्म परिनिष्ठितम् ।
समापयेत् स्थापकोऽपि स्वकर्माथ समापयेत् ॥ ५३ ॥
पुण्याहं वाचयित्वाग्रे कुम्भतोयकुशोदकैः ।
पञ्चगव्येन चाशेषं प्रासादं प्रोक्षयेत् क्रमात् ॥ ५४ ॥
ततः प्रासादमूर्त्तिं तु विन्यस्य सकलां स्मरेत् ।
प्रासादबीजं हंसाढ्यं द्वादशान्ताद् विनिःसृतम् ॥ ५५ ॥
आनीय विन्यसेत् तस्यां धिष्ण्यमूर्त्तौ चिदात्मकम् ।
ततश्चार्घ्यादिभिस्तद्वद् गन्धाद्यैश्च यथाक्रमम् ॥ ५६ ॥
निवेद्यान्तं यजेत् सम्यग् विमानं तत् प्रसन्नधीः ।
यजमानस्ततः स्वर्णवसनाभरणादिभिः ॥ ५७ ॥
स्थापकं स्थपतिं चापि पूजयित्वा स्वशक्तितः ।
विमानकरणोदीर्णपरिक्लेशफलात्मकम् ॥ ५८ ॥
गृह्णीयाद् धर्मसर्वस्वं तक्षणः कनकधारया ।
तत्र स्वयं तु स्थपतिर्दद्यात् सलिलधारया ॥ ५९ ॥
पुनस्तं हेमवस्त्राद्यैर्यजमानस्तु तोषयेत् ।
यदि तक्षकरादेवं न गृह्णीयात् प्रमुग्धधीः ॥ ६० ॥
तत्कर्म निष्फलं तु स्याद् यतोऽस्माद् ग्राह्यमेव तत् ।
अथान्यानपि तक्षादीन् कर्ता कर्मकरानपि ॥ ६१ ॥
तोषयेदुचितैर्द्रव्यैर्मूर्तिपान् ब्राह्मणानपि ।
गोधान्यध्वजवस्त्राद्यं दद्यात् स्थपतयेऽखिलम् ॥ ६२ ॥
भोजयेद् ब्राह्मणादींश्च दक्षिणाभिश्च तोषयेत् ।
ब्रह्मैव स्थपतिः साक्षाद् यजमानः स्वयं हरिः ॥ ६३ ॥

आचार्यो भगवान् रुद्राद्यैभिर्निष्पादितं तु यत् ।
तद्वस्तु स्थिरमेव स्याद् दृष्टादृष्टफलप्रदम् ॥ ६४ ॥

विमानप्रतिष्ठाधिकारः ।

हृत्प्रतिष्ठा विधेयाथ दैवे धाम्नि सुनिष्ठिते ।
चतुर्द्वारादिसंयुक्तं प्राग्वदाभूष्य मण्डपम् ॥ ६५ ॥
विकिरक्षेपकुम्भास्त्रवह्न्याधानादिपूर्वकम् ।
मन्त्राणां तर्पणान्तं तु कर्म दीक्षावदाचरेत् ॥ ६६ ॥
हिरण्येन यथाशक्ति कृत्वा प्रासादपूरुषम् ।
बहिरुत्तरवेद्यां तु संस्थाप्याच्छाद्य वाससा ॥ ६७ ॥
विन्यस्य चेष्ट्वा गन्धाद्यैस्ततो मण्डपमानयेत् ।
शय्यायां शाययेद् वेद्यां पुरुषं प्रलयाकलम् ॥ ६८ ॥
शिवाज्ञापदसम्बुद्धं ततः कुर्यात् सचेतनम् ।
तारहृत्सम्पुटं हंसमुद्धृत्यात्मपदं ततः ॥ ६९ ॥
शिवाज्ञया शरीरेऽस्मिन् त्वया स्थातव्यमित्यपि ।
उच्चार्याथाञ्जलिं पुष्पैरापूर्य द्वादशान्ततः ॥ ७० ॥
चैतन्यं तारकाकारं नियोज्य कुसुमाञ्जलौ ।
हिरण्यपुंसो हृत्पद्मे नाडीमार्गेण योजयेत् ॥ ७१ ॥
ततः कलादिकं देहं तस्मिन् सङ्कल्प्य विन्यसेत् ।

तद्यथा — ओं हां कलायै नमः । ओं हां कलाधिपतये नमः । ओं हां कलाधिपस्य कर्तृत्वाभिव्यक्तिं कुरुकुरु ।

अनेनैव प्रकारेण विद्यारागादिकान्यपि ॥ ७२ ॥
अहङ्कारं तु तत्त्वानि पृथगुच्चार्य तु न्यसेत् ।
विद्यादीनां विशेषेण कार्यं भिन्नं प्रशस्यते ॥ ७३ ॥

तद्यथा — विद्याधिपास्य ज्ञानाभिव्यक्तिं रागाधिपास्य विषयेषु रागं, प्रकृत्याधिपास्य स्वाधिकारकर्तृत्वं, बुद्ध्यधिपास्य बोधम्, अहङ्काराधिपास्याभिमानं कुरु कुर्विति सर्वत्रान्ते योजयेत् ।

मनसश्च दशाक्षाणामधिपाः स्युः पृथक् पृथक् ।

तद्यथा —

चन्द्रो दिशश्च वायुश्च सूर्योऽथ वरुणोऽश्विनौ ॥ ७४ ॥
समनश्श्रोत्रपूर्वाणामिन्द्रियाणामिहाधिपाः ।
अग्निरिन्द्रस्तथा विष्णुर्मित्रो ब्रह्मा च ते क्रमात् ॥ ७५ ॥
वागादिकर्मेन्द्रियाणां पञ्चाधिपतयो मताः ।
मनस(स्वोः ? श्चो)दितं कर्म स्यात् सङ्कल्पविकल्पकम् ॥ ७६ ॥
श्रोत्रादीनां तु शब्दादेर्ग्राहकत्वं पृथक् स्मृतम् ।
उक्त्युपादानगमनविसर्गानन्दकर्मणाम् ॥ ७७ ॥
ग्राहकत्वं पृथग् वाच्यं वागादीनां यथाक्रमम् ।
अथादौ तारहृद्बीजपूर्वं शब्दादिपञ्चकम् ॥ ७८ ॥
उच्चारयेच्चतुर्थ्या तु नमोन्तं तु सकृत् सकृत् ।
आकाशादीनि पञ्चाथ नमोन्तं पूर्ववद् वदेत् ॥ ७९ ॥
सदाशिवाद्या ब्रह्मान्तास्ते चाकाशादिपञ्चसु ।
अधिपाः पूर्ववद् वाच्या नमोन्तं सचतुर्थिकम् ॥ ८० ॥
एवं तत्त्वानि विन्यस्य नाडीनां दशकं न्यसेत् ।
तारहृत्पूर्वकं तद्वन्नमोन्तं सचतुर्थिकम् ॥ ८१ ॥
इडां पिङ्गां सुषुम्नां च गान्धारीं हस्तिजिह्विकाम् ।
सुयशालम्बुषे पूषां कुहूमप्यथ शङ्खिनीम् ॥ ८२ ॥

दश नाडीनामानि ।

तद्वत् प्राणमपानं च व्यानोदानसमानकान् ।
नागं कूर्मं च कृकरं देवदत्तं धनञ्जयम् ॥ ८३ ॥
दश प्राणानिमांश्चापि न्यसेत् प्राग्वन्नमोन्तकम् ।
इति मायां स्वाधिकारपूर्वकत्वेन संस्मरन् ॥ ८४ ॥
कालं नियामकं चैव बन्धकत्वेन चिन्तयन् ।
अङ्गुष्ठमात्रप्रभृतिमन्त्रैः प्रेरकतां तथा ॥ ८५ ॥
व्यापकत्वेन पुरुषं भगवन्तं तु विन्यसेत् ।
निरोधयेन्निष्ठुरया त्रिखण्डाध्वानमप्यथ ॥ ८६ ॥

मायासदेशरुद्रान्तं ध्यात्वा रक्षां तथास्त्रतः ।
ततः कुण्डान्तिकं गत्वा शक्तिमाधारसंज्ञिताम् ॥ ८७ ॥

प्राग्वत् कालादितत्त्वानि तारहृद्बीजपूर्वकम् ।
नमोन्तमग्नौ विन्यस्य तथाज्याहुतिभिः पुनः ॥ ८८ ॥

हुत्वा जपित्वा तत्सङ्ख्यं शिवाज्ञां श्रावयेत् ततः ।

ओं हां कालाधिप स्वतत्त्वेन सह शिवाज्ञया प्रासादस्थितिपर्यन्तमत्र स्थातव्यम् ।

विद्याद्याधारशक्त्यन्तं पृथगित्थं निरोधयेत् ॥ ८९ ॥

ततो गर्भगृहादूर्ध्वं शुकनासस्य चोपरि ।
खट्वायां कलशशय्यायां हेमाद्येकतमं घटम् ॥ ९० ॥
विन्यस्याज्यमधुभ्यां तं पूर्णं रत्नादिभिर्युतम् ।
सूक्ष्मवासोयुगच्छन्नमिष्ट्वा गन्धादिभिः क्रमात् ॥ ९१ ॥
तं हेमपुरुषं तस्मिन् विन्यस्याराधयेत् पुनः ।
प्रायश्चित्तमघोरेण हुत्वाथाचार्यदक्षिणाम् ॥ ९२ ॥
दद्यान्मूर्तिपतिभ्यश्च ब्राह्मणेभ्यश्च शक्तितः ।
भगवन्तं च वह्निं च यथापूर्वं विसर्जयेत् ॥ ९३ ॥

हृत्प्रतिष्ठाधिकारः ।

एवं स्तूपीकुम्भयोश्च प्रतिष्ठा तन्त्रेषूक्ता या विमानप्रतिष्ठा ।
प्रोक्ता ह्यस्मिन् हृत्प्रतिष्ठा च याभिः प्रासादः स्यात् सुप्रतिष्ठो महेशः ॥ ९४ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे स्तूप्यादिलक्षणपटलश्चतुस्त्रिंशः ।

अथ पञ्चत्रिंशः पटलः ।

अथानुकर्म विज्ञेयं धाम्नां वा कालपाकतः ।
पतितं स्खलितं जीर्णं प्रासादाङ्गं यदा भवेत् ॥ १ ॥

तत्तद्द्रव्यैः शिलाद्यैस्तु समाधेयं हि पूर्ववत् ।
संस्थानं प्राग्वदेव स्यादलङ्कारादिकं च यत् ॥ २ ॥
व्यासतुङ्गत्वहानिर्वा वृद्धिश्चापि न शस्यते ।
जातिच्छन्दविकल्पानां स्यान्मानं प्राग्वदेव हि ॥ ३ ॥
स्वयम्भूदैविकार्षाणामल्पं प्राक्तनधाम चेत् ।
जीर्णं वा पतितं तस्य न वृद्धिर्दोषमावहेत् ॥ ४ ॥
द्वारप्राकारपीठाद्यमनुक्तस्थानगं यदि ।
परिवारं च तत्प्रोक्तस्थाने कुर्यात् सलक्षणम् ॥ ५ ॥
दैविकं प्राक्तनं धाम मानहीनमलक्षणम्[1] ।
सलक्षणं प्रकुर्वीत पूर्वसंस्थानसुन्दरम् ॥ ६ ॥
स्वायम्भुवार्षदैवं वा निष्कलं सकलं तु वा ।
स्थानान्न चालयेल्लिङ्गं पूर्वस्थानेऽर्हति स्थितिम् ॥ ७ ॥
नद्यब्धिजलवाताद्यैर्हृते विचालितेऽथवा ।
तस्मात् सहस्रदण्डान्तक्षेमे संस्थापयेत् पुनः ॥ ८ ॥
तदेव तदभावे तु पूर्वलिङ्गसमं नवम् ।
पूर्वतुल्यविमाने तु प्रायश्चित्तादनन्तरम् ॥ ९ ॥
प्रतिष्ठितं भवेद्धद्यै राजराष्ट्रप्रजाहितम् ।
तत्र मूलालयाद् रक्षोयमाग्निमरुतां दिशः ॥ १० ॥
त्यक्त्वा यथेष्टमन्यत्र विधिना स्थापयेद् दिशि ।
यमे भर्तुर्नृपस्यापन्मरुद्रक्षोग्निषु क्षयः ॥ ११ ॥
तस्मात् तत् परिहृत्यैव चलितस्थापनं हितम् ।
छन्दानां प्राक्तनाद् धिष्ण्यात् प्राग्वोदक्परितोऽधिकम् ॥ १२ ॥
मानोन्मानप्रमाणोच्चतलाधिक्यं च शस्यते ।
पूर्वस्माद्धीनमानाद्यं स्थानं कर्तृनृपाहितम् ॥ १३ ॥
द्वारभित्त्यङ्गणादीनां हापनं च विनाशकृत् ।
विनष्टवस्तुनो गर्भं त्यक्त्वा गर्भं न्यसेत् पुनः ॥ १४ ॥

---

[1] 'म हीनमानमल' क. पाठः.

अधिष्ठानादिकं प्राग्वत् कुर्यात् स्तम्भादिकान्यपि ।
यदि तत् प्राक्तनद्रव्यैर्निष्पाद्यं चेद् गृहादिकम् ॥ १५ ॥
प्रारभ्यादौ नवद्रव्यैः पुराणैर्योजयत् ततः ।
योगैर्नवैर्नवेष्विष्टः पुराणानां पुरातनैः ॥ १६ ॥
मिश्रयोगे विनाशः स्यादतो मिश्रं न कारयेत् ।
पुरग्रामालयादीनि पूर्ववस्त्वनुकूलतः ॥ १७ ॥
कुर्यात् तद्बाधकं वस्तु कुलनाशकरं त्यजेत् ।
अन्तर्हाराद् बहिर्मूलादल्पलिङ्गालयादिकम् ॥ १८ ॥
कुर्वीत वान्तः सालस्य यथा मूलं न पीडयेत् ।
मूलालयसमं क्षुद्रमधिकं च न शस्यते ॥ १९ ॥
शस्तमर्धं च पादोनं शरांशे त्र्यंशमेव वा ।
क्रमादिन्द्रादिवाय्वन्तं मूलात् तु शिवमन्दिरम् ॥ २० ॥
कृतं विनाशयेत् स्थानं कर्तारं राजसन्ततिम् ।
राष्ट्रं धनं च सस्यं च तस्मात् तत् परिवर्जयेत् ॥ २१ ॥
एवं ग्रामपुरादीनां स्वगृहस्य च तत्समम् ।
तस्मादुदीच्यां मुख्यादिपर्जन्यान्तं च पूर्वतः ॥ २२ ॥
मानुषं शाङ्करं लिङ्गं स्थापयेच्छुभदं हि तत् ।
शिवः प्राक्पश्चिमास्यस्तु मनुष्याणां हितावहः ॥ २३ ॥
अन्यत्राघोरनृत्तेशदक्षिणेशाच्च वामतः ।
सर्वत्राभिमुखाः सौम्या देवताः शुभदा नृणाम् ॥ २४ ॥
उग्राः पराङ्मुखाः शस्ताः पुरग्रामगृहादिषु ।
न मनुष्यालयं कुर्याद् देवागाराधिकोन्नतम् ॥ २५ ॥
तत्समीपे विशेषेण तलाधिक्यं च नेष्यते ।
दैवाद् धाम्नः शुभं न्यूनं समं वा मानुषं गृहम् ॥ २६ ॥

अनुकर्मविधानम् ।

अधिष्ठानादि सौन्दर्यमास्तूप्यग्राच्छुभावहम् ।
प्रासादाङ्गेषु वैरूप्यं हीनाधिक्यं च निन्दितम् ॥ २७ ॥

छिद्रं व्रणं दरी निम्नमन्यच्चाप्यशुभावहम् ।
देशदेशाधिपस्थानकर्तृभर्तृविनाशनम् ॥ २८ ॥

अपिच

अधिष्ठाने तु वैरूप्यं तत्सन्तानविनाशनम् ।
प्रत्यां तु स्त्रीविनाशाय स्तम्भे नृपपराजयः ॥ २९ ॥

प्रस्तरे द्विजनाशः स्यात् कण्ठे तु वणिजां क्षयः ।
नासिकासु स्वपक्षघ्नं शिखरे राजविभ्रमः ॥ ३० ॥

स्तूपिकाकुम्भवैरूप्यं तद्राष्ट्रजननाशनम् ।
अस्थानद्वारसोपानं सर्वेषामशुभावहम् ॥ ३१ ॥

अस्थानभित्तिकस्तम्भमनुक्ताङ्गविरूपता ।
अचोदितालङ्करणमन्यच्चानिष्टदुःखदम् ॥ ३२ ॥

पूजोपचारविच्छेदो बलिच्छेदोऽप्यवृष्टिकृत् ।
सर्वाङ्गसुन्दरं तस्माद् धाम कुर्यात् सलक्षणम् ॥ ३३ ॥

नाशं दुःखं मृतिं पुष्टिं कुलवृद्धिं कुलक्षयम् ।
धनं सुखं च नैर्धन्यं कुर्यात् पूर्वादिदिग्दरी ॥ ३४ ॥

मृतिं रोगं चाग्निभयं बन्धुनाशं धनं सुतम् ।
मित्रागमं च पुष्टिं च विनाशं चावहेत् क्रमात् ॥ ३५ ॥

ब्रह्मस्थानाद्यमीशान्तं वल्मीकं भवनादिषु ।
पातोऽशनेश्च क्षौद्रस्य न्यासः सर्वत्र गर्हितः ॥ ३६ ॥

धनागमं धनापायं मित्रप्राप्तिं सुखं श्रियम् ।
वर्षं कन्यागमं पुत्रं कलहं रक्तकन्यका ॥ ३७ ॥

ब्रह्मस्थानात् तु शक्राद्यमीशानान्तं यथाक्रमात् ।
उक्तादवान्तरेऽन्यत्र द्वारे च कलहादिकम् ॥ ३८ ॥

अनर्थमावहेद् यस्मात् तच्छान्त्यै जुहुयाद् घृतम् ।
उलूका गृध्रकाः श्येनास्तथा वनकपोतकाः ॥ ३९ ॥

---

१. 'घृतम् रक्तस्त्रीदर्शनस्य उ' क. ख. पाठः.

पिङ्गलाश्च चकोराश्च गृहे स्युश्चेदनर्थदाः ।
देवमानुषगेहेषु मठगोष्ठसभादिषु ॥ ४० ॥
वल्मीकाद्यद्भुतानां तु दोषशान्तिस्तु कथ्यते ।
खननादिक्रियाभिस्तदपनीयोपलिप्य तु ॥ ४१ ॥
गोभिरध्युषिते तस्मिन् हुत्वा चाद्भुतशान्तिकम् ।
रक्षोघ्नं वास्तुहोमं च दत्त्वा वास्तुबलिं ततः ॥ ४२ ॥
ब्राह्मणान् भोजयित्वा तु पुण्याहं वाचयेत् पुनः ।
यथावदावसेत् तस्मिन् सर्वसंपत्करं भवेत् ॥ ४३ ॥

अद्भुतशमनम् ।

प्रासादभवनादीनां रक्षालङ्कारसिद्धये ।
वप्राणि क्रमशः कुर्यात् पञ्चत्रिद्व्येकसंख्यया ॥ ४४ ॥
तत्रान्तर्मण्डलं त्वाद्यमन्तर्हाराथ तद्बहिः ।
मध्यहारा च मर्यादा महामर्यादकं ततः ॥ ४५ ॥

अत्र मयः—

"क्षुद्राणामल्पहर्म्याणां स्वव्यासार्धप्रमाणतः ।
अन्तर्मण्डलकं कुर्यात् सत्रिहस्तं तु तत्समम् ॥
द्वितीयं तु तृतीयं च तस्मात् पञ्चकराधिकम् ।
तस्मात् ससप्तहस्तं तु तत्समं स्याच्चतुर्थकम् ॥
नवहस्तसमायुक्तं तत्समं पञ्चमं भवेत् ॥"

इति ।

मध्यमानां तु मूलार्धमन्तर्मण्डलकं भवेत् ।
ततः शरर्षिबृहतीरुद्रहस्तं यथाक्रमात् ॥ ४६ ॥
वप्रान्तरालविस्तारः प्रोक्तः प्राकारपञ्चके ।
अथोत्तमानां मूलार्धं प्रथमं त्वथ चर्षिभिः ॥ ४७ ॥
नन्दरुद्रातिजगतीहस्तैर्हारा भवन्ति हि ।
अन्तर्मण्डलभित्तेः स्याद् विष्कम्भः सार्धहस्तवान् ॥ ४८ ॥

तस्माद् द्विञ्यङ्गुलाधिक्यात् क्रमात् साला भवन्ति हि ।
तत्तद्विष्कम्भमानात् तु त्रिगुणं वा चतुर्गुणम् ॥ ४९ ॥
प्राकारतुङ्गता प्रोक्ता स्वोच्चाष्टांशाच्छिरोघनम् ।

अत्र मयः —

"उत्तरान्तोच्छ्रूता[1] वा स्यात् कुम्भमण्ड्यन्तकोदर्या[2] ।
मसूरकादिवर्गाढ्या खण्डहर्म्यादिमण्डिता ॥
बुद्बुदार्धेन्दुशीर्षा वा ऋजुर्वा भित्तिरिष्यते ।"

इति ।

क्षुद्राल्पभित्तिविष्कम्भं हस्तादारभ्य पूर्ववत् ॥ ५० ॥
क्रमाद् द्विञ्यङ्गुलाधिक्याद् वर्धयेत् सार्धहस्ततः ।
सोत्तरा वाजनच्छत्रशीर्षवत्यश्च भित्तयः ॥ ५१ ॥

उपरिष्टात् तु वप्राणां सर्वेषां तु शिवालये ।
मनोरमतमां[3] कुर्यात् परितो वृषभावलिम् ॥ ५२ ॥

मूलं जन्मस्थलं हस्तमुच्छ्रूतं मूलसालतः ।
द्वितीयं हीनषण्मात्रं प्रतिसालं च तत्क्रमात् ॥ ५३ ॥

हस्तार्धं पादजन्मोच्चं तस्माद् द्विञ्यङ्गुलक्षयात् ।
महामर्यादभित्त्यन्तमेवं ह्राप्यमथापि वा ॥ ५४ ॥

क्षुद्रे साष्टादशाङ्गुल्यं मध्यमे मूलपादुकम् ।
क्षपयेत् तच्चतुर्मात्रैर्यावत् पञ्चान्तसालकम् ॥ ५५ ॥

प्राकारलक्षणम् ।

वृषस्थानं तु पुरतः स्यादाग्नेय्यां महानसम् ।
मातॄणां तु यमोपान्ते गजवक्त्रस्य नैर्ऋते ॥ ५६ ॥

वारुणे वासुदेवस्य स्कन्दस्य तदनन्तरम् ।
वायव्यामथवैशान्यामुमादुर्गालयः स्मृतः ॥ ५७ ॥

उत्तरे धनदस्य स्यात् कोष्ठागारं त्रिशूलिनि ।
ईशेन्द्रमध्ये धातुः स्यान्नृत्तस्यैशेऽथवा पुरः ॥ ५८ ॥

१, 'तो', २. 'यावत् । म' ग. पाठः. ३. 'रां' क. ख. पाठः.

वहिर्गोपुरयोर्मध्ये धान्यानामिति केचन ।
मध्येन वहिर्मातॄणां स्नपनाम्बुगृहं स्मृतम् ॥ ५९ ॥

मठश्च याम्ये बाह्ये स्यात् पुष्पस्य यमविघ्नयोः ।
रक्षोम्बुमध्ये शस्त्राणां गोशाला वरुणे बहिः ॥ ६० ॥

वारुण्यां शयनस्यान्तर्ज्येष्ठाया वायुदक्षिणे ।
विद्यापीठं भवेन्मुख्ये पर्जन्ये क्षेत्रपस्य तु ॥ ६१ ॥

ऐशेऽन्तश्चण्डनाथस्याप्यादित्यानां विधेर्बहिः ।
लोकेशानां स्वदिक्ष्वेव चेन्द्राग्न्योर्मध्यतोऽश्विनोः ॥ ६२ ॥

बहिर्द्वितीय[1]हारायां विश्वेषां यमरक्षसोः ।
शास्तुश्च रक्षोदिग्भागे भद्रकाल्यास्तथा बहिः ॥ ६३ ॥

रक्षोवरुणयोर्मध्ये शेषनागालयः स्मृतः ।
वसूनामम्बुमरुतोर्मुनीनां वायुसोमयोः ॥ ६४ ॥

सोमेशमध्ये रुद्राणां क्रमेणैवं प्रकल्पयेत् ।
परिवारविमानानां मानं गर्भार्धमानतः ॥ ६५ ॥

त्रिभागाद् वा चतुर्थांशात् क्षुद्रेषु परिकल्पयेत् ।
एकमल्पे तु वप्रं स्यात् परिवाराष्टकं तथा ॥ ६६ ॥

वृषो गणपतिर्ब्रह्मा मातरोऽथ गुहो हरिः ।
दुर्गा चण्डेश्वरश्चाष्टौ परिवाराः प्रकीर्तिताः ॥ ६७ ॥

अथापि दश लोकेशाश्चण्डोऽन्तर्मातरस्तथा ।
क्षुद्रे वा मध्यमे धाम्नि द्वादशैते भवन्ति हि ॥ ६८ ॥

एते द्वादश विघ्नश्च गुहो दुर्गा हरिस्तथा ।
स्वदिक्षु परिवाराः स्युर्मध्यमे धाम्नि षोडश ॥ ६९ ॥

उत्तमेषु विमानेषु परिवारानशेषतः ।
स्थापयेद् वास्तुदेवांश्च क्रमादीशानपूर्वकान् ॥ ७० ॥

द्वात्रिंशन्मध्यमहारायां स्वपदेष्विति यावत् ।

---

[1] 'यं' ख. पाठः.

"परिवारप्रतिमोदयः पूजांशोदयाद् द्विगुणः श्रेष्ठस्तदध्यर्धं मध्यमस्तत्समं कनिष्ठः" इति पराशरः ।

स्थिते देवे स्थितास्ते स्युः परिवारास्तथासने ।
निषण्णाः शयनेऽपि स्युरिति प्राह पितामहः ॥ ७१ ॥

अत्र मयः —

"प्राक्प्रत्यङ्मुख उक्षा देवाभिमुखो न वाभिमुखः ।
शेषा ये परिवारा देवाभिमुखाः सदैव स्युः ॥"

इति ।

यद्यन्मुखो भवेद् देवस्तदग्रे वाहनध्वजम् ।
इन्द्रं चारभ्य लोकेशान् यजेदेव प्रदक्षिणम् ॥ ७२ ॥

निर्माल्यधारकं चैशे मातॄरपिच दक्षिणे ।
सर्वत्र कल्पयेद् देवं प्रनालमपि चोत्तरे ॥ ७३ ॥

गोपुराद् बाह्यतः कुर्याद् बलिपीठं सलक्षणम् ।
अन्तरालं त्रिपादं वा प्रासादार्धमथापि वा ॥ ७४ ॥

गर्भार्धविस्तृतं पीठं त्रिपादोनं च सम्मितम् ।
त्रिद्व्येकहस्तमुच्चं तदुत्तमादिषु कल्पयेत् ॥ ७५ ॥

तदुच्चषोडशांशेन जन्माथ जगती त्रिभिः ।
वेदांशैः कुमुदं भागः पट्टिकांशैस्त्रिभिर्गलः ॥ ७६ ॥

कम्पस्त्वंशेन तु द्वाभ्यां वाजनं चोर्ध्वपट्टिका ।
भागेनेत्यथ तद्व्यासे दशांशे द्व्यंशहानितः ॥ ७७ ॥

ऊर्ध्वाब्जं विस्तृतं वाष्टभागेष्वेकोनमेव वा ।
द्व्यंशो वाब्जोदयः प्रोक्तः कर्णिका तत्त्रिभागतः ॥ ७८ ॥

सभद्रं वा विभद्रं वा सोपपीठमथापि वा ।
अलङ्कारैर्विमानोक्तैर्युक्तं वा बलिविष्टरम् ॥ ७९ ॥

हारायां मध्यमे वापि मर्यादायामथापि वा ।
बलिपीठाद् बहिः प्राच्यां ध्वजस्तम्भं तु विन्यसेत् ॥ ८० ॥

ध्वजाद् बहिर्वृषगृहं चतुर्द्वारं प्रकल्पयेत् ।
द्वारलिङ्गसमः श्रेष्ठो मध्यो वेदांशहीनतः ॥ ८१ ॥

अर्घहीनः कनिष्ठः स्याद् वृषभो लक्षणान्वितः ।
द्वारादध्यर्धमुच्चो वा सपादद्विगुणोच्छ्रितः ॥ ८२ ॥
मनोरमतराकारस्त्वासीनो वृषभो भवेत् ।
गोपुराणां तथा लक्ष्म यथावदथ कथ्यते ॥ ८३ ॥
प्रतिवप्रं तु कर्तव्यं द्वारे द्वारे तु गोपुरम् ।

अत्र मयः—

“क्षुद्राल्पमध्यमुख्यानां धिष्ण्यानां स्वप्रमाणतः ।
मूलप्रासादविस्तारे सप्ताष्टनवभागिके ॥
दशैकादशभागे च तत्तदेकांशहानितः ।
द्वारशोभादिविस्ताराद् गोपुरं तद् भवेत् क्रमात् ॥
क्षुद्राल्पकानां धाम्नां स्यान्मानमेवं यथोदितम् ।
मध्यानां मूलधाम्नस्तु व्यासे वेदेषुभागिके ॥
षट्सप्ताष्टांशके वा स्याद् भागोनं गोपुरं पृथक् ।
त्रिभागैकांशमर्धं च द्विभागं स्यात् त्रिभागिके ॥
चतुर्भागे त्रिभागं तु पञ्चांशे चतुरंशकम् ।
द्वारशोभादिविस्तारः श्रेष्ठानां गोपुरे[1] स्मृतः[2] ॥
तुङ्गं तु गोपुराणां स्यात् सप्तांशे रुद्रभागिकम् ।
चतुरंशे षडंशोच्चं पञ्चांशे सप्तभागिकम् ॥
सप्तांशैस्तु चतुर्भागे नवभागैस्तु पञ्चके ।
द्विगुणं वा यथासंख्यं द्वारायतनतुङ्गता ॥
गोपुरस्य तु विस्तारं त्रिभागादेकभागिकम् ।
चतुर्भागैकभागं वा पञ्चभागे द्विभागिकम् ॥
निर्गमो गोपुराणां स्याद् वप्रकुड्यस्य बाह्यतः ।
मूलात सार्धं सत्रिपादं सार्धहस्तद्वयं तु वा ॥
निर्दिष्टो द्वारविस्तारो गोपुराणां समासतः ।”

अत्र पराशरः— “तस्य षण्णवद्वादशमात्रवृद्ध्या पञ्चसप्तनवहस्तान्तं द्वारं पञ्चदशभेदं पृथक् पृथक् क्षुद्रे मध्ये परे स्यात्” इति ॥

---

१. ‘रं’, २. ‘तम्’ ग. पाठः.

द्वाराणां तत्र विस्तारादुत्सेधः पञ्चधोच्यते ॥ ८४ ॥

पञ्चांशेभ्यश्च सप्तांशः सप्तांशेभ्यो दशांशिकः ।
द्विगुणोऽर्धाधिकः पादमधिकः पञ्चधोच्छ्रयः ॥ ८५ ॥

क्रमेण पञ्चसालानामेकत्रिशरसप्तकम् ।
नवाङ्गुलं च संत्यज्य दक्षिणादक्षिणक्रमात् ॥ ८६ ॥

द्वारं नियोजयेत् तत्र मूलवस्तु निरीक्ष्य तु ।
पादाधिष्ठानतुङ्गत्वं वेदेष्वृषिभुजङ्गमैः ॥ ८७ ॥

नन्दपङ्क्तीशसूर्यांशान्मूलादेकांशहानितः ।
साधिष्ठानाङ्घ्रितुङ्गः स्याच्छेषं स्यादुपपीठकम् ॥ ८८ ॥

पादबन्धं मसूरं च यथावत् परिकल्पयेत् ।
पट्टिकाङ्गमधिष्ठानस्तम्भमानं तु मूलवत् ॥ ८९ ॥

वसुनन्ददिगंशोनं गोपुरस्तम्भतुङ्गता ।
निखातपादं होमान्तं जित्वाधिष्ठानकं न्यसेत्(?) ॥ ९० ॥

उत्तरान्तसमानं तदर्धं वा विपुलं भवेत् ।
प्रवेशदक्षिणे गर्भं न्यसेदारूढभित्तिके ॥ ९१ ॥

पादाधिष्ठानयोस्तुङ्गादधिको मिश्रकोदयः ।
द्वारतुङ्गं पुरग्रामराजधान्यादिषूदितम् ॥ ९२ ॥

न्यसेद् गोपुरकुड्याग्रे श्लिष्टं योगं कवाटयोः ।
तत्सीमानं तु वप्रान्तं कुर्यान्मध्ये सुरालये ॥ ९३ ॥

एकादिपञ्चभूम्यन्तमल्पानां गोपुराणि हि ।
द्विभौमात् षट्तलान्तानि मध्यानां गोपुराण्यपि ॥ ९४ ॥

द्वितलात् सप्तभौमान्तमुत्तमानां तु गोपुरम् ।

अत्र

"सोपपीठमधिष्ठानं पादोच्चं चोत्तरान्तकम् ।
शेषं तत्स्तूपिपर्यन्तं भागमानं विधीयते ॥"

इति मयः ।

स्तूप्यन्तमुत्तरादूर्ध्वं षोढा भक्तं ल गोपुरम् ॥ ९५ ॥

सपादांशेन मञ्चोच्चं भागेन प्रस्तरोदयः ।
भागेन कन्धरोत्सेधः सत्रिपादांशकं शिरः ॥ ९६ ॥
शिष्टेन तु शिखातुङ्गमित्येकतलगोपुरम् ।
ए(कं ? वं) तु द्वितलादीनां तलाधिक्यविभागतः ॥ ९७ ॥
आद्वादशतलादूर्ध्वं विदधीत यथाक्रमम् ।
गोपुरव्यासपञ्चांशे गर्भागारं त्रिभागतः ॥ ९८ ॥
भागाभ्यां भित्तिविष्कम्भं विदध्यादेकभूमिके ।
सप्तांशे गोपुरव्यासे गर्भं तु चतुरंशकैः ॥ ९९ ॥
कुर्याद् भित्तिं त्रिभिः शेषैरुदयेऽथ नवांशके ।
अंशेन कूटविस्तारं त्रिभिरंशैस्तु कोष्ठकम् ॥ १०० ॥
कूटकोष्ठकयोर्मध्ये पञ्चांशैः पञ्जरादिभिः ।
अलङ्कृत्य यथाशोभं द्वितलं गोपुरं भवेत् ॥ १०१ ॥
व्यासे नवांशे त्रितलं दशभागे चतुस्तलम् ।
रुद्रांशे शरभौमं स्यात् सूर्यांशे षट्तले तथा ॥ १०२ ॥
त्रयोदशे सप्ततलं कुर्याद् युक्त्या तु पूर्ववत् ।

अत्र पराशरः —

"एकतलादि सप्ततलान्तं सर्वत्रापि गोपुरेष्वलिन्दहर्म्यकूटशालामुखपञ्जरनासीहस्तिपृष्ठपक्षशालामसूरस्तम्भवेदिकाजालतोरणैरलङ्करणीयम्" इति ।

मूलद्वारस्य विस्ताराद् वेदशोनं शरांशतः ॥ १०३ ॥
हीनं वोर्ध्वतलानां तु द्वाराणि परिकल्पयेत् ।
गर्भागारे तु सोपानमुपर्युपरि विन्यसेत् ॥ १०४ ॥
चतुष्कर्णे तु सोपानमुपपीठे प्रशस्यते ।
यथायुक्ति यथाशोभं तथा योज्यं विचक्षणैः ॥ १०५ ॥
गोपुराणामलङ्कारं मूलवस्त्वनुरूपतः ।
कुर्यादाकृतिशोभाद्यं विमानभवनादिषु ॥ १०६ ॥
सोपपीठमधिष्ठानं स्तम्भादिपरिमण्डितम् ।
द्वितलादियुतं रम्यं महाद्वारं प्रदक्षिणम् ॥ १०७ ॥

---

१. 'म्य' ग. पाठः.

साधिरोहणसोपानं सान्तरप्रस्तरान्वितम् ।
ऊहप्रत्यूहशोभाढ्यं द्विसप्तमु(प[1] ख)पट्टिकम् ॥ १०८ ॥

दीर्घाप्राकारविन्यासं श्रीमन्दिरमिति स्मृतम् ।
तदेव तु शिरः पार्श्वे त्यक्त्वा पूर्वतलं पुनः ॥ १०९ ॥

मुखे पट्टिकषट्केन युक्तं स्याच्छ्रीनिकेतनम् ।
एकदेवसभाशीर्षं षण्महानासिकान्वितम् ॥ ११० ॥

सुमङ्गलाभिधानं स्यात् विशालमथ कथ्यते ।
प्रागुक्तमेव परितो भागवृद्ध्या सगण्डिमम् ॥ १११ ॥

चूडहर्म्यान्वितं श्रीमद् विशालाख्यं तु गोपुरम् ।
तदेव परितो भक्त्या युक्तं भव्याभिधानकम् ॥ ११२ ॥

तदेव वृत्तशिखरं दीर्घाकारं मनोरमम् ।
वृत्താग्रकूटं कर्णेषु पौष्टिकं नाम गोपुरम् ॥ ११३ ॥

तदेव हि मुखे वेदभागार्धान्मण्डपान्वितम् ।
खण्डहर्म्यपताकाढ्यं सुमण्डाख्यं तु गोपुरम् ॥ ११४ ॥

कपोतशालसंयुक्तं नाम्ना स्यात् पारिकूटकम् ।
एतानि गोपुराण्यष्टौ शुद्धमिश्रक्रियावशात् ॥ ११५ ॥

अथ त्रिभौमादियुतं षष्टिद्वितयनासिकम् ।
साधिष्ठानं च सस्तम्भकूटशालं सतोरणम् ॥ ११६ ॥

शालतः पञ्जरोपेतं गुह्यागुह्याधिरोहणम् ।
देवश्रेष्ठनरेन्द्राहं सुभद्रं नाम गोपुरम् ॥ ११७ ॥

द्वितलं तु विभागेन पार्श्वयोर्गर्भवेश्मनः ।
चतुरश्रं चतुर्नासीसाङ्गावयवसुन्दरम् ॥ ११८ ॥

भद्रकल्याणसंज्ञं तत् तदेव शिखरे यदि ।
अष्टाश्रकूटशालाढ्यं भद्रसुन्दरसंज्ञितम् ॥ ११९ ॥

मुखे मुखे तदेव स्याद् विनिर्गतसभामुखम् ।
परितो भागवृद्ध्या तु तलैः सप्तभिरन्वितम् ॥ १२० ॥

---

१. 'प' क. पाठः.

श्रीकरं नाम तत् प्रोक्तं गोपुरं सुमनोरमम् ।

इति गोपुरविधिः ।

इत्येवमुक्तमनुकर्मविधानमादौ शान्तिर्यथावदुदितात्र तथाद्भुतानाम् ।
प्राकारलक्ष्म कथितं वृषलक्षणं च प्रोक्तश्च गोपुरविधिर्निखिलः समासात् ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापादेऽनुकर्मादिलक्षणपटलः पञ्चत्रिंशः ।

अथ षट्त्रिंशः पटलः ।

अथ लिङ्गं त्रिधा ज्ञेयं निष्कलं सकलं तथा ।
मिश्रं चेति च तल्लिङ्गमचलं च चलं द्विधा ॥ १ ॥

निष्कलं केवलं लिङ्गं सकलं प्रतिमा स्मृता ।
मिश्राख्यं मुखलिङ्गं स्यान्मिश्रलक्षणलक्षितम् ॥ २ ॥

शैलं रात्नं तथा लौहं दारवं मार्त्तिकं पुनः ।
क्षणिकं चेति षोढा स्यात् क्रमाल्लिङ्गं तु निष्कलम् ॥ ३ ॥

ब्राह्मणक्षत्रविट्च्छूद्राशिलाः स्युर्धवलारुणाः ।
पीताः कृष्णाश्च लिङ्गानि कुर्यात् ताभिर्यथाक्रमम् ॥ ४ ॥

सर्वेषामथवा सर्वाः शिलाः स्युरिति केचन ।
मुक्तिं जयं धनं धान्यं दद्युः शुक्लादिकाः शिलाः ॥ ५ ॥

स्फटिकः पद्मरागश्च वज्रं नीलं हिरण्मयम् ।
वैडूर्यं विद्रुमं पुष्यं रत्नलिङ्गं तथाष्टधा ॥ ६ ॥

स्फटिकः सूर्यकान्तश्च चन्द्रकान्त इति त्रिधा ।
स्फटिकस्यैव भेदाः स्युः काममोक्षार्थदाः क्रमात् ॥ ७ ॥

श्रियं कामांस्तथारोग्यमृद्धिं पुत्राञ् जयं सुखम् ।
लभते पद्मरागादिलिङ्गानां क्रमशोऽर्चनात् ॥ ८ ॥

रत्नानामिह सर्वेषां दोषाः सामान्यतो नव ।
रेखा बिन्दुः कलङ्कश्च काकाङ्घ्रिक्षतधूलयः ॥ ९ ॥

तुषारत्रासरन्ध्राणि यत्नाद् रत्नेषु वर्जयेत् ।
सौवर्णं राजतं ताम्रं पैत्तलं कांस्यमायसम् ॥ १० ॥
सैसकं त्रापुषं चेति लौहं लिङ्गं तदष्टधा ।
भुक्तिमुक्तिप्रदं हैमं लिङ्गं रौप्यं तु पुष्टिदम् ॥ ११ ॥
शौल्बं पुत्रप्रदं कांस्यं सौख्यदं त्वथ पैत्तलम् ।
आयुरारोग्यदं विद्यादायसं मरणं स्मृतम् ॥ १२ ॥
सैसकं त्रापुषं चापि विद्वेषोच्चाटमारणे ।
मुख्यलोहानि चत्वारि हेमादीनि शुभानि हि ॥ १३ ॥
पिशाचलोहान्यन्यानि कांस्यादीनि विवर्जयेत् ।
चन्दनं देवदारुश्च शमीपिप्पलशिंशपाः ॥ १४ ॥
खदिरासनमालूरमधूकबकुलास्तथा ।
पद्मकः कर्णिकारश्च विप्रादीनां त्रयस्त्रयः ॥ १५ ॥
क्रमाद् दारवलिङ्गानां विज्ञेयास्तरवः शुभाः ।
तीर्थक्षेत्राचलारामपुण्यदेशोद्भवां मृदम् ॥ १६ ॥
शुक्लां रक्तां तथा पीतां कृष्णां वादाय चूर्णयेत् ।
यवगोधूममाषाणां चूर्णानां गुग्गुलोरपि ॥ १७ ॥
लाक्षाश्रीवेष्टकश्यामासर्जानां तु समांशकैः ।
कुन्दरुष्कस्य चांशेन मृच्चूर्णं सर्वतः समम् ॥ १८ ॥
कपिलापञ्चगव्येन सतैलेन तु मर्दयेत् ।
तां मृदं मृदितां पक्षं माससमात्रोषितं पुनः ॥ १९ ॥
आदाय लिङ्गं कुर्वीत सपीठं स्वेष्टमानतः ।
[1]मासं तु शोषयेद् घर्मे लिङ्गमामं तु मार्त्तिकम् ॥ २० ॥
अथवा केवलां मृत्स्नां कर्मयोग्यां विचूर्णिताम् ।
मर्दितां पञ्चगव्याद्भिर्माससमात्रं तथोषिताम् ॥ २१ ॥
गृहीत्वा कारयेल्लिङ्गं सपीठं लक्षणान्वितम् ।
विपचेत् कुशलैरग्नौ पक्वं लिङ्गं तु तद् भवेद् ॥ २२ ॥

---

[1] 'मान् स' क. पाठः.

सैकतं गोमयं पैष्टमाम्लं गौलं तथा फलम् ।
नावनीतं च लिङ्गानि सप्तैव क्षणिकानि तु ॥ २३ ॥

मोक्षारोग्यधनान्नाद्यपुष्टिश्रीवश्यदानि तु ।
भवन्ति क्षणलिङ्गानि यजतां प्रतिवासरम् ॥ २४ ॥

नैतेषां पिण्डिका कार्या कुर्याल्लिङ्गं तदासने ।
नैषां त्रिखण्डं मानं वा न शिरोवर्तनादिकम् ॥ २५ ॥

नैषां कालमुहूर्ताद्यं नाधिवासादिकाः क्रियाः ।
निर्माय सद्यस्तल्लिङ्गे शिवमावाह्य पूजयेत् ॥ २६ ॥

विसृज्य निरपेक्षं तल्लिङ्गमप्सु विनिक्षिपेत् ।

क्षणिकलिङ्गविधिः ।

स्वयोनिः पिण्डिकैव स्याच्छैलादीनामदूषणा ॥ २७ ॥
अभावे त्वैष्टकी शैले रत्नजानां हिरण्मयी ।
राजती ताम्रजा वा स्याच्छ्रेष्ठमध्याधमक्रमात् ॥ २८ ॥
स्वलोहैरेव लोहानामिष्टकाभिश्च दारवे ।

लिङ्गपीठोपादानाधिकारः ।

उत्तरायणसंस्थेऽर्के शुक्लपक्षे गुणान्विते ॥ २९ ॥

तिथौ वारे च नक्षत्रे शिलादेर्ग्रहणं स्मृतम् ।
भोजयित्वा द्विजानग्रे वाचयित्वाशिषस्ततः ॥ ३० ॥

साङ्गं सम्पूज्य देवेशमस्त्रयागं विधाय च ।
व्रजेत् प्राचीमुदीचीं वा निमित्तान्युपलक्षयन् ॥ ३१ ॥

ज्वलदग्निप्रदीपेभवृषा वेश्याश्च कन्यकाः ।
पुष्पान्नपूर्णकुम्भाज्यशङ्खक्षीरदधीनि च ॥ ३२ ॥

व्रीहयः शालयो मांसं मधुच्छत्रं च चामरम् ।
मङ्गल्ययोषितो राजा ध्वजपूर्णधनूंषि च ॥ ३३ ॥
क्षीरिणी गौस्तुरङ्गश्च दृश्येताभिमुखं यदा ।
यातुरिष्टार्थसिद्ध्यै स्यात् सुतरां तत् प्रदक्षिणम् ॥ ३४ ॥

गौलिकावायसरुतं प्रयाणे वामतः शुभम् ।
प्रवेशे दक्षिणे शस्तं क्षुतं स्यादावशोभनम् ॥ ३५ ॥

अन्यत्र पृष्ठे वामे च शस्तं नृणां च कूजितम् ।
स्रोतांसि भरटादीनां वामे शस्तं तु दक्षिणे ॥ ३६ ॥

गानं च दिशि शान्तायां पिङ्गलानां द्वयं हितम् ।
सृगालवायसव्याघ्रचकोरबकपोतकाः ॥ ३७ ॥

वामाद् दक्षिणगाः शस्ताः फणी सर्वत्र निन्दितः ।
शशकौशिकगृध्राश्च श्येनाश्च मृगडुण्डुभाः ॥ ३८ ॥

दक्षिणाद् वामगाः शस्ताः शुभा वाचः शुभप्रदाः ।
बालेयगोध्वनिर्वामे गतिर्दक्षिणतः शुभा ॥ ३९ ॥

अशनिर्दुर्दिनं वर्षं प्रतिकूलास्तथा गिरः ।
प्रतिशुक्रबुधौ वात्या कलहश्चेति निन्दिताः ॥ ४० ॥

ताडनं शिरसोऽङ्गानां दक्षिणाङ्घ्रेर्विशेषतः ।
वर्णवाहनवेषाणां मनश्शस्त्रादिशामपि ॥ ४१ ॥

अप्रसादोऽथ दिग्दाहपरिवेषाः शिवारुतम् ।
प्रतिसूर्योपरागोल्काभूकम्पेन्द्रधनूंषि च ॥ ४२ ॥

वृक्षध्वजायुधच्छत्रयानभङ्गा विनिन्दिताः ।
चक्रिक्षपणनग्नाश्च मुण्डितामङ्गलाङ्गना ॥ ४३ ॥

विप्रास्तपस्विनो व्रात्या यतयो वामनादयः ।
विकला जालिकाः सूनाः पाषण्डा दण्डपाणयः ॥ ४४ ॥

कापालिकाः काष्ठधरा मुक्तकेशाश्च दुःखिनः ।
आर्द्रवस्त्राश्च निन्द्याः स्युर्दृष्टाः प्रतिमुखागताः ॥ ४५ ॥

अशुभेषु निमित्तेषु मासं नीत्वा शुभे व्रजेत् ।
शिलाकरं यदुद्दिष्टं गिरिक्षेत्रवनादिकम् ॥ ४६ ॥

हिमाद्रिविन्ध्यश्रीशैलाः पारियात्रश्च शुक्तिमान् ।
महेन्द्रसह्यमलयाः कलशो वेदपर्वतः ॥ ४७ ॥

ऋक्षः कुमारशैलश्च मुख्याः प्रोक्ताः शिलाकराः ।
नद्यो गङ्गादिकाः क्षेत्राण्यमरेशादिकान्यपि ॥ ४८ ॥

आकरा मध्यमास्त्वन्ये शिलादारुपरिग्रहे ।
कनिष्ठाः स्युर्यथालाभं शिलाग्रहणमारभेत् ॥ ४९ ॥

वारुण्यैन्द्री तथाग्नेयी वायवी भूश्चतुर्विधा ।
तद्भवाश्च शिला ज्ञेयास्तत्तन्नामोपलक्षिताः ॥ ५० ॥

या कोमलतरुव्राता स्वतःपुष्पितकानना ।
जलाशयैश्च सर्वत्र युक्ता भूर्वारुणी स्मृता ॥ ५१ ॥

या क्षीरवृक्षबहुला सौम्ये यस्या जलं महत् ।
व्रीहिक्षेत्राणि याम्यां च सा माहेन्द्री क्षितिः स्मृता ॥ ५२ ॥

गृध्रकङ्कवराहर्क्षश्येनगोमायुवायसैः ।
संयुक्ता दूरपानीया भूराग्नेयी विनिन्दिता ॥ ५३ ॥

अक्षस्नुहिकुलिङ्गाक्षपीलुश्लेष्मातकण्टकैः ।
युक्ता या निर्जला भूमिरशुभा वायवी स्मृता ॥ ५४ ॥

अनलानिलभूमिष्ठाः शिला लिङ्गेषु वर्जिताः ।
वारुण्यामपि माहेन्द्र्यां सम्भूताः सर्वसिद्धिदाः ॥ ५५ ॥

चण्डालपुल्कसव्याधपुलिन्दाद्यैर्विदूषिता ।
वल्मीकाहिश्मशानाढ्या निन्द्या भूरपि तच्छिला ॥ ५६ ॥

भूपरिग्रहणे पूर्वमुक्तलक्षणभूमयः ।
प्रशस्ताः स्युः शिलायाश्च ग्रहणे निन्दितास्त्यजेत् ॥ ५७ ॥

प्रशस्तां भुवमासाद्य गुरुः शिल्पिभिरन्वितः ।
अन्वेषयेच्छिलां तत्र मन्त्रं चेदमुदीरयेत् ॥ ५८ ॥

ओं त्रिणेत्राय रुद्राय भूतानां पतये नमः ।
शिलां दर्शय देवेश! प्रसन्नो वृषभध्वज! ॥ ५९ ॥

ततः स्नात्वा सशिष्यस्तु गुरुः स्थपतिरप्यथ ।
शुक्लगन्धस्रगालेपौ भूषितौ शिल्पिभिर्वृतौ ॥ ६० ॥

शिलाप्रदेशमासाद्य भूतान्यामन्त्रयेद् गुरुः ।
अपक्रामन्तु भूतानि देवताश्च सगुह्यकाः ॥ ६१ ॥

युष्मभ्यं सुबलिर्भूयाद् भूमिर्दिशतु मे शिलाम् ।
कर्मैतत् साधयिष्यामि क्रियतां वासपर्ययः ॥ ६२ ॥

इत्यामन्त्रयेत् ।

दारुग्रहणे तु सोमो दिशतु पादपानिति विशेषः । ततो गन्धादिभिरभ्यर्च्य पञ्चवर्णौदनैर्दधिक्षीरमधुसर्पिःफलभक्ष्यैर्मांसरुधिरप्रातिनिधिभिर्भूतक्रूरबलिभिर्भूतेभ्यो वनदेवताभ्यश्च बलिं निर्हृत्य कृतमण्डले कलशं संस्थाप्य प्राङ्मुख उदङ्मुखो वा भुवं खात्वा भुवि निगूढामर्करश्मिभिरस्पृष्टां कलशजलैरभिषिच्य पञ्चगव्येन पवमानैः संप्रोक्ष्य पञ्चब्रह्मभिर्निवेद्यान्तामिष्ट्वाहतवस्त्रेण दर्भैरप्याच्छाद्योत्तरेणाग्निमाधाय हृदयेशानाघोरैः समिदाज्यचरूनष्टोत्तरशतं हुत्वा व्याहृतिभिः स्विष्टकृतं च परिषेचनान्तं कुर्यात् ।

अथाष्टौ कलशान् दिक्षु लोकपालाधिदैवतान् ।
विन्यस्येष्ट्वा तदम्भोभिरभिषिच्य शिलां पुनः ॥ ६३ ॥

मध्वाज्यशर्करातिक्तपायसेन दिशास्वथ ।
बलिं प्रक्षिप्य चाच्छाद्य पश्चिमेऽग्नौ जुहोति च ॥ ६४ ॥

शिवैकादशदिक्पालशस्त्रमन्त्रैश्चरुं घृतम् ।
हुत्वा पाशुपतास्त्रेण शतं हुत्वा पुनर्घृतम् ॥ ६५ ॥

छेदनोचितशस्त्राणि संस्नाप्यास्त्रेण शाययेत् ।
तेनैवेष्ट्वात्र दर्भेषु स्वपेद् रात्राविमं जपन् ॥ ६६ ॥

नमः शम्भो! त्रिनेत्राय रुद्राय वरदाय च ।
शिवाय विश्वरूपाय स्वप्नाधिपतये नमः ॥ ६७ ॥

आचक्ष्व देवदेवेश! प्रपन्नोऽस्मि तवान्तिकम् ।
स्वप्ने सर्वाणि कार्याणि हृदयस्थानि यानि वै ॥ ६८ ॥

शूलपाणये हिलि हिलि स्वाहा स्वप्नमाणवकाख्योऽयं मन्त्रः ।

ज्वलन्तीं वा शिलां पश्येत् स्वप्ने स्वां देवतां तु वा ।
अन्यद् वा शोभनं ग्राह्या स्याच्छिला लिङ्गकर्मणि ॥ ६९ ॥

स्वप्नश्चेदशुभस्त्याज्या सान्या ग्राह्या शिला भवेत् ।
प्रातः स्नात्वाभिपूज्येशमाचार्यः स्थपतिस्तथा ॥ ७० ॥
हेमसूच्याष्टिलाभ्यां तु च्छिन्द्यात् प्रथममस्त्रतः ।
अधोभागो मुखं तस्याः पृष्ठमूर्ध्वं तु पूर्वतः ॥ ७१ ॥
उत्तरे वा शिरो घण्टाध्वनिच्छेदे स्फुलिङ्गवत् ।
कोणशीर्षा शिला त्याज्या भर्तुर्दुःखकरी यतः ॥ ७२ ॥
इष्टप्रमाणां छित्वा तु चतुरश्रां समां शुभाम् ।
मुखमूलशिरःपृष्ठान्यङ्कायित्वाम्बरावृताम् ॥ ७३ ॥
दर्भैश्चाच्छाद्य तु रथे समारोप्यालयं नयेत् ।
शस्त्रासहा पेलवा च शिला बाला विनिन्दिता ॥ ७४ ॥
हीनस्वरा चातिरूक्षा वृद्धा त्याज्यातिजर्झरा ।
नानावर्णा रोमरेखा चण्डाली सा च वर्जिता ॥ ७५ ॥
घण्टानादा दृढा स्निग्धा युवतिः स्याच्छिलोचिता ।
पुंशिला लिङ्गयोग्या स्याद् वृत्ता वृत्तायता च सा ॥ ७६ ॥
चतुरश्रा च दीर्घाश्रा स्त्रीशिला पिण्डिकोचिता
त्र्यश्रा त्र्यश्रायता चापि षण्डा पादशिलोचिता ॥ ७७ ॥
स्त्रीशिलाकल्पिते लिङ्गे राष्ट्रं राजा च नश्यति ।
पुंल्लिङ्गपीठे च तथा लिङ्गपीठे च षण्डके ॥ ७८ ॥
स्त्रिया पुंसा च भूपीठे कृते स्याद् राष्ट्रनाशनम् ।
इत्थं पादशिलापीठलिङ्गानां त्रिविधाः शिलाः ॥ ७९ ॥
रथयानादिना नीत्वा कौबेर्यां दिशि मण्डपे ।
शाययेद् दारुयुगले ततो लिङ्गं तु कारयेत् ॥ ८० ॥

लिङ्गानि लोहमणिशैलजदारवाणि मार्त्स्नक्षणानि शकुनानि निमित्तजातम् ।
स्त्रीपुन्नपुंसकशिलाग्रहणानि चास्मिन् सन्दर्शितानि शिवशास्त्रनिरूपितानि ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
लिङ्गविशेषपटलः षट्त्रिंशः ॥

अथ सप्तत्रिंशः पटलः ।

अथ गर्भास्तु वक्ष्यन्ते त्यजेल्लिङ्गं सगर्भकम् ।
गर्भांस्तु लक्षयेल्लिङ्गं सगर्भं चेत् परित्यजेत् ॥ १ ॥

तुल्यांशैः क्षीरपिष्टैस्तु विषकासीसगैरिकैः ।
आलिप्य लिङ्गं निश्शेषमेकरात्रोषितं ततः ॥ २ ॥

प्रक्षाल्य गर्भान् दोषांश्च मण्डलैस्तत्र लक्षयेत् ।
अथवा ब्रह्मविष्ण्वीशवैष्णवीः परिपेष्य[1] तु ॥ ३ ॥

क्षीराज्यतुल्यमधुना विधृतेन विलेपयेत् ।
त्रिरात्रमुषिता क्लिन्ना शिला यत्र तु लक्ष्यते ॥ ४ ॥

तत्र गर्भं वदेत् सर्पं गोधां वा वृश्चिकं तु वा ।
कासीसचोरौ गोक्षीरपिष्टा वालिप्य या शिला ॥ ५ ॥

त्रिरात्रमुषिता रक्ता स्याच्चेत् कूर्मोऽत्र दर्दुरः ।
मांसीकुष्ठहया रात्रिं त्रिफलां वारिदाम्बुभिः ॥ ६ ॥

पिष्ट्वा स्तन्यार्दितं लिम्पेत् त्रिरात्राद् विकृतिर्यदा ।
गर्भं तु कालकूटाख्यं विषं तत्र विनिर्दिशेत् ॥ ७ ॥

तस्य स्पर्शेन मृत्युः स्याद् यतोऽतस्तं न संस्पृशेत् ।
पूर्वोक्तविषकासीसगैरिकक्षीरलेपतः ॥ ८ ॥

मण्डलैर्निर्दिशेद् गर्भानेकद्वित्रिदिनोषिते ।

तद्यथा —

मञ्जिष्ठाभे मण्डले दर्दुरः स्यात् पीते गोधा कापिले मूषिकाश्च ।
कृष्णे सर्पः पाण्डरे चेति केचित् कापोताभे गौलिका वृश्चिको वा ॥ ९ ॥

रक्ते तु कृकलासः स्यात् खद्योतो मधुसन्निभे ॥ १० ॥
मिश्रे पिपीलिकागर्भः शङ्खोऽम्भो धूसरे दृषत् ।
गौरे तु विमला धूम्रे पतङ्गः सिकतास्तु वा ॥ ११ ॥

नीलपीते भवेत् कूर्मो गर्भदोषान् वदाम्यतः ।
भयं तोये च मण्डूके कर्तुश्च नृपतेरपि ॥ १२ ॥

---

१. 'वेष्टय तु', २. 'कच्छपः' ग. पाठः.

राज्यनाशस्तु गोधा चेत् सर्पे कर्तुः कुलक्षयः ।
कुलीरालिपतङ्गेषु रोगदुःखादिसम्भवः ॥ १३ ॥
विमलासु सदा चौर्यं परचक्रभयानि वा ।
पिपीलिकाः प्रवासाय विमला स्थाननाशनम् ॥ १४ ॥
कूर्मः कुर्यात् तु दारिद्र्यं रत्नगर्भेषु सम्पदः ।
रेखाश्च लक्षयेल्लिङ्गे शोभनाश्चाप्यशोभनाः ॥ १५ ॥
शिलास्ववर्णरेखास्तु वर्णानां क्रमशो मताः ।
इन्द्रायुधनिभाः शस्ता रेखाः शङ्खाम्बुजोपमाः ॥ १६ ॥
नानावर्णाः कृशाः स्थूला रूक्षा रेखाश्च निन्दिताः ।

अत्र मञ्जर्यां —

“नन्द्यावर्तवसुन्धराधरहयश्रीवत्सकूर्मोपमाः
शङ्खस्वस्तिकहस्तिगोवृषनिभाश्चक्रेन्दुसूर्योपमाः ।
छत्रस्रग्ध्वजलिङ्गतोरणमृगप्रासादपद्मोपमा
वज्राभाः शफरोपमाश्च शुभदा रेखाः कपर्दोपमाः ॥
अग्नेश्च बीजं पवनस्य बीजं भूयः स्वराण्यत्र नपुंसकानि ।
हित्वा प्रशस्ताः शुभदाः समस्ता रेखास्तु लिङ्गेऽक्षरतुल्यरूपाः ॥
काकश्येनवृकोष्ट्रवानरनिभा मार्जारगृध्रोपमाः
सर्पोलूकसृगालकीटसदृशाः कोलाश्च भेकोपमाः ।
रेखास्तिर्यगवस्थिताश्च सकलाश्चान्याश्च दोषावहाः
सन्त्यज्य प्रतिगृह्य शोभनशिलां लिङ्गं तया कल्पयेत् ॥
आरभ्य हस्तं नवहस्तकान्तं लिङ्गं विधेयं नरदैत्यदेवैः ।
हस्तादिकं पञ्चकरान्तमादौ लिङ्गं मनुष्यस्य तु वर्णभेदात् ॥
दैत्यस्य षट्सप्तकरं तु लिङ्गं गीर्वाणलिङ्गं तु नवाष्टहस्तम् ।”

इति ।

हस्तोच्चमानादारभ्य पादवृद्धिक्रमेण तु ॥ १७ ॥

---

१. ‘ज’ ग. पाठः.

त्रिहस्तान्तं कनिष्ठादिलिङ्गानि स्युर्नवैर्बहिः ।
चतुर्हस्तायतालिङ्गात् प्राग्वत् पादविवर्धनात् ॥ १८ ॥

षड्ढस्तान्तं मध्यमानि लिङ्गानि नव कल्पयेत् ।
सप्तहस्तोच्चमारभ्य पादवृद्ध्या तु पूर्ववत् ॥ १९ ॥

श्रेष्ठानि नवहस्तान्तं लिङ्गानि स्युर्नव क्रमात् ।
त्रिचतुर्हस्तयोर्मध्ये प्राग्वल्लिङ्गत्रयं भवेत् ॥ २० ॥

मध्ये षट्सप्तकरयोस्तथा लिङ्गत्रयं स्मृतम् ।
एवं प्रसिद्धलिङ्गानां त्रयस्त्रिंशदुदाहृतम् ॥ २१ ॥

प्रासादमानाच्च तथा वेदबाणर्तुभागतः ।
लिङ्गायामोऽथवा कार्यः प्रकारोऽन्यश्च कथ्यते ॥ २२ ॥

गर्भागारे तु पञ्चांशे लिङ्गं भागत्रयोच्छ्रितम् ।
गर्भे वा नवभागे स्याल्लिङ्गं पञ्चांशमायतम् ॥ २३ ॥

गर्भरामांशतोंऽशेन गर्भार्धोच्चं तु वा स्मृतम् ।

लिङ्गस्य दैर्घ्यमिति यावत् ।

तत्रैकहस्तलिङ्गस्य चतुर्हस्तं तु विस्तृतम् ॥ २४ ॥

विमानं स्यात् तथा पञ्चगुणं षड्गुणमेव वा ।
विस्ताराद् द्विगुणोच्चं तु नागरं त्रिगुणं यदि ॥ २५ ॥

भूमिजाख्यं स्मृतं तस्माद् द्विगुणं शिखरं यदा ।
नागरं वलभिर्नाम विमानं भवति स्फुटम् ॥ २६ ॥

लिङ्गायामे विकारांशे भूतवेदाग्निविस्तरम् ।
जयदं पौष्टिकं सार्वकामिकं नागरे स्मृतम् ॥ २७ ॥

गर्भे त्रिसप्तभागे तु दशांशं द्राविडेऽधमम् ।
त्रयोदशांशकं मुख्यं गर्भेऽष्टांशे तु पूर्ववत् ॥ २८ ॥

त्रिसप्तांशे निजायामे षट्पञ्चचतुरंशकम् ।
जयदं पौष्टिकं सार्वकामिकं द्राविडे भवेत् ॥ २९ ॥

अभिकृत्यंशके गर्भे षोडशांशं तदुत्तमम् ।
त्रयोदशांशमधमं तयोर्मध्येऽष्टभागतः ॥ ३० ॥

नवलिङ्गानि सिध्यन्ति वेसरे तानि कल्पयेत् ।
पञ्चपञ्चांशके दैर्घ्ये वसुसप्तषडंशकैः ॥ ३१ ॥

विस्तारे वेसरे विद्यात् पूर्ववज्जयदादिकम् ।
अथ स्थिराणां लिङ्गानां ब्रह्मविष्णवीशदैवतम् ॥ ३२ ॥

मूलं मध्यं तथैवाग्रं चतुरष्टाश्रवर्तुलम् ।
त्रिभागमेवं विज्ञेयं तेषां भेदश्च लिख्यते ॥ ३३ ॥

सर्वतोभद्रकं लिङ्गं वर्धमानं शिवाधिकम् ।
स्वस्तिकं च चतुर्धा स्यात् तल्लक्ष्म पृथगुच्यते ॥ ३४ ॥

विप्राणां सर्वतोभद्रं भूभुजां वर्धमानकम् ।
शिवाधिकं विशामिष्टं शूद्राणां स्वस्तिकं हितम् ॥ ३५॥

स्ववर्णविहितं लिङ्गं स्थाप्यं स्यादिष्टसिद्धये ।
अन्यवर्णोदितं लिङ्गमिहामुत्रार्थनाशनम् ॥ ३६ ॥

अत्र मयः —

"आद्यं तत् सर्वतोभद्रं द्वितीयं वर्धमानकम् ।
शिवाधिकं तृतीयं स्याच्चतुर्थं स्वस्तिकं भवेत् ॥

अथ धरणिसुराणां सर्वतोभद्रमिष्टं
सुखदमवनिपानां वृद्धिदं वर्धमानम् ।
धनदमिह विशां वै शम्भुभागाधिकं य-
च्छुभदमिह परेषां स्वस्तिकं शूद्रकाणाम् ॥"

परेषामपीत्युक्तत्वादनुलोमप्रतिलोमादीनामपि स्वस्तिकलिङ्गमेवेष्टमिति यावत् ।

गर्भागारे त्रिभागेंऽशः पीठं पीठे त्रिभागिके ।
भागेन लिङ्गविस्तारः परिणाहस्तु तस्य यः ॥ ३७ ॥

स्याल्लिङ्गोच्चं तु तत्तुल्यं लिङ्गायामं समं त्रिधा ।
विभज्य ब्रह्मविष्णवीशभागाः सर्वसमे मताः ॥ ३८ ॥

कांशः पादशिलायां स्याद् विष्णवंशः पिण्डिकासमः ।
दृश्यः शिवांशः पूज्यः स्यात् सर्वलिङ्गेष्वयं विधिः ॥ ३९ ॥

अत्र पिङ्गलामते —

> "सममाना भवद् वेदी लिङ्गस्यावारिका यथा।"

इति। तद्यथा —

पूजांश एव निर्दिष्टो लिङ्गशब्देन चात्र हि।
वेदाश्रपिण्डिकायास्तु लिङ्गे सर्वसमे त्विदम् ॥ ४० ॥

तल्लिङ्गपरिणाहस्थब्रह्मसूत्रचतुष्टये।
विस्तारः सम एव स्याच्छायादोषोऽन्यथा भवेत् ॥ ४१ ॥

अतो लिङ्गसमं पीठं स्याच्छायादोषवर्जितम्।
वेदाश्रपिण्डिकाक्षेत्रापेक्षया वर्तुलादिषु ॥ ४२ ॥

पीठेषु लिङ्गतुल्या स्यात् परिणाहान्तविस्तृतिः।
तथा कृशेषु लिङ्गेषु पिण्डिकाधिकविस्तृतम् ॥ ४३ ॥

अवगम्य शिवांशे तु वर्धयेत् तत्समं यथा।
यावद् वृद्धं शिवांशे तु ब्रह्मांशे हापयेत् तु तत् ॥ ४४ ॥

तद्वत् स्थूलेषु लिङ्गेषु न्यूनतां पीठविस्तृतेः।
विज्ञाय पूजाभागं तु कुर्याद्ध्रस्वं तदंशतः ॥ ४५ ॥

ब्रह्मांशे वर्धयेद् भागं वृद्धिहानी न वैष्णवे।

यथा बृहत्तन्त्रे —

> "कृशेषु वर्धयेद् रुद्रं स्थूललिङ्गेषु ह्रासयेत्।
> ह्रासयेद् वर्धयेत् कांशं न वृद्धिर्न च्युतिर्हरेः॥"

इति।

छायादोषविचारोऽयं लिङ्गे सर्वसमे स्मृतः ॥ ४६ ॥

वर्धमानादिलिङ्गेषु नैतदित्येव केचन।
तद्वद् व्यक्तेषु लिङ्गेषु व्यक्ताव्यक्ते च रत्नजे ॥ ४७ ॥

स्वयम्भुवि तथा बाणेऽप्यार्षे च नियमो न हि।
वर्धमानादिलिङ्गानां त्रयाणामप्ययं विधिः ॥ ४८ ॥

मयसूत्रे तु कथितच्छायादोषं विना यथा।
लिङ्गायतिप्रमाणानीत्यादिना पीठविस्तृतिः ॥ ४९ ॥

शिवभागसमा कार्या व्याख्यातं सङ्ग्रहे तथा ।
"यावल्लिङ्गस्य वै दैर्घ्यं तावत् पीठस्य विस्तृतिः ॥"

इति ।

संकृत्यंशे तु लिङ्गोच्चे सप्ताष्टनवभिः क्रमात् ॥ ५० ॥
अंशैर्ब्रह्महरीशानभागाः स्युर्वर्धमानके ।
लिङ्गायामे प्रकृत्यंशे षट्सप्ताष्टांशकल्पिताः ॥ ५१ ॥
क्रमाद् ब्रह्मादिभागाः स्युरेवं वा वर्धमानके ।
पञ्चषट्सप्तभागैर्वा चतुष्पञ्चषडंशकैः ॥ ५२ ॥
वर्धमानं भवेल्लिङ्गं श्रेष्ठमध्याधमं क्रमात् ।
लिङ्गायामे तु पङ्क्त्यंशे रामाग्निश्रुतिसम्मितैः ॥ ५३ ॥
अंशैर्ब्रह्मादिभागाः स्युः क्रमाल्लिङ्गे शिवाधिके ।
लिङ्गोत्सेधे तु नन्दांशे षट्सप्तवसुभागिकैः ॥ ५४ ॥
ब्रह्मविष्ण्वीशभागानां क्रमान्नाहाः प्रकीर्तिताः ।
लिङ्गे त्रैराशिकं नाम भवेत् सर्वसमे तु तत् ॥ ५५ ॥
स्वायामार्धार्धविस्तारं स्वस्तिकं वा शिवाधिकम् ।
वर्धमानं च तल्लिङ्गं नाम्ना सुरगणार्चितम् ॥ ५६ ॥
तत्सार्वदेशिकं ज्ञेयं सर्ववर्णहितावहम् ।
पौष्करे कारणाख्ये च यथोक्तं तत्र कथ्यते ॥ ५७ ॥

तद्यथा —

चतुरंशादि विप्राणां पञ्चांशादि नृपोचितम् ।
षड्भागादि विशां योग्यं सप्तांशाद्यं तु वार्षलम् ॥ ५८ ॥
वर्धमानं चतुर्भेदमेवं वर्णक्रमाद्धितम् ।

अथ शिवाधिकं च ।

आकृत्यंशे तु लिङ्गोच्चे सप्तसप्ताष्टभागिकम् ॥ ५९ ॥
ब्रह्माद्यंशेषु यल्लिङ्गं विप्राभीष्टं शिवाधिकम् ।
त्रयोदशांशे लिङ्गोच्चे वेदवेदशरांशकैः ॥ ६० ॥

षोडशांशे तु लिङ्गोच्चे पञ्चभिः पञ्चभिः क्रमात् ।
षड्भिश्च भागैर्ब्रह्माद्यैः क्षत्रयोग्यं शिवाधिकम् ॥ ६१ ॥
कादिभागैर्विशां योग्यं लिङ्गमुक्तं शिवाधिकम् ।
लिङ्गतुङ्गे दशांशे तु गुणाग्निश्रुतिभागिकम् ॥ ६२ ॥
ब्रह्माद्यंशेषु शूद्राणामिष्टं लिङ्गं शिवाधिकम् ।
पूर्वोक्तसमलिङ्गे तु धारालिङ्गं विकल्पतः ॥ ६३ ॥
चतुरश्रं द्विरष्टाश्रं तन्मूले परिकल्पयेत् ।
वैष्णवांशे च शैवांशे धाराद्विद्विगुणीकृते ॥ ६४ ॥
सर्वेषामपि वर्णानां धारालिङ्गं त्रिधा मतम् ।

"मूलेऽष्टाश्रं वा कलाश्रं युगाश्रं तस्मादूर्ध्वं द्विगुणाः स्युश्च धाराः"
इति मयः ।

सर्वतोभद्रलिङ्गे तु धाराः स्युः पञ्चविंशतिः ॥ ६५
सप्तपर्णदलाकाराः समाः सर्वाः समान्तराः ।
एकैकस्यां तु धारायां चत्वारिंशत्प्रसंख्यया ॥ ६६ ॥
कुर्यात् समानि लिङ्गानि स्यात् तल्लिङ्गसहस्रकम् ।

लिङ्गविकल्पाधिकारः ।

ब्रह्मादिभागसिद्धौ तु वेदाश्रं प्रोक्तमार्गतः ॥ ६७ ॥
कृत्वा लिङ्गमशेषेण ब्रह्मभागादथोपरि ।
चतुरश्रस्य कोणार्धसूत्रलाञ्छनमध्यतः ॥ ६८ ॥
कोणत्यागात् तदष्टाश्रं कुर्याद् विष्ण्वंशसिद्धये ।
अथवा लिङ्गविस्तारं सप्तधा बिभजेत् समम् ॥ ६९ ॥
मध्ये त्रिभागं संस्थाप्य द्विद्विभागविवर्जनात् ।
वस्वश्रं सिद्ध्यति सममथ वृत्तं निगद्यते ॥ ७० ॥
चतुरश्रस्य लिङ्गस्य शिरोमध्ये निधाय तु ।
सूत्रं दिगन्तमानेन भ्रामयेद् वृत्तसिद्धये ॥ ७१ ॥
लिङ्गानामथ सर्वेषां शिरोवर्तनमिष्यते ।
छत्राभं त्रपुषाकारं कुक्कुटाण्डनिभं तथा ॥ ७२ ॥

अर्धेन्दुसदृशं चाथ बुद्बुदं पञ्चमं स्मृतम् ।

अत्र सर्वतोभद्रवर्धमानादिलिङ्गानां यथाप्रमाणावस्थितशिरसामेव वर्तनेन पूजांशायामे न्यूनतया तत्तत्प्रमाणभङ्गाद् दोषः सिद्धः । तस्मादुक्तप्रमाणलिङ्गनेत्रसूत्रादूर्ध्वमेव शिरोवर्तनेन सकले मकुटादिवल्लिङ्गमस्तकं सम्पादनीयम् । अत्र मयः —

"सर्वेषामपि चैताः सामान्यास्तत्र लिङ्गानाम् ।
शिरसो वर्तनभागत्र्यंशैकं चाधिरोप्य निजतुङ्गे ॥
लिङ्गायामे षट्षड्भागयुते तेन सार्धमतः ।
अवरे मध्यमलिङ्गे श्रेष्ठे लिङ्गे तथा शिरोमानम् ॥
इन्द्वश्विनिगुणभागाः प्रोक्ताः सर्वेष्वपि क्रमशः ।"

इति । तद्यथा —

पूजांशायामतत्त्वांशादेकद्वित्र्यंशकात् क्रमात् ॥ ७३ ॥

नीचे मध्ये तथा श्रेष्ठे लिङ्गे तन्मानतोऽधिकम् ।
संस्थाप्योपरि नेत्रोर्ध्वं शिरसः सिद्धये पुनः ॥ ७४ ॥

उक्तवर्तनभागानां त्र्यंशैकांशं तथोपरि ।
शिलामारोप्य तन्मध्ये बिन्दुं सम्पाद्य शास्त्रतः ॥ ७५ ॥

तस्मिन् सूत्रं निधायाथ वक्ष्यमाणक्रमेण तु ।
शिरसो वर्तनं कुर्याच्छत्राकारादिसिद्धये ॥ ७६ ॥

लिङ्गे व्यासात् षोडशांशादेकद्वित्रियवांशकान् ।
आरोप्य केऽधः संलम्ब्य लिङ्गस्योभयपार्श्वयोः ॥ ७७ ॥

वर्तयेत् तत्र चत्वारिच्छत्राभाणि भवन्ति हि ।
प्रथमं च द्वितीयं च समलिङ्गे नियोजयेत् ॥ ७८ ॥

शिवाधिके तृतीयं तु चतुर्थं वर्धमानके ।
वर्तनाः सङ्करं नैव कुर्यात् तदशुभं यतः ॥ ७९ ॥

"सङ्करमन्योन्यस्याप्यशुभं स्याद् वर्तनानां च ।"

इति मयः ।

षडंशे लिङ्गविस्तारे सार्धद्व्यंशेन वर्तनात् ।
त्रपुषाभं शिरः सिध्येद् रामांशैः कुक्कुटाण्डकम् ॥ ८० ॥
लिङ्गव्यासतृतीयांशवर्तनादर्धचन्द्रकम् ।
लिङ्गव्यासेऽष्टधा भक्ते सार्धांशत्रयवर्तनात् ॥ ८१ ॥
बुद्बुदाभं तु लिङ्गस्य शिरः सिध्यति शोभनम् ।
सामान्याः सर्वलिङ्गेषु वर्तनास्त्रपुषादिकाः ॥ ८२ ॥
छत्राकारोक्तभेदास्तु लिङ्गेषु नियताः पृथक् ॥ ८२½ ॥

अत्र मञ्जर्यां मये च वर्तनाप्रकार उक्तः —

"लिङ्गानां शिरसीप्सितांशमुभयोः संलम्ब्य तत्पार्श्वयोः
कृत्वा मत्स्ययुगं तदास्यजघनान्निष्क्रान्तसूत्रद्वये ।
तस्माद् यत्र च संयुतिर्मतिमता बिन्दुत्रयाढ्यं यथा
तत्तद् वर्तयितव्यमत्र बहुधा सोपायमीशोदितम् ॥"

इति ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
मानुषशिलालिङ्गलक्षणपटलः सप्तत्रिंशः ।

अथाष्टात्रिंशः पटलः ।

अथ लिङ्गं स्थूलमूलं स्थूलमध्यं कृशं तथा ।
आर्षं स्थूलशिरस्कं च चतुर्धेति मयोदितम् ॥ १ ॥
लिङ्गव्यासेऽष्टधा भक्ते मूले मध्याग्रयोरपि ।
भागाधिकं च हीनं च स्थूलमूलादिकं स्मृतम् ॥ २ ॥
वेदाश्रौ ब्रह्मविष्ण्वंशौ लिङ्गेष्वार्षेषु संमतौ ।
शिवांशो वृत्त एव स्याच्छिरसो वा न वर्तनम् ॥ ३ ॥
अथ स्वयम्भुलिङ्गानि जर्झराणि कृशानि च ।
ह्रस्वानि चातिदीर्घाणि फलकासदृशानि च ॥ ४ ॥
अनेकाग्राणि गोकर्णमातुलुङ्गनिभान्यपि ।
षट्पञ्चत्रिदशाग्राणि मानोन्मानादिभिर्विना ॥ ५ ॥

शृङ्गाग्राण्यपि वक्राणि नानावर्णाकृतीनि च ।
सपीठान्यप्यपीठानि सालयान्यगृहाणि वा ॥ ६ ॥
वनपर्वतनद्यब्धितीर्थक्षेत्रगतान्यपि ।
दर्शनस्पर्शनार्चाभिरेषां सिद्धिरनुत्तमा ॥ ७ ॥
विद्यात् स्वयम्भुलिङ्गानि येषु नित्यं स्थितः शिवः ।
मूलं न शोधयेत् तेषां शोधनं सर्वनाशकृत् ॥ ८ ॥
अमीमांस्यानि तान्याहुः पूज्यान्येव यथास्थिति ।
नैषां मूर्तिविभागोऽस्ति न च स्यान्मन्त्रसङ्करः- ॥ ९ ॥
मानुषेष्वेव लिङ्गेषु मन्त्रमूर्त्यादिसङ्करः ।

अत्र मयः —

"आस्थापनमपि लिङ्गं पूजाभागेन पीठभागसमम् ।
वृत्तं वाथ सधारं पूजाभाग तु पूजयेन्मुक्त्यै ॥"

इति ।

बाणलिङ्गं तु यत् सर्वं यथाजातं निधापयेत् ॥ १० ॥
स्वोच्चार्धं वाथ रामांशं पञ्चांशं वा द्विभागिकम् ।
पीठे सलक्षणे शैले सौधे वा स्थापयेच्छुभे ॥ ११ ॥

अत्र योगशिवीये —

"कोट्यस्तिस्रस्तु लिङ्गाद्रौ तिस्रः श्रीपर्वते स्थिताः ।
तिस्रश्च कालिकागर्ते तिस्रश्चाप्यमरेश्वरे ॥
कन्यातीर्थे महेन्द्रादौ नेपाले कन्यकाश्रमे ।
एष्वेकैका स्थिता कोटिरेवं कोट्यस्तु षोडश ॥
सपीठं वाप्यपीठं वा सर्वप्रासादपीठगम् ।
सर्वसङ्करहीनं तत् सर्वेषां भुक्तिमुक्तिदम् ॥
पूजयेद् बाणलिङ्गं तत् प्रतिष्ठाप्य विधानतः ।
अन्यान्यपि च लिङ्गानि नद्यब्धिगिरिजान्यपि ॥
अकृतानि विशिष्टानि पूज्यान्येव हि बाणवत् ।
लिङ्गमूर्ध्नि क्षतं स्याच्चेद्राज्ञः कर्तुश्च नाशनम् ॥

छिद्रं भार्यां सुतं शङ्खे वक्त्रे हन्याच्च शिल्पिनम् ।
मध्ये दुःखं च दुर्भिक्षं कोटरे वृष्टिनाशनम् ॥
अत्यायतं चातिह्रस्वं कृशं स्थूलं नृपान्तकृत् ।"

अथ लक्षणोद्धार उच्यते—

पर्याप्तकर्म यल्लिङ्गं शाणाभिर्वालुकादिभिः ।
गोबालरज्जुभिश्चैव घर्षयेन्निर्व्रणं समम् ॥ १२ ॥

मुकुरोदरवच्छलक्ष्णं दृश्यच्छायं सुवर्तुलम् ।
ततः शुद्धाम्बुगोक्षीरनालिकेरेक्षुवारिभिः ॥ १३ ॥

प्रक्षाल्य तीर्थतोयैश्च प्रोक्तचिह्नानि लक्षयेत् ।
रजः सर्षपमात्रं चेद् यत्र स्युः स्वर्णबिन्दवः ॥ १४ ॥
लिङ्गे वा पिण्डिकायां वा सर्ववर्णहितावहाः ।
अल्पदोषमपि त्याज्यं लिङ्गं पीठं च तद् भवेत् ॥ १५ ॥
निर्दोषमन्यत् सम्पाद्य लक्षणोद्धारमाचरेत् ।
तिथिनक्षत्रकरणमुहूर्तादौ गुणान्विते ॥ १६ ॥
मूलात् प्राच्यामुदीच्यां वा कृत्वा वेदाश्रमण्डपम् ।
सवितानं चतुर्द्वारं प्रदीपाद्यैरलङ्कृतम् ॥ १७ ॥
तन्मध्ये स्थण्डिलं कृत्वा शालिभिः शुक्लतण्डुलैः ।
सितवस्त्रयुगास्तीर्णे तस्मिँल्लिङ्गं तु शाययेत् ॥ १८ ॥

आचार्यः स्थपतिश्चोभौ सुस्नातौ समलङ्कृतौ ।
प्राक्छिरस्कं तु तल्लिङ्गं नमस्कृत्याभिपूज्य च ॥ १९ ॥

ध्यात्वा तस्मिञ्छिवं सूक्ष्ममनेनाभिप्रसादयेत् ।
अज्ञानाद् वा मया ज्ञानात् त्वयि यद् दुरनुष्ठितम् ॥ २० ॥

तत् सर्वमिह सर्वात्मन्! क्षन्तुमर्हसि शङ्कर! ।
इत्यनुज्ञाप्य देवेशं लिङ्गे लक्षणमुद्धरेत् ॥ २१ ॥

आचार्यः प्रथमं तत्र नेत्रमन्त्रमनुस्मरन् ।
लिखेन्मध्ये ब्रह्मसूत्रं पार्श्वसूत्रे शिवास्त्रतः ॥ २२ ॥

ततः सुवर्णशस्त्रेण स्थपतिर्लघुहस्तवान् ।
लघुशस्त्रेण च समं सूत्राण्यालम्बयेत् स्फुटम् ॥ २३ ॥
मध्वाज्यदुग्धैः सहितैर्विलिख्याहतवाससा ।
आच्छाद्य तु सवत्सां गां द्विजं स्वर्णं च कन्यकाम् ॥ २४ ॥
दर्शयेद् धान्यराशिं च गन्धाद्यैश्चाभिपूजयेत् ।

अत्र मयः —

"प्रथमे नागरलिङ्गे षोडशभागीकृते शिवायामे ।
षड्भूतवेदभागांस्त्यक्त्वोर्ध्वे कन्यसाद्युदयम् ॥
एवं त्रिकमुत्सेधं बुद्ध्वाथ त्र्यंशकात् तु सर्वेषाम् ।
विष्णवंशाभिमुखे द्वे सूत्रे संलम्बयेत् पार्श्वे ॥
पृष्ठे तयोर्युतिः स्याद्धीने वेदाग्निदस्रेषु ।
मध्ये भूतवनानलपाशेषु युतिस्तयोः पृष्ठे ॥
ज्येष्ठे षड्भूतवनानलपाशेषूदिता तु युतिः ।
तेषु ग्रीवैकांशं त्रिद्व्यंशं सूत्रविष्कम्भम् ॥
यावदधो विष्णवंशः प्रोक्तोत्सेधे नयेत् तु समम् ।
एवं नागरलिङ्गे सूत्रं सम्यङ् मयेनोक्तम् ॥"

इति ।

पादोनभागमर्धं वा ब्रह्मसूत्रविशालता ॥ २५ ॥

भवेद् विष्णवंशपर्यन्तं ब्रह्मसूत्रस्य तु स्थितिः ।
तदर्धं पार्श्वसूत्रस्य रेखा मध्ययवा भवेत् ॥ २६ ॥

तथा द्राविडलिङ्गोच्चे त्रिपञ्चांशे क्रमेण तु ।
नन्ददिग्रुद्रभागोच्चं हीनाद्युच्चमिहोदितम् ॥ २७ ॥

सप्ताष्टनवभागेभ्यः क्रमात् सूत्रे तु लम्बयेत् ।
नीचे युगाग्निद्वितये मध्ये बाणयुगाग्निषु ॥ २८ ॥

द्वयोश्चाथोत्तमे लिङ्गे रसेषु श्रुतिवह्निषु ।
युतिः स्याद् द्राविडे सूत्रव्यासः स्वांशार्धतः समः ॥ २९ ॥

तदर्धं पक्षसूत्रस्य व्यासोऽगाधश्च पूर्ववत् ।

द्राविडस्यान्यः प्रकार उच्यते—

षोडशांशे शिवायामे सूत्रायामो दशांशतः ॥ ३० ॥
ऊर्ध्वांशस्तु चतुर्भागः स्यादधश्च द्विभागिकः ।
मुकुलाकारमारभ्य पार्श्वसूत्रद्वयं क्रमात् ॥ ३१ ॥
द्व्यंशं विहाय पृष्ठे तु युतिरुक्ता तु सूत्रयोः ।
अथवा षोडशांशेऽधो भागं वेदांशमूर्ध्वतः ॥ ३२ ॥
त्यक्त्वा सूत्रं तु रुद्रांशैरुच्चं प्राग्वद् युतिः स्मृता ।
इत्थं द्राविडलिङ्गस्य लक्षणोद्धारणं स्मृतम् ॥ ३३ ॥
अथ वेसरलिङ्गस्य त्रिपञ्चांशे शिवोच्छ्रये ।
नालायामो दशांशः स्याद् वस्वंशप्रभृति क्रमात् ॥ ३४ ॥
सूत्रयोर्लम्बनं कुर्याद् भूतवेदगुणांशकैः ।
तयोर्युतिर्भवेच्छ्रेष्ठे विष्कम्भः षोडशांशतः ॥ ३५ ॥
मध्येंऽशे वसुभागोच्चे वेदांशैर्नालमुन्नतम् ।
ऊर्ध्वं त्रयोंऽशाश्चाधोंशा गुणभागात् प्रभृत्यधः ॥ ३६ ॥
सूत्रे तु लम्बयेत् त्रिद्विभागेषु स्यात् तयोर्युतिः ।
गृहीतांशे त्रिधा भक्ते व्यासो भागद्वयेन तु ॥ ३७ ॥
एवं मध्यममुक्तं स्याल्लिङ्गे वेसरसंज्ञिते ।
कनिष्ठवेसरस्याथ द्वादशांशे शिवोच्छ्रये ॥ ३८ ॥
अधोंशमंशानूर्ध्वे तु सूत्रायामो नवांशतः ।
सङ्गमः पूर्ववज् ज्ञेयो व्यासे वै षोडशांशके ॥ ३९ ॥
भागेन सूत्रव्यासः स्यात् तदर्धं पक्षसूत्रयोः ।
कनिष्ठवेसरस्यैवं लक्षणोद्धरणं स्मृतम् ॥ ४० ॥

अत्र मयः—

"आद्यांशे नवभागे भागेन व्यासगम्भीरा ।
रेखाप्यकर्कशोक्ता सर्वेषामेव लिङ्गानाम् ॥
अष्टौ यवान् गृहीत्वा नवधा विभजेत् समं दृढधीः ।
एकांशेनैककरोत्तुङ्गे लिङ्गे विधातव्या ॥

---

१. 'ज्ञा स्यात् क' क. ख. पाठः.

एकैकभागवृद्ध्या नवहस्तान्ते तु लिङ्गे तु ।
अष्टयवान्तरगाढा सा रेखा सम्यगुद्दिष्टा ॥

अर्धयवेनाप्युदिता रेखार्धयवेन पूर्ववद् वृद्धिः ।
सार्धचतुर्यवतारावनतिः श्रेष्ठे तु लिङ्गे स्यात् ॥

मध्यमसूत्रव्यासादर्धततिः पक्षयोस्तु पृथक् ।
सर्वासां रेखाणां व्यासावनती समे स्याताम् ॥”

इति ।

सामान्यं नागरादीनां सूत्रलक्षणमुच्यते ।
शिवायामे तु धृत्यंशे वेदांशानुपरि त्यजेत् ॥ ४१ ॥

एकादशांशैर्नालं स्यान्मुकुलं त्वेकभागतः ।
अधो द्व्यंशं तथा पृष्ठे भागाभ्यां तु युतिर्भवेत् ॥ ४२ ॥

अथवा षोडशांशोच्चे प्राग्वदूर्ध्वमधस्तथा ।
साग्रं नालं दशांशैः स्यादष्टांशैः पार्श्वयोर्युतिः ॥ ४३ ॥

पञ्चषट्सप्तभागे तु प्राग्वत् पृष्ठे युतिर्भवेत् ।
अविच्छिन्नमतिस्निग्धमजर्झरमनाकुलम् ॥ ४४ ॥

लक्षणोद्धारणं कुर्याद् विपरीतं विवर्जयेत् ।
सूत्रेण भस्मना पूर्वमास्फाल्य मुकुलं ततः ॥ ४५ ॥

विलिख्य घटिकाग्रेण पार्श्वे सूत्रे लिखेत् ततः ।

अथ सूत्राग्रलक्षणमुच्यते —

छत्राभमस्तके लिङ्गे सूत्राग्रं स्याद् गजाक्षवत् ॥ ४६ ॥

खण्डेन्दुमस्तके लिङ्गे सूत्राग्रं बुद्बुदोपमम् ।
लिङ्गाग्रे त्रपुषाभे तु सूत्राग्रं कुक्कुटाण्डवत् ॥ ४७ ॥

कुक्कुटाण्डशिरोलिङ्गे सूत्राग्रं छत्रसन्निभम् ।
सामान्येन तु लिङ्गानां सूत्राग्रमथ कथ्यते ॥ ४८ ॥

कदलीमुकुलाभं वा सरोजमुकुलाकृति ।
अश्वत्थपत्रसदृशं सामान्यं हि यवोपमम् ॥ ४९ ॥

अत्यष्टचंशे लिङ्गनाहे भागं त्रेधा विभज्य तु ।
मध्यसूत्रततिर्घ्यंशस्तदर्धं पक्षसूत्रयोः ॥ ५० ॥

लक्षणोद्धाराधिकारः ।

गृहीतोत्सेधमानं तु मान्ङ्गुलविभाजिते ।
वृद्धावङ्गुलिविच्छेदं परिहृत्याङ्गुलिं पुनः ॥ ५१ ॥
वर्धयित्वा तु वसुभिर्हरेन्नक्षत्रसंख्यया ।
अश्विन्यादीनि भानि स्युः शिष्टान्यत्र यथाक्रमम् ॥ ५२ ॥
तस्मिंश्चतुर्गुणे नन्दैर्हृत्वांशास्तस्करादिकाः ।
तस्करो भोजनं शक्तिर्धनं राजा नपुंसकम् ॥ ५३ ॥
विपद् विषं समृद्धिश्चाप्यंशकाः स्युर्नव क्रमात् ।
तस्करश्च विपत् षण्ढो विपन्निन्द्याः परे शुभाः ॥ ५४ ॥
लिङ्गोच्चे वसुनन्दाग्निगणेऽर्काशाष्टभिर्हरेत् ।
शिष्टं धनमृणं चैव योनिश्च स्याद् यथाक्रमम् ॥ ५५ ॥
धनाधिकं च क्षीणार्णं कर्तृभर्तृहितावहम् ।
ध्वजसिंहवृषेभाश्चेच्छुभाश्चान्ये ह्यशोभनाः ॥ ५६ ॥
शिवतुङ्गे नवगुणे वाराः स्युर्मुनिभिर्हृते ।
सूर्याद्यास्तेषु शुभदाः शुभाः क्रूरास्त्वशोभनाः ॥ ५७ ॥
ग्रामादीनां तथा कर्तुर्नक्षत्रेणाविरोधि यत् ।
लिङ्गं राज्ञश्च देशस्य तदुक्तं सम्पदां पदम् ॥ ५८ ॥
आर्षाणि लिङ्गानि च लक्षणैः स्वैः स्वायम्भुवान्यप्यनुकीर्तितानि ।
पूर्वोदितानामिह मानुषाणां तल्लक्षणोद्धारविधिश्च गीतः ॥ ५९ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
आर्षादिलिङ्गलक्षणपटलोऽष्टात्रिंशः ।

अथ एकोनचत्वारिंशः पटलः ।

अथ पीठानि वक्ष्यन्ते लक्षणैः स्वैः पृथग्विधैः ।
यैः संयोगं तु लिङ्गानां प्रतिष्ठेति विदुर्बुधाः ॥ १ ॥
एकयैव तु जात्या स्यात् पीठं लिङ्गं च नान्यथा ।
शैवे च दारवे लिङ्गे स्वजातिश्चेन्न लभ्यते ॥ २ ॥

इष्टकाभिः सुधाबन्धः पीठं वा स्यात् सलक्षणम् ।
षण्ढेन स्यात् पादशिला स्त्रीशिला पिण्डिका भवेत् ॥ ३ ॥

लिङ्गं पुंशिलया कुर्यादिति शास्त्रस्य निश्चयः ।
पूजांशद्विगुणं हीनं श्रेष्ठं लिङ्गोन्नतेः समम् ॥ ४ ॥

नवैते पीठविस्तारास्तयोर्मध्येऽष्टभागिके ।
विस्तारार्धोन्नतं नीचं श्रेष्ठं द्वित्र्यंशकं ततः ॥ ५ ॥

विष्कम्भं त्रिगुणं वाथ नाहतुल्यविशालकम् ।
गर्भव्यासात् त्रिभागैकं चतुर्थांशमथापि वा ॥ ६ ॥

विष्कम्भकर्णद्विगुणं त्रिगुणं वापि विस्तृतम् ।
पीठं कुर्यात् तु विष्ण्वंशसमानोच्चं हि सर्वथा ॥ ७ ॥

मण्डनाय स्वविस्तारादष्टांशमधिकं ततः ।
सर्वेषामपि पीठानां जन्मान्तं मूलविस्तृतिः ॥ ८ ॥

पीठाग्रस्यापि विस्तारः स्यान्महापट्टिकान्तकम् ।

सामान्यपीठविधिः ।

नागरादित्रयाणां तु पीठलक्षणमुच्यते ॥ ९ ॥

त्रिखण्डलिङ्गायामेन तुल्यव्यासमिहोत्तमम् ।
पीठं स्याद् द्व्यंशतो नीचं तयोर्मध्येऽष्टभागिके ॥ १० ॥

पीठव्यासा नवैव स्युस्तद्व्यासे रामभागिके ।
पीठं श्रेष्ठं द्विभागोच्चं नीचं व्यासार्धमुन्नतम् ॥ ११ ॥

तयोर्मध्येऽष्टभागे तु पीठोत्सेधा नवैव हि ।
द्राविडेऽपि त्रिखण्डेन तुल्यव्यासमिहोत्तमम् ॥ १२ ॥

लिङ्गायामे नवांशे तु सप्तांशैर्नीचविस्तृतिः ।
तयोर्मध्येऽष्टभागे तु पीठव्यासा नव स्मृताः ॥ १३ ॥

अष्टांशे ब्रह्मविष्ण्वंशे त्रिद्व्येकांशमधस्त्यजेत् ।
शेषांशोच्चं तु नीचादि पीठोच्चो द्राविडे मतः ॥ १४ ॥

अथ वेसरलिङ्गस्य द्व्यष्टांशे परिणाहके ।
मुख्यं हि तत्समं व्यासं जगत्यंशैस्तथाधमम् ॥ १५ ॥

विष्णुतुल्योच्छ्रितं तत् स्याच्चतुर्थांशाधिकं तु वा ।
सर्वेषामपि लिङ्गानां पीठोच्चादवशेषितम् ॥ १६ ॥

ब्राह्मं लिङ्गस्य मूलं यत् तत् स्यात् पादशिलागतम् ।
पीठमूलस्य विस्ताराद् वसुनन्ददिगंशकैः ॥ १७ ॥

हीनपीठाग्रविस्तारो हीनमध्ये तथोत्तमे ।

नागरादित्रयपीठम् ।

अथ पीठसंस्थानानि कथ्यन्ते —

चतुरश्राणि वस्वश्रवृत्तानीति त्रिभेदतः ॥ १८ ॥

पीठानि स्युः क्रमात् तेषां प्रथमं मेरुसुन्दरम् ।
वर्धमानं द्वितीयं स्याल्लक्ष्मीसुन्दरमप्यथ ॥ १९ ॥

विष्णुसम्मिलनाख्यं च पद्मभद्राह्वयं ततः ।
पीठं समाङ्गभद्राख्यं रुद्रकान्तं ततः परम् ॥ २० ॥

सोमकान्तं च सर्वाङ्गभद्राख्यं श्रीकरं तथा ।
पुष्टिवर्धनसंज्ञं च सर्वसौम्यं ततः परम् ॥ २१ ॥

एवं द्वादशभेदानां पीठानां लक्ष्म कथ्यते ।
पीठं निष्कललिङ्गानां विज्ञेयं सर्वतः समम् ॥ २२ ॥

आयतं प्रतिमानां स्यात् सकले वार्धचन्द्रकम् ।
चतुर्दशांशे पीठोच्चे भागात् स्यान्मूलपट्टिका ॥ २३ ॥

पद्मं त्रिभिर्धृगर्धांशमर्धेनाब्जं ततो भवेत् ।
वृत्तं द्व्यंशं पुनः पद्ममर्धमर्धेन कम्पकम् ॥ २४ ॥

सार्धद्व्यंशेन कण्ठः स्यादर्धेनोर्ध्वाम्बुजं स्मृतम् ।
अर्धेन कम्पो द्व्यंशात् स्यात् क्रमेणैवोर्ध्वपट्टिका ॥ २५ ॥

कम्पाज्यधारिण्यर्धेन स्यादेवं मेरुसुन्दरम् ।
अष्टादशांशे पीठोच्चे जन्मद्व्यंशमिहोदितम् ॥ २६ ॥

चतुर्भिर्जगतीं कुर्यात् कुमुदं त्रिभिरेकतः ।
कम्पं कण्ठं त्रिभिस्तद्वत् कम्पमेकेन पङ्क्तिकाम् ॥ २७ ॥
त्रिभिरंशैस्तथांशेन वाजनं वर्धमानके ।
सङ्कृत्यंशे तु पीठोच्चे जन्मसार्धांशतो भवेत् ॥ २८ ॥
अंशेन पद्ममर्धेन कम्पं वप्रं च पञ्चभिः ।
दलमेकेन धृत्यंशादेकेनाब्जं तु कारयेत् ॥ २९ ॥
वृत्तं चतुर्भिस्त्वंशेन पद्ममर्धेन कम्पकम् ।
त्रिभिः कण्ठं तथांशेन वाजनं त्वथ भागतः ॥ ३० ॥
निद्रां तु पट्टिकां द्व्यंशादर्धात् पद्माज्यभृद् भवेत् ।
लक्ष्मीसुन्दरसंज्ञं तु पीठमेवं प्रसिध्यति ॥ ३१ ॥
पीठोच्चे षोडशांशेऽश्विभूतदस्रश्रुतिद्वयैः ।
एकेन च जगत्यब्जवेत्रपङ्कजपट्टिका ॥ ३२ ॥
तथाज्यधारिणीं कुर्याद् विष्णुसंमीलने क्रमात् ।
अष्टादशांशे पीठोच्चे भवेत् सार्धांशतः खुरम् ॥ ३३ ॥
सार्धत्रयेण जगती सार्धेनाब्जं धृगर्धतः ।
पट्टं चार्धेनोपपट्टं कण्ठस्त्र्यंशस्तदूर्ध्वतः ॥ ३४ ॥
उपपट्टं भवेदर्धं पट्टमर्धेन चोपरि ।
द्व्यंशं वाजनमुद्दिष्टमर्धं पट्टाज्यभृद् भवेत् ॥ ३५ ॥
पद्मभद्रमिदं पीठं विज्ञेयमतिशोभनम् ।
धृत्यंशे पीठतुङ्गे तु घृतवार्यर्धतः स्मृताः ॥ ३६ ॥
अर्धेन कम्पः सार्धाभ्यां भागाभ्यां वाजनं भवेत् ।
पट्टोपपट्टावर्धाभ्यां कण्ठोंऽशौ पट्टमर्धतः ॥ ३७ ॥
उपपट्टोऽर्धमष्टाश्रः कुम्भः स्याच्चतुरंशतः ।
पञ्चांशा जगती तद्वत् सार्धांशेन खुरं भवेत् ॥ ३८ ॥
एतत् समाङ्गभद्राख्यं पीठं भवति शोभनम् ।
अत्यष्ट्यंशे तु पीठोच्चे खुरं भागेन वप्रकम् ॥ ३९ ॥

चतुर्भिश्च दलं सार्धादर्धं कम्पो धृगंशकम् ।
कम्पोऽर्धमर्धेनाम्भोजं वृत्तं द्वावर्धतो दलम् ॥ ४० ॥

पट्टमर्धेन कण्ठोंऽशः कम्पोऽर्धेनार्धमम्बुजम् ।
द्व्यंशं वाजनमर्धेन पद्मं क्षेपणमर्धतः ॥ ४१ ॥

एतद्धि रुद्रकान्ताख्यं पीठमुक्तं सुशोभनम् ।
अतिधृत्यंशपीठोच्चे भागो भूगतमंशकौ ॥ (?)४२ ॥

वप्रं महाब्जं वेदांशैर्धृगर्धं वेत्रमंशतः ।
अर्धं गलं चार्धमब्जं वृत्तमत्यर्धतो भवेत् ॥ ४३ ॥

अर्धेनोर्ध्वदलं कुर्याद् वेत्रमंशो धृगर्धतः ।
अंशेन वेत्रं सार्धांशैस्त्रिभिरूर्ध्वाम्बुजं भवेत् ॥ ४४ ॥

अध्यर्धं घृतभृच्चेति सोमकान्तमुदीरितम् ।

नागरादित्रयस्यापि तुल्यमेतत् ।

पीठोच्चे षोडशांशे तु भागाभ्यां मूलपट्टिका ॥ ४५ ॥
महापद्मं तु वेदांशैर्धृगर्धेनांशतो गलम् ।
अर्धेन पद्मं वृत्तं तु भागेनार्धेन पङ्कजम् ॥ ४६ ॥
धृगर्धमूर्ध्वपद्मं तु चतुर्भिरथ पट्टिका ।
द्व्यंशेन घृतभृत् प्रोक्तमेतत् सर्वाङ्गभद्रकम् ॥ ४७ ॥

सर्वलिङ्गेषु समानमिदम् ।

पीठोच्चे षोडशांशेऽश्विशरार्धैकार्धसागरैः ।
नेत्रेन्दुभिर्जगत्यब्जधृग्वेत्रं धृक् च पङ्कजम् ॥ ४८ ॥

पट्टिका चाज्यभृच्चेति श्रीकरे स्याद् यथाक्रमम् ।
एकस्मिन्नेव सार्धांशाज्जगत्यर्धेन कम्पकम् ॥ ४९ ॥

पट्टिकाधः स्ववेदांशात् सकम्पा पुष्टिवर्धने ।
पीठादये षोडशांशे खुरं द्व्यंशमथार्धतः ॥ ५० ॥

क्षेपणं सार्धवेदांशैः पद्ममर्धेन कम्पकम् ।
धृगर्धं वज्रमेकं स्यादूर्ध्वाब्जं वेदभागतः ॥ ५१ ॥

अर्धं क्षेपणमंशौ द्वौ पट्टिकार्धेन चाज्यभृत् ।
सामान्यं नागरादीनां सौम्यं पीठमुदीरितम् ॥ ५२ ॥

द्वादशपीठानि ।

"सर्वेषामेव पीठानामङ्गप्रवेशानिर्गमबहुलतुल्यं त्रिपादमर्धं वा शोभाबलवशादेव युञ्जीते"ति पराशरः ।

पीठव्यासात् त्रिवेदांशं नालमूलस्य विस्तृतिः ।
आयामस्तत्समस्तस्मात् त्रिचतुर्भागहापनात् ॥ ५३ ॥
कुर्यान्नालाग्रविस्तारमुन्नताग्रमनातुरम् ।
नालव्यासस्य रामांशात् खातं व्याससमोन्नतिः ॥ ५४ ॥
पीठमन्ये तु कौबेर्यां नालमित्थं प्रयोजयेत् ।
स्यादूर्ध्वपट्टबहुलं समं पादाधिकं तु वा ॥ ५५ ॥
अध्यर्धं वाज्यभृद्व्यासो मूलखातं च तत्समम् ।
आलिङ्गच मूलपर्यन्तं तत्क्रमेणोन्नतं भवेत् ॥ ५६ ॥
पीठोपलं त्वैकभागेऽप्येकमेवोर्ध्वमण्डनम् ।
अधोमण्डनमेकं वा स्यान्नैकं चोपपत्तितः ॥ ५७ ॥
तत्र मध्यं विना कोणं सन्धयेत् सुन्दरं यथा ।
उपर्यङ्गावसानं तदूर्ध्वसन्तानमाचरेत् ॥ ५८ ॥
चतुर्दश प्रकाराणि पीठानत्यिब्रवीन्मयः ।
वेदर्तुवसुसूर्याश्रैः षोडशाश्रं च वर्तुलम् ॥ ५९ ॥
एतेषां चायतैः षड्भिस्त्र्यश्रं चार्धेन्दुसन्निभम् ।

एतच्चतुर्दश । अपिच मयः —

"भद्रपीठं च पद्मं च वज्रपीठं महाम्बुजम् ।
श्रीकरं पीठपद्मं च महावज्रं च सौम्यकम् ॥
श्रीकाम्यं चेति नवधा पीठानि प्रभवन्ति हि ॥"

तद्यथा —

पीठोत्सेधे त्रिपञ्चांशे जन्मद्व्यंशं युगांशकैः ॥ ६० ॥
वप्रं पद्मं तु सार्धेन धृगर्धं द्व्यंशतो घटः ।
अर्धं क्षेपणमध्यर्धं कण्ठोऽर्धं क्षेपणं पुनः ॥ ६१ ॥

द्व्यंशं पट्टं तु घृतभृदर्धं स्याद् भद्रपीठके ।

सर्वलिङ्गसामान्यमेतत् ।

द्व्यष्टांशपीठोन्नतिदस्रबाणद्विवेददस्रेन्दुभिरेव पट्टम् ।
अब्जं च वृत्तं सुदलं च पट्टमाधारभृत् स्यादिति पद्मपीठम् ॥ ६२ ॥

पीठतुङ्गे तु मन्वंशे सार्धं जन्मार्धतोऽवटम् ॥ ६३ ॥
सार्धत्रिभागं पद्मं स्यादर्धाभ्यां पट्टनिम्नके ।
भागो वज्रं निम्नमर्धं कम्पोऽर्धं त्रिभिरम्बुजम् ॥ ६४ ॥
निम्नमर्धं ततोऽध्यर्धात् पट्टिकार्धेन चाज्यभृत् ।
वज्रपद्माह्वयं पीठं सर्वलिङ्गसमं भवेत् ॥ ६५ ॥
धृत्यंशे पीठतुङ्गे तु द्व्यर्धं जन्माथ पङ्कजम् ।
चतुर्भिः पट्टमर्धं स्यादर्धं निम्नं तु सार्धतः ॥ ६६ ॥
पद्मं द्व्यर्धेन वृत्तं स्यादर्धार्धेऽब्जं च निम्नकम् ।
त्रिभिरूर्ध्वाम्बुजं पट्टमर्धमध्यर्धमम्बुजम् ॥ ६७ ॥
श्रीपट्टस्नेहभृच्चार्धं महापद्माह्वयं भवेत् ।

मानुषार्षलिङ्गानां समानमेतत् ।

पीठोत्सेधे षोडशांशे चन्द्राग्निश्रुतिसंख्यया ॥ ६८ ॥
जन्मवप्रं च पद्मं च धृगर्धं द्व्यंशवर्तुलम् ।
अर्धं धृक् पङ्कजं त्र्यंशं पट्टिका सार्धभागिका ॥ ६९ ॥
धृतवार्यर्धतः खातं तावत् त्र्यंशं तु नालकम् ।
तद्व्यासनिर्गमौ त्र्यंशौ तथाग्रं श्रीकरं स्मृतम् ॥ ७० ॥

पङ्क्त्यंशोच्चे सार्धमर्धद्वयार्धं त्रीण्यर्धानि द्व्यर्धके स्यात् खुरं च ।
निम्नं पद्मं पट्टनिम्ने च पट्टमब्जं निम्नं पट्टनिम्नेऽब्जपीठे ॥ ७१ ॥

त्रिपञ्चांशे तु पीठोच्चे दध्यर्धाभ्यर्धकेन्दुभिः ।
अध्यर्धेन्द्वर्धसार्धत्रिभागैरध्यर्धकार्धकैः ॥ ७२ ॥
जन्मनिम्नाब्जपट्टानि धृग्वज्रं धृगतः परम् ।
क्षेपणाम्भोजपट्टानि निम्नं चेति यथाक्रमम् ॥ ७३ ॥
महावज्रं तु पीठं तद् वृत्तवज्रेण सौम्यकम् ।
पीठोत्सेधे तु सूर्यांशे चन्द्रनेत्रार्धभागतः ॥ ७४ ॥

सार्धार्धार्धैश्च सार्धेन तथार्धार्धार्धकार्धकैः ।
अध्यर्धेन तथार्धेन जन्मपद्मकनिम्नकम् ॥ ७५ ॥

अब्जं धृक् च दलं वृत्तं पद्मं धृक् कमलं ततः ।
पट्टिकानिम्नकं पट्टं श्रीकाम्ये तु क्रमाद् भवेत् ॥ ७६ ॥

अत्र

“धाम्नि प्रोक्तान्यप्यधिष्ठानकानि तान्यप्यस्मिन् मण्डनीयानि युक्त्या ।”
इति मयः ।

यथाबलं यथाशोभं यथायुक्ति प्रवेशनम् ।
निर्गमं चापि पीठानामङ्गानां परिकल्पयेत् ॥ ७७ ॥
पीठव्यास(स्य) त्र्यंशैकं वेदांशैकमथापि वा ।
स्यान्निर्गमः प्रणालस्य मूलव्यासं च तत्समम् ॥ ७८ ॥
मूलादर्धं त्रिभागं वा प्रणालाग्रविशालता ।
गजौष्ठाकारमथवा गोमुखाभं च तद् भवेत् ॥ ७९ ॥
मूलाग्रविपुलं त्र्यंशव्यासं तत्खातनिम्नकम् ।
इष्टदिङ्मुखलिङ्गानां प्रणालं पीठमध्यतः ॥ ८७ ॥
वामभागे तु तत् कुर्यात् साधारं वा यथारुचि ।
अग्रपट्टस्य विस्तारं सोच्चतुल्यं प्रकल्पयेत् ॥ ८१ ॥
सपादं वाथवा सार्धं सत्रिपादमथापि वा ।
यथाबलं तत् पट्टस्य समं खातं तु मूलतः ॥ ८२ ॥
क्रमेणोन्नतिमल्लिङ्गसङ्गमात् तत् प्रकल्पयेत् ।
ज्यामुखं त्वर्धचन्द्राख्ये पीठे स्याद् द्वारसम्मुखम् ॥ ८३ ॥
न द्वारसम्मुखं कोणं कुर्यात् पीठे त्रिकोणके ।
द्वारसूत्रस्य पीठाश्रं वेधसं न प्रशस्यते ॥ ८४ ॥
शिवभागं त्वधः पीठात् किञ्चिदप्यवलम्बितम् ।
उन्नतोऽपि च दोषाय स्यात् तत् परिहरेत् ततः ॥ ८५ ॥
निस्सन्धिकं भवेत् पीठं प्रशस्तं शिलयैकया ।
तदलाभेऽप्येकयैव प्रकुर्यादूर्ध्वमण्डनम् ॥ ८६ ॥

उपर्युपरि पीठानां सन्धिरङ्गावसानके ।
नालमध्ये तथा मध्ये कर्णे सन्धिर्न शस्यते ॥ ८६ ॥
युञ्जीयाद् दक्षिणे वामे दीर्घादीर्घं यथाक्रमम् ।
त्रिखण्डं नैकखण्डं वा युक्त्या कुर्यादधोगतम् ॥ ८७ ॥
लिङ्गायामसमव्यासा श्रेष्ठा ब्रह्मशिला स्मृता ।
पूजांशद्विगुणा नीचा तयोर्मध्येऽष्टभागिके ॥ ८८ ॥
प्राग्वन्नवप्रकाराः स्युः क्रमाद् ब्रह्मशिलाः शुभाः ।
स्वव्यासार्धोन्नता मुख्या नीचा वेदांशतो घनाः ॥ ८९ ॥
तयोर्मध्येऽष्टधा भक्ते घनाद् ब्रह्मशिला नव ।
अथवा लिङ्गविष्कम्भाच्छ्रेष्ठा स्याद् द्विगुणा घनात् ॥ ९० ॥
विस्ताराध्यर्धतो नीचा भवेद् ब्रह्मशिला क्वचित् ।
खातं ब्रह्मशिलामध्ये ब्रह्मभागोपमं भवेत् ॥ ९१ ॥
प्रविशेद् ब्रह्मभागस्तु नीरन्ध्रं च यथा भवेत् ।
रत्नन्यासान्वितं श्लिष्टं लिङ्गमूलेन तद् भवेत् ॥ ९२ ॥
नन्द्यावर्तसमाकाराश्चतस्रस्तु शिलाः क्रमात् ।
पीठब्रह्मात्मनोर्मध्ये प्रादक्षिण्येन योजयेत् ॥ ९३ ॥
स्थानासनविभागेन प्रतिमानां परेपरे ।
एकद्वित्रिचतुःपञ्चषण्मात्रं वाधिकं ततः ॥ ९४ ॥
आसनानां स्वविस्तारादष्टभागाधिकायतिः ।
द्विगुणान्तं निजायामा मण्डनं पिण्डिकास्विव ॥ ९५ ॥
रामवेदेषुभागोच्चे वैरदैर्घ्ये क्रमेण तु ।
विष्टरस्योदयः प्रोक्तः शयने वासने स्थिते ॥ ९६ ॥
यथोचितं तथा दैर्घ्यं व्यासश्च शयने स्मृतः ।
ब्रह्मविष्णुशिवानां च (शौ ? गौ)र्यादीनां तथासनम् ॥ ९७ ॥
सोपपीठं गुहाङ्घ्रिस्थसिंहासिंहासनं स्मृतम् ।
दैवार्षकाणां बाणानां लिङ्गानां च स्वयम्भुवाम् ॥ ९८ ॥

प्रासादरूपं पीठं वा यथेष्टं कारयेद् बुधः ।

अथ नागरादित्रयाणां पादशिलालक्षणमुच्यते—

द्विगुणं लिङ्गविस्ताराद् विस्तृतं वेदभागतः ॥ ९९ ॥
तुङ्गं व्यासत्रिपादांशाद् भवेल्लिङ्गे तु नागरे ।
गर्भकर्णचतुर्थांशव्यासा श्रेष्ठायतस्य तु ॥ १०० ॥
व्यासार्धार्धविहीना स्यान्नीचा मध्येऽष्टधा तयोः ।
भक्ते तु नवधा ब्रह्मशिलाः स्युर्द्राविडे शिवे ॥ १०१ ॥
व्यासार्धं तत्रिपादोनं तयोर्मध्येऽष्टभाजिते ।
तुङ्गं ब्रह्मशिलायाः स्यान्नवधा द्राविडाह्वये ॥ १०२ ॥
अथ गर्भगृहार्धेन त्रिचतुर्भागविस्तृता ।
व्यासार्धवेदभागोच्चा प्राग्वन्मध्येऽष्टभाजिते ॥ १०३ ॥
नव ब्रह्मशिलाः प्रोक्ता लिङ्गब्रह्मांशतोऽवटम् ।
द्वियवाधिकविस्तारं विस्ताराष्टांशतः स्मृतम् ॥ १०४ ॥
मूलेऽवटाभं रत्नाढ्यं वैसरव्यापि तद् भवेत् ।
इत्थमसौ पीठविधिर्नैकविधो लक्षणतः ।
प्रोक्त इहालङ्करणैस्त्वाष्ट्रविदां प्रीतिकरः ॥ १०५ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
पीठविधिलक्षणपटल एकोनचत्वारिंशः ।

अथ चत्वारिंशः पटलः ।

अथोक्ताव्यक्तालिङ्गे[1] तु शिवांशे दशभागिके ।
अश्विनेत्राग्निभागैः स्यात् स्कन्धः कण्ठस्तथाननम् ॥ १ ॥
उष्णीषोंऽशस्तु मकुटं द्व्यंशमूर्ध्वं तु भागतः ।
भागेन मुखविष्कम्भो विस्तृतश्चोर्ध्वलिङ्गवत् ॥ २ ॥
ललाटकर्णभ्रूनेत्रघ्राणगन्धमुखादिकम् ।
मानोन्मानप्रमाणेन सर्वं सकलवत् स्मृतम् ॥ ३ ॥

---

[1] 'व्य' क. पाठः.

आर्षवद् ब्रह्मविष्णवंशौ वेदाश्चावेव मिश्रके ।
पुरुषादिमुखानां तु लक्षणं त्वथ कथ्यते ॥ ४ ॥

कुङ्कुमाभं विशालाक्षं त्रिणेत्रं नक्रकुण्डलम् ।
चन्द्राङ्कितजटाजूटं प्राचि तत्पुरुषाननम् ॥ ५ ॥
भिन्नाञ्जननिभं सिंहत्रिणेत्रं सिंहनासिकम् ।
दंष्ट्राकरालं दष्टोष्ठं संलिहद्रसनोज्ज्वलम् ॥ ६ ॥
पिङ्गश्मश्रुजटाजूटं सर्पप्रोतशिरस्स्रजा ।
सेन्दुखण्डमरालभ्रूः स्यादघोरं तु दक्षिणे ॥ ७ ॥

बन्धुजीवारुणं रम्यं स्त्रीविलासविभूषितम् ।
ललितभ्रूयुगं चारुतिलकं मणिकुण्डलम् ॥ ८ ॥
धम्मिल्लाबद्धमकुटं नीलालकविभूषितम् ।
उत्तरे वामदेवाख्यं मुखं कुर्यान्मनोरमम् ॥ ९ ॥

पूर्णेन्दुकुन्दधवलं प्रसन्नं रत्नकुण्डलम् ।
चन्द्राङ्कितजटाजूटं सद्योजातं तु पश्चिमे ॥ १० ॥

एकास्यं वा त्रिवक्त्रं स्यादेकद्वारे शिवालये ।
द्वाराभिमुखमेवास्यं त्रिमुखं चेत् तु पार्श्वयोः ॥ ११ ॥
न कुर्याद् द्विमुखं लिङ्गं तच्छस्तमभिचारके ।
चतुर्द्वारे तु भवने कुर्याल्लिङ्गं चतुर्मुखम् ॥ १२ ॥
पञ्चवक्त्रं द्विवक्त्रं वा लिङ्गं राष्ट्रान्तरे गिरौ ।
स्थापयेच्छत्रुनाशाय विजयाय च भूपतिः ॥ १३ ॥

अत्र पराशरः —

“अथैकत्र चतुर्वक्त्रं ग्रामादिष्वेव विन्यसेत् ।
द्विवक्त्रं पर्वतेऽरण्ये परराष्ट्रान्तिकेऽपि च ॥
स्थापयेत् तदरिध्वंसं विदधाति स्वरक्षणम् ॥”

इति ।

तथा योगशिवपद्धतौ च —

"बाणकोणगुणाऽव्येकमुखलिङ्गानि तु क्रमात् ।
चतुस्त्र्येकाननं भूत्यै पञ्चास्यं चाभिचारिके ॥
द्विमुखं चारिनाशाय स्थाप्यं शैलवनादिषु ।
सितोत्तानं त्रिणेत्रं च मौलिकुण्डलमण्डितम् ॥
ईशानं लिङ्गमूर्ध्नि स्यादूर्ध्वाभिमुखमेव तत् ॥"

इति ।

अव्यक्तस्यैव लिङ्गस्य कुर्यात् पीठादिकं समम् ।
मृद्वृक्षाश्ममयं लिङ्गं सर्वसिद्धिप्रदं सदा ॥ १४ ॥
मृन्मये हेमरत्नादि मध्ये संस्थाप्य कारयेत् ।
सर्वेषां मुखलिङ्गानां निर्गमः स्यात् पृथक् पृथक् ॥ १५ ॥
प्रविष्टा कन्धरा कार्या विष्णुभागोपरिस्थिता ।
हस्तादिपञ्चहस्तान्तं मुखलिङ्गं प्रकल्पयेत् ॥ १६ ॥
अतः परं न कुर्वीत मिश्रलिङ्गं शुभेच्छया ।

मुखलिङ्गविधिः

अथ स्फाटिकलिङ्गमुच्यते—

एकाङ्गुलं समारभ्य क्रमाङ्गुलविवर्धनात् ॥ १७ ॥
षडङ्गुलान्तं स्फटिकलिङ्गषट्कमिहाधमम् ।
सप्ताङ्गुलादिकं लिङ्गं मध्यमा द्वादशाङ्गुलात् ॥ १८ ॥

लिङ्गषट्कमिति यावत् ।

त्रयोदशाङ्गुलादीनि लिङ्गान्याष्टादशाङ्गुलात् ।
उत्तमानि भवन्त्येषु मानं मात्राङ्गुलेन हि ॥ १९ ॥

अत्र मयः —

"तद्धीनादर्धमात्रेण वृद्ध्यैकादशसंख्यया ।
श्रेष्ठे मध्येऽवरे लिङ्गे त्रयस्त्रिंशत् समुन्नतम् ॥
पूजांशार्धं त्रिभागैकं गाढं वा स्फाटिकं मतम् ।
समं त्रिपादमर्धं वा पूजांशोन्नस्य विस्तृतिः ॥

सधारं वाथ वृत्तं वा लिङ्गं स्यात् स्फाटिकं शुभम् ।
शिरोवर्तनकं प्राग्वद् ब्रह्मसूत्रं न वा भवेत् ॥
ब्रह्मसूत्रं विनाप्येतत् तेजोढ्यं वरप्रदम् ।"

इति ।

स्वव्यासद्विगुणं सार्धद्विगुणं त्रिगुणं ततः ।
नीचं मध्यं च मुख्यं च पीठ[1]नालं हि पूर्ववत् ॥ २० ॥
पूजांशोच्चसमं वार्धं त्रिपादं पैण्डिकोच्छ्रयः ।
मण्डनं निष्कलोक्तं हि पीठेषु स्फाटिकेष्वपि ॥ २१ ॥
स्फाटिकैकशिलापीठलिङ्गं श्रेष्ठं स्वयोनिकम् ।
स्फटिकान्यशिलापीठं लिङ्गं मध्यं स्वयोनिकम् ॥ २२ ॥
स्वयोन्यभावे हैमं स्याद् राजतं ताम्रजं तु वा ।
पीठं कनिष्ठं तत्रापि हैमाद्यं तूत्तमादिकम् ॥ २३ ॥
रत्नानां स्फटिकादीनां दोषान् परिहरेद् बुधः ।
सर्वनाशकरं यस्मात् सदोषं तं न पूजयेत् ॥ २४ ॥
द्वादशैव स्मृता दोषाः स्फटिकादिषु तद् यथा ।
रेखा बिन्दुः कलङ्कश्च त्रासः काकपदं क्षतम् ॥ २५ ॥
खद्योतो मक्षिकाच्छायभेदः सन्धिस्तुषाकरः ।
निम्नमस्तकता चेति रत्नदोषास्तु वर्जिताः ॥ २६ ॥
पद्मरागादिरत्नानां दोषान् परिहरेदिमान् ।
पद्मरागादिलिङ्गानां पीठं श्रेष्ठं स्वयोनिकम् ॥ २७ ॥
तदभावे हिरण्यादिपीठं स्यादुत्तमादिकम् ।
एकाङ्गुलादिद्वियववर्धनेना षडङ्गुलात् ॥ २८ ॥
मध्यानि नव लिङ्गानि रत्नजानीह कल्पयेत् ।
सप्ताङ्गुलादिद्वियववर्धनेना नवाङ्गुलात् ॥ २९ ॥
श्रेष्ठानि नव लिङ्गानि रत्नजानि भवन्ति हि ।
कनिष्ठमध्यलिङ्गानि रत्नानि स्फाटिकान्यपि ॥ ३० ॥

---

[1] 'ठं' ख. पाठः.

चलानि गेहे पूज्यानि स्थिराण्येवोत्तमानि हि ।
तान्यालये प्रतिष्ठाप्य स्थिरलिङ्गानि पूजयेत् ॥ ३१ ॥

रत्नलिङ्गाधिकारः ।

रामाङ्गुलादितो लोहं लिङ्गमा षोडशाङ्गुलात् ।
चललिङ्गं स्मृतं तस्मात् स्थिराण्यूर्ध्वं भवन्ति हि ॥ ३२ ॥
अष्टाङ्गुलं समारभ्य चाष्टाङ्गुलविवर्धनात् ।
लौहानि नव लिङ्गानि त्रिहस्तान्तानि कल्पयेत् ॥ ३३ ॥
तथाष्टाङ्गुलमारभ्य द्विद्व्यङ्गुलविवर्धनात् ।
त्रिहस्तान्तानि लिङ्गानि त्रयस्त्रिंशद् भवन्ति हि ॥ ३४ ॥

लौहलिङ्गानि ।

षोडशाङ्गुलमारभ्य दारुलिङ्गान्यनुक्रमात् ।
षोडशाङ्गुलवृद्ध्या स्युः षड्ढस्तान्तानि वै नव ॥ ३५ ॥
षोडशाङ्गुलमारभ्य चतुरङ्गुलवर्धनात् ।
दारवाणि त्रयस्त्रिंशल्लिङ्गान्या रसहस्ततः ॥ ३६ ॥
यस्य यस्मिन् भवेदास्था विभूतिर्यस्य यादृशी ।
लिङ्गं तदनुसारेण सततं तत् समाश्रयेत् ॥ ३७ ॥
इति मिश्रलिङ्गमणिलिङ्गवि(धान ? धौ कन)कादिलोहमयलिङ्गविधिः ।
इह दारुलिङ्गविधिरप्युदितः शिवतन्त्रदर्शनविनिश्चयतः ॥ ३८ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे क्रियापादे
मिश्रलिङ्गरत्नलिङ्गविधिपटलश्चत्वारिंशः ॥

अथैकचत्वारिंशः पटलः ।

अथो सकललिङ्गानां लक्ष्म सम्यङ् निगद्यते ।
अचलं तच्चलं चैव चलाचलमिति त्रिधा ॥ १ ॥
सौधं च पार्थिवं शैलं शार्करं च स्थिरं स्मृतम् ।
रत्नजं दारवं लौहं त्रयं चैतच्चलं स्मृतम् ॥ २ ॥

धातुवर्णाद्यमालेख्यं सकलं तच्चलाचलम् ।
सर्वं च चित्रं चित्रार्धं चित्राभासमिति त्रिधा ॥ ३ ॥

सर्वाङ्गदृश्यं यच्चित्रं चित्रार्धं चार्धदर्शनात् ।
लिखितं पटभित्त्यादौ चित्राभासाह्वयं स्मृतम् ॥ ४ ॥

चित्रादीनां तु बेराणां श्रेष्ठमध्याधमं फलम् ।
लिङ्गगर्भगृहद्वारस्तम्भाधिष्ठानकिष्कुभिः ॥ ५ ॥

तालमूलाङ्गुलैश्चाथ मानं मानाङ्गुलैरपि ।
यजमानोच्चतो मानमित्येकादशधा स्मृतम् ॥ ६ ॥

तद् यथा —

पूजांशोच्चं च नाहं विततिमपि पृथग् द्व्यष्टभागं तु कृत्वा
तैरेवांशैस्त्रिभेदैर्गुणशरमुनिभिर्नन्दरुद्रांशकैर्वा ।
न्यूनं चैवाधिकं वा सममपि कथितं लिङ्गतो बेरमानं
भेदैर्गीर्वाणसंख्यैर्नवविधमपि तद् गर्भगेहे नवांशे ॥ ७ ॥

द्वाराधिष्ठानपादानां समं पादाधिकं तु वा ।
पादहीनमथैतेषां द्व्यन्तरे वेदभागिके ॥ ८ ॥

पृथक् कृत्वाऽथ तैरंशैः स्यान्मानं नवधा पृथक् ।
हस्तादिनवहस्तान्तं तन्मानं नवधा स्मृतम् ॥ ९ ॥

तालादि नवतालान्तं तालमानं च कीर्तितम् ।
पूजांशोच्चे चतुर्विंशत्यधिकं शतभागिके ॥ १० ॥

मूलबेराङ्गुलं भागस्तेन बेरोच्छ्रयं नयेत् ।
मूलबेराङ्गुलकृतप्रतिमायास्तदङ्गुलैः ॥ ११ ॥

गणयेद् योनिभागाद्यमन्यथा चेद् विनाशकृत् ।
तिर्यग्यवोदरैः षड्भिः सप्तभिश्चाष्टभिः क्रमात् ॥ १२ ॥

कनिष्ठं मध्यमं श्रेष्ठं स्मृतं मानाङ्गुलं पृथक् ।
शाल्यायतैस्त्रिभिस्तैश्च सार्धैस्तैर्वेदसम्मितैः ॥ १३ ॥

मानाङ्गुलानि चाप्येवं कनिष्ठादीनि कल्पयेत् ।
तद्भर्तुर्दक्षिणकरे मध्यमान्मध्यपर्वणः ॥ १४ ॥

दैर्घ्यान्मात्राङ्गुल श्रेष्ठं नर्चिं तद्व्यासतः स्मृतम् ।
यजमानसमं तस्य नेत्रास्यहनुदोस्ससमम् ॥ १५ ॥

स्तनान्तं हृदयान्तं च तन्मानं सप्तधा स्मृतम् ।
मानुषे निष्कले लिङ्गे पूजाभागे शिरो विना ॥ १६ ॥

यदुच्चं तेन बेराणामुत्सेधात् परिकल्पयेत् ।
स्वायम्भुवे यदा लिङ्गे शिरोमानं न लभ्यते ॥ १७ ॥

तच्छिरोन्तं तदुत्सेधः स्यान्नाहः स्थूलदेशतः ।
व्यासश्च तद्वदार्षादौ शिरोविस्तारवर्जिते ॥ १८ ॥

उत्सेधनाहव्यासाः स्युस्तैस्तैर्बेरोदयं नयेत् ।
अङ्गुलैः प्रतिमामाने क्रमात् सप्ताङ्गुलादितः ॥ १९ ॥

द्विद्व्यङ्गुलविवृद्ध्या स्युः प्रतिमोच्चानि वै पृथक् ।
सचतुर्विंशतिशतं यावत् प्रोक्ताङ्गुलैरिह ॥ २० ॥

गृहार्चास्विह मानं स्यान्मात्राख्यैरेव नान्यथा ।
अङ्गुलैर्यजमानस्य तत्रापि विधिरीरितः ॥ २१ ॥

त्रिविधाङ्गुलमानानां जात्यंशं नातिरोपयेत् ।
बेराणां तेषु योन्याद्यं नयेत् स्वैः स्वैरिहाङ्गुलैः ॥ २२ ॥

लिङ्गादिशिष्टमानेषु जात्यंशारोपणं मतम् ।
माने चतुरशीत्यंशे द्विषष्ट्यंशे समुच्छ्रये ॥ २३ ॥

सङ्कृत्यंशे विकारांशे विप्रादीनां यथाक्रमम् ।
एकांशारोपणादुक्तं जात्यंशारोपणं हि तत् ॥ २४ ॥

उक्तविप्रादिमानेषु (वसुवृषष्ध्येषुभैर्हृते ? वस्वृष्यृत्विषुभिर्हृते) ।
शेषं विप्रादिजातीनामृक्षं विद्याद् यथाक्रमम् ॥ २५ ॥

यजमानर्क्षमारभ्य गण्यमानेषु भेषु वै ।
नवाष्टषट्चतुर्युग्मताराः शस्तास्तु नेतरे ॥ २६ ॥

मानं तु रामवसुनन्दभुजङ्गनन्दै-
वेदैश्च वृद्धमहितारकधातुसूर्यैः ।
दिङ्नन्दकैश्च हृतशिष्टमिह क्रमात् तद्
योन्यृक्षवारविभवर्णनवांशकाः स्युः ॥ २७ ॥

ध्वजसिंहवृषेभाख्या योनयः शोभनाः स्मृताः ।
तथैवाशोभना वर्ज्या धूम्रश्वखरवायसाः ॥ २८ ॥

नक्षत्राण्याश्विनादीनि यजमानदिनादितः ।
जन्मसम्पद्विपत् क्षेमः प्रत्यरं साधको वधः ॥ २९ ॥

मैत्रं परममैत्रं च जन्मेत्याद्यं पुनःपुनः ।
सम्पत्साधकमैत्राणि क्षेमं परममैत्रकम् ॥ ३० ॥

जन्माख्यं च शुभानि स्युरशुभानीतराणि तु ।
चन्द्रज्ञगुरुशुक्राणां वाराः शस्तास्तु नेतरे ॥ ३१ ॥

धनाधिकं च हीनार्णं श्रेष्ठं मध्यं समं यदा ।
ऋणाधिकं चेद् वर्ज्यं स्याद् विपत्तस्करषण्डकाः ॥ ३२ ॥

निन्द्यास्तदितरे सर्वे श्रेष्ठा ग्राह्याः स्युरंशकाः ।
तस्करो भुक्तिशक्ती च धनं राजा नपुंसकम् ॥ ३३ ॥

अभयं च विपच्चैव समृद्धिश्च नव क्रमात् ।
ग्रामवास्तुनृपादीनां यजमानस्य चाप्युत ॥ ३४ ॥

उक्तमानविभागेन योन्यादिघटनां नयेत् ।
प्रस्तुतप्रतिमोत्सेधं त्रिंशदंशादितः क्रमात् ॥ ३५ ॥

शतांशान्तं विभज्यैषु भागैरन्यतमैर्बुधः ।
योनिताराादिघटनां योजयेच्छोभनं यथा ॥ ३६ ॥

देवादीनां तथान्येषां बेरमानं पृथक् पृथक् ।
मानं प्रमाणमुन्मानं परिमाणं तथा पुनः ॥ ३७ ॥

उपमानं लम्बमानमिति मानं तु षड्विधम् ।
बेरायामस्तु मानं स्यात् प्रमाणं तिर्यगर्पितम् ॥ ३८ ॥

उन्मानं तु तदावृत्तिर्नाहस्तु परिमाणकम् ।
निम्नोन्नतं तूपमानं लम्बमानं प्रलम्बितम् ॥ ३९ ॥

श्रेष्ठेन दशतालेन शिवकेशववेधसाम् ।
मध्येन दशतालेन गौरीलक्ष्मीगिरां मतम् ॥ ४० ॥

---

१. 'बे' क. पाठः.

दुर्गायाश्चापि मातॄणां मध्येनैव प्रकल्पयेत् ।
मध्येन दशतालेन त्रिमूर्तीर्वा प्रकल्पयेत् ॥ ४१ ॥

तद्देवीनां तदा मानं कनिष्ठदशतालतः ।
सूर्येन्द्रस्कन्दचन्द्राणां चण्डक्षेत्रेशनन्दिनाम् ॥ ४२ ॥

ऋषीणां चाश्विनोः शास्तुः कनिष्ठदशतालतः ।
लोकपालाष्टमूर्तीशविद्येशवसुभोगिनाम् ॥ ४३ ॥

रुद्राणां चैव मानं स्यादुत्तमान्नवतालतः ।
मरुद्गणानप्सरसोऽप्यस्त्रमूर्तीश्च गुह्यकान् ॥ ४४ ॥

मध्येन नवतालेन कुर्याद् विद्याधरान् पितॄन् ।
सिद्धानसुरगन्धर्वान् कनिष्ठनवतालतः ॥ ४५ ॥

गणेशं वामनं चाथ पञ्चतालाख्यमानतः ।
चतुस्तालेन भूतानि त्रितालाद् यक्षकिन्नरान् ॥ ४६ ॥

द्वितालेनैव कूश्माण्डांस्तालात् कूर्माकृतिं हरिम् ।
प्रतिमाकरणं तत्तद्देहलब्धाङ्गुलेन तु ॥ ४७ ॥

सिध्येत् तत्रोच्यते पूर्वमुत्तमं दशतालकम् ।
तदुत्सेधे चतुर्विंशत्याधिकं शतभागिके ॥ ४८ ॥

एकांशो देहलब्धाख्यमङ्गुलं तदथाष्टधा ।
विभज्य विद्यादेकांशं यवमेवं परत्र च ॥ ४९ ॥

मध्यमे दशताले तु सविंशतिशतांशतः ।
सविकारशतांशेंऽशः कनिष्ठदशतालके ॥ ५० ॥

अष्टोत्तरशतांशेंऽशो नवतालोत्तमेऽङ्गुलम् ।
स वेदांशशतांशेंऽशो नवताले तु मध्यमे ॥ ५१ ॥

शतांशेंऽशोऽङ्गुलं ज्ञेयं कनिष्ठनवतालके ।
षण्णवत्यंशकेंऽशः स्याच्छ्रेष्ठे तु वसुतालके ॥ ५२ ॥

प्रतिवेदाङ्गुलह्रासादेतन्मध्याधमे स्मृते ।
स्वस्वतालविभागेन सप्ततालादिषु क्रमात् ॥ ५३ ॥

---

१. 'व' क. पाठः.

एकतालान्तकं विद्याद् देहलब्धाङ्गुलं पृथक् ।
इन्दुः खमंशो मात्रं चाप्यङ्गुलं च समं स्मृतम् ।। ५४ ॥

कोलकं च कलाभागः स्याद् द्वित्रिचतुरङ्गुलम् ।
अक्षिगोलकपक्षस्तु द्व्यङ्गुलस्याभिधायकः ॥ ५५ ॥

मुखं तालं वितस्तिश्च द्वादशाङ्गुलवाचकम् ।

संज्ञापर्यायाः ।

अथ श्रेष्ठात् पङ्क्तितालात् प्रतिमामानमुच्यते ॥ ५६ ॥

सांशत्रियव उष्णीषः केशान्तोंऽशैस्ततस्त्रिभिः ।
ततोऽक्षिसूत्रं वेदांशैः सयवत्रितयैस्ततः ॥ ५७ ॥

नासापुटान्तं तन्मानं चिबुकान्तं च तावता ।
तस्माद् गलं वेदयवं ततः कण्ठस्तु सप्तभिः ॥ ५८ ॥

यवैरग्न्यङ्गुलैश्चास्माद्धृदयं त्रियवान्वितैः ।
त्रयोदशाङ्गुलैस्तस्मान्नाभिस्तावद्भिरङ्गुलैः ॥ ५९ ॥

नाभेर्मेढ्रं च तावद्भिस्ततो नक्षत्रसंमितैः ।
अङ्गुलैरूरुमानं स्यात् तस्माद् भागेन जानुनी ॥ ६० ॥

तस्मादूरुसमे जङ्घे पादमानं तु भागतः ।
अथाङ्गुष्ठात् तु पार्ष्ण्यन्तं तलं सप्तदशाङ्गुलम् ॥ ६१ ॥

हिक्कासूत्रादधो बाहू सप्तविंशतिमात्रकैः ।
द्व्यङ्गुलं कोर्परं तस्मात् त्रिसप्तांशैः प्रकोष्ठकम् ॥ ६२ ॥

सार्धत्रयोदशैर्मात्रैर्मध्याग्रान्तं तलं स्मृतम् ।
मुखस्य तिर्यग्विस्तारः कर्णान्तो द्वादशाङ्गुलः ॥ ६३ ॥

ग्रीवामूलाग्रविस्तारः सार्धनन्दनवाङ्गुलैः ।
एकाशीतेरर्धमात्रैः सबाह्वन्तरविस्तृतिः ॥ ६४ ॥

सार्धनन्दैर्बाहुमूलजान्वोर्व्यासं तु कल्पयेत् ।
कक्षयोरन्तरव्यासो द्वाविंशत्यङ्गुलैर्मतः ॥ ६५ ॥

स स्तनान्तरविस्तारः सार्धविंशतिमात्रतः ।
हृदयावाधिविस्तारः सार्धाष्टादशमात्रिकः ॥ ६६ ॥

मध्यव्यासः षोडशांशैः सार्धैरष्टादशाङ्गुलैः ।
श्रोणेर्व्यासः कटिव्यासो विंशत्यङ्गुलसंमितः ॥ ६७ ॥
सार्धत्रयोदशांशा स्यादूरुमूलस्य विस्तृतिः ।
भान्वंशैरूरुमध्यस्य जङ्घामूलेऽष्टमात्रकैः ॥ ६८ ॥
जङ्घामध्यं सार्धषट्कं नलका सार्धभागतः ।
विस्तृताथाक्षिगुल्फान्तं स यवेष्वंशाविस्तृतम् ॥ ६९ ॥
सार्धवेदाङ्गुलैः पार्ष्णी विस्तृता तद्वदुच्छ्रिता ।
षडंशः प्रपदव्यासस्तलाग्रस्य सषड्यवः ॥ ७० ॥
सयवद्वयवेदांशैः पादाङ्गुष्ठायतं स्मृतम् ।
तद्विस्तारं तदर्धेन तदर्धान्नखविस्तृतिः ॥ ७१ ॥
तत्पादोनो नखायामो वृत्तोदग्राग्रमण्डितः ।
वेदरामाग्निदृङ्मात्रैः सत्रिषट्कचतुर्यवैः ॥ ७२ ॥
तर्जन्यादिकनिष्ठान्तमङ्गुल्यायाम ईरितः ।
तद्व्यासोऽपि क्रमाज्ज्ञेयो नवभिः सार्धसप्तकैः ॥ ७३ ॥
सप्तभिश्च यवैः षड्भिः स्वव्यासार्धात् तता नखाः ।
सपादाष्टांशसप्तांशैर्दोर्मध्ये कोर्परे ततिः ॥ ७४ ॥
सार्धेषुसार्धरामांशैः प्रकोष्ठमणिबन्धयोः ।
तलं सप्ताङ्गुलायामं मध्या सार्धषडङ्गुला ॥ ७५ ॥
+ + + + + + तर्जा ज्येष्ठा वेदाङ्गुलायता ।
सपादेष्वङ्गुलानामा कनिष्ठाब्ध्यंशपादयुक् ॥ ७६ ॥
सपादांशांशसयवमात्रमात्रैश्च षड्यवैः ।
अङ्गुष्ठादिकनिष्ठान्तमङ्गुलीनां ततिर्भवेत् ॥ ७७ ॥
स्वस्वमूले विकारांशे हाप्योंऽशस्तत्तदग्रके ।
अङ्गुल्यग्रततेऽन्यंशे द्व्यंशव्यासा नखाः पृथक् ॥ ७८ ॥
स्वस्वव्यासचतुर्थांशादायताः स्युर्नखाः पृथक् ।
द्विगुणं स्वनखायामादग्रपर्व पृथक् पृथक् ॥ ७९ ॥
सपादद्व्यंशतोऽङ्गुष्ठे तर्जानाम्नोर्दृगंशतः ।
मध्यायाः सत्रिपादाक्षि सपञ्चयवमात्रतः ॥ ८० ॥

कनिष्ठायाश्च कथित आयामो मूलपर्वणः ।
मध्यपर्व च यच्छिष्टं मध्ये मूलाग्रपर्वणोः ॥ ८१ ॥

सपर्वद्वयमङ्गुष्ठं शेषाः पर्वत्रयान्विताः ।
सार्धतुरससार्धेषुमात्रव्यासस्तलस्य तु ॥ ८२ ॥

मूले मध्ये तथाग्रे स्यादथाङ्गुष्ठस्य मूलतः ।
आ तर्जामूलतोऽग्न्यंशैस्तथाङ्गुष्ठस्य मूलतः ॥ ८३ ॥

शुकोदराख्यो वेदांशैर्मणिबन्धान्तमायतः ।
तद्घनं सार्धयुग्मांशं करपार्ष्ण्यां घनं कला ॥ ८४ ॥

तद[2]ग्रं षोडशांशोनमथाग्रं यत् तलस्य तु ।
मांसलं सार्धकोलं स्यात् पार्ष्णिरत्रांशविस्तृतः ॥ ८५ ॥

शुकोदरततिर्य्यंशाच्छेषान्निम्नं तले स्मृतम् ।
चक्रशङ्खाब्जमकरस्वस्तिकाद्यङ्गवत् तलम् ॥ ८६ ॥

कर्णोर्ध्वं स्याच्छिरोनाहः स चाष्टात्रिंशदङ्गुलैः ।
कर्णयोर्मध्यनाहः प्राग् द्वाविंशत्यङ्गुलैः स्मृतः ॥ ८७ ॥

तत्पृष्ठनाहः सूर्यांशैः कर्णौ कोलकतः पृथक् ।
मूर्ध्नो मध्यात् तु केशान्तमानमुक्तं नवाङ्गुलम् ॥ ८८ ॥

पार्श्वयोस्तावदेव स्यादथ केशाक्षिसूत्रयोः ।
मध्ये तु भ्रूयुगं कुर्यात् सज्यचापानतं शुभम् ॥ ८९ ॥

कर्णोर्ध्वसूत्रं भ्रूतुल्यं ततो मात्राद् भ्रुवोर्नतिः(?) ।
भ्रुवोरन्तरमर्धांशाच्छरांशैरायतं भ्रुवोः ॥ ९० ॥

भ्रूमध्यतारं द्वियवं कृशमग्रं तयोः क्रमात् ।
कनीनिका कलायामव्यासा स्यादथ षड्यवः ॥ ९१ ॥

सितांशः कृष्णबिम्बश्च शुक्लांशोऽन्ते च तत्समः ।
षड्यवो नेत्रविस्तारो नेत्रान्तोऽर्धयवोऽरुणः ॥ ९२ ॥

कृष्णदृष्टिर्यूकसमा ज्योतिर्मण्डलकं यवम् ।
ऊर्ध्वाधोवर्मविस्तारो यवं चार्धयवं भवेत् ॥ ९३ ॥

---

१. 'शा', २. 'ग्र' क. पाठः.

नेत्रयोरन्तरं युग्ममात्रं सद्वियवं भवेत् ।
नासापुटान्तसीमान्तव्यासपादांशपक्षतः ॥ ९४ ॥

मध्यव्यासस्ततोऽर्धेन तदूर्ध्वं तस्य चार्धतः ।
गोजीमूलात् तु नासाग्रं द्व्यङ्गुलोच्चं पुटोर्ध्वतः ॥ ९५ ॥

सयवांशततं नासापुटौ[1] यवघनौ स्मृतौ ।
नासाद्वारोच्चविस्तारौ पञ्चसप्तयवैर्मतौ ॥ ९६ ॥

तिलपुष्पसमौ नासापुटौ निष्पावसन्निभौ ।
मध्यकुड्योच्चतांशेन तद्व्यासोऽर्धयवः स्मृतः ॥ ९७ ॥

अध्यर्धयवलम्बं स्यान्नासाग्रं पुटसूत्रतः ।
सार्धवेदयवायामा गोजी[2] तस्यार्धतस्तता ॥ ९८ ॥

सपादभागदीर्घं स्यादुत्तरोष्ठं तु पालिका ।
यवव्यासा च तद्व्यासः सार्धत्रियव ईरितः ॥ ९९ ॥

आसृक्वान्तायतं तारमानुपूर्व्या कृशं भवेत् ।
पाली त्रिवक्रावनता तावदास्यायतं भवेत् ॥ १०० ॥

नन्दाष्टादशधार्धर्तुयवतारायतोच्छ्रितम् ।
अधरं स्यात् तु तत्पाली त्वधः सार्धयवं ततः ॥ १०१ ॥

अधराधस्तु चिबुकं सार्धाष्टयवमानतः ।
चिबुकस्य तथा निम्नं हनुस्त्रियवमुन्नता ॥ १०२ ॥

हनुरर्धायतं वृत्ता सार्धरामाङ्गुलात् तता ।
कर्णबन्धाद्धनोर्मध्यं दशाङ्गुलमुदीरितम् ॥ १०३ ॥

गलवेशः सपादांशाद्धनोस्ताद्द्विगुणं गलात् ।
कर्णवेशस्तु नेत्रान्तात् सप्तांशैः श्रवणान्तरम् ॥ १०४ ॥

कर्णव्यासो नेत्रदैर्घ्याद् दृक्सूत्रोर्ध्वोन्नतिस्तथा ।
तदधः कर्णबन्धः स्यात् सयवांशद्वयायतः ॥ १०५ ॥

पूर्वापरे कर्णनाळे सार्धवेदांशमायते ।
मात्रार्धमात्रविस्तारे स्यातां सार्धांशतो घने ॥ १०६ ॥

---

१. ‘टो’, २. ‘र्जी’ क. पाठः.

षड्यवं नालरन्ध्रं स्यात् पिप्पल्यंशायता[1] स्मृता ।
तदर्धविस्तृता वाथ पिञ्चूषी स्यात् कलायता ॥ १०७ ॥

तद्व्यासोंऽशादक्षिसूत्रादधश्छिद्रं चतुर्यवम् ।
चतुर्यवायता कर्णपाली सार्धयवाद् घना ॥ १०८ ॥

सार्धमात्रं ततः पृष्ठकर्णपृष्ठविधुस्तथा ।
पश्चात् कण्ठोर्ध्वकेशान्तेऽर्धांशनिम्ना कृकाटिका ॥ १०९ ॥

कृकाटिकाप्रदेशे तु कण्ठव्यासोऽष्टमात्रतः ।
साष्टार्धमात्रं तदधः स्कन्धसीम्नि दशाङ्गुलैः ॥ ११० ॥

पश्चात् कण्ठस्य चायामो वेदांशैश्च त्रिभिर्यवैः ॥
हिक्कासूत्रोर्ध्वतः स्कन्धसन्धिर्वेदांशमुन्नतः ॥ १११ ॥

आ हिक्कासूत्रतो नीचौ (न?) स्कन्धौ सप्तांशतो घनौ ।
पश्चात् कण्ठादधोंशेन ककुत् तस्मादधोङ्गुलैः ॥ ११२ ॥

सप्तविंशतिभिः पृष्ठवंशस्त्वाकटिसन्धितः ।
ककुद्देशादधो हित्वा वेदांशात् कक्षयोः स्थितिः ॥ ११३ ॥

पृष्ठे तु कक्षयोर्मध्यव्यासः स्यात् तारकाङ्गुलैः ।
रसाङ्गुलयवैः कक्षादूर्ध्वं बाह्वोः समुच्छ्रयः ॥ ११४ ॥

स्कन्धसन्धेरंसपीठं सार्धबाणांशकैर्भवेत् ।
पश्चादास्तनसूत्रान्तमर्कांशे फलकेंऽसयोः ॥ ११५ ॥

ककुदोऽधोंऽसफलकामध्यव्यासो दशाङ्गुलः ।
तदधस्त्र्यङ्गुलो व्यासो वंशो द्व्यङ्गुलनिम्नवान् ॥ ११६ ॥

वंशपार्श्वादांसपीठं बृहती सप्तमातृके ।
बृहत्योरास्तनं मध्ये घनं षोडशमात्रकैः ॥ ११७ ॥

अधो बृहत्याः कट्यन्तमायामः सप्तमातृकः ।
विकारांशैर्घनं तस्मादधश्चात्यष्टिमात्रकैः ॥ ११८ ॥

सार्धत्रयोदशांशैः स्यात् कट्यास्तत्खण्डकान्तरम् ।
अर्धोनकृतिमात्रा स्यात् कटिबन्धस्य विस्तृतिः ॥ ११९ ॥

---

१. 'ष्ठ', २. 'ष' क. पाठः.

सार्धनन्दांशविस्तारौ स्फिजोः पिण्डौ सुवर्तुलौ ।
सार्धवेदांशतश्चोरुमूलात् स्फिक्पिण्डनिर्गतिः ॥ १२० ॥
स्फिक्पिण्डौ मेढ्रसूत्राधः सार्धवेदांशलम्बनौ ।
वृत्ता ग्रीवाथ तन्नाहे युग्मरेखा समन्विता ॥ १२१ ॥
स्तनमन्तरयोर्हिक्काकक्षसन्धिस्ततोऽपि च ।
सार्धत्रयोदशांशैः स्युः कक्षात् कक्षधरा ततिः ॥ १२२ ॥
सपादांशद्वयं सार्धमात्रं हृदयनिम्नतः ।
स्तनपीठोन्नतिर्द्व्यंशात् सयवं कुचवर्तुलम् ॥ १२३ ॥
द्वियवोच्चततं चारुवर्तुलं स्तनचूचुकम् ।
हिक्का द्वियवनीचा स्याज्जानुयुग्मं द्विमात्रकम् ॥ १२४ ॥
षड्यवव्यासनिम्ना स्याद् रम्या नाभिः प्रदक्षिणा ।
नाभेः सयवबाणांशा श्रोणी पार्श्वे रसांशका ॥ १२५ ॥
सार्धत्र्यंशा कटिः श्रोण्या तच्छेषो मेढ्रमण्डलम् ।
सयवद्वयबाणांशदीर्घं सयववृत्ततः ॥ १२६ ॥
लिङ्गं बीजावलम्बस्तु सवेदांशयवद्वयः ।
तद्व्यासस्तावतैव स्यान्मेढ्रादूर्ध्वोरुबन्धनम् ॥ १२७ ॥
त्र्यङ्गुलं त्रियवोत्तुङ्गं जानुवृत्तं तु भागतः ।
तद्घनं सार्धकलया पार्श्वबन्धस्तु भागतः ॥ १२८ ॥
जानुपश्चिमभागोच्चं सार्धद्व्यंशं तु भागतः ।
विस्तृतं तूच्चनिम्नाद्यमन्यदूह्यमतः परम् ॥ १२९ ॥
सर्वतः परिपूर्णाङ्गं मानोन्मानादितः समम् ।
श्रेष्ठेन दशतालेन बेरं कुर्वीत सुन्दरम् ॥ १३० ॥
इत्थं दशतालेन तु मुख्ये यथालक्षणम् ।
उक्तं खलु बेरोचितपुम्मानमशेषादिह ॥ १३१ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे क्रियापादे
उत्तमदशतालपुरुषमानविधिपटल
एकचत्वारिंशः ।

अथ द्विचत्वारिंशः पटलः ।

मध्येन दशतालेन स्त्रीमानं कथ्यतेऽधुना ।
भागः कचान्त उष्णीषात् तस्माद् भागः सषड्यवः ॥ १ ॥
नेत्रान्तः स्यात् ततो नासापुटान्तः सचतुर्यवः ।
भागः स्यादथ हन्वन्तं रामांशैस्तु सषड्यवैः ॥ २ ॥
हनोर्भागस्तु(?) कण्ठान्तस्ततो हृन्नाभियोनयः ।
पृथक् त्रयोदशांशैः स्युरूरू षड्विंशदङ्गुलैः ॥ ३ ॥
भागेन जानुस्तस्माच्च जङ्घे षड्विंशदङ्गुलैः ।
भागेन पादौ च तलौ भागायामौ प्रकल्पयेत् ॥ ४ ॥
अङ्गुष्ठतर्जनी चोभे भागायामे पृथक् स्मृते ।
क्रमादर्धाङ्गुलोनाः स्युः शेषास्त्वङ्गुलयः पृथक् ॥ ५ ॥
अङ्गुष्ठो द्व्यङ्गुलव्यासस्तर्जन्येकाङ्गुलविस्तृता ।
सार्धसप्तयवा मध्यानामा सप्तयवैस्ततः ॥ ६ ॥
कनिष्ठा षड्यवव्यासा स्वव्यासार्धतता नखाः ।
उदञ्चिताग्राः किञ्चित् ते पार्ष्णिव्यासस्तु भागतः ॥ ७ ॥
तावदुच्चो भवेत् पार्ष्णिस्तलव्यासः शराङ्गुलैः ।
रसाङ्गुलैस्तलाग्रं स्यादक्षगुल्फौ शराङ्गुलैः ॥ ८ ॥
नलका भागविस्तारा जङ्घाव्यासो रसाङ्गुलैः ।
जानुव्यासः सप्तमात्रैरूर्वोर्व्यासस्तु तालतः ॥ ९ ॥
कटिर्द्वितालविस्तारा सप्तांशैर्जघनोर्ध्वतः ।
चतुर्मात्रैरधोव्यासस्तच्चाश्वत्थदलाकृति ॥ १० ॥
पीवरं तद् भवेच्चारु श्रोणी कृत्यङ्गुलैस्तता ।
षड्यवव्यासनिम्ना स्यान्नाभिर्मध्येऽन्ततस्तनुः ॥ ११ ॥
रुद्रमात्रैस्तु विस्तीर्णरोमराज्या च शोभिता ।
स्तनाधोऽतिजगत्यंशैर्नन्दांशैः स्यात् प्रतिस्तनम् ॥ १२ ॥
रामांशैश्चूचुकव्यासः सार्धभागोन्नतौ स्तनौ ।
स्तनाक्षमर्धमात्रं स्याद् द्वियवः स्यात् तदुन्नतिः ॥ १३ ॥

कक्षयोरन्तरव्यासो भवेत् सप्तदशाङ्गुलैः ।
सबाहुसीमाविस्तारः स्यादेकत्रिंशदङ्गुलैः ॥ १४ ॥
उत्कृत्यंशैर्भुजायामः कोर्परः स्यात् कलासमः ।
धृत्यंशैस्तु प्रकोष्ठं स्यात् तलं सप्ताङ्गुलायतम् ॥ १५ ॥
वेदेष्वृतुशराम्नायैरायताङ्गुलयः क्रमात् ।
नन्दर्षिवस्वृषिरसयवैरङ्गुलयस्तताः ॥ १६ ॥
स्वाग्रव्यासे षडंशे तु वेदांशैर्नखविस्तृतिः ।
यवाधिको नखायामस्तलव्यासो रसाङ्गुलैः ॥ १७ ॥
रामेषुषट्सप्तमात्रैर्मणिबन्धश्च कोर्परः ।
बाहुमध्यं च मूलं च विस्तीर्णं स्यात् क्रमेण तु ॥ १८ ॥
ग्रीवा सप्ताङ्गुलव्यासा रुद्रांशैर्मुखविस्तृतिः ।
वृत्तायतं भवेद् वक्त्रं सार्धांशकलया भ्रुवोः ॥ १९ ॥
केशान्तात् संस्थितिर्दैर्घ्यं तयोः सद्वियवा कला ।
सयवांशात् पुटादास्यं गोजिदैर्घ्यं तदर्धतः ॥ २० ॥
ओष्ठपाली यवतता तच्छेषेणौष्ठविस्तृतिः ।
भागेन स्यात् तदायामस्त्रिवर्गोत्तरपालिका ॥ २१ ॥
तावदास्यायतं प्रोक्तमधरः सयवाङ्गुलः ।
तत्पाली यवविस्तीर्णा सयवद्वयभागतः ॥ २२ ॥
तद्दैर्घ्यं षड्यवैस्तुङ्गं तस्मात् सार्धांशतो हनुः ।
चिबुकं द्वियवं तत्र कण्ठवेशस्ततो हनोः ॥ २३ ॥
सार्धत्रिमात्रैः कथितः कर्णव्यासः कलास्य तु ।
दैर्घ्यं सद्वियवाब्ध्यंशैर्नाललम्बः शरांशकैः ॥ २४ ॥
तच्च साभरणं कुर्याद् भुजौ गोवालसुन्दरौ ।
ऊरू कारिकराकारौ स्याद् वपुः सर्वसुन्दरम् ॥ २५ ॥
अनुक्तं पूर्ववच्छेषं सर्वमूह्यं विपश्चिता ।

मध्यमदशतालस्त्रीमानम् ।

मध्येन दशतालेन मानं पुंसोऽथ कथ्यते ॥ २६ ॥

---

१. 'ध्यद' क. पाठः.

सयवद्वयभागेन शिरःकण्ठाङ्घ्रिजानुषु ।
स्यादुच्चमथ केशान्तान्नेत्रान्तं च पुटान्तकम् ॥ २७ ॥

हन्वन्तं प्रोक्तमानेन स्यात् कण्ठेऽर्धाङ्गुलं गलम् ।
हिक्काया(?) हृदयान्तं स्याज्जगत्यंशैः सषड्यवैः ॥ २८ ॥

तस्मान्नाभिस्ततो मेढ्रं साङ्गुलैर्द्वादशाङ्गुलैः ।
सषड्यवाभिकृत्यंशैरूर्वोर्दैर्घ्यमुदाहृतम् ॥ २९ ॥

जङ्घादैर्घ्यं च तत्तुल्यमत्यष्ट्यंशैस्तलायतिः ।
उत्कृत्यंशैर्बाहुदैर्घ्यं कलायामस्तु कोर्परः ॥ ३० ॥

विंशत्यंशैः प्रकोष्ठः स्यादामध्याग्रं तलायतिः ।
त्रयोदशाङ्गुलैश्चाथ सबाह्वन्तरविस्तृतिः ॥ ३१ ॥

सनन्दात्रिंशदंशैः स्यात् सार्धरुद्राङ्गुलैर्मुखम् ।
मूलानि कण्ठबाहूनां जानुमध्यद्वयं त्वधः ॥ ३२ ॥

हिक्कासूत्राच्च कक्षान्तं प्रत्येकं नवमात्रकम् ।
कक्षाधरस्तु कलया प्रकृत्यंशैरुरस्ततिः ॥ ३३ ॥

स्तनान्तरं स्तनाद्धिक्का हिक्काकक्षान्तरेऽङ्गुलैः ।
त्रयोदशैः कुक्षिमध्यं सार्धपञ्चदशाङ्गुलैः ॥ ३४ ॥

तस्मात् कलाधिकव्यासा श्रोणितः स्यात् कलाधिका ।
कटिव्यासस्तथैवोर्वोर्मूलेंऽशैस्तु त्रयोदशैः ॥ ३५ ॥

तयोर्मध्ये च रुद्रांशैः सप्तांशैर्जङ्घयोस्ततिः ।
श्रुत्यंशैर्नलकाव्यासः सपादैस्तु शराङ्गुलैः ॥ ३६ ॥

अक्षगुल्फद्वयव्यासः पार्ष्णिव्यासोच्चता ततः ।
सयवद्वयवेदांशैः सपादेष्वङ्गुलैस्ततः ॥ ३७ ॥

पदमध्यं पदाग्रं च ततं सार्धरसाङ्गुलैः ।
सपादवेदांशोऽङ्गुष्ठस्तर्जन्यस्माद् यवाधिका ॥ ३८ ॥

सार्धत्र्यंशायता मध्या त्र्यंशदीर्घा त्वनामिका ।
सार्धद्व्यंशा कनिष्ठा च विस्तारेऽपि यथाक्रमम् ॥ ३९ ॥

कलया सयवांशेन मात्रात् सप्तयवैरपि ।
षड्यवैश्च नखव्यासा वस्विषुश्रुतिसंमितैः ॥ ४० ॥

यवैः सार्धाग्निरामैः स्यात् स्वव्यासार्धात् तदायतिः ।
अथ वस्वृषिसार्धेषुसार्धरामाङ्गुलैः क्रमात् ॥ ४१ ॥
बाहुकोर्परयोर्व्यासः प्रकोष्ठमणिबन्धयोः ।
मणिबन्धात् तलायामः सप्तांशैः स्यात् षडङ्गुलैः ॥ ४२ ॥
मध्यायास्तु सपादेषुमात्रे दाशन्यनामिके ।
कनिष्ठाङ्गुष्ठयोर्दैर्घ्यं[1] सपादैश्चतुरङ्गुलैः ॥ ४३ ॥
सार्धद्व्यंशैस्तलव्यासः सार्धद्व्यंशघनं तलम् ।
अङ्गुष्ठाद्यङ्गुलीनां तु स्यात् सूर्यवसुनन्दकैः ॥ ४४ ॥
यवैर्वसुरसैस्तासां विस्तारः क्रमशो मतः ।
स्वाग्रव्यासे तु रामांशे द्व्यंशा स्यान्नखविस्तृतिः ॥ ४५ ॥
स्वस्वव्यासान्नखायामः प्रशस्तो द्वियवाधिकः ।
शिश्नायामः शरांशः स्यात् तद्व्यासो द्व्यङ्गुलः स्मृतः ॥ ४६ ॥
मुष्कव्यासोच्छ्रयौ भागौ भालं नन्दांशमायतम् ।
पश्चात् कर्णान्तरायामो भवेन्मात्रैस्त्रयोदशैः ॥ ४७ ॥
नेत्रायामान्तरायामौ सपादांशद्वयेन हि ।
षड्यवा नेत्रविस्तारस्तावत् स्यात् कृष्णमण्डलः ॥ ४८ ॥
तत्पार्श्वमण्डले श्वेते स्यातां पञ्चयवायते ।
यवप्रमाणं ज्योतिः स्यात् कृष्णमण्डलमध्यगम् ॥ ४९ ॥
यूकामात्रा तु दृष्टिः स्याद् यवमाना कनीनिका ।
अपाङ्गेऽर्धयवे रक्ते द्वियवेनोर्ध्ववर्म यत् ॥ ५० ॥
अधोवर्मार्धयवतो भ्रूमध्यं नेत्रसूत्रतः ।
सपादकलया कार्यं तावान् कर्णोच्छ्रयो भवेत् ॥ ५१ ॥
शराङ्गुलं भ्रुवोर्दैर्घ्यं तन्मध्यं द्वियवात् ततम् ।
तदन्तरं स्यादर्धांशात् तयोरानतिरङ्गुलात् ॥ ५२ ॥
भ्रुवौ चापाकृता दीर्घे कर्णौ द्वियवभागतः ।
नाळालम्बोऽपि तावान् स्यात् साधिकांशः सभूषणः ॥ ५३ ॥

---

[1] 'ल' क. पाठः.

पूर्वनालततिर्मात्रात् पश्चान्नालं तदर्धतः ।
तयोर्घनं त्वर्धमात्रात् कर्णमूलमपाङ्गतः ॥ ५४ ॥

सप्ताङ्गुलं भवेद् गोजीमूलान्नासाग्रतुङ्गता ।
यवोनकलया कार्या षड्यवः पुष्करोच्छ्रयः ॥ ५५ ॥

तद्विस्तारो यवोनः स्यादूर्ध्वनासाङ्गविस्तृता ।
पुटावर्धाङ्गुलसमौ स्यातां यवघनौ च तौ ॥ ५६ ॥

गोज्यायामोऽर्धमात्रं स्यात् तद्व्यासो द्वियवः स्मृतः ।
उत्तरोष्ठततिस्त्वर्धमात्रात् पालिततिर्यवात् ॥ ५७ ॥

तद्दैर्घ्यं सयवाद् भागात् सयवांशाधरे ततिः ।
तद्दैर्घ्यं द्विगुणं तस्मात् तत्पाली यवसंमिता ॥ ५८ ॥

तदुच्चं षड्यवं शेषो हनुश्च स्याद्धनोर्गलः ।
साध्यर्धयवमात्रः स्यात् ततः सार्धद्विमात्रतः ॥ ५९ ॥

कण्ठवेशो भवेच्छेषं प्राग्वदूह्यं विचक्षणैः ।

मध्यमदशतालपुरुषमानम् ।

कनिष्ठदशतालेन स्त्रीमानमथ कथ्यते ॥ ६० ॥

सार्धनांशैर्मुखायामः केशान्ताक्ष्यन्तविस्तृतिः ।
भागात् ततः पुटान्तं च सयवैर्वेदमात्रकैः ॥ ६१ ॥

ततो हन्वन्तरं तावत् कण्ठान्तं च हनोस्तथा ।
कण्ठाद्धृच्च हृदो नाभिः सार्धसूर्याङ्गुलान्तरम् ॥ ६२ ॥

बेरे समाविभक्ते तु सषोडशशताङ्गुलैः ।
उष्णीषकक्षजान्वङ्घ्रितलोच्चं वेदमात्रकैः ॥ ६३ ॥

सार्धनांशैर्मुखायामः केशान्तादक्षिसूत्रतः ।
सपादवेदमात्रैः स्यात् ततः सयवभागतः ॥ ६४ ॥

पुटान्तोऽस्माच्च हन्वन्तमथाकण्ठाद्धृदन्तकम् ।
हृदो नाभिस्ततो योनिः सार्धसूर्याङ्गुलैः पृथक् ॥ ६५ ॥

अभिकृत्यंशकैरूरू जङ्घे चोर्वोः समे मते ।
षोडशांशैः पदायामो बाहू चोर्वोः समौ मतौ ॥ ६६ ॥

कोर्परौ तु कलायामौ प्रकोष्ठोऽष्टादशाङ्गुलैः ।
सार्धत्र्यंशैस्तलायामः षडंशैर्मध्यमायता ॥ ६७ ॥

तर्जानामे शरांशैः स्तां भा[1]गाद् ज्येष्ठाकनिष्ठिके ।
ज्येष्ठादिकाङ्गुलिव्यासो नन्दर्ष्यष्टर्षिषड्यवैः ॥ ६८ ॥

स्वाग्रव्यासे त्रिभक्ते द्वावंशौ[2] +नखविस्तृतिः ।
अतो यवाधिकं दैर्घ्यं तलव्यासो रसांशतः ॥ ६९ ॥

घनं तलस्य कलया मणिबन्धप्रकोष्ठयोः ।
मध्यकोर्परबाह्वोश्च त्रिवदेषुरसस्ततम् ॥ ७० ॥

रुद्रमात्रैर्मुखव्यासो ग्रीवा सप्ताङ्गुलैस्तता ।
बाहुमूलस्य जान्वोश्च व्यासः सप्तांशतस्ततिः ॥ ७१ ॥

कक्षान्तरस्यात्यष्ट्यंशैर्नन्दांशैः स्तनविस्तृतिः ।
तयोस्तदर्धमुत्सेधश्चूचुके तु त्रिमात्रक ॥ ७२ ॥

अर्धांशतः स्तनाक्षः स्यात् तदुच्चं द्वियवं स्मृतम् ।
स्तनाधोऽतिजगत्यंशैर्मध्ये रुद्राङ्गुलैस्ततिः ॥ ७३ ॥

श्रोणः कृत्यंशविस्तारा सक्कृत्यंशैः कटिस्तता ।
ऊर्वोर्व्यासस्तु सूर्यांशैर्जङ्घामध्ये षडंशकैः ॥ ७४ ॥

नलका भागविस्तारा त्वक्षगुल्फौ शराङ्गुलैः ।
पार्ष्णिव्यासोन्नतिर्भागात् तलमध्याग्रयोरपि ॥ ७५ ॥

व्यासः स्याच्छरषण्मात्रैर्ज्येष्ठोच्चं भागतो भवेत् ।
तत्समा तर्जनी मध्या सार्धरामाङ्गुलायता ॥ ७६ ॥

त्रिमात्रानामिका सार्धद्व्यङ्गुला स्यात् कनिष्ठिका ।
रसर्षिसार्धर्षिवसुविकारयवविस्तृताः ॥ ७७ ॥

पादाङ्गुल्यः कनिष्ठाद्याः स्वव्यासार्धतता नखाः ।
तत्पादोनायता वृत्ता उन्नताग्रा मनाक् च ते ॥ ७८ ॥

स्यात् केशान्ताद् भ्रुवोः सूत्रं सपादकलया ततम् ।
पुटादधोऽङ्गुलादास्यं गोज्यायामस्तदर्धतः ॥ ७९ ॥

---

[1] 'ग' क. पाठः. [2] 'शोनख' ख. पाठः.

आस्यव्यासस्तु वेदांशैस्त्रिवर्गोत्तरपालिका ।
कलायतः स्यादधरस्तदर्धेन तु विस्तृतः ॥ ८० ॥
तत्पाली यवमाना स्याच्छेषं बिम्बफलाकृति ।
सयवद्व्यंशतो नेत्रदैर्घ्यं व्यासस्तु पञ्चवैः ॥ ८१ ॥
हनोस्तथा कण्ठवेशः सार्धरामाङ्गुलैः स्मृतः ।
गोजीमूलात् तु नासोच्चं स्यात् सषड्यवमात्रतः ॥ ८२ ॥
कर्णायामस्तु भागेन सपादकलया ततिः ।
भागेन नाळालम्बः स्याच्छेषमूह्यं हि पूर्ववत् ॥ ८३ ॥
मध्यमदशतालेन स्त्रीमानं चापि तेन पुंमानम् ।
दशतालात् तु कनिष्ठात् स्त्रीमानस्येह लक्षणं कथितम् ॥ ८४ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे
क्रियापादे स्त्रीपुंमानादिलक्षणपटलो
द्विचत्वारिंशः ॥

अथ त्रिचत्वारिंशः पटलः ।

अथ षोडशमूर्तीनामाकाराद्यं निगद्यते ।
तत्रोमास्कन्दयुक्तस्य शम्भोर्लक्षणमुच्यते ॥ १ ॥
ऋज्वागतं रजोभावमर्धपर्यङ्कमासनम् (?) ।
वामाङ्घ्रिं शाययेत् पीठे दक्षिणं तु प्रलम्बयेत् ॥ २ ॥
आसनान्ताच्च केशान्ताज्जान्वन्तं तु समं भवेत् ।
जानुनोर्बाह्यपार्श्वे च जान्वन्ताद् बाहुपार्श्वकम् ॥ ३ ॥
परहस्तद्वयस्यापि मध्ययश्च मणिबन्धयोः ।
ऊर्ध्वकायसमं कुर्यात् सर्वमेतद् यथाक्रमम् ॥ ४ ॥
मध्यसूत्रं किरीटाग्राद् गुल्फमध्ये तु लम्बयेत् ।
प्रविष्टं दक्षिणं जानु सूत्राद् द्वित्र्यङ्गुलं भवेत् ॥ ५ ॥
मध्यसूत्रादिनांशैस्तु तदङ्घ्रिनलकान्तरम् ।
मन्वंशैरन्तरं सूत्राद् दक्षिणात् पाणिमध्यतः ॥ ६ ॥

सूत्रात् पञ्चदशांशैः स्यात् तथा वामतलान्तरम् ।
असव्यपाणिमध्याग्रं स्तनसूत्रसमोन्नतम् ॥ ७ ॥
वामोरोर्वामहस्तस्य चान्तरं द्वित्रिमात्रतः ।
कर्तरीकरयोरग्रे हिक्कासूत्रसमे स्मृते ॥ ८ ॥
श्रोणीकोर्परयोर्मध्ये पञ्चांशं वा षडंशकम् ।
मेढ्रादक्षान्तरं तद्वत् कुक्षिस्पृग् घ्राणसूत्रकम् ॥ ९ ॥
द्विसप्तातिजगत्यर्कमात्रैर्मध्यमसूत्रतः ।
मौल्यग्रं कर्तरीहस्तावन्तर्वा बहिराननौ ॥ १० ॥
परशुं च कुरङ्गं च कुर्याद् दक्षिणवामयोः ।
अभयं दक्षिणे हस्ते वामे तु कटकं करे ॥ ११ ॥
शङ्खपत्रकनक्राख्यमण्डले वामदक्षिणे ।
मौलितुङ्गं तु केशान्तात् सत्रिपादद्वितालकम् ॥ १२ ॥
सार्धद्वयं द्वितालं वा तच्च कुर्याद् सलक्षणम् ।
वामपार्श्वे सहासीनां कुर्याद् देवस्य पार्वतीम् ॥ १३ ॥
लम्बितं शयितं पादं कुर्याद् वामं च दक्षिणम् ।
किञ्चिद् देवाश्रिता नम्रवदना समलङ्कृता ॥ १४ ॥
वरदोत्पलसंयुक्ता वामदक्षिणहस्तयोः ।
वामोरुबाह्ये पीठस्थवामहस्ताथवा भवेत् ॥ १५ ॥
वेदांशैरुत्कृतिमितैः स्कन्दो मध्येऽनयोर्भवेत् ।
स्वतुङ्गं पञ्चतालेन विभज्याङ्गानि कारयेत् ॥ १६ ॥
अङ्गुलेन शिरोमानं केशान्तादक्षिसूत्रकम् ।
सार्धत्रिमात्रैस्तैरेव पुटान्तं च ततो हनुः ॥ १७ ॥
त्रिमात्रैः स्यात् तथा कण्ठो नन्दनागाब्धिमात्रकैः ।
हिक्काया हृत् ततो नाभिर्नाभेर्मेढ्रं च संमितम् ॥ १८ ॥
ऊर्वायामस्तु सूर्यांशैः कला जान्वथ जङ्घिका ।
रुद्रांशैः कलया पादस्तलायामो दशाङ्गुलः ॥ १९ ॥
मन्वङ्गुलायतौ बाहू प्रकोष्ठोऽपि दशाङ्गुलः ।
वेदांशैः स्यात् तलायामो मध्या च चतुरङ्गुला ॥ २० ॥
सार्धरामाङ्गुलायामा तर्जनी चाप्यनामिका ।
कनिष्ठाङ्गुष्ठिके त्र्यंशे सोत्पलं स्यात् करद्वयम् ॥ २१ ॥

आकुञ्चिताभ्यां पादाभ्यां स्थितं कुर्यात् सलक्षणम् ।
चन्द्रशेखरलक्ष्माथ समपादस्थितो भवेत् ॥ २२ ॥

उष्णीषे च ललाटे च नासाग्रे हनुमध्यमे ।
हिक्काहृदयगुह्योरःपादमध्येषु लम्बयेत् ॥ २३ ॥

कर्तर्यग्रं तु हिक्कान्तं स्तनान्तमभयाग्रकम् ।
वरदं नाभिसीमान्तं कट्यन्तं वापि कारयेत् ॥ २४ ॥

सूत्रादभयमध्यान्तं त्रिपञ्चाङ्गुलविस्तृतम् ।
अर्कांशैः परहस्तान्तं दशाङ्गुलमथापि वा ॥ २५ ॥

अत्यष्टिधृतिमात्रैर्वा सूत्रात् कोर्परमध्यकम् ।
एकाङ्गुलेनोरुमूले जानुमध्यं तु भागतः ॥ २६ ॥

पञ्चांशैर्जङ्घयोर्मध्यभागात् पार्ष्ण्यन्तरं भवेत् ।
और्ध्वकर्तरिहस्तौ तु कुठारमृगधारिणौ ॥ २७ ॥

जटामकुटवामस्थबालचन्द्रोऽहिभूषणः ।
ऋज्वागतः प्रवालाभः कार्यः स्याच्चन्द्रशेखरः ॥ २८ ॥

समभङ्गोऽति[1]भङ्गो वा भवेद् वृषभवाहनः ।
ऋजुः स्थितो दक्षिणाङ्घ्रिर्वामपादोऽस्य कुञ्चितः ॥ २९ ॥

तिरश्चीनाङ्घ्रिजङ्घो वा लम्बसूत्रस्य चोच्यते ।
उष्णीषाद् वामभाले तु वामनेत्रे पुटान्तके ॥ ३० ॥

वामस्तने च नाभ्यूरुपार्ष्णिमध्यस्य लम्बनम् ।
स्यात् तिरश्चीनजङ्घोऽयमतिभङ्गे तु नान्यथा ॥ ३१ ॥

नाभेर्वामे च वामोरुमध्ये दक्षिणगुल्फके ।
सूत्रं तु पातयेन्नाभेरूर्ध्वं प्राग्वदिहापि च ॥ ३२ ॥

नतिमानं शरांशैः स्याद् देवस्य वृषमस्तके ।
न्यस्तव्यः कोर्परो वामो हिक्कातोऽष्टादशाङ्गुलः ॥ ३३ ॥

कोर्पराधस्तथा पीठादूर्ध्वं यावद् वृषोन्नतिः ।
कटीदेशावलम्बी वा वामेतरकरो भवेत् ॥ ३४ ॥

---

[1] 'त्रि' क. ख. पाठः.

परहस्तादिकं सर्वं चन्द्रशेखरवद् भवेत् ।
समभङ्गास्थिता देवी लम्बवामकरा भवेत् ॥ ३५ ॥
सोत्पला दक्षिणे हस्ते बाहुः स्तनमितो विभोः ।

सोमास्कन्दशिवलक्षणम् ।

नटेश्वरश्चतुर्बाहुस्त्रिणेत्रश्चन्द्रशेखरः ॥ ३६ ॥
गृहीतोंऽसोऽर्धमानात्तु नतिमानं दशाङ्गुलम् ।
सूर्याङ्गुलं वा सूत्रस्य लम्बनं त्वथ कथ्यते ॥ ३७ ॥
उष्णीषात् सव्यभाले च तत्पुटे हनुमध्यतः ।
हिक्काना(भो? भ्यो)स्तथा मध्ये सव्यगुल्फे च पातयेत् ॥ ३८ ॥
प्रसारितभुजाग्रं तु विकारांशायतं ततः ।
भागात् परकराग्रं तदष्टपञ्चाशदङ्गुलैः ॥ ३९ ॥
सूत्रात् साग्निकराग्रं स्यात् ततो डमरुकाग्रकम् ।
चत्वारिंशद्भिरष्टांशैः कर्णसीमासमो(भ? द)यम् ॥ ४० ॥
सूर्यांशैर्दक्षिणे पार्श्वे सूत्रात् कक्षान्तरं भवेत् ।
प्रसारितजटाभारः किञ्चित् प्रहसिताननः ॥ ४१ ॥
व्याघ्रचर्माम्बरः कार्यो ह्यपस्मारोपरि स्थितः ।
गणैर्देवर्षियक्षाद्यैर्विघ्नेशस्कन्दमातृभिः ॥ ४२ ॥
भृङ्गीशेन महाकाल्या पार्वत्या वृषभेण च ।
मृदङ्गं नादयन् नन्दी सूपविष्टश्चतुर्भुजः ॥ ४३ ॥
हलपल्लवपाणिः स्याद्गन्दन्त्या च समन्वितः ।

भुजङ्गत्रासनृत्तलक्षणम् ।

स्थितदक्षिणपादः स्यात् कुञ्चितान्यपदाम्बुजः ॥ ४४ ॥
उष्णीषाद् दक्षिणे भाले दक्षिणेऽथ पुटे ततः ।
हिक्कामध्ये नाभिदेशाद् दक्षिणे द्व्यङ्गुले ततः ॥ ४५ ॥
मेढ्रमूले तथा पार्ष्ण्योर्मध्ये सूत्रं प्रलम्बयेत् ।
साचीकृतशरीरः स्याद् वामांशावनताततः(?) ॥ ४६ ॥

दक्षिणे वरदोऽधस्तादूर्ध्वकर्तरिपाणिना ।
गङ्गां दधानो वामोर्ध्वकरेण हरिणं दधत् ॥ ४७ ॥
अधोवामकरेणोमामालिङ्ग्य समभङ्गिनीम् ।
भगीरथेन चान्यैश्च मुनिभिर्वन्दितो भवेत् ॥ ४८ ॥
इत्थं गङ्गाधरं कुर्याच्छेषमुक्तं तु पूर्ववत् ।

गङ्गाधरलक्षणम् ।

त्रिपुरान्तकदेवः स्याद् वैशाखस्थानकान्वितः ॥ ४९ ॥
आभङ्गसमभङ्गाभ्यामतिभङ्गेन वा भवेत् ।
रामवेदेषुमात्रैः स्यान्नतिमानं त्रिषु क्रमात् ॥ ५० ॥
विकारधृतिकृत्यंशैः पादाङ्गुष्ठान्तरं क्रमात् ।
सपिनाकः करो वामः कक्षान्तोच्चः करोऽपरः ॥ ५१ ॥
सबाणः परहस्तौ द्वौ सटङ्कमृगपोतकौ ।
यथापूर्वं तथा देवी वामपार्श्वे स्थिता भवेत् ॥ ५२ ॥

त्रिपुरान्तकलक्षणम् ।

कल्याणसुन्दरस्य स्यादुष्णीषाद् वामभालके ।
वामनेत्रे पुटान्ते च हिक्कामध्ये च दक्षिणे ॥ ५३ ॥
नाभेस्तु त्रिचतुर्मात्रे सूत्रं तद्गुल्फमध्यतः ।
प्रादक्षिण्येन देवस्य गन्तुकामस्य पावकम् ॥ ५४ ॥
सव्येतरकरो देव्या हस्तालम्बी तथा भवेत् ।
वरदो वामहस्तः स्यात् परहस्तौ यथापुरम् ॥ ५५ ॥
देवी सोत्पलहस्ता स्यात् त्रिभङ्गाङ्गी विभूषिता ।
श्रीभूमिभ्यामनुगता गौरी देवानुगामिनी ॥ ५६ ॥
होता ब्रह्मा भवेद् दाता विष्णुः सकलशोऽम्बुदः ।
सर्वदेवर्षिगन्धर्वयक्षाद्यैर्वन्दितो भवेत् ॥ ५७ ॥

कल्याणसुन्दरलक्षणम् ।

अर्धनारीश्वरस्यापि सूत्रं स्यात् समभङ्गवत् ।
चतुर्भुजो वा द्विभुजो दक्षिणाङ्घ्रिः स्थितोऽस्य तु ॥ ५८ ॥

कुञ्चितो वामपादः स्याद् वामार्धं तस्य पार्वती ।
अतः परं तु यत् सर्वं प्राग्वदूहेन कल्पयेत् ॥ ५९ ॥

अर्धनारीश्वरलक्षणम् ।

अथ पाशुपतस्यापि चन्द्रशेखरवत् स्थितिः ।
त्र्यक्षश्चतुर्भुजो रौद्र ऊर्ध्वकेशो बृहत्तनुः ॥ ६० ॥
साक्षमालात्रिशूलोर्ध्वकरः सवरदाभयः ।

पाशुपतलक्षणम् ।

कङ्काला गमनोद्युक्तश्चाक्रान्तमणिपादुकः ॥ ६१ ॥
अर्धर्जुवदनो ढक्कावाद्योद्यतकरद्वयः ।
दक्षिणापरहस्तेन मृगपोताननं स्पृशन् ॥ ६२ ॥
प्रोतप्रेतास्थिकङ्कालं शूलं वामेन धारयन् ।
भिक्षापात्रं तु शिरसा वहन्भूतपुरोगतः ॥ ६३ ॥
तथा मदनसंमूढाः कार्याः स्युर्मुनियोषितः ।
सच्छत्रचामरकरगणाश्चैवानुयायिनः ॥ ६४ ॥

कङ्काललक्षणम् ।

ऋज्वागतः स्याद्धर्यर्धः समपादद्वयस्थितिः ।
ऊर्वाश्रितो वामकरः साभयो दक्षिणो भवेत् ॥ ६५ ॥
तथैव परहस्तौ द्वौ टङ्कशङ्खविभूषितौ ।
वामतः स्यात् किरीटार्धं कपर्दार्धं च दक्षिणे ॥ ६६ ॥
हर्यङ्गवत् स्याद् वामार्धं दक्षिणार्धं हराङ्गवत् ।
यथा रम्या तथा कार्या ह्येका मूर्तिर्हरीशयोः ॥ ६७ ॥

हरिहरलक्षणम् ।

समभङ्गवदेव स्यात् सूत्रं भिक्षाटनस्य तु ।
विप्रकीर्णजटाभारो दिग्वासा गमनोद्यतः ॥ ६८ ॥
लम्बितो दक्षिणकरः कुरङ्गमुखसङ्गवत्(?) ।
सकपालः करो वामस्तथास्योर्ध्वकरद्वये ॥ ६९ ॥

दक्षिणे स्याड्डमरुकं पिञ्छमाला तथापरे ।
भुजङ्गहारोपवीतकटिसूत्रविभूषितः ॥ ७० ॥
शेषं कङ्कालवत् सर्वमत्रापि च समूहयेत् ।

भिक्षाटनलक्षणम् ।

उमासहितवत् कुर्याच्चण्डानुग्रहकं परम् ॥ ७१ ॥

वरदो दक्षिणकरश्चण्डेशशिरसीतरः ।
कृताञ्जलिपुटश्चण्ड आसीनोऽधः शिवासनः ॥ ७२ ॥

चण्डेशानुग्रहलक्षणम् ।

तथैव दक्षिणामूर्तिरुपविष्टः शिवासने ।
अर्धर्जुवदनश्चारुजटाजूटविभूषितः ॥ ७३ ॥

अर्धेन्दुगङ्गाधुर्धूरकपालोरगशेखरः ।
साक्षमालानलकरस्त्वधो दक्षिणवामयोः ॥ ७४ ॥

विलसद्बोधमुद्रः स्याज्जान्वारूढकरस्तथा ।
दक्षिणोरुस्थवामाङ्घ्रिर्लम्बितान्यपदाम्बुजः ॥ ७५ ॥

क्रान्तापस्मारकस्तेन मुनिबृन्दैर्निषेवितः ।
न्यग्रोधाधो विधातव्यो व्याख्यानव्यापृतो विभुः ॥ ७६ ॥

दक्षिणामूर्त्तिलक्षणम् ।

कालकालो युक्तिवशान्नृत्ताभिनयवान् भवेत् ।
सशूलो दक्षिणभुजो भवेदाकर्णमुद्धृतः ॥ ७७ ॥

तत्रापरः सवरदः सूचीमुद्रस्तु वामतः ।
ना(ष्य ? भ्य)न्तश्चापरस्तत्र हल पल्लवसंयुतः ॥ ७८ ॥

भवेदुष्णीषसीमान्तश्चरणो दक्षिणः स्थिरः ।
नाभ्यन्तोद्धृतजानुः स्याद् वामोऽङ्घ्रिः कालहृद्गतः ॥ ७९ ॥

सकपर्देन्दुशकलस्त्रिणेत्रो रौद्रवेषधृक् ।
व्याघ्रचर्माम्बरः कार्यो नागाभरणभूषणः ॥ ८० ॥

कालोऽपि नीलवर्णः स्यादुत्तानः पातितो भुवि ।
पाशहस्तो विवृत्ताक्षो व्यादितास्यो भयङ्करः ॥ ८१ ॥

दंष्ट्री पिङ्गोर्ध्वकेशः स्याद्धराङ्घ्रचङ्गुष्ठपीडितः ।

कालकाललक्षणम् ।

लिङ्गोद्भवो लिङ्गमध्ये चन्द्रशेखरवत् स्थितः ॥ ८२ ॥
नलकाधः पदद्वन्द्वं लिङ्गमूले तिरोहितम् ।
दक्षिणेनोर्ध्वगः कार्यो हंसरूपी पितामहः ॥ ८३ ॥
वराहस्तु हरिर्वामे साञ्जलिः स्यादधोमुखः ।

लिङ्गोद्भवलक्षणम् ।

द्वारलिङ्गोच्छ्रितः श्रेष्ठो मध्यो वेदांशहानितः ॥ ८४ ॥
अर्धहीनः कनिष्ठः स्याद् वृषभो लक्षणान्वितः ।
द्वारादध्यर्धमुच्चो वा सपादद्विगुणोऽथवा ॥ ८५ ॥
हस्तादिनवहस्तान्तं नीचमध्योत्तमत्रयम् ।
वृषोत्सेधे तु पञ्चाशदंशे भागोऽङ्गुलं स्मृतम् ॥ ८६ ॥
उत्सेधात् पञ्चमांशेन आयामो वृषभस्य तु ।
मूर्ध्नो गलान्तः पङ्क्त्यंशैर्दीर्घः कण्ठोऽष्टमात्रकैः ॥ ८७ ॥
कण्ठादुरो विकारांशैरूर्वोर्दैर्घ्यं षडङ्गुलैः ।
द्विमात्रं जानु षण्मात्रा जङ्घा द्व्यंशोन्नतं खुरम् ॥ ८८ ॥
शृङ्गान्तरं स्याद् वस्वंशैः शृङ्गोच्चं चतुरङ्गुलम् ।
भालं नन्दांशविस्तीर्णं मुखव्यासः शराङ्गुलैः ॥ ८९ ॥
मुखोत्सेधस्तु बाणांशैर्नेत्रायामस्तु कोलकात्(?) ।
तद्व्यासः सार्धमात्रोऽस्माद् भागोच्चं चतुरङ्गुलम् ॥ ९० ॥
नेत्रकर्णान्तरं तावत् कर्णायामः शरांशकैः ।
सार्धमात्रायतं घ्राणं तद्व्यासावष्टमङ्गुलात् ॥ ९१ ॥
द्विव्यंशावधरोष्ठौ तु जिह्वा त्रिद्व्येकमात्रतः ।
दीर्घाततोच्चाथ ककुत् षड्वेदांशतनोर्नता(?) ॥ ९२ ॥
अपरोर्वोः क्रमाद् व्यासो दशाष्टचतुरङ्गुलैः ।
तदायामः शरांशैः स्याद् द्व्यंशं जान्वथ जङ्घयोः ॥ ९३ ॥
रामेष्वंशैस्ततिर्दैर्घ्यं खुरोत्तुङ्गं त्रिमात्रकम् ।
पुच्छायामस्तु ज[illegible]स्तृतिः ॥ ९४ ॥

लाङ्गूलाग्रं तु सार्धांशं मुष्कव्यासं त्रिमात्रकैः ।
तदायामो द्विमात्रः स्याच्छेफायामस्त्रिमात्रकः ॥ ९५ ॥

शेषमूहवशाद् युक्त्या कुर्याद् वा शयितं स्थितम् ।

वृषलक्षणाधिकारः ।

अथ त्रिशूलं द्वारोच्चं स्तम्भोच्चं वा विधीयते ॥ ९६ ॥

तदुच्चनन्दभागांशद्व्यंशोने मध्यमाधमे ।
हस्तैर्वा वेदरामाश्विसंख्यैः श्रेष्ठादिकं त्रयम् ॥ ९७ ॥

त्रिशूलोत्सेधबाणांशादंशस्तत्पत्रतुङ्गता ।
अर्धांशोच्चं मध्यपत्रं त्रिपर्वकुलिशाकृति ॥ ९८ ॥

पत्रोत्सेधे तु वस्वंशे स्यादंशात् पत्रविस्तृतिः ।
मध्यपत्रे मध्यपर्व द्वियवेनाधिकं भवेत् ॥ ९९ ॥

पत्रोच्चशरभागेंऽशादधोनालस्य दीर्घता ।
उत्तानाम्बुजवन्नालं नालोर्ध्वं पार्श्वपत्रके ॥ १०० ॥

सार्धद्व्यंशान्मध्यपत्रे स्थित्वा पार्श्वद्वयंभ्रमात् ।
पद्माग्रावधि शूलाग्रात् पार्श्वपत्रे तु वर्तयेत् ॥ १०१ ॥

ततो मध्यमपत्रस्य स्थित्वा दक्षिणपार्श्वयोः(?) ।
पार्श्वयोः पार्श्वपत्रान्तः सीमान्तं वर्तयेत् समम् ॥ १०२ ॥

मध्यपत्रस्य मूलं तु पत्रव्यासार्धविस्तृतम् ।
पत्रात् पादोनमग्रं स्यात् त्रिपादाद् वार्धतो घनम् ॥ १०३ ॥
शातप्रान्तानि पत्राणि तीक्ष्णधाराणि कारयेत् ।
मध्यपत्रस्य मध्ये तु पद्ममन्यत्र पत्रकम् ॥ १०४ ॥

मध्यपत्राग्रतारं स्यात् पादांशान्मुकुलोपमम् ।
वेणुपत्राकृती पार्श्वपत्राग्रे मध्यपत्रकः(?) ॥ १०५ ॥

तयोरन्तरमर्धांशाद् वृत्तमेवं प्रसाधयेत् ।
स्वायामात् पञ्चपञ्चांशात् स्यादङ्गाद् दण्डविस्तृतिः ॥ १०६ ॥

सुवृत्तं निर्व्रणं चारु नालाधः फलकान्वितम् ।
तदधो मण्डिकुम्भादिपादालङ्कारवद् भवेत् ॥ १०७ ॥

---

१० 'यं' क. पाठः.

दण्डमूलं सपद्मं स्यात् स्वव्यासत्रिगुणं तु तत् ।
ऊहप्रत्यूहतो युक्त्या शोभां सर्वत्र योजयेत् ॥ १०८ ॥
सौवर्णं राजतं ताम्रं लौहं वा स्यात् स्वशक्तितः ।

वृत्तत्रिशूललक्षणम् ।

अत्र स्वायम्भुवे —

> "वृत्तं त्रिभङ्गि वेतालमिति शूलं त्रिधा स्मृतम् ।
> शान्तिकं पौष्टिकं चाभिचारकं च क्रमेण तत् ॥"

इति ।

तत्र वृत्तं समाख्यातं त्रितयेऽपि च तत् समम् ॥ १०९ ॥
विशिष्टं तु त्रिभङ्गस्य पार्श्वपत्रद्वयस्य तु ।
मध्यं स्यादन्तरे भुग्नमर्धतः परिमण्डलात् ॥ ११० ॥

त्रिभङ्गशूलम् ।

वेतालस्यापि पत्राणि ऋज्वग्राण्यष्टमांशतः ।
वेतालो नालमूले तु तत्प्रोतः स्याच्छरांशतः ॥ १११ ॥
घण्टाचतुष्टयोपेतः फलकाश्रिचतुष्टये ।

वेतालशूललक्षणम् ।

वेतालशूलवत् सर्वं खट्वाङ्गस्यापि कारयेत् ॥ ११२ ॥
समुण्डं मध्यपत्रादौ प्राग्वद् वेतालसंयुतम् ।
मयूरपिञ्छवृत्ताढ्यं फलका मूलतो भवेत् ॥ ११३ ॥
अष्टाभिर्वा चतुर्भिर्वा घण्टाभिः प्राग्वदन्वितम् ।
खट्वेषावत् तु वेदाश्रो दण्डोऽस्य फलकाकृतिः ॥ ११४ ॥
लतापत्रादिचित्रः स्यादूहप्रत्यूहयुक्तितः ।

खट्वाङ्गस्याधिकारः ।

गणेशः पञ्चतालस्तु स्वासीनो वा स्थितौ भवेत् ॥ ११५ ॥
उष्णीषाधो मुखं तालं सार्धतालायताः कराः ।
कण्ठो भुग्नस्तु गूढः स्याद् गजवक्त्रस्त्रिलोचनः ॥ ११६ ॥

सार्धद्वितालं कण्ठाधोमानमाकटिसूत्रतः ।
सार्धतालायतौ पादौ पीवरः सर्वतो भवेत् ॥ ११७ ॥
इति मानमशेषतः स्फुटं सकलानां कथितं यथाक्रमम् ।
इह षोडशमूर्तिलक्षणं पृथगुक्तं निखिलं समासतः ॥ ११८ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे क्रियापादे
षोडशमूर्त्तिलक्षणं नाम त्रिचत्वारिंशः पटलः ॥

अथ चतुश्चत्वारिंशः पटलः ।

प्रासादे परिनिष्ठिते त्वथ तथा लिङ्गे प्रतिष्ठोचिते
प्रासादं परिगृह्य तक्षककरात् सूत्रत्रयावेष्टितम् ।
कौश्या चापि च मालया च परितः संवेष्ट्य धान्याक्षतैः
सर्वत्र प्रविकीर्य पूर्णकलशं दीपं च मध्ये न्यसेत् ॥ १ ॥
ततः कृणुष्वादिकमत्र सूक्तं त्वर्धर्चशोऽन्ते तु दहाशसाद्यम् ।
ऋचोऽर्धमायोज्य जपेदशेषं रक्षोघ्नमेवं तु जपादिषु स्यात् ॥ २ ॥
कृत्वा पुनः स्थण्डिलमग्निभागे तत्राग्निमाधाय तथाविधानम् ।
हुत्वा पुरैवाग्निमुखं जुहोतु रक्षोहणं वाजिनमित्युभाभ्याम् ॥ ३ ॥
पुनः कृणुष्वादिभिरत्र मन्त्रैराज्येन हुत्वा तु यथाक्रमेण ।
तद्वद् विभिन्नैरथ पञ्चभिर्येदवादिमन्त्रैर्जुहुयाच्चतुर्भिः ॥ ४ ॥
इषेत्वेत्यादिना तद्वदग्निमीलेति चादिना ।
अग्नआयाहिपूर्वेण शन्नोदेवीरभीति च ॥ ५ ॥
ततस्तु पञ्चदुर्गाभिर्वेदोक्ताभिर्जुहोतु च ।
जातवेदस इत्याद्या ऋग् दुर्गा प्रथमा भवेत् ॥ ६ ॥
तामग्निवर्णामित्याद्या द्वितीया समुदीरिता ।
अग्ने त्वं पारयानव्यो अस्मानाद्यं तृतीयकम् ॥ ७ ॥
विश्वानि नो दुर्गहाद्यश्चतुर्थो मन्त्र ईरितः ।
पृतनाजितमित्यादिः पञ्चमो मन्त्र उच्यते ॥ ८ ॥
एताभिः पञ्चदुर्गाभिराज्येन जुहुयात् पृथक् ।
ततो व्याहृतिभिस्तद्वदघोरास्त्रेण वै पुनः ॥ ९ ॥

पश्चादपामार्गसमिद्घृताभ्याममनेन चाज्येन शतं जुहोतु ।
अष्टोत्तरं स्विष्टकृतं च पश्चाच्छिष्टाज्यमादाय तथाम्बुशेषम् ॥ १० ॥
आदाय तद्भस्म च मिश्रयित्वा पात्रे त्वपामार्गरसेन युक्तम् ।
तेनाखिलं तद्भवनालयाद्यं संप्रोक्षयेत् तत्परितस्तु दर्भैः ॥ ११ ॥
तमग्निमादाय तथैशकोणे संस्थाप्य पश्चात् तु चतुष्पथे वा ।
विसर्जयेद् रक्तजलान्नपिण्डैर्दत्त्वा बलिं दिक्षु समाप्य चैवम् ॥ १२ ॥
तत्रैव वास्तूपशमं विदध्यात् पूर्वोत्तरस्यां दिशि मण्डपस्य ।
आधाय तु स्थण्डिलमध्यतोऽग्निं संस्तीर्य दर्भैस्तु यथावदिष्ट्वा ॥ १३ ॥
प्राच्यां तु वह्नेः कृतमण्डलायां भूमौ समं शालिभिरास्तृतायाम् ।
वस्त्रावृतं तण्डुलमत्र कृत्वा तच्चापि वस्त्रेण समास्तृतं स्यात् ॥ १४ ॥
शम्यङ्कुराद्यं विनिकीर्य तस्मिन् संस्थाप्य तत्राक्षतपूर्णकुम्भान् ।
जलेन चापूर्य घटं तथान्यं सहेमवस्त्राक्षतगन्धपुष्पम् ॥ १५ ॥
शन्नोदेवीति मन्त्रेण शान्ति संस्मृत्य तं जपेत् ।
तस्मिन् स्वगृह्योक्तविधानतोऽग्निमाधाय तत्राग्निमुखं विधाय ।
गोक्षीरसिद्धं चरुमाज्यसिक्तं मन्त्रैरमीभिः क्रमशो जुहोतु ॥ १६ ॥
वास्तोष्पते प्रतिजानीह्यस्मानित्यादिमुक्त्वा तु पुरोनुवाक्याम् ।
वास्तोष्पते शमया संसदा तेत्याद्यं तु याज्यां जुहुयादुदीर्य ॥ १७ ॥
वास्तोष्पते ध्रुवा स्थूणात् ततो गृह्यंभयादिना ॥ १८ ॥
अक्षिस्पन्दादिना चैव दुःस्वप्नेत्यादिनापि च ।
वास्तोष्पते प्रतरणो न एधीत्यादिनापि च ॥ १९ ॥
अमीवहा वास्तोष्पतेत्यादिना च जुहोति वै ।
पञ्चब्रह्मभिराज्येन शंनवर्गैर्जुहोति च ॥ २० ॥
शम्याश्च समिधः सर्पिश्चरुं चैव जुहोत्यथ ।
स्नपिताः पञ्चगव्येन दूर्वाश्चाष्टोत्तरं शतम् ॥ २१ ॥
शंनोदेवीति मन्त्रेण जयादीन् जुहुयात् ततः ।
कृत्वा स्विष्टकृतं पश्चादुपलिप्य च भूतलम् ॥ २२ ॥
तत्राग्नेः पुरतो दर्भानास्तीर्य हुतशेषितम् ।
नमो रुद्राय वास्तोष्पत इत्यादिना क्षिपेत् ॥ २३ ॥

अनेनैव तु मन्त्रेण स्थालीं संक्षाल्य तज्जलम्।
पात्रे प्रक्षाल्य कस्मिंश्चिच्छेषाज्यं शेषमम्बु च ॥ २४ ॥
एकीकृत्य तु मन्त्रेण शाखयोदुम्बरस्य वा।
पालाशशाखया वाथ दर्भमुष्ट्याथवा पुनः ॥ २५ ॥
प्रासादमण्डपादौ तु सर्वत्र त्रिः प्रदक्षिणम्।
पर्युक्षन्नथ पर्येति ततः सम्पूज्य वै द्विजान् ॥ २६ ॥
त्वं विप्रस्त्वं कविरिति मन्त्रेणानेन भोजयेत्।
आशिषो वाचयित्वाग्रे शिवं वास्त्विति वाचयेत् ॥ २७ ॥
प्रासादशान्त्यर्थमपीह शुद्धौ रक्षोघ्नहोमोऽपि च वास्तुहोमः।
लिङ्गप्रतिष्ठाविधिपूर्वकाले कर्तव्य इत्यत्र यथावदुक्तः ॥ २८ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे क्रियापादे
रक्षोघ्नहोमवास्तुहोमपटलश्चतुश्चत्वारिंशः ॥

अथ पञ्चचत्वारिंशः पटलः।

लिङ्गानां निष्कलादीनां प्रतिष्ठा पञ्चधा स्मृता।
प्रतिष्ठा स्थापनं तद्वत् स्थितस्थापनमित्यपि ॥ १ ॥
उत्थापनास्थापने च पृथक् तल्लक्ष्म लिख्यते।
यत्र ब्रह्मशिलायां तल्लिङ्गमादौ निधाय तु ॥ २ ॥
क्रियते पिण्डिकायोगस्तां प्रतिष्ठां प्रचक्षते।
स्थापनं बाणलिङ्गानामार्षाणां च स्वयम्भुवाम् ॥ ३ ॥
रत्नहेमादिलिङ्गानामेका चेत् पिण्डिका तदा।
स्थितस्थापनमुद्दिष्टं जीर्णे चोत्थापनं भवेत् ॥ ४ ॥
आस्थापनं स्याद् व्यक्तानां विष्ण्वादीनां च तत् तथा।
अथोत्तरायणे पूर्वपक्षे लग्ने गुणान्विते ॥ ५ ॥
प्रशस्ततिथिनक्षत्रवारयोगदिनादिके।
दोषैर्गुणैश्च पूर्वोक्तैर्हीने युक्ते सुसम्मते ॥ ६ ॥
यजमानानुकूले च प्रतिष्ठाकर्म शस्यते।
प्रासादस्याग्रतः कुर्याच्चतुरश्रं तु मण्डपम् ॥ ७ ॥

प्रशस्ततरुवंशाद्यैर्नूतनैः सुमनोरमम् ।
हस्तादिनवहस्तान्तलिङ्गानां प्रथमात्रिके ॥ ८ ॥
वसुनन्ददिशाहस्तैरथार्कमनुषोडशैः ।
तृतीये स्याद् धृतिकृतिकरैश्चोत्कृतिसम्मितैः ॥ ९ ॥
पर्यन्तभित्तिसंयुक्तं चतुर्दिग्द्वारशोभितम् ।
एकाशीतिपदांशस्य स्यान्मध्यनवकेन तु ॥ १० ॥
रसार्कषोडशांशोच्चां वेदिं कुर्यान्मनोरमाम् ।
कुण्डाष्टकं तु पूर्वादिदिक्षु कुर्याद् यथाक्रमम् ॥ ११ ॥
वेदाश्रयोनिखण्डेन्दुत्र्यश्रं वृत्तं षडश्रकम् ।
पद्माकारं च वस्वश्रं नवमं चतुरश्रकम् ॥ १२ ॥
तच्चेन्द्रेशानयोर्मध्ये प्राङ्मुखेंऽशे विधीयते ।
रक्षोवरुणयोर्मध्ये लिङ्गे स्यात् पश्चिमामुखे ॥ १३ ॥
सर्वाणि चतुरश्राणि वृत्तानीत्यपि केचन ।
कनिष्ठादित्रिलिङ्गानां रत्न्यरत्निकराणि तु ॥ १४ ॥
कनिष्ठादीनि कुण्डानि स्युर्वात्राहुतिसंख्यया ।
स्युः पञ्चमूर्तिपक्षे तु पञ्च कुण्डानि तान्यपि ॥ १५ ॥
चतुरश्राणि दिक्ष्वीशशक्रमध्ये तु पञ्चकम् ।
एकं वैन्द्र्यां भवेत् कुण्डमशक्तौ वा कनिष्ठके ॥ १६ ॥
प्रागुदीच्यां तु वोदीच्यामधिवासनमण्डपात् ।
कुर्यादर्धप्रमाणेन तद्वत् स्नपनमण्डपम् ॥ १७ ॥
तस्यैककोष्ठपङ्क्तिं तु त्यक्त्वाथ परितो बहिः ।
स्नानवेदिं षडंशोच्चां परितस्तु रसांशकैः ॥ १८ ॥
उच्चव्याससमां कुर्याच्छोभनां तु वितर्दिकाम् ।
जलनिर्गमनालं च भवेदुत्तरतः शुभम् ॥ १९ ॥
कुण्डसंख्यासमं कुर्यात् स्रुक्स्रुवाद्यं पृथक् पृथक् ।
निद्राकुम्भं शान्तिकुम्भाञ्छिवकुम्भास्त्रवर्धनीः ॥ २० ॥
विघ्नेशलोकपालानां कुम्भान् वा तोरणाश्रितान् ।
अभ्यङ्गपात्रं वस्त्राणि तद्वच्चैवाष्टमङ्गलम् ॥ २१ ॥

1, 'स्त' ख. पाठः.

तण्डुलांश्च चरुस्थालीः कलशान् पञ्चगव्यकम् ।
नवरत्नानि च वर्णं प्रभूते मधुसर्पिषी ॥ २२ ॥
पर्वताग्रनदीतीरकुलीरह्रदतीर्थजाः ।
वृषेभशृङ्गवल्मीकसरस्तीरभुवो मृदः ॥ २३ ॥
अष्टौ समुद्रसरितां तीर्थानां सलिलानि च ।
ततः क्षीरागजम्ब्वाम्रत्वचः किसलयानि च ॥ २४ ॥
रौप्यपात्रद्वयं हेमशलाके भद्रपीठकम् ।
सर्वौषधीर्धातुबीजलोहानि मुसलादिकम् ॥ २५ ॥
गृहोपस्करजातं यदनुक्तमपि चाहरेत् ।
अमत्रयन्त्रि[1]काधारान् गुलखण्डं च गुग्गुलुम् ॥ २६ ॥
चन्दनागरुकर्पूरकुङ्कुमं योगपट्टिकाम् ।
ताम्बूलं क्रमुकं तैलं खट्वां वा फलकां नवाम् ॥ २७ ॥
नवकम्बलदेवाङ्गपट्टाद्यं शयनोचितम् ।
सर्वमुत्तरवेद्यां तु लक्षणोद्धारमण्डपे ॥ २८ ॥
विन्यसेन्नवकोष्ठेषु शिवकोष्ठादिषु क्रमात् ।
मध्ये तु शिवकोष्ठं स्यात् प्रागाद्यष्टदिशास्वपि ॥ २९ ॥
सादेशेश्वरविद्याख्यमायाकालनियामिकाः ।
पुरुषः प्रकृतिश्च स्युस्तत्त्वान्तं कोष्ठकानि तु ॥ ३० ॥
दुग्धादिपञ्चगव्यानि मध्ये दिक्कोष्ठकेषु च ।
जलं होमोपकरणं वासो धूपोपयोगि यत् ॥ ३१ ॥
आग्नेये त्वथ नैर्ऋत्ये दीपनीराजनादिकम् ।
त्वक्कषायाद्यमानिले चैशे स्याच्चन्दनादिकम् ॥ ३२ ॥
अन्यच्च कारकव्रातं यथोद्देशं निधापयेत् ।
स्युः प्लक्षोदुम्बराश्वत्थन्यग्रोधैस्तोरणानि तु ॥ ३३ ॥
शान्तिभूतिबलारोग्यनामान्यैन्द्रादितः क्रमात् ।
कनिष्ठादित्रिलिङ्गानां शरर्तुमुनिकिष्कुभिः ॥ ३४ ॥
तुङ्गानि तु तदर्धान्तर्विस्ताराणि शुभानि च ।
नन्दरुद्रातिजगतीतुङ्गशूलान्यनुक्रमात् ॥ ३५ ॥

---

[1] 'काधिकारान्' ख. पाठः.

वसुपङ्क्तिजगत्यंशैस्तच्छूलान्तरविस्तृतिः ।
शूलानामर्यमा मित्रस्त्वष्टा भगपुरन्दरौ ॥ ३६ ॥
पर्जन्यविष्णू सविता धा[1]तेशो वरुणस्तथा ।
पूषा च देवताः प्रोक्ताः प्रागाद्येषु त्रयस्त्रयः ॥ ३७ ॥
समूलान् कदलीस्तम्भान् फलपल्लवमण्डितान् ।
सा[2]लेवालुजलान् द्वौ[3]द्वौ स्थापयेत् तोरणाश्रयान् ॥ ३८ ॥
ततो दुकूलदेवाङ्गपट्टवस्त्रादिभिर्नवैः ।
यथाशोभं विभूष्योर्ध्वमधिवासनमण्डपम् ॥ ३९ ॥
स्तम्भानप्यहतैर्वस्त्रैराच्छाद्य क्षालितैः सितैः ।
मुक्तादामस्रगालम्बपूगपुष्पाद्यलङ्कृतम् ॥ ४० ॥
दर्भस्रजा च परितः संवेष्ट्यास्त्रमनुस्मरन् ।
दर्भसन्दर्भमार्जन्या सपलाशपलाशया ॥ ४१ ॥
ऐन्द्राद्यैशानपर्यन्तं मार्जयित्वा प्रदक्षिणम् ।
गायत्र्या चोपलिप्यान्तर्गालितोदकगोमयैः ॥ ४२ ॥
आपःपुनन्त्वित्याद्येन प्रोक्षयेद् गन्धवारिणा ।
इषेत्वेत्यादिना दर्भैरक्षतैः कुसुमैः सितैः ॥ ४३ ॥
विकीर्याद्येण वा भूमौ सिद्धार्थैः परितोऽस्त्रतः ।
ततोऽधिवासनं कुर्यादाचार्यो मूर्तिपैर्युतः ॥ ४४ ॥
वेदविद्याव्रतस्नातान् कुलीनाञ् शुभलक्षणान् ।
नात्यन्तबालवृद्धांश्च श्रुतवृत्तादिभूषितान् ॥ ४५ ॥
पूर्वोक्तमन्त्रैस्तानष्टौ वरयित्वाभिपूज्य च ।
पञ्च वा पञ्चपक्षे तान् मन्त्रैस्तैरेव पञ्चभिः ॥ ४६ ॥
वस्त्राङ्गुलीयकटकैर्भूषयेदपि शक्तितः ।
सप्तमे पञ्चमे वाह्नि पूर्वं कृत्वाङ्कुरार्पणम् ॥ ४७ ॥
आचार्यो यजमानेन पूर्ववत् प्रार्थितोऽर्चितः ।
कृतनित्यक्रियः स्नात्वा वाग्यतो मण्डपान्तिके ॥ ४८ ॥

---

१. 'तेशावरु', २. 'का', ३. 'वौ' ख. पाठः.

प्रक्षाल्य पाणिचरणान् समाचम्य प्रसन्नधीः ।
स्थण्डिले मण्डपाद् बाह्ये गणेशं सम्यगर्चयेत् ॥ ४९ ॥
स्रग्गन्धधूपदीपाद्यैः फलमोदकलड्डुकैः ।
निर्विघ्नं प्रार्थयत् कर्म लब्धानुज्ञस्ततो गुरुः ॥ ५० ॥
योगे योगेति वा (योगः ?) मूलाद् योजयेत् तोरणान् क्रमात् ।
देवस्य त्वेति वा स्वाङ्गैः शूलैरायोजयेदपि ॥ ५१ ॥
आच्छाद्याहतवासोभिश्चूताश्वत्थदलैरपि ।
उच्छिष्टब्रह्मणोमन्त्रात्[1] प्रागाद्यन्तांस्तु विन्यसेत् ॥ ५२ ॥
आपूर्य गर्तानाकोट्य मूलान्यालिप्य गोमयात् ।
ध्वजान् दिक्षु तथा मध्ये लोकपालायुधाङ्कितान् ॥ ५३ ॥
श्वेतेन्द्रचापसंरक्तकृष्णश्यामलधूम्रकान् ।
पीतपद्मारुणान् पाण्डुतापिञ्छधवलप्रभान् ॥ ५४ ॥
मध्ये पाशुपतास्त्रेणाप्यघोरास्त्रेण पातयेत् ।
अध्यर्धतोरणादुच्चा ध्वजाः सर्वे पताकिनः ॥ ५५ ॥
ध्वजाधिपतयो भृङ्गी महासेनवृषौ ततः ।
नन्दीशश्च महाकालः कुम्भोदरमहोदरौ ॥ ५६ ॥
वीरभद्रस्तथा ब्रह्मा वास्त्वीशश्चेति कीर्तिताः ।
अथ मूर्तिधरैर्विप्रैर्वेदिकायास्तु मध्यतः ॥ ५७ ॥
स्ववेदविहितं पूर्वं पुण्याहं कारयेद् गुरुः ।
कुलशीलश्रुताचारसंपन्नाः शुभलक्षणाः ॥ ५८ ॥
द्वात्रिंशत् षोडशाष्टौ वा ब्राह्मणा वेदपारगाः ।
कृच्छ्रादिव्रतसंशुद्धा वृताः प्रागेव पूजिताः ॥ ५९ ॥
प्राग्दक्षिणोत्तरप्रत्यगुपविष्टा दृढव्रताः ।
कुर्युरध्ययनस्यादौ स्वशाखानुमतं दिशि ॥ ६० ॥
प्रतिष्ठाङ्गतयोद्दिश्य पुण्याहं बह्वृचादिकम् ।
गुरुः पुण्याहसलिलैर्मण्डपान्तः प्रदक्षिणम् ॥ ६१ ॥
प्रोक्षयेद् दर्भकूर्चेन तोरणाद्यं च बाह्यतः ।
तदैवाध्ययनं विप्राः प्रारभेरन् यथादिशम् ॥ ६२ ॥

---

[1] 'न्' क. पाठः.

सामान्यार्घ्यमथापाद्य गन्धपुष्पाक्षतादिभिः ।
ध्वजाननु यजेत् पूर्वं तारस्वाख्यानमोन्तकम् ॥ ६३ ॥
शान्त्यादितोरणांश्चेष्ट्वा स्वाख्याभिः शूलगान् रवीन् ।
ततस्तोरणशाखानां मूलकुम्भेषु पूजयेत् ॥ ६४ ॥
महोदरमहाकायौ महाकण्ठं महोदरम् ।
अग्निनेत्रं चाग्निजिह्वं विरूपाक्षमथोत्तरे ॥ ६५ ॥
विशालाक्षं च पूर्वादिक्रमादष्टौ गणेश्वरान् ।
सहस्रवीचीं विमलां शतधारां प्रमोदिनीम् ॥ ६६ ॥
द्वाराणां सौम्यकुम्भेषु पूजयेद् द्वारदेवताः ।
कुम्भकर्णं भद्रकर्णं श्वेतकर्णं च नामभिः ॥ ६७ ॥
गोकर्णमपि पूर्वादिद्वारदक्षिणकुम्भगान् ।
ततस्तालत्रयच्छोटिपार्ष्णिघातनिरीक्षितैः ॥ ६८ ॥
दिव्यान्तरिक्षभूमिष्ठान् विघ्नान् द्वारगतान् हरेत् ।
पश्चिमद्वारमासाद्य नाराचास्त्रं प्रयोजयेत् ॥ ६९ ॥
अस्पृशन् देहलीमन्तर्वामशाखाश्रितो विशेत् ।
विन्यस्यास्त्रं तु देहल्यां परिक्रम्य प्रदक्षिणम् ॥ ७० ॥
प्राङ्मुखो नैर्ऋते स्थित्वा वास्त्वीशं भुवि पूजयेत् ।
वास्तुदेवाधिपं मध्ये ब्रह्माणं स्वासनं तथा ॥ ७१ ॥
उत्तराशामुखं तस्मादुपविश्य प्रसन्नधीः ।
भूतशुद्धिं च कृत्वादौ सकलीकरणं ततः ॥ ७२ ॥
तर्जन्या मण्डपाद् बाह्ये वप्रमस्त्राद् विधाय तु ।
मूलाभिमन्त्रितोष्णीषमुत्तरीयं च धारयन् ॥ ७३ ॥
विशेषार्घ्यं समापाद्य तेन प्रोक्षितमस्तकः ।
दक्षिणे चन्दनालिप्ते शिवहस्तं विधाय तु ॥ ७४ ॥
तेजोरूपं तु शान्त्यन्तं शिवमुच्चार्य संस्मरन् ।
तमात्ममूर्ध्नि विन्यस्य शिवोऽहमिति भावयन् ॥ ७५ ॥
तत्त्वदृष्ट्या तु निखिलं मण्डपाद्यं विलोक्य तु ।
ज्ञानखड्गकरः प्राग्वत् पञ्चकोष्ठे यथाविधि ॥ ७६ ॥

पञ्चगव्यं समासाद्य नैर्ऋत्यां मण्डपे स्थितः ।
निक्षिप्य विकिरानैशे शिवकुम्भास्त्रवर्धनी ॥ ७७ ॥
चलासने समापूर्य शिवाभ्यां समधिष्ठिते ।
पूजयेद् गन्धपुष्पाद्यैर्वृषकेसरिवाहने ॥ ७८ ॥
ततः प्रशान्ताशिशिरपर्जन्याशोकसंज्ञितान् ।
सञ्जीवनामृतार्थेशकुम्भान् द्वारेषु युग्मशः ॥ ७९ ॥
विन्यस्योभयतस्तेषु नन्द्यादीन् द्वारपान् यजेत् ।
नन्दीशं च महाकालं भृङ्गीशं च गजाननम् ॥ ८० ॥
वृषभं षण्मुखं देवीचण्डौ पूर्वादितः क्रमात् ।
स्वदिग्विन्यस्तकुम्भेषु शक्रादीन् दश दिक्पतीन् ॥ ८१ ॥
आवाह्याभ्यर्च्य वर्धन्या कुम्भं प्राग्वत् प्रदक्षिणम् ।
परिभ्राम्य तु विन्यस्य कुम्भं दर्भोपसंहृतैः ॥ ८२ ॥
विकिरैरासनं कृत्वा वर्धनीं तत्र विन्यसेत् ।
ततः शक्रादिलोकेशान् शिवाज्ञां श्रावयेत् क्रमात् ॥ ८३ ॥

ओं ।

भो भो शक्र! त्वया स्वस्यां दिशि विघ्नप्रशान्तये ।
स्थातव्यं सावधानेन त्वायागान्तं शिवाज्ञया ॥ ८४ ॥

इत्यादिना ब्रह्मानन्तान्तं स्वस्वनामभिः श्रावयेत् ।

ततो गन्धादिभिः सम्यगिष्ट्वा कुम्भं च वर्धनीम् ।
निवेद्यान्तं ततस्तस्मै ज्ञानखड्गं समर्पयेत् ॥ ८५ ॥
प्रार्थयेदपि चानेन

ओं ।

आयागान्तं त्वया शम्भो! स्थातव्यं सगणेन तु ।
ससुतेन सहाम्बेन यागाध्यक्षेण शङ्कर! ॥ ८६ ॥
तथेत्युक्तः शिवेन तु ।
अर्घ्यं निधाय कुम्भाग्रे विकिरैर्यागमण्डपात् ॥ ८७ ॥
ज्वलदस्त्रात्मकैर्विघ्नान् निरस्तान् दूरतः स्मरेत् ।
ततो मध्यमकुण्डाग्र उपविश्य यथाविधि ॥ ८८ ॥

यथावत् संस्कृते कुण्डे समाधाय शिवानलम् ।
नामान्तं पञ्चसंस्कारैः संस्कृत्याराध्य तं गुरुः ॥ ८९ ॥
मध्यादिनवदिक्संस्थं पञ्चधा वा विभाजितम् ।
तत्तद्दिगनलांशांस्तु तत्तत्कुण्डे निधापयेत् ॥ ९० ॥
ततो मध्यमकुण्डाग्नौ शिवमावाह्य देशिकः ।
मन्त्राणां तर्पणं कुर्यात् तच्च मूलं शिवान्तिकम् ॥ ९१ ॥
चतुर्थ्यग्निप्रियान्तं स्यात् तेन त्वष्टोत्तरं शतम् ।
हुत्वा ब्रह्माङ्गमन्त्राणां तद्दशांशं जुहोति च ॥ ९२ ॥
संस्थाप्य प्रतिकुण्डं तु शान्तिकुम्भाञ्छिवास्त्रतः ।
संपाताभिहुतान् कृत्वा गुरुर्मूर्तिधरैः सह ॥ ९३ ॥
हुत्वा पूर्णाहुतिं यायाल्लक्षणोद्धारमण्डपम् ।
तच्चोत्तरेऽथवैशान्यामधिवासनमण्डपात् ॥ ९४ ॥
कुर्याद् वेदित्रयोपेतं लक्षणोद्धारमण्डपम् ।
तस्मिन् दक्षिणवेद्यां तु लिङ्गं पीठे निधाय तु ॥ ९५ ॥
पीठं च तद्दक्षिणतः कुर्यादाकारशोधनम् ।
अष्टमृद्भिः पुरोक्ताभिः कषायैश्च क्रमोदितैः ॥ ९६ ॥
गोमूत्रगोमयाभ्यां च पुष्पधूपजलान्तरैः ।
स्नापयित्वा द्वितीयायां वेद्यां वा स्थण्डिले कृते ॥ ९७ ॥
शालिभिस्तण्डुलैश्चापि तस्मिल्लिङ्गं निधाय तु ।
पूर्वोक्तेन विधानेन लक्षणोद्धारमाचरेत् ॥ ९८ ॥
अथाष्टौ वा चतस्रो वा नार्यो मङ्गल्यलक्षणाः ।
दर्भैः स्पृशेयुस्तल्लिङ्गं कुर्युर्नीराजनं तथा ॥ ९९ ॥
सन्ताड्यास्त्रेणार्घ्यतोयैः कवचेनावकुण्ठ्य तु ।
स्वमन्त्रेणाथवा कुर्यात् पूजां साधारणेन वा ॥ १०० ॥
गोमूत्रगोमयक्षीरदध्याज्यमधुभिः पृथक् ।
पञ्चगव्यकुशाम्बुभ्यां गन्धाद्भिश्चाभिषेचयेत् ॥ १०१ ॥
ततो वसनगन्धस्रग्धूपदीपोपहारकैः ।
इष्ट्वा रथादावारोप्य भेरीपटहडिण्डिमैः ॥ १०२ ॥

झल्लरीतिमिलाशङ्खतालमर्दलकाहलैः ।
वेणुमड्डुकवीणादिवादित्रध्वनिमङ्गलैः ॥ १०३ ॥
गीतनृत्तजयाशीर्भिः प्रदीपच्छत्रचामरैः ।
प्रेक्षणीयैर्ध्वजैश्चान्यैर्ग्रामादेस्तु प्रदक्षिणम् ॥ १०४ ॥
कृत्वा जलाधिवासार्थं नदीतीर्थह्रदादिकम् ।
आसाद्य तीरे स्वालिप्ते देवं संस्थाप्य पूजयेत् ॥ १०५ ॥
प्रागेव जलमध्ये तु नाभिदघ्नचतुष्पदीम् ।
प्रपां कृत्वा तु तन्मध्ये पीठादौ शाययेच्छिवम् ॥ १०६ ॥
वेष्टितं वसनैर्दर्भैः प्राक्छीर्षं चोर्ध्वसूत्रकम् ।
तत्पार्श्वे विन्यसेत् पीठं दर्भवस्त्रादिभूषितम् ॥ १०७ ॥
रक्षायै कलशानष्टौ लोकपालाधिदैवतान् ।
विन्यस्य दिक्षु संपूज्य परितो रक्षिणस्तथा ॥ १०८ ॥
पञ्चत्रिद्व्येकरात्रं वा दिनार्धं याममेव वा ।
अतीत्योत्तारयेल्लिङ्गं तीरे विन्यस्य पूजयेत् ॥ १०९ ॥
संस्नाप्य पञ्चगव्याद्यैर्नवभिः कलशैरपि ।
आलिप्य गन्धपङ्केन रक्तकौशेयवाससा ॥ ११० ॥
आच्छाद्य हेममालाभिरलङ्कृत्याभिपूज्य च ।
रथादियानमारोप्य नृत्तगीतादिमङ्गलैः ॥ १११ ॥
स्तुतिभिर्ब्रह्मघोषैश्च ग्रामादेस्तु प्रदक्षिणम् ।
लिङ्गं तु कारयेत् तत्र हिरण्यवसनादिकम् ॥ ११२ ॥
कपर्दपूगताम्बूलरूप्यलाजाक्षतादिकम् ।
किरन्तो यजमानाद्याः पुष्पवृष्टीश्च पुष्कलाः ॥ ११३ ॥
गुरुर्देवाग्रतो गच्छेद् यजमानश्च पृष्ठतः ।
सामान्यार्घ्यजलैर्मार्गं सिञ्चेयुर्मूर्तिधारकाः ॥ ११४ ॥
स्नानमण्डपमासाद्य परिभ्राम्य प्रदक्षिणम् ।
प्रतीच्यां मण्डपद्वारि देवं समवतारयेत् ॥ ११५ ॥
अर्घ्यं तु पादयोर्दत्त्वा मण्डपान्तः प्रवेशयेत् ।
तन्मध्ये भद्रपीठस्य विवरे स्थापयेच्छिवम् ॥ ११६ ॥

पीठं च दक्षिणे भागे गन्धाद्यैः पूजयेदपि ।
इति प्रतिष्ठाविधिमण्डपादिकं सकारकं चाकरशोधनं तथा ।
यथावदुक्तं च जलाधिवासनं विचार्य नैकाः शिवतन्त्रपद्धतीः ॥ ११७½ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे क्रियापादे
प्रतिष्ठाविधिलक्षणपटलः पञ्चचत्वारिंशः ॥

अथ षट्चत्वारिंशः पटलः ।

अथ मूर्तिधरैः सार्धं स्नात्वाचार्यः प्रसन्नधीः ।
क्षालिताङ्घ्रिः समाचम्य प्रविश्य स्नानमण्डपम् ॥ १ ॥
पुण्याहं वाचयित्वाग्रे गणेशं दक्षिणे यजेत् ।
विधाय विकिरक्षेपं शिवकुम्भं च वर्धनीम् ॥ २ ॥
निधायाभ्यर्च्य तद्भान्त्या कृतरक्षे तु मण्डपे ।
प्राच्यामेकोनपञ्चाशत् कलशान् विन्यसेत् क्रमात् ॥ ३ ॥
प्राचीनोत्तरगैः सूत्रैर्दशभिर्दशभिः पृथक् ।
मध्ये स्युर्नवकोष्ठानि दिक्षु [1]पङ्क्तिद्वयत्रयम् ॥ ४ ॥
संस्थाप्य मार्जयेत् पङ्क्तीर्यथा वीथीचतुष्टयम्(?) ।
पदषट्कं पृथग् दिक्षु कोणे कोणे चतुष्पदम् ॥ ५ ॥
नवकस्य तु पूर्वादिकलशे पूरयेत् क्रमात् ।
कषायं चैव गोमूत्रं पञ्चगव्यं तथा पयः ॥ ६ ॥
भूतिं दधि तदा मृत्स्नाः कुशाम्भश्च स्मरेच्च तान् ।
समुद्रान् सप्त गर्भाब्धिमष्टमं कलशं स्मरेत् ॥ ७ ॥
मध्ये तु ब्रह्मकलशं पूरयेद् गन्धवारिभिः ।
द्वितीयावरणे त्वाज्यं गोमयं मधु चैक्षवम् ॥ ८ ॥
रत्नोदकं नालिकेरं मातुलुङ्गं च दाडिमम् ।
रम्भाफलं च जम्बीरं पनसं बिल्वमेव च ॥ ९ ॥
चन्दनागरुकर्पूरकुङ्कुमाम्भांसि षोडश ।
तृतीयावरणस्थांस्तु घटान् सङ्कृतिसंख्यकान् ॥ १० ॥

---

[1] 'कोष्ठत्रयम् त्रयम्' ख. पाठः

गङ्गादिकानि तीर्थानि संस्मृत्य परिपूरयेत् ।
गङ्गां शतद्रुं यमुनां नर्मदां च सरस्वतीम् ॥ ११ ॥
गोमतीं सरयूं सिन्धुं शोणां तापीं परुष्णिकाम् ।
गोदावरीं कृष्णवेणीं नन्दां भीमरथीमपि ॥ १२ ॥
तुङ्गभद्रां वेगवतीं कावेरीं ताम्रपर्णिकाम् ।
प्रभासं नैमिशं चाथ गोकर्णं च त्रिपुष्करम् ॥ १३ ॥
केदारं चैव पूर्वादिकुम्भेषु क्रमशः स्मरेत् ।
स्वाशासु ब्रह्मभिश्चाङ्गैर्विन्यस्य नवकं यजेत् ॥ १४ ॥
द्वितीयावरणे कुम्भान् विद्येशैश्चाष्टमूर्तिभिः ।
तृतीयावरणे तत्त्वैः शक्त्याद्यैस्तु धरान्तकैः ॥ १५ ॥
दशेन्द्रियमनोवर्जैस्तारस्वाख्यानमोन्तकैः ।
विन्यस्तैस्तैर्यजेत् कुम्भान् सकूर्चान् सूत्रवेष्टितान् ॥ १६ ॥
सहेमरत्नवसनांश्चन्दनस्रगलङ्कृतान् ।
सचूतपिप्पलदलान् सपिधानफलाक्षतान् ॥ १७ ॥
कुम्भान् यथावदापूर्य गन्धाद्यैरभिपूजयेत् ।
अथ पश्चिमभागे तु कृत्वा नव पदानि तु ॥ १८ ॥
कलशानां तु नवकं मूर्तीशाष्टकसंयुतम् ।
मध्ये शिवेन संयुक्तमापूर्याभ्यर्च्य देशिकः ॥ १९ ॥
पञ्चकोष्ठेष्वथैशान्यां कुम्भान् पञ्चामृतैः क्रमात् ।
पञ्चब्रह्मभिरापूर्य हेमकूर्चान्वितान् यजेत् ॥ २० ॥
प्राच्यां तु स्थण्डिले वह्निं प्रतिष्ठाप्य यथाविधि ।
शिवं साङ्गं समावाह्य समिदाज्यतिलांश्चरून् ॥ २१ ॥
मन्त्रसंहितया हुत्वा मूलेनाष्टशताहुतीः ।
ब्रह्माङ्गैश्च दशांशेन हुत्वा संपातितं घृतम् ॥ २२ ॥
ब्रह्मकुम्भे कुशाग्रेण क्षिप्त्वा स्नानमथाचरेत् ।
अर्घ्यं दत्त्वा हृदा मूर्ध्नि पुष्पाद्यमपनीय तु ॥ २३ ॥
आपोहिष्ठादिभिः पूर्वममृतैर्ब्रह्मभिस्ततः ।
जलधूपान्तरं पुष्पैरशून्यं मस्तकं यथा ॥ २४ ॥

तथाभिषिंच्य पूर्णां तु हुत्वा संपूज्य शङ्करम् ।
ततस्त्वेकोनपञ्चाशत्कलशैः स्थापनक्रमात् ॥ २५ ॥

कषायगव्यभसितमृत्स्नाभिर्व्योमविद्यया ।
गोमूत्रेणापि गायत्र्या चाप्यायस्वेति दुग्धतः ॥ २६ ॥

दधिक्राव्णेति दध्ना तु देवस्यत्वा कुशाम्भसा ।
द्वितीयावरणे तद्वत् तेजोऽसीति घृतेन तु ॥ २७ ॥

मधुवातेति मधुना गन्धद्वारेति गोमयात् ।
ऐक्षवेण तु मूलेन आकृष्णेनेति रत्नकात् ॥ २८ ॥

ब्रह्मभिस्तु फलाम्भोभिः श्रीसूक्ताच्चन्दनादिकैः ।
जलधूपान्तरं चेष्ट्वा तृतीयावरणे घटैः ॥ २९ ॥

एकादशानुवाकैस्तु रुद्रस्य स्नापयेच्छिवम् ।
गन्धाद्यैरुपहारान्तमिष्ट्वा तूर्यादिनिस्वनैः ॥ ३० ॥

आरात्रिकं समुत्तार्य ततो ब्रह्मघटाम्भसा ।
पञ्चाक्षरान्तं मूलेन देवेशमभिषेचयेत् ॥ ३१ ॥

पुनरभ्यर्च्य गन्धाद्यैः पाश्चात्यनवकेन तु ।
स्नापयेत् पावमानाभिर्मध्येन ब्रह्मभिः पुनः ॥ ३२ ॥

गन्धाद्यैरुपहारान्तं पुनरभ्यर्च्य शङ्करम् ।
अनुज्ञातस्तु कुम्भस्थशिवेन शिवयापि च ॥ ३३ ॥

गौर्यास्तारस्वबीजादिसंपुटं तु स्वमन्त्रतः ।
वर्धन्यां पिण्डिकां सिक्त्वा ततः शिवघटेन तु ॥ ३४ ॥

स्नापयेद् व्योमविद्यान्तो(?) मन्त्रसंहितया शिवम् ।
अघोरेण तु गन्धेन लिङ्गं पीठं च लेपयेत् ॥ ३५ ॥

वामेनाभूष्य वस्त्राद्यैरीशेन कुसुमैर्यजेत् ।
धूपदीपनैवेद्यानि पुरुषेण तु दापयेत् ॥ ३६ ॥

सगन्धशिवहस्तेन गायत्र्यास्य चतुर्दिशम् ।
लिङ्गस्य तु त्रिखण्डेषु तत्तत् संस्मृत्य संस्पृशेत् ॥ ३७ ॥

शुक्लैः सुगन्धैः कुसुमैः स्रग्धूपारात्रिकैरपि ।
नीराज्य पिष्टदीपाद्यैः पुण्याहं वाचयेत् ततः ॥ ३८ ॥
वस्त्राभ्यां लिङ्गमाच्छाद्याथोत्तिष्ठब्रह्मणस्पते ।
इत्यादिना द्विजैर्लिङ्गमुत्थाप्यातोद्यमङ्गलैः ॥ ३९ ॥
गीतैर्नृत्तैश्च नीत्वेशमधिवासनमण्डपम् ।
पश्चिमद्वा[1]र्युदुत्याद्यादवतार्या(र्घ?र्च)येच्छिवम् ॥ ४० ॥
पूर्वं शयनवेद्यां तु स्वस्तिके शालितण्डुलैः ।
स्थण्डिले दन्तखट्वां वा फलकां वा दृढां नवाम् ॥ ४१ ॥
निधाय कम्बलैश्चौर्णैः कौशेयाद्यैः समास्तृताम् ।
शय्यां विरचयेद् रम्यां सोपधानोत्तरच्छदाम् ॥ ४२ ॥
शङ्खं चक्रं ध्वजं चाथ दर्पणं वृषभाङ्कुशौ ।
चामरे मत्स्ययुग्मं च न्यसेद् दिक्ष्वष्टमङ्गलम् ॥ ४३ ॥
ततो लिङ्गं प्रवेश्यान्तराचार्यः सह मूर्तिपैः ।
शाययेच्छिरसा तल्पे शिखयास्योपधानकम् ॥ ४४ ॥
दत्त्वा तु वर्मणाच्छाद्य नैवेद्यान्तं तु पूजयेत् ।

अत्र मञ्जर्याम्—

"प्रासादाभिमुखं निवेश्य शयने वामेन मन्त्रेण त-
चैतन्यं परमं नियोज्य विधिवत् तस्मिन् षडध्वान्वितम् ।
पञ्चब्रह्मविराजितं च सकलं संकल्प्य सृष्टिक्रमाद्
व्योमव्यापिमनुस्वरूपिणममुं तत्त्वैस्त्रिभिर्भाजितम् ॥"

इति ।

गृहोपकरणं सर्वमानीय विनिधाय तु ॥ ४५ ॥
मध्वाज्यपूरितं पात्रं रौप्यं दद्यात् तु पादयोः ।
मृत्युञ्जयेन सहृदा चापोहिष्ठेति चार्चयेत् ॥ ४६ ॥
शिरस्समीपे निद्राख्यं कुम्भमस्त्रेण पूरयेत् ।
शिवकुम्भास्त्रवर्धन्यौ तत्रैवापूर्य पूजयेत् ॥ ४७ ॥

---

[1] 'द्वारदित्य' ख. पाठः.

विघ्नेशकुम्भान् परितो लिङ्गस्य स्वस्वगोचरे ।
आत्मादितत्त्वविज्ञप्त्यै स्रग्भिः सोमाः प्रकल्पयेत् ॥ ४८ ॥

द्वारेषु घटिके द्वे द्वे कोणेष्वङ्कुरपालिकाः ।
तोरणेषु शरावे द्वे स्थापयेन्मङ्गलाङ्कुरैः ॥ ४९ ॥

निद्राविघ्नेशकुम्भानां बाह्ये भूत्या कुशैस्तिलैः ।
प्राकारत्रितयं कृत्वा तेषु लोकाधिपान् न्यसेत् ॥ ५० ॥

तदस्त्राण्यपीति यावत् ।

अध्येतारः पठेयुश्च वेदान् प्रागादिदिग्गताः ।
कोणेषु रुद्रं कद्रुद्रं भारुण्डं चमकांस्तथा ॥ ५१ ॥

अथाचार्यो मूर्त्तिधरैः प्राङ्मुखो वाप्युदङ्मुखः ।
उपविश्यासने पश्चाल्लिङ्गे भागत्रयं स्मरेत् ॥ ५२ ॥
ब्रह्मविष्ण्वीशभागेषु तत्त्वान्यात्मादिकानि तु ।
तत्त्वेश्वरैर्मूर्तिभिश्च न्यस्येन्मूर्त्तीश्वरान् सह ॥ ५३ ॥

मायान्तमात्मतत्त्वं च ब्रह्मभागे तु विन्यसेत् ।
तत्र तारं च हृद्बीजमात्मतत्त्वं नमोन्तकम् ॥ ५४ ॥
तथात्मतत्त्वेश्वराय ब्रह्मणे नम इत्यपि ।
ब्रह्माणमेव विन्यस्य ततस्तारं शिरोन्वितम् ॥ ५५ ॥
विद्यातत्त्वं सदेशान्तं चतुर्थ्या तु नमोन्तकम् ।
विन्यस्य तारं शिरसा विद्यातत्त्वेश्वराय च ॥ ५६ ॥
विष्णवे नम इत्युक्त्वा विष्णुभागे तु विन्यसेत् ।
शिवान्तं शिवतत्त्वं तु प्रणवेन शिखादिकम् ॥ ५७ ॥
चतुर्थ्यन्तं तथैवो[1]हं (?) शिवतत्त्वाधिपाय च ।
रुद्राय नम इत्यन्तं रुद्रभागे तु विन्यसेत् ॥ ५८ ॥
भूम्यग्नियजमानार्कजलवाय्विन्दुखाभिधाः ।
मूर्तीस्तु विन्यसेदष्टौ त्रिष्वङ्गेषु पृथक् पृथक् ॥ ५९ ॥
शर्वं पशुपतिं चोग्रं रुद्रं चैव भवं तथा ।
ईशानं च महादेवं भीमं चेत्यष्टमूर्तिपान् ॥ ६० ॥

---

[1] 'हं हूं शि' क. पाठः,

तारहृद्बीजपूर्वं तु प्रागादीशान्तकं क्रमात् ।
विन्यसेदष्टपक्षे तु स्वाख्यामन्त्रैर्नमोन्तकम् ॥ ६१ ॥

निरोधयेत्त्रिशूलया गन्धाद्यैश्चाभिपूजयेत् ।
शिवस्यैव प्रतिष्ठायां पञ्चपक्षे तु मूर्तयः ॥ ६२ ॥

भूम्यम्बुवह्निपवनव्योमाख्याः स्युस्तदीश्वराः ।
ब्रह्मा विष्णुस्तथा रुद्र ईश्वरश्च सदाशिवः ॥ ६३ ॥

मुमुक्षोः पञ्चपक्षेण प्रतिष्ठा क्रियते यदा ।
निवृत्त्याद्याः कलाः पञ्च मूर्तयो मूर्तिपा अपि ॥ ६४ ॥

सद्योजातादयः पञ्च पश्चिमादिस्वदिग्गताः ।
ततो लिङ्गोत्तरस्थायां स्नापितायां तु लिङ्गवत् ॥ ६५ ॥

रन्ध्रमध्ये भगाङ्कायां पूजितायां यथाविधि ।
तद्वद् ब्रह्मशिलायां च स्थितायां लिङ्गमूलतः ॥ ६६ ॥

तत्तत्तत्त्वेश्वरान् मूर्तिमूर्तीशानपि विन्यसेत् ।
तत्राप्यात्मादितत्त्वेशीं क्रियाज्ञानेच्छया सह ॥ ६७ ॥

विन्यस्य क्ष्मादिमूर्तीश्च मूर्तीशीर्धारिकादिकाः ।
धारिका दीप्तिमत्युग्रा ज्योत्स्नाख्या चेतना तथा ॥ ६८ ॥

बलोत्कटा च धात्री च विभुश्चेत्यष्ट मूर्तिपाः ।
साधकस्य प्रतिष्ठायां भोगेच्छोः शुद्ध(म ?[1] व)र्त्मनि ॥ ६९ ॥

शुद्धविद्यादिशक्त्यन्ते विद्येशा मूर्तिपाः स्मृताः ।
मूर्तीश्वर्यस्तु तस्यैव पीठेऽनन्तादयः क्रमात् ॥ ७० ॥

स्त्रीलिङ्गान्तोदितास्तद्वत् पञ्चपक्षेऽपि मूर्तिपाः ।
वामा ज्येष्ठा क्रियाज्ञाने चेच्छेति पठितास्त्विमाः ॥ ७१ ॥

पुरुषाद्यास्तु मायान्ते शुद्धाशुद्धेऽध्वनि स्थिताः ।
याः काश्चिद् देवतास्तासां प्रतिष्ठायां तु मूर्तिपाः ॥ ७२ ॥

अङ्गुष्ठमानो भुवनेश ईशः स्यादेकपिङ्गेक्षणकृद् भवश्च ।
भवो महादेवमहाद्युती च काम्यप्रतिष्ठासु च मूर्तिपाः स्युः ॥ ७३ ॥

---

१. 'पा' ख. पाठः.

अशुद्धेऽध्वनि पृथ्व्यादौ प्रकृत्यन्ते स्थितास्तु याः ।
देवतास्तत्प्रतिष्ठायां कपालीशादिमूर्तिपाः ॥ ७४ ॥
कपालीशोऽग्निरुद्रश्च यमो निर्ऋतिरेव च ।
बलः शीघ्रो निधीशश्च विद्याधिपतिरष्टमः ॥ ७५ ॥
वस्वादित्यादिरुद्राणां यक्षभोगीन्द्ररक्षसाम् ।
नरादीनां प्रतिष्ठायामिन्द्राद्या मूर्तिपाः स्मृताः ॥ ७६ ॥

इन्द्रादयोऽष्टौ लोकपाला इति यावत् ।

क्षुद्राभिचाराद्युद्देशात् प्रतिष्ठा क्रियते यदा ।
तत्र स्युर्मूर्तिपास्त्वष्टावसिताङ्गादिभैरवाः ॥ ७७ ॥
असिताङ्गो रुरुश्चण्डः क्रोधनोन्मत्तभैरवौ ।
कपाली भीषणश्चैव संहाराख्योऽष्टमः स्मृतः ॥ ७८ ॥
प्रतिमानामथोग्राणां प्रतिष्ठासु तमादिकाः ।
मूर्तीश्वर्यस्तमा मोहा क्षया निष्ठा च मृत्युना ॥ ७९ ॥
मया भया ज्वरा च स्युः पृथ्व्याद्या एव मूर्तयः ।
उग्राणां पञ्चपक्षे तु तमा मोहा च घोरया ॥ ८० ॥
अरतिश्च ज्वरा चेति मूर्तीश्वर्यः क्रमोदिताः ।
प्रतिमानां प्रतिष्ठासु समानोऽयं विधिर्मतः ॥ ८१ ॥
त्रिभागभावना तत्र जानुकण्ठशिरोवधिः ।
स्त्रीबेराणां प्रतिष्ठासु क्रियाशक्तिं तु पीठगाम् ॥ ८२ ॥
देहे ज्ञानीं च विन्यस्य कुर्याच्छेषं तु पीठवत् ।

तत्त्वतत्त्वेश्वरमूर्त्तिमूर्त्तीश्वरन्यासाधिकारः ।

एवं विन्यस्य तत्त्वानि तदीशान् मूर्त्तिमूर्त्तिपान् ॥ ८३ ॥
तारादिभिर्नमोन्तैस्तु तत्तन्नामभिरर्चयेत् ।
तत्त्वादीनामवस्थानं लिङ्गादौ तत्र भावयेत् ॥ ८४ ॥
अथ कुण्डान्तिकं गत्वा तत्त्वतत्त्वेश्वरादिकम् ।
क्रमादावाह्य कुण्डेषु घृतेन जुहुयुः पृथक् ॥ ८५ ॥

---

१. 'स्तु' क. पाठः, २. 'ताः' ख. पाठः.

तद्यथा —

तारहृत्पूर्वमाधारशक्तिं विन्यस्य चानले ।
इष्ट्वा त्रिराहुतीर्हुत्वा आत्मतत्त्वं तु विन्यसेत् ॥ ८६ ॥

आत्मतत्त्वाधिपायान्ते ब्रह्मणे च नमोन्तकम् ।
आवाह्याभ्यर्च्य पृथ्व्यादिमूर्त्तिमूर्त्यधिपानपि ॥ ८७ ॥

क्रमादावाह्य संपूज्य घृतेनाष्टोत्तरं शतम् ।
तदर्धं वा ततोऽर्धं वा तत्त्वादीनां जुहोति च ॥ ८८ ॥

पृथङ् मूर्तिधरांस्त्वेवं जुहुयुः स्वस्वमूर्त्तिभिः ।
अथाचार्यादयः सर्वे गत्वा लिङ्गान्तिकं सह ॥ ८९ ॥
स्वस्वमूर्त्तिप्रदेशेषु संस्पृश्य कुशमूलतः ।
जपेयुर्मूर्त्तिमूर्त्तीशमन्त्रानाहुतिसंख्यया ॥ ९० ॥

तत्त्वाधिपं तु ब्रह्माणं शिवाज्ञां श्रावयेत् पृथक् ।

ओम्

आत्मतत्त्वाधिप ! ब्रह्मन् ! यावल्लिङ्गमिदं भुवि ॥ ९१ ॥

निर्दोषं सुस्थितं तावत् त्वया स्थेयं शिवाज्ञया ।

ओं ब्रह्मणे नमः इति ।

स्पृशन्तो मूलमन्त्रेण कुशमूलेन मूर्तिषु ॥ ९२ ॥

लिङ्गमूले प्रोक्षयेयुः शान्तिकुम्भजलैः पृथक् ।
पुनः कुण्डान्तिकं गत्वा

ओम् आत्मतत्त्वविद्यातत्त्वाभ्यां नमः ।

इति तत्त्वे विभाव्य तु ॥ ९३ ॥

शुद्धाशुद्धे तु सन्धाय विद्यातत्त्वं तु विन्यसेत् ।
तारहृत्पूर्वकं प्राग्वद् विद्यातत्त्वं नमोन्तकम् ॥ ९४ ॥

विद्यातत्त्वाधिपायेति विष्णवे नम इत्यपि ।
इष्ट्वा हुत्वा तथाज्येन मूर्त्तिमूर्त्तीश्वरांस्तथा ॥ ९५ ॥

आवाह्य जुहुयात् प्राग्वत् प्राग्वल्लिङ्गसमीपगाः ।
कुशमध्येन लिङ्गस्य जपेयुर्मध्यमस्पृशः ॥ ९६ ॥
मूर्तिमूर्तिपमन्त्रांस्तु शिवाज्ञां श्रावयेत् पृथक् ।
विद्यातत्त्वेश ! भो विष्णो ! यावल्लिङ्गमिदं भुवि ॥ ९७ ॥

निर्दोषं सुस्थितं तावत् त्वया स्थेयं शिवाज्ञया ।

ओं विष्णवे नम इति ।

शान्तिकुम्भाम्भसा प्राग्वत् प्रोक्षयेयुश्च मूलतः ॥ ९८ ॥
प्राग्वत् कुण्डान्तिकं गत्वा शुद्धाशुद्धे विभाव्य तु ।
विद्याशिवाख्ये तत्त्वे तु सन्धाय च नमोन्तकम् ॥ ९९ ॥
शिवतत्त्वमुपस्थाप्य प्राग्वदिष्ट्वा जुहोतु च ।
विन्यस्य मूर्तिमूर्तीशान् पूर्ववज्जुहुयुः पृथक् ॥ १०० ॥
लिङ्गान्तिकं तथा गत्वा मूलमन्त्रान् कुशाग्रतः ।
रुद्रभागं स्पृशन्तोऽथ जपेयुर्हुतसंख्यया ॥ १०१ ॥
शान्तिकुम्भाम्भसा प्रोक्ष्य शिवाज्ञां श्रावयन्तु च ।

ओम्

शिवतत्त्वेश ! भो रुद्र ! यावल्लिङ्गमिदं भुवि ॥ १०२ ॥
निर्दोषं सुस्थितं तावत् त्वया स्थेयं शिवाज्ञया ।

ओं रुद्राय नम इति ।

एवं पीठे शिवायां च तत्त्वाद्यं स्वस्वमूर्तिभिः ॥ १०३ ॥
विन्यस्य शोधयेत् स्पृष्ट्वा शिवाज्ञां श्रावयेदपि ॥

अथ सद्यादिब्रह्मभिरङ्गैश्च स्वस्वदिक्षु सहस्रं तदर्धं शतं वाज्येन जुहुयात्, व्याहृतिभिश्च ।

अत्र मञ्जर्याम् —

"व्यस्तैर्व्याहृतिभिः पलाशसमिधश्चौदुम्बराः पैप्पलाः
प्रत्येकं जुहुयात् सहस्रमथवा क्षीराज्यमध्वाप्लुताः ।
एवं तिलैस्तु जुहुयादथ चाष्टमूर्तिमन्त्रैश्च मूर्तिगणनाथदिशाधिपैश्च ।
वज्रादिशस्त्रमनुभिश्च यथाक्रमेण चाज्येन तत्र जुहुयाद् गुरुरादरेण ॥"

चरुं लाजांश्च सक्तूंश्च सिद्धार्थांश्च तिलान् यवान् ॥ १०४ ॥
व्रीहींश्च जुहुयात् स्वस्वदिक्षु मन्त्रैर्यथापुरम् ।
सर्वद्रव्यैश्च मिलितैः पूर्णां हुत्वा स्वमूलतः ॥ १०५ ॥
उत्थाय त्वथ देवस्य दक्षिणे श्रवणे गुरुः ।
तारहृत्पूर्वकं ज्ञानशक्ति शब्दमयात्मने ॥ १०६ ॥

शिवाय नम इत्युक्त्वा कृतं कर्म समर्पयेत् ।

ॐ आ

भागत्रयेऽपि भगवन्! कर्म निर्वर्तितं मया ॥ १०७ ॥
त्वत्प्रसादेन तत् सर्वं सम्पूर्णं भवतु प्रभो! ।

इत्यर्पयेत् ।

इति निष्ठुरया रुद्ध्वा गन्धाद्यैरभिपूज्य तु ॥ १०८ ॥

निवेद्यान्तं बलिं किञ्चिद् दत्त्वा दिक्षु यथाविधि ।
नृत्तगीतविनोदाद्यैर्विनिद्रो गमयेन्निशाम् ॥ १०९ ॥

इत्थं प्रतिष्ठामधिकृत्य शम्भोरुक्तं तदादिस्नपनादिपूर्वम् ।
तत्त्वादिविन्यासविधिश्च सर्वो येनाधिवासस्य विधिः प्रसिध्येत् ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धांतसारे क्रियापादे
अधिवासनपटलः षट्चत्वारिंशः ॥

अथ सप्तचत्वारिंशः पटलः ।

ततः प्रभात आचार्यः स्नातो मूर्तिधरैः समम् ।
यजमानश्च पुत्राद्यैः पूर्वं स्थापनलग्नतः ॥ १ ॥

उच्चारयञ्छिवास्त्रं तु प्रासादं प्राप्य देशिकः ।
विघ्नानुच्चाटयेत् पश्यन् प्रविशेद् देवमन्दिरम् ॥ २ ॥

शिवमध्यं तु निश्चित्य तत्र ब्रह्मशिलां न्यसेत् ।

तद्यथा—

द्वारांशं गर्भभवने निश्चित्य तु चतुर्दिशम् ॥ ३ ॥

तद्वाविंशतिसूत्रैस्तु प्राचीनैश्चाप्युदङ्मुखैः ।
विभजेत् तत्र यन्मध्यकोष्ठं ब्रह्माह्वयं स्मृतम् ॥ ४ ॥

तच्च प्राच्यैरुदीचीनैः सूत्रैः षोढा विभज्य तु ।
षट्त्रिंशत्कोष्ठकानि स्युस्तत्कोष्ठानां तु मध्यतः ॥ ५ ॥

---

१. 'त्पा' ख. पाठः

य: प्राच्योदीच्ययोः सन्धिर्ब्रह्मस्थानं तु सूत्रयोः ।
तद् वर्ज्यं हि प्रतिष्ठासु शिवादीनां तु मध्यतः ॥ ६ ॥
यदि मोहात् प्रमादाद् वा स्थापयेद् ब्रह्ममध्यगम् ।
लिङ्गादिकं तदा राज्यकर्तृराजविनाशकृत् ॥ ७ ॥
ब्रह्मस्थानाद् यदैशान्यां कोष्ठं तस्यैशकोणगः ।
सूत्रसन्धिः प्रतिष्ठायां लिङ्गमध्ये यथा भवेत् ॥ ८ ॥
शिवमध्यं तथा ज्ञात्वा तत्रैव स्थापयेच्छिवम् ।
सप्तसप्तककोष्ठं तु गर्भागारं विभाजयेत् ॥ ९ ॥
ब्राह्मं तन्मध्यकोष्ठं स्यात् तद्बाह्यं वसुकोष्ठकम् ।
दैविकं स्याच्च तद्बाह्यवृतौ षोडशकोष्ठकैः ॥ १० ॥
मानुषाख्यं ततो बाह्यवृतौ संकृतिकोष्ठकैः ।
पैशाचं नाम तत् क्षेत्रं प्रतिष्ठा चैषु कथ्यते ॥ ११ ॥
ब्राह्मे शिवप्रतिष्ठा स्याद् दैवे विष्णोर्विधीयते ।
मानुषे सर्वदेवानां पैशाचे मातृरक्षसाम् ॥ १२ ॥
दैवगन्धर्वयक्षाणां नागादीनां च शस्यते ।

अत्र मयः —

"गर्भागारे सप्तसप्तांशकेंऽशं मध्ये ब्राह्मं दैविकं चाष्टभागम् ।
मानुष्यं तत् षोडशांशं तु बाह्ये पैशाचं स्यात् तच्चतुर्विंशदंशम् ॥
शैवं ब्राह्मे वैष्णवं दैविकांशे सर्वे देवा मानुषे स्थापनीयाः ।
पैशाचांशे मातरश्चासुराद्या रक्षोयक्षाश्चापि गन्धर्वनागाः ॥"

इति ।

शिवमध्याद् दक्षिणतो ब्रह्मसूत्रात् तथोत्तरे ॥ १३ ॥
प्राचीनं सूत्रमास्फाल्य कोष्ठानां मध्यतः समम् ।
तस्मिन् स्वस्वपदे मध्ये विष्ण्वादीन् स्थापयेत् क्रमात् ॥ १४ ॥
प्रत्यङ्मुखांस्तु प्राच्येषु पदेषु स्थापयेत् सुरान् ।
प्राङ्मुखांश्च प्रतीच्येषु याम्येपूदङ्मुखानपि ॥ १५ ॥
सौम्येषु दक्षिणास्यांश्च विष्ण्वादीन् युक्तितः क्रमात् ।

शिवमध्याधिकारः ।

अथ ब्रह्मशिलायां तु रत्नादिन्याससिद्धये ॥ १६ ॥

तद्दिक्षु तथा मध्ये युक्त्या गर्तानि कल्पयेत् ।
पूर्वोक्ते शिवमध्ये तु शिलामध्यं यथा तथा ॥ १७ ॥
स्थापयेत् तूर्यघोषाद्यैर्वेदघोषैश्च पुष्कलैः ।
उदङ्मुखः प्राङ्मुखो वा गुरुर्मूर्तिधरैः सह ॥ १८ ॥
ओं नमो व्यापिनीत्युक्त्वा स्थिरे चेत्यचले ध्रुवे ।
बिन्द्वन्तं चापि भूबीजं हृल्लेखां चाग्निजायया ॥ १९ ॥
तारं हृद्बीजमाधारशक्तये च नमोन्तकम् ।
तथैवानन्तशक्तिं चाप्यभिधाय नमोन्वितम् ॥ २० ॥
संस्थाप्य तु ब्रह्मशिलां स्पृष्ट्वानेनाभिमन्त्रयेत् ।
ओं
त्वमेव परमा शक्तिस्त्वमेवासनधारिका ॥ २१ ॥
शिवाज्ञया त्वया देवि! स्थातव्यमिह सर्वदा ।
शुद्धविद्यान्तमध्वानं सर्वं तस्यां विभाव्य तु ॥ २२ ॥
रत्नादिपञ्चवर्गांस्तु विन्यसेत् तु यथाक्रमम् ।
वज्रं चार्कमणिं नीलं महानीलं च मौक्तिकम् ॥ २३ ॥
पुष्यरागं मरतकं वैडूर्यं पद्मरागकम् ।
इन्द्रादीशानपर्यन्तं माणिक्यं मध्यतः स्मृतम् ॥ २४ ॥
ताम्रायोवङ्गरूप्याणि पित्तलं कांस्यसीसके ।
देवलोहं सुवर्णं च पूर्वाद्यं मध्यमान्तकम् ॥ २५ ॥
तालं शिला तोरिका च माक्षिकं हेममाक्षिकम् ।
गैरिकं गन्धकं चाभ्रं पारतं नवमं स्मृतम् ॥ २६ ॥
उशीरं च हरिक्रान्ता रक्तचन्दनकागरू ।
शारिबोत्पलमालेयरुक्छङ्खकुसुमाह्वयाः ॥ २७ ॥
ओषधीर्विन्यसेच्चाथ व्रीहीन् गोधूमकांस्तिलान् ।
माषमुद्गयवश्यामाशालींश्चेन्द्रादि विन्यसेत् * ॥ २८ ॥
संक्षिप्तासु प्रतिष्ठासु रत्नादीनामसम्भवे ।
रत्नादिपञ्चवर्गेभ्यो वज्रं हेम च पारतम् ॥ २९ ॥

---

* 'मध्यतोऽष्ट बीजानि' इति समुच्चयकारः ।

हरिकान्तां यवांश्चैव मध्यगर्ते तु विन्यसेत् ।
रत्नादिवर्गान् सद्यादिकलाभिर्विन्यसेत् पृथक् ॥ ३० ॥
सद्यादिब्रह्मभिर्मध्ये लोकेशाख्याभिरेव वा ।
मध्यगर्ते हेममयं कूर्मं वृषभमेव वा ॥ ३१ ॥
संस्थाप्यानन्तमन्त्रेण प्राग्याम्याप्येन्दुदिक्ष्वपि ।
वृषभं परशुं चाक्षस्रजं शूलं हिरण्मयम् ॥ ३२ ॥
निवृत्त्यादिकलाभिस्तु विन्यस्यालिप्य वै शिलाम् ।
पायसेनाहतस्वच्छवाससाच्छाद्य वर्मणा ॥ ३३ ॥
गन्धाद्यैस्तु निवेद्यान्तामिष्ट्वा दद्याद् दिशाबलिम् ।
कृसरापूपलाजाम्बुधानाहारिद्रसक्तुभिः ॥ ३४ ॥
क्रमात् सेक्षुरसान्नेन दत्त्वा दिक्पतिनामभिः ।

ओं
देवं रुद्रं पुरस्कृत्य प्रतिगृह्णन्त्विमं बलिम् ॥ ३५ ॥
पैशाचान्तानि भूतानि सर्वाणीह यजामहे ।
सर्वदिग्वासिभ्यः सर्वभूतेभ्यो नमः ।

इत्थं प्रतिदिशं दत्त्वा स्नात्वाचम्य प्रसन्नधीः ॥ ३६ ॥
शिलासूत्रादिदोषघ्नमस्त्रेण जुहुयाच्छतम् ।
ततो लिङ्गं हृदोत्थाप्य शिरसार्घ्यं प्रदाय च ॥ ३७ ॥
अभिष्टुत्य च तं वाग्भिर्जयशब्दादिमङ्गलैः ।
गीतवाद्यादिनिर्घोषैर्हेमरत्नाम्बरादिभिः ॥ ३८ ॥
क्षिपद्भिर्यजमानाद्यैर्देवं नीत्वा प्रदक्षिणम् ।
आचार्यो मूर्तिपैः सार्धं द्वारदेशेऽवतार्य तु ॥ ३९ ॥
भद्रपीठे तु संस्थाप्य स्थिरो भूया इतीरयेत् ।
अकृतप्रस्तरे द्वारे द्वारशाखादिकस्य तु ॥ ४० ॥
असंस्पर्शेन तल्लिङ्गं पीठं चान्तः प्रवेशयेत् ।
देहलीं द्वारशाखे वा भित्तिं वोर्ध्वमुदुम्बरम् ॥ ४१ ॥
लिङ्गं स्पृशति पीठं वा तदा दोषो महानपि ।
तच्छान्त्यै ब्रह्ममूलाङ्गैर्हुत्वा दत्त्वा च दक्षिणाम् ॥ ४२ ॥

असंस्पर्शेन शाखादेरन्तर्लिङ्गं प्रवेशयेत् ।
अनारब्धा यदा भित्तिर्द्वारं चाप्यकृतं यदा ॥ ४३ ॥
द्वारोद्देशप्रदेशेन तदा देवं प्रवेशयेत् ।
ततो ब्रह्मशिलामिष्ट्वा हेतिनाच्छादनाम्बरम् ॥ ४४ ॥
अपनीय शिलाश्वभ्रे लिङ्गं तु प्रविशेद् यदा ।
अनायासेन तद्योग्ययन्त्रेण प्रगुणीकृतम् ॥ ४५ ॥
तथा मूर्तिधरैः सार्धमाचार्यो लग्न आगते ।
सुनिश्चितक्षणे तस्मिन् छिवोऽहमिति भावयन् ॥ ४६ ॥
शिवशक्त्योस्तदैकत्वं ध्यायञ्छक्तिं शिलां स्मरन् ।
हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्राण्यतीत्य तु ॥ ४७ ॥
ब्रह्मादिकारणत्यागात् स्वमन्त्रं निष्कलान्तगम् ।
ध्यायन्नुच्चारयँल्लिङ्गं प्रतिष्ठाप्य प्रसन्नधीः ॥ ४८ ॥
सृष्टिमार्गेण चेशानपुरुषादिक्रमेण तु ।
तत्त्वाध्वानं तु शक्त्यादिं लिङ्गमूर्तौ विभाव्य तु ॥ ४९ ॥
शुद्धाभिः सिकताभिस्तु शिलारन्ध्रं प्रपूरयेत् ।
पुनः संक्षुद्य संक्षुद्य रन्ध्रं हेमशलाकया ॥ ५० ॥
लिङ्गशीर्षोपगं नीत्वा पीठं लम्बनरज्जुभिः ।
सुनिश्चिते तदा लग्ने शनैर्लिङ्गेऽवतारयेत् ॥ ५१ ॥
तारं च शक्तिबीजं च क्रियाशक्त्यैपदं ततः ।
उमायै नम इत्यन्तं मन्त्रं सृष्टिक्रमात् स्मरन् ॥ ५२ ॥
उच्चारयन् पिण्डिकां तु लिङ्गेन सह योजयेत् ।
स्थाप्यमानं यदा लिङ्गं पीठं वा चालितं भवेत् ॥ ५३ ॥
यां यां दिशं संश्रितं तत् तत्तद्दिक्पालमन्त्रतः ।
शान्तिं कुर्यान्निजस्थाने स्थिरीकृत्य तु सूत्रकैः ॥ ५४ ॥
द्विशतं त्रिशतं वाज्यं तिलान् हुत्वा तु दक्षिणाम् ।
दद्यादैन्द्यादिकानां तु गजं वा स्वर्णनिर्मितम् ॥ ५५ ॥

---

१. 'दि' ख. पाठः.

काञ्चनं महिषं छागं मुक्ताहारं च पित्तलम् ।
धेनुं पयस्विनीं रूप्यं क्रमेण स्थापकाय तु ॥ ५६ ॥

ततो लिङ्गं च पीठं च नमस्कृत्यैकतां गतम् ।
आचार्यो जुहुयाद् ब्रह्ममूलाङ्गैस्तु शतं घृतम् ॥ ५७ ॥

पुनरागत्य देवेशं नत्वा विज्ञापयेद् गुरुः ।
निर्दोषतां प्रसादास्मिन्नपराधं क्षमस्व भोः ॥ ५८ ॥
इत्युक्त्वा सिकताभिस्तु किञ्चिद् रन्ध्रं प्रपूरयेत् ।
अशेषमष्टबन्धेन नीरन्ध्रं विदधीत च ॥ ५९ ॥
लाक्षा सर्जरसः शङ्खः सिकतात्रिफलारसः ।
कुन्दुरुष्कं च संपिष्टं वज्रलेपोऽयमीरितः ॥ ६० ॥

आम एवेति यावत् । अथवा,

लाक्षा सर्जरसः सिक्थं शर्कराचूर्णगुग्गुलूः ।
गैरिकं च गुलं तैलमष्टबन्ध इतीरितः ॥ ६१ ॥

अन्त्याद् भागाभिवृद्धिः स्यात् पाकश्चिक्कणवद् भवेत् ।

अपि च ।

लाक्षागुलमधूच्छिष्टगुग्गुलूनां समांशकैः ॥ ६२ ॥

सर्जचूर्णं तु तुल्यं स्याद् गैरिकस्य तदर्धतः ।
सर्वेषामर्धमानेन तैलं काले नियोजयेत् ॥ ६३ ॥

अयःपात्रे पचेद् युक्त्वा तद्दर्व्या मृदुवह्निना ।
अत्रापि चिक्कणीपाको विज्ञेयो निपुणेन हि ॥ ६४ ॥

एतेषामष्टबन्धानां क्षिप्त्वैकं दृढतां नयेत् ।
लिङ्गपीठं तु नीरन्ध्रं नीरं तु न विशे(द् य)था ॥ ६५ ॥
अथवा सीसपत्रैस्तु नीरन्ध्रकरणं स्मृतम् ।
ऊहप्रत्यूहतो युक्त्या लिङ्गं प्रक्षाल्य वै ततः ॥ ६६ ॥
निद्राकुम्भेनाभिषिच्य किञ्चिच्छान्त्युदकैरपि ।
अर्घ्यपञ्चामृतैश्चैव जलधूपान्तरैः क्रमात् ॥ ६७ ॥
यवगोधूमचूर्णाद्यैरवघृष्याभिषेचयेत् ।
ततः शयनवेदिस्थं शिवकुम्भं च वर्धनीम् ॥ ६८ ॥

समानीयाभिषिच्येशं विद्यशकलशैस्ततः।
पीठस्याधः स्वदिक्ष्वेवमभिषिच्य यथाक्रमम् ॥ ६९ ॥
शान्तिकुम्भान् पुनः स्वेषु स्थानेष्वेव तु विन्यसेत्।
अर्घ्यं दत्त्वाभिपूज्याथ बलि + + + + + या ॥ ७० ॥
सृष्ट्या पीठं तु संस्पृश्य चाङ्गुष्ठाग्रेण वै शिवम्।
लिङ्गं शिवमनुस्मृत्य पार्वतीं पिण्डिकां स्मरेत् ॥ ७१ ॥
तारं मूले शिवायान्ते नमोमन्त्रः शिवस्य तु।
तारं शक्तिः क्रियाशक्त्यै उमायै नम इत्यपि ॥ ७२ ॥
मन्त्रद्वयं तु सन्दध्याद् भुक्तिकामस्य मुक्तये।
विपरीतं तु सन्धेयमथ कादित्रिभागके ॥ ७३ ॥
आत्मादितत्त्वतत्त्वेशान् विन्यसेत् पूर्ववत् क्रमात्।
आधारानन्तधर्मादीन् वामादीन् पीठगान् न्यसेत् ॥ ७४ ॥
मूर्तिविद्यातनुमनून् लिङ्गे तारहृदादिकम्।
मूर्तिं विद्यातनुं पञ्चकलाभिश्च षडध्वभिः ॥ ७५ ॥
व्याप्यव्यापकभावेन सर्वं सञ्चिन्त्य योजयेत्।
मूर्तिः शक्त्यन्ततत्त्वैः स्याद् दशदिग्बाहुमण्डला ॥ ७६ ॥
पञ्चस्रोतोमुखी दिव्या पञ्चमन्त्रशरीरिणी।
निवृत्तिपादजङ्घोरुः प्रतिष्ठाजघनादिका ॥ ७७ ॥
विद्याहृदयवक्षोंसा शान्तिवक्त्रसरोरुहा।
शान्त्यतीतकलाशीर्षा भुवनाध्वतनूरुहा ॥ ७८ ॥
वर्णमन्त्राध्वरुधिरा पदमांससिरादिका।
तत्त्वाध्वमज्जशुक्लास्थिरशेषाध्वमयी स्मृता ॥ ७९ ॥
मूलमन्त्रं स्वहृत्पद्माद् द्वादशान्तशिवान्वितम्।
संस्मृत्य चैतन्यघनं परं ज्योतिरनामयम् ॥ ८० ॥
तस्मात् पुष्पाञ्जलिगतं क्रमान्नीत्वेशमस्तकम्।
नाडीमार्गेण लिङ्गान्तं मूर्त्या हृत्पङ्कजोदरे ॥ ८१ ॥
संस्थाप्य सर्वतो मूर्तौ मूर्ताबङ्गानि च न्यसेत्।
षान्तं षष्ठस्वरोपेतं बिन्दुं चिच्छक्तये नमः ॥ ८२ ॥

तारादिकसुदीर्यैनं लिङ्गं व्याप्तं तु विन्यसेत् ।
निरोध्य तु यथापूर्वमथ पिष्टादिनिर्मितैः ॥ ८३ ॥
लोकपालायुधैः स्वैः स्वैर्मन्त्रैरुद्वर्तयेच्छिवम् ।
नन्द्यावर्त्तोत्पलाम्भोजश्रीवत्सस्वस्तिकाम्बुजैः ॥ ८४ ॥
आदर्शचामराभ्यां चाप्यघोरास्त्राभिमन्त्रितैः ।
उद्वर्त्य पैष्टैर्गन्धाद्भिर्यथावत् स्नापयेच्छिवम् ॥ ८५ ॥
वस्त्रभूषणगन्धाद्यैरुपचारैर्यथोदितैः ।
निवेद्यान्तं यजेद् देवं जपेच्चाष्टोत्तरं शतम् ॥ ८६ ॥
यजमानाभिधानाद्यं नामैश्वर्यपदान्तकम् ।
कृत्वा संप्रार्थयेदस्मिन् सदा संनिहितो भव ॥ ८७ ॥
तथेति देवानुज्ञातो गत्वा कुण्डान्तिकं गुरुः ।
मूलेन चोमामन्त्रेण जुहोति घृतपायसम् ॥ ८८ ॥
प्राच्यां वृषं प्रतिष्ठाप्य दक्षिणे लकुलीश्वरम् ।
गणेशं नैर्ऋते लोकपतीन् स्वस्वदिशास्वपि ॥ ८९ ॥
मातृर्यमात् पश्चिमतः शास्तारं तु मृगे गुहम् ।
भल्लाटे स्थापयित्वाष्टदिक्षु पूर्वादिषु क्रमात् ॥ ९० ॥
स्थण्डिलेष्वग्निमाधाय जुहुयुर्मूर्त्तिपाः पृथक् ।
इन्द्रक्रतुं न इत्यैन्द्यामग्निं दूतं तथानले ॥ ९१ ॥
नाके सुपर्णे याम्ये तु नैर्ऋत्यां मोषुणः परा ।
यं रक्षन्तीति वारुण्यां वायवायाहि मारुते ॥ ९२ ॥
सौम्ये तु सोमं राजानमैशान्यां तु त्रियम्बकम् ।
पलाशखदिराश्वत्थप्लक्षन्यग्रोधबिल्वजाः ॥ ९३ ॥
औदुम्बर्यश्च काष्मर्यः समिधोऽष्टौ यथाक्रमम् ।
सर्वद्रव्यैर्जुहोत्यङ्गब्रह्ममूलैस्तु मध्यतः ॥ ९४ ॥
द्रव्यैस्तैरेव लोकेशमन्त्रैर्दिक्षु जुहोति च ।
रात्रौ गणेभ्यश्च बलिं दद्यात् पूर्वादितः क्रमात् ॥ ९५ ॥

प्रथममहः ।

अथ द्वितीयदिवसे गुरुर्मूर्तिधरैः सह ।
स्नात्वा नित्यविधानेन शिवमिष्ट्वा यथाविधि ॥ ९६ ॥
अच्छिद्रीकरणाय प्राग्याम्याप्यार्थेशवाह्निषु ।
कुण्डेषु जुहुयादाज्यं शिवाघोरास्त्रमन्त्रतः ॥ ९७ ॥
तथा पाशुपतास्त्रेण मूलेन च यथाक्रमम् ।
आग्नेयादिष्वघोरास्त्रात् सावित्र्या च शिवाज्ञया ॥ ९८ ॥
गायत्र्या च तथा गौरीगायत्र्या च सहस्रकम् ।
त्रिकालं देवमभ्यर्च्य दत्त्वा भूतबलिं निशि ॥ ९९ ॥
तृतीयेऽपि दिने प्राग्वदिष्ट्वा देवं विधानतः ।
आज्येनैन्द्र्यादिकुण्डेषु दिशां शान्त्यै जुहोति च ॥ १०० ॥
ब्रह्माङ्गैः स्वस्वमन्त्रैस्तु प्रतिकुण्डं सहस्रकम् ।
चरुं चैव दशांशेन बलिं दद्याच्च पूर्ववत् ॥ १०१ ॥
ततश्चतुर्थे दिवसे सविशेषं शिवं यजेत् ।
यथावत् कलशैर्देवमष्टोत्तरशतान्तकैः ॥ १०२ ॥
एकाशीत्यूनपञ्चाशत्पञ्चविंशतिभिस्तु वा ।
नवकेनाथवा शक्त्या तत्तल्लिङ्गानुसारतः ॥ १०३ ॥
स्नापयेत् स्नानपटले यथाग्रे वक्ष्यते तथा ।
महानैवेद्यकं च स्यात् स्नपनानुगुणं यथा ॥ १०४ ॥
प्रतिकुण्डं घृतं हुत्वा वागीश्वर्या सहस्रकम् ।
ब्रह्माङ्गैर्जुहुयात् प्राग्वच्छिवाग्नौ श्रपयेच्चरुम् ॥ १०५ ॥
निवेद्यार्धं तु देवाय शेषं तु नवधा कृतम् ।
प्रतिकुण्डं यथाशक्ति जुहुयुर्गुरुमूर्तिपाः ॥ १०६ ॥
शिवास्त्राद्यष्टमन्त्रैश्च द्वितीयदिवसोदितैः ।
यथाशक्ति घृतं हुत्वा पृथक् पूर्णां जुहोति च ॥ १०७ ॥
निर्माल्यमपनीयाथ संस्नाप्य कुसुमाष्टकम् ।
आरोप्य दिग्बलिं दत्त्वा सापेक्षं स्वमनुं ततः ॥ १०८ ॥
मूर्तौ तु शिथिलीकृत्य चण्डं लिङ्गेऽभिपूजयेत् ।
नीलवर्णं चतुर्वक्त्रं प्रतिवक्त्रं त्रिलोचनम् ॥ १०९ ॥

चतुर्भुजं प्रदीप्तास्यं जटाजूटेन्दुशेखरम् ।
अक्षस्रक्छूलटङ्कांश्च बिभ्राणं च कमण्डलुम् ॥ ११० ॥
नागोपवीतकटकरक्तवस्त्राभिभूषितम् ।
एवं ध्यात्वा तु तल्लिङ्गादाहृत्यात्महृदम्बुजे ॥ १११ ॥
निवेश्यैशे निजस्थाने चण्डबेरं शिवालयम् ।
आधारशक्तिकमलपीठे संस्थाप्य तद्धृदि ॥ ११२ ॥
स्वहृत्स्थं चण्डमानीय नाडीमार्गेण विन्यसेत् ।
पूजयेच्चासनार्घ्यादिक्रमान्मुख्योपचारकैः ॥ ११३ ॥

तद्यथा —

चण्डासनं नमोन्तं स्याच्चण्डमूर्तिश्च तादृशी ।
मूलमन्त्रश्च धुन्यादिश्चण्डेश्वरपदं ततः ॥ ११४ ॥
चतुर्थ्यन्तं शिखाबीजं फट्कारश्च नमोन्वितः ।
अङ्गानि चण्डशब्दाद्यं हृदयादीन्यनुक्रमात् ॥ ११५ ॥
चतुर्थ्यन्तानि हुंफट् च नमोन्तं तानि पञ्चभिः ।
आसनादिक्रमादिष्ट्वा स्नानाद्यैरुपचारकैः ॥ ११६ ॥
निवेद्य शिवनिर्माल्यैः पुष्पाद्यैस्तं प्रपूजयेत् ।
अथ लिङ्गं तु संस्नाप्य मन्त्रानुद्दीप्य पूर्ववत् ॥ ११७ ॥
संपूज्य गन्धपुष्पाद्यैर्नैवेद्यं च प्रदाय तु ।
आचार्यो मध्यमे कुण्डे दद्यादाहुतिसप्तकम् ॥ ११८ ॥

तद्यथा —

स्थिरोऽथ व्यापकस्तद्वदप्रमेयस्ततः परम् ।
अनादिबुद्धो नित्यश्च ततः स्यादविनश्वरः ॥ ११९ ॥
नित्यतृप्तश्च सप्तान्ते भव स्वाहेति योजिताः ।
मन्त्राः स्युरेभिर्हुत्वाज्यमेभिरेव शिवं स्पृशेत् ॥ १२० ॥
सहस्रं वा तदर्धं वा शतं वा जुहुयाद् घृतम् ।
अघोरास्त्रव्याहृतीभिः पूर्णां च जुहुयात् पुनः ॥ १२१ ॥
कुण्डेभ्यः स्वस्वमन्त्राग्नीनुद्वास्य स्वहृदम्बुजे ।
तथैव शिवकुम्भास्त्रे लोकेशान् द्वारदेवताः ॥ १२२ ॥

तोरणध्वजकुम्भस्था देवताश्च विसर्जयेत् ।
निशि भूतबलिं दत्त्वा स्नात्वा मूर्त्तिधरैः सह ॥ १२३ ॥

शिवं प्रदक्षिणीकृत्य नमस्कृत्य प्रसादयेत् ।
ततो हिरण्यवसनक्षेत्रभूषणवाहनैः ॥ १२४ ॥

आचार्यं तोषयित्वादौ वित्तशाठ्यविवर्जितः ।
तद्दशांशेन मूर्त्तीशानध्येतॄंश्च तदर्धतः ॥ १२५ ॥

जापकांश्च तदर्धेन शुश्रूषूंश्च तदर्धतः ।
ब्राह्मणान् लिङ्गिनो भक्तान् दीनान्धादींस्तथार्थिनः ॥ १२६ ॥

अन्यानपि यथाशक्ति तोषयेत् कनकादिभिः ।
सर्वस्वेनाथवार्धेन तृतीयांशेन वात्मनः ॥ १२७ ॥

प्रतिष्ठां यजमानस्तु कुर्याल्लिङ्गस्य भक्तितः ।
वित्तशाठ्येन यः कुर्यात् प्रतिष्ठां शक्तिमानपि ॥ १२८ ॥

न स तत्फलमाप्नोति प्रलोभाक्रान्तमानसः ।
ततस्तु यजमानाय स्वस्वकर्मफलार्पणम् ॥ १२९ ॥

आचार्याद्यास्तदा कुर्युः सपुष्पसलिलैः करैः ।
ततः कर्ता स्वपुत्राद्यैः स्वजनैश्चाभिसंवृतः ॥ १३० ॥

नित्यपूजादिसिद्ध्यर्थं विभवं तत्र कल्पयेत् ।
य एवं कुरुते भक्त्या प्रासादाद्यां स्वशक्तितः ॥ १३१ ॥

लिङ्गप्रतिष्ठां सोऽमुष्मिल्लोँके कामानभीप्सितान् ।
अवाप्य पुत्रमित्राद्यैरन्ते लोकानभीप्सितान् ॥ १३२ ॥

प्राप्नोति तद्विमानादौ यावन्तः परमाणवः ।
तावद् वर्षसहस्राणि भोगान् प्राप्य शिवं व्रजेत् ॥ १३३ ॥

इत्थं प्रतिष्ठा कथितेन्दुमौलेर्ज्येष्ठादिलिङ्गाभ्युचिता यथावत् ।
श्रेष्ठानि तन्त्राणि शिवोदितानि काष्ठान्तमालोच्य बहुप्रकारम् ॥ १३४ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे क्रियापादे
प्रतिष्ठापटलः सप्तचत्वारिंशः ॥

अथाष्टचत्वारिंशः पटलः।

अथ नित्योत्सवं शम्भोः कुर्यात् सांनिध्यकारकम् ।
येनारिष्टानि शाम्यन्ति गुणास्तुष्टिं व्रजन्ति च ॥ १ ॥

त्रिसन्ध्यं पूजयित्वेशं नैवेद्यहवनान्तकम् ।
रुद्रपारिषदेभ्यस्तु बलिं दद्याद् यथाविधि ॥ २ ॥

अत्र मञ्जर्याम्—

"कुर्यान्नित्यबलिं त्रिसन्ध्यमुदितं पाक्यस्तदर्थं चरु-
र्हृन्मन्त्रेण तु तण्डुलांस्तु सलिलैः प्रक्षाल्य चाग्नौ पचेत् ।
तेनाज्यं त्वभिघार्य पक्वसमये मूलेन मन्त्रेण तत्
तेनैवाप्यवतार्य तेन हविषा लिङ्गं प्रकुर्याच्छुभम् ॥"

इति । तद्यथा—

सौवर्णे राजते तद्वदमत्रे ताम्रजेऽपि वा ।
षोडशाङ्गुलविस्तीर्णे धौते चाज्याभिघारिते ॥ ३ ॥
सिद्धं हविस्तत् प्रक्षिप्य हृदयेनाभिघार्य तु ।
मूलेनोच्चं भवेल्लिङ्गं रविदिग्वसुमात्रकैः ॥ ४ ॥
श्रेष्ठादिकं तदाज्येन दध्ना चालिप्य सर्वतः ।
सस्वर्णपुष्पं शिरसि तस्मिन्नावाह्य मूलतः ॥ ५ ॥
शिवं चलासनगतं गन्धाद्यैः पूजयेत् क्रमात् ।
भेरीपणवगोवक्त्रढक्काझल्लरिकानकैः ॥ ६ ॥
तिमिलामड्डुकाम्भोजतालकाहलमर्दलैः ।
सवेणुवीणाकांस्यैश्च बलियात्राभिशंसिभिः ॥ ७ ॥
मध्यमं षष्टिमात्रं तु वादयेयुश्च वादकाः ।
ततः स्नातं द्विजं शिष्यं शुश्रूषुं वाग्यतं शुचिम् ॥ ८ ॥
शुक्लोष्णीषोत्तरासङ्गं कटकाद्यैर्विभूषितम् ।
संप्रोक्ष्य तं वृषं ध्यात्वा तल्लिङ्गं पात्रसंस्थितम् ॥ ९ ॥
आरोप्य तस्य शिरसि पुष्पाण्यारोपयेद् गुरुः ।
तथैवान्यस्तु सकलं लिङ्गं हैमादिकं द्विजः ॥ १० ॥

आवाहितशिवं स्वग्रे गच्छेत् तु शिरसा वहन् ।
रथेन वा शिबिकया द्विजारूढगजेन वा ॥ ११ ॥
तथैव विप्राः शुचयः स्नाताः सर्वेऽपि वाग्यताः ।
छत्राणि च वितानं च घण्टां कुसुमचामरम् ॥ १२ ॥
स्रग्गन्धपुष्पधूपांश्च धारयेयुः समाहिताः ।
तथान्ये दीपकलशदर्पणान् हेमपादुके ॥ १३ ॥
+ + + + + यो वापि सुवेषाः समलङ्कृताः ।
तत्र देवाग्रतो गच्छन् सामान्यार्घ्यकरो गुरुः ॥ १४ ॥
गन्धपुष्पादिकैरिष्ट्वा गणेभ्यः प्रक्षिपेद् बलिम् ।
तत्र देवाग्रतो नार्यः सुरूपाः समलङ्कृताः ॥ १५ ॥
गीतनृत्तं तथा कुर्युरन्ये + + + + + + ।
+ + येन व्रजन्त्यग्रे प्रणमन्तः स्तुवन्ति ये ॥ १६ ॥
नृत्यन्ति ये वा गायन्ति मुच्यन्ते सर्वकिल्बिषैः ।
विमानस्य चतुर्दिक्षु पूर्वादिद्वारपालकान् ॥ १७ ॥
नन्दिनं च महाकालं भृङ्गीशं गणनायकम् ।
वृषभं षण्मुखं देवीं + + + + + + + + ॥ १८ ॥
तत्र दक्षिणतो द्वारे दक्षिणामूर्ति + + + ।

++ तिं चेति केचित् (?).

स्वदिक्ष्विन्द्रादिलोकेशांस्तारादिस्वस्वनामभिः ॥ १९ ॥
नमोन्तमिति पूज्यैतान् बलिं तेभ्यो विनिक्षिपेत् ।
इन्द्रात् प्राच्यां + + + + + + + + + + + + ॥ २० ॥
सत्यकायास्य पुत्राय प्रभायै चास्य वामतः ।
स्कन्दाय वायोः प्राच्यां तु दुर्गायै स्कन्दपूर्वतः ॥ २१ ॥
सोमात् पूर्वे कुबेराय चण्डेशाय स्वगोचरे ।
क्षेत्रे + + + + + + मुख्याभिर्विकिरेद् बलिम् ॥ २२ ॥
अथान्तर्गोपुरद्वारि तीक्ष्णनेत्राय दक्षिणे ।
बलिं द्वाःस्थाय विकिरेन्मृगास्याय तथोत्तरे ॥ २३ ॥

गोपुरादथ निष्क्रम्य प्रादक्षिण्येन तु व्रजेत् ।
बलिपीठे + + + + + + स्थित्वा तदुन्मुखः ॥ २४ ॥
ये समस्तं जगद् व्याप्य तिष्ठन्ति बलिकाङ्क्षिणः ।
ते रुद्रपार्षदाः सर्वे गृह्णन्तु बलिमुत्तमम् ॥ २५ ॥
इत्यनेन गणाञ् शम्भोः श्रावयित्वा ततो गुरुः ।
मध्यहारान्तरा गच्छन्ना + + + क्षिपेद् बलिम् ॥ २६ ॥
अष्टौ गणेशा नन्द्याद्याः कोटिकोटिगणेश्वराः ।
नन्दीशश्च महाकालो भूतनाथो महीधरः ॥ २७ ॥
पर्वतेशो गुहेशश्च कालपाशकपालिनौ ।
प्रागादिकं क्रमादेभ्यः स्वाख्याभिर्विकिरेद् बलिम् ॥ २८ ॥
ततस्तु बलिपीठस्य परितस्तूपपीठगान् ।
भूतिदाद्यांस्तु पूर्वाद्यं संपूज्य विकिरेद् बलिम् ॥ २९ ॥
भूतिदं दुर्निरीक्षं च भीमरूपं सुलोचनम् ।
सुमुखं त्रिशिखं चेति त्रिभुजं त्रिशिरसं तथा ॥ ३० ॥
पिङ्गलं हरसेनं च दशैतान् भूतनायकान् ।
पिङ्गलं तत्कुमुदके हरसेनं तथोपरि ॥ ३१ ॥
पीठपङ्कजमध्ये तु निजाख्याभिर्नमोन्तकम् ।
हरसेनं तु तन्नाम्ना तद्गायत्र्या च पूजयेत् ॥ ३२ ॥

ओं हरसेनाय विद्महे महाबलाय धीमहि तन्नो दशमूर्तिः प्रचोदयात् इति ।

सर्वान्नेन बलिं दद्यात् पुष्पाद्यं तदशेषतः ।
क्षिप्त्वा नमस्कृत्य गुरुः प्रविशेद् देवमन्दिरम् ॥ ३३ ॥
ततः प्रवृत्तसङ्गीतलास्यताण्डवमण्डनैः ।
विलम्बितं समाश्रित्य द्वितीयं तु प्रदक्षिणम् ॥ ३४ ॥
नीत्वा द्रुतं तृतीयं तु गीतवादित्रनिस्वनैः ।
नीत्वा प्रदक्षिणं देवमालयान्तः प्रवेशयेत् ॥ ३५ ॥
अन्तर्मण्डलके प्राग्वत् परिक्रम्य प्रदक्षिणम् ।
प्रक्षाल्य पादौ प्रविशेन्मण्डपे वार्धमण्डपे ॥ ३६ ॥

पीठे निवेश्य संपूज्य प्रणम्याभिप्रसाद्य च ।
अन्नलिङ्गस्थितं देवं मूललिङ्गे नियोजयेत् ॥ ३७ ॥

अन्नलिङ्गे तु चण्डेशमावाह्येष्ट्वा विसृज्य तु ।
तदन्नलिङ्गं क्षणिकमगाधेऽम्भसि निक्षिपेत् ॥ ३८ ॥

दद्याद् गोभ्योऽथवा नित्यमतो नित्योत्सवः स्मृतः ।

नित्योत्सवाधिकारः ।

महोत्सवविधिः शम्भोः कथ्यते येन तर्पिताः ॥ ३९ ॥

गणाः सगणनाथाः स्युः सर्वशान्तिप्रदा नृणाम् ।
प्रतिसंवत्सरं वापि प्रतिषण्मासमेव वा ॥ ४० ॥

शिवयात्रोत्सवं सम्यक् कुर्यात् सर्वार्थसिद्धये ।
तत्र यात्रा रथेन स्यादथवा शिबिकादिना ॥ ४१ ॥

चक्रवर्त्युपचारेण तल्लक्ष्मातो निगद्यते ।
शिबिकाद्यं रथाद्यं च यानं खट्वादिकं तु यत् ॥ ४२ ॥

शयनासनसंज्ञं स्यात् तल्लक्ष्म पृथगुच्यते ।
पैठी च शैखरी मौण्डी त्रिविधा शिबिका भवेत् ॥ ४३ ॥

पैठी तु भित्तिकान्ता स्याच्छैखरी शिखरान्विता ।
मौण्डी स्तम्भोत्तरान्ता तु शालाच्छादनसंयुता ॥ ४४ ॥

व्यासायामादिकं त्वासां समानं तच्च कथ्यते ।
त्रिवितस्तिकविस्तारा दीर्घा पञ्चवितस्तिकम् ॥ ४५ ॥

कनिष्ठा मध्यमश्रेष्ठे त्रिषण्मात्राङ्गुलाधिके ।
अध्यर्धं वायता व्यासात् स्वकर्णायामतोऽपि वा ॥ ४६ ॥

व्यासार्धं भित्तितुङ्गं स्याच्छ्रेष्ठाथो मध्यमाधरौ ।
मूर्त्यङ्गुलविहीनोच्चे मुख्यमध्याधमक्रमात् ॥ ४७ ॥

सार्धेषुशरवेदांशैरिषिकाविस्तृतिः स्मृता ।
सा स्वव्यासार्धमुच्चा स्याद् दन्तदार्वादिनिर्मिता ॥ ४८ ॥

कम्पपङ्कजनिम्नानि कुमुदं निम्नमेव च ।
स्यात् क्षुद्रपट्टिका चेत्थमीषिकालङ्कृतिर्भवेत् ॥ ४९ ॥

शिखेरूर्ध्वं तु हस्तस्य व्यासः सार्धाङ्गुलोऽधमः ।
सार्धद्विमात्रत्र्यंशश्च विस्तारौ मध्यमोत्तमौ ॥ ५० ॥
व्यासत्रिपादमर्धं वा हस्तोर्ध्वं गोलकार्धवत् ।
वेत्रार्धवद् वा छत्राभो हस्तो दन्तादिनिर्मितः ॥ ५१ ॥
इषिकाहस्तयोर्मध्ये त्रिधा भक्तेऽधरोर्ध्वयोः ।
भागयोर्मध्यतोऽन्ते चाप्यादौ स्युर्वेदकम्पकाः ॥ ५२ ॥
सार्धद्वयद्वयाध्यर्धमात्रैः श्रेष्ठादिकम्पकाः ।
+ + + + + + + भागौ गुलिकाफलकान्वितौ ॥ ५३ ॥
मध्यभागे तथा शिष्टावूर्ध्वाधःकम्पकावपि ।
नरनारीनाटकाद्यैरलङ्कुर्यात् तु युक्तितः ॥ ५४ ॥
इषिकाहस्तयोर्मध्ये व्यालाः स्युः कोणगा बहिः ।
इषिकाग्रन्थ + + + + + + + + + + ताः ५५ ॥
स्वव्यासकर्णमात्रेण मुष्टिबन्धविनिर्गमः ।
निर्गमो मकरास्यो वा व्यासायामस्थभक्तया(?) ॥ ५६ ॥
नन्दरुद्रसमाः कार्यास्तुल्या वा स्युः शरर्षिभिः ।
स्तम्भानां तु घनव्यासौ कम्पानां च समौ स्मृतौ ॥ ५७ ॥
शा + + + + + + + + + + + + + भिः ।
त्रिचतुर्मात्रविस्तीर्णाः षट्सप्ताष्टाङ्गुलोच्छ्रिताः ॥ ५८ ॥
सहीरवृत्तकुम्भाः स्युरधःपादाः सलम्बकाः ।
ताम्रायसैः कीलपट्टैर्युक्त्या स्युः सर्वतो दृढाः ॥ ५९ ॥
इषीणां तु + मा + + + +, + + + + + + ।
+ + + + + + + + + + + + + + + + + ॥ ६० ॥
पैठीत्थं शिबिका प्रोक्ता शैखरीमौण्डिके तथा ।
कुर्यादनेन मार्गेण विशेषस्तु निगद्यते ॥ ६१ ॥
स्वव्यासतुल्योच्चोर्ध्वाङ्घ्रि + + + + + + + + ।
+ + + + + + पेता जालभित्तिसमावृता ॥ ६२ ॥
सकूटाच्छादनवती सद्वारा युक्तितो भवेत् ।
स्तम्भानां मध्यतो मानं शिबिकानां विधीयते ॥ ६३ ॥

मधूकशाकतिमिशपनसा + + + + ताः ।

शिविकाधिकारः ।

रथ + + + + ह्यातु षट्सप्ताष्टवितस्तिभिः ॥ ६४ ॥

व्यासश्चाक्षायतिः सैव नाभ्यन्ताक्षोत्तरायतिः ।
स्वव्यासाध्यर्धमायामो रथोपस्थस्य कीर्त्तितः ॥ ६५ ॥

रथ + + + + + + + + + + + वा नवा ।
सप्त वा पञ्च वा युक्त्या बद्धाश्चाक्षोत्तरोर्ध्वतः ॥ ६६ ॥

तिर्यक्कम्पैस्तु तावद्भिरयःकीलैर्दृढीकृतः ।
अग्राक्षान्मध्यभारो यः स चेषादण्ड इष्यते ॥ ६७ ॥

तस्योपरिष्टाद् यद् वक्रं दारु + + + + + + ।
कूबरः स्यात् तदायामो हस्तत्रयमितो भवेत् ॥ ६८ ॥

आवक्रकूबरस्त्वग्रे पद्मकुड्मलसन्निभः ।
ऊर्ध्वं तु भारदारूणां फलकाभिस्तु युक्तितः ॥ ६९ ॥

प्रस्तरः पट्टकीलाद्यैः सुदृढः सुसमो भवेत् ।
स्वायामवेदभागेन रथोपस्थाग्रनिर्गमः ॥ ७० ॥

सारथिप्रभृतीनां स्यादासनार्थं प्रकल्पितः ।
अक्षोत्तरायामसमा चक्राणां विस्तृतिः स्मृता ॥ ७१ ॥

तन्मध्यनाभयस्तास्तु दशमात्राङ्गुलोन्नताः ।
तावदेव च तासां तु विस्तारः परितः स्मृतः ॥ ७२ ॥

चक्रेष्वरान्य + वेंषु द्वात्रिंशद् वा तदर्धतः ।
ते स्युः पिपीलिकामध्या यवमध्यास्तथापि वा ॥ ७३ ॥

इन्दीवरदलाकारा मातुलुङ्गोपमास्तु वा ।
नाभ्यादि तेषामायामो नेमेः सीमादितो भवेत् ॥ ७४ ॥

नेमिव्यासस्तु वेदेषुषण्मात्रोऽन्ताश्चमादितः ।
पुष्पस्वस्तिकखण्डेन्दुमत्स्याद्यैस्तदलङ्कृतिः ॥ ७५ ॥

चक्रार्धमानदीर्घाः स्युः स्तम्भाश्चत्वार एव हि ।
मूलाग्रयोस्ते व्यासेन चतुस्त्र्यङ्गुलसम्मिताः ॥ ७६ ॥

ते चापि सुदृढाः कार्याः स्तम्भलक्षणसंयुताः ।
स्तम्भोच्चरामभागैकभागाद् भित्त्युन्नतिर्भवेत् ॥ ७७ ॥

ईषादिहस्तदण्डान्तकम्पपद्माद्यलङ्कृता ।
भूतव्यालगजाद्यैश्च नाटकैश्च विभूषयेत् ॥ ७८ ॥

सर्वत्र कीलैः सुदृढैस्ताम्रायःपट्टबन्धनैः ।
सुदृढं युक्तितः कृत्वा स्तम्भानामुपरि क्रमात् ॥ ७९ ॥

पोतिकोच्चरसंयुक्तं कपोताद्यैरलङ्कृतम् ।
प्रासादमण्डपाकारं रम्यं सशिखरं भवेत् ॥ ८० ॥

एवमेव रथं कुर्याद् रङ्गाख्यं शिखरं विना ।
साङ्ग्रामिको द्विचक्रः स्याच्छिखरस्तम्भवर्जितः ॥ ८१ ॥

वितस्तिभित्तिसंयुक्तः सेषादण्डः सकूबरः ।
शकटोऽपि द्विचक्रः स्याद् भित्तिस्तम्भादिवर्जितः ॥ ८२ ॥

पर्यङ्कस्य तु विस्तारो दैर्घ्यं च शिबिकासमम् ।
इषिकाः स्युस्तदाकाराः कम्पपद्माद्यलङ्कृताः ॥ ८३ ॥

अष्टादशाङ्गुलोत्सेधाः पादाः श्रेष्ठाः सहेषया ।
त्रिपञ्चकाङ्गुला मध्याः कनिष्ठा द्वादशाङ्गुलाः ॥ ८४ ॥

स्वोच्चामश्रुद(?)तीष्वंशाच्छ्रेष्ठाद्या पादविस्तृतिः ।
पादा व्यालहरिप्रख्याः श्रेष्ठा मध्यास्त्वथाधमाः ॥ ८५ ॥

ऋजवः केवलाः पादा एकद्रव्याः समाः शुभाः ।
इषिकाश्च मिथस्तुल्याः शुभा दार्वादिनिर्मिताः ॥ ८६ ॥

हैमा दान्ता दारवाश्च पादेषास्तूत्तमादिकाः ।
क्षौमकार्पासपट्टाभ्यां प्रस्तरौ श्रेष्ठमध्यमौ ॥ ८७ ॥

अधमः फलकाभिः स्यात् स चेषादारुभिः स्मृतः ।
सिंहव्यालाङ्घ्रिपर्यङ्कौ विप्रक्षत्रिययोः स्मृतौ ॥ ८८ ॥

अन्येषामृजुपादाः स्युः सर्वेषामृजवोऽथवा ।
नवसप्तेषूच्चरैस्तु क्रमाद् विंशतिमात्रकैः ॥ ८९ ॥

श्रेष्ठाद्यमासनं व्यासतुल्योच्चं चतुरश्रकम् ।
पर्यङ्कस्येव तत्पादा व्यालाद्यास्त्रिविधाः क्रमात् ॥ ९० ॥

ऽव्यासाष्टमांशाद्यायामवृद्ध्या तु द्विगुणान्तकम् ।
सप्तधैवासनं हस्तिभूतसिंहवृषाङ्घ्रिकम् ॥ ९१ ॥
सूर्याङ्गुलैः स्यात् पादोच्चं देवविप्रनृपोचितम् ।
सोत्तराऽजकपोतं तदालिङ्गान्तरिकादिभिः ॥ ९२ ॥
उपपीठोचितैर्युक्तं सिंहपादैर्विचित्रितम् ।
तस्योपरिष्टात् पश्चार्धे हेमरत्नैर्विचित्रितम् ॥ ९३ ॥
नक्रतोरणसंयुक्तं कुर्यात् कल्पकपादपम् ।
सिंहासनं स्याद् देवानां राज्ञां चेच्वंशतुङ्गपात् ॥ ९४ ॥
पूजापीठं तु देवानामाद्यं षण्मात्रविस्तृतम् ।
द्विद्व्यङ्गुलविवृद्ध्यातः करान्ताद् दशधा ततम् ॥ ९५ ॥
चतुरश्रं तु वृत्तं वाप्यायताश्रं तु युक्तितः ।
त्रिपञ्चषड्वस्वंशैर्वा पीठपादोन्नतिर्भवेत् ॥ ९६ ॥
ऊहप्रत्यूहचित्राढ्यं गृहार्चादौ विधीयते ।
यत् पीठं पिण्डिकाकारं हेमरूप्यादिनिर्मितम् ॥ ९७ ॥
दारवं वा गृहार्चादौ भद्रपीठं तु तत् स्मृतम् ।
तदेव नालसंयुक्तं पीठं स्यात् स्नपनोचितम् ॥ ९८ ॥
तदेव मध्यगर्ताढ्यं प्रतिष्ठादौ तु योजयेत् ।
किष्कुः पादोनमर्धं वा व्यासः कूर्मासनस्य तु ॥ ९९ ॥
शरवेदाग्निमात्रोच्चं क्रमाच्छ्रेष्ठादिकं स्मृतम् ।
स्वऽव्यासाद् रसनन्देनमात्रोना तूत्तमादिका ॥ १०० ॥
नालदण्डायतिऽव्यासषडंशाद् दण्डविस्तृतिः ।
+ + + + + + + + + + तच्च क्रमात् कृशम् ॥ १०१ ॥
वृत्त एव हि दण्डः स्यादधश्चामध्यनिर्गतः ।
तत्राम्बुजादिचिह्नं स्यादग्रं तु समखण्डितम् ॥ १०२ ॥
वृत्तं वा चतुरश्रं वा शस्तं कूर्मासनं तु तत् ।
स्वोच्चवेदैकभागेन घनं स्यात् फलकासनम् ॥ १०३ ॥
कम्पपङ्कज + + + + + + + + + + + ।
इत्थं स्वरसभागेन प्रविष्टाधोऽस्य भित्तिका ॥ १०४ ॥

मूले त्वंशघना त्वग्रे मात्रमात्रघना भवेत् ।
आसनोच्चत्रिभागोच्चा वृत्ताकारा मनोरमा ॥ १०५ ॥
व्रतिनां दीक्षितानां च पूजाजपहुतादिषु ।
+ + + + नरेन्द्राणां वृत्तं कूर्मासनं भवेत् ॥ १०६ ॥
आसनं चतुरश्रं स्यात् पूजादावेव नान्यदा ।
नित्योत्सवो निगदितोऽत्र महोत्सवार्थं
यानादिकं च कथितं परमेश्वरस्य ।
यत्रो + + + + + + + + + + + + ।
+ + + + + + + + + + + + + + ॥ १०७½ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे
क्रियापादे नित्योत्सवयानशयनादि-
पटलोऽष्टचत्वारिंशः ॥

अथ एकोनपञ्चाशः पटलः ।

महोत्सवं त्रिभिर्मासैश्चतुर्भिः षड्भिरेव वा ।
+ + + + + + + + + + + + + + रतिः ॥ १ ॥
चैत्रादिकेषु मासेषु मासा + सितपर्वसु ।
उत्सवावभृथस्नानं सङ्कल्प्यास्मात् पुरैव तु ॥ २ ॥
यात्रां प्रवर्तयेच्छम्भोर्गणेभ्यो विकिरेद् बलिम् ।
कुर्याद् विशेषपूजां चाप्यष्टा + + + + + + ॥ ३ ॥
+ + + द्वादशाहं वा श्रेष्ठमध्याधमोत्सवे ।
दिनैर्वा रुद्रनन्दर्षिसंख्यैः श्रेष्ठादिकोत्सवाः ॥ ४ ॥
उक्ताः पञ्चत्र्येकदिनैर्भवन्त्यल्पोत्सवास्त्रयः ।
ध्वजारोपणपूर्वं तु कुर्या + + + + + + ॥ ५ ॥
न ध्वजारोपणं शस्तं पञ्चाहादिष्विह त्रिषु ।
उत्तमाद्युत्सवानां तु त्रिद्व्येकगुणवासरात्(?) ॥ ६ ॥
पूर्वमेव शुभे लग्ने ध्वजारोपणमाचरेत् ।
तस्मिन्नेव दिने रात्रौ भेरीसंनादनं स्मृतम् ॥ ७ ॥
महोत्सवानां प्रत्येकमङ्कुरार्पणकत्रयम् ।
ध्वजाङ्कुरः स्यात् प्रथमो द्वितीयश्चोत्सवाङ्कुरः ॥ ८ ॥

तृतीयोऽवभृथार्थः स्यात् सर्वे स्युः पूर्वमर्पिताः ।
ध्वजदण्डतरुः पूगस्त्वक्सारः शाक एव वा ॥ ९ ॥
सालो वा चम्पकः शस्तो रक्तसारोऽसनस्तथा ।
अकोटरो निर्व्रणः स्याद् ऋजुर्ग्रन्थ्यादिवर्जितः ॥ १० ॥
सवल्कलौ वेणुपूगावन्ये सर्वेऽप्यवल्कलाः ।
मूलाग्रयोः समच्छेदाः साधुवृत्ता मनोरमाः ॥ ११ ॥
ध्वजदण्डस्य तुङ्गं तु विज्ञेयं द्वारतुङ्गतः ।
पञ्चपञ्चगुणं श्रेष्ठं मध्यमत्यष्टिसंमितैः ॥ १२ ॥
कनिष्ठं स्याद् दशगुणमथ स्तूपिसमोच्छ्रयः ।
मुख्यं कण्ठमितं मध्यं नीचं वृषतलोच्छ्रितम् ॥ १३ ॥
त्रिद्व्येकगुणकं वा स्याद् विमानादिति केचन ।
चत्वारिंशच्च षट्त्रिंशत् त्रिंशच्चैवाङ्गुलानि तु ॥ १४ ॥
श्रेष्ठादिध्वजदण्डानां नाहाः स्युस्त्रिविधाः क्रमात् ।
ध्वजदण्डसजातीयस्तूपदण्डतरुर्भवेत् ॥ १५ ॥
ध्वजदण्डचतुर्थांशात् पञ्चांशाद् वा षडंशतः ।
उपदण्डस्य तुङ्गं स्यात् तन्नाहो द्वादशाङ्गुलः ॥ १६ ॥
विकारमनुसूर्यांशैरायताः सार्धविस्तृताः ।
सच्छिद्राग्रास्त्रयस्कन्धाश्छिद्रप्रोतोपदण्डकाः ॥ १७ ॥
प्रविष्टा ध्वजदण्डाग्रे युक्त्या कार्याः समान्तराः ।
उपदण्डः केतुदण्डादग्रे तालाधिकायतः ॥ १८ ॥
तस्याग्राधस्तलामात्रे (?) वलयस्त्वायसो भवेत् ।
पताकाबन्धनीरज्जुस्तदन्तः संविशेद् यथा ॥ १९ ॥
कार्पासिकी यन्त्ररज्जुः स्थूला मध्यमया समा ।
द्विगुणा ध्वजदण्डोच्चा क्षालिता सुविशोधिता ॥ २० ॥
ध्वजस्थानं वृषाग्रे वा बलिपीठाग्रतोऽपि वा ।
कुर्यात् तु मध्यहारायां मर्यादामध्यमेऽथवा ॥ २१ ॥
द्वारतुङ्गाद् रविगुणं पुरोद्वाराद् विहाय तु ।
क्रमेण नाभिकटचूरुदघ्ने गर्ते विलेपिते ॥ २२ ॥

V

हेमकूर्मं निधायेष्ट्वा सुलग्नादौ दिवैव तु ।
ध्वजदण्डं समुच्छ्रित्य दर्भमालाद्यलङ्कृतम् ॥ २३ ॥

शङ्खतूर्यादिनिर्घोषैः स्थापयेयुर्मुदान्विताः ।
तन्मूलवेदिकां कुर्याद् द्व्येकहस्तततोच्छ्रयाम् ॥ २४ ॥

द्वारोच्चत्र्यंशतो द्व्यंशव्यासामेकांशमुन्नताम् ।
क्रमाच्छिलेष्टकामृद्भिः श्रेष्ठाद्या वेदिकाः स्मृताः ॥ २५ ॥

पताकायास्तथायामो नन्दाष्टमुनिकिष्कुभिः ।
तत्पञ्चांशेन तद्व्यासो व्यासार्धाच्छिखरं भवेत् ॥ २६ ॥

पुच्छत्रयं द्वयं वा स्याद् व्यासाद् दीर्घं क्रमात् कृशम् ।
स्वायामपञ्चभागैकभागान्मध्ये वृषं लिखेत् ॥ २७ ॥

शुक्लो वृषो रक्तखुरो रक्तश्रवणशृङ्गवान् ।
सितासितविशालाक्षः सुग्रीवः सुमुखाकृतिः ॥ २८ ॥

सुवालधिः सुपादोरुः पीनोत्तुङ्गककुद् भवेत् ।
शयितो वा स्थितो वा स्याद् यथोक्तवृषलक्षणः ॥ २९ ॥

ध्वजोच्छ्रयात् पूर्वदिने पूर्वरात्रेऽधिवासनम् ।
कुर्याद् विशेषपूजां च शिवाय वृषभाय च ॥ ३० ॥

वृषभाय तु मुद्गान्नं निवेद्याभिप्रणम्य च ।
वृषाग्रे स्थण्डिलं कृत्वा शालिभिस्तण्डुलैरपि ॥ ३१ ॥

तस्मिन् नवपदं कृत्वा कलशान् नव विन्यसेत् ।
आपूर्य शुद्धसलिलैः कूर्चहेमाम्बरान्वितम् ॥ ३२ ॥

अलङ्कृत्य वृषं मध्ये परितोऽष्टौ च दिक्पतीन् ।
आवाह्य सम्यग् गन्धाद्यैरभिपूज्य यथाविधि ॥ ३३ ॥

तारादिवृषमन्त्रेण स्वगायत्र्या वृषं यजेत् ।

ओं वृषभाय नमः । ओं महाबलाय नमः । ओं हरवाहनाय नमः । ओं सौरभेयाय नमः । ओं तीक्ष्णशृङ्गाय विद्महे वेदपादाय[1] धीमहि । तन्नो वृषभः प्रचोदयात् ।

स्वैर्मन्त्रैरष्टलोकेशांस्तदग्रे स्थण्डिले पुनः ॥ ३४ ॥

---

[1] 'महादेवाय धी' ख. पाठः.

पताकां विन्यसेत् तस्मिन् वृषमन्त्रेण तां यजेत् ।
तस्माद्धस्तद्वये कृत्वा मण्डलं चतुरश्रकम् ॥ ३५ ॥

तत्राग्निं सम्यगाधाय कृत्वा कर्म शिवानले ।
पलाशसमिधो हुत्वा वृषमन्त्रेण देशिकः ॥ ३६ ॥

तिलानाज्यं चरुं चापि पृथगष्टोत्तरं शतम् ।
पूर्णां स्विष्टकृतं चापि हुत्वा वह्निं विसर्जयेत् ॥ ३७ ॥

सुव्युष्टायां रजन्यां तु कृतनित्यक्रियो गुरुः ।
पूर्वाह्णे वाथ मध्याह्ने पूर्वरात्रे सुलग्नके ॥ ३८ ॥

शुश्रूषुभिर्द्विजैः शुद्धैः सोष्णीषैः सोत्तरीयकैः ।
ध्वजमुद्धृत्य यन्त्रेण वाहयेच्छिरसाथवा ॥ ३९ ॥

शङ्खभेर्यादिनिर्घोषैः कृत्वा ग्रामप्रदक्षिणम् ।
अन्तः प्रविश्य निर्दिष्टे ध्वजस्थाने तु विन्यसेत् ॥ ४० ॥

पुण्याहं वाचयित्वाथ तज्जलैः क्षालयेद् ध्वजम् ।
दण्डस्य मूले मध्येऽग्रे वृषषण्मुखमारुतान् ॥ ४१ ॥

तत्तन्मन्त्रेण संपूज्य गीतवाद्यादिमङ्गलैः ।
वृषकुम्भं समानीय ध्वजोपान्ते तु विन्यसेत् ॥ ४२ ॥

कुम्भस्थान् वृषमन्त्रांस्तु ध्वजे वृषहृदि न्यसेत् ।
मङ्गलाङ्कुरदीपाद्यैरलङ्कृत्य यथाविधि ॥ ४३ ॥

रज्ज्वा पताकासङ्गिन्या गायत्र्या वृषभस्य तु ।
ध्वजमारोपयेत् सम्यग् रज्ज्वा दण्डं च वेष्टयेत् ॥ ४४ ॥

लोकपालास्थितैः कुम्भैः ध्वजमूलेऽभिषेचयेत् ।
तन्मूले ध्वजमाराध्य निवेद्यान्तं यथाविधि ॥ ४५ ॥

ओं

नमस्तेऽस्तु त्रिणेत्राय ध्वजाधिपतये नमः ।
नमोऽस्तु नन्दिने तुभ्यमुत्सवस्य प्रसिद्धये ॥ ४६ ॥

अथ ध्वजस्य पुरतः स्थण्डिले शालितण्डुलैः ।
विहिते विन्यसेद् भेरीं वाससा समलङ्कृताम् ॥ ४७ ॥

रुद्रं दक्षिणतो भेर्या वामतस्तु जनार्दनम् ।
मध्ये ब्रह्माणमाराध्य कोणदण्डे गुहं यजेत् ॥ ४८ ॥

तदग्रे स्थण्डिले पद्मं विलिख्य शुभकर्णिकम् ।
तत्र शूलं प्रतिष्ठाप्य यथावदभिपूजयेत् ॥ ४९ ॥

ततस्त्रियम्बकाद्येन मन्त्रेण प्रथमं गुरुः ।
कोणेन ताडयेद् भेरीमिदंविष्ण्वादिना ततः ॥ ५० ॥

तृतीयं ब्रह्मजज्ञानमन्त्रेणैव तु ताडयेत् ।
वाद्यकारं ततः स्नातं शुक्लवस्त्राद्यलङ्कृतम् ॥ ५१ ॥

आहूय वादयेत् तेन त्रिमार्गपरिवर्तनात् ।
ततोऽस्त्रलिङ्गमुत्थाप्य शङ्खभेर्यादिनिःस्वनैः ॥ ५२ ॥

गीतनृत्तरवैश्चैवच्छत्रचामरमङ्गलैः ।
ग्रामप्रदक्षिणं कुर्वन् ब्रह्मेन्द्रादीन् दिगीश्वरान् ॥ ५३ ॥

दिक्षु सन्धिषु संपूज्य मन्त्रैः श्लोकैर्निजैः स्तवैः ।
आवाह्य चाऽभिपूज्य शुद्धान्नेन बलिं क्षिपेत् ॥ ५४ ॥

भो भो ब्रह्मंस्त्वयेत्याद्यैः शिवाज्ञां श्रावयेदपि ।
ततो देवालयं गत्वा ध्वजस्य पुरतः स्थितः ॥ ५५ ॥

रुद्रादित्यान् वसून् सोममश्विनौ च मरुद्गणान् ।
पितॄनृषींश्च गन्धर्वयक्षविद्याधरासुरान् ॥ ५६ ॥

नागकिन्नररक्षांसि पिशाचान् भूतनायकान् ।
अब्धीनप्सरसः सिद्धान् नदीः शैलान् वनस्पतीन् ॥ ५७ ॥

आवाह्योत्सवसेवार्थं स्वैः स्वैस्तारादिनामभिः ।
आगच्छन्त्विति च ब्रूयाच्छिवाज्ञां श्रावयेच्च तान् ॥ ५८ ॥

ओं

भो भो रुद्रगणाः स्वैः स्वैः परिवर्हैर्गणैः सह ।
सेव्योऽयमुत्सवः शम्भोः सुसन्तुष्टैः शिवाज्ञया ॥ ५९ ॥

ओं

इत्यादिभिस्तु देवादीञ्छ्रावयेत् स्वस्वनामभिः ।
रात्रौ वलिं च विकिरेच्छङ्खभेर्यादिनिस्वनैः ॥ ६० ॥

समालिप्य प्रतिदिनं निवेद्यान्तं यजेद् ध्वजम् ।

ध्वजोच्छ्रयाधिकारः ।

अथोत्सवदिने प्राप्ते वीथीस्तु परिशोधयेत् ॥ ६१ ॥
शिवालयग्रामपुरपत्तनादिषु सर्वतः ।

अत्र मञ्जर्याम् —

"संमार्ज्य ग्रामवीथीः प्रतिदिशमभितः सेचयेद् गन्धतोयै-
रुत्फुल्लैर्दिव्यगन्धैः प्रतिनवकुसुमैः संस्तरेत् तासु भूयः ।
कुर्यात् पीठान् यथाशास्त्रमपि बलिविधये ग्रामपर्यन्तदेशे
ग्रामान्तश्चत्वरेषु प्रतिसुरनिलयं द्वारि चैत्येषु मूले ॥"

द्वारगोपुरवप्रान्तर्वीथीष्वपि च सर्वतः ॥ ६२ ॥

नालिकेरेक्षुकदलीपूगान् पुष्पद्रुमानपि ।
प्रागेवारोपयेन्नोचेत् तद्दिनेषूपपत्तितः ॥ ६३ ॥

समूलकदलीपूगैरम्लायद्भिर्विभूषयेत् ।
तोरणैश्च ध्वजैश्चित्रैः पुष्पमालावलम्बितैः ॥ ६४ ॥

दीपप्रासादवृक्षाद्यैर्यथास्थानं निवेशितैः ।
डोलावितानयन्त्राद्यैरलङ्कृत्य यथाविधि ॥ ६५ ॥

उत्सवाहस्तु कुर्वीत शम्भोर्नैमित्तिकार्चनम् ।
यथाविभवसारं तु वित्तशाठ्यविवर्जितः ॥ ६६ ॥

पञ्चामृतैश्च विधिवत् पञ्चगव्येन चाम्भसा ।
गन्धोदकेन शीतेन चाभिषिञ्चेन्महेश्वरम् ॥ ६७ ॥

सशङ्खभेरीतिमिलामणवानकवेणुषु ।
नदत्सु पिष्टदीपाद्यैर्नीराज्यं तु यथाविधि ॥ ६८ ॥

ब्रह्मभिः पावमानीभिः कद्रुद्रायादिना तथा ।
रुद्रश्रीपौरुषैः सूक्तैः स्नापयित्वा यथाक्रमम् ॥ ६९ ॥

सुसूक्ष्मैर्वसनैः शुक्लैर्नानावर्णैर्दुकूलकैः ।
चन्दनागरुकर्पूरश्लक्ष्णपिष्टैः सकुङ्कुमैः ॥ ७० ॥

लिङ्गपीठं समालिप्य सुवर्णकुसुमादिभिः ।
मुक्तपुष्पैश्च मालाभिर्हेमपट्टैश्च भूषणैः ॥ ७१ ॥
अलङ्कृत्यालयं चापि चित्रैः कुसुममण्डपम् ।
चन्दनागरुकर्पूरपुष्पधूपैश्च पूरयेत् ॥ ७२ ॥
सकर्पूरदशैर्दीपैः सुगन्धस्नेहपूरितैः ।
आलयान्तर्बहिश्चापि निवेद्यान्तं यजेच्छिवम् ॥ ७३ ॥
चतुस्त्रिद्विगुणं नित्यनिवेद्यात् प्रतिवासरम् ।
श्रेष्ठादिकं यथाशक्ति नैवेद्यं विनिवेदयेत् ॥ ७४ ॥
उपचारोक्तमार्गेण ससूपं सोपदंशकम् ।
सापूपलड्डुकफलं तदन्नं षड्विधं शुचि ॥ ७५ ॥
पायसं कृसरं प्रातर्मध्याह्ने सगुलौदनम् ।
शुद्धान्नं त्वथ दध्यन्नं सहरिद्रं निशामुखे ॥ ७६ ॥
मुद्गौदनं त्वर्धरात्रे सर्वं मधुघृतोत्तरम् ।
अथवा सर्वसन्ध्यासु पायसादीन्यनुक्रमात् ॥ ७७ ॥
ईशानादिषु वक्त्रेषु दद्याच्छुद्धौदनं पुनः ।
निशासु यन्त्रलिङ्गाद्यैः पत्रच्छेदादिभिस्तथा ॥ ७८ ॥
इन्धादिभिर्विचित्राभिः प्रेक्षार्हाभिर्यजेच्छिवम् ।
पूर्वमध्यापराह्णेषु यात्रा रात्रौ च शस्यते ॥ ७९ ॥
श्रेष्ठोत्सवे चतुष्कालं त्रिद्विकालं तथान्ययोः ।
रथेन रङ्गेण तथा शिबिकाभिश्च वै क्रमात् ॥ ८० ॥
श्रेष्ठादिकासु यात्रा स्यात् सर्वैर्यानैस्तु संभवे ।
अलङ्कृते समाच्छन्ने हेमपट्टाम्बरादिभिः ॥ ८१ ॥
सुवर्णरत्नमालाभिः पताकाभिश्च शोभिते ।
आस्तीर्णे चित्रवसनैः कुसुमोत्करमण्डिते ॥ ८२ ॥
याने हैमादिकं देवं श्रेष्ठादिक्रमयोगतः ।
आरोप्य तस्मिन् सुदृढं विदध्यात् पीठरक्षणम् ॥ ८३ ॥

---

१. 'ण्डा' क. पाठः.

अत्र संहिताटीकायां —

"नित्योत्सवादियात्रासु हैमाद्या प्रतिमोचिता ।
चन्द्रशेखरमूर्त्तिः स्यात् सा च नित्यं सुपूजिता ॥"

इति ।

अथवा व्यष्टमूर्त्तीनां मूर्त्तिं भिक्षाटनीं विना ।
विनैवोमार्धहर्य्यर्धे कङ्कालं च विनैव तु ॥ ८४ ॥

या मूर्त्तयो द्वादशोक्तास्ताभिर्वा स्यान्महोत्सवः ।
मूर्त्तिं सम्यगलङ्कृत्य स्रगम्बरविभूषणैः ॥ ८५ ॥

आवाहितशिवामिष्ट्वा गन्धाद्यैर्भक्तिनम्रधीः ।
यात्रां प्रवर्तयेद् वाद्यगीतनृत्तादिमङ्गलैः ॥ ८६ ॥

अत्र मञ्जर्यां—

"भेरीवृषेभव्यजनानि सिंहकुम्भौ पताकाश्च तथैव दीपाः ।
एतानि संगृह्य सुलोहकलृतान्यष्टौ प्रयायादथ मङ्गलानि ॥"

अथ वेदविदो विप्राः स्वस्तिसूक्तादिपाठकाः ।
आशिषो वाचयित्वाग्रे पठेयुः स्वस्तये स्तुतिम् ॥ ८७ ॥

स्वस्तयेऽस्तु सदा विष्णुः स्वस्तयेऽस्तु चतुर्मुखः ।
स्वस्तयेऽस्तु सदा रुद्रः स्वस्तयेऽस्तु शतक्रतुः ॥ ८८ ॥

स्वस्तयेऽस्तु सदा वह्निः स्वस्तयेऽस्तु यमस्त्विह ।
स्वस्तये निर्ऋतिश्चास्तु स्वस्तये वरुणस्त्विह ॥ ८९ ॥

स्वस्तयेऽस्तु सदा वायुः स्वस्तयेऽस्तु धनेश्वरः ।
स्वस्तयेऽस्तु सदेशानः स्वस्तयेऽस्तु मरुद्गणः ॥ ९० ॥

स्वस्तये सन्तु वसवो रुद्राः स्युः स्वस्तये तथा ।
आदित्याः स्वस्तये सन्तु स्वस्तये सन्तु किन्नराः ॥ ९१ ॥

स्वस्तये सन्तु नागाश्च स्वस्तये सन्तु पन्नगाः ।
स्वस्तये सन्तु विद्येशाः स्वस्तयेऽप्सरसस्त्विह ॥ ९२ ॥

स्वस्तये सन्तु नद्यश्च गन्धर्वाः सरितस्तथा ।
सागराः स्वस्तये सन्तु शैलाश्च स्वस्तये तथा ॥ ९३ ॥

स्वस्तये मातरः सन्तु पितरः स्वस्तये सदा ।
देवपारिषदाः सर्वे स्वस्तये सन्तु नः सदा ॥ ९४ ॥

स्वस्ति राज्ञे प्रजाभ्यश्च स्वस्ति राष्ट्राय सर्वदा ।
स्वस्ति गोब्राह्मणेभ्योऽस्तु वैश्येभ्यः स्वस्ति वर्धताम् ॥ ९५ ॥
स्त्रीशूद्रेभ्योऽपि च स्वस्ति भूतेभ्यः स्वस्ति वर्धताम् ।
स्वस्त्यस्तु जङ्गमेभ्यश्च स्थावरेभ्यस्तथैव च ॥ ९६ ॥
स्वस्ति चास्तु च मन्त्रेभ्यः कर्मणे स्वस्ति वर्धताम् ।
स्वस्त्यस्तु सर्वदेवेभ्यः पितृभ्यः स्वस्ति सर्वदा ॥ ९७ ॥
ऋषिभ्यः स्वस्ति भवतु भौमेभ्यः स्वस्ति वर्धताम् ।
स्वस्ति पातालवासिभ्यो दिव्येभ्यः स्वस्ति सर्वदा ॥ ९८ ॥
स्वस्त्यस्तु चान्तरिक्षेभ्यः सर्वेभ्यः स्वस्ति वर्धताम् ।
उत्सवेऽस्मिन् महेशस्य बलिभिः स्वस्ति वर्धताम् ॥ ९९ ॥

इति ।

अथ द्वारपलोकेशवृषभाणां यथाक्रमम् ।
विघ्नस्य वीरभद्रस्य मातॄणां शास्तुरेव च ॥ १०० ॥
षण्मुखस्य च दुर्गायाः कुबेरहरिणाङ्कयोः ।
चण्डक्षेत्रेशयोश्चापि तीक्ष्णनेत्रमृगास्ययोः ॥ १०१ ॥
बहिर्मध्यमहारायां नन्दीशप्रभृति क्रमात् ।
गणेश्वराणां पीठस्थभूतेशानां तथैव च ॥ १०२ ॥
दिक्षु विंशतिसंख्यानां गणेशानां पृथक् पृथक् ।
बलिमन्त्रास्तु लिख्यन्ते तेषामेवेह तुष्टये ॥ १०३ ॥

ओं स्फुर स्फोटय हूं त्रिणेत्राय स्वाहा । ओं ह्रीं प्रीं कपालिन् हं नमः ।

ओं

नमस्ते द्वारि युक्ताय शूलहस्ताय धीमते ।
दृष्ट्या निहतदैत्याय नन्दीशाय नमो नमः ॥ १०४ ॥

ओं

नमस्ते द्वारियुक्ताय परशुव्यग्रपाणये ।
दृष्ट्या निहतदैत्याय महाकालाय ते नमः ॥ १०५ ॥

आभ्यां नन्दिमहाकालावुपतिष्ठेत । ओं भीं भृङ्गीशाय नमः । ओं गं गणपतये नमः ।

ओं

नमस्ते द्वारियुक्ताय भृङ्गीशाय कृशात्मने ।
दृष्ट्वा निहतदैत्याय शाङ्कराय नमो नमः ॥ १०६ ॥

ओं

नमस्ते द्वारियुक्ताय गजवक्त्राय खात्मने ।
दृष्ट्वा निहतदैत्याय शाङ्कराय नमो नमः ॥ १०७ ॥

आभ्यां भृङ्गीशविनायकावुपतिष्ठेत । एवं सर्वत्राप्युपस्थानमन्त्रैरुपतिष्ठेत । ओं वृं वृषभाय नमः । ओं सुं सुब्रह्मण्याय नमः ।

ओं

नमस्ते द्वारियुक्ताय धर्माय वृषभात्मने ।
दृष्ट्वा निहतदैत्याय सौरभेयाय ते नमः ॥ १०८ ॥

ओं

नमस्ते द्वारियुक्ताय षण्मुखाय शिवात्मने ।
दृष्ट्वा निहतदैत्याय शाङ्कराय नमो नमः ॥ १०९ ॥

ओं दुं दुर्गायै नमः । ओं धुं चण्डेश्वराय नमः ।

ओं

नमस्ते द्वारियुक्तायै दुर्गायै शङ्करालये ।
दृष्ट्वा निहतदैत्यायै तुभ्यं देव्यै नमो नमः ॥ ११० ॥

ओं

नमस्ते द्वारियुक्ताय चण्डेशाय महात्मने ।
दृष्ट्वा निहतदैत्याय शाङ्कराय नमो नमः ॥ १११ ॥

इन्द्राय सुराधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः । तत्पार्षदेभ्यो नमः ।

ओं

दैत्यदर्पविनाशाय सहस्राक्षाय धीमते ।
कुलिशव्यग्रहस्ताय नमस्तेऽस्तु शतक्रतो ! ॥ ११२ ॥

ओं नमो भूतेभ्योऽरिष्टकृद्भ्यः सद्भ्योऽसद्भ्यः सर्वगणेभ्यो नमोनमः स्वाहा । ओं पूर्वस्यां दिशि शिवस्य भगवतो ये गणा वज्रपाणयः श्वेताः श्वेताक्षाः श्वेतलोहिताः दिव्यान्तरिक्षभौमाश्च पातालनिवासिनश्च तेभ्यस्ताभ्यो नमोनमः

स्वाहा । ओं ये भूताः पुरःसदो निशाचरा रौद्राः सदसन्तो विरूपा विश्वरूपा महारूपा घोररूपा मृगास्या विहगाननाः पुष्टिकृतोऽपुष्टिकृतः कामदा बलिमिच्छन्ति तेषां बलिं हरामि । महद्भ्यो रुद्रकेभ्यः सर्वेभ्यस्तेभ्यो नमोनमः स्वाहा ।

ओं अग्नये तेजोधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः ।

ओं

मुखं यः सर्वदेवानां येन हव्यं च नीयते ।
येन प्रवर्तते सर्वं नमस्तस्मै हविर्भुजे ॥ ११३ ॥

ओं आग्नेय्यां दिशि शिवस्य भगवतो ये गणाः शक्तिपाणयो रक्ता रक्ताक्षा रक्तलोहिता दिव्यान्तरिक्षभौमाः पातालतलवासिनस्तेभ्यस्ताभ्यो नमोनमः स्वाहा ।

ओं यमाय प्रेताधिपतये सायुधवाहनाय रुद्रपार्षदे नमः । तत्पार्षदेभ्यो नमः।

ओं

येन संह्रियते सर्वं येन सर्वं च रक्ष्यते ।
यस्माद् बिभेति लोकोऽयं प्रेतनाथ! नमोऽस्तु ते ॥ ११४ ॥

ओं नमो भूतेभ्योऽरिष्टकृद्भ्य इत्यादिना च ।

ओं याम्यां दिशि शिवस्य भगवतो ये गणा दण्डपाणयः कृष्णा कृष्णाक्षाश्च कृष्णलोहिता दिव्यान्तरिक्षभौमाः पातालनिवासिनस्तेभ्यस्ताभ्यो नमो नमः स्वाहा । ये भूता दक्षिणसद इत्यादिना च ।

ओं निर्ऋतये रक्षोधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः । तत्पार्षदेभ्यो नमः ।

ओं

रक्षसां यातुधानानां पिशाचानां च यः पतिः ।
तस्मै निर्ऋतये नित्यं रक्षसां पतये नमः ॥ ११५ ॥

ओं नमो भूतेभ्योऽरिष्टकृद्भ्य इत्यादिना च ।

ओं नैर्ऋत्यां दिशि शिवस्य भगवतो ये गणाः खड्गहस्ताः श्यामाः श्यामाक्षाः श्यामलोहिता दिव्यान्तरिक्षभौमाः पातालनिवासिनस्तेभ्यस्ताभ्यो नमो नमः स्वाहा।

ओं वरुणाय जलाधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः । तत्पार्षदेभ्यो नमः ।

ओं

येन प्रसूयते सर्वं यस्मिन् सर्वं प्रलीयते ।
वरुणाय जलेशाय पाशहस्ताय ते नमः ॥ ११६ ॥

ओं नमो भूतेभ्योऽरिष्टकृद्भ्य इत्यादिना च ।

ओं वारुण्यां दिशि शिवस्य भगवतो ये गणाः पाशपाणयः शबलाः शबलाक्षाः शबललोहिताः दिव्यान्तरिक्षभौमाः पातालनिवासिनः तेभ्यस्ताभ्यो नमो नमः स्वाहा । ओं ये भूताः पश्चिमसदः इत्यादिना च ।

ओं वायवे प्राणाधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः । तत्पार्षदेभ्यो नमः ।

ओं

आपूर्यन्ते प्रवर्तन्ते येन प्राणादिवायवः ।
भूतानामिह सर्वेषां नमस्तस्मै नभस्वते ॥ ११७ ॥

ओं नमो भूतेभ्योऽरिष्टकृद्भ्य इत्यादिना च ।

ओं वायव्यां दिशि शिवस्य भगवतो ये गणा अङ्कुशपाणयः पीताः पीताक्षाः पीतलोहिताः दिव्यान्तरिक्षभौमाः पातालनिवासिनस्तेभ्यस्ताभ्यो नमो नमः स्वाहा ।

ओं कुबेराय यक्षाधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः । तत्पार्षदेभ्यो नमः ।

ओं

यत्प्रसादाज्जगत् सर्वं धनेन परिपूर्यते ।
तस्मै गुह्यकनाथाय धनेशाय नमोऽस्तु ते ॥ ११८ ॥

ओं सोमाय नक्षत्राधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः । तत्पार्षदेभ्यो नमः ।

ओं

ज्योत्स्नापते! नमस्तुभ्यं नमस्ते ज्योतिषां पते ।
नमस्ते रोहिणीकान्त! सुधाकुम्भ! नमोऽस्तु ते ॥ ११९ ॥

ओं नमो भूतेभ्योऽरिष्टकृद्भ्य इत्यादिना च ।

ओं कौबेर्यां दिशि शिवस्य भगवतो ये गणा दण्डपाणयः सिताः सिताक्षाः सितलोहिताः दिव्यान्तरिक्षभौमाः पातालनिवासिनश्च तेभ्यस्ताभ्यो नमो नमः स्वाहा ।

ओं ये भूता उत्तरसदः इत्यादिना च ।

ओं ईशानाय विद्याधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः । तत्पार्षदेभ्यो नमः ।

ओं

नमस्त्रिशूलहस्ताय लोकसंरक्षणाय ते ।
विद्यानां पतये तुभ्यमीशानाय नमो नमः ॥ १२० ॥

ओं नमो भूतेभ्योऽरिष्टकृद्भ्य इत्यादिना च ।

ओं ऐशान्यां दिशि शिवस्य भगवतो ये गणाः शूलपाणयः कपिलाः कपिलाक्षाः कपिललोहिता दिव्यान्तरिक्षभौमाः पातालनिवासिनश्च तेभ्यस्ताभ्यो नमो नमः स्वाहा ।

ओं ब्रह्मणे सर्वलोकाधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः । तत्पार्षदेभ्यो नमः ।

ओं

ब्रह्मणे सर्वलोकानां पतये सृष्टिहेतवे ।
यज्ञाध्यक्षाय विधये चतुर्वक्त्राय ते नमः ॥ १२१ ॥

ओं तत्पुरुषाय विद्महे पितामहाय धीमहि तन्नो ब्रह्मा प्रचोदयात् ।

ओं नमो भूतेभ्योऽरिष्टकृद्भ्य इत्यादिना च ।

ओं ऊर्ध्वायां दिशि शिवस्य भगवतो ये गणाः पद्मपाणयः सूक्ष्माः सूक्ष्माक्षाः सूक्ष्मलोहिता दिव्यान्तरिक्षभौमाः पातालवासिनस्तेभ्यस्ताभ्यो नमो नमः स्वाहा ।

ओं ये भूता अरिष्टदा इत्यादिना च ।

ओं अनन्ताय पातालाधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः । तत्पार्षदेभ्यो नमः ।

ओं

नमः सहस्रशिरसे बिभ्रते शिरसा महीम् ।
अधोलोकाधिपतये अनन्ताय नमोऽस्तु ते ॥ १२२ ॥

ओं नमो भूतेभ्योऽरिष्टकृद्भ्य इत्यादिना च ।

ओं अधस्ताद् दिशि शिवस्य भगवतो ये गणाश्चक्रपाणयो धूम्रा धूम्राक्षा धूम्रलोहिता दिव्यान्तरिक्षभौमाः पातालनिवासिनस्तेभ्यस्ताभ्यो नमो नमः स्वाहा ।

ओं ये भूता अधस्सद इत्यादिना च ।

ओं वृषभाय नमः । ओं हरवाहनाय नमः ।

ओं महाबलाय नमः । ओं सौरभेयाय नमः ।

ओं

वाहनाय नमः शम्भोः क्षुब्धार्णवघनस्वन ! ।
वृषभाय नमस्तुभ्यमुत्सवस्येह वृद्धये ॥ १२३ ॥

ओं वीं वीरभद्राय नमः । ओं वीरभद्राय विद्महे गणेश्वराय धीमहि । तन्नः शान्तः प्रचोदयात् । ओं गं गणपतये नमः ।

ओं एकदंष्ट्राय विद्महे भवपुत्राय धीमहि । तन्नो दन्ती प्रचोदयात् । ओं ब्यों ब्रह्माण्यै नमः ।

ओं ब्रह्मात्मिकायै विद्महे कुशहस्तायै धीमहि । तन्नो ब्रह्माणी प्रचोदयात् ।

ओं मां माहेश्वर्यै नमः । ओं रुद्रात्मिकायै विद्महे शूलहस्तायै धीमहि तन्नो माहेश्वरी प्रचोदयात् ।

ओं मां कौमार्यै नमः । ओं स्कन्दात्मिकायै विद्महे शक्तिहस्तायै धीमहि । तन्नः कौमारी प्रचोदयात् ।

ओं हैं वैष्णव्यै नमः । ओं विष्णवात्मिकायै विद्महे चक्रहस्तायै धीमहि । तन्नो वैष्णवी प्रचोदयात् ।

ओं हैं वाराह्यै नमः । ओं प्राजापत्यायै विद्महे गदाहस्तायै धीमहि । तन्नो वाराही प्रचोदयात् ।

ओं हों इन्द्राण्यै नमः । ओं इन्द्रात्मिकायै विद्महे वज्रहस्तायै धीमहि । तन्न इन्द्राणी प्रचोदयात् ।

ओं हौं महाकाल्यै नमः । ओं रुद्रात्मिकायै विद्महे शूलहस्तायै धीमहि । तन्नश्चामुण्डी प्रचोदयात् ।

अथवा

"दीर्घस्वरैः क्रमाद् भिन्नः सान्तस्वाख्यादिभिः स्थितः ।
बीजानीहाष्टमातॄणां सप्तपक्षे तु सप्त वै ॥"

इति स्वच्छन्दे ।

ओं मातृभ्यो नमः । ओं सर्वलोकमातृभ्यो नमः । ओं सर्वलोकमातृगणेभ्यो नमः ।

ओं नानारूपा मातरः प्रतिदिशं व्यवस्थिता दिव्यान्तरिक्षभौमाः पातालवासिन्यस्ता इहायान्तु शिवाज्ञया अस्माननुगृह्णन्तु (प्रतिगृह्णन्तु) पूजां सौम्यरूपधारिण्यस्ताभ्यो मातृभ्यो नमो नमः स्वाहा। ओं शां शास्त्रे नमः । ओं प्रशास्त्रे नमः ओं महाशास्त्रे नमः । ओं शां हुं कुमाराय नमः । ओं हस्त्यश्ववाहनाय नमः । ओं रुद्रपुत्राय नमः ।

ओं भूतनाथाय विद्महे (भवपुत्राय) धीमहि । तन्नः शास्ता प्रचोदयात्। ओं प्रभायै नमः ःइति शास्तुर्वामतस्तद्देव्यै, ओं सत्यकाय नमः इति शास्तुर्दक्षिणतस्तत्पुत्राय ।

ओं

शाम्बादीनां गणा ये तु कोटिकोटिगणाधिपाः ।
भवन्तु सर्वे सम्प्रीतास्तेभ्यस्ताभ्यो नमो नमः ॥ १२४ ॥
शास्तुः पश्चिमतोऽनेन शाम्बादिभ्यो बलिं हरेत् ।
वचत्पदं तु तारादि नमोन्तं च भुवेपदम् ॥ १२५ ॥
स्कन्दमन्त्रौ बलौ जप्ये होमः स्वाहान्त एव हि ।

ओं कार्त्तिकेयाय नमः । ओं देवसेनायै नमः । इति तद्वामतो देव्यै । ओं षण्मुखाय विद्महे महासेनाय धीमहि । तन्नः स्कन्दः प्रचोदयात् ।

घनौ शराग्निस्वरगौ चण्डशब्दस्ततः परम् ॥ १२६ ॥
तारादिहुंफडन्तोऽयं चण्डेश्वरमनुःस्मृतः ।

ओं चण्डाय नमः । ओं चण्डेश्वराय नमः । ओं चण्डेश्वराय विद्महे महासेनाय धीमहि । तन्नश्चण्डः प्रचोदयात् । ओं क्षां क्षीं क्षूं क्षेत्रपालाय नमः । ओं वटुकनाथाय नमः । ओं

विश्वक्षेत्राधिपतये विश्वसिद्धिप्रदायिने ॥ १२७ ॥
विश्वरक्षणशीलाय क्षेत्रपालाय ते नमः ।
ततोऽन्तर्गोपुरद्वारि तीक्ष्णनेत्रमृगास्ययोः ॥ १२८ ॥

ओं तीक्ष्णनेत्राय नमः । ओं मृगास्याय नमः ।

निष्क्रम्य गोपुराद् बाह्ये बलिपीठस्य पूर्वतः ।
स्थित्वा तु पार्षदान् सर्वाननेनैवानुमन्त्रयेत् ॥ १२९ ॥

ओं

ये समस्तं जगद् व्याप्य तिष्ठन्ति बलिकाङ्क्षिणः ।
ते रुद्रपार्षदाः सर्वे गृह्णन्तु बलिमुत्तमम् ॥ १३० ॥

इत्युक्त्वामन्त्र्य तु गणान् नन्द्यादिभ्यो बलिं हरेत् ।
नन्दीशं च महाकालं भूतनाथं महीधरम् ॥ १३१ ॥

पर्वतेशं गुहेशं च कालपाशं कपालिनम् ।
इष्ट्वा तेभ्यो नमोन्तैः स्वैर्नामभिर्विकिरेद् बलिम् ॥ १३२ ॥

अथ विंशतिसं(ख्यैःख्या)स्तु गणकोटीश्वराः पृथक् ।
ते स्युः प्रतिदिशं तेभ्यो नामभिः स्वैर्बलिं हरेत् ॥ १३३ ॥

तद् यथा

महाकालो विधाता च वज्रपाणिः क्रतुः प्रभुः ।
दक्षः शतक्रतुतनुरप्रमेयोऽथ वीर्यवान् ॥ १३४ ॥

नित्यो विद्युत्प्रभश्चैव शूलहस्तस्त्रिलोचनः ।
स्वाङ्गदीपस्तमोघ्नश्च सृष्टिकृच्चोरुविक्रमः ॥ १३५ ॥

मान्धाता च महावीर्यो नित्ययोगः प्रसादनः ।

इति प्राच्यां गणेश्वराः ।

अग्निरग्निसमानश्च ज्वालामाली च विश्वभुक् ॥ १३६ ॥

हुताशो मूर्तिमान् व्यापी कपिलो रक्तलोचनः ।
उग्रो रक्तवपुर्धूम्रः सप्तार्चिर्विश्वभेषजम् ॥ १३७ ॥

सुतपा वेगवांश्चाथ भस्मच्छन्नो मरुत्सखः ।
योगप्रियो दारुकश्चेत्याग्नेय्यां कोटिनायकाः ॥ १३८ ॥

यमो वैवस्वतो धाता दैत्यघाती प्रजान्तकः ।
मृत्युः प्रेताधिपो धर्मः कृष्णः कृष्णाक्ष एव च ॥ १३९ ॥

नित्ययोगी च कालश्चाप्याशुकारी परंतपः ।
मायारूपी कृतान्तश्च सत्यासत्यप्रियः सुहृत् ॥ १४० ॥

पितृनाथश्च कीनाश इति याम्यां तु विंशतिः ।
राक्षसश्चासुरः क्रव्याद् वीरहा निर्ऋतिस्तथा ॥ १४१ ॥
तीक्ष्णनेत्रो यातुधानो यज्ञहन्ता निशाचरः ।
महामूर्तिः कैकसेयः क्रूरः क्रूरवपुस्तथा ॥ १४२ ॥
रक्षः कौणपको धूम्रो धूम्राक्षो भीषणस्तथा ।
विरूपाक्षोऽथ भस्माङ्गो नैर्ऋत्यामथ विंशतिः ॥ १४३ ॥
वरुणः शबलोऽम्भोधिः प्रचेता निम्नगापतिः ।
यादोनाथः पाशपाणिरानन्दोऽम्बुपतिः शिवः ॥ १४४ ॥
कपर्दी प्राणदः श्वेतः श्यामनेत्रः सनातनः ।
प्रत्यङ्निवासो जलदो जीवनो नक्रवाहनः ॥ १४५ ॥
पयोधिनिलयश्चेति कोटीशानां तु विंशतिः ।
वायुर्गन्धवहः सूक्ष्मः स्पर्शनश्च प्रभञ्जनः ॥ १४६ ॥
प्राणोऽपानस्तथा व्यान उदानश्च समानकः ।
नागः कूर्मोऽथ कृकरो देवदत्तो धनञ्जयः ॥ १४७ ॥
ध्वजपाणिश्च पवनः श्वसनो मारुतो मरुत् ।
इति विंशतिकोटीशा वायव्यां तु गणेश्वराः ॥ १४८ ॥
रक्षेशो रयिमान् सोमो माणिभद्रोऽथ गुह्यकः ।
चेलमाली कुबेरश्च जम्भलः शिबिकुण्डली ॥ १४९ ॥
किंनरेशश्चैलिबिलिर्धनदश्च धनाधिपः ।
राजराजस्तथा श्रीदो ज्येष्ठो मालाधरो धनी ॥ १५० ॥
उत्तराशानिवासश्च ततः स्यादेककुण्डलः ।
एते विंशतिकोटीशाः कौबेरीं दिशमाश्रिताः ॥ १५१ ॥
ईशान ईश्वरः शम्भुः शूलहस्तस्त्रिलोचनः ।
अनादिनिधनो योगी कपिलः पिङ्गलोचनः ॥ १५२ ॥
रुद्रो रौद्रगणाधीशो विश्वभर्ता दिगम्बरः ।
नीलग्रीवः कपर्दीशो वृषवाहो वृषध्वजः ॥ १५३ ॥
हरः शर्वो विश्वभुज इत्यैशान्यां तु विंशतिः ।
महाबलो महानादो ब्रह्ममूर्तिश्चतुर्मुखः ॥ १५४ ॥

सृष्टिकृद् विजयो धाता अघोराघोर एव च ।
अघोरो लाङ्गली मन्युरङ्गारः शिखिभूषणः ॥ १५४ ॥
जीमूतो मूर्तिभृत् कुण्डी मन्त्रीशस्त्रिपुरान्तकः ।
ऊर्ध्वायां दिशि कोटीशा विंशतिः प्रमथेश्वराः ॥ १५५ ॥
बुद्धिः प्रमर्दनः शुद्धः कालरूपोग्रदंष्ट्रिणौ ।
दीर्घबाहुः प्रकामश्च भर्ता हर्ता विचक्षणः ॥ १५६ ॥
कालाग्नी रौरवोऽघोरो नरकः शर्व एव च ।
नागसंज्ञश्च घोरश्च किम्पुरुर्दनुजः क्षमी ॥ १५७ ॥
कोटीश्वराणामित्युक्ता विंशतिः स्यादधो दिशि ।

अत्र मञ्जर्याम् —

"एषां भृत्यगणाः शतं शतमथो तेषां पुनश्चैकशो
भृत्याः सन्ति सहस्रशोऽप्ययुतशस्तेषां च तेषामपि ।
प्रत्येकं परिवारलक्षमुदितं तेषां तथा कोटयः
ख्याताः पारिषदाः पृथक्पृथगतो वक्तुं न शक्यास्तु ते ॥"

इति ।

तारादिभिर्नमोन्तैस्तु पृथगेषां तु नामभिः ॥ १५८ ॥
क्रमात् सगन्धपुष्पाम्बुतत्तद्रात्रोचितान्नतः ।
बलिं तु विकिरेद् दिक्षु भूतक्रूरेण वा निशि ॥ १५९ ॥
सामान्यार्घ्याम्बुकूर्चेन दद्यादाद्यन्तयोर्बलेः ।
बलिपीठं ततोऽभ्येत्य भूतिदादीन् यथाक्रमम् ॥ १६० ॥
अभ्यर्च्य विकिरेत् तेभ्यो बलिं नित्योत्सवे यथा ।
विशेषश्चात्र तु स्नात्वा बलिदानादनन्तरम् ॥ १६१ ॥
आचार्यः सहितः शिष्यैरन्तः प्राग्वत् प्रविश्य तु ।
यानादेरवरोप्याथ देवं पीठे निधाय तु ॥ १६२ ॥
यथापूर्वं समभ्यर्च्य स्वस्थानस्थं यजेत् पुनः ।
अत्रोत्सवदिनानां तु विज्ञेया रात्रयः क्रमात् ॥ १६३ ॥
यथा बलिभुजस्तासु पूज्यन्ते साधिपा गणाः ।
ब्रह्मभूतेन्द्रगन्धर्वयक्षराक्षसरात्रयः ॥ १६४ ॥

पिशाचरात्रं च ततः सप्तपक्षे यथाक्रमम् ।
नवपक्षे विष्णुरात्रमष्टमं परिचक्षते ॥ १६५ ॥
प्राजेशरात्रं नवमं तेषु तत्तद्बलिं क्षिपेत् ।
सपुष्पकुशशुद्धान्नं ब्रह्मरात्रे बलिः स्मृतः ॥ १६६ ॥
अन्नं दधिनिशाचूर्णलाजसक्तुजलान्वितम् ।
भूतक्रूरमिति ख्यातं भूतरात्रे तु दापयेत् ॥ १६७ ॥
इन्द्रवल्लीरसोन्मिश्रमन्नं सक्तुपयोदधि ।
इन्द्ररात्रे तृतीये तु बलिं दद्यात् तु देशिकः ॥ १६८ ॥
वैणवान्नं पयोयुक्तं गान्धर्वे स्याच्चतुर्थके ।
पञ्चमे यक्षरात्राख्ये पुष्पान्नाज्याम्बुभिर्बलिः ॥ १६९ ॥
रक्तान्नं सतुषं मृत्स्नायुक्तं षष्ठे तु राक्षसे ।
सप्तमे त्वथ पैशाचे माषान्नं कृसरं मधु ॥ १७० ॥
हारिद्रचूर्णतैलाढ्यं समाषं विकिरेद् बलिम् ।
अष्टमे पायसं साज्यं विकिरेन्नवमे पुनः ॥ १७१ ॥
साज्यक्षीरं तु कृसरं प्राजापत्ये बलिः स्मृतः ।
अन्यथा केचिदाचार्याः प्राहुर्वै गणसप्तकम् ॥ १७२ ॥
ते भूतपितृयक्षाश्च नागब्रह्मेशवैष्णवाः ।
गणास्ते नवपक्षे तु स्कन्दमातृसमन्विताः ॥ १७३ ॥
प्रथमे भूतरात्रे तु भूतक्रूरेण दापयेत् ।
तिलैस्तण्डुलमिश्रैस्तु पितृरात्रे द्वितीयके ॥ १७४ ॥
तृतीये नालिकेराम्भश्शाल्यन्नैर्यक्षरात्रके ।
सक्षीरपिष्टसक्त्वद्भिर्नागरात्रे चतुर्थके ॥ १७५ ॥
सपद्माक्षान्नमाज्यं च ब्रह्मरात्रे तु पञ्चमे ।
सापूपान्नेन साज्येन षष्ठे शैवे तु दापयेत् ॥ १७६ ॥
गुलौदनेन साज्येन सप्तमे वैष्णवे बलिम् ।
स्कन्दरात्रे गुलान्नं तु दध्यन्नं मातृरात्रके ॥ १७७ ॥
साज्यं सनालिकेराम्बु द्राङ्निशाचूर्णतोऽरुणम् ।
अतोऽधिकदिनैः श्रेष्ठाद्युत्सवेषु यथाक्रमम् ॥ १७८ ॥

त्रिद्व्येकगुणयुक्त्या स्युरेते बलिभुजो गणाः।
शिवैरप्याढकैः प्रस्थैरेकविंशतिसंख्यया ॥ १७९ ॥
श्रेष्ठो मध्यकनिष्ठश्च क्रमाद् भूतबलिस्ततः।
शाल्याद्यन्यतमैः शुक्लैस्तण्डुलैः साधितं हविः ॥ १८० ॥
विशुद्धं बलियोग्यं स्यादन्यथा दोषमावहेत्।
विधौतदन्ताः स्युः स्नाता द्विजाः शुक्लाम्बरादिकाः ॥ १८१ ॥
साधयेयुर्बलेरन्नं वहेयुश्च सुयन्त्रिताः।
अथवा सर्वरात्रेषु साज्यं सकदलीफलम् ॥ १८२ ॥
ससक्तुदधि सक्षीरमन्नं भूतबलेः स्मृतम्।
उक्तोत्सवदिनान्येवमतिवाह्य यथाविधि ॥ १८३ ॥
पूर्वेद्युर्निश्यवभृथात् कुर्यात् कौतुकबन्धनम्।
पुण्याहं वाचयित्वेष्ट्वा सुलग्ने गणनायकम् ॥ १८४ ॥
उत्सवप्रतिमां चापि त्रिशूलं चाभिपूजयेत्।
पट्टसूत्रं नवगुणं सौवर्णं च समौक्तिकम् ॥ १८५ ॥
तद् द्वादशाङ्गुलायाममक्षतेषु निधाय तु।
आराध्य गन्धपुष्पाद्यैर्भसितं चास्त्रमन्त्रतः ॥ १८६ ॥
अभिमन्त्र्याथ बध्नीयाद्धस्ते देवस्य दक्षिणे।
त्र्यम्बकेन च हृदा शूलास्त्रस्य च कौतुकम् ॥ १८७ ॥
साङ्गुष्ठानामिकाभ्यां तु कराभ्यां तत्र बन्धयेत्।
भाले रक्षां च निक्षिप्य नीराज्यारात्रिकेण तु ॥ १८८ ॥
निशां सङ्गीतवाद्याद्यैर्जागरेणातिवाहयेत्।
प्रातः स्नात्वा यथापूर्वं नित्यपूजां समाप्य तु ॥ १८९ ॥
उत्सवप्रतिमां बाह्यमण्डपे सन्निवेशयेत्।
त्रिशूलं विनिवेश्याग्रे तस्य प्राच्यां तु वोत्तरे ॥ १९० ॥
गोमयाद्भिश्चतुष्कोणमुपलिप्य तु मण्डलम्।
वितानच्छत्रकलशदीपदर्पणचामरैः ॥ १९१ ॥
पालिकाभिस्तथा शङ्खैरलङ्कृत्य समन्ततः।
मुसलोलूखले धौते वाससा परिधाप्य तु ॥ १९२ ॥

दर्भैराच्छाद्य सम्पूज्य चूर्णं तत्र तु साधयेत् ।
स्नात्वा स्वलङ्कृताः कन्या गायन्त्यो मधुरस्वराः ॥ १९३ ॥

तत्र मङ्गलचूर्णं तत् साधयेयुर्हरिद्रया ।
दध्यक्षताज्यदूर्वाग्रगन्धबीजाङ्कुराणि षट् ॥ १९४ ॥

आरोपयेयुस्ताः कन्या मुसले चाप्युलूखले ।
ततस्तत्साधितं चूर्णं हैमपात्रादिसंस्थितम् ॥ १९५ ॥

हृदयेनाभिमन्त्र्याथ मङ्गलालम्भनानि षट् ।
दध्यादीन्यथ देवस्य शिरस्यारोप्य मूलतः ॥ १९६ ॥

गन्धतैलेन चाभ्यज्य यवमाषादिचूर्णकैः ।
उद्वर्त्य देवमस्त्रं च परिमृज्याथ वाससा ॥ १९७ ॥

तेन मङ्गलचूर्णेन हेमचूर्णयुतेन तु ।
निर्मृज्य देवमस्त्रं च तच्छेषं भक्तमूर्धसु ॥ १९८ ॥

निक्षिपेन्मङ्गलार्थं तु विश्वकल्मषशोधनम् ।
संस्नाप्य चाथ वसनेन च भूषणाद्यै-
र्गन्धादिभिश्च कुसुमैः परिभूष्य देवम् ।
विद्याङ्गमूर्तिमनुभिश्च शिवाङ्गमूलौ
मूर्तौ शिवस्य सकलीकरणं विदध्यात् ॥ १९९ ॥

अथात्र तीर्थयात्रार्थं स्थण्डिलेऽग्निं निधाय तु ॥ २०० ॥

आवाह्य तु शिवं हुत्वा मन्त्रसंहितया घृतम् ।
वक्त्रेण पक्वं पालाशीः समिधोऽथ घृतं चरुम् ॥ २०१ ॥

प्रत्येकाष्टशतं हुत्वा कृष्णेनाष्टोत्तरं शतम् ।
प्रायश्चित्तं तिलाज्याभ्यां मूलात् पूर्णाज्जुहोतु च ॥ २०२ ॥

कनिक्रदत्प्रभृतिभिः षड्भिराज्यं जुहोतु च ।
स्वस्तिसूक्तेन चैवाज्यं हुत्वा त्वथ जयादिभिः ॥ २०३ ॥

ततस्स्विष्टकृतं हुत्वा विसृज्याग्निं हृदम्बुजे ।
रथादौ देवमारोप्य तीर्थस्नानाय तु व्रजेत् ॥ २०४ ॥

शङ्खभेर्यादिनिर्घोषैर्गीतनृत्तादिमङ्गलैः ।
त्रिशूलास्त्रं पुरस्कृत्य स्नानोपकरणैः सह ॥ २०५ ॥

उच्चावचध्वजच्छत्रचामरव्यजनादिभिः ।
प्रदीपधूपकलशैर्विधृतैश्चाष्टमङ्गलैः ॥ २०६ ॥

प्रादक्षिण्येनालयादेर्गच्छेदायोजनान्तरम् ।
विशिष्टसिन्धुनद्यब्धितीर्थाद्यं प्रचुराम्बुमत् ॥ २०७ ॥

व्रजेन्मध्यमया गत्या न द्रुतं न विलम्बितम् ।
तत्र स्वस्तिस्तुतिं चोक्तां स्वस्तिसूक्तं च मङ्गलम् ॥ २०८ ॥

तथा शकुनसूक्तं च चमकं च द्विजोत्तमाः ।
पठेयुर्गीतवाद्यादौ जयशब्दे च मूर्च्छति ॥ २०९ ॥

संप्राप्य तीर्थतीरं तत् प्रपातोरणमण्डितम् ।
अलङ्कृतं वितानाद्यैः पीठे देवं निवेशयेत् ॥ २१० ॥

गन्धाद्यैरभिपूज्याथ तीर्थं तदभिमन्त्रयेत् ।
इमं मे गङ्गे यमुने सरस्वतीत्यादिनापि च ॥ २११ ॥

मन्त्रसंहितया वापि संपूज्य कुसुमादिभिः ।
ततोऽस्त्रमथ देवं त्रिर्मज्जयित्वा शनैः शनैः ॥ २१२ ॥

सह स्नातो गुरुः शिष्यैस्तटस्थं देवमर्चयेत् ।
निवेद्यान्तमथाधाय स्थण्डिले शिवपावकम् ॥ २१३ ॥

मूलेनाष्टशतं हुत्वा ब्रह्माङ्गैस्तद्दशांशतः ।
पक्वं हुत्वाथ पूर्णां च तीर्थान्यावाह्य पूजयेत् ॥ २१४ ॥

इमं मे गङ्गे यमुनेत्याद्ययाज्यं जुहोतु च ।
जयादिकं स्विष्टकृतं हुत्वा तीर्थे जलेश्वरम् ॥ २१५ ॥

आवाह्येष्ट्वा तु तीर्थानि गङ्गादीन्यपि पूजयेत् ।
पुण्याहं वाचयित्वाथ तीर्थे देवं प्रवेशयेत् ॥ २१६ ॥

तीर्थे निमज्जयेद् देवं तत्र पीठे निवेश्य तु ।
गन्धामलकहारिद्रचन्दनागरुकुङ्कुमैः ॥ २१७ ॥

क्रमादुद्वर्तयेत् तोयपुष्पधूपान्तरैः पृथक् ।
शङ्खभेर्यादिनिर्घोषैर्वेदघोषैश्चतुर्दिशम् ॥ २१८ ॥

तत्पीठस्थं तु नीत्वेशं कारयेच्चाघमर्षणम् ।
हिरण्यशृङ्गमित्यादिसूक्तमान्ताज्जपेदपि ॥ २१९ ॥

स्नान्ति ये ये तदा तस्मिंस्तीर्थे नार्योऽथवा नराः ।
तिर्यञ्चो वापि ते सर्वे मुच्यन्ते सर्वकिल्बिषैः ॥ २२० ॥
विमुच्य कौतुकं त्यक्त्वा देवमुत्तारयेज्जलात् ।
प्रपायां पीठगं देवमाभूष्य वसनादिभिः ॥ २२१ ॥
गन्धाद्यैस्तु निवेद्यान्तमिष्ट्वा सङ्गीतमङ्गलैः ।
अभिनन्द्य यथापूर्वं यानमारोपयेच्छनैः ॥ २२२ ॥
गत्वा प्रासादमासाद्य परिणीय प्रदक्षिणम् ।
मण्डपान्तर्निवेश्येशमिष्ट्वाथास्त्रं च पूजयेत् ॥ २२३ ॥
उत्सवप्रतिमां चास्त्रं यथास्थानं निवेश्य तु ।
मूललिङ्गगतं शम्भुं सविशेषं ततो यजेत् ॥ २२४ ॥
दत्त्वा चतुर्विधान्नाद्यं रात्रौ नित्यं समाप्य तु ।
ध्वजं संपूज्य गन्धाद्यैर्ध्वजं तमवतारयेत् ॥ २२५ ॥
प्रागुक्तवत् समाहूतान् गणान् देवादिकान् क्रमात् ।
विसर्जयेत् स्वधामानि यथाजोषं भजन्त्विति ॥ २२६ ॥
ततः पताकावृषभं स्वैर्मन्त्रैरभिपूज्य तु ।
योजयेन्मूलवृषभे सविशेषं च तं यजेत् ॥ २२७ ॥
महाभूतबलिं दत्त्वा गुरुर्मौनी जनैर्वृतः ।
निःशब्दं निखिलातोद्यैर्विना दीपैर्व्रजेद् बहिः ॥ २२८ ॥
सन्धिसंस्थांस्तु लोकेशान् ब्रह्मादीनभिपूज्य तु ।
विसर्जयेच्च लोकेशान् ब्रह्मादीन् सन्धिगोचरान् ॥ २२९ ॥
ततः स्नात्वा प्रविश्यान्तः क्षेत्रेशमभिपूजयेत् ।

उत्सवावभृथाधिकारः ।

अथ प्रातर्यथापूर्वं नित्यपूजां प्रकल्पयेत् ॥ २३० ॥
ततो विकिरविक्षेपकुम्भास्त्रभ्रमपूर्वकम् ।
नवकादिसहस्रान्तैः कलशैरुपपत्तितः ॥ २३१ ॥
स्नापयित्वा विशेषेण महापूजां प्रवर्तयेत् ।
आचार्याय सशिष्याय हिरण्यवसनानि च ॥ २३२ ॥

भूषणादीनि दत्त्वास्मै दत्त्वा देयानि शक्तितः ।
लिङ्गिनः परिचारांश्च ब्राह्मणान् व्रतिनस्तथा ॥ २३३ ॥
देवभृत्यांस्तथा दासीस्तथैव नटनर्त्तकान् ।
भृत्यान् कर्मकरांश्चान्यान् दीनानाथांस्तथार्थिनः ॥ २३४ ॥
अन्नाद्येन हिरण्येन वसनाद्यैश्च तोषयेत् ।
ध्वजोच्छ्रयात् समारभ्य स्नपनान्तदिनेष्वपि ॥ २३५ ॥
अर्थिभ्यो ब्राह्मणादिभ्यो लिङ्गिभ्योऽप्युपपत्तितः ।
प्रदद्यादन्नपानादि सुव्यञ्जनरसोत्तरम् ॥ २३६ ॥
एवं यः कारयेच्छम्भोरुत्सवं कुर्वते च ये ।
ये वा पश्यन्ति ते सर्वे भवन्ति गणनायकाः ॥ २३७ ॥

इत्थं शिवोत्सवविधिः कथितो ध्वजादिः
श्रेष्ठादिभेदविहितः स्नपनावसानः ।
येनेन्दुमौलिरुपयाति परं प्रसादं
शैलाधिराजसुतया सहितो गणेन्द्रैः ॥ २३८ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे क्रियापादे
महोत्सवविधिपटल एकोनपञ्चाशः ॥

अथ पञ्चाशः पटलः ।

अथाल्पस्नपनं पूर्वं कनिष्ठत्रितयं ततः ।
मध्यस्नानानि च त्रीणि श्रेष्ठं च स्नपनत्रयम् ॥ १ ॥
नवभिः पञ्चविंशत्या तदूर्ध्वं सप्तसप्तभिः ।
एकाशीत्याष्टयुक्तेन शतेन द्विशतेन च ॥ २ ॥
द्विपञ्चाशदुपेतेन कलशानां ततः परम् ।
त्रिभिः शतैस्तथैवेषुशतैः सप्तशतैरपि ॥ ३ ॥
कृतिसंख्याधिकैश्चाथ सहस्रकलशैरपि ।
अष्टोत्तरसहस्रैर्वा सहस्रकलशैस्ततः ॥ ४ ॥
विधिवत् पूरितैरुक्तं स्नपनं तूत्तमोत्तमम् ।
अष्टोत्तरशतादीनां + + + + + + परः ॥ ५ ॥

मध्ये तु ब्रह्मकलशः शिवेनाधिष्ठितो भवेत् ।
कलशैर्नवभिः पूर्वमल्पाख्यं स्नपनं स्मृतम् ॥ ६ ॥

अभिकृत्यादिकलशैः कनिष्ठस्नपनत्रयम् ।
अष्टोत्तरशताद्यैस्तु + + + + + + + + ॥ ७ ॥

+ + + + + + + + + + + स्नपनत्रयम् ।
स्नपनानां क्रमादेषां मण्डपात् पृथगेव हि ॥ ८ ॥

रामेषुमुनिनन्दैश्च रुद्रातिजगतीकराः ।
अतिशक्वरिकात्यष्टिकैररतिधृतेर्मितैः ॥ ९ ॥

एकविंशतिहस्तैश्च दशधा स्नानमण्डपाः ।
सहस्रकलशस्याथ + + + + + माधमाः ॥ १० ॥

पञ्चविंशतिहस्तः स्यादेकोनत्रिंशता ततः ।
मध्यमः स्यात् तु हस्तानां त्रयस्त्रिंशद्भिरुत्तमः ॥ ११ ॥

स्वस्वमण्डपहस्तानां संख्ययैकाधिकाः क्रमात् ।
स्तम्भाः स्युः सुसमाः सर्वेऽप्येकजातितरूद्भवाः ॥ १२ ॥

नवतालोच्छ्रितास्त्वल्पे स्नपनेऽथाधमादिषु ।
रुद्रातिजगतीसंख्यैश्चातिशक्वरिकामितैः ॥ १३ ॥

तालैः स्तम्भा भवन्त्युच्चात् क्रमात् तत्कुट्टिमोपरि ।
तन्नाहोऽर्काङ्गुलैरल्पे ततो द्वित्रिचतुर्गुणैः ॥ १४ ॥

अङ्गुलैः स्तम्भनाहाः स्युः कनिष्ठादिषु च त्रिषु ।
लुपावंशानुवंशाद्यमूर्ध्वप्रच्छादनं तथा ॥ १५ ॥

प्रशस्ततरुपूगाद्यैर्नालिकेरदलादिभिः ।
मण्डपानां विधेयं स्याद् यथायुक्त्युपपत्तितः ॥ १६ ॥

चतुरश्राश्चतुर्द्वारा मध्यस्तम्भविवर्जिताः ।
प्रशस्तयोनयः सर्वे कर्तव्या मण्डपाः क्रमात् ॥ १७ ॥

सूर्यवस्वृतुमात्रोच्चं श्रेष्ठाद्यं मण्डपस्थलम् ।
इष्टकादारुमृत्स्नाभिः परितो बद्धकुट्टिमम् ॥ १८ ॥

तत्र वास्तुबलिं दत्त्वा तक्षकर्म विसृज्य तु ।
पुण्याहं वाचयित्वा तु वास्तुहोमं च कारयेत् ॥ १९ ॥
तत्तत्कलशसंख्याकान् ब्राह्मणांस्तत्र भोजयेत् ।
असामर्थ्ये तदर्धं वा ततोऽर्धं वा यथाविधि ॥ २० ॥
दर्भमालापरिवृतं सवितानं सतोरणम् ।
स्तम्भैः सद्वसनच्छन्नैर्मुक्तादामावलम्बितम् ॥ २१ ॥
स्वालेपिततलं रम्यं धूपितं चन्दनोक्षितम् ।
सद्वारकलशं नानाफलालम्बितनीप्रकम् ॥ २२ ॥
अलङ्कृत्य यथाशोभं शक्तितः स्नानमण्डपम् ।
सप्तमे पञ्चमे वाह्नि सर्वं स्नपनवासरात् ॥ २३ ॥
कृत्वाङ्कुरार्पणं सम्यक् पुण्याहं वाचयेत् ततः ।
उपलिप्यैषु गव्येन प्रोक्ष्य चा(वे ? वो)क्षणादिभिः ॥ २४ ॥
संस्कृत्य धृतिसंस्कारैर्विकिरक्षेपपूर्वकम् ।
कुम्भास्त्रवर्धनीपूजाभ्रमणार्चनतः परम् ॥ २५ ॥
अस्त्ररक्षां च कृत्वा तु सूत्रैः पिष्टावरूषितैः ।
कुर्वीत पदविन्यासं प्रागुदग्व्यायतैः समम् ॥ २६ ॥
पदानि चाधमादीनि रविमन्वङ्गुलानि च ।
विकारमानाङ्गुलैश्च चतुरश्राणि कल्पयेत् ॥ २७ ॥

तद्यथा —

द्विकरे चतुरश्रे तु सूत्रैर्नवपदीकृतैः ।
तत्र मध्यपदे कृत्वा तेनाल्पस्नपनं स्मृतम् ॥ २८ ॥

अल्पस्नपनपदाधिकारः ।

सप्तसप्तपुटे क्षेत्रे मध्ये नव पदानि तु ।
निधाय परितः पङ्क्तिमेकैकां दिक्षु मार्जयेत् ॥ २९ ॥
वीथ्यर्थं तत्र वीथ्योस्तु मध्ये कोष्ठत्रयं त्रयम् ।
कोणेष्वेकै + + + + + + + + + + + + ॥ ३० ॥
+ + + + + + + + + + पद्मं तु संलिखेत् ।

पञ्चविंशतिकलशाधिकारः ।

एकादशपुटे क्षेत्रे मध्ये नवपदं भवेत् ॥ ३१ ॥
तन्मध्यकोष्ठे पद्मं स्यान्नवकस्य तु बाह्यतः ।
परितो मार्जयेत् + + + + + + + + + + ॥ ३२ ॥
+ + + + + + + + + + + नवकानि तु ।
अन्तस्त्रीणि पदान्येषां मध्ये कोष्ठं च मार्जयेत् ॥ ३३ ॥
चतुर्दिक्ष्वथ कोणेषु लुम्पेदन्तश्चतुष्पदम् ।
कोणानि व्यक्तकोटीनि सप्तसप्तपदं यथा ॥ ३४ ॥
+ + + + + + + + + + + + + + + + ।
+ + + + + + + + मध्यनन्दपदाद् बहिः ॥ ३५ ॥
चतस्रो वीथयः पङ्क्तिलोपात् स्युः परितः स्फुटाः ।
अष्टदिक्ष्वष्टनवकं स्यान्मध्यनवकेऽम्बुजम् ॥ ३६ ॥
लिखेन्मध्यपदे त्वेवमेका + + + + + + ।
स्यान्मध्यपुटके क्षेत्रे मध्यनन्दपदेऽम्बुजम् ॥ ३७ ॥
तद्बाह्यपङ्क्त्यो लोप्याश्चतस्रः प्रागुदग्गताः ।
वीथीनां बाह्यतः पङ्क्तिं निधाय तु चतुर्दिशम् ॥ ३८ ॥
वा + + + + + + + + + + + + + + + ।
+ + स्थनवकेष्वन्तः कोणैकपदलोपतः ॥ ३९ ॥
भवन्त्यष्टोत्तरशतं पदान्यब्जं च मध्यतः ।
पङ्क्तिं निधाय तु चतुर्दिशं बाह्यैकपङ्क्तिकम् ॥ ४० ॥
परितो + + + + + कोणैकपदलोपतः ।
भवन्त्यष्टोत्तरशतं पदान्यब्जं च मध्यतः ॥ ४१ ॥

अष्टोत्तरशतस्य । अपिच,

त्रिपञ्चपुटके क्षेत्रे प्राग्वद् वीथीचतुष्टयम् ।
+ + + + + + + + + + + + + + + + ॥ ४२ ॥
पङ्क्तिं संस्थाप्य परितः पङ्क्तिमेकां विलोपयेत् ।
वीथ्योर्मध्ये चतुर्दिक्षु नवकानि प्रमार्जयेत् ॥ ४३ ॥
द्वारार्थमथ कोणेषु स्यात् पदानां त्रिसप्तकम् ।

शतस्यैव पुनश्च,

प्राग्वत् त्रिपञ्चपुटके सप्तसप्तपदानि तु ॥ ४४ ॥
मध्ये निधाय परितो लुम्पेद् वीथीचतुष्टयम् ।
संस्थाप्य मध्ये नवकं परितः पङ्क्तिलोपतः ॥ ४५ ॥
अ + + + + + + + + + + + + + + + + ।
+ + + + + कोष्ठानि प्राग्वदेवं भवन्ति हि ॥ ४६ ॥
दिक्षु पङ्क्तिकोष्ठानामन्तःकोणद्वये समम् ।
चतुष्पदं तद् विसृजेन्मध्यकोष्ठं च लोपयेत् ॥ ४७ ॥
एवं द्वादश कोष्ठानि पृ + + + + + + + ।

त्रिविंशष्टोत्तरकलशाधिकारः ।

त्रिसप्तपुटके क्षेत्रे मध्ये नन्दपदेऽम्बुजम् ॥ ४८ ॥
तस्याथ परितो वीथ्यश्चतस्रः स्युरशेषगाः ।
तद्वाह्ये नवकान्यष्टौ तद्वाह्ये + + + + + ॥ ४९ ॥
+ था तथा वीथ्यग्राणि मार्जयित्वा समन्ततः ।
द्विपञ्चाशत्समधिकं पदानां द्वे शते स्फुटम् ॥ ५० ॥

द्विपञ्चाशदधिकशतद्वयकलशाधिकारः ।

कलशत्रिशतके,

+ + + + + + + + + + ग्रकलशाष्टकम् ।
परितो मार्जयेत् पाङ्क्तिं तद्वाह्ये पङ्क्त्यतिक्रमात् ॥ ५१ ॥
दिक्षु पङ्क्तिर्विलोप्या स्यात् तस्मात् कोष्ठत्रयाद् बहिः ।
परितो + + + + + + + + + + + + + ॥ ५२ ॥
+ + + + ङ्क्तिमाकोणं बाह्यवीथ्यां नियोजयेत् ।
एवं प्रतिदिशं वीथीषट्कं स्वन्यायतं भवेत् ॥ ५३ ॥
कोणषोडशकोष्ठानामन्तःकोणचतुष्टयम् ।
+ + + + + + + + + + + + + + + ॥ ५४ ॥
एवं पदानि त्रिशतं कलशत्रिशते स्मृतम् ।
मध्यब्रह्मपदाम्भोजे शिवाख्यः कलशोऽपि च ॥ ५५ ॥

त्रिशतकलशाधिकारः ।

एकत्रिंशत्पुटे + + + + + + + + + + ।
+ + + + + परितो वीथ्यै लुम्पेदशेषतः ॥ ५६ ॥
तद्बाह्यपङ्क्तेर्बाह्ये च पङ्क्तिं तद्वद् विलोपयेत् ।
ततस्त्रिकोष्ठात् परितस्त्रिपदाच्च परं ततः ॥ ५७ ॥
वीथी + + + + + + + + + + + + + + ।
+ + + + + + दिशं वीथयोऽष्टौ भवन्ति हि ॥ ५८ ॥
अष्टौ च चत्वारिंशच्च नवकान्यत्र सर्वतः ।
अष्टाविंशतिसंख्यानि त्रिकान्यपि भवन्ति हि ॥ ५९ ॥
एककोष्ठचतुष्कं च मध्ये पद्मं च शोभनम् ।
+ + + + + + + + + + + + + + + ॥ ६० ॥
+ त्तत्कोटिप्रसिद्ध्यर्थं तान्यपि द्वादशैव हि ।
तत्संख्याः कलशास्तेषु मध्ये शिवघटोऽधिकः ॥ ६१ ॥
एवं वेदाधिकानि स्युः पदपञ्चशतानि हि ।

चतुरधिकपञ्चशतकलशाधिकारः ।

+ + + + + + + + + + + य विलङ्घनात् ॥ ६२ ॥
एकशो मार्जयेत् पङ्क्तीः प्राचीनाश्चोदगायताः ।
एवं प्रतिदिशं तत्र वीथयोऽष्टौ भवन्ति हि ॥ ६३ ॥
मध्ये चाष्टदिशास्वेवमेकाशीतिपदानि हि ।
पृथङ् नवैव व्यूहाः स्युर्मध्यव्यूहे तु मध्यतः ॥ ६४ ॥
मार्जयेन्नवकं तस्मिन् पद्ममष्टदलं लिखेत् ।
एवं हि विंशत्यधिकं पदसप्तशतं स्मृतम् ॥ ६५ ॥
मध्येऽब्जे चाधिकस्त्वेकः कलशः शिवसंज्ञितः ।

विंशत्यधिकसप्तशतकलशाधिकारः ।

क्षेत्रे विभाजिते पञ्चचत्वारिंशत्पुटे समे ॥ ६६ ॥
पञ्चपञ्चपदैर्मध्ये पद्मे शिवघटो भवेत् ।
तद्बाह्यपङ्क्तिं परितो वीथ्यै लुम्पेच्च तद्बहिः ॥ ६७ ॥

एकां तिस्रश्च पङ्क्ती द्वे निधायासां तु मध्यतः ।
क्रमेण परितः पङ्क्तीर्विमृजेद् वीथेषु त्रिषु ॥ ६८ ॥
तद्बाह्ये वेदपङ्क्तीस्तु त्यक्त्वा पाङ्क्तिं तु मार्जयेत् ।
वीथ्यर्थं परितः प्राग्वत् पुनः पङ्क्तिद्वयाद् बहिः ॥ ६९ ॥
पङ्क्त्या स्यात् परितो वीथीरथ पश्चाच्चतुर्दिशम् ।
प्रतिपङ्क्तिद्वयं लुम्पेद् द्वारार्थं स्वदिगायतम् ॥ ७० ॥
महावीथीचतुष्कस्य सन्धिः षोडशकेष्वपि ।
विकारकुम्भन्यासार्थं रक्षेन्मध्यपदानि तु ॥ ७१ ॥
द्वारशोभोपशोभाः स्युः कोणानि च यथाक्रमम् ।
अन्तस्त्रीणि बहिः पञ्च पदानि द्वारि मार्जयेत् ॥ ७२ ॥
शो(भाः ? भा) स्वन्तस्त्रयं बाह्ये चैकं कोष्ठं विलोपयेत् ।
ततस्तु विपरीतेनाप्युपशोभा विमार्जयेत् ॥ ७३ ॥
एवं द्वाराणि चत्वारि शोभा द्वात्रिंशदेव हि ।
उपशोभाश्च तावत्यः पञ्चावरणसंज्ञिते ॥ ७४ ॥
सहस्रकलशे ज्ञेया यथावदभिसंख्यया ।

पञ्चावरणे सहस्रकलशाधिकारः ।

क्षेत्रे त्वेकोनपञ्चाशत्पुटे मध्यगतैः पदैः ॥ ७५ ॥
नवभिः पद्ममालिख्य बाह्ये पङ्क्तिद्वयेन तु ।
वीथी स्यात् परितो बाह्यपङ्क्तौ दिक्ष्वेककोष्ठकम् ॥ ७६ ॥
अन्तर्विमृज्य वीथ्यैक्यं नीत्वा तद्वेदकोणके ।
अन्तःस्थ त्रिपदं लुम्पेत् ततो मध्याम्बुजाद् बहिः ॥ ७७ ॥
प्रागुदग्व्यायते प(ङ्क्तौ ? ङ्क्ती) वीथ्यै लुम्पेदशेषतः ।
तद्बाह्ये चापि परितस्ततस्त्रित्रिपदान्तरम् ॥ ७८ ॥
प्रागुदग्व्यायता लोप्याः पृथग् द्वादशवीथयः ।
अत्र स्युर्मध्यमे व्यूहे पञ्चकान्यथ च क्रमात् ॥ ७९ ॥
तद्बाह्ये नवकानि स्युर्द्वादशैवं चतुर्ष्वपि ।
चतुर्ष्वपि च कोणेषु विकारनवकं पृथक् ॥ ८० ॥

एवं तु नवकानां स्याच्छतं हि द्वादशाधिकम् ।
अथैकं बाह्यनवकं चतुर्दिक्षु विलोपयेत् ॥ ८१ ॥
द्वारार्थं + + + + + + न्त्यकोणैककोष्ठकम् ।
विलुम्पेत् कोटिमध्यस्थमेवं पदसहस्रकम् ॥ ८२ ॥
अष्टोत्तरं हि भवति मध्ये चैकं सरोरुहम् ।
बाह्ये वीथ्यास्ततो बाह्ये शिष्टपङ्क्तिद्वयेन तु ॥ ८३ ॥
द्वारशोभोपशोभार्थं + + + + + + + + ।
भवन्त्याकृतिस + न कलशास्तत्पुटेषु वै ॥ ८४ ॥
अष्टोत्तरसहस्रं हि पद्मे शिवघटस्तथा ।

अष्टोत्तरसहस्रकलशाधिकारः ।

त्रिपञ्चाशत्पुटे क्षेत्रे मध्यस्थनवकेऽम्बुजम् ॥ ८५ ॥
तद्बाह्यपङ्क्त्या परितो + + + + + + बहिः ।
पङ्क्तौ दिक्कोष्ठमेकैकं लुम्पेद् द्वारप्रसिद्धये ॥ ८६ ॥
चतुर्ष्वपि च कोणेषु पृथक् स्यात् कोष्ठपञ्चकम् ।
तद्बहिः परितः पङ्क्तिं वीथ्यर्थं परिमार्जयेत् ॥ ८७ ॥
द्वारशोभादिसिद्ध्यर्थं + + + + द्वयं न्यसेत् ।
तदन्तरेका परितो लोप्या पङ्क्तिस्तु वीथये ॥ ८८ ॥
अन्तर्वीथीं समारभ्य दिक्षु पङ्क्तित्रयं त्रयम् ।
विमृजेद् द्वारवीथ्यर्थं बाह्ये वीथ्यां च योजयेत् ॥ ८९ ॥
बाह्यवीथ्यास्त्वथान्तःस्थपङ्क्तिषट्कादनन्तरम् ।
अन्तस्त्रिपङ्क्तीः परितो महावीथीस्तु मार्जयेत् ॥ ९० ॥
तत्राष्टदिक्षु मध्यस्थपङ्क्तौ मध्यपदानि तु ।
रक्षेदष्टदिशास्वष्टौ तेषु सन्धिघटान् न्यसेत् ॥ ९१ ॥
बाहिर्वीथीमहावीथ्योर्मध्यषट्पाङ्क्तिमध्यतः ।
तत्त्वकोष्ठानि संस्थाप्य लोप्यं पङ्क्तिद्वयं क्रमात् ॥ ९२ ॥
एवं कृते तु परितः षट्त्रिंशत्कोष्ठकानि तु ।
कृतिसंख्यानि तन्नन्दपदान्यन्तर्विलोपयेत् ॥ ९३ ॥

कोणेष्विति यावत् ।

अथान्तःस्थचतुष्कोणव्यूहान्तर्व्यूहसिद्धये ।
त्यक्त्वा पङ्क्तित्रयं बाह्ये पङ्क्तिमेकां विलोपयेत् ॥ ९४ ॥
तदन्तर्वेदकोणेषु पदाष्टशतकं भवेत् ।
तृतीयवीथेः प्रारभ्य पङ्क्तिरेका यथाक्रमम् ॥ ९५ ॥
मध्ये लोप्या महावीथिर्यावत् तावद् विनिर्गता ।
ततस्तु तत्त्वकोष्ठानां द्वादशात्र भवन्ति हि ॥ ९६ ॥
अन्तःकोणेषु तेषां च नन्दकोष्ठानि मार्जयेत् ।
(हन्तव्यूहे ? अन्तर्व्यूहे) कृतिघटा(न् ?) द्वितीये साष्टकं शतम् ॥
तृतीये त्रिशतं चाथ ससंकृत्युत्तरं घटाः ।
सन्धिष्वष्टौ चतुर्थे तु चत्वारिंशद्घटादिकम् ॥ ९८ ॥
शतानि पञ्च कुम्भानामेवं कुम्भसहस्रकम् ।
चतुरावरणे ज्ञेयं मध्ये शिवघटोऽधिकः ॥ ९९ ॥
बाह्यपङ्क्तिद्वये प्राग्वद् दिक्षु द्वारचतुष्टयम् ।
शोभा द्विचत्वारिंशत् स्युरुभशोभाश्च तत्समाः ॥ १०० ॥
कोणानि मनुकोष्ठैः स्युः प्राग्वत् तान्यपि मार्जयेत् ।
लाङ्गलाकारकोणानि सर्वव्यूहे तु कल्पयेत् ॥ १०१ ॥

चतुरावरणे सहस्रकलशाधिकारः ।

क्षेत्रे तु सूत्रिते पञ्चपञ्चाशत्पुटके समे ।
एकाशीतिपदं मध्ये संस्थाप्य नव संपुटान् ॥ १०२ ॥
प्राचीनाश्चाप्युदीचीना लोप्याः षड् वीथयः पृथक् ।
एकाशीतिपदव्यूहास्त्वेवं स्युः पञ्चविंशतिः ॥ १०३ ॥
पर्यन्तवीथी बाह्यस्थपङ्क्तियुग्मेन पूर्ववत् ।
द्वाराणि दिक्षु चत्वारि शोभाश्चैवोपशोभिकाः ॥ १०४ ॥
चत्वारिंशत् पृथक् कार्याः कोणानि मनुकोष्ठकैः ।
मध्यव्यूहस्य मध्यस्थनवकेनाम्बुजं लिखेत् ॥ १०५ ॥

तस्यापि परितः पङ्क्तिद्वयं वीथ्यै विलोपयेत् ।
तद्बाह्ये च चतुर्दिक्षु द्वारार्थं त्रिपदानि तु ॥ १०६ ॥
विमृजेद् द्वारकोणेषु पृथक् स्यात् पदपञ्चकम् ।
मध्यव्यूहाद् बहिर्दिक्षु व्यूहमेकं पृथक् पृथक् ॥ १०७ ॥
अशेषं विमृजेत् तेषु होमं कुर्याद् यथाविधि ।
तद्बाह्ये तु कृतिव्यूहास्तेषां मध्यैककोष्ठकम् ॥ १०८ ॥
निधाय परितः पङ्क्तिद्वयं वीथ्यै विलोपयेत् ।
तद्बाह्येऽथ चतुर्दिक्षु पङ्क्त्योरेकैककोष्ठकम् ॥ १०९ ॥
द्वारार्थं विमृजेत् तत्तद्ब्रह्मवीथिगतं तथा ।
एवमेकोनपञ्चाशत् कृतिव्यूहे पदानि वै ॥ ११० ॥
भवन्ति मध्यव्यूहे तु विंशतिश्चाम्बुजे घटः ।
इत्येकविंशतिव्यूहे सहस्रकलशाः स्मृताः ॥ १११ ॥
ब्रह्मस्थाने शिवाख्यस्तु कलशः पङ्कजेऽधिकः ।

एकविंशतिव्यूहसहस्रकलशाधिकारः ।

इत्थं पदानि विन्यस्य परितश्चोपलिप्य तु ॥ ११२ ॥
पदानि सितचूर्णेन समाच्छाद्य निरन्तरम् ।
शालीनामाढकं वार्धं प्रस्थं पादेन निक्षिपेत् ॥ ११३ ॥
तदर्धं तण्डुलांस्तेभ्यस्तिलान् लाजान् क्रमेण तु ।
निक्षिप्य स्थण्डिलं कुर्यात् केवलं शालिभिस्तु वा ॥ ११४ ॥
तेषु प्रत्येकंशो दर्भान् विष्टरार्थं निधाय तु ।
तेषूक्तान् कलशान् सूत्रवेष्टितान् सविधानकान् ॥ ११५ ॥
क्षालितान् धूपितान् कूर्चपृष्ठान् संसादयेत् पृथक् ।
अथाचार्यः सशिष्यस्तु स्नातः शुक्लाम्बरादिभिः ॥ ११६ ॥
भूषितश्चाङ्गुलीयाद्यैः क्षालिताङ्घ्रिकरद्वयः ।
स्वाचान्तः सूपविष्टस्तु भूतशुद्धिं विधाय तु ॥ ११७ ॥
मण्डपाद् दक्षिणे सम्यग् विघ्नेशमभिपूज्य तु ।
समाचार्य(?) यथापूर्वं सकलीकृतविग्रहम् ॥ ११८ ॥

+ + + स्तं विधायाथ सामान्यार्घ्यकरः क्रमात् ।
प्राग्वच्छान्तिकलादीनि द्वाराणि कुसुमादिभिः ॥ ११९ ॥

इष्ट्वा क्षिप्त्वा च नाराचं प्राग्वदन्तः प्रविश्य तु ।
अस्त्रं विन्यस्य देहल्यां वास्तुपा + + + + + + ॥ १२० ॥

अभिपूज्यासनं च स्वं प्राङ्मुखो वाप्युदङ्मुखः ।
कलशांस्तु यथोद्दिष्टानवोक्ष्यार्घ्यजलैः क्रमात् ॥ १२१ ॥

उदङ्मुखीकृत्योत्कूर्चान् (?) सदाशिवतनुः स्वयम् ।
आधारशक्तिं कलशं + + + + + + + + ॥ १२२ ॥

द्वादशान्ताम्बुजेन्दूत्थममृतं तज्जलादिकम् ।
भावयन् प्रणवं सृष्टिक्रमेणोच्चारयन् क्रमात् ॥ १२३ ॥

कलशान् पूरयित्वा तु प्रोक्तद्रव्यसमन्वितान् ।
सहेमगन्धकुसुमान् सितवस्त्रावृतान् पृथक् ॥ १२४ ॥

स्रग्दामालङ्कृतानुक्तबिल्वाश्वत्थ + + यवान् ।
सशालितण्डुलापूर्णफलोपेतविधानकान् ॥ १२५ ॥

सम्प्रोक्ष्य तेषु विन्यस्य तत्तन्मन्त्रं च दैवतम् ।
इष्ट्वा पञ्चोपचारैस्तान् होमं कुर्याद् यथोदितम् ॥ १२६ ॥

अल्पादिकानां स्नानानामष्टोत्तरशतावधि ।
एकाग्नावेव होतव्यं प्राक्कुण्डे स्थण्डिलेऽपि वा ॥ १२७ ॥

ततः सप्तशतान्तानां चतुर्दिक्षु हुतं स्मृतम् ।
अथाष्टोत्तरसाहस्रे सहस्रकलशेऽपि च ॥ १२८ ॥

अष्टदिक्षु प्रतिष्ठोक्तकुण्डेष्वाधाय पूर्ववत् ।
शिवानलं तु मध्याग्नेर्विभज्य यथाविधि ॥ १२९ ॥

स्वदिक्षु ब्रह्मभिश्चाङ्गैर्जुहुयुर्गुरुमूर्तिपाः ।
व्यूहैकविंशतिर्यत्र सहस्रकलशे स्मृता ॥ १३० ॥
तत्र दिक्ष्वष्टकुण्डेषु तथैवान्तश्चतुर्दिशम् ।
व्यूहेषु मार्जितेष्वग्निं जुहुयाद् ब्रह्मभिः क्रमात् ॥ १३१ ॥

समिदाज्यचरून् लाजान् सिद्धार्थांश्च तिलान् यवान् ।
तत्तत्कलशसंख्यातमर्धं पादमथापि वा ॥ १३२ ॥

मूलेन हुत्वा मूर्त्यङ्गैर्जुहुयुस्तद्दशांशतः ।
तत्सम्पातघृतं सर्वमेकीकृत्य कुशाग्रतः ॥ १३३ ॥
कलशेषु क्षिपेत् किञ्चिन्निवेद्यान्तं यजेत् पुनः ।
सर्वं कर्मेति सामान्यं स्नपनानामुदीरितम् ॥ १३४ ॥

साधारणकर्माधिकारः ।

द्रव्यदैवतमन्त्रास्तु स्नपनानां यथाक्रमम् ।
लिख्यन्ते नवकादीनां शैवतन्त्रप्रचोदिताः ॥ १३५ ॥
माणिक्यं मौक्तिकं वज्रं प्रवालं च हरिन्मणिः ।
पुष्यरागश्च वैडूर्यं नीलं गोमेदकं क्रमात् ॥ १३६ ॥
मध्येन्द्रयाम्याप्यसौम्यवह्निरक्षोनिलेशगान् ।
कलशान् मणिभिश्चोक्तैर्गन्धपुष्पकुशाम्बुभिः ॥ १३७ ॥
ईशादिब्रह्मभिश्चाङ्गैरभिपूर्याभिषेचयेत् ।
मध्यादिपूरणे त्वैन्द्रान्मध्यान्तस्नपने क्रमः ॥ १३८ ॥
अस्त्रं चैवास्त्रवर्धन्यां शिवकुम्भान्तिके यजेत् ।
पुष्पाम्बुधूपान्तरितं चतुष्कानन्तरं यथा ॥ १३९ ॥
आपोराजानमाद्याद् वा मध्येन व्योमविद्यया ।

नवकस्य ।

पञ्चविंशतिकस्यापि पञ्चरत्नाम्बु मध्यतः ॥ १४० ॥
पूरयेद् ब्रह्मकलशे शिवेन समधिष्ठिते ।
पाद्यमाचमनं चार्घ्यं पञ्चगव्यं दिशास्वथ ॥ १४१ ॥
आग्नेयादिपदेष्वाज्यं मधु क्षीरं तथा दधि ।
पूर्वत्रिके चेक्षुरसकषायाम्बु फलाम्बु च ॥ १४२ ॥
चतुःक्षीरागबिल्वानां त्वग्भिः सिद्धं कषायकम् ।
लाजाम्बु चैव गन्धाम्बु पुष्पाम्भश्चैव दक्षिणे ॥ १४३ ॥
हेमाम्भः पद्मरागाम्भो मुक्ताम्भः पश्चिमे त्रिके ।
यवोदकं प्रवालाम्बु तिलाम्भश्चोत्तरात्रिके ॥ १४४ ॥
दूर्वोत्पलकुशाम्भांसि शाल्यम्भश्चानलादिषु ।
मूलं ब्रह्माणि चाङ्गानि मध्ये मन्त्राश्च दैवतम् ॥ १४५ ॥

पूर्वादित्रिकमध्यस्थकोणस्थकलशेषु च ।
क्ष्माद्यष्टमूर्तयो दैवं मन्त्राश्चान्ते नमोन्विताः ॥ १४६ ॥

प्रागादिपार्श्वकुम्भानां दैवमङ्गुष्ठमात्रकम् ।
भुवनेशान ईशान एकपिङ्गेक्षणस्तथा ॥ १४७ ॥

उद्भवश्च भवश्चाथ महादेवो महाद्युतिः ।
त्रिकं मध्यघटादाप्यकुम्भाद्यं पूरणादिषु ॥ १४८ ॥

पाद्यस्येदंविष्णुरिति चापोहिष्ठेत्यनन्तरम् ।
आपःपुनन्त्वित्यर्घ्येण चाग्निमीळेति गव्यतः ॥ १४९ ॥

इषेत्वेति घृतेनाथ मधुना मधुवाततः ।
आप्यायस्वेति दुग्धेन दधिक्राव्णोति वै दधि ॥ १५० ॥

अथ पूर्वत्रिके

उपत्वाग्न इतीक्ष्वद्भिर्मानस्तोकात् फलाम्भसा ।
अश्वावत्या कषायेण

अथ दक्षिणत्रिके

सुमित्रानस्तु लाजकान् ॥ १५१ ॥

गन्धाम्भसाग्नआयाहि पुष्पवत्या तु पुष्पकान् ।
हिरण्यवर्णाः शुचयो ब्रह्मजज्ञानामित्यपि ॥ १५२ ॥

अ(थाऽथो) समुद्रज्येष्ठाद्यात् पश्चिमत्रितयेन तु ।
रक्षोहणं वास्तोष्पते शन्नोदेव्यादिनापि च ॥ १५३ ॥

यवाम्भोविद्रुमाम्भोभिस्तिलाम्भोभिस्तथोत्तरे ।
दूर्वाम्भसायनेतेति श्रियो जातेति चोत्पलान् ॥ १५४ ॥

त्रिष्टुभाथ कुशाम्भोभिरथ शाल्युदकं पुनः ।
आशुःशिशानआद्येन स्नापयेत् पार्वतीपतिम् ॥ १५५ ॥

मध्यस्थनवकुम्भेन महत्या व्योमविद्यया ।
अथवा ब्रह्मभिश्चाङ्गैर्गायत्र्या शिवसंज्ञया ॥ १५६ ॥

सावित्र्या मूर्तिमन्त्रैश्च स्नापयेद् व्योमविद्यया ।

पञ्चविंशतेः ।

अथ त्वेकोनपञ्चाशत्कलशानां तु मध्यतः ॥ १५७ ॥

हिरण्यरत्नगन्धैस्तु मध्यकुम्भं प्रपूरयेत् ।
पाद्याचामार्घ्यगव्याज्यमधुक्षीरदधीनि च ॥ १५८ ॥
मध्याष्टकस्य तूक्तानि पूरणेऽथैन्द्रपञ्चके ।
चन्दनागरुकर्पूरकुङ्कुमोशीरवारिभिः ॥ १५९ ॥
आग्नेये पञ्चके शस्तं पञ्चधान्यैश्च नैर्ऋते ।
कुसुमोत्पलकल्हारपद्मश्वेतोत्पलैरपि ॥ १६० ॥
वायव्यपञ्चकेऽथैशे मल्लिकाजातिचम्पकैः ।
पाटलैः करवीरैश्च पञ्चकं पूरयेत् क्रमात् ॥ १६१ ॥
शिवब्रह्माङ्गमन्त्रेशमध्यमं नवकं स्मृतम् ।
ऐन्द्रादिकाष्टदिङ्मध्य + + + + + मूर्तयः ॥ १६२ ॥
मध्याद् दक्षिणतोऽष्टानां वामाद्याः शक्तयो यथा ।
मध्यादुत्तरकोष्ठानां शर्वाद्यं मूर्तिपाष्टकम् ॥ १६३ ॥
तदनन्तरकोष्ठानां वामभीमादिकाष्टकम् ।
शिष्टानामष्टकोष्ठानां विद्येशाः स्युः क्रमाधिपाः ॥ १६४ ॥
तन्मन्त्रास्तारह + + + + + + + + तकम् ।
ब्रह्माङ्गैरेव मध्यस्थेनाष्टकेनाभिषेचयेत् ॥ १६५ ॥
प्रागादिदिक्पञ्चकैस्तु चमकैः स्नपयेच्छिवम् ।
पावमानीहिरण्यादिचतुष्कोणस्थपञ्चकैः ॥ १६६ ॥
मध्ये शिवघटेनापि स्नपयेद् व्योमविद्यया ।

एकोनपञ्चाशतः ।

अथैकाशीतिके मध्यकलशे रत्नपञ्चकम् ॥ १६७ ॥
हेम चोक्तं सतीर्थाम्भस्तद्बाह्यकलशाष्टके ।
पाद्याचामार्घ्यगव्याज्यमधुदुग्धदधीन्यपि ॥ १६८ ॥
प्राच्यां तु नवके मध्ये चन्दनं रोचनागरु ।
कर्पूरकुङ्कुमं कुष्ठं मांसीग्रन्थिमुरं तथा ॥ १६९ ॥
दक्षिणे वृषशृङ्गेभदन्तक्षेत्रनदीमृदः ।
तटाकगिरिवल्मीककुलीरह्रदमृत्तिकाः ॥ १७० ॥
चतुःक्षीरागबिल्वाम्रमधूकाशोकजम्बुजाः ॥ ।
शुभास्त्वचश्च वारुण्यां नवके क्रमशः स्मृताः १७१ ॥

कदलीपनसाम्राणि मातुलुङ्गं च डाडिमम् ।
जम्बीरं लिकुचं चाथ नालिकेरं च जाम्बवम् ॥ १७२ ॥
फलान्युदीच्यनवके त्वथाग्नेय्यां समुद्रजम् ।
नादेयमथ ताटाकं हृदाम्भः शुभकूपजम् ॥ १७३ ॥
हरिद्रालाजभसितकुसुम्भाम्भांसि वै नव ।
नीवारमुद्गमाषाश्च सिद्धार्थयवशालयः ॥ १७४ ॥
तिलप्रियङ्गुश्यामाका नैर्ऋत्यां नवके स्मृताः ।
लक्ष्मीर्देवी हरिक्रान्ता मुसली भृङ्गराजकः ॥ १७५ ॥
सदाभद्रा शक्रवल्ली भीता चैकदलाम्बुजम् ।
वायव्यनवके द्रव्याण्येतानि स्युर्यथाक्रमम् ॥ १७६ ॥
पद्मद्वयं च कुमुदद्वयं चैवोत्पलत्रयम् ।
इन्दीवरं च कह्लारमैशान्यां नवके क्षिपेत् ॥ १७७ ॥
पाद्यादिकैस्तु ब्रह्माङ्गैरिदंविष्णवादिभिस्तथा ।

तद्यथा —

इदं विष्णुर्विचक्रम आपो हि ष्ठा मयोभुवः ॥ १७८ ॥
अग्निमीळे पुरोहितमिषेत्वेत्यादिना तथा ।
घृतं मिमिक्षेत्याद्येन मधुवाताऋतायते ॥ १७९ ॥
आप्यायस्व समे तु ते दधिक्राव्णो अकारिषम् ।
प्राच्येन नवकेनापोराजानमिति सूक्ततः ॥ १८० ॥
याम्यां पुरुषसूक्तेन कद्रुद्रायेन पश्चिमे ।
इमाँ रुद्राय तपस इत्युदङ्नवकेन तु ॥ १८१ ॥
आग्नेयनवकेनेमाँ रुद्राय स्थिरधन्वने ।
हिरण्यवर्णाःशुचयःपावकाद्यनुवाकतः ॥ १८२ ॥
नैर्ऋत्यां नवकेनाथ वायव्यां नवकेन तु ।
हिरण्यशृङ्गमित्याद्येनानुवाकान्ततः क्रमात् ॥ १८३ ॥
ऐशान्यां शन्नइन्द्राद्यान्नवकेनाभिषिच्य तु ।
मध्यस्थशिवकुम्भेन महत्या व्योमविद्यया ॥ १८४ ॥

एकाशीतेः ।

अष्टोत्तरशते मध्ये रत्नहेमकुशाम्बुभिः ।
शिवकुम्भं समापूर्य तद्बाह्यांशत्रिकेष्वपि ॥ १८५ ॥
न्यग्रोधोदुम्बराश्वत्थैः प्लक्षजम्बुपलाशजैः ।
शिरीषविल्वमधुकैः सप्तपर्णासनार्जुनैः ॥ १८६ ॥
अग्न्यादिष्वैक्षवं क्षौद्रं तिलं गव्यं तु पञ्चकम् ।
मध्यादिपूर्वनवके कुशमूलाष्टमृत्तिकाः ॥ १८७ ॥
शाकप्रियङ्गुमाषाश्च यवगोधूमसर्षपाः ।
मुद्गास्तिलाश्च निष्पावा याम्ये मध्यादितो नव ॥ १८८ ॥
चम्पकोन्मत्तकद्रोणैरशोककुमुदोत्पलैः ।
करवीराब्जजातीभिः पूरयेत् पश्चिमे नव ॥ १८९ ॥
विल्वाम्रबदरीपूगनालिकेराणि डाडिमम् ।
रम्भापनसजम्बूनि कौबेर्यां पूरयेन्नव ॥ १९० ॥
नदीह्रदतटाकाब्धिशुभकूपाम्बुकुङ्कुमम् ।
रजनीशालिपिष्टं च भस्म चाप्यनलाष्टके ॥ १९१ ॥
लक्ष्मी देवी हरिक्रान्ता सहा चैकदलाम्बुजम् ।
शक्रवल्ली सदाभद्रा मुसली नैर्ऋताष्टके ॥ १९२ ॥
द्वे तुलस्यावपामार्गो भृङ्गराडपराजिता ।
भीता दमनकं दूर्वेत्युक्तं स्यान्मारुताष्टके ॥ १९३ ॥
ऐशाष्टकं त्वष्टगन्धैश्चन्दनाद्यैस्तु पूरयेत् ।
अथ त्रिकेषु श्रीपर्णी शमी च खदिरं ततः ॥ १९४ ॥
सप्तच्छदं च ककुभमसनं च कदम्बकम् ।
रक्तचन्दनलोध्रे च सरलं सर्जमेव च ॥ १९५ ॥
वकुलं कर्णिकारं च पाटलारग्वधे तथा ।
तमालविल्वौ धात्री च चतुःक्षीरनगा अपि ॥ १९६ ॥
रुद्राक्षं पुत्रजीवं च त्रिकेष्वापूरयेत् क्रमात् ।
मध्ये चतुस्त्रिकाणां तु पूर्वादिक्रमयोगतः ॥ १९७ ॥
मूलं ब्रह्माणि चाङ्गानि मन्त्राः स्युर्दैवतानि च ।
कोणकोष्ठचतुष्कस्य क्ष्मादिमूर्तिचतुष्टयम् ॥ १९८ ॥

दैवतं चापि नामानि मन्त्रास्तेषां नमोन्तकाः ।
आपोराजानमाद्यात् प्राग् याम्ये पुरुषसूक्ततः ॥ १९९ ॥
कद्रुद्रायेन वारुण्यामिमाँ रुद्राय चोत्तरे ।
नवकानां तु मन्त्राः स्युरापो व्रिष्णुश्च पूर्वयोः ॥ २०० ॥
सूक्तयोर्दैवतं चाथ रुद्रः स्याच्छिष्टयोरपि ।
आग्नेयस्याष्टकस्येमाँ रुद्राय स्थिरधन्वने ॥ २०१ ॥
हिरण्यवर्णाःशुचय इत्याद्यं नैर्ऋताष्टके ।
हिरण्यशृङ्गमित्याद्याद् वायव्याष्टघटैरपि ॥ २०२ ॥
शन्न इन्द्रादिकं सूक्तमैशान्यामष्टकस्य तु ।
रुद्रश्चापो वरुणश्चेन्द्राग्नी दैवतं क्रमात् ॥ २०३ ॥

एतैर्देवमभिषेचयेदिति यावत् ।

त्रिकाणामथ चाष्टानामिन्द्राग्न्योरन्तरत्रिकान् ।
प्रारभ्याङ्गुष्ठमात्रश्च भुवनेश्वरसंज्ञकः ॥ २०४ ॥
ईशानश्चैकपिङ्गाक्ष उद्भवश्च भवस्तथा ।
महादेवो महातेजा मन्त्रास्तद्देवताश्च ते ॥ २०५ ॥

तारादिनमोन्तानि तत्तन्नामधेयानि मन्त्रा इति यावत् ।

इदंविष्णवादिकं चाथ दधिक्राव्णादिकत्रयम् ॥ २०६ ॥
अग्निमीळेतिपूर्वा ऋगिषेत्वेत्यादिकं तथा ।
घृतं मिमिक्षेत्याद्यं च मधुवाता ऋतायते ॥ २०७ ॥
मन्त्राः स्युर्देवताश्चासामाद्याया विष्णुरुच्यते ।
दध्यादित्रितयस्यापि ऋग्वेदादेस्तु पावकः ॥ २०८ ॥
इषेत्वाद्यस्य सविता घृतादेरपि चानलः ।
मध्वादेः पितरो दैवमाप्यायस्वादिके शशी ॥ २०९ ॥
आकाशोऽर्कश्च सोमश्च यजमानश्च दैवतम् ।
मन्त्राः पुरोवत् पञ्चवर्णव्योमव्यापिषडर्णकौ ॥ २१० ॥
अघोरास्त्रं तथास्त्रं च मन्त्रास्तद्देवता शिवः ।

एभिर्यथाक्रममभिषेचयेदिति यावत् ।

मध्येन शिवकुम्भेन महत्या व्योमविद्यया ॥ २११ ॥

अभिषिञ्चेन्महादेवं देवतास्य शिवः स्वयम् ।

अष्टोत्तरशतस्य ।

द्विपञ्चाशत्समधिकद्विशतस्नपनस्य तु ॥ २१२ ॥
मध्यकुम्भं यथापूर्वं हेमरत्नकुशाम्बुभिः ।
पूरयेदथ दिक्ष्वष्टनवकान्यपि तद्बहिः ॥ २१३ ॥
चतुष्कोणस्थनवकान्यपीत्यष्टोत्तरं शतम् ।
अष्टोत्तरशतोक्तैस्तु द्रव्यैरेवाभिपूरयेत् ॥ २१४ ॥
तैरेव देवतामन्त्रैरथ द्वादशकान्यपि ।
चतुर्दिक्षु क्रमादेभिर्द्रव्यैरद्भिश्च पूरयेत् ॥ २१५ ॥
नन्द्यावर्तं च धुर्धूरं कपित्थं च कदम्बकम् ।
माल्यङ्गश्चैव भद्रा च तद्वद् द्रावणबिल्वकम् ॥ २१६ ॥
मरुकं पद्मतुलसी मुण्डी कुरवकार्जके ।
मध्यद्वादशके प्राच्यां सोमकर्पूरवल्लिके ॥ २१७ ॥
कुब्जकं शतपत्रं च कर्णिकारं बकं तथा ।
श्वेतार्कमरुणागस्तिकुसुमं काञ्चनारकम् ॥ २१८ ॥
मल्लिकायुगलं रक्तकरवीरं च दक्षिणे ।
तमालं माधवी श्वेतमन्दारं पाटलद्वयम् ॥ २१९ ॥
गोक्षुरं भूकदम्बं चाप्यङ्कोलस्य च पल्लवः ।
बीजपूरस्य कुसुमं लवङ्गस्य च पल्लवः ॥ २२० ॥
राजार्कः स्वर्णयूथी च प्रत्यग् द्वादशकस्य तु ।
श्वेतपल्लवपुष्पे द्वे श्वेतदूर्वा महामरी ॥ २२१ ॥

कच्चोरोशीरमुस्ताश्च पलाशकुसुमं ततः ।
सितासितोन्मत्तपुष्पे शेफाली बृहती तथा ॥ २२२ ॥
मध्यद्वादशके सौम्ये द्रव्याणि स्युर्यथाक्रमम् ।
पार्श्वद्वादशकान्यष्टावापूर्य स्वच्छवारिभिः ॥ २२३ ॥
सचन्दनं हिरण्यं च पुष्पाण्यप्येषु निक्षिपेत् ।
अष्टोत्तरशतप्रोक्तैर्मन्त्रैस्तैर्नवकैः क्रमात् ॥ २२४ ॥

एकादशानुवाकैस्तु रौद्रद्वादशकैः शिवम् ।
ऐन्द्रादिकैस्तु संस्नाप्य शिष्टद्वादशकेन तु ॥ २२५ ॥

ब्रह्मभिर्मध्यमं कुम्भं महत्या व्योमविद्यया ।

द्विपञ्चाशदधिकद्विशतस्य ।

कलशत्रिशतस्यापि हेमरत्नकुशाम्बुभिः ॥ २२६ ॥

मध्यकुम्भं समापूर्य तद्बाह्यकलशाष्टकम् ।
रत्नाष्टकेन तीर्थाद्भिः समापूर्यास्य बाह्यतः ॥ २२७ ॥

अष्टोत्तरशतद्रव्यैस्तथैवापूर्य मन्त्रतः ।
तत्कोणे नवकान्तःस्थपदानां तु चतुष्टयम् ॥ २२८ ॥

शुद्धाद्भिः पूरयेत् तस्माद् बाह्यलाङ्गलकोणगात् ।
द्विपञ्चाशद्द्विशतवद् द्रव्यैर्मन्त्रैश्च दैवतैः ॥ २२९ ॥

पूरयित्वा तु तन्मध्यनवकानि त्रिकाणि च ।
द्वादशाष्टप्रसंख्यानि हेमाम्भोभिः प्रपूरयेत् ॥ २३० ॥

त्रिशतस्य ।

अष्टाधिकपञ्चशते मध्यकुम्भं तु पूर्ववत् ।
सपञ्चरत्नहेमाद्भिः समापूर्य यथाविधि ॥ २३१ ॥

बाह्ये विकारकुम्भांश्च तद्बाह्यनवकाष्टके ।
मध्यत्रिकाष्टके चैव सद्वादशश(तान्? तं) घटान् ॥ २३२ ॥

अष्टोत्तरशतद्रव्यैश्चतुर्भिश्चैव पूरयेत् ।
तद्बाह्यतस्तु परितो नवकावरणद्वये ॥ २३३ ॥

चत्वारिंशत्प्रसंख्यानि नवकानि भवन्ति हि ।
तेषां तु मध्यकुम्भेषु तावद्द्रव्याणि निक्षिपेत् ॥ २३४ ॥

शिष्टद्रव्यचतुष्केण कोणकुम्भांस्तु पूरयेत् ।
शिष्टांस्तु कलशान् सर्वाञ् शुद्धाम्भोभिः प्रपूरयेत् ॥ २३५ ॥

सहेमगन्धकुसुमान् मूलेन तु यथाविधि ।
मध्यावरणकुम्भैस्तु रुद्रेणैवाभिषेचयेत् ॥ २३६ ॥

तद्बाह्ये नवकैः सर्वैः क्रमान्नारायणोदितैः ।
अध्यायैश्चाथ वल्लीभिरभिषिच्य क्रमेण तु ॥ २३७ ॥

मध्यस्थनवकुम्भेन स्नपयेद् व्योमविद्यया ।
अथवा सर्वकुम्भैश्च संहितामनुभिः क्रमात् ॥ २३८ ॥

ब्रह्मभिः शिवगायत्र्या सावित्र्या व्योमविद्यया ।
अभिषिञ्चेद् गुरुर्देवं तत्तत्सूक्तान्यनुक्रमात् ॥ २३९ ॥

अष्टौ मूर्त्तिधरा विप्रा जपेयुः परितः स्थिताः ।
कुशकूर्चैस्तु कलशान् संस्पृशन्तस्तथा शिवम् ॥ २४० ॥

अष्टाधिकपञ्चशतस्य ।

अथ सप्तशते विंशत्यधिके मध्यमं घटम् ।
हेमरत्नैश्च शुद्धाद्भिः पूरयेत् संहिताजपात् ॥ २४१ ॥

द्वासप्ततिं तु कलशांस्तद्बाह्ये नवकाष्टके ।
तावद्द्रव्यैः क्रमान्मन्त्रैरष्टोत्तरशतोदितैः ॥ २४२ ॥

बाह्ये द्वासप्ततिव्यूहान् क्रमादावरणत्रये ।
तेषां नवकमध्यस्थकुम्भास्तावन्त एव हि ॥ २४३ ॥

तेषु द्रव्याणि तावन्ति क्रमात् तान्येकशः क्षिपेत् ।
द्रव्यद्वादशकं शिष्टं कोणेष्वावरणत्रये ॥ २४४ ॥

क्रमाद् द्वादशकुम्भेषु शार्वांशान्तं विनिक्षिपेत् ।
मध्यादिकेषु व्यूहेष्वप्येकाशीतिप्रसङ्ख्यया ॥ २४५ ॥

व्योमव्यापिपदान्येषु क्रमात् तावन्ति विन्यसेत् ।
तत्तदुद्दिष्टमध्वानं षड्विधं चैषु योजयेत् ॥ २४६ ॥

संपूज्य च विधानेन महत्या व्योमविद्यया ।
अभिषिञ्चेद् गुरुर्देवं रुद्रेण ब्रह्मभिस्तथा ॥ २४७ ॥

प्राग्वन्मूर्तिधरा विप्राः कद्रुद्रं पौरुषं ततः ।
श्रीसूक्तं पवमानं च जपेयुः कूर्चपाणयः ॥ २४८ ॥

विंशत्यधिकसप्तशतस्य ।

पञ्चावरणयुक्तस्य सहस्रकलशस्य तु ।
गन्धकाञ्चनरत्नैश्च कुशतीर्थजलैर्घटम् ॥ २४९ ॥

शिवाख्यं पूरयेन्मध्ये तद्बाह्यघटविंशतेः ।
अग्न्यादिकोणकुम्भांस्तु पाद्याचामार्घ्यगव्यकैः ॥ २५० ॥

शिष्टान् दुग्धघृतक्षौद्रदधीक्षुफलवारिभिः ।
कषायतोयगोमूत्रपुष्पगोमयकाञ्चनैः ॥ २५१ ॥

पृथग् बिल्वस्य पञ्चाङ्गैः सहाम्भोभिः प्रपूरयेत् ।
प्रथमावरणस्य ।

अथ द्वितीयावरणे दूर्वायवतिलाम्बुभिः ॥ २५२ ॥

शाल्युत्पलत्रयाम्भोभिश्चतुःक्षीरनगाङ्कुरैः ।
जम्बूशिरीषपालाशसप्तपर्णासनार्जुनैः ॥ २५३ ॥

प्रियङ्गुमाषगोधूममुद्गसर्षपवैणवैः ।
निष्पावकमहाव्रीहिश्यामाकाणुगवीधुकैः ॥ २५४ ॥
मसूरककुळत्थैश्चाप्याढकीभिश्च जर्तिलैः ।
सिद्धार्थैरपि नीवारैः पूरयेत् तु यथाविधि ॥ २५५ ॥

ततो विशुद्धदेशस्थनदीवल्मीकतीर्थजाः ।
वृ(षभे ? षेभ)गिरिशृङ्गेभ्यः कुली(रे ? र)क्षेत्रयोर्मृदः ॥ १५६ ॥
पलाशकुशबिल्वानां क्षीरागानां च मूलतः ।
वेश्या वराहकृ(ष्टै ? ष्टा)श्च मृदो देवगृहस्य च ॥ २५७ ॥

कुमुदोत्पलपद्मानां मूलेभ्यो मृत्तिकाः पृथक् ।
चम्पकद्वयमुन्मत्तत्रयं वै पाटलं यवम् ॥ २५८ ॥
अशोकद्रोणकुसुमकरवीरचतुष्टयम् ।
पद्मद्वयं च कुमुदद्वयं वै तुलसीद्वयम् ॥ २५९ ॥

शतपत्रं कुब्जकं च माधवी मल्लिकाद्वयम् ।
सप्तकालं च नारं च पुष्पे पुन्नागनागयोः ॥ २६० ॥
राजार्कं धवलार्कं च कल्हारेन्दीवरे तथा ।
सितारुणे च मन्दारे कर्णिकारं महामरी ॥ २६१ ॥
आर्तिं कुसुम्भकुसुमं सितकृष्णापराजिते ।
पलाशपुष्पं बकुलं नन्द्यावर्तं कदम्बकम् ॥ २६२ ॥
दमनं पद्मतुलसी मुण्डी कुरवकं तथा ।
ह्रीरिबेरं मरुवकं मुस्ता ग्र(न्थी ? न्थि)रुशीरकम् ॥ २६३ ॥

बृहत्यारग्वधौ जम्बूपल्लवं चूतपल्लवम् ।
अरुणागास्तिकुसुममाम्रपुष्पं च चोरकम् ॥ २६४ ॥

शेफालीकुसुमं लक्ष्मी सहदेवी कृताञ्जलिः ।
भीतेन्द्रवल्ली मुसलीभद्रे दूर्वाद्वयं तथा ॥ २६५ ॥

हरिक्रान्ता भृङ्गराजद्वयं चैकदलाम्बुजम् ।
भूकदम्ब इतीमानि द्वात्रिंशदाधिकं शतम् ॥ २६६ ॥

द्वितीयावरणस्य ।

तृतीयेऽपि च माल्यङ्गं शमीपुष्पं च तद्दलम् ।
अपामार्गः शङ्खपुष्पं तापिञ्छं च तमालकम् ॥ २६७ ॥

ब्राह्मी रुद्रजटा सूर्यवर्तिनी च सुवर्चला ।
वनमाला तथा श्यामा पट्टी रावणबिल्वकम् ॥ २६८ ॥

कर्पूरवल्लिका सोमवल्ली धान्यङ्कुरं तथा ।
दूर्वासनप्रसूने द्वे बकपुष्पं तथार्जकम् ॥ २६९ ॥

कुटजं सरलं कुष्ठं चन्दनं रक्तचन्दनम् ।
कुङ्कुमं च सुरं मांसी कर्पूरं चागरुद्वयम् ॥ २७० ॥

जातीफलं च मञ्जिष्ठा देवदारुश्च रोचना ।
खषं चषालपद्माक्षौ गन्धामलकगन्धकाः ॥ २७१ ॥

एलालवङ्गतक्कोलहरितालमनश्शिलाः ।
गैरिकं माक्षिकं काक्षी सिन्दूरं दरदं शिखा ॥ २७२ ॥

अयस्तीक्ष्णमयस्कान्तस्ताम्रं त्रपु च पित्तलम् ।
सीसकं रजतं स्वर्णं वैक्रान्तं चाभ्रकत्रयम् ॥ २७३ ॥

(सौ ? सू)र्येन्दुकान्तौ स्फटिकं लोहं तुत्थं च कांस्यकम् ।
नालिकेराम्रपनसरम्भालिकुचडाडिमाः ॥ २७४ ॥

मातुलुङ्गं च जम्बीरं बैल्वमातुण्डिकाफलम् ।
पूगं च बदरं द्राक्षा नारङ्गामलकीफले ॥ २७५ ॥

मधूकाम्रातवृक्षौ च श्रीपर्णीखदिरावपि ।
पद्मकं सर्जलोध्रौ च रोहीतकविकङ्कतौ ॥ २७६ ॥

बिल्वारग्वधशाकाश्च धात्री चैव हरीतकी ।
जम्बूश्च साराण्येतेषां रत्नानि च पृथक् नव ॥ २७७ ॥

वज्रादिकानि क्रमशो हैमान्यस्त्राण्यथो दश ।
हरिद्रायवगोधूमशालीचूर्णानि भस्म च ॥ २७८ ॥

मुद्गमाषकुलस्थानां चूर्णान्यपि च सक्तवः ।
धानाः करम्बाश्चोडुम्बा बला चातिबला तथा ॥ २७९ ॥

समुद्रसिन्धुतीर्थाम्भो वापीकूपतटाकजम् ।
ह्रदनिर्झरतोयं च रुद्राक्षं च यथाक्रमम् ॥ २८० ॥

इत्थं तृतीयावरणे कलशानां चतुष्टयम् ।
शतं च चत्वारिंशच्च द्रव्यैरुक्तैः प्रपूरयेत् ॥ २८१ ॥

तृतीयावरणस्य ।

चतुर्थावरणे चाथ + + + कलशोत्तरम् ।
चतुश्शतं हि कलशान् हेमकर्पूरकुङ्कुमैः ॥ २८२ ॥

नादेयैः पूरयेत् तोयैर्गायत्र्या शिवसंज्ञया ।

चतुर्थावरणस्य ।

पञ्चमावरणे तद्वद् द्वासप्ततिशतद्वयम् ॥ २८३ ॥

कुम्भाः स्युस्तान् सकर्पूरचन्दनागरुवारिभिः ।
पूरयेच्छिवसावित्र्या प्रादक्षिण्याद् यथाविधि ॥ २८४ ॥

ततः सन्धिस्थकुम्भांस्तु तीर्थतोयेन पूरयेत् ।
त्रियम्बकेन गन्धं च हिरण्यं चैव निक्षिपेत् ॥ २८५ ॥

सर्वत्रावृतिकुम्भानां पूरणे पूजने तथा ।
प्रागादिकं स्यादीशान्तं क्रमोऽयं स्नपनेऽपि च ॥ २८६ ॥

व्यूहानां नवकादीनां प्राग्याम्याप्यैन्दवान्तकम् ।
अग्निरक्षोनिलेशान्तं पूरयेत् स्नपयेदपि ॥ २८७ ॥

ईशानाद्यास्तु सद्यान्तं मध्याद्यावरणेश्वराः ।
सदाशिवादयश्चापि शान्त्यतीतादिकाः कलाः ॥ २८८ ॥

अध्वानोऽपि पुनश्चैषु मध्याद्येषु स्थिताः क्रमात् ।
मध्यमे शिवकुम्भे तु सर्वेषु कलशेष्वपि ॥ २८९ ॥
स्मर्तव्याः स्युः षडध्वानः समष्टिव्यष्टिमार्गतः ।
सर्वत्रापि च कुम्भेषु स्वर्णं माषमितं क्षिपेत् ॥ २९० ॥
तदर्धं वाप्यतोऽर्धं वा श्रेष्ठमध्याधमक्रमात् ।
त्रिद्व्येकनिष्कं श्रेष्ठाद्यं मध्ये शिवघटे क्षिपेत् ॥ २९१ ॥
सामान्यं सर्वकुम्भानां गव्यमध्वैक्षवं विना ।
पूरणं शुद्धतोयेन वस्त्रं कूर्चं च काञ्चनम् ॥ २९२ ॥
पल्लवानि पिधानं च गव्यादीनां च तत् समम् ।

पञ्चावरणसहस्रकलशाधिकारः ।

अष्टोत्तरसहस्रस्य प्राग्वच्छिवघटं जलैः ॥ २९३ ॥
सरत्नहेमगन्धैस्तु समापूर्य यथाविधि ।
पूर्वादिदिक्पञ्चकेषु द्रव्यैर्विंशतिभिः क्रमात् ॥ २९४ ॥
पूर्ववत् पूरयेन्मन्त्रैः पञ्चकान्यानलादिषु ।
शुद्धाम्भोभिः सकर्पूरैः पूरयेत् कुसुमान्वितैः ॥ २९५ ॥

मध्यमव्यूहस्य ।

बाह्ये द्वितीयव्यूहे तु विकारनवकानि तु ।
तृतीयावरणप्रोक्तैर्माल्यज्ञाद्यैः प्रपूरयेत् ॥ २९६ ॥

द्वितीयव्यूहस्य ।

अथ तृतीयव्यूहे तु चतुर्दिङ्नवकानि तु ।
दूर्वादिनीवारान्तैस्तु द्वितीयावरणोदितैः ॥ २९७ ॥
पद्माक्षरुद्राक्षाभ्यां च तत्त्वद्रव्यैस्तु पूरयेत् ।
शिष्टाशीतिप्रसंख्यानां नवकानां यथाक्रमम् ॥ २९८ ॥
मध्यकुम्भांस्तु तावद्भिर्द्वितीयावरणोदितैः ।
नदीमृदादिकैर्द्रव्यैः पूरयेद् व्योमविद्यया ॥ २९९ ॥

अष्टद्रव्यैस्ततः शिष्टैर्द्वारकुम्भान् यथापुरम् ।
आपूरयेत् तु मूर्तीशमन्त्रैरष्टाभिरेव तु ॥ ३०० ॥

अष्टोत्तरसहस्रकलशानाम् ।

चतुर्व्यूहेऽपि मध्यस्थकुम्भं प्राग्वत् प्रपूरयेत् ।
ततस्त्रयाणां व्यूहानां दिक्कोणान्तांस्तु दिक्स्थितान् ॥ ३०१ ॥

व्यूहेषु लाङ्गलाभेषु कलशान् पूर्ववत् क्रमात् ।
पूर्वोक्तद्रव्यमन्त्रैश्च सन्धिस्थानपि पूरयेत् ॥ ३०२ ॥

पञ्चावरणवत् सर्वं देवताध्वादिकं स्मृतम् ।

चतुरावरणसहस्रकलशाधिकारः ।

एकविंशतिके व्यूहे मध्यकुम्भं च तद्बहिः ॥ ३०३ ॥

विंशतिं मध्यमव्यूहे प्राग्वद् द्रव्यैस्तु पूरयेत् ।
तद्बाह्यविंशतिव्यूहमध्यस्थकलशांस्ततः ॥ ३०४ ॥
दूर्वादिविंशतिद्रव्यैर्गोधूमान्तैः प्रपूरयेत् ।
ततोऽष्टदिक्षु व्यूहानां बाह्यावरणगान् घटान् ॥ ३०५ ॥

अष्टाविंशतिसंख्यांस्तु प्रतिव्यूहं क्रमेण तु ।
मुद्गादिभिस्तु तावद्भिरुक्तैर्द्रव्यैः प्रपूरयेत् ॥ ३०६ ॥

अन्तर्व्यूहचतुष्कस्थकुम्भान् कुङ्कुमवारिभिः ।
सहिरण्यैः समापूर्य पार्श्वव्यूहाष्टकं बहिः ॥ ३०७ ॥

गोमूत्रगोमयक्षीरदध्याज्यैक्षवमाक्षिकैः ।
नालिकेरपयोभिश्च क्रमेणैवाभिपूरयेत् ॥ ३०८ ॥

अथाष्टदिक्षु व्यूहानामन्तरा प्रतिविंशतेः ।
चतुष्कोणस्थकलशान् शिष्टैर्द्रव्यैस्तु पूरयेत् ॥ ३०९ ॥

एकविंशतिव्यूहस्य ।

सहस्रकलशानां तु पृथगावरणक्रमात् ।
दैवतानि च मन्त्राश्च कथ्यन्ते क्रमशोऽधुना ॥ ३१० ॥

नवव्यूहादिकानां च व्यूहैरावरणानि तु ।
पञ्चधा पृथगूह्यानि पञ्चावरणवत् क्रमात् ॥ ३११ ॥

मध्यस्थशिवकुम्भस्य दैवतं हि सदाशिवः ।
ब्रह्माङ्गानि च मूलं च मन्त्राः स्युर्व्योमविद्यया ॥ ३१२ ॥
गर्भावरणकस्याथ देवतास्त्वष्टमूर्तयः ।
द्वितीयावरणस्यापि वामाद्याः शक्तयः स्मृताः ॥ ३१३ ॥
तृतीयस्य तु मूर्तीशाः शर्वाद्या देवताः स्मृताः ।
चतुर्थावरणस्याथ दैवमङ्गुष्ठमात्रकम् ॥ ३१४ ॥
भुवनेशान ईशान एकपिङ्गेक्षणस्तथा ।
उद्भवश्च भवश्चाथ महादेवो महाद्युतिः ॥ ३१५ ॥
पञ्चमावरणस्याथ शतरुद्रदशादिगाः ।
कपालीशोऽग्निरुद्रश्च याम्यो निर्ऋतिसंज्ञकः ॥ ३१६ ॥
बलः शीघ्रो निधीशश्च विद्याधिपतिरष्टमः ।
एतेऽष्टदिक्स्थव्यूहानामाधिदेवाः क्रमात् स्मृताः ॥ ३१७ ॥
द्वारशोभोपशोभादौ विघ्नेशा रक्षकाः स्थिताः ।
पाद्येनेदंविष्णुराद्यादापोहिष्ठेत्यनन्तरम् ॥ ३१८ ॥
आपः पुनन्त्वित्यर्घ्येण चाग्निमीळेति गव्यतः ।
इषेत्वेति घृतेनापि मधुना मधुवाततः ॥ ३१९ ॥
आप्यायस्वेति दुग्धेन दधिक्राव्णादिना दधि ।
उपत्वाग्नेतीक्षुरसान्मानस्तोकात् करम्भकैः ॥ ३२० ॥
अश्वावत्या कषायाद्भिः सुमित्रानेति लाजकान् ।
अग्न आयाहि धानाभिः पुष्पावत्या तु पुष्पकैः ॥ ३२१ ॥
समुद्रज्येष्ठतश्चापि ब्रह्मजज्ञानतोऽपि च ।
हरिद्राद्भिश्च सक्तवद्भिरभिषिञ्चेन्महेश्वरम् ॥ ३२२ ॥
रक्षोहणेन सिद्धार्थैः शन्नोदेव्या तिलाम्भसा ।
वास्तोष्पतेतिशाल्यद्भिर्दूर्वाद्भिश्चायनेति वै ॥ ३२३ ॥
पद्माम्भोभिः श्रियैजातात् त्रिष्टुभा चोत्पलाम्बुभिः ।
आशुश्शिशानआद्येन स्नापयेन्मृत्तिकाम्बुभिः ॥ ३२४ ॥
श्रीसूक्ताद् गन्धतोयैस्तु कद्रुद्रेण फलाम्बुभिः ।
चमकेन तु धान्याद्भिः साराद्भिः पौरुषेण तु ॥ ३२५ ॥

आपोराजानमाद्येन स्नपयेद् रत्नवारिभिः।
त्रैयम्बकेन भस्माद्भिरिमां रुद्राय कूप(पै? जैः) ॥ ३२६ ॥
कनिक्रदाद्यल्लोहाद्भिरीशानान्निर्झराम्बुभिः।
पुरुषेण तटाकाद्भिरघोरेण समुद्रगात् ॥ ३२७ ॥
वामदेवेन नद्यद्भिरजातेन ह्रदाम्बुभिः।
तीर्थैरिमं मे गङ्गेति गन्धद्वारेति गोमयात् ॥ ३२८ ॥
ओषध्यद्भिस्तु रुद्रेण स्वस्त्याद्येनाङ्कुराम्बुभिः।
पवमानैः कुङ्कुमाद्भिः सावित्र्या घनसारकैः ॥ ३२९ ॥
हिरण्यवर्णाः शुचय इत्याद्येन कुशाम्भसा।
यासां राजेति मन्त्रेण बिल्वपत्राब्जवारिभिः ॥ ३३० ॥
यासां देवेति मन्त्रेण गोमूत्रेणाभिषेचयेत्।
शिवेन मा चक्षुषेति स्नपयेत् पल्लवाम्बुभिः ॥ ३३१ ॥
स्नपयेद् धातुसलिलैः पवमानःसुवर्जनात्।
जातवेदःपवित्राद्यैरनुवाकान्ततः क्रमात् ॥ ३३२ ॥
यवमाषादिभिश्चूर्णैः स्नपयेद् घर्षयेत् तथा।
अम्भस्यपार इत्याद्याद्भैमाप्तसलिलैरपि ॥ ३३३ ॥
तरत्समन्दीत्याद्येन रुद्राक्षसलिलैस्ततः।
अभिषिञ्चेन्महादेवं पुष्पधूपजलान्तरम् ॥ ३३४ ॥
प्रारभ्य गर्भावरणादाबाह्यावरणान्तकम्।
क्रमेण दिग्विदिग्योगात् कलशैः स्नपयेच्छिवम् ॥ ३३५ ॥
एकैकावरणव्यूहनवकस्नपनादनु।
स्नपयेच्छिवगायत्र्या सपुष्पैः शीतवारिभिः ॥ ३३६ ॥
पुष्पधूपार्चितं कृत्वा स्नपयेच्च पुनः पुनः।
आसमाप्तेस्तु कुम्भानां स्नपयित्वोदितक्रमात् ॥ ३३७ ॥
मार्जयेन्मार्जनद्रव्यैरीशानेन तु चोदितैः।
ब्राह्मीं च वैष्णवीं रौद्रीं विमलां च कृताञ्जलिम् ॥ ३३८ ॥
रजनीं सहदेवीं च शिरीषं सूर्यवर्तिनीम्।
सदाभद्रां कुशाग्राणि मिलित्वा मार्जयेच्छिवम् ॥ ३३९ ॥

पञ्चाशद्दर्भकूर्चेन शन्नइन्द्रादिना ततः ।
संप्रोक्ष्य स्नपयेच्चाद्भिः कुर्यान्नीराजनं ततः ॥ ३४० ॥
शालिपिष्टादिविहितैर्हैमामत्रादिषु क्रमात् ।
देवाष्टमङ्गलैश्चान्यैर्लोकपालायुधैरपि ॥ ३४१ ॥
उच्चैः पिष्टप्रदीपैश्च दूर्वासिद्धार्थपङ्कजैः ।
दध्यक्षतैश्च सुन्यस्तैः पुंसा नीराजयेद् विभुम् ॥ ३४२ ॥
संगीतनृत्तवादित्रैः शङ्खकाहलगोमुखैः ।
तिमिलानकभेर्याद्यैर्निनदद्भिरनारतम् ॥ ३४३ ॥
वेदघोषैश्च मूर्च्छद्भिर्जयशब्दादिमङ्गलैः ।
नीराज्य तद्वत् स्नपयेत् ततो मध्यघटेन तु ॥ ३४४ ॥
अभिषिच्याथ शुद्धेन वाससा परिमार्जयेत् ।
ततः सुसूक्ष्मैरहतैरौ(क्ष्णैः ? र्णैः) कार्पासिकैरपि ॥ ३४५ ॥
परिधाप्य च मूलेन पाद्यं दद्यादथेशतः ।
हृदयेन सुखेष्वर्घ्यं नेत्रेणाचमनं तथा ॥ ३४६ ॥
दत्त्वा विभूषणैर्हैमैर्नानारत्नविचित्रितैः ।
मकुटाद्यैर्यथाशोभं पिण्डिकाभूषणान्तकैः ॥ ३४७ ॥
आभूषयेत् तु वस्त्रेण रूपिणाचामयेदपि(?) ।
चन्दनेन सुपिष्टेन सकर्पूरहिमाम्भसा ॥ ३४८ ॥
कुङ्कुमागरुमिश्रेण लिम्पेद् गन्धेन वामतः ।
पुष्पैरपि च मालाभिरलङ्कुर्यादजाततः ॥ ३४९ ॥
असितागरुकर्पूरपूरैस्तु सितयान्वितैः ।
धूपयेच्छिखया शम्भुं दीपं दद्याच्च वर्मतः ॥ ३५० ॥
सकर्पूरदशैर्दीपैः सुगन्धाद्यैः प्रदीपितैः ।
आरात्रिकमथास्त्रेण भ्रमयित्वावतारयेत् ॥ ३५१ ॥
नैवेद्यमथ सुस्वादु सिद्धं कलशसम्मितैः ।
शालिजैस्तण्डुलप्रस्थैस्ततोऽर्धैर्वाप्यतोऽर्धतः ॥ ३५२ ॥
श्रेष्ठादिकं निवेद्यं स्यात् तद्युक्ताज्याधिकप्लुतम् ।
पायसं चाथ दध्यन्नं सहरिद्रं सुसाधितम् ॥ ३५३ ॥

कृसरान्नं गुलान्नं च मुद्गान्नं च यथाक्रमम् ।
ईशानादिमुखाग्रेषु प्राज्याज्याक्तं निवेदयेत् ॥ ३५४ ॥
सर्वत्र दधिमध्वाज्यसितोपलरसोत्तरम् ।
ससूपं सूपदंशाढ्यं समूलफलमोदकम् ॥ ३५५ ॥
निवेदयीत शर्वाय तोयं शीतं सुगन्धि च ।
लवङ्गजातितक्कोलकर्पूरैलान्वितं जलम् ॥ ३५६ ॥
हस्तावसेचनं दत्त्वा प्रदायाचमनं तथा ।
सजातिफलतक्कोलकर्पूरक्रमुकान्वितम् ॥ ३५७ ॥
ताम्बूलं विनिवेद्याथ स्तुत्वा नत्वा च भक्तितः ।
शिवं प्रदक्षिणीकृत्य चाग्निं संरुध्य वै क्रमात् ॥ ३५८ ॥
वह्निस्थं च शिवं कुम्भे कुम्भस्थं हृदि योजयेत् ।
विसृज्य द्वारलोकेशान् भोजयेद् गुरुमूर्तिपान् ॥ ३५९ ॥
अध्येतृन् परिचारांश्च ब्राह्मणान् लिङ्गिनस्तथा ।
दीनान्धकृपणादींश्चाप्यन्यानन्नार्थिनो जनान् ॥ ३६० ॥
मृष्टान्नाज्यैस्तु सन्तोष्य प्रतिष्ठोक्तक्रमेण तु ।
तोषयेद् दक्षिणाभिश्च वसनाभरणादिभिः ॥ ३६१ ॥
गोभिर्ग्रामैर्गजाश्वाद्यैः सन्तर्प्याथ प्रसन्नधीः ।
यजमानः सहाचार्यः क्षालिताङ्घ्रिकराननः ॥ ३६२ ॥
स्वाचान्तोऽन्तः प्रविश्येशं नमस्कृत्य प्रसाद्य च ।
सगन्धदूर्वाकुसुमं जलं संगृह्य पाणिना ॥ ३६३ ॥
स्नपनार्चनदानादेः फलं निरवशेषतः ।
निवेदयीत शर्वाय श्लोकेनानेन पादयोः ॥ ३६४ ॥

ओं

वित्तशाठ्यविहीनेन भक्त्या शक्त्यनुरूपतः ।
स्नपितः पूजितश्च त्वं दत्तं देयं च यन्मया ॥ ३६५ ॥
तत् सर्वं मम देवेश ! प्रसन्नस्त्वं सहाम्बया ।
प्रतिगृह्णीष्व तच्चेदं ममास्तु फलसाधकम् ॥ ३६६ ॥

इत्यर्पयेद् बुभुक्षुश्चेन्मुमुक्षुरपि तत् तथा ।
त्वत्प्रसादेन कर्मेदं मास्तु मे नाथ! बन्धकम् ॥ ३९७ ॥

इति देवस्य पादाब्जद्वये कर्म समर्पयेत् ।

इति ह निगदितोऽयं शैवसिद्धान्तसिद्धो
दशशतकलशादिर्नन्दकुम्भावसानः ।
स्नपनविधिरुदारः श्रीमतश्चन्द्रमौले-
रभिमतपुरुषार्थप्रार्थनाकल्पवृक्षः ॥ ३९८½ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे क्रियापादे
स्नपनपटलः पञ्चाशत्तमः ॥

अथैकपञ्चाशः पटलः ।

अथ सूर्यादिदेवानां प्रतिष्ठा पूर्वमेव हि ।
शिवलिङ्गप्रतिष्ठायां समासात् सम्प्रदर्शिता ॥ १ ॥

कर्षणाद्युत्सवान्तं यत् प्रोक्तं कर्मात्र तत् समम् ।
तत्त्वमूर्त्यादिविन्यासक्रमः सर्वत्र वै समः ॥ २ ॥

सूर्यविघ्नेश्वरस्कन्दा हरनारायणस्तथा ।
दुर्गागौरीसरस्वत्यः शास्ता काली च मातरः ॥ ३ ॥

धामस्तु क्षेत्रपालश्च शिवाङ्गत्वेन वा पृथक् ।
एते सर्वे प्रतिष्ठाप्याः पूज्याश्चैव पृथक् पृथक् ॥ ४ ॥

एतेषां मूर्तिमूर्तीशमन्त्रावरणभेदतः ।
प्रतिष्ठाद्यं समासेन यथावदथ कथ्यते ॥ ५ ॥

सूर्यस्य मन्त्राः पूजा च प्रागेव समुदाहृताः ।
तत्प्रतिष्ठाविधौ बेरं स्यान्मुख्यं दशतालतः ॥ ६ ॥

प्रतिमालक्षणोक्तैस्तु मानोन्मानादिभिर्युतम् ।
चित्रादिकं तद्धेमादिलोहरत्नशिलामयम् ॥ ७ ॥

तस्याधिवासने प्राग्वन्मण्डपे तोरणानि तु ।
विभूतिर्विमलस्तार आराध्यश्चेति पूर्वतः ॥ ८ ॥

प्रत्यूषश्च प्रभासश्च प्रद्योता द्योतनस्तथा ।
दण्डी च पिङ्गलश्चण्डस्तीव्रश्च द्वारपालकाः ॥ ९ ॥
प्राग्याम्याप्यैन्दवद्वार्षु द्वौ द्वौ कलशगौ यजेत् ।
लोकेशास्त्राङ्किताः पूज्या ध्वजास्तदधिदेवताः ॥ १० ॥
ततो विकिरविक्षेपात् सूर्यकुम्भास्त्रयोर्भ्रमात् ।
मण्डपं परिगृह्याथ लोकेशान् कुम्भगान् यजेत् ॥ ११ ॥
प्राग्वदाकारशुद्धिं च कृत्वा नयनमोक्षणम् ।
स्वमूलाङ्गैस्ततः कुर्याज्जले चाप्यधिवासनम् ॥ १२ ॥
ग्रामप्रदक्षिणादूर्ध्वं प्राग्वद् भावनमण्डपे ।
कलशैः स्नपयेत् प्राग्वत् पूरितैः सप्तसप्तकैः ॥ १३ ॥
अघमर्षणसूक्तेन चासत्येनादिना ततः ।
उद्यन्नद्यादिना चापि पवमानैस्तथा क्रमात् ॥ १४ ॥
ततः खषोल्किमूलाङ्गैः सावित्र्याष्टाक्षरेण च ।
दशप्रणवगायत्र्या मध्येन त्वभिषेचयेत् ॥ १५ ॥
इष्ट्वा प्रवेशयेद् देवमधिवासनमण्डपे ।
शयने शाययेत् प्राग्वन्निद्राकुम्भं च विन्यसेत् ॥ १६ ॥
ऐशान्यां सूर्यकुम्भास्त्रे देवकुम्भांश्चतुर्दिशम् ।
न्यसेच्चात्मादितत्त्वानि जानुकण्ठशिरोवधि ॥ १७ ॥
ब्रह्मादिभागेष्वृग्वेदयजुस्सामगुणान्वितम् ।
मण्डलं पुरुषं चापि रश्मीन् भागत्रये क्रमात् ॥ १८ ॥
मूर्तिद्वादशकं चापि त्रिषु भागेषु विन्यसेत् ।

तद्यथा —

भूम्यप्तेजोमरुद्व्योममनोहङ्कारबुद्धयः ॥ १९ ॥
प्रकृतिः पुरुषः कालः परमात्मा च मूर्तयः ।
धातार्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ॥ २० ॥
पूषा विवस्वान् पर्जन्यः सविता चेन्द्र एव च ।
विष्णुश्च मूर्तिपास्त्वेते द्वादशैवाथ शक्तयः ॥ २१ ॥
दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा ।
अमोघा विद्युता चैव कथिता सर्वतोमुखी ॥ २२ ॥

प्रभा सन्ध्या च संज्ञा च शक्तयस्ताश्च विन्यसेत् ।
स्वाङ्गमूलखषोत्कैश्च सावित्र्या मूर्तिमूर्तिपैः ॥ २३ ॥
शक्तिभिश्चापि जुहुयुः प्राग्वत् कुण्डेषु मूर्तिपाः ।
पालाशार्कसमित्सर्पिश्चरुलाजतिलाक्षतैः ॥ २४ ॥
सिद्धार्थैः सर्वधान्यैश्च हुत्वाज्येन पुनः शतम् ।
हुत्वा सम्पातिताज्येन शान्तिकुम्भजलैरपि ॥ २५ ॥
संसिच्य त्रिषु भागेषु स्पृशेयुर्गुरुमूर्तिपाः ।
पीठे चापि क्रियाशक्तिं संस्मृत्य विनियोजयेत् ॥ २६ ॥
अनुक्तं च यथापूर्वं कर्म कृत्वाधिवास्य तु ।
प्रातः स्नानादिकं कृत्वा गर्भागारं प्रविश्य तु ॥ २७ ॥
लग्ने कूर्मशिलां न्यस्येत् तस्याः पूर्वक्रमेण तु ।
रत्नादिपञ्चवर्गांस्तु विन्यस्येष्ट्वाभिमन्त्रयेत् ॥ २८ ॥
ओं नमो व्यापिनीत्यादिमन्त्रमन्तर्जपन् गुरुः ।
आधारशक्तिमावाह्य संपूज्य विधिना ततः ॥ २९ ॥
क्रियाशक्त्यात्मकं पीठं तस्यास्तूपरि विन्यसेत् ।
ततो मुहूर्ते संप्राप्ते स्थापको मूर्तिपैः सह ॥ ३० ॥
प्रणवेन क्रियाशक्तौ पीठे बेरं ततो रवेः ।
ज्ञानशक्त्यात्मकं ध्यायन् स्थापयेत् प्रणवाणुना ॥ ३१ ॥
साङ्गमूलं खषोत्कं तु हंसं तद्धृदि विन्यसेत् ।
दशप्रणवगायत्र्या सावित्र्या चाभिमन्त्रयेत् ॥ ३२ ॥
स्थिरीकृत्याष्टबन्धेन बेरं प्रक्षाल्य वारिभिः ।
निद्राकुम्भेनाभिषिञ्चेत् किञ्चिच्छान्त्युदकैरपि ॥ ३३ ॥
अर्घ्यपञ्चामृतैश्चापि जलधूपान्तरैः क्रमात् ।
प्रक्षाल्य यवचूर्णाद्यैः कुम्भास्त्रसलिलैस्ततः ॥ ३४ ॥
वेदकुम्भैश्चाभिषिञ्चेच्छान्तिकुम्भं न्यसेदपि ।
शेषं कर्म यथापूर्वं स्वमन्त्रेण समापयेत् ॥ ३५ ॥
आत्मतत्त्वादि विन्यस्य मूर्तौ प्राग्वद् विधाय तु ।
स्यात् प्रभूतासनं पीठं विभूतिविमलादिकाः ॥ ३६ ॥

पीठस्य पादाश्चत्वारो मध्ये ध्येया प्रबोधिनी ।
दीप्तादिशक्तीश्चाराध्य मण्डले पुरुषं रविम् ॥ ३७ ॥

ध्यात्वा मूलाङ्गविन्यासं कृत्वा न्यस्येत् तथाध्वनः ।
मूलोऽङ्गानि खषोल्कश्च तथा सदशतारका ॥ ३८ ॥

गायत्री चैव सावित्री मन्त्राध्वा कथितो रवेः ।
दशप्रणवगायत्र्यास्तत्त्वसंख्यापदानि तु ॥ ३९ ॥

पदाध्वा तस्य निर्दिष्टः शेषाध्वानो यथापुरम् ।
विभाव्यैवं तु तन्मूर्तौ हृदि हंसं सतारकम् ॥ ४० ॥

विन्यस्यार्घ्यादिभिर्देवमुपचारैस्तु पूजयेत् ।
अथाचार्यः स्वकुण्डेऽग्नावमीभिर्जुहुयाद् घृतम् ॥ ४१ ॥

स्थिरोऽथ व्यापकस्तद्वदप्रमेयस्ततः परम् ।
अनादिबुद्धो नित्यश्च ततः स्यादपि निश्वरः ॥ ४२ ॥

नित्यतृप्तश्च सप्तान्ते भवस्वाहेति योजिताः ।
मन्त्राः स्युरेभिर्हुत्वाज्यमेभिर्देवं ततः स्पृशेत् ॥ ४३ ॥

सहस्रं वा तदर्धं वा शतं वा जुहुयाद् घृतम् ।
अङ्गमूलखषोत्काद्यैर्मन्त्रैर्व्याहृतिभिस्तथा ॥ ४४ ॥

हुत्वा पूर्णां च संपूज्य लोकपालायुधादिभिः ।
नीराज्य स्नपयेत् प्राग्वन्निवेद्यान्तं यजेदपि ॥ ४५ ॥

विभाव्य देवं तन्मूर्तौ सान्निध्यं प्राथ्य मन्त्रतः ।
निशि भूतबलिं दत्त्वा यथापूर्वं दिनत्रयम् ॥ ४६ ॥

नीत्वा चतुर्थदिवसे हुत्वाग्नीनस्य मन्त्रतः ।
सावित्र्या चैव गायत्र्या पृथगष्टोत्तरं शतम् ॥ ४७ ॥

हुत्वा जयादीनाज्येन प्रायश्चित्ताहुतीरपि ।
पूर्णां च हव्यवाहाद्यात्

हव्यवाहमित्यनूच्य स्विष्टमग्न इति याज्यया जुहोतीति यावत् ।

ततोऽग्नीन् स्वहृदम्बुजे ॥ ४८ ॥

[2]नियोज्य तेजश्चण्डं तु निर्माल्यैरीशगोचरे ।
यजेत् त्रिनेत्रं पिङ्गाक्षं रक्तं रक्ताम्बरादिकम् ॥ ४९ ॥

---

१. 'चारस्य कृ', २. 'नणिवज्य' ख. पाठः.

चतुर्भुजं धृताम्भोजं यजेत् सवरदाभयम् ।
ततस्तु कलशैर्देवमभिषिच्योक्तमार्गतः ॥ ५० ॥
दक्षिणाश्च प्रदेयानि दत्त्वा पूर्वोदितक्रमात् ।
ततो नित्यविधानेन विभवानुगुणेन तु ॥ ५१ ॥
पूजां प्रवर्तयेत् सम्यक् त्रिसन्ध्यं सोपचारकम् ।

सूर्यप्रतिष्ठाधिकारः ।

नित्योत्सवे तु सूर्यस्य द्वारस्थौ चण्डपिङ्गलौ ॥ ५२ ॥
लोकेशस्थानगास्त्वष्टौ ग्रहाः सोमादयः क्रमात् ।
मातरश्चैव दुर्गा च तेजश्चण्डश्च दिग्गताः ॥ ५३ ॥
अरुणो मण्डपस्याग्रे सप्तच्छन्दस्तुरङ्गमाः ।
स्वाख्याभिस्ते च पूज्याः स्युर्गायत्र्युष्णिगनुष्टुभः ॥ ५४ ॥
बृहती पङ्क्तिस्त्रिष्टुब्जगती च यथाक्रमम्(?) ।
अन्तःस्थौ गोपुरद्वाःस्थौ पक्षौ शुक्लासितौ येजत् ॥ ५५ ॥
तथैव तद्बहिःस्थावप्ययने दक्षिणोत्तरे ।
निक्षिप्यैषां बलिं दत्त्वा बलिपीठाद् बहिः स्थितः ॥ ५६ ॥
आवाहयेद् बलिभुजः सर्वान् सूर्यगणान् गुरुः ।
ये समस्तं जगद् व्याप्य तिष्ठन्ति बलिकाङ्क्षिणः ॥ ५७ ॥
सूर्यपारिषदाः सर्वे गृह्णन्तु बलिमुत्तमम् ।
इति ।
ततो द्वादशराशिभ्यो यथास्थानं प्रदक्षिणम् ॥ ५८ ॥
मेषादिभ्यो बलिं दद्यान्मासेभ्यश्चापि तैः सह ।
मधुमाधवशुक्रेभ्यः शुचये नभसे तथा ॥ ५९ ॥
नभस्याय तथेषोर्जसहोभ्यश्च ततः परम् ।
सहस्यायाथ तपसे तपस्याय बलिं क्षिपेत् ॥ ६० ॥
ततस्तु बलिपीठस्य परितोऽष्टदिशास्वपि ।
क्षिपेद् गणानामष्टानां स्वाख्यागणनमोन्तकम् ॥ ६१ ॥
गन्धर्वाश्चासुरगणाः पितृरक्षोगणास्ततः ।
नागा मरुद्गणास्तद्वद् यक्षभूतगणास्तथा ॥ ६२ ॥

---

1. 'तिः'(?) ख. पाठः.

पद्मपत्रे ऋषिगणाः स्थिताः + + + + + + ।
स्वाख्याभिरेतान् संपूज्य बलिं चैषां विनिक्षिपेत् ॥ ६३ ॥

नित्योत्सवविधिः ॥

महोत्सवे तु शैवोक्तमार्गेणारोपयेद् ध्वजम् ।
पताकां चारुणाश्वाङ्कां गणांश्चावाह्य पूर्ववत् ॥ ६४ ॥
सन्धिस्थांश्च तथा देवानङ्करार्पणपूर्वकम् ।
उत्सवं कारयेत् प्राग्वदुत्तमादिक्रमेण तु ॥ ६५ ॥
बलिप्रक्षेपमन्त्रैस्तु सूर्यपार्षदान्तकैः ।
येभूताद्यैर्यथापूर्वमिष्ट्वा तेभ्यो बलिं क्षिपेत् ॥ ६६ ॥
नित्योत्सवोक्तविधिना प्रक्षिप्य परितो बलिम् ।
वैशेषिके[1] (च ? ण) विधिना राशिबाह्ये क्षिपेद् बलिम् ॥ ६७ ॥
इन्द्रादिलोकपालेभ्यस्तदस्त्रेभ्यश्च बाह्यतः ।
ऐन्द्र्यां दिशि गणा ये तु वज्रहस्ता महाबलाः ॥ ६८ ॥
इत्यादिभिस्तु दिङ्मन्त्रैः परितो विकिरेद् बलिम् ।
ततस्तु बलिपीठस्थगणेभ्यः पूर्ववद् बलिम् ॥ ६९ ॥
क्षिप्त्वा स्नात्वा यथापूर्वमन्तर्देवं प्रवेशयेत् ।
कृत्वा कौतुकबन्धाद्यं तीर्थयात्रां च पूर्ववत् ॥ ७० ॥
स्वमन्त्रैर्विधिवत् कृत्वा स्नपनान्तं समापयेत् ।
इत्थं समासादिह सूर्यतन्त्रप्रोक्तं प्रतिष्ठादिकमुत्सवान्तम् ।
बिम्बादितन्त्रेषु यथोदितं तच्छैवोक्तमार्गेण समस्तमूह्यम् ॥ ७१ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे क्रियापादे
सूर्यतन्त्रपटल एकपञ्चाशः ॥

अथ द्विपञ्चाशः पटलः ।

अथ विघ्नेश्वरस्यापि बेरः स्यात् पञ्चतालतः ।
पूर्वोक्ता एव मन्त्राः स्युः प्रतिष्ठाकर्म शैववत् ॥ १ ॥
सूर्यप्रतिष्ठाविहितं क्रियाचक्रं यदेव हि ।
विघ्नेशादिप्रतिष्ठासु प्रायशः समभेव तत् ॥ २ ॥

---

[1] 'का' क. पाठः.

विशेषः कथ्यते सोऽयं विज्ञेयः स्यात् पृथक् पृथक् ।
तोरणा द्वारपालाश्च मूर्तिमूर्तीशशक्तयः ॥ ३ ॥
मन्त्राश्च परिवाराश्चाप्यध्वानः पदमन्त्रयोः ।
सुपूर्णः पूर्णभद्रश्च प्रशान्तो विजयस्तथा ॥ ४ ॥
पूर्वादि तोरणानि स्युर्लोकेशास्तैर्ध्वजाः स्मृताः ।
प्राचि कुण्डोदरो द्वाःस्थस्तद्वत् कुम्भोदरोऽपि च ॥ ५ ॥
विकटो वामनो याम्ये जयश्च विजयोऽम्बुपे ।
पूज्यौ द्वारेऽथ कौबेरे मेघनादमहोदरौ ॥ ६ ॥
कुम्भेषु पूजयेद् द्वाःस्थाँल्लोकपालांश्च कुम्भगान् ।
गणेशकुम्भं चैशान्यामस्त्रं चेष्ट्वा तयोर्भ्रमात् ॥ ७ ॥
अङ्कुशास्त्रं (गणेशस्युरस्त्रं ?) स्त्रीविग्रहं यजेत् ।
अधिवासस्नपनयोः क्रमात् स्वीकृत्य मण्डपौ ॥ ८ ॥
कृत्वाथ करशुद्धिं च नेत्रमोक्षं ततो जले ।
अधिवास्य पुरादेस्तु परिक्रम्य प्रदक्षिणम् ॥ ९ ॥
स्नपयेच्च प्रवेश्याथ शाययेच्चाधिवासयेत् ।
पृथ्व्याद्या मूर्तयः पञ्च मनोहङ्कारबुद्धयः ॥ १० ॥
मूर्तयोऽष्टौ गणेशस्य विघ्नेशाद्यास्तदीश्वराः ।
विघ्नो विनायको वीरः शूरो हस्तिमुखस्तथा ॥ ११ ॥
एकदन्तस्ततः क्षिप्रप्रसादोऽथ गणेश्वरः ।
तीव्रा च ज्वालिनी नन्दा भोगदा कामरूपिणी ॥ १२ ॥
उग्रा तेजोवती सन्ध्या नवमी विघ्ननाशनी ।
शक्तयः क्ष्मादिमूर्तीनां त्रिभागे विन्यसेदिमाः ॥ १३ ॥
क्रियाशक्तिं च तत्पार्श्वे तत्पीठे विन्यसेद् यजेत् ।
वेद्यामैशे तु कुम्भास्त्रे दिक्षु मूर्तीशकुम्भगान् ॥ १४ ॥
निद्राकुम्भं चोपधाने विन्यस्यैषां जुहोति च ।
गर्भागारं प्रविश्याथ शक्तिं कूर्मशिलां न्यसेत् ॥ १५ ॥
रत्नादि पीठं बेरं च प्रतिष्ठाप्य तु मूर्तिमत् ।
चैतन्यं सर्वगं सूक्ष्मं तद्बीजं हंससम्पुटम् ॥ १६ ॥

स्वहृद्व्योमाम्बुजानीतं विन्यसेत् तद्धृत्पङ्कजे ।
तन्मूर्तिमन्त्रं चाङ्गानि गणानांत्वादिकं तदा ॥ १७ ॥
गायत्रीं च गणेशस्य मन्त्राध्वानं च विन्यसेत् ।
विनायकाय विद्महे गजवक्त्राय धीमहि । तन्नो दन्ती प्रचोदयात् ।
पदानि विघ्नगायत्र्याः पदाध्वान्ये तु पूर्ववत् ॥ १८ ॥
षडध्वभावनां कृत्वा प्राग्वत् संस्नाप्य पूजयेत् ।
मन्त्रपादोदिता ये तु मन्त्रा विघ्नेश्वरस्य तु ॥ १९ ॥
मूर्तयोऽपि च कल्पोक्तास्तत्तद्धक्तैर्यथाविधि ।
तथातथा प्रतिष्ठाप्यास्तन्मन्त्रावरणादिभिः ॥ २० ॥
शक्तिकूर्मावनन्ताख्यपीठं धर्मादिकानपि ।
त्रिगुणार्कादिबिम्बेशब्रह्मविष्ण्वीशपङ्कजे ॥ २१ ॥
प्रथमावरणं स्वाङ्गैस्ततस्तीव्रादिशक्तिभिः ।
द्वितीयं मूर्तिपैश्चापि तृतीयं तु चतुर्थकम् ॥ २२ ॥
स्वस्थैस्तु पञ्चमं चाथ लोकेशैश्चायुधादिभिः ।
तत्तन्नाम्नां भवेदन्ते विघ्नपारिषदाय तु ॥ २३ ॥
तेषां पारिषदेभ्यश्च नमोन्तं विनियोजयेत् ।
संपूज्यैवं गणाधीशं स्थिराद्यैरथ सप्तभिः ॥ २४ ॥
हुत्वा स्पृ(श्ये?शे)द् यथापूर्वं प्रायश्चित्तं तु मूलतः ।
अङ्गैर्गणेशगायत्र्या गणानांत्वादिना ततः ॥ २५ ॥
मूर्तिलोकेशमन्त्रैश्च समिदाद्यैर्यथापुरम् ।
मध्याद्यग्निषु सर्वत्र हुत्वा नीत्वा दिनत्रयम् ॥ २६ ॥
चतुर्थदिवसे प्राग्वद् गायत्र्या च जयादिभिः ।
प्रायश्चित्तं च कृत्वा तु कर्म चापरिषेचनात् ॥ २७ ॥
गणचण्डं समाराध्य वह्नीन् संहृत्य चात्मनि ।
उद्वास्य कुम्भलोकेशद्वारपांस्तोरणध्वजान् ॥ २८ ॥
गणेशं स्नपनेनेष्ट्वा दक्षिणाद्यं प्रदाय तु ।
बलिं विकीर्य रात्रौ तु यथाविभवमर्चनम् ॥ २९ ॥

नित्यपूजां च संकल्प्य कर्ताभीष्टं समश्नुते ।

गणेशप्रतिष्ठाधिकारः ।

नित्योत्सवे गणेशस्य द्वाःस्थाः कुण्डोदरादयः ॥ ३० ॥
लोकेशा वाहनं चाखुर्मातरश्च स्वदिग्गताः ।
भृङ्गीशः पश्चिमे वायौ तारो नागे तु चण्डिका ॥ ३१ ॥
भल्लाटे तु गुहः सोमे श्रीदेव्यैशेऽङ्कुशी स्मृतः ।
गणचण्डश्च तत्रैतान् संपूज्य विकिरेद् बलिम् ॥ ३२ ॥
गोपुरद्वार्यधश्चण्डप्रचण्डौ दक्षिणोत्तरे ।
गङ्गा च यमुना चोर्ध्वे द्वारश्रीर्मध्यगोपरि ॥ ३३ ॥
ता एता देवताः पूज्या बलिं चासां विनिक्षिपेत् ।
ततस्तु मध्यहारायामष्टदिक्षु गणेश्वराः ॥ ३४ ॥
वज्रदन्तो गजास्यश्च भीमश्च महिषाननः ।
मेघनादो विरूपाक्षो विकटो बहुभक्ष्यभुक् ॥ ३५ ॥
एते कोटिगणाधीशाः संपूज्यैषां बलिं क्षिपेत् ।

अथ बलिपीठे

प्रागादि गजवक्त्रश्च विघ्नेशगणनायकौ ॥ ३६ ॥
चण्डविक्रमकृद् विघ्नकरो भुजगमेखलः ।
शूर्पकर्णो नागदन्तो रुद्रवक्त्रो(द्)भवस्ततः ॥ ३७ ॥
गणसेनश्च दशमस्तेषां पीठे बलिं क्षिपेत् ।

ओं नमः सर्वविघ्नपार्षदेभ्यस्तत्पार्षदेभ्यो नमः इति मध्येऽन्नमशेषं जलपुष्पान्वितं पीठोपरि प्रक्षिपेत् ।

नित्योत्सवविधिस्तुल्यस्तुल्यश्चैष महोत्सवे ॥ ३८ ॥
विशेषस्तु ध्वजे पूज्यो मूषिकः स्यात् स्वमन्त्रतः ।

ओं मूं मूषिकाय नमः इति ।

यथापूर्वं गणान् सर्वानावाह्य विकिरेद् बलिम् ॥ ३९ ॥
गणेशपरिषन्नाम्ना तदा पारिषदान्तकम् ।
वज्रदन्तादिकानां च बाह्ये दशदिशास्वपि ॥ ४० ॥

ऐरावतं पुण्डरीकं कुमुदाञ्जनवामनान् ।
पुष्पदन्तं सार्वभौमं सुप्रतीकं च दिक्क्रमात् ॥ ४१ ॥
तारादिभिर्नमोन्तैश्च नामभिः प्राग्वदर्चयेत् ।
ऐन्द्यां दिशि गणा ये तु वज्रहस्ता महाबलाः ॥ ४२ ॥
इत्यादिभिः क्रमान्मन्त्रैर्विघ्नपारिषदान्तकैः ।
नमोन्तैर्विकिरेद् रात्रौ भूतक्रूरेण वै बलिम् ॥ ४३ ॥
तीर्थस्नानं यथापूर्वं कारयेत् स्नपनं तथा ।
मन्त्रास्तु स्नपने शैवकथिताः स्वाङ्गमूलतः ॥ ४४ ॥
गायत्र्या च गणानांत्वेत्यादिना मध्यकुम्भतः ।
अभिषिञ्चेद् गणाधीशमुपचारैर्यथोदितैः ॥ ४५ ॥
लभन्ते पूर्वकथितं यजमानादयः फलम् ।
एवं समासेन गणेशतन्त्रं तन्त्रान्तरोक्तं प्रविचार्य सम्यक् ।
प्रोक्तं प्रतिष्ठादिकमुत्सवान्तं शैवानुसारेण तु तद्विधेयम् ॥ ४६[1] ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे क्रियापादे
गणेशतन्त्रपटलो द्विपञ्चाशः ॥

अथ त्रिपञ्चाशः पटलः ।

अथ स्कन्दप्रतिष्ठादौ कर्म शैवसमं स्मृतम् ।
विशेषाश्चापि ये तत्र लिख्यन्ते तन्त्रचोदिताः ॥ १ ॥
कनिष्ठदशतालेन स्कन्दस्य प्रतिमा स्मृता ।
प्राग्वच्चित्रादिभेदेन शैली लोहमयी तथा ॥ २ ॥
मृन्मयी रत्नजा तस्य स्थितासीना तथा भवेत् ।
मयूरवाहना वा स्यात् षण्मुखी षण्मुखस्य तु ॥ ३ ॥
सनत्कुमारस्कन्दादीनेकवक्त्रांस्तु कारयेत् ।
चतुर्भुजान् वा द्विभुजान् द्विनेत्रानेव कारयेत् ॥ ४ ॥
षण्मुखो द्वादशभुजो द्वादशाक्षः स्वलङ्कृतः ।
षड्भुजो वा चतुर्हस्तो मयूरस्थः स्थितोऽथवा ॥ ५ ॥

---

[1] 'त्र' ख. पाठः.

अभयं शक्तिशूलेषुकुलिशं चाङ्कुशं करैः ।
दक्षिणे धारयंस्तद्वत् कटिस्पर्शिवरप्रदम् ॥ ६ ॥
दण्डं च तोमरं चापं घण्टां पाशं च वामतः ।
अधोहस्तात् प्रभृत्यूर्ध्वं स्याद् द्वादशभुजो विभुः ॥ ७ ॥
अभयं पङ्कजं शक्तिं दक्षिणे वरतोमरे ।
कुलिशं षड्भुजो बिभ्रत् कर्तव्यः षण्मुखो विभुः ॥ ८ ॥
दक्षिणे पङ्कजं शक्तिं मातुलुङ्गं च वामतः ।
पाशं च बिभ्रत् षड्वक्त्रस्त्वेकास्यो वा चतुर्भुजः ॥ ९ ॥
द्विभुजश्चेद् गुहः शक्तिकटिस्पृग्वरदान्वितः ।
शक्तिवज्रधरो वा स्याद् दण्डशक्तिधरोऽथवा ॥ १० ॥
प्रसन्नवदना रक्ता रक्ताकल्पविभूषिताः ।
मौलिकुण्डलहाराद्यैर्युक्ताः स्युः स्कन्दमूर्तयः ॥ ११ ॥
एका मूर्तिस्त्वेकबेरे प्रतिष्ठाप्या भवेद् यदा ।
बहुबेरे प्रतिष्ठाप्याः षड् वा द्वादश मूर्तयः ॥ १२ ॥
वरदश्च यशोदश्च पुष्टिदः श्रीप्रदः क्रमात् ।
प्रागादि तोरणानि स्युर्लोकेशाख्याङ्किता ध्वजाः ॥ १३ ॥
वीरसेनमहासेनौ भद्रसेनसुषेणकौ ।
चारुसेनश्च सेनानीः पूर्णसेनस्ततः परम् ॥ १४ ॥
चित्रसेनश्च कुम्भस्था द्वौ द्वौ द्वाःस्थास्तु पूर्वतः ।
प्रतिद्वारं लाजकुम्भौ बीजाङ्कुरघटावपि ॥ १५ ॥
निधाय विकिरक्षेपात् कुम्भास्त्रे पूजयेदपि ।
दूर्वाकुशाग्रमाषाश्च व्रीहयस्तण्डुलास्तिलाः ॥ १६ ॥
सिद्धार्थास्तुलसी चेति स्कन्दस्य विकिराः स्मृताः ।
कुम्भे स्कन्दं मयूरास्त्रं कुक्कुटेऽस्त्रं च वर्धनीम् ॥ १७ ॥
इष्ट्वा प्राग्वत् परिभ्रम्य प्राग्वत् स्वीकृत्य मण्डपम् ।
विशोध्य रत्नाकरं नेत्रमोक्षं तोयाधिवासनम् ॥ १८ ॥
ग्रामभ्रमं च स्नपनं शयनं च विधाय तु ।
वेद्यां कुमारकुम्भास्त्रे मूर्तिकुम्भांश्च षण् न्यसेत् ॥ १९ ॥

निद्राकुम्भं चोपधाने संपूज्याथाधिवासयेत् ।
आत्मादितत्त्वभागेषु ब्रह्मादींस्त्रिगुणान्वितान् ॥ २० ॥
क्ष्माद्याः पञ्चाप्यहङ्कारो मूर्तयः षड् गुहस्य तु ।
सनत्कुमारः स्कन्दश्च विशाखः षण्मुखस्तथा ॥ २१ ॥
नैगमेषो हेमचूडः षडेते मूर्तिपाः स्मृताः ।
देवसेना देवयानी षष्ठी विद्या च कुक्कुटा ॥ २२ ॥
विजया चेति मूर्तीनां शक्तयः षड् यथाक्रमात् ।
मूर्तिमूर्तीशशक्तीस्तु त्रिभागेष्वपि विन्यसेत् ॥ २३ ॥
मध्ये च षट्सु कुण्डेषु गुरुर्मूर्तिधरास्तथा ।
मूलाङ्गमूर्तिमन्त्रैश्च जुहुयुः शक्तिभिस्ततः ॥ २४ ॥
पक्वं तु स्कन्दगायत्र्या मूलाङ्गैश्च शतं पृथक् ।
मन्त्रोद्धारे पूर्वमेव मूलमन्त्रः प्रदर्शितः ॥ २५ ॥
अङ्गानि चापि तेनैव गायत्री कथ्यतेऽधुना ।
महासेनश्चतुर्थ्यन्तो विद्महेतिपदं ततः ॥ २६ ॥
शक्तिहस्तश्चतुर्थ्यन्तो धीमहीति च तत्पदम् ।
नः स्कन्दश्च प्रकारान्ते चोदयात् तारपूर्विका ॥ २७ ॥
शक्तिभिर्मूर्तिभिश्चापि ततो द्वादशमूर्तिभिः ।
बाणः शाखो भद्रसेनः सेनानीश्च भवात्मजः ॥ २८ ॥
सुब्रह्मण्यः कार्त्तिकेयो गुहो वै कुक्कुटध्वजः ।
मयूरवाहनश्चैव गाङ्गेयश्च ततः परम् ॥ २९ ॥
देवसेनापतिश्चेति प्रोक्ता द्वादश मूर्तयः ।
तारादिभिस्तु स्वाख्याभिस्तन्मन्त्राः स्युर्नमोन्तकाः ॥ ३० ॥
स्वाहान्तैरेव जुहुयाच्चतुर्थ्यन्तं तु सर्वदा ।
मायूरखादिराश्वत्थप्लाक्षौदुम्बररौहिणाः ॥ ३१ ॥
समिधः स्युः षडग्नीनां पलाशा मध्यमे स्मृताः ।
आज्यं चरुं यवान् व्रीहीँल्लाँजसिद्धार्थसर्षपान् ॥ ३१ ॥
मायूरसमिधश्चापि सर्वत्र जुहुयुः क्रमात् ।
होमसम्पातिताज्येन शान्तिकुम्भाम्भसा तथा ॥ ३१ ॥

सिञ्चेयुः स्कन्दगायत्र्या भागेषु गुरुमूर्तिपाः ।
बाह्येऽथ मण्डपाद् दिक्षु मन्त्रैर्लोकेशदैवतैः ॥ ३४ ॥

समिदाज्यतिलाल्लाँजांश्चरुं च जुहुयुः पृथक् ।
नैर्ऋत्यां चापि वायव्यां बिल्वकाश्मरिसम्भवाः ॥ ३५ ॥

समिधो जुहुयाच्चाज्याच्चरुं चाष्टोत्तरं शतम् ।
बेरस्य वामतः पीठे क्रियाशक्तिं निधाय तु ॥ ३६ ॥

अधिवास्य ततः प्रातः कृतनित्यक्रियो गुरुः ।
गर्भागारं प्रविश्याथ लग्ने कूर्मशिलां न्यसेत् ॥ ३७ ॥

तत्रेष्ट्वाधारशक्तिं तु रत्नाद्यं वर्गपञ्चकम् ।
तस्यां विन्यस्य गर्तेषु मध्ये प्रागादिदिक्ष्वपि ॥ ३८ ॥

हैमं गजं मयूरं च शक्तिं वज्रं च कुक्कुटम् ।
पद्मं रसं च माणिक्यं मध्याद् बाह्ये क्रमान्न्यसेत् ॥ ३९ ॥

ऊर्ध्वं तस्यास्तथा पीठे क्रियाशक्तिं च विन्यसेत् ।
युवं वस्त्रादिनाच्छाद्य बहिर्निर्गत्य देशिकः ॥ ४० ॥

बेरं प्रवेश्य लग्ने तु गुरुर्मूर्तिधरैर्युतः ।
ध्रुवाद्यैरादिना पीठे प्रतिष्ठाप्य स्थिरं यथा ॥ ४१ ॥

ज्ञानशक्त्यात्मकं ध्यात्वा मूर्तिं विन्यस्य षण्मुखीम् ।
तस्यामावाहयेद् देवं मन्त्रैरेभिरनुक्रमात् ॥ ४२ ॥

ओं

आयाहि स्कन्द! भद्रं ते कुमार! शिवसम्भव! ।
मयूरवाहन! विभो इह वारणवाहन! ॥ ४३ ॥

सुब्रह्मण्य! नमस्तेऽस्तु कार्त्तिकेय! सुरेश्वर! ।
देवसेनापते! देव! असुरेन्द्रविमर्दन! ॥ ४४ ॥

शक्तिवज्रायुधधर! धृतदण्डवराङ्कुश! ।
सचक्रतोमर! विभो! असुरेन्द्रविमर्दन! ॥ ४५ ॥

आवाहयामि त्वां देवेत्यन्ते मूलाङ्गसंयुतम् ।
उच्चार्य स्वहृदम्भोजात् परं तेजो गुहात्मकम् ॥ ४६ ॥

नीत्वा व्योमाब्जमध्यस्थतेजस्यैक्यं ततोऽपि च ।
गृहीत्वा निष्कलान्तं तु मूलं हंसं च कीर्तयेत् ॥ ४७ ॥
आनीय नाडीमार्गेण मूर्तौ हृत्पङ्कजे न्यसेत् ।
व्योमाम्बुजं सुधाम्भोभिराप्लाव्याथ सचेतनाम् ॥ ४८ ॥
मूर्तिं ध्यात्वा हृदब्जेऽस्य मन्त्राध्वानं तु विन्यसेत् ।
मूलाङ्गानि च गायत्री मूर्तिमन्त्राश्च स स्मृतः ॥ ४९ ॥
पदानि स्कन्दगायत्र्याः पदाध्वान्ये तु पूर्ववत् ।
हृदि वक्त्रे तथा मूर्ध्नि नाभौ गुह्ये च पादयोः ॥ ५० ॥
षडध्वनो न्यसेत् सम्यग् विभाव्य तु यथाक्रमम् ।
मूर्तीशनिद्राकुम्भास्त्रैः स्नपयित्वा तु पूजयेत् ॥ ५१ ॥

तद्यथा —

स्नातस्तु सकलीकृत्य विघ्नं द्वारं च पूजयेत् ।
अस्त्रं क्षिप्त्वा प्रविश्यान्तर्देहल्यां तन्निधाय च ॥ ५२ ॥
वास्तुब्रह्मासनानीष्ट्वा तूपविश्याङ्गमूर्तिभिः ।
सकलीकृत्य कृत्वार्घ्यं शुद्धीः पञ्च विधाय तु ॥ ५३ ॥
सत्रिपुण्ड्रः सतिलकः सपुष्पकृतशेखरः ।
आधारशक्त्यनन्ताख्यमयूरासनगात्रगान् ॥ ५४ ॥
धर्मादीन् सूर्यबिम्बादिमण्डलेशांश्च कादिकान् ।
केसरेषु च विद्याद्याः शक्तीर्मध्ये च पूजयेत् ॥ ५५ ॥
विद्या शान्तिः स्मृतिर्मेधा प्रज्ञा कान्तिर्द्युतिर्धृतिः ।
व्यापिनी चेति पूर्वादिक्रमाल्ललितविग्रहाः ॥ ५६ ॥
देवसेना देवयानी देव्यौ दक्षिणवामयोः ।
दाडिमीकुसुमप्रख्ये यजेद् दिव्याम्बरादिकैः ॥ ५७ ॥
आसनं स्कन्दमूर्तिं च मन्त्रदेहं ततो गुहम् ।
क्रमादावाह्य मूर्त्यङ्गैः शक्तिभिः सकलीकृतम् ॥ ५८ ॥
अर्घ्याद्यैस्तु निवेद्यान्तैरुपचारैस्तु पूजयेत् ।
पत्रेष्वावरणं स्वाङ्गैः पत्राग्रे[1] मूर्तिमूर्तिपैः ॥ ५९ ॥

---

[1] 'ग्रैर्मू' ख. पाठः.

पीठप्रान्ते द्वादशभिर्मूर्तिभिः स्यात् तृतीयकम् ।
द्वाःस्थैश्चतुर्थं लोकेशैः पञ्चमं तु तदायुधैः ॥ ६० ॥
षष्ठमावरणं चैव यजेत् पञ्चोपचारकम् ।
ततः स्थिरादिभिः सप्तमन्त्रैर्हुत्वा स्पृशेद् गुहम् ॥ ६१ ॥
दिनत्रयं यथापूर्वं संपूज्याग्निं जुहोति च ।
चतुर्थदिवसेऽभ्यर्च्य धूर्तसेनं तु बेरगम् ॥ ६२ ॥
प्रतिष्ठाप्यैशकोणे तु शक्तिटङ्ककरं विभुम् ।
रक्ताकल्पं रक्तवर्णं निर्माल्यैरभिपूजयेत् ॥ ६३ ॥
प्रायश्चित्तं तु मूलाङ्गमूर्तिमन्त्रैश्च शक्तिभिः ।
हुत्वा तु स्कन्दगायत्र्या तिलाज्ये जुहुयात् पृथक् ॥ ६४ ॥
सहस्रमर्धं तु शतं हुत्वा चैव जयादिभिः ।
प्रायश्चित्तं स्विष्टकृतं हुत्वाग्नीन् हृदि संहरेत् ॥ ६५ ॥
विशेषस्नपनेनाथ श्रेष्ठाद्यन्यतमेन तु ।
यथोपपत्ति स्नपयेन्मन्त्रैः शैवोदितैः क्रमात् ॥ ६६ ॥
विधाय च महापूजां दद्याद् भूतबलिं निशि ।
दक्षिणाश्च प्रदेयानि दत्त्वा शक्त्या तु पूर्ववत् ॥ ६७ ॥
नित्यपूजामविच्छिन्नां ग्रामक्षेत्रधनादिभिः ।
संकल्प्य कर्ता पूर्वोक्तं पुष्कलं लभते फलम् ॥ ६८ ॥

स्कन्दप्रतिष्ठाधिकारः ।

स्कन्दनित्योत्सवे द्वाःस्थौ वज्रशक्तिधरौ पुरः ।
विघ्नविश्वेश्वरौ चाथ वीरसेनसुषेणकौ ॥ ६९ ॥
वज्रसेनश्च सेनानीर्द्वाःस्थौ पूर्वादितः क्रमात् ।
स्कन्दपारिषदान्ताः स्युर्लोकेशाः स्वस्वदिग्गताः ॥ ७० ॥
मयूरं मण्डपे मातॄः स्वस्थाने त्वर्गले विधुम् ।
धूर्तसेनं तथैशान्यां संपूज्यैषां बलिं हरेत् ॥ ७१ ॥
गोपुरद्वार्यग्निकेतुं सूर्यकेतुं च पूजयेत् ।
ततो निष्क्रम्य बाह्ये तु बलिपीठाग्रतः स्थितः ॥ ७२ ॥

ओं

ये समस्तं जगद् व्याप्य तिष्ठन्ति बलिकाङ्क्षिणः ।
+ + + + + + सर्वे गृह्णन्तु बलिमुत्तमम् ॥ ७३ ॥
अनेन तु स्कन्दगणान् सर्वानावाहयेदपि ।
ततस्तु बाह्यहारायामुन्माथादीन् गणेश्वरान् ॥ ७४ ॥
कोटिकोटिगणाध्यक्षानिष्ट्वा तेषां बलिं क्षिपेत् ।
उन्माथश्च प्रमाथश्च सुभासो भास्वरो मणि· ॥ ७५ ॥
सुमणिश्च तथा ज्योतिर्ज्वालजिह्वस्तथाष्टमः ।
ततस्तु दशमूर्तिभ्यो बलिपीठे बलिं क्षिपेत् ॥ ७६ ॥
परिघो विकटो भीम उत्क्रोशो वज्रवल्कलौ ।
दण्डहस्तौ वर्धनश्च कुमुदो नन्दनस्तथा ॥ ७७ ॥
स्कन्दसेनोऽथ दशमः पीठे पद्मस्य मध्यतः ।
नित्योत्सवे विधिश्चैष तुल्यश्च स्यान्महोत्सवे ॥ ७८ ॥
विशेषः कथ्यते तत्र मयूरं तु ध्वजे यजेत् ।

ओं मयूराय नमः । स्कन्दवाहनाय नमः ।

ततः स्कन्दगणान् सर्वान् प्राग्वदावाहयेद् गुरुः ॥ ७९ ॥

ओं

ये भूताः स्कन्दसेनाद्याः स्कन्दपारिषदेश्वराः ।
ते तृप्यन्तु मुदं यान्तु तेभ्यस्ताभ्यो नमो नमः ॥ ८० ॥
इत्यावाह्य स्कन्दगणान् प्रागाद्यष्टदिशास्वपि ।
कोटिकोटिगणेशाः स्युर्द्वात्रिंशत् स्युर्गणेश्वराः ॥ ८१ ॥
कुमुदः कुन्दरश्चाथ डम्बराडम्बरौ पुरः ।
वक्रोऽनुवक्रः सुमुखः सुव्रतो वह्निदिग्गताः ॥ ८२ ॥
सत्यसन्धः सुप्रभश्च शुभकर्मा च लाङ्गली ।
याम्येऽथ नैर्ऋते कालो बलश्चातिबलोऽलसः ॥ ८३ ॥
सुवर्चाश्चातिवर्चाश्च काञ्चनातिघनावपि ।
पश्चिमे त्वथ वायव्ये मेघमाली स्थिरस्तथा ॥ ८४ ॥
अतिस्थिरश्चोच्छ्रितश्च चतुर्थस्त्वतिथिप्रियः? ।
उदीच्यां मेघनादश्च संग्रहोन्माथविग्रहाः ॥ ८५ ॥

ऐशान्यां पुष्पदन्तश्च शङ्कुकर्णजयावपि ।
महाजयश्च चत्वारः कोटिकोटिगणेश्वराः ॥ ८६ ॥
एतेभ्यश्चाप्यथैतेषां परिषद्भ्यस्त्वनन्तरम् ।
स्कन्दपारिषदान्ते तु स्वाहान्तं तु बलिं क्षिपेत् ॥ ८७ ॥
उद्दिष्टदिवसान्ते तु कौतुकारम्भपूर्वकम् ।
तीर्थयात्रां च कुर्वीत यथापूर्वं निमन्त्र्य तु ॥ ८८ ॥

ओं

तीर्थयात्रा त्वया देव! श्वः कर्तव्या सुरेश्वर! ।
तत्र प्रतिसरारम्भं त्वमनुज्ञातुमर्हसि ॥ ८९ ॥
इत्यामन्त्र्य गुहं देवं शैवोत्सवविधानतः ।
तीर्थयात्रां स्वकैर्मन्त्रैः कृत्वा प्रतिनिवृत्य तु ॥ ९० ॥
अन्तः प्रवेश्य षड्वक्त्रं विशेषयजनादनु ।
निशि भूतबलिं दत्त्वा मुख्यादिस्नपनेन तु ॥ ९१ ॥
यथोपपत्त्या स्नपयेच्छैवस्नपनचोदितैः ।
मन्त्रैर्यथावद् विधिवन्महापूजां प्रवर्तयेत् ॥ ९२ ॥
पूर्वोक्तफलमाप्नोतीत्याह देवः स्वयं शिवः ।
इति प्रतिष्ठादिकमुत्सवान्तं षडास्यतन्त्रं तु यथावदुक्तम् ।
यथा बृहत्तन्त्रसुखेषु दृष्टं तदुक्तशैवानुगुणेन विद्यात् ॥ ९३½ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापादे स्कन्दतन्त्रपटलस्त्रिपञ्चाशः ॥

अथ चतुष्पञ्चाशः पटलः ।

हरनारायणस्याथ प्रतिष्ठाद्यं निगद्यते ।
मन्त्रश्च वान्तो विन्द्वन्तो ब्रह्माथाग्निश्च पञ्चमात् ॥ १ ॥
अन्तो दीर्घः सदीर्घोऽग्निर्वायुस्तादिश्च दीर्घयुक् ।
नमोन्तस्तु दशार्णः स्यात् तारशक्तिरवादिकः ॥ २ ॥
त्रयोदशाक्षरो ह्यस्यच्छन्दोऽतिजगती मता ।
ऋषिर्ब्रह्मास्य देवं तु देवो हरहरिः स्वयम् ॥ ३ ॥
दीर्घस्वरैः शक्तिबीजं नामजातियुतं च तत् ।
हृदाद्यङ्गानि षट् तेन शस्त्रान्तानि तु कल्पयेत् ॥ ४ ॥

तान्यङ्गुलीषु शैवोक्तक्रमाद् विन्यस्य मूलतः ।
व्यापकं च हृदादीनि स्वे स्वे स्थाने क्रमान्न्यसेत् ॥ ५ ॥

तारं च शङ्करायाथ विद्महे तदनन्तरम् ।
नारायणाय तस्यान्ते धीमहे तच्च नःपदम् ॥ ६ ॥

पुरुषश्च ततः प्रेति चोदयात्पदमन्ततः ।
हरनारायणस्यैवं गायत्री यजनोचिता ॥ ७ ॥

शक्तिश्रीकामबीजानि मूलस्यादौ नियोज्य तु ।
सर्वभूतात्मने चान्ते नमः स्याद् यजने मनुः ॥ ८ ॥

ईशादिकानि ब्रह्माणि मूर्धाद्यङ्घ्र्यन्तकं न्यसेत् ।
स्वे स्वे स्थाने हरार्धे च वासुदेवं तथान्यतः ॥ ९ ॥

सङ्कर्षणं च प्रद्युम्नमनिरुद्धं च केशवम् ।
मूर्धास्यहृत्सुगुह्याङ्घ्र्योर्हरेरर्धे न्यसेत् क्रमात् ॥ १० ॥

शैवोक्तं तु क्रियाचक्रमत्रापि प्रायशः समम् ।
विशेषः कथ्यते तत्राप्यधिवासनमण्डपम् ॥ ११ ॥

प्रागादितोरणाः पूज्याः शैववैष्णवनामभिः ।
शान्तिभूतिबलारोग्यास्तोरणे दक्षिणार्धगाः ॥ १२ ॥

सुशोभनः सुभद्रश्च सुपूर्णः पूर्ण एव च ।
तोरणानां तु वामार्धे पूजनीयाः स्वनामभिः ॥ १३ ॥

प्रतिद्वारं तु कुम्भस्थाश्चत्वारो द्वारपालकाः ।
प्राच्यां नन्दीशपूर्णौ च महाकालश्च पुष्करः ॥ १४ ॥

भृङ्गीशनन्दनौ याम्ये विघ्नेशो नन्दनस्तथा ।
पश्चाद् वृषो वीरसेनः षण्मुखश्च सुषेणकः ॥ १५ ॥

दुर्गा च सम्भवश्चोदक् चण्डश्च प्रभवस्तथा ।
विकिरक्षेपपूर्वं तु कुम्भे हरहरिं यजेत् ॥ १६ ॥

शूलं चक्रं च वर्धन्यामिष्ट्वा स्वीकृत्य मण्डपम् ।
मध्यकुण्डानलं प्राग्वन्नवधा संविभज्य तु ॥ १७ ॥

पूर्वद्रव्यैः स्वमूलाङ्गैर्जुहुयुर्गुरुमूर्तिपाः ।
मन्त्रसन्तर्पणं कृत्वा कुर्याच्चाकारशोधनम् ॥ १८ ॥

नेत्रमोक्षं जलेवासं तथा ग्रामप्रदक्षिणम् ।
स्नपनं च यथा पूर्वं मण्डपे शयनं तथा ॥ १९ ॥
वेद्यां कुम्भास्त्रविद्येशसाष्टमूर्तिघटान् यजेत् ।

तद्यथा —

सानन्तां पृथिवीं सूक्ष्मयुक्ताम्भश्च शिवोत्तमम् ॥ २० ॥
साग्निं चैकाक्षवायू च ततः खं च शिखण्डिनम् ।
श्रीकण्ठं च मनोयुक्तं त्रिमूर्तिं बुद्धिसंयुतम् ॥ २१ ॥
एकरुद्रमहङ्कारयुक्तं शैवोदितक्रमात् ।
इत्थमभ्यर्च्य कुम्भांस्तु न्यसेत् तत्त्वादिकं ततः ॥ २२ ॥
आत्मादीनि त्रितत्त्वानि जानुकण्ठशिरोवधि ।
ब्रह्मादीनपि तत्त्वेशान् मूर्तीः पृथ्व्यादिका रविम् ॥ २३ ॥
सोमं च यजमानं च मनश्चाहङ्कृतिं धियम् ।
प्रकृतिं चेति भागेषु मूर्तिद्वादशकं न्यसेत् ॥ २४ ॥
शर्वादींश्चाष्टमूर्तीशान् वासुदेवादिकानपि ।
विद्येश्वरीं शिवां सूक्ष्मां शाङ्करीं हरिवल्लभाम् ॥ २५ ॥
वैष्णवीं च महालक्ष्मीं क्षमां नारायणीं तथा ।
सामान्यशक्तयो ह्येता हरनारायणस्य याः ॥ २६ ॥
वामाद्या नवशक्तीश्च विमलाद्यास्तथा न्यसेत् ।
विमलोत्कर्षणी ज्ञाना क्रिया योगा तथैव च ॥ २७ ॥
सत्या पृथ्वी तथेशानानुग्रहा नवमी स्मृता ।
विन्यस्यैवं तु संपूज्य ध्यात्वा तु सकलं विभुम् ॥ २८ ॥
क्रियाशक्तिं तथा पीठे विनिधायाभिपूजयेत् ।
तत्रैव धारिकाद्याश्च शक्तीरष्टौ यजेदपि ॥ २९ ॥
नवकुण्डेषु हुत्वैवं तत्त्वतत्त्वेश्वरादिभिः ।
मूलाङ्गैरपि गायत्र्या शैवोक्तेन क्रमेण तु ॥ ३० ॥
मन्त्रसन्तर्पणं कृत्वा शान्तिकुम्भेषु पातयेत् ।
आचार्यो मूर्तिपाश्चैव संस्पृशेयुः क्रमात् त्रिधा ॥ ३१ ॥
सर्वं शैवप्रतिष्ठावद् द्रव्यमन्त्रक्रियादिकम् ।
अत्रापि तुल्यमूह्यं स्यादशेषेण तु देशिकैः ॥ ३२ ॥

अथ लग्ने प्रविश्यान्तः प्राग्वत् कूर्मशिलां न्यसेत् ।
तस्यां च धारिणीं शक्तिं तत्त्वतत्त्वेश्वरादिभिः ॥ ३३ ॥
रत्नादिपञ्चवर्गांश्च तदूर्ध्वं तु यथापुरम् ।
विन्यस्य पीठं तत्स्थां च क्रियाशक्तिं च शक्तिभिः ॥ ३४ ॥
लग्ने देवं प्रतिष्ठाप्य ज्ञानशक्त्यात्मकं विभुम् ।
मूलेनावाह्य तन्मूर्तिं मन्त्रदेहं च भावयेत् ॥ ३५ ॥
तथैव विमलं ज्योतिस्तस्यैव हृदयाम्बुजे ।
प्रोक्तत्रिबीजपुटितं हंसं स्वहृदयाम्बुजात् ॥ ३६ ॥
नीत्वा व्योमाब्जचैतन्यं मूर्तिहृत्पङ्कजे न्यसेत् ।
ततः प्रक्षाल्य संस्नाप्य वेदिकुम्भास्त्रवारिभिः ॥ ३७ ॥
अनन्ताद्यष्टकुम्भैश्च ततो न्यस्येत् षडध्वनः ।
स्वमूलाङ्गैः स्वगायत्र्या ब्रह्मभिः प्रणवादिभिः ॥ ३८ ॥
नमोभगवतेयुक्तैर्वासुदेवादिनामभिः ।
चतुर्थ्यन्तैस्तु निर्दिष्टो मन्त्राध्वाथ पदैरपि ॥ ३९ ॥
गायत्र्यास्तु पदाध्वा स्याच्छेषाध्वानो यथापुरम् ।
ततः स्थिरादिभिर्मन्त्रैर्हुत्वा स्पृष्ट्वाथ पूजयेत् ॥ ४० ॥
आसनादिक्रमेणोक्तैरुपचारैर्यथाक्रमम् ।

तद्यथा —

विघ्नेश्वरं गुरुं चेष्ट्वा सकलीकृत्य विग्रहम् ॥ ४१ ॥
सामान्यार्घ्यकरो द्वारस्योर्ध्वोदुम्बरपार्श्वयोः ।
विघ्नं सरस्वतीं गङ्गां यमुनां मध्यतः श्रियम् ॥ ४२ ॥
नन्दीशं चैव चण्डं च द्वाःस्थौ द्वारोत्तरस्थितौ ।
महाकालं प्रचण्डं च यजेद् द्वारस्य दक्षिणे ॥ ४३ ॥
नाराचास्त्रं क्षिपेच्चान्तः प्रविश्यास्त्रं निधाय च ।
वास्त्वीशं वेधसं मध्ये तथानन्तासनं यजेत् ॥ ४४ ॥
पञ्चशुद्धीर्विधायाथ तिलकीपुष्पशेखरः ।
मूलाङ्गैरर्घ्यमापाद्य जलक्षीरकुशाक्षतैः ॥ ४५ ॥

यवचन्दनसिद्धार्थैः पुष्पैरपि च पूजयेत् ।
तत्प्रोक्षितात्मद्रव्यादिरस्त्रप्राकाररक्षितः ॥ ४६ ॥

आधारशक्तिं कूर्मं चाप्यनन्तासनमेव च ।
धर्मादीनप्यधर्मादीन् मायां विद्यां गुणत्रयम् ॥ ४७ ॥

पैत्रादिव्याप्तसूर्यादिबिम्बाद्यष्टदलाम्बुजम् ।
द्वे द्वे केसरयोः शक्तीर्वामाद्या विमलादिकाः ॥ ४८ ॥

ओं वामाविमलाभ्यां नम इति पूर्वदलकेसरादिषु ।

पूर्वादिक्रमतो मध्ये मनोन्मन्यात्वनुग्रहात् (?) ।
तत्कर्णिकायां तन्मूर्तिं विद्यामन्त्रतनुं तथा ॥ ४९ ॥

इष्ट्वा हृदम्बुजात् प्राग्वद् ब्रह्मज्योतिः शिवात्मकम् ।
आवाहनस्थापने च सान्निध्यं सन्निपातनम् ॥ ५० ॥

प्ररोचनामृतीकारौ कुर्यादप्यवगुण्ठनम् ।
तन्मूलाङ्गैश्च गायत्र्या सकलीकृत्य तु क्रमात् ॥ ५१ ॥
ध्यायेच्चतुर्भुजं देवं हरनारायणं विभुम् ।
दक्षिणे शूलटङ्कौ च शङ्खचक्रे च वामतः ॥ ५२ ॥
बिभ्राणं वा कपालं च शूलमब्जं सुदर्शनम् ।
दक्षिणेतरयोश्चर्म वैयाघ्रं पीतमम्बरम् ॥ ५३ ॥
वसानं नैकनागार्धहारिहारविराजितम् ।
तथाहिमकराकारकुण्डलं सुन्दराननम् ॥ ५४ ॥
सकपर्दकिरीटं सचन्द्रचूडामणिं विभुम् ।
सबिल्वदलनीलाब्जसरोजतुलसीस्रजम् ॥ ५५ ॥
नानाभुजङ्गरत्नाढ्यमुद्रिकाकङ्कणाङ्गदम् ।
अर्धनीलगलोल्लासिनैकाहिमणिभूषणम् ॥ ५६ ॥
साहिहेमोदराबद्धकटिसूत्राङ्घ्रिभूषणम् ।
भस्माङ्गरागोल्लसितं हरिचन्दनचर्चितम् ॥ ५७ ॥
रौद्ररम्याकृतिं सर्वशोभातेजोनिधिं विभुम् ।
दक्षिणेतरपार्श्वस्थपार्वतीश्रीविराजितम् ॥ ५८ ॥

---

१. 'पा' क. पाठः.

एवंरूपं हरहरिमुपचारैर्यजेत् क्रमात् ।
अङ्गैश्च शक्तिभिश्चाष्टमूर्तीशैर्द्वारपालकैः ॥ ५९ ॥
प्रागुक्तैरथ लोकेशैरिष्ट्वावरणपञ्चकम् ।
संपूज्यैवं हरहरिं हुत्वा च समिदादिभिः ॥ ६० ॥
जुहुयुश्च द्वितीयेऽह्नि तृतीये त्र्यम्बकेन च ।
विष्णोर्नुकादिना चापि मूलाङ्गाद्यैर्यथाक्रमम् ॥ ६१ ॥
प्रायश्चित्तं चतुर्थेऽह्नि हुत्वाघोरास्त्रमन्त्रतः ।
सुदर्शनेन पालाशसमिदाज्यैर्यथाक्रमम् ॥ ६२ ॥
चण्डसेनं यथापूर्वं समाराध्य जयादिभिः ।
प्रायश्चित्तैस्तथा हुत्वा पूर्णां स्विष्टकृतं तथा ॥ ६३ ॥
अग्नीनात्महृदम्भोजे समारोप्य विसृज्य तु ।
तोरणध्वजलोकेशद्वारकुम्भस्थदेवताः ॥ ६४ ॥
ततस्त्वष्टोत्तरशतैः कलशैः स्नपयेदपि ।
संपूज्य सविशेषं तु दक्षिणाद्यं प्रदाय तु ॥ ६५ ॥
रात्रौ भूतबलिं दत्त्वा नित्यपूजादिसिद्धये ।
सङ्कल्प्य विभवं भक्त्या यथेष्टं लभते फलम् ॥ ६६ ॥

शङ्करनारायणप्रतिष्ठाधिकारः ।

नित्योत्सवे तु प्राग्द्वारे नन्दीशश्चण्ड एव च ।
महाकालः प्रचण्डश्च भृङ्गी विघ्नश्च दक्षिणे ॥ ६७ ॥
पश्चिमे वृषभानन्तौ चण्डसेनावथोत्तरे(?) ।
स्वाशासु लोकपालेभ्यः स्वैः स्वैर्मन्त्रैर्बलिं क्षिपेत् ॥ ६८ ॥

तत्रायं विशेषः—इन्द्राय सुराधिपतये सायुधसवाहनपरिवाराय शङ्करनारायणपार्षदे नमः । तत्पार्षदेभ्यो नमः । इति दिक्षु सर्वत्र शङ्करनारायणपार्षच्छब्दयुक्तैरेव मन्त्रैर्बलिं विकिरेन्नित्योत्सवे । महोत्सवे 'तु दैत्यदर्पविनाशाये'त्यादिभिश्च 'ये भूताः पुरस्सद' इत्यादिभिश्च शैवमहोत्सवोदितैः 'शङ्करनारायणस्य भगवत' इत्यादिभिस्तत्र बलिं क्षिपेत् ।

इष्ट्वा वृषार्धगरुडं मण्डपस्थं बलिं क्षिपेत् ।
गणेशं वीरभद्रं च मातॄः शास्तारमेव च ॥ ६९ ॥

दुर्गां च सोमं स्वाशासु चण्डसेनं च पूजयेत् ।
सशूलचक्रवरदाभीतिमिष्ट्वा बलिं क्षिपेत् ॥ ७० ॥
मृगास्यं पाञ्चजन्यं च तीक्ष्णनेत्रं सुदर्शनम् ।
चतुरो गोपुरद्वारि संपूज्यैषां बलिं क्षिपेत् ॥ ७१ ॥
बलिपीठात् स्थितः प्राच्यामनेनावाहयेद् गणान् ।

ओं
आयान्तु पार्षदाः सर्वे शाङ्करा वैष्णवाश्च ये ॥ ७२ ॥
स्थिताः सर्वं जगद् व्याप्य गृह्णन्तु बलिमुत्तमम् ।
ततस्तु नन्दीशादिभ्यः कुमुदादिभ्य एव च ॥ ७३ ॥
द्वयोर्द्वयोः प्रतिदिशं मण्डलेषु बलिं क्षिपेत् ।

तद्यथा —

नन्दीशश्च महाकालो भूतनाथो महीधरः ॥ ७४ ॥
पर्वतेशो गुहेशश्च कालपाशकपालिनौ ।
कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ॥ ७५ ॥
शङ्कुकर्णः शङ्कुनेत्रः सुमुखः सुप्रतिष्ठितः ।

ओं नन्दीशकुमुदाभ्यां शङ्करनारायणपार्षदाभ्यां नम इति पूर्वस्याम् । इत्याग्नेयादिदिक्ष्वपि बलिं विकिरेत् ।

ततस्तु बलिपीठे तु भूतिदादिभ्य एव च ॥ ७६ ॥
शङ्खिने चाक्रिणे चापि गदिने शार्ङ्गिणे तथा ।
पद्मिनेऽथो मुसलिने पाशिनेऽङ्कुशिने तथा ॥ ७७ ॥
कुमुदोर्ध्वे नन्दकिने नमोहरिहरादिकम् ।
सेनायेति च पीठाब्जकर्णिकायां बलिं क्षिपेत् ॥ ७८ ॥
अत्रापि पूर्ववद् दिक्षु द्वाभ्यां द्वाभ्यां बलिं क्षिपेत् ।

ओं भूतिदचक्रिभ्यां शङ्करनारायणपार्षदाभ्यां नम इत्यादिद्वन्द्वशब्दः ।

नित्योत्सवविधिस्त्वेष तुल्यश्चापि महोत्सवे ॥ ७९ ॥
विशेषः कथ्यते लेख्यो वृषार्धगरुडः पटे ।
पूज्यश्च स्यात् स्वनाम्नैव बलिं च विकिरेत् ततः ॥ ८० ॥
मन्त्रैस्तृतीयहारायां विविधानां स्वनामभिः ।
भूतेशानां शाङ्कराणां वैष्णवानां च दिक्क्रमात् ॥ ८१ ॥

शैवा विंशतिसङ्ख्याः स्युः पञ्चाशद् दिक्षु वैष्णवाः ।

तद्यथा —

महाकालो विधाता च वज्रपाणिः क्रतु(:१) प्रभुः ॥ ८२ ॥
दक्षः शतक्रतुस्तद्वदप्रमेयोऽथ वीर्यवान् ।
नित्यो विद्युत्प्रभश्चैव शूलहस्तस्त्रिलोचनः ॥ ८३ ॥
खाङ्गदीपस्तमोघ्नश्च सृष्टिकृच्चोरुविक्रमः ।
मान्धाता च महावीर्यो नित्ययोगः प्रसादनः ॥ ८४ ॥
उत्कूटः प्रकटश्चैव उन्मुखो द्विमुखो हरिः ।
अश्वग्रीवोऽश्ववदनो ह्यश्वजिह्वोऽश्वलोचनः ॥ ८५ ॥
केशवो वामनश्चैव नरो नारक एव च ।
मन्दरो मन्ददृष्टिश्च कन्दः कन्दुकलोचनः ॥ ८६ ॥
पट्टहाक्षो विशालाक्षः क्षामकः क्षमकस्तथा ।
पाण्डरः पाण्डुपृष्ठश्च दुर्दिनः सुदिनस्तथा ॥ ८७ ॥
वामदेवो महादेवो मोहनो मधुसूदनः ।
कलनः कालनश्चैव भावनो भगवान् भवः ॥ ८८ ॥
हनूमान् भागधेयश्च भास्करो भासुरस्तथा ।
विश्वेशो विश्वसेनश्च विष्वक्सेनो विसारणः ॥ ८९ ॥
विस्तारो विस्तरश्चैव विदण्डी दण्ड एव च ।
कामुकोऽकामुकश्चैव कामहृत् कामनाशनः ॥ ९० ॥
सप्ततिस्तु गणाः प्राच्यां हरनारायणस्य तु ।
अग्निरग्निसमानश्च ज्वालामाली च विश्वभुक् ॥ ९१ ॥
हुताशो मूर्तिमान् व्यापी कपिलो रक्तलोचनः ।
उग्रो रक्तवपुर्धूम्रः सप्तार्चिर्विश्वभेषजः ॥ ९२ ॥
सुतपा वेगवांश्चाथ भस्मच्छन्नो मरुत्सखः ।
योगप्रियो दारुजश्चाप्याग्नेयो निधनस्तथा ॥ ९३ ॥
अग्निजिह्वो हुताशश्चाप्यग्निरूपोऽग्निकेतनः ।
अग्निवर्णोऽग्निरग्न्यास्यो महासेनो महोदरः ॥ ९४ ॥

---

१. 'रुद्रगणः' ख. पाठः

महानासः करालश्च कालजिह्वो विवर्तकः ।
मण्डूर्मण्डूककाकास्यौ देवो देवलकस्तथा ॥ ९५ ॥
शमकश्चमकश्चैव शङ्कुः शङ्कुश्रवास्तथा ।
मारीचो द्रोणमारीचो महिषो भीषणस्तथा ॥ ९६ ॥
कुम्भनासो विनासश्च कुम्भकर्णोऽथ कुम्भकः ।
विसरी विक्रमी चैव मत्सरी मस्करस्तथा ॥ ९७ ॥
सूकरः सूकरास्यश्च शशः शशमुखस्तथा ।
सिंहः सिंहमुखश्चैव नारसिंहो नरस्तथा ॥ ९८ ॥
कालहृत् कालसूत्रश्च सूत्रकः सूत एव च ।
विनाली नालकर्णश्चेत्याग्नेय्यां दिशि सप्ततिः ॥ ९९ ॥
यमो वैवस्वतो धाता दैत्यघाती प्रजान्तकः ।
मृत्युः प्रेताधिपो धर्मः कृष्णः कृष्णाक्ष एव च ॥ १०० ॥
नित्ययोगी च कालश्च आशुकारी परेतपः ।
मायारूपी कृतान्तश्च सत्यः सत्यप्रियः सुहृत् ॥ १०१ ॥
पितृनाथश्च कीनाशो धर्मो धर्मरतस्तथा ।
धर्म्यश्च धर्मजश्चापि धन्वी च प्रश्रयो नयः ॥ १०२ ॥
कुणकः कुणिवाहश्च निःश्रेयो नी[1]रिणोऽलसः ।
निष्कोपो निरनुक्रोशः कुब्जः पांसुविमर्दनः ॥ १०३ ॥
आहो उताहो आहुश्च निर्मलो निवहो वहः ।
एकलव्यश्च पलल ऊहुः संरक्षणस्तथा ॥ १०४ ॥
शङ्खी चक्री च धन्वी च कङ्कटः कटुको विटः ।
वसुदेवः सुभद्रश्च शार्ङ्गी शार्ङ्गधरस्तथा ॥ १०५ ॥
चित्राङ्गदश्चित्ररथः केतुमान् केतुदः क्षमी ।
वल्लको वल्लकीहस्तो द्विरदो विग्रहोऽम्बरः ॥ १०६ ॥
आर्जम्बो दुन्दुभिः श्वेतश्चैते याम्यां दिशि स्थिताः ।
राक्षसश्चासुरः क्रव्याद् वीरहा निर्ऋतिस्तथा ॥ १०७ ॥
तीक्ष्णनेत्रो यातुधानो यज्ञहन्ता निशाचरः ।
महामूर्तिः कैकसेयः क्रूरः क्रूरवपुस्तथा ॥ १०८ ॥

---

[1] 'र' क. पाठ.

दक्षः कौणपको धूम्रो धूम्राक्षो भीषणस्तथा ।
विरूपाक्षोऽथ भस्माङ्गः सुकृतिर्विकृतिस्तथा ॥ १०९ ॥

दारुणो दमनश्चैव नैर्ऋतिः प्रकृतिस्ततः ।
मांसपो मांसकश्चैव राक्षसो रक्षकस्तथा ॥ ११० ॥

प्रलम्बो लम्बकश्चैव निष्ठुरः खरभाषणः ।
वीरसेनोऽक्षराशश्च प्राणदः प्रणवस्तथा ॥ १११ ॥

कामदश्च विभाषी च रक्ताक्षो लोहिताक्षकः ।
विद्युत्केशो विशालाक्षो रक्तजिह्वो विजिह्वकः ॥ ११२ ॥

अक्षरः प्रक्षरश्चैव वीक्षको निरहङ्कृतः ।
सर्वगः सर्वविद् गौरः कामरूपी विरूपवान् ॥ ११३ ॥

वैकर्तनो विकर्ता च संप्लवः सम्भवस्तथा ।
विमदो मदनश्चैव वारुणो वसुरेव च ॥ ११४ ॥

नन्दकी नन्दकश्चैव कपर्दिवृषभावपि ।
शोणः पिनाकी वरुण इत्येते नैर्ऋते स्थिताः ॥ ११५ ॥

वरुणः शबलोऽम्भोधिः प्रचेता निम्नगापतिः ।
यादोनाथः पाशपाणिरानन्दोऽम्बुपतिः शिवः ॥ ११६ ॥

कपर्दी प्राणदः श्वेतः श्यामनेत्रः सनातनः ।
प्रत्यङ्निवासो जलदो जीवनो नक्रवाहनः ॥ ११७ ॥

पयोधिनिलयश्चैव वारुणो वारणस्तथा ।
क्षेपणः क्षोभणश्चैव पाशी पाशधरो गुरुः ॥ ११८ ॥

सन्नाहो नाहनो हंसो नारदः पर्वतो रविः ।
भानुमान् वसुमान् भद्रो वैकुण्ठः परमः परः ॥ ११९ ॥

महाकर्णो विकर्णश्च विद्रवः प्रद्रवस्तथा ।
वानरस्तारकश्चैव शशकः शाकलः शलः ॥ १२० ॥

चक्रभृच्छङ्खभृद् वज्री कर्णी कर्णस्तथांशुमान् ।
कुरर[1]ः कुरवश्चैव वज्रनाभो विनायकः ॥ १२१ ॥

---

[1] 'वः' ख. पाठः.

दुर्गन्धः पूतिगन्धश्च दक्षिणोऽदक्षिणः सुहृत् ।
विरोधो रोधनो रोधस्तार्क्ष्यो गरुड एव च ॥ १२२ ॥

अङ्गदी कङ्कणी चेति वारुण्यां गणसप्ततिः ।
वायुर्गन्धवहः सूक्ष्मः स्पर्शनश्च प्रभञ्जनः ॥ १२३ ॥

प्राणोऽपानस्तथा व्यान उदानश्च समानकः ।
नागः कूर्मोऽथ कृकरो देवदत्तो धनञ्जयः ॥ १२४ ॥

ध्वजपाणिश्च पवनः श्वसनो मारुतोऽनिलः ।
विद्वान् मरुन्मारुतश्च वातो वह्निसखो हरिः ॥ १२५ ॥

अलर्को वर्तकः कङ्को मार्गणः प्राङ्कणो बलः ।
अबलो बलधिर्वीरो द्विधीरो रोधकोऽपि च ॥ १२६ ॥

सविधिः सुविधिश्चैव सङ्गरो विकटस्तथा ।
माली मानी सुधीश्चैव समर्थः साहसो धरः ॥ १२७ ॥

कुकुटः कुटकश्चैव गन्धो गन्धवहस्तथा ।
सक्तगोऽसक्तगो रागी सेचनो[1]ऽसेचनः स्वनः ॥ १२८ ॥

औषधं भेषजं जीवो रोगी रोगो भगः सुखी ।
कारणं करणं कर्ता पराधीनो बलोऽबलः ॥ १२९ ॥

इत्येते सप्ततिगणा वायव्यां दिशिसंस्थिताः ।
यक्षेशो रयिमान् सोमो माणिभद्रोऽथ गुह्यकः ॥ १३० ॥

चेली[2] माली कुबेरश्च जम्भलः शिबिकुण्डली ।
किन्नरेशश्चैलबिलिर्धनदश्च धनाधिपः ॥ १३१ ॥

राजराजस्तथा श्रीदो ज्येष्ठो मालाधरो धनी ।
उत्तराशानिवासश्च ततः स्यादेककुण्डलः ॥ १३२ ॥

सोमः सोमकलः सौम्यः सोमवित् सोमवर्धनः ।
सुधासुधाता भञ्जीरः सुराष्ट्रः काष्ठालिः कालिः ॥ १३३ ॥

कालवान् कालचक्रश्च कालकूटं विषज्वरः ।
अमृतं चामृतेशोऽम्भः केयूरी केवली वली ॥ १३४ ॥

---

[1] 'गः सेचनस्वनः', [2] 'ल' ख. पाठः.

विष्णुः कृष्णः पिशङ्गी च रेखा लेखेश्वरः परः ।
नलकः शुनकः काथः श्येनः श्येनमुखोऽरुणः ॥ १३५ ॥
मार्जारो वल्गुमाक्षी च गुल्मः कणवकः कणः ।
शेबो विशेषो विश्लेषः कर्दमः पूतिविग्रहः ॥ १३६ ॥
साम्बः संवत्सरः शम्भुर्वेगी वेगधरोऽमरः ।
उत्तराशास्थिता ह्येते गणा हरहरौ स्मृताः ॥ १३७ ॥
ईशान ईश्वरः शम्भुः शूलहस्तस्त्रिलोचनः ।
अनादिनिधनो धाता कपिलः पिङ्गलोचनः ॥ १३८ ॥
रुद्रो रुद्रगणाधीशो विश्वो[१] भर्ता दिगम्बरः ।
नीलग्रीवः कपर्दी च वृषवाहो वृषध्वजः ॥ १३९ ॥
हरः शर्वो विश्वभुज ईशो व्यापी त्रिशूलधृक् ।
वीरो भर्गो वशी शम्भुर्विवासा व्यसनो बुधः ॥ १४० ॥
वृक्षः क्षमा क्षान्तिपरः शकुनिः शकुनो वटः ।
ब्रह्मण्यो ब्रह्मविद् ब्रह्मो मारीचो हरिपिङ्गलः ॥ १४१ ॥
वेदी वेदविदुद्द्वन्धो ब्रह्मी च ब्रह्मसाधनः ।
धीमान् सुदृष्टिरष्टात्मा शङ्करः शाङ्करस्तथा ॥ १४२ ॥
विनेता विकचो वादी शिष्टात्मा शिष्टकर्मकृत् ।
एकदृक् सर्वभुक् सर्वो विनोदी दीपकम्पकः ॥ १४३ ॥
गोविन्दो गोपतिर्गोप्ता सर्वभागी सनातनः ।
दण्डी मुण्डी शिखण्डी चेत्यैशान्यां सप्ततिर्गणाः ॥ १४४ ॥
एवमेषां बलिं क्षिप्त्वा बलिपीठे बलिं क्षिपेत् ।
ततो देवं प्रवेश्यान्तः स्नात्वा प्राग्वद् यजेदपि ॥ १४५ ॥
उत्सवान्ते यथापूर्वं मुख्यस्नानं विधाय तु ।
अवरोप्य ध्वजं प्राग्वद् गणान् सर्वान् विसृज्य च ॥ १४६ ॥
यथोपपत्त्या स्नपयेत् सविशेषं च पूजयेत् ।
दत्त्वा च देशिकादिभ्यो दक्षिणास्तदनन्तरम् ॥ १४७ ॥
प्रदेयानि यथायोग्यमर्थिभ्यः प्रतिपादयेत् ।

---

[१] 'श्व' क. पाठः.

बृहति महति तन्त्रे यच्च देवोद्भवाख्ये
निगदितमवलोक्य स्थापनाद्युत्सवान्तम् ।
इति हरहरितन्त्रं सम्यगुक्तं समासात्
तदिह सकलमूह्यं कर्म शैवानुसारात् ॥ १४८२ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे
उपरिभागे क्रियापादे शङ्करनारायणतन्त्र-
पटलः चतुष्पञ्चाशः ॥

अथ पञ्चपञ्चाशः पटलः ।

अथ दुर्गाप्रतिष्ठायं कथ्यते तन्त्रचोदितम् ।
शैवोदितक्रियाचक्रं प्रायस्तुल्यमिहापि हि ॥ १ ॥

दुर्गामूलाङ्ग[1]मन्त्रादेरुद्धारोऽपि च कथ्यते ।
तारं च शक्तिबीजं [2]च पञ्चमस्य तृतीयकम् ॥ २ ॥

पञ्चमस्वरयुग् दण्डी ततस्तद्बिन्दुवर्जितम् ।
खान्तं [3]लिपिसदीर्घं च द्वादशस्वरवान् मरुत् ॥ ३ ॥

नमश्च शक्तिबीजं च दुर्गामन्त्रो नवाक्षरः ।
दीर्घैः स्वरैर्युतो नादः साग्निर्युक्तो हृदादिभिः ॥ ४ ॥

चतुर्थ्या जातियुक्तानि षडङ्गान्यस्त्रमन्त्रतः ।
तद्गायत्री तु पूजायां शक्तितारद्वयादिका ॥ ५ ॥

तारं कात्यायनीशब्दश्चतुर्थ्यन्तश्च विद्महे ।
कन्याकुमार्यैशब्दान्ते धीमहीति पदं भवेत् ॥ ६ ॥

तन्नःपदद्वयान्ते स्याद् दुर्गा प्रेति च चोदयात् ।
एषा हि दुर्गागायत्री पूजयेदनया शिवाम् ॥ ७ ॥

जातवेदस इत्याद्या ऋगाद्याथ ततः परम् ।
तामग्निवर्णामग्नेत्वंविश्वानीत्यादिका ततः ॥ ८ ॥

पृतनाजितमित्याद्या ऋग् दुर्गा पञ्चमी भवेत् ।
एवमुक्तस्तु मन्त्राध्वा दुर्गायास्तन्त्रचोदितः ॥ ९ ॥

---

१. 'मूलं हि म', २. 'च दुर्गामन्त्रो नवाक्षरः ।' ख. पाठः. ३. 'रेपि क. पाठः.

चतुर्भुजा वाष्टभुजा स्यात् षोडशभुजाथवा ।
सिंहासने वा स्वासीना स्थिता वा महिषोपरि ॥ १० ॥
प्रतिष्ठाप्या भवेद् दुर्गा भित्त्यादौ सिंहगाथवा ।
वरदाभयशङ्खारिहस्ता दुर्गा चतुर्भुजा ॥ ११ ॥
वामतस्तर्जनीचापचर्मशङ्खांस्तु बिभ्रती ।
शूलेषुखड्गचक्राणि दक्षिणेऽष्टभुजा यदा ॥ १२ ॥
कपालं चाङ्कुशगदे शतघ्नीप्रासकौ धनुः ।
चर्म शङ्खं तथा वामे बिभ्रतीमथ दक्षिणे ॥ १३ ॥
शूलपाशाग्निवज्राणि तोमरं शरमप्यसिम् ।
चक्रं चाधःकराद्यं तु कुर्याद् ब्यष्टभुजा यदा ॥ १४ ॥
मध्येन दशतालेन बेरं स्त्रीमानतो भवेत् ।
मण्डपे तोरणाः कार्याः प्राग्वत् क्षीरतरूद्भवाः ॥ १५ ॥
प्रागाद्यासु चतुर्दिक्षु यज्ञेशश्च प्रभाकरः ।
मङ्गलश्च सुभद्रश्च स्थाप्या वेदादिभिः क्रमात् ॥ १६ ॥
तोरणाभ्यन्तरे द्वौ द्वौ ध्वजौ तद्देवता अपि ।
कुन्दा च कुमुदा चैव विद्युन्माला च भीषणा ॥ १७ ॥
कलुषी घोषणी चैव कराली विकृतिस्तथा ।
पूज्याः स्युस्तत्पताकासु शङ्खाद्य(त्रै? श्चै)स्तु चिह्नयेत् ॥ १८ ॥
सितारुणासितश्यामं[१]धूम्रपीताश्च कर्बुराः ।
मिश्रा[२]श्चाथ प्रतिद्वारं द्वे द्वे दूत्यौ क्रमेण तु ॥ १९ ॥
काली कराली विरजा मन्दरा विन्ध्यवासिनी ।
सुप्रभा सिंहवक्त्रा चाप्यष्टमी दैत्यमर्दनी ॥ २० ॥
खड्गखेटधराः सर्वा भूषिताः कुम्भगा यजेत् ।
ततो विकिरविक्षेपात् कुम्भे सिंहगतां शिवाम् ॥ २१ ॥
अस्त्रं चाभ्यर्च्य वर्धन्यां कृत्वा चाकारशोधनम् ।
नेत्रमोक्षं जले वासं प्राग्वद् ग्रामप्रदक्षिणम् ॥ २२ ॥

---

१. 'मा', २. 'श्र' क. पाठः.

स्नपनं चाधिवासार्थं मण्डपे शयनक्रियाम् ।
वेद्यां कुम्भास्त्रनिद्राख्यमूर्तिकुम्भाष्टकार्चनम् ॥ २३ ॥

आत्मादितत्त्वब्रह्मादिविभागेषु न्यसेदथ ।
मूर्तीश्च क्ष्मादिकास्त्वष्टौ मूर्तीशा धारिकादिकाः ॥ २४ ॥

धारिका दीप्तिमत्युग्रा ज्योत्स्ना चिच्च बलोत्कटा ।
धात्री विभुश्च ज्ञानीं तु मूर्तौ पीठे क्रियां न्यसेत् ॥ २५ ॥

प्राग्वन्नवसु कुण्डेषु मान्त्रिकेऽग्नौ विभाजिते ।
आवाह्य दुर्गामूलाङ्गैरात्मतत्त्वादिभिः क्रमात् ॥ २६ ॥

प्राग्वद्धुत्वा संस्पृशेयुः साचार्या मूर्तिसाधकाः ।
अथ प्रतिष्ठां लग्ने तु कुर्याद् युक्तपदे गुरुः ॥ २७ ॥

सप्तसप्तपदे गर्भे ब्रह्मादिषु पदेषु वै ।
शैलीं रत्नमयीं लौहीं दुर्गां तु शिववन्न्यसेत् ॥ २८ ॥

मृन्मयीं दैविके तद्वद् दारवीमथ मानुषे ।
भित्तावालेख्यगां दुर्गां प्रतिष्ठाप्य स्थिरं यजेत् ॥ २९ ॥

लग्ने कूर्मशिलायां तु शक्तिमाधारसंज्ञिताम् ।
रत्नादिपञ्चवर्गांश्च न्यसेत् पीठं तथोपरि ॥ ३० ॥

पीठमध्ये क्रियाशक्तिं पीठे बेरं च विन्यसेत् ।
बेरे ज्ञानात्मिकां मूर्तिं हंसं बीजं च तद्धृदि ॥ ३१ ॥

स्वहृदम्भोजकुहरात् कुण्डलिन्यां समुद्धृताम् ।
उत्थाप्य चिन्मयीं शक्तिं हंससंपुटमध्यगम्[2] ॥ ३२ ॥

शक्तिबीजं ब्रह्मनाडीपदेनोर्ध्वं खपङ्कजे ।
योजयेन्निष्कलान्तं तन्मन्त्रमुच्चारयन् सुधीः ॥ ३३ ॥

तस्माच्छाक्तं परं ज्योतिर्निष्कलान्तमुदीरयन् ।
आनीय पुष्पाञ्जलिना मूर्तिहृत्पङ्कजे न्यसेत् ॥ ३४ ॥

इत्थमावाह्य संस्थाप्य संन्निरोध्य[3] च मूलतः ।
सन्निधाप्यामृतीकृत्य चावकुण्ठ्य प्ररोच्य च ॥ ३५ ॥

---

१. 'न्याः', २. 'गाम्', ३. 'त' क. पाठः.

स्वमूलाङ्गानि गायत्री पञ्च दुर्गाणवस्तथा ।
मन्त्राध्वा स्यात् पदाध्वा च पञ्चदुर्गापदैर्मतः ॥ ३६ ॥
शेषाध्वानो यथापूर्वं सर्वांस्तांस्तत्र भावयेत् ।
ततः प्रक्षाल्य सलिलैर्मूर्तिकुम्भास्त्रवारिभिः ॥ ३७ ॥
अभिषिच्य यथापूर्वमर्घ्याद्यैरभिपूजयेत् ।

तद्यथा —

स्नात्वा क्षालितपाण्यङ्घ्रिर्विघ्नेशमभिपूज्य तु ॥ ३८ ॥
आत्मशुद्धिं विधायाथ सकलीकृतविग्रहः ।
सामान्यार्घ्यकरो द्वारि जयां च विजयामपि ॥ ३९ ॥
गङ्गां च यमुनां द्वारश्रियं चोपरि पूजयेत् ।
पार्ष्णिघातादिभिर्विघ्नान् भौमादीनपसार्य तु ॥ ४० ॥
नाराचास्त्रं क्षिपेदन्तः प्रविश्यास्त्रं निधाय च ।
बाह्ये तु शस्त्रप्राकारं वर्मणा चावकुण्ठनम् ॥ ४१ ॥
विधाय मध्ये वास्त्वीशं ब्रह्माणं स्वासनं यजेत् ।
उपविष्टो विशेषार्घ्यात् पञ्च शुद्धीर्विधाय च ॥ ४२ ॥
कृत्वा ललाटे तिलकं पुष्पालङ्कृतमस्तकः ।
अथो मध्ये प्रकृत्यै(च) ततो वज्रासनाय च ॥ ४३ ॥
इति सिंहासनं हैमं नमोन्तमभिपूज्य तु ।
आर्यां च प्रलयां चापि महाप्रलयकामपि ॥ ४४ ॥
सृष्टिं चाग्न्यादिपादांस्तु दिक्ष्वथैषां प्रपूजयेत् ।
अव्यक्तं नियतिं कालं कलां चैन्द्रादिषु क्रमात् ॥ ४५ ॥
त्रिगुणैः कन्दनालाब्जसूर्यसोमाग्निबिम्बकान् ।
ब्रह्मविष्णुहरव्याप्तपत्रकेसरकर्णिकाः ॥ ४६ ॥
प्रभां मायां जयां सूक्ष्मां विशुद्धां नन्दिनीमपि ।
सुप्रभां विजयां दिक्षु मध्यतः सर्वसिद्धिदाम् ॥ ४७ ॥
दीर्घस्वरादिस्वाख्याभिर्नमोन्तैस्तु क्रमाद् यजेत् ।

केसराग्रेषु मध्ये चेति यावत् ।

ततस्तु मूर्तिं दुर्गायाः शक्तिदेहं च मूलतः ॥ ४८ ॥

हृदयादिकमावाह्य ततो देवीं हृदम्बुजात् ।
व्योमाम्बुजसुधासार[1]चैतन्यपरिबृंहिताम् ॥ ४९ ॥

निष्कलान्तोक्तबीजेन मूर्तावावाह्य देशिकः ।
स्थापनाद्यैर्यथापूर्वममृतीकरणान्तकम् ॥ ५० ॥

कृत्वा यथोदितां ध्यात्वा तद्गायत्र्या हृदाद्यया ।
अर्घ्याद्यैरुपचारैस्तु यथापूर्वं यजेच्छिवाम् ॥ ५१ ॥

भोगार्थमङ्गान्यग्नेभ्यः कोणेष्वस्त्रं चतुर्दिशम् ।
पीठप्रान्तेऽब्जबाह्ये तु शङ्खाद्यस्त्राण्यपि क्रमात् ॥ ५२ ॥

याद्यष्टार्णैस्तु बिन्द्वन्तैरादावायोज्य पूजयेत् ।
नैवेद्यान्तं ततो दिक्षु मन्त्रैर्लोकेशदैवतैः ॥ ५३ ॥

हुत्वा द्वितीयदिवसे समिदाज्यचरूंस्तिलान् ।
लाजान् व्रीहींश्च सिद्धार्थान् पायसं च पृथक् पृथक् ॥ ५४ ॥

अष्टोत्तरशतं हुत्वा मूलेनाङ्गैर्दशांशतः ।
तृतीयदिवसे पञ्चदुर्गाभिर्जुहुयाद् घृतम् ॥ ५५ ॥

चतुर्थे सिंहगामैशे यजेन्निर्माल्यधारिणीम् ।
लोकपालांस्तथा सिंहं मातृः स्वाशासु विन्यसेत् ॥ ५६ ॥

बलिपीठं च तत्रस्थान् दैवतानभिपूज्य तु ।
अष्टोत्तरशतेनापि स्नपयित्वा तु पूर्ववत् ॥ ५७ ॥

मन्त्रैस्तु वैदिकैस्तैस्तैः शैवस्नपनचोदितैः ।
गायत्र्या पञ्चदुर्गाभिर्मध्यमेनाभिषेचयेत् ॥ ५८ ॥

निशि भूतबलिं दत्त्वा दक्षिणाश्च प्रदाय तु ।
विभवं चापि संकल्प्य नित्यपूजादिसिद्धये ॥ ५९ ॥

फलं तु कर्ता पूर्वोक्तमिह चामुत्र विन्दति ।
त्रिष्टुप्प्रभृतिकान् दौर्गान् वनदुर्गादिकांस्तु वा ॥ ६० ॥

दुर्गामन्त्रान् साधयन्ति यथोक्तान् पूर्वपद्धतौ ।
तत्तद्विधानतस्त्वेवं प्रतिष्ठाप्य यजन्ति चेत् ॥ ६१ ॥

---

[1] 'धा' क. पाठः.

तत्तत्कल्पोदितां सिद्धिं ते ते विन्दन्त्ययत्नतः ।

दुर्गाप्रतिष्ठाधिकारः ।

नित्योत्सवे तु दुर्गायाः पूर्वादिद्वारपालिकाः ॥ ६२ ॥
जया च विजया रौद्री भीषणी शूलिनी प्रभा ।
अपराजिता जयन्ती च कन्या वेत्रासिधारिकाः ॥ ६३ ॥
ताभ्यः क्षिप्त्वा बलिं लोकपालेभ्यः स्वस्वगोचरे ।
दुर्गापारिषदे चेति सर्वत्रायोज्य निक्षिपेत् ॥ ६४ ॥
सिंहाय मण्डपे वज्रनखदंष्ट्रायुधाय ते ।
महासिंहाय हूं स्वाहा नमश्चेति बलिं क्षिपेत् ॥ ६५ ॥
विघ्नेशवीरमातृभ्यः शास्त्रे स्कन्दाय चेन्दवे ।
स्वाशासु निक्षिपेच्चैवं सिंहिकायै बलिं क्षिपेत् ॥ ६६ ॥
निर्माल्यधारिणी सिंहिकेति यावत् ।
ह्रादिन्यै चापि मादिन्यै द्वार्यन्तर्गोपुरस्य तु ॥ ६७ ॥
कात्यायन्यै च चण्डायै गोपुरद्वारि बाह्यतः ।
अथ पीठाग्रतः स्थित्वा मन्त्रमेनमुदीरयेत् ॥ ६८ ॥

ओं

ये समस्तं जगद् व्याप्य चरन्ति बलिकाङ्क्षया ।
दुर्गापारिषदाः सर्वे गृह्णन्तूपहृतं बलिम् ॥ ६९ ॥
ततो द्वितीयहारायां दिक्ष्वष्टौ कालिकादिकाः ।
काली कराली विरजा मन्दरा विन्ध्यवासिनी ॥ ७० ॥
सुप्रभा सिंहवक्त्रा चाप्यष्टमी दैत्यमर्दनी ।
ताभ्यो बलिं विकीर्याथ बलिपीठेऽथ निक्षिपेत् ॥ ७१ ॥
ब्रह्मघोषा सुघोषा च कुमारी वरवर्णिनी ।
आर्या च हेमवर्णा च कृत्तिका चाभयप्रदा ॥ ७२ ॥
प्रागाद्याशास्थिता ह्यष्टौ ब्राह्मी कुमुदके स्थिता ।
दुर्गासेना पीठमध्ये चासां तस्यै बलिं क्षिपेत् ॥ ७३ ॥
नित्योत्सवे विधिस्त्वेष स्यात् तुल्यश्च महोत्सवे ।
विशेषस्तु ध्वजे केभ्यः सिंहः पूज्यश्च मन्त्रतः ॥ ७४ ॥

तथा तृतीयहारायामष्टावष्टौ तु कन्यकाः ।
स्थिताः प्रतिदिशं ताश्च सहस्रगणनायिकाः ॥ ७५ ॥
सौम्या भद्रा जया नन्दा कुन्दा च कुमुदा द्युतिः ।
विद्युन्माला च पूर्वस्यामथाग्नेय्यां महाबला ॥ ७६ ॥
बला च सुबला वाला चाबला भीषणा रतिः ।
कलुषा चेत्यथो याम्ये घोषणी नन्दनी स्मृतिः ॥ ७७ ॥
युद्धप्रिया देवसिद्धपूजिता विकृतिः कृतिः ।
सप्तैतास्त्वष्टमी चास्यां महासुरविमर्दनी ॥ ७८ ॥
विकराली पालिनी च शूलकात्यायनी ततः ।
महायोगेश्वरी गौरी चण्डा चण्डी च खड्गिनी ॥ ७९ ॥
नैर्ऋत्यामथ वारुण्यां ह्लादिनी क्षेमकारिका ।
आर्या भद्रा भद्रकाली वारुणी चामृताम्बिका ॥ ८० ॥
अथ क्षेम्या वेदगर्भा चानन्ता सर्वनिष्कला ।
शान्तिश्च भैरवी प्राणा चेतना वायुगोचरे ॥ ८१ ॥
ऋद्धिर्लक्ष्मीस्तथा तुष्टिः पुष्टिः कीर्तिर्धनेश्वरी ।
अद्भुता च मदा चाष्टौ कौबेर्यां दिशि नायिकाः ॥ ८२ ॥
श्रुतिः स्मृतिस्तथा नीतिर्भीमा च ब्रह्मचारिणी ।
नीलाम्बरा शूलिनी चाप्यष्टमी स्यात् सरस्वती ॥ ८३ ॥
ऐशभागे स्थितास्त्वेताः सर्वासां विकिरेद् बलिम् ।
एतासां बाह्यतो दिक्षु गणेभ्यः पूर्ववद् बलिम् ॥ ८४ ॥
ऐन्द्र्यां दिशि गणा ये तु वज्रहस्ता महाबलाः ।
इत्यादिभिः क्रमान्मन्त्रैः पूर्वोक्तैर्विकिरेद् बलिम् ॥ ८५ ॥
शैवोत्सवोक्तं यत् कर्म तदत्रापि समूहयेत् ।
मन्त्राणां दैवतानां च भेदः कश्चिद् भवेदिह ॥ ८६ ॥
तीर्थस्नानं यथापूर्वं सङ्कल्प्य तु समाचरेत् ।
चैत्रे मासे तु चित्रा(तु ? यां) वैशाखे च विशाखभे ॥ ८७ ॥
आषाढे पूर्वफल्गुन्यां श्रावणे कृत्तिकासु च ।
महानवम्यां शरदि पौर्णमास्यां च कार्त्तिके ॥ ८८ ॥

पुष्यमासस्य पुष्ये चाप्युत्तरायां च फाल्गुने ।
उत्सवश्च तदा कार्यो दुर्गायास्तुष्टये नृभिः ॥ ८९ ॥
इत्थं दुर्गां प्रतिष्ठाप्य भक्त्या पूजयतां सताम् ।
दृष्टादृष्टफलं सर्वमभीष्टं सुलभं भवेत् ॥ ९० ॥

इतीदं हि दौर्गं समासेन तन्त्रं स्मृतं पावने यच्च देवोद्भवोक्तम् ।
प्रतिष्ठादिकृत्यं क्रमादुत्सवान्तं समस्तं तदुक्तं हि शैवानुसारात् ॥ ९१ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापदे दुर्गातन्त्रपटलः पञ्चपञ्चाशः ॥

अथ षट्पञ्चाशः पटलः ।

अथ गौर्याः प्रतिष्ठाद्यं समासात् सम्यगुच्यत ।
तन्मूलबीजं प्रागेव शक्तिसंज्ञं प्रदर्शितम् ॥ १ ॥
तारं च शक्तिबीजं च खान्तश्चौकारसंयुतः ।
ससूक्ष्मोऽग्निस्ततो रुद्रपदं च दयितेपदम् ॥ २ ॥
द्वादशान्तयुतो वायुः खान्तः[1] सैकादशाक्षरः ।
अष्टमाद्यो वकारस्थो वह्निः सूक्ष्मेण संयुतः ॥ ३ ॥
हुंफडग्निप्रियान्तोऽयं मन्त्रः सप्तदशाक्षरः ।
नेत्राश्विशरवेदाश्विनेत्रस्वार्णैः स्वजातिभिः ॥ ४ ॥
सदीर्घस्वरनादाद्यं षडङ्गान्यस्त्रमन्त्रतः ।
अष्टमस्य तृतीयं तु पञ्चमस्वरसंयुतम् ॥ ५ ॥
षष्ठवर्गाच्चतुर्थं च गायै इत्यक्षरद्वयम् ।
विद्महे कामशब्दौ च मालिन्यै चेति धीमहि ॥ ६ ॥
तन्नअन्ते भवेद् गौरी प्रकारोऽन्ते च चोदयात् ।
एषा हि गौरीगायत्री विनियोगोऽर्चनादिषु ॥ ७ ॥
मध्येन दशतालेन गौर्यास्तु प्रतिमा भवेत् ।
चतुर्भुजा सवरदा सपाशा साभयाङ्कुशा ॥ ८ ॥
पीनोत्तुङ्गस्तनी नीलधम्मिल्लमकुटोज्ज्वला ।
त्रिलोचना स्मितमुखी मणिकुण्डलमण्डिता ॥ ९ ॥

---

[1] 'न्तस्यैकादशस्वरः ।' क. पाठः.

ग्रैवेयकोल्लसद्धारिहारा सूदरबन्धना ।
हेमाङ्गदोल्लसद्रत्नवलयाङ्गुलिवेष्टना ॥ १० ॥
हेमकाञ्चीपरिलसत्कौशेयवसनोज्ज्वला ।
नखरत्नांशुविलसत्पदाब्जासक्तनूपुरा ॥ ११ ॥
सर्वलावण्यसौन्दर्यसौकुमार्यगुणास्पदा ।
एवंरूपा मनोन्मन्या गौर्यास्तु प्रतिमा भवेत् ॥ १२ ॥
शिलालोहादिविहिता प्रोक्तस्त्रीमानतः क्रमात् ।
प्रोक्ते विमाने शैवोक्तमार्गेण स्थापयेच्छिवाम् ॥ १३ ॥
यो यो विशेषः पूर्वोक्तात् तं तमत्र वदाम्यतः ।
षोडशस्तम्भयुक्तः स्यादधिवासनमण्डपः ॥ १४ ॥
धर्मादयोऽन्तश्चत्वारःस्तम्भाः सूर्याश्च बाह्यतः ।
भद्रश्च विजयश्चैव विजृम्भो लोहितस्तथा ॥ १५ ॥
प्रागादितोरणा ज्ञेया जयाद्या द्वारकुम्भगाः ।
जया च विजया प्राच्यामजिता चापराजिता ॥ १६ ॥
नित्या विलासिनी शौण्डी चाघोरा दक्षिणादिषु ।
कुन्दां च कुमुदां चैव विद्युन्मालां विभूषणाम् ॥ १७ ॥
कलुषां घोषणीं चैव करालीं विकृतां तथा ।
द्वे द्वे द्वार्ध्वजयोर्दूत्यौ यजेत् कुम्भगते क्रमात् ॥ १८ ॥
पुण्याहविकिरक्षेपात् कुम्भास्त्रे प्राग्वदर्चयेत् ।
वृषारूढां घटे गौरीं सिंहेऽस्त्रं वर्धनीगतम् ॥ १९ ॥
योषिद्रूपं चतुर्हस्तं शूलटङ्कवराभयैः ।
पीनोत्तुङ्गस्तनं श्यामं भूषितं सत्रिलोचनम् ॥ २० ॥
बद्धचण्डातकं रौद्रं सर्वासुरभयङ्करम् ।
पिङ्गोर्ध्वकेशं नानाहिभूषणं सौम्यभीषणम् ॥ २१ ॥
उमास्त्रमेवं स्त्रीरूपं तत्पूजाभ्रमणादनु ।
मध्यकुण्डस्थशैवाग्निं नवधा संविभज्य तु ॥ २२ ॥
प्राग्वन्नवसु कुण्डेषु क्षिप्त्वा तस्य हृदम्बुजे ।
गौरीमावाह्य मूलाङ्गैर्जुहुयुर्गुरुमूर्तिपाः ॥ २३ ॥

---

१. 'वंस्वक' ख. पाठः.

विधायाकारशुद्धिं च प्राग्वन्नयनमोक्षणम् ।
जलाधिवासनं ग्रामभ्रमणं स्नपनं तथा ॥ २४ ॥

मण्डपेऽथ ततो वेद्यां शयने पञ्चधास्तृते ।
पञ्चभूतात्मके देवीं शाययित्वाभिपूजयेत् ॥ २५ ॥

रक्तपीताम्बराच्छन्नां ततः कुम्भास्त्रकं न्यसेत् ।
गौरीकुम्भं शिरःस्थाने निद्राकुम्भं च विन्यसेत् ॥ २६ ॥

परितो मूर्तिकुम्भेषु वामाद्याभिस्तु संयुतान् ।
ब्रह्मादीन् पञ्च गायत्रीं सावित्रीं च सरस्वतीम् ॥ २७ ॥

पीठे चैव क्रियाशक्तिं बेरे ज्ञानीं च विन्यसेत् ।
त्रिभागेष्वपि च न्यस्येत् तत्त्वं तत्त्वेश्वरान् क्रमात् ॥ २८ ॥

पृथ्व्याद्या मूर्तयः प्राग्वन्मूर्तीशा धारिकादिकाः ।
पृथक् क्रमेण हुत्वैभ्यः स्पृशेयुर्गुरुमूर्तिपाः ॥ २९ ॥

ततः प्रातः कूर्मशिलां लग्ने न्यस्येद् यथापुरम् ।
रत्नादिपञ्चवर्गांश्च पीठं चाथ स्वमूलतः ॥ ३० ॥

प्रतिमां स्थापयेत् पीठे हृत्पद्मेऽस्यास्तु चिन्मयम् ।
कुम्भात् तच्छक्तिबीजं तु विन्यस्य स्नपयेत् ततः ॥ ३१ ॥

रुद्रेण पवमानैश्च गौरी(रि ? मि)त्यादिनापि च ।
ततो मूलाङ्गगायत्र्या मन्त्राध्वा स्याच्च तत्पदैः ॥ ३२ ॥

पदाध्वा स्याद् यथापूर्वं शेषाध्वानो यथापुरम् ।
ततः प्रधाननिद्राख्यमूर्तिकुम्भाभिषेचिताम् ॥ ३३ ॥

अर्घ्याद्यैस्तु यथापूर्वं पूजयेत् परमेश्वरीम् ।

तद्यथा—

स्नात्वा प्रक्षाल्य चरणावाचम्य सकलीकृतः ॥ ३४ ॥

विघ्नं गुरुं च संपूज्य सामान्यार्घ्यकरो गुरुः ।
जया च विजया द्वारि स्थिते वेत्रकरे भुवि ॥ ३५ ॥

गङ्गा च यमुना चोर्ध्वे द्वारश्रीर्मध्यगोपरि ।
ता दृष्ट्वा क्षिप्तनाराचः प्रविश्यास्त्रं निधाय च ॥ ३६ ॥

वास्तुब्रह्मासनादीष्ट्वा पञ्चशुद्धीर्विधाय तु ।
मूलाङ्गपूरितार्घ्यः सन् तिलकी पुष्पशेखरः ॥ ३७ ॥

कूर्माधो धारिणीं शक्तिं पीठे शक्त्यासनं तु तत्
हैमं[1] सिंहासनं ध्यात्वा पादान् धर्मादिकानपि ॥ ३८ ॥

सत्त्वादिकन्दनालाब्जं सूर्यबिम्बा[2]दिकादिकान्[3] ।
पत्रादिषु ततः शक्तीर्वामाद्याः केसराग्रगाः ॥ ३९ ॥

मनोन्मनी स्वयं साक्षान्मध्ये गौरी शिवा भवेत् ।
तन्मूर्तिं मन्त्रदेहं च चिच्छक्तिं स्वाद्धृदम्बुजात् ॥ ४० ॥

द्वादशान्तगतां प्राग्वन्मूर्तिंहृत्पङ्कजे न्यसेत् ।
स्थापनं चैव सान्निध्यं सन्निरोधं प्ररोचनम् ॥ ४१ ॥

अमृतीकरणं चावकुण्ठनं हृदयादिभिः ।
ब्रह्माणि चेशानादीनि कास्यहृद्दशनाङ्घ्रिषु ॥ ४२ ॥

विन्यसेत् पञ्च शक्तीश्च हृल्लेखां गगनां तथा ।
रक्तां करालिकां चापि महोच्छुष्मां च कादिषु ॥ ४३ ॥

ब्रह्मादीन् पञ्च पादादि हृदये च सरस्वतीम् ।
गायत्रीमपि सावित्रीं स्तनयोर्विन्यसेत् ततः ॥ ४४ ॥

क्रमादर्घ्यादिभिः सम्यगुपचारैर्यजेच्छिवाम् ।
पत्रेष्वङ्गावृतिं चेष्ट्वा बाह्ये दूत्यष्टकं यजेत् ॥ ४५ ॥

अनङ्गरूपा चानङ्गमदना मदनातुरा ।
तथा पवनवेगा च ततो भुवनपालिका ॥ ४६ ॥

स्यात् सर्वशिशिरानङ्गवेदनानङ्गमेखला ।
इष्ट्वैता गन्धपुष्पाद्यैर्द्वाःस्थाश्चापि जयादिकाः ॥ ४७ ॥

इन्द्रादींल्लोकपालांश्च वृषभं मुखमण्डपे ।
वीरं विघ्नं ततो मातॄः शास्तृस्कन्दौ निशाकरम् ॥ ४८ ॥

निर्माल्यधारिणीमैशे स्थापयेत् सुभगाह्वयाम् ।
वलिपीठे च संस्थाप्य दिक्पालेभ्यो जुहोति च ॥ ४९ ॥

---

[1] 'हे', [2] 'म्बो क. पाठः. [3] 'नू' ख. पाठः

द्वितीयेऽह्न्यथ मूलाङ्गैर्गायत्र्या समिदादिभिः।
अष्टद्रव्यैः शतं मूलेनाङ्गानां तु दशांशतः ॥ ५० ॥

गायत्र्या च शतं गौरीमिमायेत्यादिनाऽपि च।
तृतीयेऽह्नि तिलाज्याभ्यामघोरास्त्राच्छिवास्त्रतः ॥ ५१ ॥

हुत्वा पाशुपतास्त्रेण प्रायश्चित्तैर्जयादिभिः।
चतुर्थदिवसे प्राग्वदिष्ट्वा निर्माल्यधारिणीम् ॥ ५२ ॥

अग्नीनात्मनि संहृत्य स्नापयेत् कलशैः शतैः।
दक्षिणाश्च प्रदेयानि दत्त्वा भूतबलिं निशि ॥ ५३ ॥

विकिरेन्नित्यपूजार्थं विभवं चापि कल्पयेत्।
फलं शिवप्रतिष्ठोक्तं कर्ता सर्वं समश्नुते ॥ ५४ ॥

आवाहनी स्थापनी च निष्ठुरा क्षोभणी तथा।
मोहनी द्रावणी चैव कर्षणी सन्निधापनी ॥ ५५ ॥

वन्दनी च महामुद्रा गौरीमुद्रा दश स्मृताः।
अञ्जलिः पूर्णपुष्पो य उत्तानो द्वादशान्ततः ॥ ५६ ॥

आमूर्तिहृदयानीतो मुद्रा ह्यावाहनी स्मृता।
सैव पुष्पं विना मुद्रा स्मृता स्थापन्याधोमुखी ॥ ९७ ॥

निष्ठुरा चोच्छ्रिताङ्गुष्ठश्लिष्टमुष्टिकरद्वयात्।
अन्योन्यसंमुखौ हस्तौ संश्लिष्टौ मुक्ततर्जकौ ॥ ५८ ॥

मध्यमाङ्गुष्ठसंयोगात् क्षोभणी स्यात् प्ररोचनी।
श्लिष्टाङ्गुष्ठतलौ हस्तौ प्रसृताङ्गुष्ठतर्जकौ ॥ ५९ ॥

कनिष्ठानामिकामध्यासंश्लेषान्मोहनी स्मृता।
अमृतीकरणं देव्या मोहन्या तु प्रकल्पयेत् ॥ ६० ॥

तथैव श्लिष्टकरयोस्तर्जन्यौ संप्रसार्य तु।
मध्यमाङ्गुष्ठसंयोगाद् द्रावण्यानन्ददायिनी ॥ ६१ ॥

सैव सुश्लिष्टकरयोर्वक्रतर्जाग्रयोगतः।
कर्षणी स्यात् तया देवीं प्रसन्नां परिभावयेत् ॥ ६२ ॥

सैव मध्याग्रतर्जाभ्यां ज्येष्ठिकाद्वयपीडनात्।
सन्निधानकरी मुद्रा सान्निध्यं कल्पयेत् तया ॥ ६३ ॥

बद्धाञ्जलिपुटौ पाणी सरोजमुकुलोपमौ ।
वन्दनी नाम मुद्रा स्यात् सा योज्या वन्दनादिषु ॥ ६४ ॥
अनामिके द्वे तर्जाभ्यामधः पाण्योर्निबद्धय तु ।
उत्तानपाणितलयोर्मध्यमे सकनिष्ठिके ॥ ६५ ॥
पार्श्वाभ्यां संहताग्रे स्तामूर्ज्वायतमवस्थिते ।
तदङ्गुष्ठाग्रयुग्मेन कनिष्ठामूलयोः स्पृशेत् ॥ ६६ ॥
एषा गौर्या महामुद्रा दशमी सर्वसिद्धिदा ।

गौरीप्रतिष्ठाधिकारः ।

गौरीनित्योत्सवे देवी स्यात् सुवर्णादिनिर्मिता ॥ ६७ ॥
गौर्यस्त्रमप्यमत्रस्थमावाह्येष्ठाग्रतो वहेत् ।
जयादिकाभ्यो द्वाःस्थाभ्यो लोकेशेभ्यो वृषाय च ॥ ६८ ॥
गौरीपारिषदे(तन्तं ? भ्यश्च) सर्वेभ्योऽपि बलिं क्षिपेत् ।
वीरविघ्नेशमातृभ्यः शास्त्रे स्कन्दाय चेन्दवे ॥ ६९ ॥
सुभगायै बलिं क्षिप्त्वा गोपुरद्वारपार्श्वयोः ।
त्रिशूलिन्यै च खड्गिन्यै क्षिप्त्वा निष्क्रम्य गोपुरात् ॥ ७० ॥
पीठोपान्ते स्थितोऽनेन मन्त्रेणामन्त्रयेद् गणान् ।

ओं

ये समस्तं जगद् व्याप्य चरन्ति बलिकाङ्क्षया ॥ ७१ ॥
गौरीपारिषदाः सर्वे गृह्णन्तूपहृतं बलिम् ।

इति ।

ततो द्वियीयहारायामष्टौ स्युर्गणनायिकाः ॥ ७२ ॥
कराली विकराली चाप्युग्रा वाणी शची तथा ।
मोहनी चैव माया च महालक्ष्मीस्तथाष्टमी ॥ ७३ ॥
आसां बलिं क्षिपेच्चाथ बलिपीठाष्टदिक्स्थिताः ।
ऋद्धिः स्मृतिर्धृतिः श्रद्धा मेधा कान्तिर्मतिः श्रुतिः ॥ ७४ ॥
आर्या कुमुदके पीठे गौरीसेना च मध्यतः ।
स्वाख्याभिर्विकिरेदासां नमोन्तं बलिमादरात् ॥ ७५ ॥

---

१. 'न', २. 'मृ। त' क. पाठः.

नित्योत्सवविधिस्त्वेष तुल्यश्च स्यान्महोत्सवे ।
गौरिवाहनसंज्ञस्तु वृषः पूज्यो ध्वजो भवेत् ॥ ७६ ॥

आवाहनं गणादीनां प्राग्वद् गौर्युत्सवे स्मृतम् ।

विशेषस्तु ये भूताःपुरस्सदो गौर्यादिभगवत्यादिभिः प्रतिदिशं बलिं मण्डले विकीर्य तद्बाह्ये प्रतिदिशं द्वादशसहस्रपर्षन्नायिकाभ्यो बलिं विकिरेत् । ताश्च षण्णवतिसंख्याः ।

यथा —

विद्या प्रज्ञा सिनीवाली कुहूर्ह्रीः पुष्टिरेव च ॥ ७७ ॥

रुद्रवीर्या प्रभा नन्दा पोषणी शुभदा क्षमा ।
इति प्राच्यामथाग्नेय्यां कालरात्री कपर्दिनी ॥ ७८ ॥

भद्रकाली च विकृतिर्दण्डिनी च कपालिनी ।
मुसृण्ठिनी सेन्दुखण्डा निसुम्भमथिनी ततः ॥ ७९ ॥

शिखण्डिनी तथेन्द्राणी रुद्राणी चेति संस्थिताः ।
नारी नारायणी भद्रा शङ्करार्धशरीरिणी ॥ ८० ॥

+ + त्रिशूलिनी चा(प्य ? पि अ)म्बिका ह्लादिनी रतिः ।
पिङ्गाक्षी च विशालाक्षी समृद्धिश्चेति दक्षिणे ॥ ८१ ॥

बुद्धिर्वृद्धिः स्वधा स्वाहा मायाभिख्या वसुन्धरा ।
त्रिलोकधात्री जगती बृहती त्रिदशेश्वरी ॥ ८२ ॥

अरुणा चेति नैर्ऋत्यां नायिका द्वादश स्थिताः ।
सुरुचा बहुरूपा च स्कन्दसेना च वारुणी ॥ ८३ ॥

अमला विमला ख्यातिः प्रकृतिर्विकृतिः स्थितिः ।
सृष्टिः सन्ध्या च वारुण्यां नायिका द्वादश स्थिताः ॥ ८४ ॥

संहृतिश्च जगन्माता सती चैव च हंसिनी ।
देवमाता वज्रिणी च मर्दनी भगवत्यपि ॥ ८५ ॥

पद्मासना देवकी च त्रिमुखी च चतुर्मुखी ।
गौरीपारिषदा मुख्या वायव्यां द्वादश स्थिताः ॥ ८६ ॥

सप्तानना चाष्टमुखी देवासुरविमर्दिनी ।
लम्बोष्ठी लम्बकेशी चाप्यूर्ध्वकेशी महोदरी ॥ ८७ ॥

रेखा च शशरेखा च विश्वरूपा कृशोदरी ।
धनदा चेति कौबेर्यां नायिका द्वादश स्थिताः ॥ ८८ ॥
सुररक्षणिका चार्या वागीशी + + + + + ।
+ + व्रता वज्रवेगा वायुवेगा महेश्वरी ॥ ८९ ॥
ऐशानी ज्वालिनीसंज्ञा शाङ्करी चेति नायिकाः ।
द्वादशैताः स्युरैशान्यां गौरीपारिषदाः स्थिताः ॥ ९० ॥
एताः पृथक् परिषदां सहस्रैः परिवारिताः ।
जगत्संहृतिसम्भूतिस्थित्यनुग्रहहेतवः ॥ ९१ ॥
सर्वासामपि चैतासां शुक्लान्नगुलपायसैः ।
घृतक्षौद्रप्लुतैर्दद्याद् बलिं भक्त्या तु देशिकः ॥ ९२ ॥
ततः शैवोक्तमार्गेण तीर्थस्नानं समाचरेत् ।
मूलङ्गैर्वैदिकैर्मन्त्रैर्यजेच्च सविशेषकम् ॥ ९३ ॥
स्नपयेच्च सहस्रादिकलशैरुपपत्तितः ।
शिवगौरी चैकगौरी स्थिरगौरी द्विधा स्मृता ॥ ९४ ॥
पत्नीत्वेन शिवस्यैव स्थिरलिङ्गगतस्य या ।
प्रतिष्ठिता समीपे तु शिवगौरी स्मृता हि सा ॥ ९५ ॥
गौरी सभूतैर्देवैर्वा मुनिभिर्वाथ मानवैः ।
स्थिरलिङ्गं विना सा चेदेकगौरी प्रतिष्ठिता ॥ ९६ ॥
न पृथक्छिवगौर्यास्तु प्रशस्तः स्यान्महोत्सवः ।
शिवोत्सवे महेशेन यात्रा तस्याः प्रशस्यते ॥ ९७ ॥
नित्योत्सवान्ता(पूजान्तात् ?)पूजा स्याच्छिवगौर्या यथाविधि ।
एकगौर्याः स्वतन्त्रस्तु पृथक् कार्यो महोत्सवः ॥ ९८ ॥
इत्थं गौरीं प्रतिष्ठाप्य यथाविभवमादरात् ।
कल्पयन्त्युत्सवान्तां ये नित्यपूजां यथाविधि ॥ ९९ ॥
न तेषां शक्यते वक्तुं पुण्यं युगशतैरपि ।
यद्यदिष्टतमं लोके दृष्टादृष्टफलं महत् ॥ १०० ॥
तत् तत सर्वमयत्नेन लभन्ते कर्तृपूर्वकाः ।

निगदितमिह गौर्यास्तन्त्रमेतत् समासा-
ल्ललितमपि च बिम्बं भानुतन्त्रे च दृष्ट्वा।
विविधमिह विधिज्ञैर्यत् प्रतिष्ठादिकृत्यं
सकलमपि तदूह्यं प्रोक्तशैवानुसारात् ॥ १०१$\frac{1}{2}$ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे
उपरिभागे क्रियापादे गौरीतन्त्रपटलः
षट्पञ्चाशः ॥

अथ सप्तपञ्चाशः पटलः।

प्रतिष्ठाथ सरस्वत्याः कथ्यते तन्त्रचोदिता।
तारश्च नादो बिन्द्वन्तस्तत्पूर्वोऽन्त्यस्वरान्वितः ॥ १ ॥

बीप्सितो (प ? व)दशब्दश्च वाग्वादिनिपदं ततः।
मरुत्सखप्रियान्तोऽयं जगत्यर्णो हि वाङ्मनुः ॥ २ ॥

तारादिः स्याद् द्विजातीनामन्येषां केवलः स्मृतः।
साग्निर्नादस्तु तारादिर्दीर्घैर्युक्तः क्रमात् स्वरैः ॥ ३ ॥

ऋगादिवेदशब्दैश्च धर्मशास्त्रपदेन च।
पुराणपदसंयुक्तैः षड्भिर्मन्त्रपदैः क्रमात् ॥ ४ ॥

स्वजातियुक्तान्यङ्गानि षडस्त्रान्तानि कल्पयेत्।
वागीश्वरी चतुर्थ्यन्ता विद्महेपदसंयुता ॥ ५ ॥

वाग्वादिनीपदस्यान्ते धीमहीति पदं भवेत्।
तन्नः सरस्वती प्रेति चोदयादिति योजिता ॥ ६ ॥

तारादिका सरस्वत्या गायत्री सर्वसिद्धिदा।
मध्येन दशतालेन प्रोक्तस्त्रीमानतः कृता ॥ ७ ॥

प्रतिमा स्यात् सरस्वत्याः शुक्लवर्णा चतुर्भुजा।
सवरां लेखनीं वामे कलशं चापि बिभ्रती ॥ ८ ॥

अभयं पुस्तकं तद्वदधश्चोर्ध्वं च दक्षिणे।
शङ्खकुन्देन्दुधवला सकपर्देन्दुशेखरा ॥ ९ ॥

त्रिनेत्रा शुक्लवसना माल्यगन्धविभूषिता ।
हारिहारोल्लसत्तुङ्गपीवरस्तनमण्डला ॥ १० ॥
सुप्रसन्नमुखाम्भोजा सर्वाभरणभूषिता ।
पद्मासने(पू ? सू)पविष्टा नवयौवनमण्डिता ॥ ११ ॥
वागीश्वरीप्रतिष्ठायां कर्म शैवोक्तमार्गतः ।
विशेषो दक्षिणद्वारे स्थाप्या स्याद् दक्षिणामुखी ॥ १२ ॥
उत्तराभिमुखी पूज्या चाधिवासनमण्डपे ।
पुष्करः पूर्णभद्रश्चाप्यानन्दो नन्दनस्तथा ॥ १३ ॥
पूर्वादितोरणास्तद्वद् ध्वजौ द्वौ द्वौ यथाक्रमम् ।
प्राच्यामैन्द्रश्च वज्राङ्को याम्यो दण्डाङ्क एव च ॥ १४ ॥
वारुणश्चाथ पाशाङ्कः कौबेरश्च गदाङ्कितः ।
मेधा प्रज्ञा प्रभा विद्या धीर्धृतिस्मृतिबुद्धयः ॥ १५ ॥
द्वारकुम्भस्थिता दूत्यः पूजनीयाः स्वनामभिः ।
मध्यस्तम्भेषु चत्वारोऽप्याग्नेयादिष्वृगादयः ॥ १६ ॥
वेदबाह्ये रविस्तम्भाः शिक्षा कल्पो निरुक्तकम् ।
छन्दो ज्योतिः सूत्रपाठो मीमांसा न्यायविस्तरः ॥ १७ ॥
धर्मशास्त्रं पुराणं च दण्डनीतिश्च वै क्रमात् ।
विद्यात्मकं वितानं स्यात् स्थलं तु पृथिवी स्वयम् ॥ १८ ॥

सर्वत्रापि तारादिनमोन्तैः स्वाख्याभिर्यजेत् ।

ततः पुण्याहविकिरक्षेपात् कुम्भास्त्रपूजने ।
स्यात् कुम्भे हंसगा वाणी तदस्त्रं सारसोपरि ॥ १९ ॥
रक्ताकल्पं रक्तवर्णं षड्भुजं सत्रिलोचनम् ।
स्त्रीरूपं भूषितं वामे वरपुस्तकपाशधृक् ॥ २० ॥
दक्षिणे साभयं[1] + (कं[2] ?) लेखिनीं चाङ्कुशं दधत् ।
प्राग्वन्नवसु कुण्डेषु वह्निं मध्यादिभाजितम् ॥ २१ ॥
निक्षिप्यावाह्य वागीशीं मूलाङ्गैर्मध्यमे गुरुः ।
योगादिमूर्तिभिर्दिक्षु जुहुयुर्मूर्तिधारकाः ॥ २२ ॥

---

[1] 'य' क. पाठः. [2] 'का' ख. पाठः.

गायत्र्या चापि लोकेशमन्त्रैरपि यथाक्रमम् ।
समिदाज्यचरूँल्लाजान् व्रीहिसिद्धार्थसर्षपान् ॥ २३ ॥

तिलांश्चाष्टोत्तरशतं जुहुयुस्ते पृथक् पृथक् ।
प्राग्वदाकारशुद्धिं च कुर्याच्चाक्षिविमोक्षणम् ॥ २४ ॥

जलाधिवासनं ग्रामभ्रमणं स्नपनं तथा ।
मूर्तीरथ सरस्वत्या विद्याकुम्भाष्टके यजेत् ॥ २५ ॥

योगां सत्यां च विमलां ज्ञानां बुद्धिं क्रियां तथा ।
मेधां श्रद्धां च ताः सर्वाः सकमण्डलुपुस्तकाः ॥ २६ ॥

साक्षमालालेखनिकाः शुक्लाः शुक्लाम्बरादिकाः ।
ततो बेरत्रिभागेषु जानुकण्ठशिरोवधि ॥ २७ ॥

आत्मादितत्त्वतत्त्वेशान् ब्रह्मादीन् विन्यसेत् क्रमात् ।
तेषु पृथ्व्याद्यष्टमूर्तीस्तच्छक्तीर्धारिकादिकाः ॥ २८ ॥

न्यसेज्ज्ञानीतनौ देव्याः पीठे शक्तिं क्रियाह्वयाम् ।
हुत्वा हुत्वा च तन्मन्त्रैः संस्पृशेयुर्यथापुरम् ॥ २९ ॥

अथ प्रातः कृतस्नानो गुरुर्मूर्तिधरैः सह ।
कृतसन्ध्याविधिर्लग्ने लि । कूर्माह्वयां न्यसेत् ॥ ३० ॥

रत्नादिपञ्चवर्गांश्च तस्यां पीठं च पूर्ववत् ।
पीठे च प्रतिमां न्यस्येत् कुर्याद् बन्धेन सुस्थिरम् ॥ ३१ ॥

प्रक्षाल्य किञ्चिदिष्ट्वा च मूर्तिं विद्यातनुं न्यसेत् ।
कुम्भस्थां मूलतो वाणीमूर्तिहृत्पङ्कजे न्यसेत् ॥ ३२ ॥

ततो मूलाङ्गगायत्री मातृकोक्ताक्षराणि च ।
उक्ताक्षराणि नामशक्तिवाग्भवानीति यावत् ।
मन्त्राध्वानात् पदैरेव पदाध्वान्ये च पूर्ववत् ॥ ३३ ॥

अथापूर्याञ्जलिं पुष्पैः कुण्डलिन्यादितः स्वतः ।
ध्यायन् सूक्ष्मां च पश्यन्तीं मध्यमां वैखरीमपि ॥ ३४ ॥

ऊर्ध्वामुत्क्षिप्य तां वाचं विद्युल्लेखानुकारिणीम् ।
द्वादशान्ते समायोज्य तच्चैतन्योपबृंहिताम् ॥ ३५ ॥

पुष्पाञ्जलौ सुसंक्रान्तां हंसमुच्चारयन् प्लुतम् ।
आनीय ब्रह्मनाड्या तां मूर्तिहृत्पङ्कजे न्यसेत् ॥ ३६ ॥

स्थापनं सन्निरोधं च रोचनं चावकुण्ठनम् ।
अमृतीकरणं चाङ्गैर्विधायार्घ्यं प्रदाय तु ॥ ३७ ॥

षडध्वभावनां कृत्वा विद्याकुम्भेऽष्टकेन च ।
निद्रास्त्राभ्यां चाभिषिच्य यजेदर्घ्यादिभिः क्रमात् ॥ ३८ ॥

तद्यथा —

स्नात्वा गणेशमभ्यर्च्य सकलीकृतविग्रहः ।
सामान्यार्घ्येण तद्वाःस्थौ विघ्नक्षेत्रपती यजेत् ॥ ३९ ॥

गङ्गां च यमुनां प्राग्वद् द्वारलक्ष्मीं तथोपरि ।
अस्त्रं क्षिप्त्वा प्रविश्यान्तर्देहल्यां विनिधाय तत् ॥ ४० ॥

वास्तुब्रह्मासनादीष्ट्वा सूपविष्टोऽर्घ्यमर्चयेत् ।
शुद्धीः पञ्च विधायाथ तिलकी पुष्पशेखरः ॥ ४१ ॥

आधारशक्तिं पृथिवीं विद्यां सिंहासनाकृतिम् ।
कृतत्रेतादिकान् पादान् सिंहाकारान् विदिग्गतान् ॥ ४२ ॥

रजस्तमश्च सत्त्वं च कन्दं नालं च पङ्कजम् ।
सूर्यादिमण्डलाधीशान् ब्रह्मादीन् छदनादिषु ॥ ४३ ॥

मेरुं तत्कर्णिकायां च पत्रद्वादशके गिरीन् ।
दिक्ष्वेकैकं च कोणेषु पूजयेत् केसराह्वयान् ॥ ४४ ॥

प्राग्दले मन्दरगिरिर्दक्षिणे गन्धमादनः ।
विपुलः पश्चिमदले सुपार्श्वश्चोत्तरच्छदे ॥ ४५ ॥

हिमवान् हेमकूटश्च निषधो माल्यवांस्तथा ।
कैलासश्चैव नीलश्च श्वेतश‍ृङ्गी च तान् यजेत् ॥ ४६ ॥

प्रोक्तमार्गेण वाङ्मूर्तिं विद्यादेहं यथापुरम् ।
देवीं चावाह्य मूलाङ्गैः स्थापनाद्यं विधाय तु ॥ ४७ ॥

अर्घ्याद्यैस्तु निवेद्यान्तैरुपचारैर्यजेत् क्रमात् ।
अङ्गानि केसरेष्विष्ट्वा शक्तिद्वादशकं ततः ॥ ४८ ॥

ऋद्धिं रतिं तथा प्रीतिं शान्तिं दिग्दलगां यजेत् ।
योगां सत्यादिके द्वे द्वे कोणच्छदयुगेष्वपि ॥ ४९ ॥

चन्द्रार्कौ भासयन्तौ द्वावूर्ध्वगौ दक्षिणोत्तरे ।
ब्रह्मा च दक्षिणे देव्या विष्णुर्वामे शिवोऽग्रतः ॥ ५० ॥

पश्चिमे मुनयश्चैतान् भित्तिष्वालेख्यगान् यजेत् ।
मेधाप्रज्ञादिके द्वे द्वे द्वाःस्थे द्वारचतुष्टये ॥ ५१ ॥

स्वाशासु लोकपालांश्च हंसं च मुखमण्डपे ।
वीरं विघ्नं तथा मातॄः शास्तारं चण्डिकामपि ॥ ५२ ॥

सोमं च क्षेत्रपालं च स्थापयेत् स्वदिशास्विमान् ।
बलिपीठं च संस्थाप्य पूजयेत् प्रथमेऽहनि ॥ ५३ ॥

द्वितीयेऽह्नि स्वमूलाङ्गैर्मूर्तिलोकेशदैवतैः ।
तृतीये व्याहृतीभिश्च गायत्र्या च जयादिभिः ॥ ५४ ॥

प्रायश्चित्तैश्च हुत्वाथ चतुर्थदिवसे ततः ।
प्राग्वत् संस्नाप्य तु यजेन्मार्तिं निर्माल्यधारिणीम् ॥ ५५ ॥

पूर्णां स्विष्टकृतं चापि हुत्वाग्नीन् स्वहृदम्बुजे ।
योजयेद् द्वादशान्ते वा स्नपयेच्च शताधिकैः ॥ ५६ ॥

सविशेषमथाराध्य दत्त्वाचार्यादिदक्षिणाः ।
निशि भूतबलिं दत्त्वा नित्यपूजां च कल्पयेत् ॥ ५७ ॥
प्राग्वद् वित्तानुसारेण प्रोक्तं कर्ताश्नुते फलम् ।

सरस्वतीप्रतिष्ठाधिकारः ॥

नित्योत्सवे सरस्वत्या मेधाद्या द्वारपालिकाः ॥ ५८ ॥

ताभ्यो विकीर्य तु बलिं लोकेशेभ्यो यथापुरम् ।

तत्रायं बिशेषः—सरस्वतीपार्षदे नमः तत्पार्षदेभ्यो नमः इति तत्तल्लोकपालनाम्ना बलिं क्षिपेत् ।

सरस्वतीवाहनाय हंसायेत्यग्रमण्डपे ॥ ५९ ॥

विघ्नाय वीरभद्राय मातृभ्यः शास्त्र एव च ।
चण्डिकेन्दुक्षेत्रपेभ्यो मत्यै च प्रक्षिपेद् बलिम् ॥ ६० ॥

कृत्यै च प्रतिभायै च गोपुरद्वारि निक्षिपेत् ।
सम्प्राप्य बलिपीठाग्रं गणानामन्त्रयेत् ततः ॥ ६१ ॥

ये समस्तं जगद् व्याप्य चरन्ति बलिकाङ्क्षया ।
सरस्वतीपारिषदा गृह्णन्तूपहृतं बलिम् ॥ ६२ ॥

इति ।

ततो द्वितीयहारायामष्टदिक्षु स्थिताः क्रमात् ।
दिग्गजास्तु बलिं तेभ्यः स्वाख्याभिः प्राक्षिपेदपि ॥ ६३ ॥

ऐरावतः पुण्डरीकः कुमुदाञ्जनवामनाः ।
पुष्पदन्तः सार्वभौमः सुप्रतीकस्तथाष्टमः ॥ ६४ ॥

बलिपीठेऽथ विश्वेभ्यो दशभ्यः प्राक्षिपेद् बलिम् ।
क्रतुर्दशः सुवस्तव्यः का + + मो ध्वनिस्तथा ॥ ६५ ॥

कुरुमानष्टमस्ते तु पीठस्याष्टादीशि स्थिताः ।
मध्यमान्वै कुमुदकैः स्थितस्तेषां बलिं क्षिपेत् ॥ ६६ ॥

सरस्वतीसेनाया रोचमानाय नमः इति पीठोर्ध्वतो मध्ये रोचमानाय निक्षिपेत् ।

नित्योत्सवे बलि + + + + + + + + + + ॥ ६७ ॥
+ + + + + + + + + + + + स्वनामतः ।

लोकपालबलेः पश्चाद् ओं ये भूताः पुरःसदः ॥ ६८ ॥

भगवत्याः सरस्वत्यां इत्याद्यैः प्राक्षिपेद् बलिम् ।
तद्वत् तृतीयहारायां गणास्त्वष्टदिशं स्थिताः ॥ ६९ ॥

तद्यथा —

वसवश्चाश्विनौ रुद्राः पित्रादित्यगणा अपि ।
ताक्ष्यः सप्तर्षिपूर्वाश्च प्रजानां पतयस्ततः ॥ ७० ॥

ते च —

धरो ध्रुवश्च सोमश्चाप्यापश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ तु पूर्वगाः ॥ ७१ ॥

नासत्यदस्रावाग्नेय्यामाश्विनौ तु व्यवस्थितौ ।
अजैकपादहिर्बुध्निर्विरूपाक्षोऽथ रैवतः ॥ ७२ ॥

पिनाकी चेश्वरः स्थाणुः कपाली च त्रियम्बकः ।
बहुरूपो भवश्चेति रुद्रास्त्वेकादश क्रमात् ॥ ७३ ॥

एते दक्षिणे स्थिताः ।

सोमश्च पितृमांस्तद्वद् यमः पितृगणेश्वरः ।
अङ्गिरस्वांस्तथा चाग्निः सप्तमः कव्यवाहनः ॥ ७४ ॥
पितरः पितामहाख्यास्तथैव प्रपितामहाः ।
दशैते पितरः ख्याताः स्थिता निर्ऋतिगोचरे ॥ ७५ ॥
धातार्यमा च मित्रश्च वरुणश्च भगस्तथा ।
इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः ॥ ७६ ॥
त्वष्टा च विष्णुरित्येते आदित्या द्वादशाम्बुपे ।
तार्क्ष्यश्चारिष्टनेमिश्च गरुडश्चारुणस्तथा ॥ ७७ ॥
अरुणिः क्रथनः क्राथः सुपर्णः सप्त मारुते ।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कश्यपः ॥ ७८ ॥
जमदग्निस्तथैवात्रिर्वसिष्ठश्चाप्यरुन्धती ।
ध्रुवश्च शिंशुमारश्चेत्येते तूत्तरतः स्थिताः ॥ ७९ ॥
भृगुर्दक्षो मरीचिश्चाप्यङ्गिराः पुलहः क्रतुः ।
पुलस्त्योऽत्रिर्वसिष्ठश्च प्रजानां पतयः स्थिताः ॥ ८० ॥

ऐश इति यावत् ।

ततश्चतुर्थहारायां गन्धर्वाश्चाप्सरोगणाः ।
सिद्धाः साध्यास्तथा नागा विद्याधरगणास्तथा ॥ ८१ ॥
यक्षाः सराक्षसा दैत्याः क्रमाद् दिक्ष्वष्टसु स्थिताः ।
एषां तारादिसंज्ञाभिर्नमोन्तं निक्षिपेद् बलिम् ॥ ८२ ॥
ततश्चैन्द्र्यां दिशि गणा वज्रहस्ता महाबलाः ।
इत्यादिमन्त्रैर्विकिरेद् बलिं दशदिशास्वपि ॥ ८३ ॥
उद्दिष्टदिवसान्ते तु गणानुत्सृज्य पूर्ववत् ।
तीर्थयात्रां विधायाथ सविशेषं यजेद् गिरम् ॥ ८४ ॥
अवतार्य ध्वजं चाथ सहस्रकलशादिभिः ।
कलशैरुपपत्त्या तु स्नपयित्वाभिपूज्य च ॥ ८५ ॥

दक्षिणाश्च प्रदेयानि दत्त्वा प्राग्वद् यथाविधि ।
पूर्वोक्तं फलमाप्नोति वागीश्वर्याः प्रसादतः ॥ ८६ ॥
इत्थं प्रोक्तं यद् बृहत्तन्त्रगीतं दृष्टं बिम्बे यच्च देवोद्भवाख्ये ।
वागीश्वर्यास्तन्त्रमेतत् समासादत्रैवोह्यं तच्च शैवानुसारात् ॥ ८७ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे
उपरिभागे क्रियापादे वागीश्वरीतन्त्र-
पटलः सप्तपञ्चाशः ॥

अथाष्टपञ्चाशः पटलः ।

अथ शास्तुः प्रतिष्ठाद्यं कथ्यते तन्त्रचोदितम् ।
मन्त्रश्चाप्यन्तनादौ तु नवमस्वरभूषितौ ॥ १ ॥
बिन्दुनादसमोपेतौ नमश्शब्दस्ततो भवेत् ।
षष्ठाद्यं च सदीर्घोऽग्निर्वायुर्गोप्त्रेपदं ततः ॥ २ ॥
नमोन्तो मूलमन्त्रोऽयं रुद्रार्णस्तारपूर्वकः ।
तारं षष्ठाच्चतुर्थं तु दीर्घोऽनुस्वारनादवान् ॥ ३ ॥
भूताधिपतयेशब्दो नमोन्तोऽस्यार्चने मनुः ।
रेवन्ताय ततः शास्त्रे गोप्त्रे च प्रभवे तथा ॥ ४ ॥
दीप्त्रे चैव प्रशास्त्रे च षडिमे प्रणवादिकाः ।
नमोन्ता जातियुक्ताः स्युः षडङ्गानि यथाक्रमम् ॥ ५ ॥
खड्गाय क्षुरिकायै च धनुषे च शराय च ।
हुं फडाद्या नमोन्ताः स्युः शस्त्रमन्त्रा यथाक्रमम् ॥ ६ ॥
वामतोऽस्य प्रभा देवी दक्षिणे सत्यकः सुतः ।
स्कन्दो गजाननश्चाथ शाम्बोऽथ मधुकस्तथा ॥ ७ ॥
पीठबाह्ये समासीनास्तन्मन्त्राः स्वस्वनामभिः ।
गोप्ता च पिङ्गलाक्षश्च वीरसेनश्च शाम्भवः ॥ ८ ॥
त्रिनेत्रः शूलभृद् दक्षो भीमरूपस्तथाष्टमः ।
एतेऽष्टमूर्तयः शास्तुः पृथिव्यादिभिरन्विताः ॥ ९ ॥
तारादिका नमोन्ताः स्युस्तेषां मन्त्राः स्वनामभिः ।
आर्यः शास्ता गुहासन्नः सेनानीर्भूतवल्लभः ॥ १० ॥

रुद्रजो रुद्रवान् कामी वरदो लोकपूजितः ।
नीलाश्वः श्वेतमातङ्गः श्यामः पीतानुलेपनः ॥ ११ ॥
रक्तमालाध(रश ? रः शू)रो मायी मातृगणप्रियः ।
कालवासा गणाध्यक्षः खड्गहस्तो धनुर्धरः ॥ १२ ॥
सहजायो जनावेशः साधुः संसाररक्षकः ।
मधुमान् शम्बरश्चैते ह्यष्टाविंशतिनामभिः ॥ १३ ॥
मन्त्राः स्युर्भूतनाथस्य तारपूर्वनमोन्तकैः ।
जपेऽर्चायां च नत्यन्ता होमे स्वाहान्तयोजिताः ॥ १४ ॥
महोत्सवबलावेभिरष्टाविंशतिनामभिः ।
भूतसेनाधिपतयो बाह्ये योज्या भवन्ति हि ॥ १५ ॥
भूतनाथश्चतुर्थ्यन्तो विद्महेपदयोजितः ।
भवपुत्रस्तथास्यान्ते धीमहि तन्न इत्यपि ॥ १६ ॥
शास्ता प्रचोदयादेषा गायत्री तारपूर्विका ।

मन्त्रोद्धाराधिकारः ।

कनिष्ठदशतालेन शास्तुर्बेरं तु कारयेत् ॥ १७ ॥
प्रोक्तमानादिसंयुक्तं सौम्यवक्त्रं चतुर्भुजम् ।
प्रभूतसिंहासनाब्जे स्वासीनं वामपादतः ॥ १८ ॥
दक्षिणेन तु पादेन लम्बेनाक्रान्तपङ्कजम् ।
शरं च क्षुरिकां चापं खड्गं बिभ्रच्चतुर्भुजम् ॥ १९ ॥
नवयौवनरम्याङ्गं नीलकुञ्चितमूर्धजम् ।
पद्मायतविशालाक्षं पूर्णेन्दुसदृशाननम् ॥ २० ॥
रत्नजालोल्लसन्मौलिं सुमृष्टमणिकुण्डलम् ।
हारिहाराभिरामाङ्गमाबद्धोदरबन्धनम् ॥ २१ ॥
रत्नाङ्गुलीयकटकचारुकेयूरराजितम् ।
कटिसूत्रोल्लसद्रक्तवसनं चारुनूपुरम् ॥ २२ ॥
निबिडाबद्धनिस्त्रिंशं श्यामलं कोमलाकृतिम् ।
रक्ताकल्पं सुलीनांसं दिव्यरूपं मनोरमम् ॥ २३ ॥

प्रभां च नवतालेन दिव्यरूपामलङ्कृताम् ।
उपविष्टां दक्षिणेन लम्बमानाङ्घ्रिपङ्कजाम् ॥ २४ ॥
नीलोत्पलकरां शास्तुर्वामभागावलम्बिनीम् ।
अष्टवर्षार्भकप्रख्यं सत्यकं चाष्टतालतः ॥ २५ ॥
शास्तुर्दक्षिणपार्श्वस्थं दिव्याकारमलङ्कृतम् ।
एवं बेराणि संपाद्य प्रतिष्ठामथ कारयेत् ॥ २६ ॥
प्राग्वत् षोडशपादाढ्ये त्वधिवासनमण्डपे ।
क्षुरिकेशश्च खड्गेशो धन्वे[1]शश्च शरेश्वरः ॥ २७ ॥
प्रागादितोरणाः पूज्याः चत्वारोऽष्टौ ध्वजास्तथा ।
ऐन्द्रश्चैव तथाग्नेयो याम्यो नैर्ऋतवारुणौ ॥ २८ ॥
वायव्यश्चाथ कौबेरश्चैशानश्चास्त्रचिह्निताः ।
अर्घ्यादिभिस्तु नत्यन्तं सर्वान् स्वाख्याभिरर्चयेत् ॥ २९ ॥
वीरबाहुं महावीर्यं विद्युज्जिह्वं विलासिनम् ।
तीक्ष्णं च तीक्ष्णनेत्रं च काकाक्षं च भवोद्भवम् ॥ ३० ॥
द्वारेषु क्रमशो द्वौ द्वौ कुम्भस्थान् पूजयेदिमान् ।
अथ पुण्याहविकिरक्षेपात् कुम्भायुधे यजेत् ॥ ३१ ॥
अश्वारूढं भूतनाथं कुम्भेऽस्त्रं गजवाहनम् ।
स्त्रीरूपं क्षुरिकास्त्रं तद् रक्ताकल्पं त्रिलोचनम् ॥ ३२ ॥
बद्धचण्डातकं पिङ्गज्वलितोर्ध्वशिरोरुहम् ।
अभ्यर्च्य तद्भ्रमादूर्ध्वं नवकुण्डाहिताग्निषु ॥ ३३ ॥
शास्तुर्मूलाङ्गमूर्तीनामावाहनहुतादनु ।
प्राग्वदाकारशुद्धिं च नयनोन्मीलनं तथा ॥ ३४ ॥
जलाधिवासनं ग्रामभ्रमणं स्नपनं तथा ।
पूर्ववच्छयनं वेद्यां कुर्याच्छैवोक्तमार्गतः ॥ ३५ ॥
ततः कुम्भास्त्रनिद्राष्टमूर्तिकुम्भादिपूजनम् ।
पूर्वोक्ता मूर्तयो ह्यष्टौ गोप्त्राद्याः शास्तृरूपिणः ॥ ३६ ॥
प्राग्वत् त्रितत्त्वतत्त्वेशमनून् न्यस्य पृथक् क्रमात् ।
पृथ्व्यादियुक्ता गोप्त्राद्यास्ततस्तु गुरुमूर्तिपाः ॥ ३७ ॥

---

[1] ने' क, पाठः,

एभिरेव यथापूर्वं हुत्वा स्पृष्ट्वाभिपूज्य च ।
वेरे ज्ञानाह्वयां शक्तिं पीठे शक्तिं क्रियात्मिकाम् ॥ ३८ ॥
धारिकाद्याश्च विन्यस्य संपूज्य च यथाविधि ।
ततः प्रातः कृतस्नानो गुरुर्मूर्तिधरैः सह ॥ ३९ ॥
कृतनित्यक्रियो लग्ने गर्भागारं प्रविश्य तु ।
मानुषे तु पदे कूर्मशिलां विन्यस्य पूर्ववत् ॥ ४० ॥
रत्नादिपञ्चवर्गांस्तु न्यसेत् पीठं तथोपरि ।
प्रतिमां च प्रतिष्ठाप्य कुम्भान् मूलं च तद्धृदि ॥ ४१ ॥
नियोज्य मूर्तिं तन्मन्त्रदेहं च क्षालयेत् ततः ।
आधारादुद्गतं ज्योतिर्हृत्पद्मस्थं सुषुम्नया ॥ ४२ ॥
नीत्वोर्ध्वं बिन्दुतो व्योम तदब्जेन्दुसमन्वितम् ।
पुष्पाञ्जलौ तु संक्रान्तं नादबिन्दूपबृंहितम् ॥ ४३ ॥
प्लुतान्तमुच्चरन् मन्त्रं न्यस्येन्मूर्तिहृदम्बुजे ।
स्थापनादीनि कृत्वाङ्गैर्निद्रामूर्तिघटाम्बुभिः ॥ ४४ ॥
अभिषिच्य स्वमूलाङ्गैरध्वनः षड् विभावयेत् ।
मूलाङ्गैश्च स्वगायत्र्या मन्त्राध्वास्य प्रकीर्तितः ॥ ४५ ॥
एतेषां तु पदैरेव पदाध्वानं च कल्पयेत् ।
शेषाध्वनो यथापूर्वं परिभाव्यार्चयेत् ततः ॥ ४६ ॥

तद्यथा —

स्नात्वा तु सकलीकृत्य विघ्नं द्वारं च पूजयेत् ।
क्षुरिकाखड्गपाणी द्वौ द्वाःस्थावुभयतो यजेत् ॥ ४७ ॥
यक्षं विद्याधरं द्वारश्रियं चोपरि पूजयेत् ।
अस्त्रं क्षिप्त्वा प्रविश्यान्तर्देहल्यां विनिधाय तत् ॥ ४८ ॥
वास्तुब्रह्मासनानीष्ट्वा मूलाङ्गैरर्घ्यमर्चयेत् ।
गन्धपुष्पकुशक्षीरतिलसिद्धार्थकाक्षतैः ॥ ४९ ॥
अर्घ्यं स्याद् भूतनाथस्य तिलपुष्पाक्षताम्बुभिः ।
चन्दनं च निशा पाद्यमथ पद्मं च चन्दनम् ॥ ५० ॥

लवङ्गं वारि चाचामं हृदा सर्वं समर्पयेत् ।
पञ्चशुद्धीर्विधायास्त्रप्राकारं चालयेद् बहिः ॥ ५१ ॥

तिलकी सशिखापुष्पः शक्तिपीठं धरात्मकम् ।
प्रभूतसिंहासनाय सर्वशक्तिमयाय च ॥ ५२ ॥

नम इत्यभिपूज्याङ्घ्रीन् धर्मादीन् सिंहविग्रहान् ।
तमःसत्त्वरजःपद्मं शक्तिं चाष्टौ दलाग्रगाः ॥ ५३ ॥

गोप्त्रीं च पिङ्गलाक्षीं च वीरसेनां च शाम्भवीम् ।
त्रिनेत्रां शूलिनीं दक्षां भीमरूपां च पूजयेत् ॥ ५४ ॥

नवमीं तु प्रभां वामे दक्षिणे सत्यकं तथा ।
ततो मूर्तिं मन्त्रदेहं संकल्प्यावाहयेद् विभुम् ॥ ५५ ॥

आधारा(द्यु? द्)द्गतं प्राग्वज्ज्योतिर्मात्रं चिदात्मकम् ।
आवाह्य स्थापनाद्यैश्च निवेद्यान्तं तु पूजयेत् ॥ ५६ ॥

केसरेषु पुनः स्वाङ्गैर्दलाग्रेष्वष्टशक्तिभिः ।
विघ्नाद्यैः पीठबाह्येऽथ स्थापयेत् परिवारकान् ॥ ५७ ॥

क्षुरिकाखड्गपाणी द्वौ स्थितौ विन्यस्य बाह्यतः ।
स्वाशासु लोकपालानप्यश्वं तु मुखमण्डपे ॥ ५८ ॥

वीरं विघ्नं सप्तमातॄः सोमं स्वाशासु विन्यसेत् ।
बलिपीठं च विन्यस्य जुहुयुर्लोकपाह्वयैः ॥ ५९ ॥

द्वितीयेऽह्न्यपि पूर्वोक्तसमिदाज्यादिभिः क्रमात् ।
मूलाङ्गैरपि गायत्र्या मूर्तिशक्त्यष्टकाह्वयैः ॥ ६० ॥

अष्टाविंशतिकृत्वस्तु जुहुयुः समिदादिभिः
तृतीयदिवसे हेतिमन्त्रैरष्टोत्तरं शतम् ॥ ६१ ॥

हुत्वा जयादिभिश्चाथ प्रायश्चित्तैर्जुहोति च ।
चतुर्थदिवसे वह्नीनायोज्यात्मनि देशिकः ॥ ६२ ॥

निर्माल्यधारिणं चैशे घोषवन्तं न्यसेद् यजेत् ।
एकाशीतिघटैरुक्तमार्गेण स्नपयेद् विभुम् ॥ ६३ ॥

दक्षिणाः पूर्ववद् दत्त्वा क्षिप्त्वा भूतबलिं निशि ।
नित्यपूजादिसिद्धयर्थं संकल्प्य विभवादिकम् ॥ ६४ ॥
कर्ता कामानवाप्नोति दृष्टादृष्टफलोदयात् ।

भूतनाथप्रतिष्ठाधिकारः ।

नित्योत्सवे द्वारपालौ क्षुरिकाखड्गधारिणौ ॥ ६५ ॥
लोकेशा वाहनं चाश्वस्तेभ्यस्तु विकिरेद् बलिम् ।
शास्तृपारिषदेन्तं तु परिषद्भ्योऽथ तस्य च ॥ ६६ ॥
लोकेशाख्यादिनत्यन्तं निक्षिप्य बलिमादरात् ।
ओं शास्तृवाहनाय नमः ओम् अश्वाय नमः इत्यश्वाय बलिं क्षिपेत् ।
वीरविघ्नेशमातृभ्यः सोमघोषवतोस्ततः ॥ ६७ ॥
तीक्ष्णाय तीक्ष्णनेत्राय गोपुरद्वारि निक्षिपेत् ।
बलिपीठात् पुरः स्थित्वा त्वनेनामन्त्रयेद् गणान् ॥ ६८ ॥

ओं

शाम्बादीनां गणा ये तु कोटिकोटिगुणोत्तराः ।
सर्वे सुप्रीतमनसः प्रतिगृह्णन्त्विमं बलिम् ॥ ६९ ॥
ततोऽष्टदिक्षु प्रागादिस्थिता गोप्त्रादिमूर्तयः ।
गोप्ता च पिङ्गलाक्षश्च वीरसेनश्च शाम्भवः ॥ ७० ॥
त्रिनेत्रः शूलभृद् दक्षो भीमरूपस्तथाष्टमः ।
तेभ्यः क्षेप्यो बलिश्चाथ बलिपीठाष्टदिक्स्थिताः ॥ ७१ ॥
वीरबाहुर्महावीर्यो विद्युज्जिह्वो विलासवान् ।
सुतीक्ष्णस्तीक्ष्णदंष्ट्रश्च ताराक्षश्च भवोद्भवः ॥ ७२ ॥
भूतेशाख्यः कुमुदके स्थितस्त्वेषां बलिं क्षिपेत् ।
स्याद् भूतनाथसेनस्तु पीठे पङ्कजमध्यतः ॥ ७३ ॥
तस्मै क्षेप्यो बलिर्नाम्ना तारपूर्वं नमोन्तकम् ।
एष नित्योत्सवविधिस्तुल्यश्चैव महोत्सवे ॥ ७४ ॥
विशेषः कथ्यते लेख्यो ध्वजेऽश्वः पूज्य एव च ।
शास्तृनामान्वितैर्मन्त्रैर्गणानावाहयेदपि ॥ ७५ ॥

लोकेशबलिदानान्ते

ओं शास्तुर्भगवतो ये भूताः पुरस्सद इत्यादिभिः,
सर्वेभ्योऽपि बलिं क्षिपेत् ।

तद्वत् तृतीयहारायामष्टाविंशतिमूर्तयः ॥ ७६ ॥

शास्तुरेव गणाध्यक्षाः स्थितास्तेभ्यो बलिं क्षिपेत् ।
आर्यः शास्ता गुहासन्नः सेनानीश्चेन्द्रदिक्स्थिताः ॥ ७७ ॥
भूतवल्लभनामा च रुद्रतेजाश्च रूपवान् ।
एते त्रयोऽग्निदिक्संस्थास्त्वथ कामी वरप्रदः ॥ ७८ ॥
लोकार्चितश्च नीलश्च चत्वारो दक्षिणे स्थिताः ।
श्वेतमातङ्गवान् श्यामी पीतालेपश्च नैर्ऋते ॥ ७९ ॥
रक्तमालाधरः शूरो मायी मातृगणप्रियः ।
पश्चिमे त्वथ वायव्ये कालवासा गणाग्रणीः ॥ ८० ॥
खड्गहस्तस्त्रयस्त्वेते तथोदीच्यां धनुर्धरः ।
सहजायो जनावेशः साधुश्चैते व्यवस्थिताः ॥ ८१ ॥
संसाररक्षकस्तद्वन्मधुमान् शम्बरस्तथा ।
ऐशभागे त्रयस्त्वेते भूतसेनाधिपाः स्थिताः ॥ ८२ ॥
विकीर्य बलिमेतेभ्यस्तद्बाह्येऽष्टदिशास्वपि ।
ओम् ऐन्द्यां दिशि गणा ये तु वज्रहस्ता महाबलाः ॥ ८३ ॥
इत्यादिभिः क्रमात् प्राग्वत् पूर्वोक्तं लभते फलम् ।

इति ह कथितमेतद् भूतनाथस्य तन्त्रं
निगदितमपि बिम्बे यच्च देवोद्भवाख्ये ।
तदखिलमवलोक्य स्थापनाद्युत्सवान्तं
विमलमतिभिरूह्यं शैवकृत्यानुसारात् ॥ ८४[१] ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे
उपरिभागे क्रियापादे शास्तृतन्त्र-
पटलोऽष्टपञ्चाशः ॥

---

१. 'ज' क. पाठः.

अथ एकोनषष्टितमः पटलः ।

अथ मातृप्रतिष्ठाद्यं लिख्यते शुद्धपक्षतः ।
स्वच्छन्दादिषु यत् प्रोक्तं मातृतन्त्रेषु चैव हि ॥ १ ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथेन्द्राणी चामुण्डी सप्तमी स्मृता ॥ २ ॥
तासां पूर्वापरासीनौ वीरभद्रश्च विघ्नराट् ।
याद्यक्षराणि हान्तानि शकरीस्वरयोगतः ॥ ३ ॥
बिन्दुमन्त्यष्ट बीजानि खान्तं लम्बोदरस्य हि ।
तारं बीजं नमश्शब्दस्ततो भगवतीत्यपि ॥ ४ ॥
संबुद्ध्यन्तं स्वना(म्ना ? मा)पि मातृमन्त्रादितो भवत् ।
तदूर्ध्वतः क्रमान्मन्त्रा लिख्यन्तेऽत्र पृथक् पृथक् ॥ ५ ॥

ऋग्यजुस्सामाथर्वकमण्डलुकूर्चधारिणि ! नमोनम इति ब्रह्माणीमन्त्रः । देवि ! परशुधारिणि ! श्वेतरूपिणि ! महेश्वरि ! नमोनमः इति माहेश्वर्याः । शक्तिधारिणि ! मयूरवाहिनि ! कुक्कुटध्वजिनि ! कुङ्कुमवर्णिनि ! कौमारि ! नमोनमः कौमार्याः । शङ्खचक्रधारिणि ! गरुडवाहिनि ! वैष्णवि ! नमोनमः वैष्णव्याः । हलमुसलधारिणि ! दंष्ट्रिणि ! सूकरान(नि? ने !) सिंहवाहिनि ! वाराहि ! नमोनमः वाराह्याः । वज्रधारिणि ! गजवाहिनि ! श्यामवर्णिनि । नमोनमः इन्द्राण्याः । कपालधारिणि ! नीलाम्बुवर्णिनि ! प्रेतवाहिनि ! हुङ्कारिणि ! नमोनमः चामुण्ड्याः ।

वीरभद्रस्य तारं च स्वबीजं लकुलीश्वरः ।
पुरुषश्च चतुर्थ्यन्तः पक्षसूत्राग्निधारिणे[1] ॥ ६ ॥
ध्रुवाय पतये योगरूपायेति पदत्रयम् ।
व्यापिने सर्वपूर्वं तु वीरभद्रपदं ततः ॥ ७ ॥
चतुर्थ्यन्तं नमोयुक्तं वीरभद्रमनुः स्मृतः ।
तारं स्वबीजं चादौ स्याद् विघ्नेश्वरपदं तथा ॥ ८ ॥
गणाधिपतिशब्दश्च हस्तिवक्त्रपदं ततः ।
एते गणपतेः सर्वे चतुर्थ्यन्तो[2] नमो मनुः ॥ ९ ॥

गणपतेर्मूलमन्त्रः ।

---

१. 'णि' क. पाठः. २. 'न्ता' ख. पाठः.

बहुबेरप्रतिष्ठायामेते मन्त्राः क्रमोदिताः ।
एकबेरे तु तारं च नादः षष्ठस्वरान्वितः ॥ १० ॥
बिन्दुनादान्वितो बीजं नमो भगवतीत्यपि ।

त्रिनेत्रे ! कालि ! कालवर्णानि ! अष्टभुजे ! शूलकपालधारिणि ! प्रेतवाहिनि ! सुरुधिरस्नेहसंपूर्णवक्त्रे ! चामुण्डि ! नमोनम इति ।

स्वस्वबीजानि दीर्घैस्तु स्वरैर्युक्तान्यनुक्रमात् ॥ ११ ॥
अस्त्रान्तानि षडङ्गानि सर्वमन्त्रेषु कल्पयेत् ।
हंसो वृषो मयूरश्च गरुडः सिंहवारणौ ॥ १२ ॥
प्रेतश्च सप्तमातृणां वृषाखू वीरविघ्नयोः ।
वाहनानि ध्वजाश्च स्युर्ब्राह्मयादीनां नव क्रमात् ॥ १३ ॥
कूर्चं शूलं शक्तिचक्रे हलं वज्रं कपालकम् ।
अक्षसूत्रं चाङ्कुशं च नवैतान्यायुधान्यपि ॥ १४ ॥
वाहनाद्यध्वजायै च विद्महेऽथायुधाभिधा ।
हस्तायै धीमहीत्युक्त्वा तन्नः स्वाख्या प्रचोदयात् ॥ १५ ॥
इति क्रमेण गायत्र्यो ब्राह्मयादीनां भवन्ति हि ।
तारं बीजं च लकुली ईश्वरायाथ विद्महे ॥ १६ ॥
अक्षमालाधरायेति धीमहे तन्न इत्यपि ।
वीरभद्रः प्रकारश्च चोदयादिति योजिता ॥ १७ ॥

वीरभद्रगायत्री ।

तारं बीजं चैकदन्तश्चतुर्थ्यन्तोऽथ विद्महे ।
हस्तिवक्त्रः चतुर्थ्यन्तो धीमहे तन्न इत्यपि ॥ १८ ॥
ततो गणपतिः प्रान्ते चोदयादिति चोदिताः ।

विघ्नेश्वरगायत्री ।

मन्त्रोद्धारः ।

स्वदेवसदृशाकारभुजास्यनयनायुधाः ॥ १९ ॥
स्त्रीरूपास्तत्समाकल्पाः षण्मात्रप्रतिमाः स्मृताः ।
बहुबेरे तु चामुण्डा कृष्णवर्णा चतुर्भुजा ॥ २० ॥

तुङ्गस्तनानिबद्धाहिर्वृत्तपिङ्गत्रिलोचना ।
वामे कपालं पाशं च दक्षिणे शूलमप्यसिम् ॥ २१ ॥
बिभ्राणा वा डमरुकं ज्वलत्कपिलमूर्धजा ।
सर्पकुण्डलकेयूरकटकोदरबन्धना ॥ २२ ॥
नानाहिहारग्रैवेयकटिसूत्राङ्घ्रिभूषणा ।
दंष्ट्रोज्ज्वलमुखी रक्तमाल्यगन्धाम्बरादिका ॥ २३ ॥
रौद्रसाम्याकृतिः स्यादप्येकबेरे तु कथ्यते ।
करालकालमेघाभा वृत्तपिङ्गत्रिलोचना ॥ २४ ॥
ज्वलदग्निशिखाकारकपिशोर्ध्वशिरोरुहा ।
दंष्ट्रोत्कटमुखी तुङ्गपीनवृत्तपयोधरा ॥ २५ ॥
रक्तकञ्चुकिनी कृष्णभुजगस्तनबन्धना ।
नतमध्या सुपुष्टाङ्गी दिव्या नानाहिभूषणा ॥ २६ ॥
वामेऽहिकुण्डलान्यत्र परेतशिशुकर्णिका ।
नानाभटशिरोमाला किङ्किणीजालभीषणा ॥ २७ ॥
कपालखेटघण्टाहिपाशान् वामैस्तु दक्षिणैः ।
शूलखड्गौ च वेतालं ध्वनड्डमरुकं तथा ॥ २८ ॥
बिभ्राणाष्टभुजा भीमा प्रेतसिंहासनं पदा ।
दक्षिणेन समाक्रम्य निविष्टा कुञ्चितेन तु ॥ २९ ॥
आलम्बितेन वामेन पादेनाक्रान्तदारुका ।
भूतप्रेतपिशाचाद्यैः शाकिनीडाकिनीगणैः ॥ ३० ॥
परीता योगिनीभिश्च वीररौद्रोद्भटाकृतिः ।
चामुण्ड्याः प्रतिमा त्वेवं भवेच्छैलादिनिर्मिता ॥ ३१ ॥
दक्षिणामूर्तिसदृशी वीरभद्रतनुर्भवेत् ।
गणेशस्यापि पूर्वोक्तलक्षणा प्रतिमा भवेत् ॥ ३२ ॥
प्राग्द्वारं वोत्तरद्वारं विमानं तिर्यगायतम् ।
मातॄणां तु भवेत् तद्वदेकबेरेऽपि सम्मतम् ॥ ३३ ॥
कृत्वा विमानं बेरं च प्रतिष्ठामथ कारयेत् ।
कृत्वाधिवासनायोक्तं मण्डपं षोडशाङ्घ्रिकम् ॥ ३४ ॥

अलङ्कृत्य वितानाद्यैर्विन्यसेद् द्वारतोरणान् ।
प्रमोदन्यभयाशान्तिशुभदाख्याश्च तोरणाः ॥ ३५ ॥

तद्देवताः क्रमात् कुम्भी निकुम्भी वज्रभीषणा ।
मङ्गिणी चेत्यथैतेषां मूलयोर्द्वारिकुम्भगाः ॥ ३६ ॥

दूतिका पालिना चाथ दण्डिनी भवहस्तका ।
पाशिनी वारुणी चैव शङ्खिनी पद्मिनी च ताः ॥ ३७ ॥

ध्वजाश्च हंसवृषभबर्हिताक्ष्र्यमृगाधिपैः ।
गृध्रपैशाचवृषभैर्मूषिकेन च चिह्निताः ॥ ३८ ॥

बहुबेरे त्वेकबेरे पिशाचाङ्को भवेद् ध्वजः ।
पुण्याहविकिरक्षेपात् कुम्भास्त्रावभिपूजयेत् ॥ ३९ ॥

कुम्भे यजेत् तु चामुण्डां पिशाचारूढविग्रहाम् ।
वर्धन्यां सिंहगं त्वस्त्रं कृष्णं स्त्रीरूपभीषणम् ॥ ४० ॥

त्रिशूलाङ्कशिरस्कं तत् कपालासिकरं यजेत् ।
तत्परिभ्रमणादूर्ध्वं नवकुण्डेषु पूर्ववत् ॥ ४१ ॥

अग्निं विभज्य संस्थाप्य चामुण्डां मध्यकुण्डके ।
ब्रह्माण्याद्यास्तु पूर्वादिकुण्डेष्विष्ट्वा जुहोति च ॥ ४२ ॥

तत्तन्मन्त्रैस्तु समिधो घृतं चैवं चरूंस्तिलान् ।
सर्षपाञ्छालिसिद्धार्थान् सक्तूंश्च जुहुयात् क्रमात् ॥ ४३ ॥

ब्राह्म्यादीनां तु समिधः पलाशप्लक्षसम्भवाः ।
औदुम्बर्यस्तथा बैल्वाः करञ्जेन्द्रतरूद्भवाः ॥ ४४ ॥

रक्तश्वेतवटौ चाथ पैप्पलाश्च क्रमान्नव ।
अभावे समिधां यासां ग्राह्यास्तत्र पलाशजाः ॥ ४५ ॥

तत्तन्मन्त्रैः समिद्भिश्च घृतं हुत्वा शतं शतम् ।
कुर्यादाकारशुद्धिं च नेत्रोन्मीलनकर्म च ॥ ४६ ॥

जलाधिवासनं ग्रामभ्रमणं कारयेत् ततः ।
कृत्वा तु पूर्ववद् वेदिं शालिभिस्तण्डुलैरपि ॥ ४७ ॥

मध्यादीशानपर्यन्तं शय्याः कृत्वा पृथक् पृथक् ।
एकैकवर शय्या स्यात् पञ्चाङ्गी वेदिमध्यतः ॥ ४८ ॥

चामुण्डीं शाययेन्मध्ये ब्राह्मयाद्याः पूर्वतः क्रमात् ।
प्रत्येकं कुम्भमेकैकं बेरादीन्[1] न्यस्य तूत्तरे ॥ ४९ ॥

तत्तद्वाहनशस्त्राणि तेषु हैमानि निक्षिपेत् ।
चामुण्डायास्तु मध्यादिक्रमात् कुम्भेषु विन्यसेत् ॥ ५० ॥

वीरभद्रमुदक्कुम्भे त्वैशकुम्भे विनायकम् ।
पिधानकूर्चवस्त्राद्यैः प्राग्वदाभूष्य पूजयेत् ॥ ५१ ॥

गायत्रीभिः समालभ्य गन्धाद्यैरभिपूजयेत् ।
अथ वेद्या बहिर्दिक्षु परिवारघटाष्टकम् ॥ ५२ ॥

विन्यस्यावाह्य च यजेच्छक्तीरैन्द्र्यादिकाः क्रमात् ।
ऐन्द्र्याग्नेयी च याम्या च नैर्ऋती वारुणी तथा ॥ ५३ ॥

वायव्या चैव कौबेरी तथैशान्यष्टमी स्मृता ।
चतुर्भुजास्त्रिणेत्रास्ताः शूलपाशोर्ध्वपाणयः ॥ ५४ ॥

कृताञ्जलिद्वयकरा वर्णैर्दिक्पतिभिः समाः ।
बलिपीठे[2] प्रतिष्ठार्थं पूतमन्यं घटं न्यसेत् ॥ ५५ ॥

उग्रसेनां घटे तस्मिन् श्यामां दंष्ट्रोत्कटाननाम् ।
खड्गं दक्षिणहस्तेन वामेन स्वकटिस्पृशम् ॥ ५६ ॥

भूषितां द्विभुजां भीमामावाह्याभ्यर्चयेत् ततः ।
आत्मादितत्त्वतत्त्वेशान् मूर्तिमूर्तीश्वरानपि ॥ ५७ ॥

धारिकाद्यास्त्रिभागेषु प्राग्वज्जान्वादिषु न्यसेत् ।
तत्त्वतत्त्वेशपृथ्व्याद्याः शर्वाद्याश्च यथापुरम् ॥ ५८ ॥

वीरविघ्नेशयोर्बेरे प्रत्यङ्गं क्रमशो न्यसेत् ।
प्राग्वद्धुत्वा तु तन्मन्त्रैर्गुरुर्मूर्तिधरास्तथा ॥ ५९ ॥

स्पृशेयुस्त्रिषु भागेषु सिञ्चेयुः कुम्भवारिभिः ।
बेरे ज्ञानीं क्रियाशक्तिं पीठे प्राग्वद् विभावयेत् ॥ ६० ॥

पूजयेच्च निवेद्यान्तं जुहुयाद् वासवादिषु ।
+ + + + + [3]षान्येन ब्रह्मजज्ञानमन्त्रतः ॥ ६१ ॥

---

[1] 'रेद्विन्य', [2] 'ठ' ख. पाठः. [3] 'षान्यनेन' क. पाठः.

त्रैयम्बकायंकुमारात् तथा यत्तयमादिना ।
इदंविष्णवादिना स्वास्तिनइन्द्राद्यात् तथेशतः ॥ ६२ ॥
गणानांत्वादिना चाज्यं चर्वाद्यैः स्वस्वमूलतः ।
बहुबेरे भवेदेवमेकबेरे तु पूर्ववत् ॥ ६३ ॥
चामुण्ड्याः परितः कुम्भानष्टौ विन्यस्य तेष्वपि ।
भवान्नीं चैव शर्वाणीमुग्रां पाशुपतामपि ॥ ६४ ॥
शाङ्करीं शशिनीं भीमां रुद्राणीं च न्यसेद् यजेत् ।
मध्ये कुण्डे तु चामुण्डामावाह्य जुहुयुस्तथा ॥ ६५ ॥
तथैव पुरुषाघोरवामसद्यैर्दिशास्वपि ।
अङ्गैरपि च गायत्र्या कोणेषु जुहुयात् क्रमात् ॥ ६६ ॥
अजामांसप्रतिनिधिं माषापूपं जुहोति च ।
क्षुतनिष्ठीवनादौ च मौनभङ्गादिके तथा ॥ ६७ ॥
आचम्य जुहुयादाज्यं व्याहृतीभिरनुक्रमात् ।
पूर्णां हुत्वा स्विष्टकृतं भूतेभ्यो विकिरेद् बलिम् ॥ ६८ ॥
तिलान्नेन गुलाज्याभ्यां दध्ना रक्तौदनेन च ।
मांसस्य प्रतिरूपेण मिश्रितेन क्षिपेद् बलिम् ॥ ६९ ॥
प्राच्यां तु क्षेत्रपालश्च पिशाचपितृराक्षसाः ।
नागाश्चैवासुरा यक्षा गन्धर्वाश्च व्यवस्थिताः ॥ ७० ॥
ऊर्ध्वायां दिशि भूतानि चाधो भूम्यम्बुवासिनः ।
तेभ्यः स्वनामधेयैस्तु नमोन्तैर्विकिरेद् बलिम् ॥ ७१ ॥
ततः कन्यासप्तकं च ब्राह्मणं च तथापरम् ।
भोजयेद् पायसाज्याद्यैर्विप्रानन्यांश्च लिङ्गिनः ॥ ७२ ॥
स्त्रियश्च मातृभक्ता यास्ताश्च भक्तांश्च भोजयेत् ।
तथैव नृत्तगीताद्यैः कृत्वा जागरणं निशि ॥ ७३ ॥
प्रातः स्नात्वा मूर्तिधरैः सह सन्ध्यां समाप्य च ।
गुरुः संपूज्य बेराणि बेरं वा किञ्चिदर्चयेत् ॥ ७४ ॥
गर्भगेहे तु पैशाचे पदे पुण्याहवाचिते ।
पीठानि वैकं पीठं वा न्यसेत् कूर्मशिलोपरि ॥ ७५ ॥

---

१. 'ककुमार्यां तथा' क. पाठः.

रत्नादिपञ्चवर्गांश्च वाहनान्यायुधानि च ।
हैमानि तत्तद्गर्तेषु बीजैस्तैस्तैर्विनिक्षिपेत् ॥ ७६ ॥

ततस्तु लग्ने संप्राप्ते सरण्यास्त्राम्बुशुद्धया ।
मङ्गलाङ्कुरदीपादिवाद्यगीतसमन्वितम् ॥ ७७ ॥

वेदघोषैश्च बेराणि रथादावधिरोप्य तु ।
घृतदूर्वाक्षतदधिपुष्पमारोप्य मस्तके ॥ ७८ ॥

प्रदक्षिणं परिक्रम्य गर्भागारं प्रवेशयेत् ।
लग्ने स्वबीजमन्त्रैस्तु स्थापयेत् प्रतिमाः क्रमात् ॥ ७९ ॥

पूर्वादिपश्चिमान्तं तु ब्राह्म्यादीरेकसूत्रगाः ।
प्रतिष्ठाप्योत्तरास्यास्ता अन्योन्यं द्व्यङ्गुलान्तरम् ॥ ८० ॥

ब्रह्माण्याश्चैव चामुण्ड्याः पार्श्वसूत्रद्वयोत्तरे ।
प्राक्प्रतीच्योर्वीरभद्रः स्थाप्यो विघ्नाधिपस्तथा ॥ ८१ ॥

प्रत्यङ्मुखो वीरभद्रः प्राङ्मुखः स्याद् विनायकः ।
एकबेरे तु मध्ये स्यात् प्राङ्मुखी वाप्युदङ्मुखी ॥ ८२ ॥

ततः प्रक्षाल्य बेराणि तत्तद्धृदयपङ्कजे ।
तत्तद्बीजानि विन्यस्य स्नापयेत् स्वस्वकुम्भतः ॥ ८३ ॥

स्वस्वमन्त्रैः स्वगायत्र्या मन्त्राध्वानं तु विन्यसेत् ।
तत्तत्पदैः पदाध्वानं शेषान् पूर्ववदध्वनः ॥ ८४ ॥

ततो गुरुः स्वमूलाब्जकुण्डलिन्याः समुद्गताम् ।
परां शक्तिं सूक्ष्मरूपां विद्युल्लेखानुकारिणीम् ॥ ८५ ॥

नाडीमार्गेण नीत्वोर्ध्वं हृद्बिन्दुद्वादशान्तगाम् ।
तद्व्योमपद्ममध्येन्दुकलामृतरसाप्लुताम् ॥ ८६ ॥

चिन्मात्रया तु तच्छक्त्या नीत्वैक्यं बीजमुच्चरन् ।
हंससंपुटमध्यस्थां नादान्तस्वरभूषिताम् ॥ ८७ ॥

पुष्पाञ्जलौ सुसंक्रान्तां + + + + + + + + ।
गुणातीतामनौपम्यां वेदवेद्यां निरञ्जनाम् ॥ ८८ ॥

आनीय नाडीमार्गेण देव्या हृत्पङ्कजे न्यसेत् ।
स्थापनं चाथ सान्निध्यं सन्निरोधावकुण्ठनम् ॥ ८९ ॥

प्ररोचनामृतीकारौ तद्गायत्र्या समाचरेत् ।
आलयस्याथ परितः परिवाराष्टकं न्यसेत् ॥ ९० ॥

कुम्भैरैन्द्रयादिसंयुक्तैरभिषिच्य नियोजयेत् ।
उग्रसेनीं घटस्थां तां बलिपीठेऽभिषेकतः ॥ ९१ ॥

मध्ये नियोज्य संस्थाप्य ततो विधिवदर्चयेत् ।

तद्यथा —

स्नात्वा सन्ध्यामुपास्याथ सकलीकृतविग्रहः ॥ ९२ ॥

विघ्नराजं च संपूज्य सामान्यार्घ्यकरस्ततः ।
द्वाराणि प्रावमानीभिः प्रोक्ष्यास्त्रेणार्घ्यवारिभिः ॥ ९३ ॥

कवाटोद्घाटनं कृत्वा द्वारपालांस्तु पूजयेत् ।
रक्षोहणं वलगहनं पूर्वद्वारे तु पूजयेत् ॥ ९४ ॥

सुमुखः कालदण्डश्चाप्यतिथिर्मुदितस्तथा ।
सकलः शुक्तिकर्णश्च याम्यादिद्वारपाः स्मृताः ॥ ९५ ॥

प्रागादिद्वारनामानि प्रमोदन्यभया तथा ।
शान्तिः शुभकरी चैताः पूजयेत् स्वस्वनामभिः ॥ ९६ ॥

करालीं कामुकां चैव सुभगां दाहनीमपि ।
गगनां ह्लादनीं चाथ कौबे(रीं ? र्यां) विष्फुलिङ्गिनीम् ॥ ९७ ॥

विरूपाक्षीं च पूर्वादिद्वारेषु द्वन्द्वशो यजेत् ।
नाराचमन्तः क्षिप्त्वान्तः प्रविश्यास्त्रं निधाय तु ॥ ९८ ॥

वास्तुब्रह्मासनानीष्ट्वा सूपविष्टोऽर्घ्यमर्चयेत् ।
पञ्चशुद्धीर्विधायाथ तिलकी पुष्पशेखरः ॥ ९९ ॥

आधारशक्तिं च ततः परेतासनपङ्कजे ।
सगुणत्रयसूर्यादिबिम्बबिम्बाधिपान् यजेत् ॥ १०० ॥

सुन्दर्याद्यास्तु योगिन्यः प्रागाद्यब्जदलाग्रगाः ।
सुन्दरी शाखिनी चाथ विषकण्ठी वसुन्धरा ॥ १०१ ॥

योगिन्यमृतपूर्वा च घातकी च ततः परम् ।
वेताली मातृसेना चेत्येताः पूज्याः स्वनामभिः ॥ १०२ ॥

अथ मूर्तिं मन्त्रदेहं विन्यस्यावाहयेत् ततः ।
प्राग्वद् देवीं परां शक्तिं मूलाङ्गैः स्थापनादिभिः ॥ १०३ ॥
सकलीकृत्य चाज्यांद्यैः पूजयेत् तु पृथक् पृथक् ।
बहुबेरे त्वेकबेरे चामुण्डामेवमर्चयेत् ॥ १०४ ॥
एतन्मन्त्रैश्च नवभिः पूर्वोक्तैरपि पूजयेत् ।
हारिद्रं शबलं रक्तं पीतं नीलं शुकच्छवि ॥ १०५ ॥
अतिरक्तं सितं रक्तं वासो ब्राह्मयादिसम्मतम् ।
श्रीकण्ठं कुङ्कुमं यक्षकर्दमं ग्रन्थिरेव च ॥ १०६ ॥
कृष्णागरुस्तमालं च मृगनाभिश्च चन्दनम् ।
रक्तं च चन्दनं ब्राह्मीप्रभृतीनां क्रमान्मतम् ॥ १०७ ॥

गन्धा इति यावत् ।

पलाशकार्ककुमुदतुलस्यश्च कदम्बकम् ।
मल्लिका च जपा नीलमुत्पलं करवीरकम् ॥ १०८ ॥
ब्राह्मयादीनामभीष्टानि पुष्पाणीमानि वै नव ।
सितासितागरुक्षौद्रमाज्यं सर्जरसः पुरः ॥ १०९ ॥
श्रीकण्ठमिन्दुश्चोशीरं धूपद्रव्याण्यपि क्रमात् ।
पायसं चाथ दध्यन्नं मुद्गान्नं च गुलौदनम् ॥ ११० ॥
माषान्नं कृसरं चान्नं रक्तं शुद्धान्नमेव च ।
फलान्नं च निवेद्यानि ब्राह्मयादीनां नव क्रमात् ॥ १११ ॥
एवमिष्ट्वा निवेद्यान्तमुपचारैर्यथोदितैः ।
निर्माल्यैनैशकोणे तु चण्डसेनां प्रपूजयेत् ॥ ११२ ॥
अग्निष्वपि तथाग्नौ वा हुत्वोक्तान्यैर्यथाक्रमम् ।
स्वमूलाङ्गैश्च गायत्र्या श्रौतैर्मन्त्रैश्च चोदितैः ॥ ११३ ॥
जयादिभिः क्रमाद्धुत्वा प्रायश्चित्तैर्घृतेन तु ।
पूर्णां स्विष्टकृतं चापि हुत्वाग्निं स्वहृदम्बुजे ॥ ११४ ॥
नियोज्य तोरणादिस्था देवताश्च विसर्जयेत् ।
एकाशीतिघटैरुक्तैः प्रत्येकं नवकेन तु ॥ ११५ ॥

---

१. 'र्यो', २. 'प' ख.पाठः.

स्नपयेद् बहुबेरेऽथ सर्वैस्तैरेकबेरके ।
बलिं च विकिरेद् रात्रौ दत्त्वाचार्यादिदक्षिणाः ॥ ११६ ॥
दत्त्वा देयानि विप्रेभ्यो लिङ्गिभ्योऽन्येभ्य एव च ।
विशेषान्मातृभक्ता ये तेभ्यस्ताभ्यः प्रदाय तु ॥ ११७ ॥
अवारितं तदन्ना(द्यैः ? द्यं) सर्वेभ्योऽपि प्रदापयेत् ।
नित्यपूजादिसिद्ध्यर्थं विभवं तूपपत्तितः ॥ ११८ ॥
सङ्कल्प्य कर्ता लभते दृष्टादृष्टेप्सितं फलम् ।

मातृप्रतिष्ठाधिकारः ।

नित्योत्सवे तु मातॄणां मातुर्वामत्रके शुभे ॥ ११९ ॥
हैमाद्येकतले[1] लिङ्गं प्रातः पुष्पमयं भवेत् ।
अन्नलिङ्गं तु मध्याह्ने सायं लिङ्गं तथाक्षतैः ॥ १२० ॥
बहुबेरे तु तत्पात्रे पद्मे क्लप्तेऽत्र पत्रके ।
चामुण्डा कर्णिकायां स्याद् ब्राह्म्याद्याः प्राग्दलादिषु ॥ १२१ ॥
आवाह्याभ्यर्च्य तद्बीजैरारोप्य परिचारकैः ।
बलिबेरसमायुक्तं छत्रादिविभवान्वितम् ॥ १२२ ॥
शङ्खभेर्यादिनिर्घोषैः स्त्रीसंगीताद्यलङ्कृतम् ।
अन्तर्बलिं क्षिपेद् योगी योगिनीभ्योऽष्टदिक्ष्वपि ॥ १२३ ॥
सुन्दरीप्रमुखाभ्यस्तु कराल्याद्याभ्य एव च ।
ततो रक्षोहणादिभ्यो द्वाःस्थेभ्योऽपि क्षिपेद् बलिम् ॥ १२४ ॥
लोकाधिपानां स्थानेषु चेन्द्रादिभ्योऽष्टदिक्ष्वपि ।
पुरतो वाहनेभ्यश्च वाहनायाथवा क्षिपेत् ॥ १२५ ॥
क्षिप्त्वाथ चण्डसेनायै ततः संप्राप्य गोपुरम् ।
कुम्भिन्यै च निकुम्भिन्यै बलिं कृत्वा बहिर्गतः ॥ १२६ ॥
बलिपीठस्य पुरतो मन्त्रेणामन्त्रयेद् गणान् ।
याः समस्तं जगद् व्याप्य मातृपारिषदाः स्थिताः ॥ १२७ ॥
योगिन्योऽपि च शाकिन्यः प्रेताश्च कटपूतनाः ।
डाकिन्यश्च पिशाचाश्च वेतालाः प्रमथास्तथा ॥ १२८ ॥

---

[1] 'लं' क. पाठः.

पाताले भुवि चाकाशे याश्च ये वा वसन्ति ताः।
ते च सुप्रीतमनसः प्रतिगृह्णन्त्विमं बलिम् ॥ १२९ ॥

इति।

ततोऽष्टदिक्षु प्रोक्तेभ्यो गणेभ्यो विकिरेद् बलिम्।
योगिनीभ्यस्तु पूर्वस्यां शाकिनीभ्यस्तथानले ॥ १३० ॥

प्रेतेभ्यो दक्षिणे तद्वत् पूतनाभ्यश्च नैर्ऋते।
डाकिनीभ्यस्तु वारुण्यां पिशाचेभ्यस्तु मारुते ॥ १३१ ॥

वेतालेभ्यश्च कौबेर्यां भूतेभ्यश्चेशगोचरे।
विकीर्य तु बलिं पश्चाद् बलिपीठमुपेत्य तु ॥ १३२ ॥

उग्रसेनां तु सगणां ध्यात्वाभ्यर्च्य निजाख्यया।
अन्नशेषेण सर्वेण तस्यै पीठे क्षिपेद् बलिम् ॥ १३३ ॥

परिभ्रम्य यथापूर्वं प्रविश्यान्तः समाहितः।
अभ्यर्च्य देवीं लिङ्गस्थां मन्त्रान् वा मन्त्रमेव वा ॥ १३४ ॥

मातॄर्वा मातरं मूलबेरे स्वे स्वे नियोजयेत्।

नित्योत्सवाधिकारः।

अथोच्यते महाशान्तिर्देशराजहितावहा ॥ १३५ ॥

रोगोपसर्गमारीणामुत्पातानां च शान्तये।
माघफाल्गुनचैत्रेषु वैशाखज्येष्ठयोरपि ॥ १३६ ॥

आषाढे श्रावणे प्रोष्ठपदे चाश्वयुजेऽपि च।
कार्त्तिक्यां मार्गशीर्षे च पुष्ये चापि विधीयते ॥ १३७ ॥

कृष्णे पक्षेऽथ शुक्ले च राष्ट्रादेरनुकूलभे।
अष्टम्यन्तं द्वितीयादि यत् सप्तदिवसं भवेत् ॥ १३८ ॥

तच्च भौमार्कवारान्तं महाशान्तिर्विधीयते।
तेषां दिनानां नामानि ब्राह्मयादीनां तु नामभिः ॥ १३९ ॥

त्रिद्व्येकसप्ततिदिनैः श्रेष्ठाद्या शान्तिरुच्यते।
पुरे राष्ट्रे तथा ग्रामे वने वा पर्वतेऽपि वा ॥ १४० ॥

यत्र स्यान्मातृसान्निध्यं तत्र शान्तिं प्रकारयेत् ।
श्रेष्ठादिशान्तिं निश्चित्य प्राग्वत् कृत्वाङ्कुरार्पणम् ॥ १४१ ॥
ध्वजमारोपयेत् तस्मिन् पिशाचीं विलिखेत् पटे ।
ऊर्ध्वकेशीं प्रवृत्ताक्षीं निर्मांसास्थिशरीरिणीम् ॥ १४२ ॥
दीर्घघ्राणां प्रलम्बोष्ठीं द्विभुजां दीर्घकन्धराम् ।
कपालवेतालधरां तथैव विकृताननाम् ॥ १४३ ॥
अदीर्घकुक्षिहस्ताङ्घ्रिं गोशृङ्गसदृशस्तनीम् ।
निबद्धकिङ्किणीमाला नानासर्पविभूषणाम् ॥ १४४ ॥
एकबेरे भवेदेवं बहुबेरं यदा तदा ।
पिशाचीं परितोऽन्यानि वाहनान्यष्ट चालिखेत् ॥ १४५ ॥
प्रासादाग्रे सभाग्रे वा ग्राममध्ये च चत्वरे ।
दशहस्तप्रमाणं तु स्यान्मुद्रामण्डपं शुभम् ॥ १४६ ॥
तन्मध्ये चतुरश्रं तु पीठं स्याद् बलिपीठवत् ।
ततो ग्रामपुरादेस्तु दिक्षु सन्धिष्वपि क्रमात् ॥ १४७ ॥
मण्डलानि सुलिप्तानि बल्यर्थं परिकल्पयेत् ।
ततस्तूर्यादिनिर्घोषैर्गेयनृत्तादिमङ्गलैः ॥ १४८ ॥
शूलास्त्रयात्रासहितं बलिं दिक्षु च निक्षिपेत् ।
शाल्योदनं सदध्याज्यं मांसप्रतिनिधिप्लुतम् ॥ १४९ ॥
सरक्तगन्धकुसुमं तत्तन्मन्त्रैर्बलिं क्षिपेत् ।
मध्ये तु ब्रह्मणे दिक्षु लोकेशेभ्यो यथापुरम् ॥ १५० ॥
सर्वदेवालयाग्रेषु ग्रामद्वारसभासु च ।
चत्वरेषु च चैत्येषु राजमुख्यालयेषु च ॥ १५१ ॥
गोगजाश्वादिशालेषु मुख्यवृक्षनदीषु च ।
कूपारामतटाकेषु वने पितृवनेषु च ॥ १५२ ॥
निधिस्थानेषु चान्येषु सम्प्रोक्ष्य विकिरेद् बलिम् ।
त्रिसन्ध्यं विकिरेच्चैव बलिदानादनन्तरम् ॥ १५३ ॥
प्रविश्य मण्डपं पीठे न्यसेदस्त्रं च पूर्ववत् ।
सम्पूजयेच्च तत् तत्र यात्रां देव्याः प्रवर्तयेत् ॥ १५४ ॥

नरयानेन वाद्येन गीतनृत्तादिमङ्गलैः ।
शङ्खभेर्यादिनिर्घोषैर्वितानच्छत्रचामरैः ॥ १५५ ॥
भूषिताभिः सुरूपाभिर्गणिकाभिरलङ्कृतम् ।
सुस्नातैः सुभटैर्वीरैर्भूषितैः खड्गपाणिभिः ॥ १५६ ॥
अन्यैरपि जनैर्जुष्टं जनकोलाहलेन तु ।
प्रतिरात्रं पिष्टपशून् विशस्य विनिवेदयेत् ॥ १५७ ॥
प्रातः सायं पारशवो मुद्रानृत्तविशारदः ।
नृत्येत् सङ्गीतरम्यं तन्मण्डपेऽह्नस्य सन्निधौ ॥ १५८ ॥
ध्वजावरोपणे प्रोक्तं यथा शैवमहोत्सवे ।
अर्धरात्रे प्रतिनिशं तथा मौनबलिं क्षिपेत् ॥ १५९ ॥
अथ षष्ठदिने रात्रौ कौतुकं तु महापशोः ।
बध्नीयात् स च विप्रस्य हरिणो नृपतेर्गजः ॥ १६० ॥
वैश्यस्य महिषोऽन्यस्य च्छागोऽपि स्यान्महापशुः ।
अलाभे त्वथ सर्वेषां महिषो वा पशुर्भवेत् ॥ १६१ ॥
सप्तमेऽह्न्यपराह्णे तु विशस्योपपशुं त्वजम् ।
यूपबद्धमलङ्कृत्य ततश्छिन्द्यान्महापशुम् ॥ १६२ ॥
तद्रक्तमथ मातृभ्यो मात्रे वा विनिवेदयेत ।
तद्रक्तपललोन्मिश्रैरन्नैर्दिक्षु बलिं क्षिपेत् ॥ १६३ ॥
अष्टमेऽह्नि ततः प्राग्वच्चूर्णोत्सवपुरस्सरम् ।
शैवोत्सवविधानेन तीर्थयात्रां समापयेत् ॥ १६४ ॥
प्राग्वद् गणान् विसृज्याथ ध्वजं चाप्यवरोपयेत् ।
एकाशीतिघटैः प्राग्वत् स्नपयेत् पूजयेदपि ॥ १६५ ॥
दक्षिणाश्च प्रदेयानि दत्त्वा कर्ताश्नुते फलम् ।
तथैवाङ्गारवारेषु सायं पूर्वोक्तमार्गतः ॥ १६६ ॥
बलियात्रां विधायेष्टान् सर्वान् कामानवाप्नुयात् ।
अष्टम्योश्च चतुर्दश्योरारार्कदिवसेषु च ॥ १६७ ॥
प्राप्तये सर्वकामानां बलिं पूजां च कारयेत् ।

एवं विशुद्धं खलु मातृतन्त्रं प्रोक्तं प्रतिष्ठादिकमत्र सम्यक् ।
पूजामहाशान्त्यवसानमेतन्निर्दिष्टशैवानुगुणं विधेयम् ॥ १६८ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापादे मातृतन्त्रपटलो नामैकोनषष्टितमः ॥

अथ षष्टितमः पटलः ।

अथातः क्षेत्रपालस्य प्रतिष्ठाद्यं निगद्यते ।
प्रोक्तशैवानुसारेण कर्मात्रापि समूहयेत् ॥ १ ॥

अन्त्यो मनुःस्वरोपेतो बिन्दुनादविभूषितः ।
तारादिरस्य बीजं स्यात् क्षेत्रपालपदं ततः ॥ २ ॥

चतुर्थ्यन्तं नमोन्तोऽयं मूलमन्त्रो नवाक्षरः ।
होमे स्यादग्निजायान्तो बीजं दीर्घैः स्वरैर्युतम् ॥ ३ ॥

जातियुक्तानि चाङ्गानि षडस्त्रान्तान्यनुक्रमात् ।
मालामन्त्रोऽपि तस्यैव तारः शक्तिश्च याष्टमः ॥ ४ ॥

साग्निषट्कस्वरो दण्डी रेमुकावतरेति च ।
एकादशस्वरेणान्त्यं पञ्चमादिहुताशयुक् ॥ ५ ॥

ततः पालमहाशब्दौ बलेति कपिलद्वयम् ।
जटाभारभासुरोऽन्ते ज्वालामुखपदं भवेत् ॥ ६ ॥

(गन्ध)पुष्पधूपदीपबलिपूजां गृहाण च ।
भैरवेति पदान्ते स्याद् रूपेणेति पदं ततः ॥ ७ ॥

तरुशब्दो गुरुपदं खः फट्कारपदानि च ।
अट्टहासपदस्यान्ते डामराधिप इत्यपि ॥ ८ ॥

पञ्चमादिश्च येकारः स्वाहान्तो मन्त्र ईरितः ।
पूजामनेन कुर्वीत जपादिः सिद्धिदो भवेत् ॥ ९ ॥

तारादिरथ तस्यैव बलिमन्त्रोऽपि कथ्यते ।
एहिशब्दो धुकारश्च तुरुवज्रहनास्त्रयः ॥ १० ॥

विनाशब्दश्च वीप्सान्तं महारवपदं तथा ।
क्षेत्रपालपदं गृह्ण [illegible] ॥ ११ ॥

बलिमन्त्रः ।

तारं शक्तिश्च वटुकश्चतुर्थ्यन्तस्ततः परम् ।
आपदुद्धारणं प्राग्वत् कुरुयुग्मं ततोऽपिच ॥ १२ ॥
वटुकः स्याच्चतुर्थ्यन्तः शक्तिबीजं च तन्मनुः ।
द्वाविंशत्यक्षरो मन्त्रो जपाद्यैरिष्टसिद्धिदः ॥ १३ ॥
कनिष्ठदशतालेन क्षेत्रपालं तु कारयेत् ।
अञ्जनाभं विवृत्ताक्षं ज्वलितोर्ध्वशिरोरुहम् ॥ १४ ॥
युवानं सुमहाकायं रक्ताकल्पं दिगम्बरम् ।
स्पष्टदंष्ट्रोत्कटमुखं स्फुरन्नानाविभूषणम् ॥ १५ ॥
सौवर्णकिङ्किणीघण्टामालाबद्धकटीतटम् ।
शिञ्जत्कनकमञ्जीरभूषिताङ्घ्रिसरोरुहम् ॥ १६ ॥
ऋज्वायतस्थिराकारं हेमपीठाम्बुजे स्थितम् ।
चतुर्भुजं वाष्टहस्तं द्विभुजं वापि कारयेत् ॥ १७ ॥
कपालं च त्रिशूलं च पाशं डमरुकं करैः ।
अधश्चोर्ध्वं च बिभ्राणं कुर्यादेवं चतुर्भुजम् ॥ १८ ॥
शूलं खड्गं च खट्वाङ्गं बिभ्रड्डमरुकं तथा ।
दक्षिणेऽथ कपालं च घण्टां च सशरं धनुः ॥ १९ ॥
पाशं चाष्टभुजः कार्यः प्रोक्तलक्षणलक्षितः ।
कपालं च गदां बिभ्रद् द्विभुजो वामदक्षिणे ॥ २० ॥
अष्टवर्षार्भकप्रख्यो नीलकुञ्चितमूर्धजः ।
अलकालङ्कृतःस्पष्टदंष्ट्राङ्कुरमुखाम्बुजः ॥ २१ ॥
रक्तवर्णोऽथ वटुकनाथः क्षेत्राधिपो ह्ययम् ।

अथवा उक्तञ्चान्यैः —

व्यालम्बाभ्रजटाधरं त्रिणयनं नीलाञ्जनाद्रिप्रभं
  दोर्द्वन्द्वात्तगदाकपालमरुणस्रग्गन्धभूषोज्ज्वलम् ।
घण्टामेखलघर्घराध्वनिमिलज्झाङ्कारभीमं विभुं
  वन्दे चित्रभुजङ्गकुण्डलधरं तं क्षेत्रपालं सदा ॥ २२ ॥

प्राग्वत् षोडशपादः स्यादधिवासनमण्डपः ॥ २३ ॥

शमो विभूंमिः सुबलश्चारोगस्तोरणाः क्रमात् ।
हेरुकस्त्रिपुरान्तश्चाप्यग्निर्वेताल एव च ॥ २४ ॥

अग्निजिह्वः करालश्चाप्येकदंष्ट्रस्तु सप्तमः ।
भीमरूपोऽष्टमस्त्वेतान् द्वारकुम्भेषु पूजयेत् ॥ २५ ॥

सारमेयध्वजाश्चाष्टावैन्द्राग्नेयादिनामभिः ।
पूज्याः स्युरथ पुण्याहविकिरक्षेपपूर्वकम् ॥ २६ ॥
कुम्भे क्षेत्रपतिं प्रोक्तमूर्तिं कृष्णाश्ववाहनम् ।
वर्धन्यां तच्च शूलास्त्रं स्त्रीरूपं सरमागतम् ॥ २७ ॥

इष्ट्वा तद्भ्रमणादूर्ध्वं मध्यकुण्डाहितानले ।
आवाह्य क्षेत्रपं प्राग्वद्धुत्वा च समिदादिभिः ॥ २८ ॥

कुर्यादाकारशुद्धिं च तथा नयनमोक्षणम् ।
तथाब्धिवसनं ग्रामभ्रमणं च प्रवेशनम् ॥ २९ ॥

मण्डपे शयनं वेद्यां मूलकुम्भास्त्रपूजनम् ।
निद्राकुम्भं त्वथ न्यस्येद् दिक्षु मूर्तिघटानपि ॥ ३० ॥

अनलश्चाग्निकेशश्च कालो घण्टारवस्तथा ।
महाक्रोधः पिङ्गलाक्षः सप्तमः पिशिताशनः ॥ ३१ ॥

ऊर्ध्वकेशोऽष्टमस्त्वेतान् स्वाख्याभिः कुम्भगान् यजेत् ।
आत्मादितत्त्वतत्त्वेशान् मूर्तीः पृथ्व्यादिकास्तथा ॥ ३२ ॥

मूर्तीशानसिताङ्गादींस्त्रिषु भागेषु विन्यसेत् ।
असिताङ्गो रुरुश्चण्डः क्रोधश्चोन्मत्त एव च ॥ ३३ ॥

कपाली भीषणश्चैव संहारश्चाष्ट मूर्तिपाः ।
एते भैरवशब्दान्ताश्चतुर्थ्या नमसान्विताः ॥ ३४ ॥

जानुकण्ठशिरोन्तेषु न्यस्याः स्युः प्रतिखण्डकम् ।
तत्तन्मन्त्रै घृतं हुत्वा स्पृशेत् सिञ्चेच्च कुम्भकैः ॥ ३५ ॥

ज्ञानशक्तिं न्यसेद् बेरे क्रियां पीठेऽर्चयेदपि ।
नृत्तगीतादिभिः श्यामामतिवाह्योदिते रवौ ॥ ३६ ॥
स्नात्वा निर्वर्त्य सन्ध्याद्यं लग्ने कूर्मशिलां न्यसेत् ।
मानुषे तु पदे तस्यां वर्गान् रत्नादिकान् न्यसेत् ॥ ३७ ॥

पीठं च पीठे बेरं च मूलमन्त्रेण विन्यसेत् ।
दृढीकृत्य तु संक्षाल्य कुम्भाद् बीजं तु तद्धृदि ॥ ३८ ॥
विन्यस्य चाभिषिच्याथाप्यासनं मूर्तिमेव च ।
मन्त्रदेहं च विन्यस्य स्वहृदम्भोरुहोदरात् ॥ ३९ ॥
नाडीमार्गेण चैतन्यं नीत्वा बिन्दुं ततोऽपि च ।
द्वादशान्ताब्जसोमस्थचिच्छक्तिज्योतिषा सह ॥ ४० ॥
पुष्पाञ्जलौ समायोज्य प्राग्वदानीय तद्धृदि ।
पद्ममध्यस्थतन्मन्त्रेणैकत्वमुपपादयेत् ॥ ४१ ॥
मन्त्राध्वा स्यात् स्वमूलाङ्गैः पदाध्वा तत्पदैः स्मृतः ।
शेषाध्वानो यथापूर्वं तद्विभाव्य न्यसेत् क्रमात् ॥ ४२ ॥
निद्रामूर्तिघटैः पश्चादभिषिच्य यथाविधि ।
प्रागुक्तमार्गेणार्घ्याद्यैः स्वाङ्गमूलैस्तु पूजयेत् ॥ ४३ ॥

तद्यथा —

स्नात्वा संपूज्य विघ्नेशं सकलीकृतविग्रहः ।
सामान्यार्घ्येण तद्वारि शूलिनं च कपालिनम् ॥ ४४ ॥
इष्ट्वा द्वारश्रियं चोर्ध्वे क्षिप्तास्त्रोऽन्तः प्रविश्य तु ।
अस्त्रं विन्यस्य देहल्यां वास्तुब्रह्मासनार्चनात् ॥ ४५ ॥
कृतरक्षोऽस्त्रतः प्राग्वदुपविश्यार्घ्यमर्चयेत् ।
शुद्धीः पञ्च विधायाथ तिलकी पुष्पशेखरः ॥ ४६ ॥
शक्तिं च पृथिवीं पीठं सत्त्वादिगुणपङ्कजे ।
अष्टौ तु परितः शक्तीस्त्र्यक्षं तन्मूर्तिनामभिः ॥ ४७ ॥
अर्घ्यादितः समभ्यर्च्य देवमावाह्य पूर्ववत् ।
हृदादीन्यनलाद्येषु नेत्रं च पुरतो यजेत् ॥ ४८ ॥
अस्त्रं दिक्ष्वत्र मध्येषु विन्यस्याभ्यर्च्य पूर्ववत् ।
अर्घ्यादिभिर्निवेद्यान्तं मूलाङ्गैर्जुहुयादपि ॥ ४९ ॥
क्षेत्रस्यपतइत्याद्यादष्टोत्तरशताहुतीः ।
हुत्वाथ परिवारांस्तु न्यसेद् द्वारि कपालिनम् ॥ ५० ॥
शूलिनं चाष्ट मूर्तीस्तु लोकेशस्थानगाः क्रमात् ।
लोकेशतुल्यरूपांस्ताननलाग्निचरादिकान् ॥ ५१ ॥

अग्रे तु वाहनं श्वानम्

ओं सारमेयाय नमः ।

वीरविघ्नेश्वरावपि ।
मातृश्च बलिपीठं च विन्यस्यात्र हुताशने ॥ ५२ ॥
क्षेत्रस्यपतइत्याद्याज्जुहुयात् समिदादिकम् ।
अथ द्वितीयदिवसे क्षेत्रचण्डं तु पूर्ववत् ॥ ५३ ॥
विन्यस्यैशे तु निर्माल्यैर्वटुकायं तमर्चयेत् ।
(तथैव) गोपुरद्वाःस्थौ सौम्यसुग्रं च विन्यसेत् ॥ ५४ ॥
बलिपीठं च विन्यस्य मूलाग्नैर्जुहुयाद् घृतम् ।
जयादिभिस्ततः प्राग्वत् प्रायश्चित्तैश्च पूर्णया ॥ ५५ ॥
हुत्वा स्विष्टकृता चाग्निं विभज्यात्मनि योजयेत् ।
ध्वजांश्च विसृजेत् प्राग्वद् दक्षिणाद्यं च दापयेत् ॥ ५६ ॥
विभवं कल्पयेत् कर्ता नित्यपूजादिसिद्धये ।
तिस्रो रात्रीरतीत्याथ कलशैरुपपत्तितः ॥ ५७ ॥
अष्टोत्तरशतान्तैस्तमभिषिञ्चेद् यथापुरम् ।
क्षेत्रेशमेवं संस्थाप्य दृष्टादृष्टफलोदयात् ॥ ५८ ॥
भोगांच्छ्रियं यथायोग्यं जयं पुत्रांश्च विन्दति ।

क्षेत्रपालप्रतिष्ठाधिकारः ।

नित्योत्सवे क्षेत्रपतेः प्रातरन्नमयं स्मृतम् ॥ ५९ ॥
पिष्टलिङ्गं तु मध्याह्ने पुष्पलिङ्गं निशामुखे ।
हैमाद्यन्यतमा प्राग्वदुत्सवप्रतिमा भवेत् ॥ ६० ॥
वादित्रगीतनृत्ताद्यैर्बलियात्रां प्रकल्पयेत् ।
छत्राद्यैर्विभवैश्चाथ द्वाःस्थौ शूलिकपालिनौ ॥ ६१ ॥
चत्वारोऽत्र चतुर्दिक्षु निषादाकारभीषणाः ।
कृष्णाकल्पाः कृष्णवर्णाः पूज्याश्चापेषुपाणयः ॥ ६२ ॥
अर्घ्याद्याद्रिचरो राजा कपाली च महात्मना ।
अनलाद्या वाहनं च वीरभद्रगणाधिपौ ॥ ६३ ॥

---

१. 'ल' ख. पाठः.

मातरः क्षेत्रचण्डश्च स्थितस्तेभ्यो बलिं क्षिपेत् ।
गोपुरद्वारि सौम्याय चोग्राय च बलिं क्षिपेत् ॥ ६४ ॥

बहिर्निर्गत्य पीठाग्रे स्थित्वा त्वामन्त्रयेद् गणान् ।
ये समस्तं जगद् व्याप्य तिष्ठन्ति बलिकाङ्क्षिणः ॥ ६५ ॥

क्षेत्रपालगणाः सर्वे गृह्णन्तु बलिमाहृतम् ।

इति ।

ततोऽष्टदिक्षु पूर्वोक्ता [1]हेरुकाद्याः स्थिताः क्रमात् ॥ ६६ ॥

तेभ्यो निक्षिप्य तु बलिं पीठस्य परितः क्रमात् ।
स्थित्वा षोडश भूतेशाः क्षेत्रसेनश्च मध्यतः ॥ ६७ ॥

अपरोऽथापवश्चेन्द्रमूर्तिरीशान एव च ।
उग्रश्चाप्यूर्ध्वबाहुः स्याद्दषभस्त्वृषभवस्तथा ॥ ६८ ॥

पीठस्य परितस्त्वेतेऽतश्चोर्ध्वे पद्मपत्रगाः ।
असंभवोथनूजन्मा एकदंष्ट्रस्ततः परः(?) ॥ ६९ ॥

ऐरावतो ह्योघबलश्चौषधेशो जनप्रभः ।
अस्संभवक्षेत्रपालसेनसंज्ञश्च मध्यमः ॥ ७० ॥

नित्योत्सवे विधिश्चैष तुल्यश्च स्यान्महोत्सवे ।
विशेषः सारमेयाङ्कं ध्वजमुच्छ्रित्य पूजयेत् ॥ ७१ ॥

ओं सारमेयाय नमः । ओं कुक्कुराय नमः । ओं क्षेत्रपालवाहनाय नमः

इति ।

लोकेशस्थानमूर्तीनां बलिदानादनन्तरम् ।
ओं प्राचि क्षेत्रपालस्य येभूता वै पुरस्सदः ॥ ७२ ॥

इत्याद्यैः पूर्ववन्मन्त्रैस्तत्तद्दिक्षु बलिं क्षिपेत् ।
ततस्तृतीयहारायां हेरुकाद्या वृतेर्बहिः ॥ ७३ ॥

चत्वारस्तु प्रतिदिशं स्थितास्तेभ्यो बलिं क्षिपेत् ।
कम्बली च खरो गन्धप्रियो घण्टारवस्तथा ॥ ७४ ॥

ङकारमूर्तिश्चण्डश्च छन्दचारी जटाधरः ।
झङ्कारमुखरो ञोङ्घष्टङ्कारी ठमयस्तथा ॥ ७५ ॥

---

[1] 'भे' ख. पाठः,

डामरो ढङ्कृतिश्चैव णमयस्तत्त्वाचित् तथा ।
अथ मू[1]र्तिर्दन्तुरश्चैव धनपालश्च नन्दकः ॥ ७६ ॥
परान्तकश्च फट्कारी बर्बरो भवनन्दनः ।
महाबलश्च यक्षेशो राक्षसो लम्बनस्तथा ॥ ७७ ॥
वनरक्षश्च शुम्भश्च षड्भुजः सदसस्पतिः ।
एतेषां तु बलिं क्षिप्त्वाथोर्ध्वायां दिश्यधस्तथा ॥ ७८ ॥
हरसेनः स्थितः पूज्यस्ततश्च क्षणदाचरः ।
सर्वे[2]षामपि ताराद्यैश्चतुर्थ्यन्तैः स्वनामभिः ॥ ७९ ॥
नमोन्तमर्चनं तु स्याद् बलिदानं तथैव च ।
एते महाबलाः सर्वे क्षेत्रेशाः क्षेत्रपोपमाः ॥ ८० ॥
पूजिताः सर्वकामांश्च दद्युरेकैकशोऽपि च ।
एतेषां च बहिर्दिक्षु यथापूर्वमनुक्रमात् ॥ ८१ ॥
ऐन्द्र्यां दिशि गणा ये तु वज्रहस्ता महाबलाः ।
इत्यादिभिर्यथापूर्वं मन्त्रैस्तु विकिरेद् बलिम् ॥ ८२ ॥
अथोद्दिष्टदिनान्ते तु तीर्थयात्रां यथापुरम् ।
संकल्प्य तत् समाप्याथ स्नपयित्वोपपत्तितः ॥ ८३ ॥
विसृज्य तु गणान् सर्वान् सन्धिदेवांश्च पूर्ववत् ।
दक्षिणाश्च प्रदेयानि दत्त्वान्नाद्यं च पुष्कलम् ॥ ८४ ॥
दृष्टादृष्टफलं सर्वं विशिष्टं स्वेष्टमुच्यते ।
इति क्षेत्रपालस्य तन्त्रं यथावत् प्रतिष्ठादिकं यत् क्रमादुत्सवान्तम् ।
निरूप्यागमानत्र संक्षिप्य गीतं तदूह्यं समस्तं च शैवानुसारात् ॥ ८५ १/२ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापादे क्षेत्रपालतन्त्रपटलः, षष्टितमः ॥

अथैकषष्टितमः पटलः ।

अथौषधीषु पक्वासु श्रावणेऽश्वयुजे तथा ।
पौषे वा फाल्गुने मासे नवनैवेद्यमिष्यते ॥ १ ॥

---

[1] 'तिं' क. पाठः [2] 'विकारा' ख. पाठः

तत्तद्दैवतनक्षत्रे[1] ग्रामकर्ता महीभृताम् ।
अनुकूलर्क्षलग्नादावङ्कुरार्पणपूर्वकम् ॥ २ ॥
लवनार्थं सुलग्नादावस्त्रयात्रापुरस्सरम् ।
तूर्यगीतादिनिर्घोषैः स्नातैः कर्मकरैर्गुरुः ॥ ३ ॥
लवित्रपाणिभिः शुक्लवसनैः सह लग्नके ।
क्षेत्रं प्रदक्षिणीकृत्य दध्यन्नेन बलिं क्षिपेत् ॥ ४ ॥
सोमाय चौषधीभ्यश्च पृथिव्यै क्षेत्रपाय च ।
लवित्रमिष्ट्वा शस्त्रेण प्राङ्मुखो वाप्युदङ्मुखः ॥ ५ ॥
प्रथमं लवनं कृत्वा शाल्यादीनामनन्तरम् ।
मुद्गमाषादिकं चैव मुष्टिग्राह्यं समाहरेत् ॥ ६ ॥
ओषधीनां ततो भारान् फलानि व्यञ्जनान्यपि ।
इक्षुमूलानि चान्यानि वहेयुः कर्मचारिणः ॥ ७ ॥
कुर्याद् गीतादिनिर्घोषैर्ग्रामादेस्तु प्रदक्षिणम् ।
आलयस्य च नीत्वान्तः पठन्ति स्वस्ति सूक्तकम् ॥ ८ ॥
द्विजाः शकुनसूक्तं च किरेयुः कुसुमाक्षतान् ।
प्रागेव तु कृते पिष्टैर्मण्डपे स्वस्तिकाम्बुजे ॥ ९ ॥
हैमाद्यन्यतमं कुम्भं तन्मध्ये विनिधाय तु ।
समापूर्य जलैः पूज्यः सोमस्तत्रौषधीश्वरः ॥ १० ॥
मङ्गलाङ्कुरदीपाद्यैः परितः समलङ्कृते ।
तस्मिन् कणिशपुञ्जं तु निधायेष्ट्वा यथाविधि ॥ ११ ॥
सुप्रभाख्यां श्रियं देवीं यजेत् सर्वौषधीश्वरीम् ।
ततस्तु सुविलिप्ते तु कोष्ठागारे स्वलङ्कृते ॥ १२ ॥
धान्यसंग्रहणं कुर्याज्जामित्रे देवमन्त्रिणः ।
मन्दोदये तदंशे चाप्युद्वेले वरुणालये ॥ १३ ॥
ततस्तु शालिकणिशैः सबिल्वाश्वत्थपल्लवैः ।
सैन्द्रवल्लीलताबद्धैरलङ्कृत्यालयादिकम् ॥ १४ ॥
उलूखलं च मुसलं शूर्पप्रस्थादिकं तथा ।
स्वलङ्कृताभिर्योषिद्भिः संसाध्यमानान् सुतण्डुलान् ॥ १५ ॥

---

[1] 'त्र' क. पाठः.

संक्षाख्यास्त्रेण संस्कृत्य नैवेद्यं चरुपाकवत् ।
नवाक्षतांश्च प्रक्षाल्य धवलानस्त्रमन्त्रतः ॥ १६ ॥
गुलक्षीरमधून्मिश्रान् मूलाङ्गैरभिमन्त्रितान् ।
सुमुहूर्ते तु सम्प्राप्ते तण्डुलांश्च नवं चरु ॥ १७ ॥
सूर्यविघ्नेशयोः पूर्वं देवायाथ निवेदयेत् ।
परिवारसुरेभ्यश्चाप्यग्नौ साज्यं जुहोति च ॥ १८ ॥
मूलेनाष्टोत्तरशतं मूर्त्यङ्गानां दशांशतः ।
तण्डुलैश्च नवान्नेन चौषधीभ्यः स्वनामतः ॥ १९ ॥
सोमाय सुप्रभायै च हुत्वा पूर्णां जुहोति च ।
तच्छेषतण्डुलान् दद्यान्नृपादिभ्यो यथाक्रमम् ॥ २० ॥
आचार्याय च शिष्येभ्यो विप्रेभ्योऽर्थिभ्य एव च ।
लिङ्गिभ्यः परिवारेभ्यस्ततो भूतबलिं क्षिपेत् ॥ २१ ॥

नवनैवेद्याधिकारः ।

कार्त्तिक्यां पौर्णमास्यां तु कृत्तिकासु विशेषतः ।
कुर्याद् दीपोत्सवं शम्भोरन्येषां चासुरद्विषाम् ॥ २२ ॥
तद्वदाश्वयुजे कृष्णपञ्चदश्यां तु फाल्गुने ।
प्रोक्तमुत्तरफल्गुन्यां विषुवे चायनद्वये ॥ २३ ॥
पौषे पुष्येऽथ चित्रायां चैत्रे चेन्द्राग्निदैवते ।
वैशाखे चापि कुर्वीत महोत्सवदिनेष्वपि ॥ २४ ॥
सप्ताहाद् वाथ पञ्चाहात् पूर्वं कृत्वाङ्कुरार्पणम् ।
दीपवृक्षांस्तु परितः ससाराञ्छोभनानृजून् ॥ २५ ॥
प्रासादकण्ठतुल्योच्चान् द्वित्रहस्तान्तरास्थितान् ।
उच्छ्रित्य हाराबाह्ये तु तेषामग्रनिवेशितैः ॥ २६ ॥
वंशानुवंशबन्धाद्यैर्लुपोर्ध्वाच्छादनान्वितम् ।
कीलयेत् तेषु कीलांस्तु द्वादशाङ्गुलकान्तरान् ॥ २७ ॥
त्रिपञ्चका(दि ? द्वि)जगतीरुद्रनन्दार्षिसम्मितान् ।
मुख्यामुख्यादीनि चान्तर्दीपमालावलम्बनात् ॥ २८ ॥

तावन्ति दीपमालानां तलानि स्युर्यथाक्रमम् ।
ध्वजस्थाने प्रधानं तु दीपवृक्षं ध्वजोन्नतम् ॥ २९ ॥

उच्छ्रित्य तस्यामूलाग्रं दीपमालास्तु कारयेत् ।
तस्य वह्न्यादिकोणेषु सप्तसप्तकरान्तरम् ॥ ३० ॥

कृत्वा कूटचतुष्कं तु तोरणाद्यैरलङ्कृतम् ।
तेषु कुण्डानि कृत्वा तु पुण्याहं चैव कारयेत् ॥ ३१ ॥

पूर्वेद्युर्निशि देवाग्रे वालुकास्थण्डिलेऽनले ।
संस्कृते पञ्चसंस्कारैः पलाशसमिधो घृतम् ॥ ३२ ॥

क्षीरं चरुं च मूलाङ्गब्रह्मभिर्जुहुयात् क्रमात् ।
पूर्णां च हुत्वा गायत्र्या वह्नेः पूर्वोत्तरे ततः ॥ ३३ ॥

शालिस्थण्डिलपद्मे तु शरावाणि नव न्यसेत् ।
पृथक् प्रस्थाज्यपूर्णानि सदशानि प्रदीपयेत् ॥ ३४ ॥

हृदयेन तु तद्वह्नौ वामादिनवशक्तिभिः ।
इष्ट्वा जयादिकं हुत्वा प्रायश्चित्तैर्जुहोति च ॥ ३५ ॥

कृत्वा स्विष्टकृतं पश्चाद् दीपवृक्षस्य कौतुकम् ।
बध्नीयाद् गीतनृत्तादितूर्यघोषपुरस्सरम् ॥ ३६ ॥

प्रातर्नित्यं समाप्याथ सविशेषं शिवं यजेत् ।
ततो महाशरावं तु त्रिद्व्येकं शिवपूजितम् ॥ ३७ ॥

श्रेष्ठादिकं दीपवृक्षाशिरस्यारोप्य पूरयेत् ।
घृतेन वाथ तैलेन तस्मिन् वर्तिं च निक्षिपेत् ॥ ३८ ॥

दशाष्टषट्पलैर्वस्त्रैर्नवैः श्रेष्ठादिकैः कृताम् ।
कोणमण्डपकुण्डेषु स्थण्डिलाग्निं विभज्य तु ॥ ३९ ॥

निधाय चानलाद्येषु ब्रह्मादीनीश्वरान्तकम् ।
पालाशवटशम्यर्कसमिधश्च घृतं चरुम् ॥ ४० ॥

हुत्वा दीपतरोर्मूले पूजयेत् तु सदाशिवम् ।
अलङ्कृत्य तु वस्त्राद्यैर्दीपवृक्षस्य मूलतः ॥ ४१ ॥

तूर्यगीतादिनिर्घोषैर्दीपोज्ज्वलनकर्म तत् ।
निवेद्यं तु शिवायाथ लब्धानुज्ञस्ततो गुरुः ॥ ४२ ॥

प्राग्ज्वालिताञ्छक्तिदीपानेकीकृत्य क्रमेण तु ।
मनोन्मनीशरावस्थान् नीत्वा दीपतरोरधः ॥ ४३ ॥

स्नातः शुक्लाम्बरः शुद्धः सुवेषः परिचारकः ।
शक्तिदीपं गृहीत्वोर्ध्वमारोहेद् दीपपादपम् ॥ ४४ ॥

तदग्रस्थमहावर्त्या शक्तिदीपं[1] नियोजयेत् ।
ततः प्रारभ्य सर्वास्ता दीपमालाः समन्ततः ॥ ४५ ॥

प्रभूतस्निग्धवर्त्याढ्या ज्वालयेयुः क्षणादिव ।
प्रासादाङ्गेषु सर्वेषु परिवारालयेषु च ॥ ४६ ॥

मण्डपेषु च सालेषु प्रभूतस्नेहपूरितान् ।
दीपान् प्रज्वाल्य संपूज्य गीतवाद्यादिमङ्गलैः ॥ ४७ ॥

उत्सवप्रतिमापूर्वयात्रां प्राग्वत् प्रवर्तयेत् ।
कृत्वा प्रदक्षिणं सर्वदीपानामालयाद् बहिः ॥ ४८ ॥

ज्वलत्स्वेव प्रदीपेषु पञ्चकृत्वस्त्रिरेव वा ।
अन्तः प्रवेश्य देवेशं ततो भूतबलिं क्षिपेत् ॥ ४९ ॥

इत्थं कृत्वैकरात्रं वा त्रिरात्रं पञ्चरात्रकम् ।
सप्तरात्रान्तकं नीचकनिष्ठाद्युत्तमोत्सवे ॥ ५० ॥

दिवा विशेषपूजां च कल्पयेत् प्रतिवासरम् ।
यात्रां चैव यथापूर्वं ग्रामादेस्तु प्रदक्षिणम् ॥ ५१ ॥

ततस्तु तीर्थयात्रान्ते स्नपनं चोपपादितः ।
कृत्वा तु दक्षिणां दद्यादन्नाद्यं चाप्यवारितम् ॥ ५२ ॥

एवं दीपोत्सवं भक्त्या ये वा पश्यन्ति मानवाः ।
तेऽपीह भोगान् संप्राप्य स्वर्गं यान्ति (विरेप ? निरेन)सः ॥५३॥

यदि वक्त्रसहस्राणां सहस्राणि भवन्त्विह ।
आयुश्च ब्रह्मणस्तुल्यं वक्तृत्वं च बृहस्पतेः ॥ ५४ ॥

---

[1] 'वीजं नि' ख. पाठः.

तथाप्येकप्रदीपस्य फलं वक्तुं न शक्यते ।
दीपोत्सवादौ दीपानां फलं वक्तुं कुतः क्षमम् ॥ ५५ ॥

इति तन्त्रेषु तथैव चोदितो नवनैवेद्यविधिः प्रदर्शितः ।
प्रदीपकल्पोऽपि च कृत्तिकादिकः शिवस्य सर्वद्युसदां च सम्मतः ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे
उपरिभागे क्रियापादे नवनैवेद्यकृत्तिकादि-
दीपपटलः एकषष्टितमः ॥

अथ द्विषष्टितमः पटलः ।

साधकाचार्ययोश्चापि दीक्षितानां द्विजन्मनाम् ।
संस्थितानां तु सर्वेषामन्त्येष्टिः कथ्यतेऽधुना ॥ १ ॥

मरिष्यतो वा मृतस्य जपेत् कर्णेऽथ दक्षिणे ।
आयुषः प्राणमित्यादीन् मूलेन ग्रथितान् क्रमात् ॥ २ ॥

परेयिवांसमित्याज्यं हुत्वा तत्स्वीकृतानले ।
केशान् विमुच्य स्नपयेच्छिष्यः पत्न्यथवा सुतः ॥ ३ ॥

आस्ये हिरण्यं प्रक्षिप्य समाच्छाद्याहताम्बरैः ।
इदं त्वा वस्त्रेणेति यावत् ।
दर्भेणाङ्गुष्ठयोर्बद्ध्वा घृतदध्यक्षतांस्तिलान् ॥ ४ ॥

उदकुम्भं हिरण्यं च पूषात्वेत्यग्रतो नयेत् ।
वंशदार्वादिरचितां सुदृढां शिबिकां नवाम् ॥ ५ ॥

आच्छाद्य रक्तवासोभिर्ध्वजमालाद्यलङ्कृताम् ।
दर्भमालापरिक्षिप्तां स्वास्तीर्णामधिरोप्य तु ॥ ६ ॥

अत्र शिष्यादयः स्नाताः प्राचीनावीतिनस्तु ते ।
आर्द्रैकवसनाः सर्वे वहेयुः शस्त्रजापिनः ॥ ७ ॥

ज्वलन्तमग्निं पात्रेऽन्यो गृहीत्वा पुरतो व्रजेत् ।
ग्रामादेर्बाह्यतो दूरे नद्यादेस्तु समीपतः ॥ ८ ॥

त्रिभाग(नेन ? याने) मार्गस्य शिबिकामवतार्य तु ।
दर्भैरास्तीर्य परितो वातास्ते पान्तु मन्त्रतः ॥ ९ ॥

---

१. 'वान्नै' ख. पाठः.

सव्येन चापि वामेन प(र्य ? री)युस्तत्सुतादयः ।
अथ नः शोशुचदयात्स्वसिद्धिर्वादयन्तु च ॥ १० ॥
नीयमानं पुनस्त्वायुर्विश्वाद्याद्यवलोक्य तु ।
गच्छेयुर्वाहकाः सौम्यास्तान् निवार्य पुनर्नयेत् ॥ ११ ॥
शुद्धायामवनौ शार्वीं शिबिकामवतार्य तु ।
चितां याम्योत्तरायामां खात्वा वस्ववटं भुवि ॥ १२ ॥
द्विचतुष्करविस्तारिदी(क्षां ? र्घां) दक्षिणतः प्लवाम् ।
उदक्चिताया वेदाश्रं कुण्डं कृत्वैकमेखलम् ॥ १३ ॥
तन्मृदा तस्य वायव्ये वेदाश्रं स्थण्डिलं तु तत् ।
हस्तमात्रं षडंशोच्चं सुलिप्तं तत्रयं भवेत् ॥ १४ ॥
तत्सुतो वाथ शिष्यो वा स्नातः संस्कुर(णे ? णो)चितम् ।
प्रादक्षिण्यं ततो गत्वा सविधे स्थण्डिलस्य तु ॥ १५ ॥
उदङ्मुखस्तूपविश्य संहारन्यस्तविग्रहः ।
सकलीकृत्य चात्मानं सा(ध ? द)यित्वास्त्रवर्धनी ॥ १६ ॥
तत्तोयैः प्रोक्ष्य तत्सर्वं चितेरैशे तु मण्डले ।
अस्त्रं पाशुपतं तत्र वर्धन्यां विकिरोपरि ॥ १७ ॥
कृत्वाभिकृतिकोष्ठानि चितायां पञ्चकोष्ठकैः ।
पृथ्व्यादीनां तु तन्मध्ये पार्थिवे पञ्चकोष्ठके ॥ १८ ॥
ब्रह्माणं पूजयेत् पश्चादसेजोनि(खिला ? लखा)नि तु ।
पृथक् कोष्ठचतुष्केषु मरुद्रक्षोग्निशूलिनाम् ॥ १९ ॥
विष्ण्वाद्यांश्चतुरश्चेष्ट्वा स्वाशाकोष्ठेषु लोकपान् ।
तदस्त्राणि चतुर्दिक्षु व्युत्क्रमेणाभिपूज्य तु ॥ २० ॥
स्थण्डिले तु विलोमेन धर्मवामादिकं यजेत् ।
तस्मिंस्तु सतिलं भस्म विकीर्य शिवमर्चयेत् ॥ २१ ॥
कुण्डे तदग्नौ सशिवे हुत्वा पूर्णां जुहोति च ।
काष्ठकीलानधोवक्त्रान् रक्तसूत्रनिवेष्टितान् ॥ २२ ॥
अप्रदक्षिणमस्त्रेण वह्निकोणादिषु न्यसेत् ।
एधोभिर्गर्तमापूर्य कुशपुष्पतिलाक्षतैः ॥ २३ ॥

---

१. 'न्ता', २. 'ता', ३. 'स्त' ख. पाठः.

विकीर्यास्त्रेण सम्पूज्य विपरीताम्बरावृतम् ।
मृद्गोमयजलैः पूतं स्थापयेद् भस्मनापि च ॥ २४ ॥
आच्छाद्याहतवासोभिः कुण्डोपान्ते निवेश्य तु ।
तद्देहे धारणाशुद्धे संहारिण्या तु मुद्रया ॥ २५ ॥
तच्चैतन्यं तु युञ्जीत तन्नामानं नमान्तिकम् ।
विद्यादेहं निरूप्यास्य कास्यहृन्नाभिगुह्यकाः ॥ २६ ॥
अतीताद्याः कलाः पश्चाद् विद्यातत्त्वं च विन्यसेत् ।
शक्तिं शिवं च विन्यस्य चैतन्यस्थितये ततः ॥ २७ ॥
मूलेनाज्यं शतं हुत्वा निवृत्त्यादिकलाः क्रमात् ।
वह्नौ नियोज्य सम्पूज्य शिवाद्यावाहनादिकम् ॥ २८ ॥
ताडनं चैव विश्लेषं चैतन्याकर्षणादिकम् ।
जन्माधिकारभोगान्तां स्रातश्शुद्धिं च निष्कृतिम् ॥ २९ ॥
तिरोधानं पाशभेदं मर्दनं वर्तुलीकृतिम् ।
देहं कारणपादान(?)माधिकारार्पणं तथा ॥ ३० ॥
चैतन्यस्य शिवे योगं कृत्वा कर्म समाप्य तु ।
चितौ याम्यशिरस्कं तमारोप्याच्छाद्य चेन्धनैः ॥ ३१ ॥
सपत्नीकस्य तत्पत्नीमियं नारीति शाययेत् ।
द्वारेषु हेम प्रक्षिप्य मैनमग्न्यादिमन्त्रतः ॥ ३२ ॥
सन्दीपयेत् तु संसृष्टिकुण्डस्थेनैव वह्निना ।
ज्वलत्यग्नौ शिरस्यस्य पूर्णां चानेन पातयेत् ॥ ३३ ॥

ओं

त्वमग्ने दक्षिण[1]कलः कालेनैवोपपातिताम् ।
गृहाण मन्त्रसम्पूतां शाव्यामेनां महाहुतिम् ॥ ३४ ॥

इति ।

मैनमग्न्यादिना वी[2](क्ष्य ?)क्षेद्दतयत्पूर्वकेण च ।
सूर्यं ते चक्षुरित्याद्याः षडृचः प्रजपेदपि ॥ ३५ ॥
होता य एतस्य पथ आज्यैर्हुत्वा नवा[3]हुतीः ।
स्रुक्स्रुवौ तावधोवक्त्रौ वह्नौ निक्षिप्य कर्करीम् ॥ ३६ ॥

---

१. 'णं', २. 'घृक्षे द', ३. 'चा' ख. पाठः.

सास्त्रावामंसनिहितां भ्रामयन्नप्रदक्षिणम् ।
सिक्त्वा तत्सलिलैः स्नातः पूर्वस्थाने विनिक्षिपेत् ॥ ३७ ॥

शरीरे भस्मसाद्भूते पृष्ठतोऽनवलोकयन् ।
गत्वा धातापुनात्वा(घाः ? धैः) स्नात्वा तीरे कुशास्तृते ॥ ३८ ॥
सव्यजानुं निधायार्घ्यमेतत् ते इति नामतः ।
उदकस्याञ्जलिं दद्यान्मन्त्रैरेभिस्त्रिभिः क्रमात् ॥ ३९ ॥

ओं हां शुद्धात्मन् ईशो भव स्वाहा । ओं हां शुद्धात्मन् सदाशिवो (भव) स्वाहा । ओं हां शुद्धात्मन् शान्तो भव स्वाहा ।

इत्युक्तमन्त्रनामान्तैः कुर्युस्तत्रोदकक्रियाम् ।
ततः स्नात्वोद्वयाद्येन समुपस्थाय भास्करम् ॥ ४० ॥
स्थले विलिप्ते दर्भेषु बलिं तु स्वाख्यया क्षिपेत् ।
संस्कर्तृपूर्वकाः शिष्यपुत्रपत्न्यादयोऽपि च ॥ ४१ ॥
उपवासं प्रकुर्युस्ते भूमौ च शयनं निशि ।
आदशाहं तदाशौचं सकृद्भक्तं दिवैव तु ॥ ४२ ॥
अनभ्यङ्गं चाङ्गरागताम्बूलादिविवर्जनम् ।
अ(न्न ? नु)यानादिकं कृत्वा स्पर्शे वास्य गुरोर्यदि ॥ ४३ ॥
स्नानमात्राद् विशुद्धः स्याद् वाहकाद्यास्त्रिवासरात् ।
दिनैस्तु दशभिर्मातृ(पितृ)भ्रातृसुतादयः ॥ ४४ ॥
शिष्याश्चापि विशुध्येयुः स्नानमात्रात् परो जनः ।
चतुर्थे पञ्चमे वाह्नि नवमैकादशाहयोः ॥ ४५ ॥
दीयमानं तु यच्छ्राद्धं नवश्राद्धं प्रचक्षते ।
पूजादिकं तदर्थं तु कुर्युः सर्वेऽस्य बान्धवाः ॥ ४६ ॥
अस्थ्नां सञ्चयनार्थं तु तृतीयेऽह्न्यथ कर्करीम् ।
आपूर्य पयसा चाद्भिस्तस्मिन्नस्थीनि निक्षिपेत् ॥ ४७ ॥
तद् गङ्गादिषु तीर्थेषु निखनेद् वाथ निक्षिपेत् ।
नैवौर्ध्वदेहिकापेक्षा मुमुक्षोरिह विद्यते ॥ ४८ ॥

बुभुक्षुश्चेन्मृतस्तस्य संस्कारोर्ध्वक्रियोच्यते ।
आ दशाहात् प्रतिदिनमेकोत्तराविवृद्धितः ॥ ४९ ॥
तन्नामयुक्तमूलेन देयं स्यात् सतिलं जलम् ।
अन्तर्दशाहं श्राद्धानि दत्त्वाथैकादशे दिने ॥ ५० ॥
उपलिप्य मठान्यन्तः स्नात्वा संसाध्य चौदनम् ।
विशिष्टं ब्राह्मणं त्वेकं वरयित्वा शिवा(स्र ? ज्ञ)यों[2] ॥ ५१ ॥
निमित्तायेति सङ्कल्प्य पादशौचादिपूर्वकम् ।
उत्तराभिमुखं दर्भेषूपवेश्याभिपूज्य च ॥ ५२ ॥
स्थण्डिले लौकिके वह्नौ विपरीतं परिस्तृते ।
अपूपव्यञ्जनान्नाद्यं न्यसेत् परिधिबाह्यतः ॥ ५३ ॥
प्रणीतान्तं कर्म कृत्वा याम्येऽग्नेर्मण्डले कुशान् ।
निक्षिप्य दक्षिणाग्रांस्तु तेषु पात्रं तु सादयेत् ॥ ५४ ॥
तस्मिन्नापूर्य सलिलैः कूर्चमन्तर्निधाय तु ।
आम आगच्छतु प्रेत इत्याद्यात् स्यात् स्वधाग्रहः ॥ ५५ ॥
इमां स्वधां ते प्रेताय गृह्णामीत्यन्तकं वदेत् ।
स्त्रियां निमित्तभूतायां स्त्रीशब्दान्तमुदीरयेत् ॥ ५६ ॥
सर्वत्र तु यथाप्रे(ता ? ते)प्रेतायै चैवमादिकम् ।
तिलोऽसि सोमदेवत्यात् तिलांश्च मधुवाततः ॥ ५७ ॥
मधु च प्रक्षिपेच्चाथ सोमस्यत्विषिरादितः ।
सर्वाङ्गुलीभिः संशोध्य यत्किञ्चिच्चैतदुद्धरेत् ॥ ५८ ॥
अवेष्टादन्दशूकाद्यैर्नराद्यान्तर्निधाय तु (?) ।
शन्नोदेवी[3]रिति स्पृष्ट्वा संपूज्याच्छादयत् कुशैः ॥ ५९ ॥
आयाहि प्रेत इत्याद्याद् दक्षिणाभिमुखस्तु तम् ।
ददद् रयिं मयि पोषोक्त्यास्मिन्नावाहयेद् द्विजैः ॥ ६० ॥
ओमेकोद्दिष्टकश्राद्धे प्रेताय क्रियतां क्षणः ।
इत्थं सदर्भपाणिभ्यां तद्दक्षिणकरं स्पृशेत् ॥ ६१ ॥

---

१. 'स', २. 'यम्', ३. 'वीरभीष्टय इति' ख. पाठः.

NN

क्षणं कुर्यात् ओं तमिति स च ब्रूयात् ततो वदेत् ।
प्राप्नोत्विदं सर्वांश्चेति प्राप्नवानीति सोऽपि च ॥ ६२ ॥
ततः सदर्भे हस्तेऽस्य दत्त्वाम्भोऽथ स्वधामपि ।
उद्धृत्य दद्यात् प्रेताय स्वधानमइति ब्रुवन् ॥ ६३ ॥
जलं चाथार्चयेच्चैनं ततः ससिकतांस्तिलान् ।
किरेदपहता आद्याद् रक्षायै सर्वतोऽपि च ॥ ६४ ॥
उदीर्तामवराद्येन प्रोक्ष्य भोजनभाजनम् ।
तत्रैकवचनान्तः स्यान्मन्त्रः स्त्र्यन्तो भवेत् स्त्रियाः ॥ ६५ ॥

तदनु उद्धृत्याग्नौ करिष्यामीत्युक्तः काममुद्ध्रियतां काममग्नौ च क्रियतामिति वदेत्, अथाग्निमुखा(त्? न्तं) कृत्वा पक्वादिकान्युद्घाख्यास्त्रेणावोक्ष्य दर्भैरभिद्योत्याभिघार्य तेषु तिलान् विकीर्यावोक्ष्य ततोऽग्नावाज्यं व्याहृतिभिर्हुत्वा दर्व्यामुपस्तीर्य सर्वस्मात् सकृत् सकृदादायाभिघार्य (दीक्षितो? दक्षिणतो) भस्ममिश्रानङ्गारान् निरुह्य तेषु जुहोति प्रेतायामुष्मै यमाय च स्वाहा । अग्नये कव्यवाहनाय स्विष्टकृते स्वधा नमःशिवाय स्वाहेति स्विष्टकृद्धोमः । तथैव व्याहृतिभिर्हुत्वा परिषिञ्चतु, धूपदीपा(दि?)भिश्रावणनमस्कारान् विना (आपश्शु? अपूपश्शु)द्धान्नदधिक्षीरफलबहुलं निमित्तबुद्ध्या ब्राह्मणं भोजयित्वा तद्भुक्तशेषेण अग्नेर्दक्षिणतो दक्षिणाग्रेषु दर्भेषु तिलमध्वाज्यप्लुतं पिण्डमनेन दद्यात् । ओम् अयमोदनः कामदुघोऽस्त्वनन्धोऽक्षीयमाणः सुरभिः सर्वकामी स त्वोपतिष्ठत्वजरो नित्यपूतः स्वधां दुहानस्त्वमृतान्नस्तर्पयतु अमुष्मै प्रेताय पिण्डमुपतिष्ठत्विति ।

ऊर्जं वहन्तीराद्येन सेचयेत् स्वधयाख्यया ।
कृतहस्तावसेकाय तस्मै दद्यात् तु दक्षिणाम् ॥ ६६ ॥
यद् यत् तदुपयोगि स्यात् गृहक्षेत्रधनादिकम् ।
भूषणाद्यं च तत् सर्वममुष्मै संप्रदाय तु ॥ ६७ ॥
क्षिप्त्वा पिण्डं तु नद्यां वा स्नात्वा पुण्याहमाचरेत् ।
अवारितं तदन्नाद्यं दत्त्वा चोपवसेत् स्वयम् ॥ ६८ ॥
संस्कृत्य चैकोद्दिष्टान्ते तथा संवत्सरेऽपि च ।
त्रिषु चोपवसेत् कर्ता भुञ्जीयाच्चापरेऽहनि ॥ ६९ ॥

एकोद्दिष्टं विधायैवं सोदकुम्भं तु भोजनम् ।
एकोद्दिष्टविधानेन दद्याच्च प्रतिवासरम् ॥ ७० ॥
मा(से ? स्ये)कं मासिकं तद्वत् त्रैपक्षं च त्रिपक्षके ।
प्रतिमासं तथा श्राद्धं पिण्डानपि च निर्वपेत् ॥ ७१ ॥
न्यूनषाण्मासिकं चाथ न्यूनसंवत्सरं तथा ।
मासिकान् द्वादश श्राद्धैः ++ पिण्डांश्च षोडश ॥ ७२ ॥
दद्यात् संवत्सरान्ते तु सपिण्डीकरणं स्मृतम् ।
तत्र सङ्कल्प्य पूर्वेद्युर्विशिष्टान् वरयेद् द्विजान् ॥ ७३ ॥
स्नात्वान्यस्मिन्दिने भक्तं सापूपव्यञ्जनादिकम् ।
संसाध्य शुचिभिः स्नातैः ब्राह्मणैश्चरुपाकवत् ॥ ७४ ॥
दक्षिणोत्तरयोः कृत्वा स्थण्डिले गोमयाम्बुभिः ।
स्वाग्निं दक्षिणतस्तद्वदुत्तरे लौकिकानलम् ॥ ७५ ॥
आदाय विश्वेदेवार्थं ब्राह्मणौ प्राङ् निमन्त्र्य तु ।
पादशौचादिकं कृत्वा प्राङ्मुखावुपवेशयेत् ॥ ७६ ॥
क्षणं कृत्वा सदर्भेषु क्षिप्त्वाम्भस्तत्करेष्वथ ।
यवाम्बुनार्घ्यं संपाद्य सुधां स्मृत्वा तु निक्षिपेत् ॥ ७७ ॥

विश्वेभ्यो देवेभ्यः स्वधा नमः स्वाहेति । तदनु

निमित्तार्थं द्विजं योग्यं वरयित्वा तु पूर्ववत् ।
पित्रे पितामहायाथ तत्पित्रे च द्विजास्त्रयः ॥ ७८ ॥
स्त्री चेन्मात्रे च तन्मात्रे तन्मात्रे च द्विजत्रयम् ।
सर्वे वंशश्रुताचारसंपन्नाः शिवतत्पराः ॥ ७९ ॥
तान् संपूज्य तदन्नाद्यं द्विधा सर्वं विभज्य तु ।
देवांशकल्पितं यत् तत् पात्रे क्षिप्त्वाभिघार्य तु ॥ ८० ॥
अनखाङ्गुष्ठतस्ताभ्यां विश्वेदेवेभ्य इत्यपि ।
स्वाहान्तं दर्शयेच्चाथ प्राचीनावीतमुद्वहन् ॥ ८१ ॥
तथै(व नि ? वाप)हताद्येन किरेत् ससिकतांस्तिलान् ।
उदीरतामवरतः पितरश्शब्दसंयुतान् ॥ ८२ ॥

प्राग्वत् स्थानान्यवोक्ष्याथ लौकिकाग्नेस्तु दाक्षिणे ।
दक्षिणाग्रेषु दर्भेषु पृथक् पात्राणि सादयेत् ॥ ८३ ॥
सर्वं पक्वमुदङ् न्यस्येत् पर्यग्निकरणं चरेत् ।
सादितेष्वथ पात्रेषु पित्रादिभ्यः स्वधां क्रमात् ॥ ८४ ॥
कृत्वा तिलोऽसीत्याद्येन तिलान् प्रक्षिप्य पूर्ववत् ।
मधुवातेति च मधु सोमस्य त्विषिरादितः ॥ ८५ ॥
पिष्टावेषो दन्दशूकान् त्यक्त्वा(?) पूर्वं यथोदितम् ।
आम आगच्छन्तु पूर्वेण पित्राद्याख्यापुरस्सरम् ॥ ८६ ॥
स्वधाकृत्वा चाभिम(न्त्र्येत्? न्त्र्य)शन्नो देवीरिति स्पृशेत् ।
संपूज्य दर्भैराच्छाद्य धौतपादान् द्विजांस्तु तान् ॥ ८७ ॥
पित्राद्यर्थान् दक्षिणतः प्रेतार्थमपि चोत्तरे ।
दर्भासनेषूपवेश्य सर्वांस्तानुत्तरामुखान् ॥ ८८ ॥
प्राग्वदग्नौ करिष्यामीत्युक्तैरुक्तस्तथेति च ।
परिधानाग्नि याम्येऽग्नाविद्धेत्वाग्निमुखान्तरम् ॥ ८९ ॥
पञ्चावत्तं स्रुवेणाज्यं मन्त्रैरेभिर्जुहोति च ।

याः प्राची संभवन्तीत्यादिः प्रथमः । अन्तर्दधे पर्वतैरित्यादिर्द्वितीयः । अन्तर्दधे ऋतुभिरित्यादिस्तृतीयः । यन्मे मातेत्यादिश्चतुर्थः । यद्वस्तप्यादमित्यादिः पञ्चमः ।

अपूपमष्टधा कृत्वा सोमायेत्यादिनांशतः ॥ ९० ॥
अङ्गिरस्वन्तमूतये यदग्ने कव्यवाहन ।
त्रि(भि)र्हुत्वा त्रिखण्डानि स्रुचमादाय वै ततः ॥ ९१ ॥
चरुमन्नं यवागूं च हुतशेषाज्यमिश्रितम् ।
दर्व्योपघातं जुहुयात् पितृतर्पणपूर्वकैः ॥ ९२ ॥

अथाग्नये कव्यवाहनायेति दक्षिणार्धपूर्वार्धे । (प्रेम? प्रो)क्षणप्रहरणान्तं कर्म कृत्वा पृथिवी ते पात्रमित्यभिमृश्योत्तराग्निं परिषिच्य दर्व्यामुपस्तीर्य सर्वस्मात् सकृत् सकृदवदायाभिघार्य दक्षिणतोभस्ममिश्रानङ्गारान् निरुह्य तेषु ओं प्रेतायामुष्मै यमाय च स्वाहा । अग्नये कव्यवाहनाय स्विष्टकृते स्वधा नमः स्वाहेति जुहुयात् । तथैव परिषिच्य विश्वेदेवार्थं प्राग्वत् संस्कृतमन्नाद्यं

---

१. 'म्येन वि' ख. पाठः.

पात्रयोः प्रक्षिप्य पृथिवी ते पात्रमित्यभिमृश्येदंविष्णवादिना अनखाङ्गुष्ठेनान्नाद्यं स्पर्शयित्वा पित्रादीनां कृतक्षणानां सपवित्रेषु हस्तेषु प्राग्वच्छुद्धजलं स्वधानामभिश्च प्रक्षिप्य तत्पात्रेष्वन्नाद्यं च स्पर्शयित्वा तेषां हस्तेष्वपामशनं च दत्त्वैवं निमित्तस्य च तत्र प्राणे निविष्टोऽमृतं जुहोमीत्याद्यान् प्राणाहुतिमन्त्रान् क्रमेण स्वयं जपति । ते च स्वस्वमुखेषु जुहुयुः । स्वयं चाभिश्रावणान् श्रावयति कृणुष्वपाजादिं राक्षोघ्नप्रकारेण प्रत्यृचं दहाशसाद्यन्तम् ऋचां प्रा(ची)तिसूक्तं त्रिणाचिकेतं त्रिसुपर्णमीशानं च जपति ।

अथ भुक्तवत्सु मेकणनान्नं (?) दर्शयन् तृप्ताःस्थेति ब्रूयात् । ते च तृप्ताःस्म इति ब्रूयुः । तदन्नं सजलं प्रादाक्षिण्येन भूमावनेन किरति ।

ये अग्निदग्धान्युतजीवात्वदग्धाः कुले मम ।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिमिति ।

अथ दक्षिणाभिराच्छादनैश्च परितोष्य पित्रादीन् क्रमेणोत्थाप्य तदनु निमित्तं च शेषान्नाद्यमनुज्ञाप्य उत्तराग्नौ व्याहृतिभिर्हुत्वा शेषं कृत्वा तमग्निं विसृज्य प्रेतपात्रस्थजलं पित्रादिस्वधापात्रेषु क्रमान्मधुवाता ऋतायते इति तिसृभिः सङ्गच्छध्वमिति द्वाभ्यां नियोज्य दक्षिणस्माद् दक्षिणतोऽग्नेर्दर्भान् संस्तीर्य पितृतर्पणमन्त्रैः पिण्डान् दत्त्वाभ्यर्च्य दर्भैराच्छाद्य प्रेतपिण्डं पितृपिण्डेषु त्रिधा नियोजयति । समानो मन्त्रः समितिरित्यादिना समानी व आकूतिरिति द्वाभ्यां पित्रादिपिण्डानेकीकृत्याथ ये समाना ये सजाता इति द्वाभ्यामेनानुपतिष्ठेत । तेन स्वधापात्रजलान्येकीकृत्य पिण्डं परिषिञ्चति । ततो यज्ञोपवीती जयादिप्रायश्चित्तान्तं हुत्वा आधेनुवरप्रदानान्तं कर्म कृत्वा पित्रादीन् देवांश्चोद्वास्याद्वारादनुज्ञातो द्विजेभ्यो लिङ्गिभ्योऽर्थिभ्यः स्वजनेभ्यश्चानिवारितमन्नाद्यं दाक्षिणाश्च शिवार्पणबुद्ध्या दत्त्वा तदुद्देशेन शिवपूजां विदधीत । शक्तश्चेल्लिङ्गं च तदर्थं प्रतिष्ठाप्य यथाविभवं पूजादिकं कल्पयेत् । निमित्तं चाभिमतस्वर्गादिभोगैः संयोज्य स्वयमप्यैहिकामुष्मिकान् कामानाप्नोति ।

सपिण्डीकरणाधिकारः ।

मातापित्रोस्तथा भ्रातुर्मातुलाचार्ययोरपि ।
अन्येषामपि बन्धूनां वर्षे वर्षे तु तद्दिने ॥ ९३ ॥
कुर्यात् संवत्सरश्राद्धं तांस्तान् वोद्दिश्य शक्तितः ।
अथाष्टकाश्राद्धविधिः कथ्यतेऽत्र समाहितः ॥ ९४ ॥

उक्तं च पुराणादिषु —

“नभस्यमासस्य तु कृष्णपक्षे त्रयोदशी पञ्चदशी च माघे ।
उपप्लवे चन्द्रम*सश्च भानोस्तिस्रोऽष्टकायामयनद्वये च ॥

पानीयमप्यत्र तिलैर्विमिश्रं दद्यात् पितृभ्यः प्रयतो मनुष्यः ।
(तत्तज्ज ? दत्तं ज)लान्नं प्रददाति तृप्तिं वर्षायुतं तत्कुलजैर्मनुष्यैः ॥”

इति । अपिच ।

“अमावास्यासु सर्वासु त्रयोदश्यष्टमीषु च ।
कृष्णपक्षे विशेषेण व्यतीपाते क्षयेषु च ॥

विषुवे चैव पञ्चम्यां नवधान्यादिसंभवे ।
क्षेत्रतीर्था(दि)गमने श्रोत्रिये च गृहागते ॥

स्वप्ने वा स्वपितॄन् दृष्ट्वा श्राद्धं कुर्वीत भक्तितः ।
कुलशीलश्रुताचारसम्पन्नांस्तु द्विजोत्तमान् ॥

शिवभक्तान् विशेषेण पूर्वेद्युर्वरयेन्निशि ।
चरुपाकोक्तमार्गेण चुल्लीषु शुचयो द्विजाः ॥

स्नाताः शुक्लाम्बरधराः साधयेयुश्च तद्धविः ।
श्राद्धे शस्तानि धान्यानि ग्राम्यारण्यानि सर्वशः ॥

वर्जयित्वा कुलत्थानि चणकांश्चैव कोद्रवान् ।
पुलाकांश्चैव कङ्गूंश्च निष्पावांश्च विशेषतः ॥

फलेष्वपि च विख्यानि ककुभाढ्यमलाम्बुकम् (?) ।
बिम्बं च त्रापुषं चाथ मूलेषु लशुनं तथा ॥

पलाण्डुमूलकं चापि शाकाद्यपि च वर्जयेत् ।
वर्ज्यं हि लवणं श्राद्धे हिङ्गुश्च मरिचानि च ॥

कुस्तुम्बुरूणि पिण्याकं (चै ? तै)लं चाभ्यञ्जनं विना ।
शस्तं क्षीरं च दध्याज्यं गव्यं श्रेष्ठं च माहिषम् ॥

मध्यं चाजाविकं नीचं वर्ज्यं मथितकाञ्जिके ।
(विश्वेदेवा द्विजाः प्रीताः ?)

---

* ‘मसो रवेश्च त्रिष्वष्टकास्वप्ययनद्वये च’ इति विष्णुपुराणे पाठो दृश्यते ।

सुमुखान् सुव्रतान् स्नातानन्नूचानान् विशेषतः ।
भोजयेदागतान् सम्यक् पादशौचादिपूर्वकम् ॥"

अत्र स्मृतिः —

त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः ।
त्रीणि चात्र प्रशंसन्ति शौचमक्रोधमत्वरम् ॥

दिवसस्याष्टमे भागे मन्दीभवति भास्करे ।
स कालः कुतपस्तस्मिन् पितॄणां दत्तमक्षयम् ॥

पयसा मासिकी तृप्तिः पायसेन तु वार्षिकी ।
मध्वाज्यपायसैस्तृप्तिर्भवेद् द्वादशवार्षिकी ॥

पितॄणामिति ।

वर्ज्यः कालेषु पूर्वा(ह्ने ? ह्णः) सन्ध्ये नन्दा चतुर्दशी ।
शुक्रज्ञजीववारा(श्च) पू(र्णाः ?र्वाः) कर्तुश्च जन्मभम् ॥"

अथ प्राङ्गणे गोमयेन चतुरश्रं हस्तविस्तीर्णं मण्डलमुपलिप्य प्रागग्रान् दर्भान् सयवानक्षतानास्तीर्य तस्मिन् युग्मान् विश्वेदेवबुद्ध्या ब्राह्मणान् पादयोः सयवमर्घ्यं दत्त्वा मृज्जलैः प्रक्षालिताङ्घ्रीन् स्वाचान्तानन्तः प्रवेश्य सदर्भासनेषु प्राङ्मुखानुपवेश्य तदनु पश्चिमतः सयाम्याग्रदर्भे वृत्तमण्डले पितृपितामहप्रपितामहानयुजो द्विजान् सतिलजलार्घ्यपूर्वं क्षालितचरणान् स्वाचान्तानन्तः प्रवेश्योदङ्मुखान् सदर्भविष्टरेषूपवेश्य पुनश्च पितृमण्डलाद् दक्षिणतः सदक्षिणाग्रदर्भे मण्डले मातृपितामहीप्रपितामहीभ्यः प्राग्वद् ब्राह्मणान् कृतपादशौचाननन्तरं तत्र प्रवेश्य, तदनन्तरं मातामहमातुःपितामहमातुःप्रपितामहेभ्यः सपत्नीकेभ्यो ब्राह्मणान् प्राग्वन्निवेश्य आयन्तु पितर इत्यादिना क्षणं कृत्वा पित्रादिभ्यो मात्रादिभ्यो मातामहादिभ्यश्च पात्रत्रये प्राग्वन्मन्त्रैः स्वधां कृत्वा अपहता असुरादिनास्त्रेण च ससिकतांस्तिलान् विकीर्य तेषां सदर्भहस्तेषु शुद्धजलं स्वधाजलं च प्राग्वन्मन्त्रतः पृथक् क्रमेण दत्त्वा(त्पादिकं?) पितॄन् विलोमतोऽभिपूज्य प्राग्वत् संस्कृतं (चा ?च)र्वादिकं सपिण्डीकर(णं ? णवद्) जुहुयात् । विशेषस्त्वपूपहोमानन्तरम् इयमेव सायात्प्रथमा व्यौच्छदिति पञ्चदशकं युष्टये इत्येकां संवत्सरस्य प्रतिमोसिकाम् ओं अग्नये कव्यवाहनाय स्वधा नमः शिवाय स्वाहा इत्यादि सोमाय पितृमते यमाय अर्यम्णे अङ्गिरसे अग्निष्वात्तेभ्यो बर्हिषद्भ्यः सोमपेभ्य ऊष्मपेभ्यश्च जुहुयात् । आज्यं (प्राकाग्रः?)-

स्त्वेकैकशस्तच्छेषान्नं पित्रादीनां पात्रेषु प्रक्षिप्याज्यं तिलैरुपस्तृणाति । अथ शुद्धोदनपायसघृतगुलापूपफलभूयिष्ठमन्ना(ज्यं ? द्यं) त्रिधा विभज्य (पा? भा)गेन पूर्वं देवेभ्यः प्रक्षिप्याथ पुरुषेण प्रोक्ष्याभिमन्त्र्य पित्रादिभोज्येषु तिलान् विकीर्याघोरेण परिषिच्य वामदेवेन स्वोत्तानकरेण तस्यानुत्तानकरं हविषः प्रदक्षिणं नीत्वा तत्तदङ्गुष्ठाग्रेण इदं विष्ण्वादिना विष्णो हव्यं रक्षस्वेति भोज्यानि स्पर्शयित्वा स्वकरे जलं गृहीत्वा अमुष्मिञ्छ्राद्धे विश्वेभ्यो देवेभ्य इदमन्नं दत्तं दास्यमानं चातृप्तेस्तत् सर्वं न ममामृतायेत्यशनं पुरुषेणामृतोपस्तरणमसीति दद्यात् । पित्रादिभ्यश्चैवमेव । विशेषस्तु विष्णो कव्यं रक्षस्वेति स्पर्शयेत्, अमुष्मिञ्छ्राद्धे पितृभ्य इत्यादिना च । पित्रादिभ्योऽप्यपामशनं पूर्ववद् दद्यात् । ते च ता अपो यथापूर्वं पिबेयुः । तत्प्राणाहुतिमन्त्रान् प्राणे निविष्टो अमृतं जुहोमीत्यादीन् यजमान एव पठति । तेच ता आहुतीः स्वयमेव जुहुयुः । तदनु[1] जानुमध्यस्थवामकरेण पात्रस्पर्शस्तथैव दक्षिणेन यथाजोषं मौनिनः प्रभुञ्जीरन् । यजमानोऽप्युत्तराभिमुखम् ईशानसंपुटं रक्षोघ्नान् कृणुष्वपाजादीनृचां प्राचीत्यादींश्च त्रिनाचिकेतं त्रिसुपर्णान् जपंस्तिष्ठेत् (ज्येष्ठ[2]सामानिव?) तस्मिन् काले यद्यागच्छेदतिथिः तमपीश्वरबुद्ध्या सृष्टं शिष्टान्ना(न् ? नि) भोजयेत् । अथ तृप्तेषु दर्व्यान्नमादाय सर्वेस्यस्तृप्ताः स्थेति दर्शयेत् । ते च तृप्ताःस्म इति ब्रूयुः । तच्च भूमौ विकिरेत्, ये अग्निदग्धा जाता जीवा येत्वदग्धाः कुले मम भुमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिमित्यादिना प्राग्वद् विकीर्यामृतापिधानमसीति चुलुकं च दद्यात्, ते तत् पीत्वा कृतहस्तावसेचनास्तथैवासीरन् । तत्रैव मण्डले सव्येन दर्भान् वामेन तिलान् विकीर्य भुक्तशेषादादाय पिण्डान् सतिलाज्यदधिमधूनीशपुरुषाघोरैः एतत् ते पितरित्यादिभिर्मूलान्तैः पित्रादिभ्यो निर्वपेत् । तद्यथा — एतत् ते पितासौ ये ते मातामहा ये त आचार्या ये ते गुरवो ये ते सखायो ये ते ज्ञातयो ये तेऽमात्या ये तेऽन्तेवासिनस्तेभ्यश्च पत्नयस्तेभ्यस्ताभ्यश्च स्वधा नम इति । एतत्ते पितामहा इत्यादिना च । एवं एतत्ते प्रपितामहा इत्यादिना च । तथा च तद्वन्मात्रादिभ्यो(यु ? मा)तामहादिभ्यश्च पिण्डांस्त्रींस्त्रीन् प्रदायाथ भूमौ दर्भेष्वन्नशेषं विकीर्यात्राल्पमेभिर्निर्माष्टि । येन पातिता गर्भा असृग्भाज उपासते तेभ्यः स्वजाः स्वधा नमस्तृप्नुवन्तु मदन्तु च । ये आमा ये च पक्वा ये च दुष्टाः पतन्ति नः ।

---

१. 'विरजामध्य' ख. पाठः. २. 'ष्ठा' क. पाठः.

तेभ्यः स्वजाः स्वधा नमस्तृप्नुवन्तु मदन्तु च। ये कुमारा ये स्त्रियोऽविज्ञाताः पतन्ति नः।

तेभ्यः स्वजाः स्वधा नमस्तृप्नुवन्तु मदन्तु च। अथैनान् संक्षालनेन ये समाना ये सजाता इति द्वाभ्यां त्रि[1](रवसलं ? रपसव्यं) वामेनाप्यूर्जं वहन्तीरित्यादिना च मूलान्तं परिषिच्य वसनाभरणहिरण्यादिकां दक्षिणां दत्त्वा स्वधापात्रमुत्तानयेत्। अथ पुरुषादिना वाजेवाजेत्यादिना करे गृहीत्वा द्विजानुत्थाप्य तान् प्रदक्षिणीकृत्य यजमानः प्रणमति। ते च ब्राह्मणाः संपितर इत्यादिनाशिषः प्रयुञ्जीरन्। अन्नशेषैः किं क्रियतामिति यजमानेन पृष्टैरिष्टैः सहोपभुज्यतामित्यभिधाय गन्तव्यम्। स च तानाद्वारादनुव्रजेत्। ततः पितृतर्पणमन्त्रैश्चतुर्विंशतिपिण्डान् स्वाहाविवर्जितैः प्रक्षिप्य प्राग्वदूर्जंवहन्तीरिति परिषिच्य जयादिप्रायश्चित्तान्तमाधेनुवरप्रदानात् कर्म कृत्वा प्रणीतोत्सेचनान्तमग्निं विसृजेत्। तदनु पुत्रकामा या पत्नी मध्यमं पिण्डमाधत्त पितर इत्यादिना प्राश्नाति। अथ ब्राह्मणानन्यांश्च भोजयित्वा पुत्रमित्रभृत्यादिभिः सहितः पितृशेषमश्नन्नैहिकामुष्मिकानपि सर्वान् कामान् प्राप्नोति।

इतीदमन्त्येष्टिविधानमीरितं पृथङ् नवश्राद्धविधिं च षोडशैः।
ततः सपिण्डीकरणं तथाष्टका निरूप्य तन्त्रेषु यथोदितं विधिम्॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापादे अन्त्येष्टिपटलो द्विषष्टितमः॥

अथ त्रिषष्टितमः पटलः।

च्युतस्खलितदोषाणामद्भुतानां च शान्तये।
नित्यनैमित्तिकानां तु प्रायश्चित्तं निगद्यते॥ १॥
त्रिद्व्येकसंख्यायजने हीने निर्माल्यशोधने।
क्रमात् कनिष्ठस्नपनैः स्नपयेत् पूजयेदपि॥ २॥
सन्ध्यासु यदि निर्माल्यं लिङ्गमूर्धनि तिष्ठति।
सान्निध्यं हन्ति देवस्य राज्ञः शक्तिं च हापयेत्॥ ३॥
गन्धहानौ तु दारिद्र्यं पुष्पहानौ श्रियश्च्युतिः।
धूपदीपविहीनं यदर्चनं रोगदुःखदम्॥ ४॥

---

[1] 'त्रिभिर' क. पाठः.

नैवेद्यहीनं दुर्भिक्षमग्निकार्ये च्युते सति ।
अनावृष्टिभयं राष्ट्रे बलिच्छेदे प्रजाक्षयः ॥ ५ ॥

नित्योत्सवस्य हानौ स्यात् परचक्रभयं सदा ।
महोत्सवस्य विच्छेदे राज्ञः कर्तुश्च नाशनम् ॥ ६ ॥

तस्मान्न हापयेत् कञ्चिदुपचारं विचक्षणः ।
यथाक्तोचा(र ? रात्)सम्पद् विवर्धते ।
प्रमादाद् वाथवा विघ्नात् पूजादेरिह विच्युतौ ॥ ७ ॥

तत्तद्विगुणितां पूजां कृत्वाघोरशतं जपेत् ।
वृषयागविहीने तु गवां नाशो भवेद् यतः ॥ ८ ॥

तच्छान्त्यै वृषभस्यैव पूजा द्विगुणिता भवेत् ।
ध्वजहीनोत्सवे राज्ञः शत्रुपीडा भवेद् यतः ॥ ९ ॥

तद्भङ्गे वा पताकाग्रा मारी राष्ट्रे प्रवर्धते ।
तच्छान्त्यै तु ध्वजस्यैशे कुण्डेऽग्नौ वृषमन्त्रतः ॥ १० ॥

समिदाद्यष्टभिर्हुत्वा वृषं चैव शिवं यजेत् ।
पुनरपि ध्वजमुच्छ्रित्योत्सवं प्रवर्तयेदिति यावत् ।
मङ्गलाङ्कुरहीने स्याद् राजादीनाममङ्गलम् ॥ ११ ॥

त्रियम्बकादिना हुत्वा सविशेषं शिवं यजेत् ।
हीने कौतुकबन्धे तु राष्ट्रे रक्षा विनश्यति ॥ १२ ॥

तत्र त्रैयम्बकेनाज्यं हुत्वेष्ट्वा कलयेच्च तम् ।
चूर्णोत्सवं विना रोगो राष्ट्रे भवति शान्तये ॥ १३ ॥

मृत्युञ्जयेन हुत्वात्र सविशेषं शिवं यजेत् ।
तीर्थयात्रां विना राष्ट्रं जलाभावेन पीड्यते ॥ १४ ॥

हुत्वाज्यं संहितामन्त्रैस्तीर्थयात्रां प्रवर्तयेत् ।
ध्वजावरोहणे हीने पीडयेच्चण्डमारुतः ॥ १५ ॥

कृत्वा तु पूर्ववच्छान्तिं शिवमिष्ट्वावरोपयेत् ।
उत्सवावाहितानां तु गणानामविसर्जने ॥ १६ ॥
राष्ट्रक्षोभो भवेच्छान्त्यै शिवमिष्ट्वा जयाबलिम् ।
विकीर्य तु गणान् सर्वानभिपूज्य विसर्जयेत् ॥ १७ ॥

नित्योत्सवे(न ? तु) लिङ्गं वा बेरं वापि महोत्सवे ।
पतितं यदि यानादे राजराष्ट्रादिनाशकृत् ॥ १८ ॥
प्रायश्चित्तं तु तत्रैव देवं विन्यस्य सर्वतः ।
तिरस्करिण्या संवेष्ट्य समालिप्य च तत् स्थलम् ॥ १९ ॥
स्नात्वा कृत्वा तु पुण्याहमन्नलिङ्गमथापरम् ।
विधाय तच्च बेरं च तत्रैव विधिनार्चयेत् ॥ २० ॥
नवकेनाभिषिच्याथ शाल्यन्नं घृतपायसम् ।
निवेद्यात्राग्निमाधाय प्राच्यां नामान्तसंस्कृते ॥ २१ ॥
घृतं चरुं च समिधो मधुक्षीरे च लाजकान् ।
ईशादिभिस्तु सद्यान्तैर्गायत्र्या श्वेतसर्षपैः ॥ २२ ॥
तिलैरस्त्रेण मूलेन शालिभिश्च शतं शतम् ।
हुत्वाथाधारशक्त्यादिमन्त्रैश्चापि दिगीश्वरैः ॥ २३ ॥
दिशि यस्यां तु तल्लिङ्गं च्युतं तत्पालमन्त्रतः ।
तिलाज्याभ्यां शतं हुत्वा जयादिं निष्कृतिं तथा ॥ २४ ॥
कृत्वा स्विष्टकृतं दद्याद् दिक्पालोक्तां तु दक्षिणाम् ।
हैमो गजो हिरण्यं च महिष्यो महिषान्विताः ॥ २५ ॥
हैमच्छागस्तथा हारः पित्तलं हेमसंयुतम् ।
पयस्विन्यश्च रूप्यं च दक्षिणाः कथिताः क्रमात् ॥ २६ ॥
पुनः प्रवर्तयेद् यात्रां शिष्टं च विकिरेद् बलिम् ।
बेरं चेत् पतितं भिन्नं तत्रोक्तात् तु चतुर्गुणम् ॥ २७ ॥
प्रायश्चित्तं दक्षिणा च स्यादन्नं चाप्यवारितम् ।
बेरमन्यं प्रतिष्ठाप्य यात्राशेषं प्रवर्तयेत् ॥ २८ ॥
महास्नपनपूजां च मूललिङ्गे प्रवर्तयेत् ।
पूजाविच्छेदकालस्य गौरवानुगुणेन तु ॥ २९ ॥
प्रायश्चित्तं प्रकुर्वीत तत्कालद्विगुणार्चनम् ।
होमं च दक्षिणां चापि दत्त्वा पूजां प्रवर्तयेत् ॥ ३० ॥
आ द्वादशाहात् पूजाया विच्छेदे निष्कृतिः स्मृता ।
लिङ्गे तु मानुषे पश्चात् प्रतिष्ठामेव कारयेत् ॥ ३१ ॥

---

१. शात् पू' ख. पाठः.

आर्षस्वयंभुलिङ्गानां कृत्वा संप्रोक्षणं पुनः ।
जीर्णस्थापनमात्रेण स्नपयित्वा तु पूजयेत् ॥ ३२ ॥

शिवकुम्भास्त्रयोर्भङ्गे कर्तुर्मरणमादिशेत् ।
आज्याद्यैः संहितामन्त्रैस्तत्र हुत्वा शतं शतम् ॥ ३३ ॥

तिलाज्यमस्त्रतश्चान्ये कुम्भास्त्रे तत्र पूजयेत् ।
पूजिते स्नपनार्थं तु कलशे कलशेषु वा ॥ ३४ ॥

भिन्ने(खि? भि)न्नेषु वान्यांस्तु समापूर्यार्चयेत् तथा ।
अस्त्रेणाज्यशतं हुत्वा तेषु संपातयेद् घृतम् ॥ ३५ ॥

तद्वत् तावज्जपित्वा तु स्वर्णं दद्याच्च शान्तये ।
प्रासादे प्राङ्गणे वापि मृते वा रुधिरक्षते ॥ ३६ ॥

मूत्रविष्ठादिसिक्ते वा श्वोदक्यासूतिकादिभिः ।
चण्डालैर्वा सृगालैर्वा गृध्रोलूकैश्च गर्दभैः ॥ ३७ ॥

प्रविष्टे च प्रसूते च प्रायश्चित्तं निगद्यते ।
तत्र तां तां भुवं खात्वा द्विहस्तं परितोऽप्यथ ॥ ३८ ॥

उद्धृत्य तां मृदं त्यक्त्वा गोकरीषाग्निना दहेत्[1] ।
तद् भस्म च परित्यज्य गोमूत्रेणाभिपूर्य तु ॥ ३९ ॥

विप्रपादाम्बुतीर्थाद्भिः पञ्चगव्येन च क्रमात् ।
गोभिराक्रामयेच्चाष्टमृद्भिरापूरयेदपि ॥ ४० ॥

प्रपां वा मण्डपं[2] कृत्वा ब्राह्मणांस्तत्र भोजयेत् ।
दक्षिणेऽर्धेन्दुकुण्डेऽग्नौ संस्कृते चाहिते शिवे ॥ ४१ ॥

औदुम्बरीं चापा[3]मार्गसमिधं च घृतं चरुम् ।
सिद्धार्थांश्च क्रमादष्टसहस्रं तु पृथक् पृथक् ॥ ४२ ॥

ईशान्यैर्ब्रह्मभिर्हुत्वा पुनः शालींस्तिलान् यवान् ।
मुद्गान् समधुरा दूर्वाः पायसं च(रवः? चरुं) क्रमात् ॥ ४३ ॥

ब्रह्मभिश्चैव मूलेन गायत्र्या जुहुयात् पुनः ।
अङ्गानां तद्दशांशेन सर्वद्रव्यैर्जुहोति च ॥ ४४ ॥

---

१. 'दि' क. पाठः. २. 'पात् कृ', ३. 'प' ख.पाठः.

अनिवारितमन्नाद्यं दत्त्वा क्षेप्यो बलिर्निशि ।
श्रेष्ठादिस्नपनेनापि स्नपयित्वो[1]पपत्तितः ॥ ४५ ॥
दक्षिणाश्च प्रदेयानि दत्त्वा पूजां प्रवर्तयेत् ।
लिङ्गे पाषण्डिचण्डालश्वादिस्पृष्टेऽभिचारकैः ॥ ४६ ॥
मन्त्रैर्युक्ते च पूर्वोक्तं गोसञ्चारादि कर्म यत् ।
सर्वं कृत्वाथ कोशं तु कृत्वा यज्ञतरूद्भवम् ॥ ४७ ॥
(घृ? कृ)तवार्यन्तसंस्थानं सुवृत्तं गोलकोपमम् ।
लिङ्गोपरि च तालोच्चं कृत्वा नीरन्ध्रमाहितम् ॥ ४८ ॥
व्यस्तै[2]र्गव्यैः समस्तैश्च त्रिदिनं त्रिदिनं क्रमात् ।
कषायैरष्टमृद्भिश्च गन्धतीर्थोदकैरपि ॥ ४९ ॥
व्योमव्यापिहृयेशा[3]स्त्राद् ब्रह्मप्रासादतारकैः ।
मृत्युञ्जयेन मूलाङ्गै रुद्रैश्च पवमानकैः ॥ ५० ॥
आपूर्याथ जपेयुश्च एकविंशतिवासरान् ।
चतुर्दशा(हा)द्वा सप्त दोषगौरवयुक्तितः ॥ ५१ ॥
अष्ट + + + + + + + +वा पतिते मृते ।
पञ्चगव्येन संप्रोक्ष्य कृत्वा पुण्याहवाचनम् ॥ ५२ ॥
प्रोक्तमन्त्रादिभिः प्राग्वज्जुहोत्यप्सुमतेऽग्नये ।
गौरवानुगुणमाहुतिबाहुल्यं दक्षिणागौरवं चाप्यूह्यम् ।
तथा रजस्वलास्पर्शे जुहोत्यशुचयेऽग्नये ॥ ५३ ॥
स्नपने वा प्रतिष्ठादावसमाप्ते तु कर्मणि ।
यजमानो मूर्तिधरो गुरुर्वा संस्थितो यदि ॥ ५४ ॥
तत्रापि गव्यपुण्याहकुम्भास्त्रयजनादनु ।
त्वं नो अग्न्यादितिसृभिः संहितास्त्रैश्च पूर्ववत् ॥ ५५ ॥
हुत्वाथ गोहिरण्याद्यं दत्त्वा कर्म प्रवर्तयेत् ।
अन्नाद्यं ब्राह्मणादिभ्यः प्रदेयं स्यादवारितम् ॥ ५६ ॥
चतुर्थीं(?) स्नपनादर्वाग् (भवने? भग्ने) वा तोरणध्वजे ।
उक्तहोमादिविच्छेदे तत्राप्युक्तप्रकारतः ॥ ५७ ॥

---

1. 'स्वापवर्तितः' २. 'कै', ३. 'ना' क. पाठः.

पञ्चगव्यादिहोमान्ते तत् तद् विन्यस्य पूजयेत् ।

अल्पप्रायश्चित्तम् ।

अथ प्रासादहारासु वल्मीकं वाथवा मधु ॥ ५८ ॥
जायेत रक्तकन्या वा गृध्रोलूककपिञ्जलाः ।
गर्भागारं विशेयुर्वा विमाने वाशनिः पतेत् ॥ ५९ ॥
तत्रापि पूर्वकथितदोषशान्तिं तु कारयेत् ।
अथोत्पातेषु जातेषु धूमकेतूद्गमादिषु ॥ ६० ॥
भूमिकम्पे दिशां दाहे चण्डवातेऽग्निविप्लवे ।
अवातवृक्षपाते वा शक्रचापोद्गमे निशि ॥ ६१ ॥
अद्भुतेष्वथ चान्येषु तद्दोषप्रशमाय तु ।
अस्त्रयागं पुरा कृत्वा सविशेषं शिवं यजेत् ॥ ६२ ॥

तद्यथा —

प्राच्यामैशेऽथवोदीच्यां प्राग्वत् कृत्वा तु मण्डपम् ।
अलङ्कृत्य तु पुण्याहं विकिरक्षेपपूर्वकम् ॥ ६३ ॥
कुम्भास्त्रयजनाद् भ्रान्त्वा वेद्यां कृत्वा तु भद्रकम् ।
षडङ्गमूलेनाङ्गैश्च तद्वर्णविहितैः क्रमात् ॥ ६४ ॥
जातियुक्तै(स्तु ? रपि) तथा सकलीकृतविग्रहः ।
विघ्नामिष्ट्वार्घ्यमापूर्य तिलकी पुष्पशेखरः ॥ ६५ ॥
शक्त्यनन्तासनादूर्ध्वं धर्मादिगुणपङ्कजैः ।
कल्पान्तार्कशतद्युतिर्दशभुजो दंष्ट्रोग्रपञ्चाननः
पिङ्गश्मश्रुजटोद्भटस्त्रिणयनो मुण्डस्रजा मण्डितः ।
टङ्कं चर्म कपालचापभुजगान् छूलासिवह्नीन् शरं
बिभ्रद्भोगिविभूषणो डमरुकं व्याघ्रा[1]जिनात्ताम्बरः ॥ ६६ ॥
एवं ध्यात्वा तु मूलाङ्गैः सकलीकृत्य पूजयेत् ॥ ६७ ॥
अर्घ्याद्यैरथ भोगानामाग्नेयच्छदनादिषु ।
विद्येश्वरांश्च तद्दिक्षु तद्बाह्ये दशलोकपान् ॥ ६८ ॥

---

[1] 'द' क. पाठः.

तच्छस्त्राण्यभितस्तेषां यथावदभिपूजयेत् ।

तद्वत् त्रिकोणकुण्डेऽग्नौ खादिराणां समिद्भिश्च संक्षाल्य क्षीरित्वक्पिष्ट-भस्मभिः(?) ।

लक्ष्मीदेवीसहादूर्वाकान्त्येकादशपङ्कजैः ॥ ६९ ॥
शक्रवल्लीसदाभद्रामुसलीमधुपाह्वयैः ।
रोचनागरुकर्पूरमांसीकुङ्कुमचन्दनैः ॥ ७० ॥
उशीरसुरुकुष्ठानां पिष्टैरपि च लेपयेत् ।
प्रक्षाल्य तीर्थसलिलैर्बिल्वपत्रैश्च घर्षयेत् ॥ ७१ ॥
अमन्त्रं पूजयेत् प्राग्वदधिवासनमण्डपे ।
शय्यायां हेमकुम्भेऽद्भिर्हेमरत्नादिपूरितैः ॥ ७२ ॥
प्राग्वत् त्रिभागतत्त्वादिमूर्त्याद्यैरधिवास्य तु ।
मूलाङ्गैः शिवमावाह्य तस्मिन् सम्पूज्य लग्नके ॥ ७३ ॥
कुम्भस्थं तु शिवं लिङ्गे योजयन्नभिषेचयेत् ।
सम्पूज्य तु यथापूर्वं मुख्यादिस्नपनेन तु ॥ ७४ ॥
उपपत्त्याभिषिच्येशं प्राग्वत् पूजां प्रवर्तयेत् ।

महादोषप्रायश्चित्तम् ।

अथ स्विन्ने सनिष्ठीवे लिङ्गे धूमोष्मपीडिते ॥ ७५ ॥
अदीक्षितैश्च विप्राद्यैः स्पृष्टे वाप्यन्यलिङ्गिभिः ।
प्राग्वद् दारुमये कोशे पञ्चगव्यैः पृथक् क्रमात् ॥ ७६ ॥
समस्तैश्चावगाहं तु कारयित्वा षडाह्निकम् ।
मृद्भिश्च चन्दनाद्यैरप्यवघृष्याभिषिच्य तु ॥ ७७ ॥
त्रिभागतत्त्वमूर्त्यादिषडध्वपरिभावनाः ।
विधायार्घ्यादिभिः सम्यगभ्यर्च्य तु सदाशिवम् ॥ ७८ ॥
अष्टोत्तरशतादीनां पञ्चविंशतिकान्ततः ।
स्नपनानामेकतमेनोपपत्त्याभिषेचयेत् ॥ ७९ ॥
महापूजां चाग्निकार्यं यथापूर्वं विधाय तु ।
बलिं विकीर्य भूतेभ्यो दत्त्वानाद्यं च दक्षिणाः ॥ ८० ॥

प्रवर्तयेद् यथापूर्वं पू(जे ? जा)यामुत्सवादिकम् ।
आवाहितशिवस्याग्नेर्निर्वाणे पूर्ववत् क्रमात् ॥ ८१ ॥

(आधोयिज्य ?) जुहोत्याज्यं त्वन्नो अग्न्यादिना पुनः ।
समित्तिलचरूंश्चाम्नात् कृष्णादष्टसहस्रकम् ॥ ८२ ॥

जयादिनिष्कृत्यन्तं तद् यथापूर्वं प्रकल्पयेत् ।

अनावाहितशिवे वोद्वासितशिवे वाग्नौ निर्वाणे पूर्वोदितमन्त्रद्रव्यैः प्रत्येकमष्टोत्तरशतं हुत्वा गुरुमूर्तिधरादिभ्यो हिरण्यं दक्षिणां दद्यात् ।

शिवेऽग्नि + + नं स्पृष्ट्वा यदि स्युः शिववह्नयः ॥ ८३ ॥

जुहोति पूर्वमन्त्राद्यैः क्रमाद् विविचयेऽग्नये ।
लौकिकाग्नेर्देवाग्नेर्वा संसर्गे शुचयेऽग्नये ॥ ८४ ॥

पूर्वद्रव्यमन्त्रैर्जुहोतीति यावत् ।

शावसूतकिशूद्राद्यैः स्पृष्टेऽग्नौ च प्रमादतः ।
अशुद्धद्रव्यसम्पर्के + + जन्तौ सहस्रकम् ॥ ८५ ॥

समिधां जुहुयात् साज्यं पायसं च तिलांस्ततः ।
सिद्धार्थांश्च चरून् दूर्वाः प्रत्येकं तु शतं शतम् ॥ ८६ ॥

मूलेनाङ्गैर्दशांशेन विद्येशेभ्यः सकृत् सकृत् ।
अस्त्रेभ्यश्च तथा हुत्वा रक्तान्नेन बलिं निशि ॥ ८७ ॥

विकिरेदुक्तमार्गेण नृत्तगीतादिमङ्गलैः ।
एवं कृत्वास्त्रयागं तु सविशेषं शिवं यजेत् ॥ ८८ ॥

सर्वशान्तिर्भवेत् तत्र तद्वत् सर्वत्र मङ्गलम् ।

अस्त्रयागाधिकारः ।

इत्थं हि सर्वदेवानां प्रायश्चित्तं पृथक् पृथक् ॥ ८९ ॥

शुद्धिं च दोषशान्तिं च स्वस्वतन्त्रैः समूहयेत् ।
स्वस्वतन्त्रोदितैश्चापि समित्प्रभृतिभिस्तथा ॥ ९० ॥

जुहुयाद् दोषशान्त्यर्थं स्वस्वमन्त्रं च पूजयेत् ।
स्नपनं च यथापूर्वं कृत्वा संपद् विवर्धते ॥ ९१ ॥

साान्निध्यं चाप्यवच्छेदात् तत्तद्देवस्य जायते ।
शान्त्यर्थं चापि दोषाणां कामानां चाप्यवाप्तये ॥ ९१ ॥

जयाबलिं च विकिरेत् तत्प्रकारोऽपि कथ्यते ।
उत्तरायणसंस्थेऽर्केऽप्यथवा दोषसंभवे ॥ ९२ ॥

अष्टम्योश्च चतुर्दश्योः पक्षयोः शुक्लकृष्णयोः ।
आर्द्रायां चैव महतीं शम्भोः पूजां प्रवर्तयेत् ॥ ९३ ॥

स्नपयित्वा पञ्चगव्यैस्तथा पञ्चामृतैरपि ।
त्रिकालं वा चतुष्कालं नित्यादष्टगुणाधिकम् ॥ ९४ ॥

साग्निकार्यं सवादित्रगीतनृत्तोपशोभितम् ।
निशासु प्रकृतिप्रस्थतण्डुलैः साधितेन तु ॥ ९५ ॥

भूतकूरेण तूक्तेन भूतेभ्यो विकिरेद् बलिम् ।
महोत्सवोदितैः सर्वैर्बलिमन्त्रैर्यथाक्रमम् ॥ ९६ ॥

शुद्धोदनेन देवेभ्यो भूतेभ्यो भूतकूरतः ।
महोत्सवोदितेभ्यस्तु गणेभ्यो बलिमादरात् ॥ ९७ ॥

विकिरेद् भोजयेच्चापि ब्राह्मणान् लिङ्गिनस्तथा ।
अन्येभ्योऽपि च मृष्टान्नं प्रदद्यादनिवारितम् ॥ ९८ ॥

तदन्ते स्नपनेनेशमुपपत्त्याभिषेचयेत् ।
सर्वशान्तिकरो ह्येष सुतारोग्यजयप्रदः ॥ ९९ ॥

उपसर्गग्रहप्रेतभूतपीडादिनाशकृत् ।
आयुश्श्रीवर्धनश्चास्मात् कर्तव्यो भूतये नृभिः ॥ १०० ॥

प्रायश्चित्तविधिश्च नित्यविषयो नैमित्तिकानां तथा
दोषाणामपि शान्तये निगदितो यः शैवतन्त्रोदितः ।
उत्पातप्रशमश्च विश्वदुरितक्लेशान् विहन्त्री नृणां
पूजात्वस्य जयाबलिश्च विजयश्रीवर्धनः कीर्तितः ॥ १०१ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
क्रियापादे प्रायश्चित्तादिपटलस्त्रिषष्टितमः ॥

अथ चतुष्षष्टितमः पटलः ।

जीर्णोद्धारविधिं वक्ष्ये लिङ्गप्रासादयोः क्रमात् ।
खण्डिते स्फुटिते भिन्ने चलिते पतिते हृते ॥ १ ॥
दग्धे जीर्णेऽङ्गहीने च सगर्भे वा क्षते च्युते ।
अज्ञानादधिके वोनमाने लिङ्गे तु मानुषे ॥ २ ॥
प्रतिष्ठिते वा क्षुद्रार्थं लिङ्गे नद्यब्धिपीडिते ।
त्यजन्ति मन्त्रास्तल्लिङ्गं देवश्चापि यतः स्फुटम् ॥ ३ ॥
त्यक्तं मन्त्रैश्च देवेन त्याज्यं पाषाणवद् भवेत् ।
तल्लिङ्गमाश्रयन्तीह पिशाचा ब्रह्मराक्षसाः ॥ ४ ॥
उक्तैर्दोषैः प्रदुष्टं चेत् त्याज्यं पीठमपि स्फुटम् ।
सकलेऽपि च तुल्याः स्युरेते दोषास्तथैव हि ॥ ५ ॥
ब्रह्मविष्ण्वादिकानामप्यन्यासां प्रतिमासु च ।
देवतानामिमे दोषास्तुल्यास्त्याज्यास्ततस्तु ताः ॥ ६ ॥
तत्र मूलालयाद् बाह्ये याम्ये पूर्वोत्तरेऽथवा ।
कुर्याद् बालालयं मूले पञ्चांशे तु त्रिभागतः ॥ ७ ॥
नवांशे पञ्चभिस्त्र्यंशे द्वाभ्यां बालालयः स्मृतः ।
मूले तु पश्चिमद्वारे स्यान्नैर्ऋत्यां तु वानिले ॥ ८ ॥
तदग्रे मण्डपं चापि समलङ्कृत्य पूर्ववत् ।
तन्मध्यवेद्यां शयनं सङ्कल्प्योक्तविधानतः ॥ ९ ॥
मूललिङ्गेषु नन्देषुत्र्यंशपञ्चात्रिदस्रकैः ।
कृत्वा तु दारवं लिङ्गं सपीठं सुमनोरमम् ॥ १० ॥
पुण्याहविकिरक्षेपकुम्भास्त्रभ्रमणादनु ।
तोरणद्वारलोकेशकलशार्चनपूर्वकम् ॥ ११ ॥
विघ्नेशकुम्भान् परितः संस्थाप्य शयनस्य तु ।
हैमाद्यन्यतमं कुम्भं शय्यायां विनिधाय तु ॥ १२ ॥
तीर्थाम्भःपूरिते तस्मिन् हेमरत्नादिसंयुते ।
मूलाङ्गब्रह्ममन्त्रांश्च व्योमव्यापिद्वयं तथा ॥ १३ ॥
गायत्रीं चैव सावित्रीमस्त्रमन्त्रौ च विन्यसेत् ।
पूजयेच्च यथापूर्वं संस्पृश्य प्रजपेच्च तान् ॥ १४ ॥

शङ्खभेर्यादिनिर्घोषैः कुम्भं गर्भगृहं नयेत् ।
यात्राहोमं तु मूलाङ्गैः कुर्याद् गर्भस्य पूर्वतः ॥ १५ ॥

कुम्भाद्भिः प्रोक्ष्य लिङ्गाद्यं शिवाज्ञां श्रावयेत् ततः ।
भो भोः सत्त्वेन येनेदं दुष्टलिङ्गं समाश्रितम् ॥ १६ ॥

स शीघ्रमेतदुत्सृज्य गच्छतु स्थानमीप्सितम् ।
अत्र देवो यथापूर्वं विद्याविद्येश्वरैर्युतः ॥ १७ ॥

देव्या सह गणैः शश्वत् सन्निधत्तां सदाशिवः ।
इत्युक्त्वार्घ्यं च दत्त्वास्मात् पिशाचादीन् विसर्जयेत् ॥ १८ ॥

व्यापकेश्वरशब्दश्च चतुर्थ्यन्तो नमोन्वितः ।
तारादियुक्तः स्वेनैव षडङ्गानि स्वजातिभिः ॥ १९ ॥

अनेन सकलीकृत्य स्वयं तद्व्यापिनं शिवम् ।
लिङ्गालयादौ संस्मृत्य प्रार्थयेन्मनुनामुना ॥ २० ॥

ओं

भगवल्लिङ्गमेतत् तु दुष्टं दोषावहं यतः ।
अस्योद्धाराच्छान्तिरस्तु सर्वेभ्यो व्यापकेश्वर! ॥ २१ ॥

तदुद्धारे प्रवृत्तं मामधितिष्ठेह शङ्कर! ।
तथेति देवेनादिष्टः शान्तिहोमं समाचरेत् ॥ २२ ॥

क्षीराज्यमधुदूर्वाग्रैर्मन्त्रसंहितया शतम् ।
लिङ्गसञ्चलनार्थं तु सहस्रं जुहुयाद् घृतम् ॥ २३ ॥

मूलाद् दशांशतोऽङ्गैश्च पुनःस्थापनमुद्दिशन् ।
शतं जुहोति क्षैरेय्या ततः पाशुपतास्त्रतः ॥ २४ ॥

ब्राह्मादिकानां भागानां सहस्रं तु पृथक् पृथक् ।
संप्रोक्ष्य शान्तिकुम्भाद्भिस्तत्तद्भागे तु संस्पृशेत् ॥ २५ ॥

जपित्वाहुतिसंख्यं तु विलोमार्घ्यं प्रदाय तु ।
पुनः प्रतिष्ठा कालेन यावता तस्य शक्यते ॥ २६ ॥

तन्निश्चित्यावधिं तस्मै शनैर्विज्ञापयेद् गुरुः ।
प्रणवाद्यं तु संरुद्धैर्मूलाङ्गैर्ब्रह्मभिस्तथा ॥ २७ ॥

विलोमतस्तु लिङ्गादौ व्याप्तं तं व्यापकेश्वरम् ।
सूत्रस्थं व्योमवद् व्याप्तं ध्यात्वा कुम्भे नियोजयेत् ॥ २८ ॥

ब्रह्मादिभागगान् मन्त्रान् मूलं चापि षडध्वभिः ।
कुम्भे तस्मिन् समावाह्य संपूज्यार्घ्यादिभिः क्रमात् ॥ २९ ॥
वाससास्त्रेण संवेष्ट्य दत्त्वार्घ्यं कुम्भमुद्धरेत् ।
शिरसैव वहन् गच्छेत् प्रादक्षिण्यं स्वयं गुरुः ॥ ३० ॥
प्रवेश्य मण्डपे प्राग्वच्छय्यायां विनिवेशयेत् ।
पूर्ववद् ब्रह्मभिर्दिक्षु कोणेष्वङ्गैर्जुहोति च ॥ ३१ ॥
त्रिखण्डभावना कार्या दारुलिङ्गे यथापुरम् ।
प्रातर्बालालये लग्ने दारुलिङ्गं सपिण्डिकम् ॥ ३२ ॥
संस्थाप्य कुम्भगान् मन्त्रांस्तस्मिन् देवं च योजयेत् ।
अभिषिच्य तु तत्रस्थमेवं विज्ञापयेच्छिवम् ॥ ३३ ॥
ओं
यावन्मूलालये लिङ्गं निष्पन्नं स्यात् प्रतिष्ठितम् ।
तावद् दारुमये लिङ्गे सान्निध्यं कुरु शङ्कर ! ॥ ३४ ॥
ततस्तत्रैव गन्तव्यमस्माल्लिङ्गात् प्रसीद मे ।
सृष्टिक्रमेण मन्त्रांश्च ध्यात्वा तस्मिन् षडध्वनः ॥ ३५ ॥
अर्घ्याद्यैः प्राग्वदभ्यर्च्य हुत्वा प्राग्वत् त्रिवासरम् ।
चतुर्थदिवसे स्नानं नवकेन विधाय तु ॥ ३६ ॥
नित्यपूजोत्सवाद्यं यत् कर्म तत्र प्रवर्तयेत् ।
सति चण्डेश्वरे चण्डं विसृज्याप्सु विनिक्षिपेत् ॥ ३७ ॥
ततो हेमखनित्रेण खात्वास्त्रेण तु देशिकः ।
अदोषदुष्टं पीठं चेदुद्धृत्यान्यत्र विन्यसेत् ॥ ३८ ॥
रक्षेद् यजेत् स एवेशो यतो बालालयेऽर्च्यते ।
दुष्टं लिङ्गं हैमरज्ज्वा बद्ध्वा वृषभयोजिते ॥ ३९ ॥
शकटे तु समारोप्य क्षिपेद् गाधेतरेऽम्भसि ।
शैललिङ्गे विधिस्त्वेवं दारुजं चेच्छिवाग्निना ॥ ४० ॥
दहेदस्त्रेण रत्नं वा मृन्मयं वाग्निदाहतः ।
अविवर्णमदुष्टं चेत् तदेव स्थापयेत् पुनः ॥ ४१ ॥

---

१. 'त्त' ख. पाठः.

लौहं तदेव तु पुनः प्राग्वत् कृत्वा सलक्षणम् ।
प्रतिष्ठाप्यार्चयेत् कुर्यादालये नूतनं पुनः ॥ ४२ ॥
मृत्सुधाप्रतिमादीनि वर्णाद्याधानतः पुनः ।
नूतनान्युक्तमार्गेण प्रतिष्ठाप्य तु पूजयेत् ॥ ४३ ॥
पिण्डिकैव यदा दुष्टा त्यक्त्वा तामपरां पुनः ।
अधिवास्य यथापूर्वं मूललिङ्गं नियोजयेत् ॥ ४४ ॥
मूललिङ्गे तु निष्पन्ने प्राग्वद् देवाग्रमण्डपे ।
कृत्वाधिवासनाद्यं तु स्थापयेद् गर्भमन्दिरे ॥ ४५ ॥
बाललिङ्गस्थितं देवं प्राग्वत् कुम्भेऽधिरोप्य तु ।
स्थापिते (बा? मू)ललिङ्गे तु पूर्ववत् सन्नियोजयेत् ॥ ४६ ॥
प्रासाद एव जीर्णश्चेत् तस्योद्धारोऽथ कथ्यते ।
प्रासादमन्त्रान् सर्वांस्तु समाहृत्य यथाक्रमम् ॥ ४७ ॥
पूर्वोक्तेन क्रमेणैव खड्गे संयोज्य पूजयेत् ।
प्रासादे तु सुनिष्पन्ने तन्मन्त्रान् पूर्ववत् क्रमात् ॥ ४८ ॥
खड्गादादाय संयोज्य संप्रोक्ष्य स्नपयेच्छिवम् ।
प्रतिष्ठातो दशगुणां जीर्णोद्धारे तु दक्षिणाम् ॥ ४९ ॥
दद्यान्मूर्तिधरेभ्यश्चाप्याचार्याय ततोऽधिकम् ।
विप्रेभ्यश्चैव लिङ्गिभ्यस्तक्षभ्योऽर्थिभ्य एव च ॥ ५० ॥
तद्वत् कर्मकरादिभ्यो दद्याद् देयांस्तु पुष्कलान् ।
लिङ्गे प्रतिष्ठिते यद् वा प्रासादकरणे फलम् ॥ ५१ ॥
जीर्णोद्धारे कृते तस्माद् द्विगुणं लभते फलम् ।

इत्थं धर्माद् विशिष्टाज्जगति तनुभृतां भोगमोक्षोपलब्ध्यै
विद्यादेहस्य शम्भोर्वदनसरसिजव्यक्तविश्वागमार्थैः ।
नित्याद्यं कर्मचक्रं सविधिकमखिलं यत्र दृश्यं यथाव-
ज्जीर्णोद्धारावसानं सुरगुरुविबुधस्तं क्रियापादमूचे ॥ ५२ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे
उपरिभागे क्रियापादे जीर्णोद्धारपटल-
श्चतुष्षष्टितमः ॥

समाप्तः क्रियापादः ॥

॥ श्रीः ॥

ईशानशिवगुरुदेवपद्धतिः ।

श्रीमदीशानशिवगुरुदेवमिश्रविरचिता ।

(तुरीयो योगपादः)

अथ प्रथमः पटलः ।

अथ मोक्षस्तु संसिध्येत् सम्यग् ज्ञानेन देहिनः ।
ज्ञानं जायेत वैराग्याद् वैराग्यं च स्वभावतः ॥ १ ॥
स्वभावो नाम संसारस्वरूपस्य निरूपणम् ।
संसारस्त्वात्मबुद्धिः स्याद् देहे स्वत्वेन वस्तुषु ॥ २ ॥
देहोऽपि द्विविधो ज्ञेयः स्थूलसूक्ष्मप्रभेदतः ।
पृथिव्यादीनि भूतानि श्रोत्राद्याधारकान्यपि ॥ ३ ॥
वागादिकर्मेन्द्रियाणि वातपित्तकफास्तथा ।
त्वगसृङ्मांसमेदोस्थिमज्जाशुक्लैश्च नाडिभिः ॥ ४ ॥
मूलाधारे कुण्डलिन्यां नाभिहृत्कण्ठमूर्धसु ।
चतुष्षडष्टजगतीविकाराक्षिच्छदाम्बुजैः ॥ ५ ॥
युक्तं स्थूलशरीरं स्यात् सूक्ष्मं पुर्यष्टकात्मकम् ।
तत्तच्छब्दादयः पञ्च मनो बुद्धिरहङ्कृतिः ॥ ६ ॥
देहद्वयं तु साध्यात्मं साधिभूताधिदैवतम् ।

तद्यथा —

श्रोत्रादयश्च वागाद्यास्तथाध्यात्मानि वै पृथक् ॥ ७ ॥
शब्दादिवक्तव्यादीनामधिभूतत्वमिष्यते ।
खवायुतेजांसि जलं पृथिवी च तथानलः ॥ ८ ॥
इन्द्रो विष्णुश्च मित्रश्च प्र (दे? जे) शश्चाधिदैवतम् ।
अध्यात्मानि मनो बुद्धिरहंकारश्च तत्त्रयम् ॥ ९ ॥

मन्तव्यं चैव बोद्धव्यं मानश्चैवाधिभूतकम् ।
चन्द्रो जीवो विरिञ्चश्चाप्यधिदैवान्यनुक्रमात् ॥ १० ॥

गुणत्रयमयी या सा प्रकृतिः पुरुषस्तथा ।
रागो विद्यादितत्त्वानि मायान्तान्यखिलानि तु ॥ ११ ॥

मलं कर्म च माया च सर्वमस्य प्रवर्तकम् ।
जाग्रत् स्वप्नः सुषुप्तिश्चेत्यवस्थात्रितयं तथा ॥ १२ ॥

कामः क्रोधश्च लोभश्च मोहश्च मदमत्सरौ ।
षडूर्मय इमे व्याप्ये मोहाब्धौ व्यापकाः स्मृताः ॥ १३ ॥

एवम्भूतं शरीरं यदामसृत्कुम्भसन्निभम् ।
जन्मादिभिः षड्विकारैरध्यस्तमतिनश्वरम् ॥ १४ ॥

अस्वतन्त्रं कर्मवशात् प्रविशन् निर्विशन्नपि ।
प्रवसन्नपि संसारे ह्यभत्यात्मा ह्यलक्षितः ॥ १५ ॥

शरीराणि तथैतानि पञ्चधा मानसानि च ।
जरायुजान्यण्डजानि स्वेदजान्युद्भिदान्यपि ॥ १६ ॥

तत्र देवादिदेहाः स्युर्मानसाश्चाजरायुजाः ।
जरायुजा मनुष्याणां पशूनां च भवन्ति हि ॥ १७ ॥

सरीसृपाहिविहगशरीराण्यण्डजानि तु ।
जरायुजाश्चाण्डजाश्च देहाः स्युर्जलचारिणम् ॥ १८ ॥

स्वेदजाः क्रिमयः प्रोक्ताः स्थावराश्चोद्भिदा मताः ।
सर्वे स्वकर्मवशगा भवन्ति न भवन्ति च ॥ १९ ॥

मृतिजन्मजले घोरे सुखदुःखझषाकुले ।
शोकमोहादिकलिले त्वगाधे भवसागरे ॥ २० ॥

उन्मज्जन्तो निमज्जन्तः पुण्यपापैकबन्धनैः ।
निबद्धा देहिनः सर्वे स्वर्गभूनरकादिषु ॥ २१ ॥

मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिपञ्जरे ।
त्वचावृते शरीरेऽस्मिन् सौन्दर्यं स्मर्यते कुतः ॥ २२ ॥

अस्थिपञ्जरसारेऽस्मिन् मूत्रश्लेष्ममलाशये ।
मांसकेशनखस्नायुरुधिरत्वक्समावृते ॥ २३ ॥

देहे चेत् प्रीयते कश्चित् प्रीयते नरकेऽपि सः ।
यद्वाप्यज्ञानिभिर्देहे सुखबुद्ध्यात्र भण्यते ॥ २४ ॥
शब्दादीन्द्रियसौख्यान्यप्यन्वयव्यतिरेकतः ।
असाराणि यथागीतं मत्तोन्मत्तप्रलापवत् ॥ २५ ॥
वादयन्तश्च दृश्यन्ते यथोन्मत्ता विकुर्वते ।
स्पर्शसौख्यं तथोपाधेरुपाध्यन्तरसङ्गमात् ॥ २६ ॥
व्रणादेस्तु यथापूयमूत्रादेर्निर्गमात् सुखम् ।
पामकण्डूतिसौख्यं वा तत्तुल्यं सुरते सुखम् ॥ २७ ॥
चक्षुरिन्द्रियसौख्यं यन्नृत्तकान्तादिदर्शने ।
उन्मत्तचेष्टितान्नृत्तं न किञ्चिदपि हीयते ॥ २८ ॥
स्वक्षी सुनासा सुमुखी सुदतीत्यादिदर्शने ।
सौख्यं त्वगस्थिमांसादौ कतरत् स्यान्मनोहरम् ॥ २९ ॥
आस्वाद्येषु पदार्थेषु रसनेन्द्रियचापलात् ।
क्षुत्तृण्णिवृत्त्या सौहित्यं दुःखापायो न तत् सुखम् ॥ ३० ॥
निद्रादुःखं यदि लभेत् सौख्यं स्वापे सुखं यथा ।
तदात्मसुखमुद्दिष्टं करणानां तु संहृतौ ॥ ३१ ॥
घ्रेयेष्वपि सुगन्धेषु यत्नात् प्राप्येषु दृश्यते ।
अयत्नेन वनादौ च प्राप्तुं तच्छक्यते सुखम् ॥ ३२ ॥
गर्भवासे च जनने बाल्ये वास्य कुतः सुखम् ।
अस्वतन्त्रस्येव परैर्यन्त्रितस्येव पक्षिणः ॥ ३३ ॥
यौवनेऽनिष्टसंयोगादिष्टलाभे वियोगतः ।
रागाद्याक्रान्तचित्तस्य कुतः सौख्यं शरीरिणः ॥ ३४
वार्धक्येऽप्यसमर्थस्य विषयांस्तु बुभुत्सतः ।
प्रक्षीणेन्द्रियवृत्तेस्तु रोगरागाद्युपद्रवैः ॥ ३५ ॥
पीड्यमानस्य तत्सौख्यं कुतो वास्य मरिष्यतः ।
म्रियमाणस्य यद् दुःखं नरकेऽपि न तद् भवेत् ॥ ३६ ॥
ततः पापकृतां दुःखं यमलोकाय गच्छताम् ।
तद्दर्शनेन पततां पतितानां पतिष्यताम् ॥ ३७ ॥

नरकेषु प्रसिद्धं हि दुःखं तस्मान्न भण्यते।
यदि पुण्यकृदेव स्यात् स्वर्गे देवादिदेहवान् ॥ ३८ ॥
विमानादिषु दिव्येषु भोगेषूपनतेष्वपि।
दृष्ट्वा (पापा ? स्वल्पां) श्रियं दीप्तामन्येषामात्मनोऽधिकाम् ॥ ३९ ॥
सन्तप्त एव विषयान् भुङ्क्ते दुःखं धिया वहन्।
ततोऽपि क्षीणपुण्यानां पतनाद्यवलोक्य तु ॥ ४० ॥
यादृशं हृदये दुःखं न तद् वर्णयितुं क्षमम्।
अथ राज्यादिषु सुखं स्याच्चेत् सन्ध्यादिदुःखिनः ॥ ४१ ॥
पुत्रेभ्योऽपि भयं यस्य तस्य सौख्यं कुतो भवेत्।

अत्र पराशरः—

"यावतः कुरुते जन्तुः संबन्धान् मनसः प्रियान्।
तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः॥
यद् यद् गृहे तन्मनसि यत्रतत्रावतिष्ठतः।
*नाशव्ययादिभीत्या क परिग्रहवतां सुखम् ॥"

इति।

तथा चाहुः—

"यतो यतो निवर्तते ततस्ततः सुखी भवेत्।
निवर्तनाद्धि सर्वतो न वेत्ति दुःखमण्वपि" ॥

इति।

तथापि तृष्णया जन्तुः पीड्यमानो दिवानिशम्।
अर्थाद्यार्जनवैतृष्ण्यं न कदाचिन्निगच्छति ॥

तथा चोक्तं—

"जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः।
चक्षुश्श्रोत्रे च जीर्येते तृष्णैका निरुपद्रवा ॥
यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः।
नालमेकस्य तु यतस्तां तृष्णां दूरतस्त्यजेत् ॥"

---

* 'नाशदाहापहरणं तत्र तस्यास्त्येव तिष्ठति' इति विष्णुपुराणे पठ्यते।

अतो न कर्मणा कार्यं प्रजया वा धनेन वा ।
त्यागेनैवामृतत्वं हि प्राप्तुं शक्यं मनीषिभिः ॥ ४२ ॥
तस्माद् धर्मार्थकामेभ्यो मोक्ष एव विशिष्यते ।
अस्थिरत्वात् त्रिवर्गाणां दुस्संपादतयापि च ॥ ४३ ॥

अलमलमतिविस्तरेण । प्रस्तुतमेवानुसन्धीयते ।

इत्थं विज्ञाय संसारमसारं तद्विरागतः ।
मोक्षमार्गः परो योगः साङ्गः साध्यो विपश्चिता ॥ ४४ ॥
स च सन्न्यसनात् सम्यग् योगः प्राप्यो न चान्यथा ।
सन्न्यासो मुण्डनान्न स्याद् दण्डादेर्ग्रहणादपि ॥ ४५ ॥
काषायावरणाद्यं च मुण्डनं दण्डधारणम् ।
यदन्यदप्येवमाद्यं देहस्योक्तं न देहिनः ॥ ४६ ॥
जडस्येह शरीरस्य घटकुड्यादिधर्मणः ।
वेषलङ्घनमात्रेण देही मोक्षं कथं व्रजेत् ॥ ४७ ॥
अत एव शरीरस्य कर्तृत्वं नापि भोक्तृता ।
शरीरकर्मणां कर्ता संस्कार्यस्तत्फलार्थिभिः ॥ ४८ ॥
अत एव हि सन्न्यासस्त्यागः स्यात् काम्यकर्मणाम् ।
काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः ॥ ४९ ॥
लोकार्थपुत्रैषणाभ्यो निवृत्तो यः सदैव हि ।
स्ववर्णाश्रमयुक्तानां तथा स्वसमयस्य तु ॥ ५० ॥
विहितानां तु धर्माणां तत्फलेष्वनपेक्षया ।
ईश्वरार्पणबुद्ध्या तु करणं न्यास इष्यते ॥ ५१ ॥
तद्वान् यतिश्च सन्न्यासी न स्यात् केवलमुण्डितः ।
ज्ञेयः स नित्यसन्न्यासी यो न द्वेष्टि न काङ्क्षति ॥ ५२ ॥
ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथवा यतिः ।
चीरवासा जटी वापि द्विदण्डो वाथ मुण्डितः ॥ ५३ ॥
विवासाः शुक्लवस्त्रो वा काषायवसनोऽथवा ।
कर्मसन्न्यासनं कृत्वा साङ्गयोगं समाश्रितः ॥ ५४ ॥

---

१. _'स' ख. पाठः.

शिवानुग्रहमासाद्य योगी मोक्षमवाप्नुयात् ।
विज्ञाय संसारमसारमेवं वैराग्यतोऽनुग्रहतश्च शम्भोः ।
संप्राप्य योगं तु गुरूपदेशाद् योगी विमुक्तिं न चिरादुपैति ॥ ५५ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे
उपरिभागे योगपादे योगलक्षणं नाम
प्रथमः पटलः ॥

अथ द्वितीयः पटलः ।

अथ योगस्तु विज्ञेयो गुणैश्वर्यविमुक्तिदः ।
चित्तवृत्तिनिरोधं तु योगमाह पतञ्जलिः ॥ १ ॥

युजेर्धातोः समाधौ तु क्षेत्रज्ञपरमात्मनोः ।
युक्तिर्योगः समुद्दिष्टस्तथा चाह महामुनिः ॥ २ ॥
"मनो हि सर्वभूतानां कारणं बन्धमोक्षयोः ।
वृत्तिहीनं मनः कृत्वा स्वात्मानं परमात्मनि[1] ॥
पर[2]मात्मा समायोज्य योगं कु + + + + ।
+ + + + विमुक्तैः[3] स्यान्मुख्योऽयं योग इष्यते ॥"

इति ।

सम्यक् शिवगतं चित्तं यदा न चलति स्थिरम् ।
शिवत्वव्यक्तभावस्य कैवल्यं योग इष्यते ॥ ३ ॥

तच्च रागादिदोषाणां वर्जनेन प्रकाशते ।
ते च नश्यन्ति रागाद्या योगाङ्गानां निषेवणात् ॥ ४ ॥
योगाङ्गानि च तान्यष्टौ प्रवदन्ति हि तद्विदः ।

तद्यथा —

यमाश्च नियमास्तद्वदासनं प्राणसंयमाः ॥ ५ ॥
प्रत्याहारा धारणाश्च ध्यानानि च समाधयः ।
यमाः पञ्चप्रकाराः स्युर्नियमाश्चैव पञ्चधा ॥ ६ ॥
आसनानि च पञ्च स्युः प्राणायामास्तु नैकधा ।
प्रत्याहाराः पञ्चविधा धारणा बहुधा स्मृताः ॥ ७ ॥

---

१. 'नः' ।, २. 'रात्मना स', ३. 'क्तिः' क. पाठः.

ध्यानानि नैकधा त्वेकः समाधिरथवा त्रिधा ।
अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ ॥ ८ ॥
यमाः पञ्चविधास्तेषां पृथग्भेदा भवन्ति हि ।
मनोवाक्कर्मभिर्हिंसास्त्रिविधाः प्राणिनामिह ॥ ९ ॥
ताभ्यो निवृत्तिं सर्वत्र अहिंसां परिचक्षते ।
सत्यं यथार्थकथनं सर्वभूतहितं च यत् ॥ १० ॥
परपीडाकरं सत्यमेवं सत्यं विदुर्बुधाः ।
असत्यमपि भूतानां हितं चेत् सत्यमेव तत् ॥ ११ ॥
परपीडाकरं सत्यं यदा मौनं तदा भजेत् ।
अन्यैः परिगृहीतानां त्यक्तानां वाश्रमादिषु ॥ १२ ॥
निक्षिप्तानां तृणानां वा कर्मणा मनसा गिरा ।
परार्थानामनादानमस्तेयं परमं स्मृतम् ॥ १३ ॥
ब्रह्मचर्यमिति प्राहुरिन्द्रियाणां तु संयमम् ।
तत्राप्युपस्थविषयानिवृत्तिं तु विशेषतः ॥ १४ ॥

किन्तु,

दर्शनस्पर्शनापेक्षासङ्कल्पाभाषणादिभिः ।
योषित्संभोगवैमुख्यं ब्रह्मचर्यं परं विदुः ॥ १५ ॥
तत्रापि च गृहस्थानां स्वदारानन्यतिक्रमात् ।
ऋतुस्नाताभिगमनं ब्रह्मचर्यं परं स्मृतम् ॥ १६ ॥
अर्जनक्षयसंरक्षाहिंसादोषादिदर्शनात् ।
अस्वीकरणमर्थानां मुख्यः स्यादपरिग्रहः ॥ १७ ॥
भिक्षूणामयमुद्दिष्ट अन्येषामन्यथा स्मृतः ।
ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथवा मुनिः ॥ १८ ॥
सकुटुम्बस्तु यस्तस्य गुर्वादीनां तु पुष्टये ।
असत्प्रतिग्रहेभ्यस्तु निवृत्तिरपरिग्रहः ॥ १९ ॥

॥ एवं यमाः ॥

नियमाः शौचसन्तोषौ स्वाध्यायस्तप एव च ।
तद्वदीश्वरपूजेति पञ्च भिन्नास्तु ते पुनः ॥ २० ॥

---

१. 'तत् परपीडाकरं सत्यं यदा', २. 'आ' क. पाठः.

शौचं तु शुद्धिर्विज्ञेया मनोवाक्कायकर्मणाम् ।
अचिन्तनमकृत्यानां यत् तच्छौचं तु मानसम् ॥ २१ ॥

अक्री(नः? वं) वाचिकं स्यात् तु कायिकं तु मृदा जलैः ।
मलानां क्षालनञ्चान्तःकरणस्य विशोधनम् ॥ २२ ॥

पापानामननुष्ठानं कर्मिणां शौचमिष्यते ।
वर्णाश्रमादिधर्माणामविरोधागतेन तु ॥ २३ ॥

धनधान्यादिना वृत्त्या तृप्तिः सन्तोष उच्यते ।
(ग)तेष्वननुशोकः स्याद् भविष्यार्थेष्वलोलता ॥

वर्तमानेष्वसक्तिश्च सन्तोषः परिपठ्यते ।
हर्षागमेष्वनुत्सेकः शोकस्थानेष्वशोकता ॥ २५ ॥

समता चापि सर्वेषु सोऽपि सन्तोष उच्यते ।
प्रणवस्य तथाभ्यासस्तथोपनिषदामपि ॥ २६ ॥

तत्फलानभिसन्धानात् स्वस्वमन्त्रजपोऽपि च ।
स्वाध्याय इति निर्दिष्टस्त्रिविधोऽपि च योगिनाम् ॥ २७ ॥

तथाचाहुः —

"स्वाध्यायाद् योगमासीत योगात् स्वाध्यायमात्मनि ।
स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते ॥

शब्दब्रह्म च तद् ब्रह्म वेदितव्ये उभे अपि ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥"

इति ।

एकभुक्तोपवासाद्यैः कृच्छ्रचान्द्रायणादिभिः ।
कर्शनं तु शरीरस्य यत्तत्तप उदाहृतम् ॥ २८ ॥

तत्राप्यनशनं नेष्टं नेष्टमत्यशनं तथा ।
व्रतचोदितकालाशी तपस्वी योगभाग् भवेत् ॥ २९ ॥

तथाचाह भगवान् —

"नात्यश्नतस्तु योगोऽस्ति नचैकान्तमनश्नतः ।
नचातिस्वप्नशीलस्य जाग्रतो नापि चार्जुन ॥

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥"

इति ।

आभ्यन्तरैस्तथा बाह्यैर्द्रव्यैर्गन्धादिभिः क्रमात् ।
चोदिताराधनं शम्भोर्यत् तदीश्वरपूजनम् ॥ ३० ॥
तत्राप्यनभिसन्धाय फलं भक्त्योपपत्तितः ।
देवस्येष्टस्य यजनं कर्मणा मनसापि च ॥ ३१ ॥
योगिनां योगसिद्ध्यर्थं शस्तमीश्वरपूजनम् ।
याज्ञवल्क्यो वसिष्ठश्च योगाचार्यौ महामुनी ॥ ३२ ॥
पृथग्यमांश्च नियमान् दशभेदानिहोचतुः ।
"अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम् ॥ ३३ ॥
क्षमा धृतिर्मिताहारः शौचं चेति यमादयः ।
तपः सन्तोष आस्तिक्यं दानमीश्वरपूजनम् ॥ ३४ ॥
सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो हुतम् ।
एते तु नियमाः" । इति

॥ नियमाः ॥

आसनान्यपि चोक्तानि बहुधा पूर्वपद्धतौ ॥ ३५ ॥
तेषां पञ्चैव शस्तानि योगसिद्धिकराणि वै ।
स्वस्तिकं पद्मसंज्ञं च भद्रं योगासनं तथा ॥ ३६ ॥
गोमुखं चेति तेषां तु लक्षणं पृथगुच्यते ।
उपविश्य तु विष्टरेऽथ जान्वोर्विवरेऽङ्गुष्ठनिपीडनं विधाय ।
ऋजुमध्यगलक्षणाग्रकायो भवति स्वस्तिकमासनं निविष्टम् ॥ ३७ ॥
चरणाग्रयुगं तथोपरिष्टादधिरोप्योरुयुगस्य मूलदेशे ।
उपविश्य पुरेव पद्मसंज्ञं कथितं तद्विपरीततस्तु भद्रम् ॥ ३८ ॥
अधिरोप्य तु दक्षिणाङ्घ्रिमूरावथ सव्यं चरणं तु दक्षिणोरौ ।
अधिरोप्य पुरेव सूपविष्टो यदि योगासनमिष्टदं तदाहुः ॥ ३९ ॥
वृषणे तु निगृह्य वामजङ्घापदगुल्फे त्वधिरूढसस्फिगूरूः ।
उपरिस्थितदक्षिणोरुजानुः खलु योगी स तु गोमुखासनस्थः ॥ ४० ॥

॥ आसनानि ॥

प्राणस्य धारणं देहे प्राणायाम इतीरितः ॥ ४१ ॥

स च नैकविधः प्रोक्तो योगशास्त्रविशारदैः ।
पूरकः कुम्भकश्चैव रेचकश्चेति ते त्रयः ॥ ४२ ॥

प्राणसंयमनानां तु स्वात्यान्यङ्गान्यनुक्रमात् । (?)
त्रिभिरङ्गैर्युतस्त्र्यंग स्याकुत्पूरकं विना (?) ॥ ४३ ॥

नासापुटेन वामेन पूरयेदुदरेऽनिलम् ।
निर्दिष्टोद्घातमात्राभिर्विज्ञेयः स तु पूरकः ॥ ४४ ॥

पूरितस्याथवा वायोः केवलस्य निरोधतः ।
संपूर्णकुम्भवत् तिष्ठेद् यदासौ कुम्भकः स्मृतः ॥ ४५ ॥

वामेतरेण घ्राणेन (मा?म)रुतः पूरितस्य तु ।
शनैः क्रमेण यो मोक्षो रेचकः परिपठ्यते ॥ ४६ ॥

तत्र षोडशमात्रस्तु सामान्यः पूरको मतः ।
कुम्भकः षष्टिमात्रः स्यात् पञ्चोद्घातस्तु संस्मृतः ॥ ४७ ॥

युग्मोद्घातो रेचकः स्याच्चतुर्विंशतिमात्रकः ।
प्राणायामो ह्ययं मन्दो मध्योऽस्माद् द्विगुणो भवेत् ॥ ४८ ॥

त्रिगुणस्तूत्तमो ज्ञेयः क्रमेणाभ्यासयोगतः ।
अगर्भाश्च सगर्भाश्च प्राणायामास्तु ते स्मृताः ॥ ४९ ॥

अन्तर्मन्त्रजपोपेताः प्राणायामाः सगर्भकाः ।
अन्तर्जपविहीना ये ते त्वगर्भा इति स्मृताः ॥ ५० ॥

प्राणयामादगर्भात् तु सगर्भः श्रेष्ठ उच्यते ।

तद्यथा —

कुम्भीकृत्योदरे वायुं स्वस्वमन्त्रं धिया जपेत् ॥ ५१ ॥

प्राणायामं सगर्भं तु कुर्यात् तद्गतमानसः ।
एकाक्षरः स्वमन्त्रश्चेत् तस्य स्याद् द्विशतं जपः ॥ ५२ ॥

प्रत्यक्षरविवृद्धयात्वा त्रिंशद्वर्णाननुक्रमात् ।
भावयित्वायतप्राणः प्राणायामं समाचरेत् ॥ ५३ ॥

---

१. 'ज्ञापयि' ख. पाठः.

अष्टार्णादिप्रकृत्यन्तं तन्त्राण्येकैकलोपतः ।
प्राणायामा विधातव्यास्तत्तद्ध्यानोपबृंहिताः ॥ ५४ ॥

तत्र विज्ञाय देहं च नाडीर्वायुं च तत्स्थितम् ।
तच्छुद्धिं च विधायाथ प्राणायामं समाचरेत् ॥ ५५ ॥

तद्यथा —

षण्णवत्यङ्गुलो देहो देहो लब्धाङ्गुलैः स्वकैः ।
ऊर्ध्वं शरीरादधिकं प्राणः स्याद् द्वादशाङ्गुलम् ॥ ५६ ॥
मेढ्रादूर्ध्वं द्व्यङ्गुलं तु देहमध्यमुदीरितम् ।
मूलाधारः स च त्र्यश्रो देवादीनां नृणामपि ॥ ५७ ॥
पक्ष्यादीनां तु वेदाश्रस्त्वण्डजानां तु वर्तुलम् ।
चतुष्पदानां हृन्मध्ये क्रोडमध्येऽण्डजन्मनाम् ॥ ५८ ॥
मूलादूर्ध्वं मनुष्याणां नाभिकन्दो नवाङ्गुलात् ।
नाभिचक्रं तदूर्ध्वं तु द्वादशारमसुस्थितिः ॥ ५९ ॥
नाभेरधस्तात् कन्दाख्ये कुण्डलिन्यष्टवर्तुला ।
प्रसुप्तभुजगाकारा चतुरङ्गुलविस्तृता ॥ ६० ॥
द्वासप्ततिसहस्राणि नाड्यस्तन्मध्यनिर्गताः ।
अष्टाविंशतिसंख्याः स्युस्तासां मुख्यास्तु नाडयः ॥ ६१ ॥
तासां च दश वै श्रेष्ठा इडाद्यास्तास्वपि त्रयम् ।
इडा पिङ्गा सुषुम्ना च गान्धारी हस्तिजिह्विका ॥ ६२ ॥
सुयशालम्बुषा पूषा कुहूश्चैव च शङ्खिनी ।
एतास्विडा पिङ्गला च सुषुम्ना चोत्तमाः स्मृताः ॥ ६३ ॥
तासामथ सुषुम्नाख्या ब्रह्मनाडी परा स्मृता ।

इति नाडीदशकम् ॥

विमला घोषणी पृथ्वी ततस्त्वाप्यायनी मता ॥ ६४ ॥
तेजोवती वायवी च गगना चैव रोधनी ।
रसावाहा च मृद्वङ्गी संसनी चापि मर्शनी ॥ ६५ ॥
शब्दस्पर्शवहे दूर्णा सुरूपा रसधारणी ।
सर्वगा चेति निर्दिष्टा नाड्योऽष्टादश क्रमात् ॥ ६६ ॥

अथ प्राणादयः पञ्च नागाद्याश्चापि पञ्च हि ।
प्राणस्तु हृत्पद्मगत आसनाद्धृदयस्थितिः ॥ ६७ ॥

निःश्वासोच्छ्वासकासादीन् कुर्वन् वक्षः समाश्रितः ।
प्रयाणं कुरुते नित्यं य (स्या ? स्मात्) प्राणः प्रकीर्तितः ॥ ६८ ॥

अवाङ्मूत्रमलादीनां[1]मपानो(?) हस्तादिसन्धिगः ।
हानोपादानकर्मा च तस्माद् व्यान इति स्मृतः ॥ ६९ ॥

ऊर्ध्वं नयत्युदानस्तु नाभेराशिरसि स्थितः ।
गात्रनेत्रविकाराद्यं कर्मोदानस्य तु स्मृतम् ॥ ७० ॥

समानः सर्वकायं तु व्याप्य सन्धिषु च स्थितः ।
त्वगसृङ्मांसमेदोस्थिसंस्था नागादिवायवः ॥ ७१ ॥

ललाटिकोरश्शङ्खांसनाभिस्थास्ते त्वनुक्रमात्(?) ।

अथ वर्णाः—

नीलेन्द्रगोपगोक्षीरविद्युदर्केन्दुसप्रभाः ॥ ७२ ॥

कुन्दभिन्नाञ्जनार्काश्मकुसुम्भकुसुमोपमाः ।
आहारपचनाद्यन्तं प्राणकृत्यमितीरितम् ॥ ७३ ॥

पोषणाद्यं समानस्य कर्मेति परिपठ्यते ।
उद्गाराद्यं तु नागस्य कूर्मस्योन्मीलनादिकम् ॥ ७४ ॥

कृकरस्य क्षुतं कर्म जृम्भाद्यं देवदत्तजम् ।
धनञ्जयस्य शो (भा ? षाद्यं) मृतं च न विमुञ्चति ॥ ७५ ॥

मध्येन तु शरीरस्य सुषुम्ना सूत्रवत् स्थिता ।
बिन्दोर्मूर्धानमासाद्य ब्रह्मरन्ध्रेण निर्गता ॥ ७६ ॥

इडा च पिङ्गला चैव वामतोऽस्याश्च दक्षिणे ।
सुषुम्नायां स्थिते वामदक्षिणप्राणयोः सृते[2] ॥ ७७ ॥

इडापृष्ठात्तु गान्धारी सव्यनेत्रविनिर्गता ।
हस्तिजिह्वा च वामाङ्घ्रेरङ्गुष्ठाग्राद् विनिर्गता ॥ ७८ ॥

सुयशा दक्षिणस्याङ्घ्रेर्ज्येष्ठिकाग्रान्तनिर्गमा ।
अलम्बुषा त्वधो नाभेः पायुमूलान्तनिर्गमा ॥ ७९ ॥

---

[1] 'नां व्यानो ह' क. पाठः. [2] 'स्मृ' ख. पाठः.

पूषा तु पिङ्गलापृष्ठाद्[1] दक्षिणश्रोत्रनिर्गता ।
नाडयो विमलाद्यास्तु दश हस्ताग्रनिर्गताः ॥ ८० ॥
कुहूस्तु पिङ्गलापृष्ठाद् दक्षिणाक्षि[2]विनिर्गता ।
विश्वोदरोदरं याता सरस्वत्यपि मेढ्रगा ॥ ८१ ॥
अन्तस्सुषिरसंयुक्ताः सर्वा अपिच नाडयः ।
पूर्णरक्ताश्च ताः सर्वाः पद्मतन्तुवि + + + ॥ ८२ ॥
तासां शाखोपशाखानां भेदस्तु बहुधा स्मृतः ।
देहाद् बहिर्निर्गताश्च रोमसंज्ञाः शरीरगाः ॥ ८३ ॥
श्मश्रूणि मुखजातानि केशाः शिरसि निर्गताः ।
तिस्रः कोट्योऽर्धकोटिश्च केशरोमाणि देहगाः ॥ ८४ ॥
जरायुजानां देहेषु पशूनां त्रिगुणाः स्मृताः ।
पक्षिणां तु ततोऽर्धार्धं सिरारोमाणि संख्यया ॥ ८५ ॥
सिरारोमादिनियमो नहि कीटादिजातिषु ।
स्थावराणामपि तथा सर्वे ते प्राणिनः[3] स्मृताः ॥ ८६ ॥
एवं नाडीर्विदित्वा तु प्राणायामं समाचरेत् ।
एवं यमाश्च नियमा(नि ? श्च) तथासनानि
प्राणादयश्च पवना अपि नाडिचक्रम् ।
योगस्य यानि[4] बहिरङ्गतयोदितानि
सेव्यानि तानि विदितानि यथोपदेशम् ॥ ८७½ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
योगपादे योगलक्षणादिपटलो द्वितीयः ॥

अथ तृतीयः पटलः ।

अथ योगं विविदिषुः प्राप्य योगविदं गुरुम् ।
शुश्रूषार्थप्रदानाद्यैराराध्य परितोष्य च ॥ १ ॥
तस्माद् विज्ञाय योगं तु दत्त्वा तु गुरुदक्षिणाम् ।
अनुज्ञातस्तु गुरुणा गत्वा देशं मनोरमम् ॥ २ ॥

---

१. 'कुण्डला' ख. पाठः. २. 'णो' क. पाठः. ३. 'ना', ४. 'हा' ख. पाठः.

पुण्यक्षेत्रनदीतीर्थवनसानुमदादिकम् ।
तत्राश्रमे मठे वाथ प्राज्य[१]मूलफलोदके ॥ ३ ॥
ग्रामे देवालये वापि स्वगृहे वा मनोरमे ।
परिशुद्धा(त्मे)वान् योगी निस्संगो विजितेन्द्रियः ॥ ४ ॥
स्ववर्णाश्रमकर्माणि चोदितानि समाचरन् ।
युक्ताहारविहारस्तु युक्तस्वप्नावबोधनः ॥ ५ ॥
शान्तस्त्रिषवणस्नायी सर्वत्र समदर्शनः ।
पिचुतूलादिसंपूर्ण आसने सोत्तरच्छदे ॥ ६ ॥
विशुद्धे सम्यगासीनो विजितासनमास्थितः ।
विनायकं गुरुं चाथ नमस्कृत्य ततः शिवौ ॥ ७ ॥
ऋजुकायशिरोग्रीवः कृत्वान्तर्यजनं हृदि ।
योगं युञ्जीत मतिमान् न द्रुतं न विलम्बितम् ॥ ८ ॥
अथ ये ग्रन्थयः पञ्च भूतशुद्धौ प्रदर्शिताः ।
हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रस्थिताः क्रमात् ॥ ९ ॥
तानूर्ध्ववायुना भित्त्वा मुक्त्वा दक्षिणनासया ।
वामनासापुटेनाथ पूरयेन्मरुतोदरम् ॥ १० ॥
पूरकस्तु स विज्ञेयो मात्राषोडश(का? को) विधिः ।
निरुन्ध्यान्निर्गमं तस्य कुम्भकाख्यः स तु स्मृतः ॥ ११ ॥
स चापि षष्टिमात्रः स्याद् रेचकस्तस्य रेचनात् ।
पिधाय वामघ्राणं तु दक्षिणेनैव रेचयेत् ॥ १२ ॥
स तु रेचक उद्दिष्टो मानं तेषां निगद्यते ।
पूरके ह्यष्टमात्राभिर्नाभिपद्मे चतुर्मुखम् ॥ १३ ॥
अकारमूर्तिमगुणं समाधिस्थं चतुर्भुजम् ।
कुम्भके च चतुष्षष्टिमात्रामात्रं तु धारयेत् ॥ १४ ॥
उकारमूर्तिं शङ्खाभं वासुदेवं हृदम्बुजे ।
शङ्खचक्रधरं सौम्यं समाधिस्थं चतुर्भुजम् ॥ १५ ॥
किरीटिनं स्मरेच्छक्त्या यावत् तावत् तु कुम्भयेत् ।
रुद्रं मकारमूर्तिं तु भ्रूमध्यकमले स्मरन् ॥ १६ ॥

---

[१] 'ण्य' क. पाठः.

शुक्लवर्णं समाधिस्थं चतुर्बाहुं त्रिलोचनम् ।
एणटङ्कधरं सौम्यमिन्दुमौलिं कपर्दिनम् ॥ १७ ॥
मात्राद्वादशमात्रं तु दक्षिणेनैव रेचयेत् ।
अथ प्रणवतो वायुं समापूर्य भ्रुवोऽन्तरात् ॥ १८ ॥
बिन्दुमत्यक्षरे तस्मिन् नियम्यात्मानमात्मनि ।
मनसा तपदोङ्कारं जपेन्मात्रत्रयाधिकम् ॥ १९ ॥
एष प्राणजयोपायो दृष्टादृष्टफलप्रदः ।
भूतशुद्ध्युक्तमार्गेण प्राणायामास्तु पञ्च ते ॥ २० ॥
शोषणाद्यास्त्रयश्च स्युः सहैतान् पृथगाचरेत् ।
सन्ध्ययोर्वायुमाकृष्य पिबन् वाग्मी च जायते ॥ २१ ॥
व्याधयो ह्यस्य नश्यन्ति मासान् मासैस्तु वा क्रमात् ।
बधिरो मूर्ध्न्यथात्मानमाधायापूर्य मारुतम् ॥ २२ ॥
पिधाय सर्वद्वाराणि व्योमेन्दोरमृताप्लुतम् ।
कर्णाभ्यां विसृजेद् वायुं बाधिर्यादेष मुच्यते ॥ २३ ॥
पार्श्वयोर्वाथ नाभौ वा धारयेद् गुल्मशूलनुत् ।
यत्र यत्र रुजा देहे तत्र तत्र तु मारुतम् ॥ २४ ॥
आरोप्य प्राणनियमात् तं तं रोगं व्यपोहति ।
अथापानं समुत्कृष्य वह्निस्थाने नियोजयेत् ॥ २५ ॥
निरुन्ध्याच्च षडक्षाणि ततो नादः प्रवर्तते ।
नाभेरामूर्धतो वीणाध्वनिर्नादः प्रवर्तते ॥ २६ ॥
सुषुम्नयोर्ध्वङ्गमया तच्छ्रुत्वासौ विमुच्यते ।
ब्रह्मरन्ध्रेण तस्याथ प्राणोऽप्युच्चरतीच्छया ॥ २७ ॥
हृदयाम्भोरुहान्तःस्थः प्राणो हंस इतीरयन् ।
उच्छ्वासं जनयेच्छश्वदहोरात्रे तु संख्यया ॥ २८ ॥
षष्ट्युच्छ्वासः स्मृतः प्राणः षट् प्राणा घटिका स्मृता ।
घटिकानां स्मृतः षष्ट्या त्वहोरात्रस्तु मानुषः ॥ २९ ॥
श्वासनिःश्वासविच्छेदः प्राणायामात् प्रवर्तते ।
अथोदरे नाभिपद्मे ध्यात्वा तु चतुराननम् ॥ ३० ॥

अकारमूर्तिमिडया पूरयेन्मरुतोदरम् ।
कुम्भीकृत्य यथापूर्वं धियैव प्रणवं जपन् ॥ ३१ ॥
स्थिरीकृत्य तु संहृत्य रेचयेद् दक्षिणेन तु ।
अथवा हृदयाब्जस्थं वासुदेवं चतुर्भुजम् ॥ ३२ ॥
शङ्खचक्रधरं सौम्यं शुक्लवर्णं किरीटिनम् ।
चतुर्बाहुमुदारस्थमुकारमयविग्रहम् ॥ ३३ ॥
स्मरञ्जपन् धिया तारं पूर्ववत् पूरकुम्भकौ ।
रेचकं च विधाय स्यात् प्राणायामस्तु वैष्णवः ॥ ३४ ॥
भ्रुवोरन्तरतोऽम्भोजे मकारमयविग्रहम् ।
भस्माङ्गरागधवलं रुद्रं ध्यायंस्त्रिलोचनम् ॥ ३५ ॥
सूपविष्टं चतुर्बाहुं पूर्ववत् प्रणवं जपेत् ।
पूरकाद्यैर्यथापूर्वं रौद्रोऽयं प्राणसंयमः ॥ ३६ ॥
बिन्दुस्थानेऽम्बुजासीनमष्टबाहुं चतुर्मुखम् ।
ईश्वरं प्रोक्तरूपादिं ध्यायंस्तारं जपन् धिया ॥ ३७ ॥
पूरकाद्यैर्यथापूर्वं प्राणायामोऽयमैश्वरः ।
तथैव मूर्ध्नि कमले ध्यायन् देवं सदाशिवम् ॥ ३८ ॥
तारं जपन् धिया प्राग्वत् प्राणानायम्य पूर्ववत् ।
सर्वदोषहरोऽयं स्यात् सादेशः प्राणसंयमः ॥ ३९ ॥
कारणाधीशसंयुक्ताः पञ्चैते प्राणसंयमाः ।
सर्वकल्मषदोषघ्नाः सर्वे सर्वार्थसाधकाः ॥ ४० ॥
योगसिद्धिकराः पञ्च प्राणायामा भवन्ति हि ।
अथ हृत्पद्ममध्ये वा वि(न्दू ? न्दौ) वा व्योमपङ्कजे ॥ ४१ ॥
सूर्यादिमण्डलाधीशतत्त्वतत्त्वेशमूर्तिभिः ।
पुर्यष्टकाष्टच्छदने स्वस्वाङ्गावरणान्विते ॥ ४२ ॥
यो यो यस्या देवताया भक्तस्तां तत्र संस्मरन् ।
तत्तन्मन्त्रं जपन् बुद्ध्या पूरकादिक्रमेण तु ॥ ४३ ॥
प्राणसंयमनं कुर्वन् योगसिद्धिमवाप्नुयात् ।
अथवा हृदयाब्जादौ पश्यन् ज्योतिर्निरञ्जनम् ॥ ४४ ॥

ब्रह्मादिकारणोपाधिनिर्मुक्तं चिद्घनं शिवम् ।
ध्यायंस्त्रिमात्रं चिन्मात्रप्रणवं वा धिया जपन् ॥ ४५ ॥
प्राणायामं प्रकुर्वीत न चिरात् सिद्धिमश्नुते ।
मूलाब्जात् कुण्डलिन्यास्तु ध्यायञ्च्छक्तिं विनिर्गताम् ॥ ४६ ॥
विद्युल्लेखोपमामूर्ध्वङ्गमामा व्योमपङ्कजा(न्?त्) ।
परमामृतनिःष्यन्दैः प्लाव्यमानां ततोऽपि हि ॥ ४७ ॥
निवृत्तां पुनरायान्तीं मूलाम्भोजं पुनः पुनः ।
सुषुम्नयोर्ध्वं गच्छन्तीममृतासारवर्षिणीम् ॥ ४८ ॥
ध्यायञ्च्छक्तिं परां सूक्ष्मां चिन्मात्र(प्रणवं) तु वा ।
जपन् धिया यथापूर्वं प्राणानायम्य योगवित् ॥ ४९ ॥
योगसिद्धिमवाप्नोति नचिरान्नात्र संशयः ।
अथवा प्रणवाद्यां तु सप्तव्याहृतिपूर्विकाम् ॥ ५० ॥
गायत्रीं शिरसोपेतां त्रिः पठन् मनसा हृदि ।
व्योम्नि वा परमात्मानं सावित्रीं सूर्यमेव वा ॥ ५१ ॥
ध्यायन् प्रागुक्तमार्गेण पूरकादिक्रमेण तु ।
प्राणसंयमनं कुर्वन् योगी सिद्धिमवाप्नुयात् ॥ ५२ ॥
षड्भिर्द्वादशभिश्चाथ तथा षोडशभिः क्रमात् ।
मनोवाक्कर्मजानीह पातकानि विनाशयेत् ॥ ५३ ॥
प्राणायामस्ततश्चापि द्विगुणैस्त्रिगुणैरपि ।
अष्टोत्तरशतस्यापि(?)भ्रूणहत्यां च नाशयेत् ॥ ५४ ॥

अत्र याज्ञवल्क्यवसिष्ठौ—

“अपि भ्रूणहनं मासात् पुनात्यहरहः कृतः ।
ऋतुत्रयात् पुनात्येनं जन्मान्तरकृतादघात् ॥
वत्सरादिह सर्वज्ञो ब्रह्मविच्चापि जायते ।
प्रस्वेदकम्पोत्थानानां जनना: कुंभकाः (पुनः) ॥
कनिष्ठमध्यश्रेष्ठाः स्युः फलं तेषां च तादृशम् ।
प्राणायामैः क्रमाभ्यस्तैर्विजिताः स्युश्च वायवः ॥

निःश्वासोच्छ्वसनाद्यं च विना ज्ञानं च शक्यते ।
विनैव पूरकं तद्वद् रेचकं च विनैव तु ॥
कुम्भकेनैव सुचिरमपि तिष्ठेज्जितानिलः ।
मनोजव(इ?ग)तिश्च स्याद् दूरादर्थांश्च पश्यति ॥
खेचरो द्वादशाब्देन जरापलितवर्जितः ।
चिरजीवी च भवति ततो द्विगुणवत्सरैः ॥
ऋषिगन्धर्वदेवादीन् पश्यत्याभाषतेऽपि च ।
ततोऽपि द्विगुणैर्वर्षैर्लभते चाणिमादिकान् ॥"

प्राणायामाधिकारः ।

इन्द्रियाणां यथास्वं स्वं विषयं परिधावताम् ।
बलादाहरणं तेषां प्रत्याहारं प्रचक्षते ॥ ५५ ॥
कर्मणां वि (जि? हि)तानां तु नित्यादीनां विधिं विना ।
मनसा ह्यनुष्ठानं प्रत्याहारं विदुर्बुधाः ॥ ५६ ॥
अथवाष्टादशस्थानेष्वाकृष्याधाय मारुतम् ।
स्ववशे स्थापनं केचित् प्रत्याहारं वदन्ति हि ॥ ५७ ॥

तानि तानि स्थानानि —

पादाङ्गुष्ठद्वयं गुल्फे जङ्घे जानूरुपायवः ।
मेढ्रं कटिस्ततः कन्दो नाभी हृदयवक्षसी ॥ ५८ ॥
कण्ठकूपं तथा तालु घ्राणं नेत्रे भ्रुमध्यकम् ।
मूर्धा चाष्टादशैतेषु स्थानात् स्थानं क्रमेण तु ॥ ५९ ॥
आहृत्य धारणं वायोः प्रत्याहारः स्मृतो बुधैः ।
अनेन रोगशान्तिः स्यादायुषो वर्धनं तथा ॥ ६० ॥

प्रत्याहाराधिकारः ।

यमाद्यैः पञ्चभिः (क?)स्तैर्विशुद्धस्य तु योगिनः ।
आत्मन्यवस्थितिं बुद्धेर्धारणं सम्प्रचक्षते ॥ ६१ ॥
प्रदेशावस्थितं देहे बुद्धेस्तु मरुता सह ।
+ + + + + + + + + + + + + + + + ॥ ६२ ॥

+ + + + + + + + + + + + + + + + ।
+ + + + + भूतेषु ब्रह्मादीन् कारणेश्वरान् ॥ ६३ ॥
जान्वादिभूतशुद्ध्युक्तमार्गेण स्वस्वबीजतः ।
स्मृत्वा बुद्धिं तु तत्रैव प्रतीत्यन्तरवर्जिताम् ॥ ६४ ॥
संस्थाप्य प्राणसहितां धारणाभिश्च पञ्चभिः ।
त्रिभिस्त्रिभिर्भवे + + + + + + + + + + ॥ ६५ ॥
ब्रह्मादीन् कारणेशांस्तु स्वैःस्वैः संयोज्य कारणैः ।
प्रणवाक्षरसम्भेदात् क्षित्याद्यैर्मण्डलाक्षरैः ॥ ६६ ॥
निष्कले द्वादशान्तस्थे शिवे संयोज्य चिद्घने ।
तन्मयं च स्वमात्मानं सर्वगं सर्ववेदिना ॥ ६७ ॥
+ + + + + + + + + + + + + + + + + ।
+ + + + + + + + + + + + + + + + भाक् ॥ ६८ ॥

धारणाधिकारः ।

अथ ध्यानं द्विधा प्रोक्तं सकलं निष्कलं तथा ।
साकारं सकलं ध्यानं निराकारं तु निष्कलम् ॥ ६९ ॥
चतुर्भुजादिशुक्लादिद्वित्र्यक्षैकाननादिभिः ।
भेदैरिष्टसुराकारस्मरणं हृदयादिषु ॥ ७० ॥
साकारध्यानमुद्दिष्टं निराकारमथोच्यते ।
हृत्पद्मे वा भ्रुवोर्मध्ये बिन्दौ वा द्वादशान्तगे ॥ ७१ ॥
लैङ्गिकं परमं ज्योतिर्ध्यायेदङ्गुष्ठमात्रकम् ।
कदम्बगोलकाकारं भाभासितदिगन्तरम् ॥ ७२ ॥
तस्मान्नीवारशूकाभं ज्योतिरूर्ध्वं सुषुम्नया ।
निर्गतं द्वादशान्तस्थशिवेनाप्येकतां गतम् ॥ ७३ ॥
स्वदेहरोमकूपेभ्यो निर्यज्ज्योतिश्शिखोज्ज्वलम् ।
विश्वमावृत्य तु व्याप्तं ध्यायेन्निश्चलमानसः ॥ ७४ ॥
ध्यानानामुत्तमं त्वेतद् योगश्चायं परो मतः ।
एवं सन्ततयुक्तात्मा योगी निर्धूतबन्धनः ॥ ७५ ॥

1, 'त' ख. पाठः.

अणिमादिगुणैश्वर्याण्यधिगम्याप्यविस्मितः ।
षडूर्मिभिरसंस्पृष्टो मैत्रादिगुणवर्जितः ॥ ७६ ॥
क्षमादमशमोपेतः सर्वभूतानुकम्पकः ।
छित्त्वा गुणमयान् पाशान् परं निर्वाणमृच्छति ॥ ७७ ॥
धारणानां द्वादशकैरायतं ध्यानमिष्यते ।
ध्यानाद् द्वादशकायामः समाधिर्भवति स्फुटम् ॥ ७८ ॥

ध्यानाधिकारः ।

समाधिः समभावः स्याज्जीवात्मपरमात्मनोः ।
तद्वच्छिवाह्वयं ब्रह्म परंज्योतिः सुनिर्मलम् ॥ ७९ ॥
एकं ज्ञानघनं शान्तं सर्वकारणकारणम् ।
अवस्थात्रयनिर्मुक्तं षड्भावविकृतेः परम् ॥ ८० ॥
सर्वानुग्राहकं विश्वव्यापि नित्यं निरञ्जनम् ।
आकाशादिमहाभूतैः शब्दाद्यैर्विषयैरपि ॥ ८१ ॥
दशेन्द्रियमनोबुद्धिसाहङ्कारगुणैरपि ।
प्राणादिभिः प्रकृत्या च पुरोगाभ्यामविद्यया ॥ ८२ ॥
नियत्या कलया कालमायाभ्यां च विवर्जितम् ।
सादेशेश्वरविद्याभिः शक्त्या चाखिलकारणम् ॥ ८३ ॥
नादान्तभासकं शश्वत् पञ्चकृत्यैकहेतुमत् ।
अनाद्यन्तं परं सूक्ष्मं तद् योऽहं सोऽहमित्यपि ॥ ८४ ॥
चित्ताधानं शिवे सम्यक् स समाधिरिति स्मृतः ।
यदा समरसं चित्तं सर्वत्र समदर्शनात् ॥ ८५ ॥
रागादिदोषरहितं हेयोपादेयनिःस्पृहम् ।
आहितं स्याच्छिवे शश्वत् समाधिः परमः स्मृतः ॥ ८६ ॥
अनात्मबुद्धिर्देहेऽस्मिन्नस्वबुद्धिश्च वस्तुषु ।
एषणात्रयमुक्तस्य कर्मपुत्रार्थवर्जनात् ॥ ८७ ॥
सर्वारम्भपरित्यागात् सर्वसङ्गविवर्जनात् ।
सर्वव्यापिनि चिन्मात्रे शिवेनैक्येन भावना ॥ ८८ ॥

अविच्छेदेन सततं समाधिः पा(शमोचनः) ।
+ + + + + + + + + + + + त एव वा ॥ ८९ ॥

जिघ्रतो मौनिनो वाचं ब्रुवतः शयितस्य वा ।
आसीनस्यापि मिषतो मीलिताक्षस्य तिष्ठतः ॥ ९० ॥

जाग्रतः स्वपतो वापि स्वप्नान् वा परिपश्यतः ।
गच्छतोऽपि यदा चेतः समाधिस्थस्य निश्चलम् ॥ ९१ ॥

करणानां तु संहाराद्व्यक्तिर्विषयेष्वपि ।
स योगः परमो ज्ञेयस्तद्वान् योगीन्द्र उच्यते ॥ ९२ ॥

ऐश्वर्याण्यणिमादीनि योगस्यावान्तरं फलम् ।
अष्टैश्वर्यगुणा योगस्यान्तराया भवन्ति हि ॥ ९३ ॥

ते(ष ? षु)योग + + + + + + + नाभिरोचयेत् ।
फलं हि मोक्षो योगस्य तस्मात् तदभिरोचयेत् ॥ ९४ ॥

एवं साङ्गोऽत्र योगस्तु समासात् संप्रदर्शितः ।
संस्मृत्य योगशास्त्रेभ्यः शिवानुग्रहतः स्फु(टम्) ॥ ९५ ॥

+ + + त्र हि मुख्यमित्थमुदितं भोगा यतो वाञ्छिताः
पश्वादिप्रविचारचारुविशदज्ञानक्रियायोगतः ।
अष्टैश्वर्यगुणास्तथैव सुलभं निःश्रेयसं श्रेय(सा)
तामीशानशिवोऽभ्यधाद् सुरगुरुः सिद्धान्ततापद्धातिम् ॥ ९६ ॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे उपरिभागे
योगपादे प्राणायामादिपटलस्तृतीयः ।
योगपादः समाप्तः ॥

समाप्ता चेयमीशानशिवगुरुदेवस्य कृतिः
सिद्धान्तसारपद्धतिः ॥

शुभं भूयात् ॥

READY FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah.	1	0	0
स्यानन्दूरपुरवर्णनप्रबन्धः (Kavya) Syânandûrapuravarnanaprabandha by H. H. Svâti Sri Râma Varma Mahârâjah, with the commentary Sundarī of Râjarâja Varma Koil Tampurân.	2	0	0

Trivandrum Sanskrit Series.

No. 1—दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni.	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni.	0	2	0
No. 3—नलाभ्युदयः (Kâvya) by Vâmana Bhatta Bâna (Second Edition).	0	4	0
No. 4—शिवलीलार्णवः (Kâvya) by Nîlakantha Dîkshita.	2	0	0
No. 5—व्यक्तिविवेकः (Alankâra) by Mahima Bhatta with commentary	2	12	0
No. 6—दुर्घटवृत्तिः (Vyâkarana) by Saranadeva.	2	0	0
No. 7—ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa.	1	0	0
No. 9—विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10—मातङ्गलीला (Gajalakshana) by Nîlakantha.	0	8	0
No. 11—तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	4	0
No. 12—परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda.	0	8	0
No. 13—सुभद्राधनंजयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	0	0

	RS.	AS.	P.
No. 14—नीतिसारः (Niti) by Kâmandaka, with the commentary of Sankarârya.	3	8	0
No. 15—स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition).	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa.	1	8	0
No. 17—पञ्चरात्रम् Do. Do.	1	0	0
No. 18—नारायणीयम् (Stuti) by Nârâyana Bhatta with the commentary of Desamangala Vârya.	4	0	0
No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyana Bhatta and Nârâyana Pandita.	1	4	0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.	1	8	0
No. 21—बालचरितम् Do. Do.	1	0	0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa.	1	8	0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part I. 1st & 2nd Kândas).	1	12	0
No. 24—जानकीपरिणयः (Kâvya) by Chakra kavi.	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri.	0	12	0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa.	0	12	0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I. 1st & 2nd Sargas).	1	12	0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas.	0	8	0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II. 3rd Kânda).	2	4	0
No. 30—वास्तुविद्या (Silpa).	0	12	0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III. 4th, 5th & 6th Kândas).	1	0	0

	RS.	AS.	P.
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinatha and Vivarana of Nârâyana Pandita (Part II, 3rd, 4th & 5th Sargas)	2	8	0
No. 33—वाररुचसंग्रहः (Vyâkarana) with the commentary Dîpaprabhâ of Nârâyana.	0	8	0
No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin.	1	4	0
No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha.	1	8	0
No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part III. 6th, 7th & 8th Sargas).	3	0	0
No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghatîya Sarvânanda (Part I. 1st Kânda).	2	0	0
No. 39—चारुदत्तम् (Nâtaka) by Bhâsa.	0	12	0
No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Srî Ruyyaka with the Alankârasarvaswa of Sri Mankhuka and its commentary by Samudrabandha.	2	8	0
No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivarana of Srî Sankara Bhagavat Pâda.	0	4	0
No. 42—प्रतिमानाटकम् (Nâtaka) by Bhâsa.	1	8	0
No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswâmin and Tîkâsarvaswa of Vandyaghatîya Sarvânanda (Part II. 2nd Kânda 1—6 Vargas).	2	8	0

	RS.	AS.	P.
No. 44—तन्त्रशुद्धम् (Tantra) by Bhattâraka Srî Vedottama.	0	4	0
No. 45—प्रपञ्चहृदयम् (Prapanchahridaya).	1	0	0
No. 46—परिभाषावृत्तिः (Vyâkarana) by Nîlakantha Dîkshita.	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Sarasvatî. (Part I.)	1	12	0
No. 48— Do. Do. (Part II.)	2	0	0
No. 49—गोलदीपिका (Jyotisha) by Parameswara.	0	4	0
No. 50—रसार्णवसुधाकरः (Alankâra) by Singa Bhûpâla.	3	0	0
No. 51—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswâmin and Tîkâsarvaswa of Vandyaghatîya Sarvânanda (Part III. 2nd Kânda 7—10 Vargas)	2	0	0
No. 52—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvaswa of Vandyaghatîya Sarvânanda (Part IV. 3rd Kânda)	1	8	0
No. 53—शाब्दनिर्णयः (Vedânta) by Prakâsâtmayatîndra	0	12	0
No. 54—स्फोटसिद्धिन्यायविचारः (Vyâkarana)	0	4	0
No. 55—मत्तविलासप्रहसनम् (Nâtaka) by Srî Mahendravikramavarman.	0	8	0
No. 56—मनुष्यालयचन्द्रिका (Silpa).	0	8	0
No. 57—रघुवीरचरितम् (Kâvya).	1	4	0
No. 58—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Saraswatî (Part III.)	2	0	0
No. 59—नागानन्दम् (Nâtaka) by Sriharshadeva with the commentary Nâgânandavimarsinî of Sivarâma.	3	4	0
No. 60—लघुस्तुतिः (Stuti) by Srî Laghubhattâraka with the commentary of Srî Râghavânanda	0	8	0

	RS.	AS.	P.
No. 61—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Sarasvati (Part IV.)	1	8	0
No. 62—सर्वमतसंग्रहः (Sarvamatasangraha).	0	8	0
No. 63—किरातार्जुनीयम् (Kâvya) by Bharavi with the commentary Sabdârthadîpika of Chitrabhânu (1, 2 and 3 Sargas).	2	8	0
No. 64—मेघसन्देशः (Kâvya) by Kâlidasa with the commentary Pradîpa of Dakshinâvartanatha.	1	0	0
No. 65—मयमतम् (Silpa) by Mayamuni.	3	8	0
No. 66—महार्थमञ्जरी (Darsana) with the commentary Parimala of Maheswarânanda	2	8	0
No. 67—तन्त्रसमुच्चयः (Tantra) by Nârâyana with the commentary Vimarsini of Sankara. (Part I. 1-6 Patalas)	3	4	0
No. 68—तत्त्वप्रकाशः (Agama) by Srî Bhojadeva with the commentary Tâtparyadîpikâ of Srî Kumara.	2	0	0
No. 69—ईशानशिवगुरुदेवपद्धतिः (Tantra) by Isânasivagurudevamisra (Part I. Sâmānyapâda).	1	8	0
No. 70—आर्यमञ्जुश्रीमूलकल्पः (Part I).	2	8	0
No. 71—तन्त्रसमुच्चयः (Tantra) by Nârâyana with the commentary Vimarsini of Sankara (Part II. 7—12 Patalas).	3	8	0
No. 72—ईशानशिवगुरुदेवपद्धतिः (Tantra) by Isanasivagurudevamisra (Part II. Mantrapada)	4	0	0
No. 73—ईश्वरप्रतिपत्तिप्रकाशः (Vedanta) by Sri Madhusudanasarasvati	0	4	0

	RS.	AS.	P.
No. 74—श्रीयाज्ञवल्क्यस्मृतिः (Dharmasâstra) with the commentary Bâlakrîdâ of Visvarûpâchârya. (Part I—Âchâra and Vyavahâra Adhyâyas)	4	0	0
No. 75—शिल्परत्नम् (Silpa) by Srîkumâra (Part I).	3	4	0
No. 76—आर्यमञ्जुश्रीमूलकल्पः (Part II).	3	4	0
No. 77—ईशानशिवगुरुदेवपद्धतिः (Tantra) by Isanasivagurudemisrava (Part III. Kriyapada 1—30 Patalas).	3	4	0
No. 78—आश्वलायनगृह्यसूत्रम् with the commentary Anavila of Haradattacharya.	5	0	0
No. 79—अर्थशास्त्रम् of Kautalya with commentary by Mahamahopadhyaya T. Ganapati Sastri (Part I—1 & 2 Adhikaranas).	8	0	0
No. 80—अर्थशास्त्रम् of Kautalya with commentary by Mahamahopadhyaya T. Ganapati Sastri (Part II—3 to 7 Adhikaranas).	8	0	0
No. 81—श्रीयाज्ञवल्क्यस्मृतिः (Dharmasastra) with the commentary Bâlakrida of Visvarûpâchârya (Part II. Prayaschittâdhyâya)	3	12	0
No. 82—अर्थशास्त्रं of Kautalya with commentary by Mahamahopadhyaya T. Ganapati Sastri (Part III—8 to 15 Adhikaranas.)	8	0	0
No. 83—ईशानशिवगुरुदेवपद्धतिः (Tantra) by Isanasivagurudevamisra (Part IV. Kriyapada 31–64 Patalas and Yogapada).	4	0	0

Apply to:—

The Curator,
for the publication of Sanskrit Manus[illegible]
Trivandrum.